महाराजाधिराज-कामेश्वरसिंह-ग्रन्थमाला-पुष्पम् २१

भट्टवादीन्द्ररचित-वैशेषिकवार्तिक-कृष्णभूपालरचित-
त्रिसूत्रीप्रकाशाऽज्ञातकर्तृकवृत्तिभिर्विलसितम्

महर्षिकणाद-प्रणीतम्

# वैशेषिक-दर्शनम्

सम्पादकः
प्रो० अनन्तलाल ठक्कुरः

प्रकाशकः
**कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः**
**कामेश्वरनगरम्, दरभङ्गा**

शाकाब्दः १९०७, १९८५ ईशवी

मूल्यम् ६५ रु०

© सर्वाधिकारः सुरक्षितः

प्रथमसंस्करणम् १९८५ ई० (१००० प्रतियां)

**सम्पादकः**

प्रो० अनन्तलाल ठक्कुरः

**प्रकाशकः**

कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालयः

कामेश्वरनगरम्, दरभङ्गा

**मुद्रकः**

रमाशंकर पण्ड्या

तारा प्रिंटिंग वर्क्स, वाराणसी

# आमुखम्

मन्ये नैवास्ति सचेतेसां विप्रतिपत्तिरत्र यच्छब्दार्थाविव संसारः। समग्रे तत्र शब्दयथार्थज्ञानाय यथा व्याकरणशास्त्रज्ञानं भवत्यपेक्षितं, तथैवार्थयथार्थज्ञानाय वैशिषिक-दर्शनज्ञानमध्यपेक्षितं सर्वथा। अत एवोक्तमभियुक्तैः—

"काणादं पाणिनीयं च सर्वशास्त्रोपकारकमि"ति। सति चैवं कृष्णभूपाल-विरचितस्य वैशेषिकदर्शन-त्रिसूत्रीवार्तिकस्य, भट्टवादीन्द्र विरचितस्य च तस्याऽनुपलब्ध-पूर्वस्य प्रकाशनमिदमवश्यं, स्याज्जिज्ञासूनां सुखकरमिति मत्वा विश्वविद्यालये-नास्मदीयन प्रकाश्यते तावदिदं व्याख्यासंग्रहसारं वैशेषिकदर्शनं स्वीय महाराजा-धिराज-कामेश्वरसिंह ग्रन्थ-मालाऽन्तर्गततया।

आशासे सम्प्राप्येदं ध्रुवं प्रमुदिताः स्युरधिकाधिकबोधलिप्सव इत्यलमधिकेने-दानीमिति—

डा० जयमन्त मिश्रः

**कुलपतिः**

का० सिं० द० सं० वि० वि०

दरभंगा (विहारः)

# औमक्रमिकम्

मन्ये नास्त्येव कस्याऽपि सचेतसो भारतीयदर्शनाभिज्ञस्य विप्रतिपत्तिलेशोप्यत्र, यद् वैशेषिकं ननु दर्शनं महामुनिना भगवता कणादेन प्रणीतं, विभ्राजते विश्वम्महद् भगवतो हरेरिव सुमहदुदरं द्रव्यगुणकर्मसामान्यविशेषसमवायाभावात्मकं समग्रं जगत् स्वस्थीकुर्वत् प्रतिपाद्यतया। कथनस्यास्य सारांशोऽयं यद् वृत्तित्वात्मकेन धर्मत्वेनानुगतीकृत्य समग्रं जगत् "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति स्वद्वितीयसूत्राऽनुसारं दर्शनं यदिदं सम्पाद्य सर्वज्ञतां मानवसमाजसमपेक्षित-भोगमोक्षोभयसम्पादनक्षमतया धत्ते तदवश्यमाश्रयणीयंतां श्रेयोऽर्थिभिः। दशाध्ययोरूपस्यास्य सुमहतो दर्शनस्य प्रसिद्धस्य मूलव्याख्याग्रन्थनिर्मातृतया परम-प्रसिद्धाः सूरयो (१) रावण (२) प्रशस्तपाद (३) भारद्वाज (४) उदयनाचार्य (५) श्रीधराचार्य (६) श्रीवल्लभाचार्य (७) व्योम-शिवचार्य (८) शिवादित्य (९) भासर्वज्ञ (१०) भवनाथ मिश्र (११) शङ्कर मिश्र (१२) अन्नंभट्ट (१३) गोवर्द्धनाचार्य (१४) पद्मनाभ मिश्र (१५) केशवमिश्र (१६) रघुनाथ-शिरोमणि (१७) रघुदेव (१८) जगदीशतर्कालङ्का (१९) राजशेखरसूरि (२०) वेणी दत्त (२१) जानकीनाथ (२२) विश्वनाथ-पञ्चानन (२३) महादेव भट्ट (२४) दिनकर भट्ट (२५) रामरुद्र (२६) जयनारायण तर्क-पञ्चानन (२७) चन्द्रकान्ततर्कालङ्कराः। अप्रसिद्धा अपि सन्त्यन्ये वहवो येषु (१) कृष्ण-भूपाल-(२) भट्टवादीन्द्रयो र्नमिनी भजेते वैशिष्ट्यम्। तत्र प्रथमेन कृष्णभूपालेन तर्कसागर-नामकं त्रिसूत्रीवार्तिकं लिखितमस्ति वैशेषिकदर्शन-प्रथमाध्यायप्रथमाह्निक-प्रारम्भिकसूत्रत्रयमात्रं व्याख्येयतया परिगृह्येति "इति यदुकुलकलिकाविकासभास्कर-भूपाललित-महाराजाधिराज-श्रीकृष्णभूपालविरचिते तर्कसागरनाम्नि वैशेषिक-सूत्रवार्तिक-त्रिसूत्री-व्याख्या समाप्तेति पुष्पिकालेखादवगम्यते। एतत्पुष्पिकालेखादिदमपि लभ्यत यत् महाराजकृष्णभूपालेन समग्रस्य वैशेषिकदर्शनस्योपरि तर्कसागरनामकं वार्तिकं लिखितुमारब्धमासीत् परन्त्वितः परं तेन न लिखितुं पारितमथवा लिखितमपि नष्टतया प्रच्छन्नतया वा न लभ्यमिदानीम्। अन्यद्यद्भवति तद्भवतु, परमेतत्तु नूतनमितो ज्ञातुंशक्यत एवाज्ञातं पूर्वं यद्वेदान्तदर्शनचतुस्सुत्र्या इव गौतमीयन्यायदर्शनसूत्रव्याख्यातृभिर्यथान्यायदर्शन त्रिसूत्र्याः किमप्यपूर्वं वैशिष्ट्य माकलितम्, तथैव श्रीकृष्णभूपालेन तेन विद्वत्प्रवर भट्टवादीन्द्रेण च निमिताभ्यां खण्डिताभ्यामपि व्याख्याभ्यामिदं नूतनं स्पष्टीकृतं यद् गौतमीयस्य पञ्चाध्यायी-रूपस्य न्यायदर्शनस्योपरि यथा विद्वन्मूर्द्धन्येनोद्योतकरेण निर्मितं न्यायवार्तिक-मस्ति तथैव कणादीयस्य दशाध्यायीरूपस्य वैशेषिकदर्शनस्योपर्यपि विद्यते, वैशेषिक-वार्तिकमिति। नास्त्यत्रापि वार्तिकराहित्य-प्रयुक्ता न्यूनता।

यद्यपि—

प्रणम्य गौरीशमचिन्त्यशक्ति
सर्वयमज्ञानतमः—प्रदीपम् ।
कणाद-सूत्रस्य मया निबन्धो
विधीयते शङ्कर-किङ्करेण ॥१॥

महादेवोपदिष्टस्य सूत्रस्यैति निबन्धनम् ।
सेव्यतां सकलैरर्थंयथार्थज्ञानहेतवे ॥२॥

इति यत्पद्यद्वयमुल्लिखितमस्ति, तत्र न ग्रन्थकर्तृतया भट्टवादीन्द्रस्य, न वाग्रन्थ-नामतया "वैशेषिकवार्तिक इत्यस्यास्ति-कृतः समुल्लेखः । तथापि द्वितीयाध्याय-द्वितीयाह्निकान्तपर्यन्तं प्रायः प्रत्याह्निकमतः "इति श्रीहरकिङ्कर-परमपण्डित-न्यायाचार्य भट्टवादीन्द्रकृतौ कणादसूत्रवार्तिक" इत्यादि समुल्लेखप्राप्त्या द्वितीयाध्यायान्तस्य खण्डित-द्वितीयाध्याय-प्रथमाधिकान्तभागस्य व्याख्यानस्य नाम "वार्तिके"ति, तत्कर्त्तुश्च नाम भट्टवादीन्द्रेति शक्यते समर्थयितुम् । वस्तुतस्त्वत्रैवं प्रतिभातियत् प्रकृतव्याख्यातुर्नाम प्रोक्तप्रथमाङ्गलिक-श्लोकोल्लेखानुसारं "हरकिङ्करे-त्येव स्वीकर्त्तुं युक्तम् । भट्टेति कौलिकोपाधिः "वादीन्द्र" इति च जल्पकथाप्रौढ़िमूलको गुणप्रयुक्तस्तस्योपाधिरिति । एवमेवैतद्व्याख्याया अपि वार्तिकेतिसंज्ञा न तत्कृता । अपितु उक्तानुक्तोत्प्रेक्षित-विवेचनात्मकवार्तिक-स्वभावावगति-मूला परवर्त्तिविवेचक,-कृता वेदितव्या । स्वोत्पेक्षित-विवेचनं च सर्वप्रथमं समवगम्यते "अथातो धर्मं व्याख्यास्याम इति सूत्रस्याऽथशब्दव्याख्याने । यतो हि महामहोपाध्यायशङ्करमिश्रादिभि वैंशेषिकदर्शन-व्याख्यातृभि र्यत्राथशब्दस्य शिष्याऽऽकाङ्क्षानन्तरमित्यर्थो निरूपितस्तत्र प्रकृतेन वार्तिककर्त्रा तस्येश्वर-प्रणामानन्तर मित्यर्थो निरूपितोऽस्ति । एवं तत्र तत्र विज्ञेयम् ।

वैशेषिकवार्तिक-द्वितीयाध्यायोत्तरमत्र पुस्तके नवमाध्यायान्तं यावत् निबन्धसार-नाम्नी खल्वज्ञातकर्त्तृका वृत्तिः संगृहीताऽस्ति । ततो मन्तव्यतामावहति "वैशेषिकदर्शन मितिशीर्षकं पुस्तकं, मध्येऽपि तत्रतत्रान्ते च दशमाध्याये सम्पूर्णं खण्डितं व्याख्यासंङ्ग्र-हाऽऽत्मकमिति । सङ्ग्रहकर्त्ता चाभवदस्य संग्रहपुस्तकस्य प्रसिद्धो विद्वान् डा० अनन्तलाल ठक्कुरः पूर्वं कबराघाट दरभंगास्थित-मिथिला-संस्कृत-शोधसंस्थाने कृताध्यापन-कार्यः, पश्चाच्च पटना स्थित के० पी० जायसवाल इन्स्टिटयूट इति प्रख्ये सुमहति संस्थाने साधुतया विहितनिदेशक-पदकृत्यः । विदुषा तेन सङ्गृहीतं मुद्रणयोग्यीकृतं च विधाय सुपुस्तकमिदं प्रदत्तमासीत्तदानीं कामेश्वरसिंह-दरभङ्गा-संस्कृत-विश्वविद्यालय कुलपति-पदमलङ्कुर्वते डा० रामकरण शर्मणे प्रकाशनाय ।



परमं प्रमोद-स्थानमिदं यत्प्रोक्तसंस्कृत-विश्वविद्यालय-वर्तमान-कुलपति डा० जयमन्तमिश्रमहोदयसौजन्येन महाराजधिराज-कामेश्वरसिंह ग्रन्थरत्नमालायां प्रकाशितं पुस्तकमेत ज्जिज्ञासुविद्वज्जन-कर कमलमलङ्कर्त्तुं मवलोक्यते सुसन्नद्धम् । मुदणामेतस्य तारा-यन्त्रालय-वाराणसीस्थेऽभवत्सम्पन्नम्, पूर्वरूपाणि च (प्रूफ) सर्वाणि शुद्धीकृतानि वसमवलोक्य काशी-हिन्दू-विश्वविद्यालय-प्राध्यापकेन डा० नारायण-मिश्रेणेति साधुवादार्हौ तावदसापोति विज्ञाप्य विरमाम्यनल्पजल्पनधाष्ट्र्यादहम्—

**आनन्द झा**

॥ श्रीः अविघ्नमस्तु ॥

# वैशेषिकदर्शनम्

## प्रथमाह्निकम्

प्रणम्य गौरीशमचिन्त्यशक्तिं
सर्वज्ञमज्ञानतमःप्रदीपम् ।
काणादसूत्रस्य मया निबन्धो
विधीयते शङ्करकिङ्करेण ॥
महादेवोपदिष्टस्य सूत्रस्यैतन्निबन्धनम्
सेव्यतां सकलैरर्थयथार्थज्ञानहेतवे ॥

**अथातो धर्मं व्याख्यास्यामः ॥१.१.१॥**

तत्रायम् अथशब्द आनन्तर्ये, तच्चानन्तर्यं न यतः कुतश्चिदपि शब्देन समर्पणीयम्, वैयर्थ्यात् । न हि यत्किञ्चिदानन्तर्यं धर्मव्याख्यानस्य क्वचिदुपयुज्यते । तस्मादानन्तर्यमात्रवाचकोऽप्ययमथशब्द ईश्वरप्रणामानन्तर्यपर इत्युक्तम् । न च धर्मव्याख्यानस्येश्वरप्रणामानन्तर्यकथनमनुपयोगि, ईश्वरप्रणामादेव ग्रन्थपरिसमाप्तिसिद्धेरिति युक्तम् । इष्टदेवतानमस्कारानन्तरमेव ग्रन्थाद्यारम्भः कर्तव्य इति शिष्यज्ञापनार्थत्वात्, अन्यथा हि इष्टदेवताप्रणाममन्तरेण ग्रन्थमारभमाणाः शिष्या ग्रन्थपरिसमाप्तिप्रचयहेतुनमस्कारजन्यधर्माख्यसहकारिविरहात् विफलारम्भा भवेयुः । न चाभीष्टदेवतानमस्कारजन्यधर्मस्य ग्रन्थसमाप्तिप्रचयहेतुत्वे मानाभावः । अविगीतशिष्टाचारानुमितवेदादेस्तत्र प्रमाणत्वात् । कथं तर्हि इष्टदेवतानमस्कारपूर्वकत्वेऽपि **कादम्बर्यादे**रपरिसमाप्तिरिति चेत्-- न, नमस्कारजन्यधर्मसत्त्वे[ऽपि] ग्रन्थसमाप्तिहेतुकर्तृदेहादिवैकल्यात् न ह्यस्माकं नमस्कारजधर्ममात्रं ग्रन्थसमाप्तिहेतुः, अपि तु कर्तृदेहविघ्ननाशादिरपि कर्तृदेहादिवैकल्यस्य च भावेनादृष्टादिविनाशात् । न च त[र्हि] कर्तृ[दृष्ट]हेतुसाकल्ये ग्रन्थसमाप्तेरव्यतिरेकदर्शनात् न नमस्कारजन्यधर्मस्य ग्रन्थसमाप्तिहेतुत्वमिति युक्तम् । व्यतिरेकाभावेन नमस्कारजन्यधर्मस्य ग्रन्थसमाप्तिकारणत्वाभावानुमाने शिष्टाचारानु[मितवेदाप्रामाण्यापत्तेः] ग्रन्थसमाप्तिजनकात्मादौ व्यभिचाराच्च । यत्र न ग्रन्थसमाप्तिः तत्र कथं नमस्कारजन्यधर्मविनाशः फलविनाश्यत्वाद् धर्मस्येति चेत्—निमित्तकारणदेहविनाशात्, मोचकात्मसाक्षात्काराद् वा । न च **मीमांसाभाष्यादे**र्नमस्काराभावेऽपि समाप्तिदर्शनात् न नमस्कार[ज]न्यधर्मस्य ग्रन्थसमाप्तिहेतुत्वमिति

युक्तम्। तत्रापि शिष्टाचारनुमितवेदप्रमाणकमानसाभिनमस्काराभावस्य योग्यानुपलम्भविरहे निश्चेतुमशक्यत्वात्। तस्मादीश्वरप्रणामानन्तर्यमथशब्दार्थः।

यद् वा परमेश्वरप्रसादासादितधर्मादिसाक्षात्कारपरमेश्वरधर्मोपदेशनियोगयोरानन्तर्यमथशब्दार्थः। यदि परमेश्वरप्रसादासादितधर्मज्ञाननियोगयोरनन्तरं धर्मं नोपदिशेत् ततः परमगुरोरुमापतेराज्ञामतिक्रामन् प्रत्यवेयात्। न च तेषां तेजोविशेषेण प्रत्यवायो न विद्यत इति वाच्यम्। परमेश्वराज्ञातिक्रमस्य सकलसंसारितेजोभिभावकत्वात्। न च परमेश्वरप्रसादासादितधर्मादिसाक्षात्कारवान्, परमेश्वरनियुक्तश्च **भगवान् कणादो मुनि**रित्यत्र मानाभावः, साम्प्रदायिकाचारप्रमाणत्वात्। उपदिशन्ति हि [साम्प्रदायिकाः] **कणादो** मुनिरुलूकवेषधारिणः परमेश्वराद् धर्मादिसाक्षात्कारधर्मोपदेशनियोगमासाद्य **वैशेषिकसूत्र**मसूत्रयदिति।

नन्वस्तु धर्मसाक्षात्कारपरमेश्वरनियोगानन्तर्यं धर्मव्याख्यानस्य वैशेषिकशास्त्रप्रामाण्यज्ञापनार्थम्। अ[न]धिगते हि तत्त्वसाक्षात्कारपूर्वकत्वे वैशेषिकशास्त्रस्य तत्प्रामाण्यं शिष्यैरशक्यमधिगन्तुम्। प्रमितिपूर्वकवाक्यत्वस्य प्रामाण्याव्यभिचारात्।

[अत इति हेतौ। यतः] अधीतसाङ्गवेदावगतस्वर्गापवर्गार्थिनः तत्साधनजिज्ञासवो ग्रहणधारणादिसमर्थाः वेदाच्च तत्साधनमनधिगच्छन्तः पृच्छन्ति अत इत्यर्थः।

[त्रिदिवाभिलाषी यजतामित्यादेस्त्रिदिवसाधनं] धर्मोऽवगम्यत इति चेत् - न, धात्वर्थस्य यागादेः प्रत्ययार्थस्य च भावनायाः चिरविनष्टत्वेन कालान्तरभाविस्वर्गसाधनत्वस्य वेदसहस्रेणापि बोधयितुमशक्यत्वात्। योग्यताविरहात् अव्यवहितपूर्वक्षणवर्तिव्यापारक्षणवर्तित्वं साध्यत्वे योग्यता। ननु फलाव्यवहितपूर्वक्षणवर्तिव्यापारत्वे फलोत्पादनशक्तिमत्त्वं वा साधनत्वे योग्यता। न तु फलाव्यवहितपूर्वक्षणवर्तित्वं साधनत्वे योग्यता। साधनव्यापारक्षणवर्तित्वं साधनशक्तिविषयत्वं स्वसाध्यत्वं वा योग्यता। न तु साधनाव्यवहितोत्तरक्षणवर्तित्वं साध्यत्वे योग्यतेति चेत्—न, स्वर्गयागादिसाध्यसाधनभावावगमात् पूर्वमस्या योग्यताया अवगन्तुमशक्यत्वात्। न ह्यनवगते पूर्वव्यापारे स्वर्गाव्यवहितपूर्वक्षणवर्तिव्यापारवत्वं शक्यमधिगन्तुम्, विशेषणज्ञानपूर्वकत्वाद् विशेष्यज्ञानस्य। नाप्यनवगतायां शक्तौ तदुत्पादकत्वं शक्तिमत्त्वमवगन्तुं तत एव। न चानवगतैव योग्यतान्वयप्रतीति[जनिकेति] समुचितम्। अन्वयव्यतिरेकाभ्यां योग्यतावगतेरन्वयप्रतीतिजनकत्वस्य निर्णयात्। न च साध्यसाधनभावावगमनानन्तरभाविनी योग्यताप्रतीतिः, अन्वयावगमका[यं]क्षणवर्तित्वविरहात्, असंभवाच्च। स्वर्गयागयोः साध्यसाधनभावानवगमे तदन्यथानुपपत्तिजन्यापूर्वप्रतीतेरनुदयात्। अथ न योग्यतावधारणमन्वयप्रतीतिकारणम्, किंतु योग्यताभावावधारणमन्वयप्रतीतिप्रतिबन्धकं [तदभावश्चान्वयप्रतीतिहेतुः। स्व]र्गाव्यवहितपूर्वक्षणवर्त्यपूर्वरूपयागव्यापाराभावस्य प्रत्यक्षादिना



वाक्यार्थावगमात् पूर्वं निर्णेतुमशक्यत्वादिति मन्यसे, तदपि न, विकल्पासहत्वात्। तथा हि, किं साध्याव्यवहितपूर्वक्षणवर्तिव्यापारवत्त्वं साधनत्वेन योग्यता, उत स्वर्गाव्यवहितपूर्वक्षणवर्तिव्यापारवत्त्वं यागस्य स्वर्गसाधनत्वे योग्यता? नाद्यः, ओदनकामः पचेत्, तृप्तिकामो भुञ्जीतेत्यादावन्वयप्रतीतिविरहापत्तेः, पाकभोजनयोरोदनतृप्तिक्षणवर्तिव्यापारवत्त्वाभावस्यानिर्णयात्, पाकभोजनयोरोदनतृप्तिसाधनत्वात्। न द्वितीयः, स्वर्गाव्यवहितपूर्वक्षणवर्तिव्यापारवत्त्वादिरूपयोग्यताविरहावगमस्याविद्यमानत्वेन स्वर्गयागसाध्यसाधनभावावगमप्रतिबन्धकत्वानुपपत्तेः। विद्यमानत्वे वा स्वर्गयागसाध्यसाधनभावावगमानुपपत्तेः [यागे]षु स्वर्गाव्यवहितपूर्वक्षणवृत्तिव्यापारवत्त्वस्य स्वर्गसाधनत्वयोग्यतारूपत्वे यागादेः स्वर्गसाधनत्वमन्यद्वक्तव्यम्। न हि साधनत्वमेव साधने योग्यतान्वयप्रतीतिकारणम्, तद्विरहेऽप्यग्निना सिञ्चेदित्यादावन्वयप्रतीतेरुत्पादात्, केवलं नाधिगतत्वान्नासौ प्रमा। स्वर्गयागादिसाध्यसाधनभावावगमस्तु बाधाभावात् प्रमैवेति मन्यसे? न, स्वर्गाव्यवहितपूर्वक्षणवर्तित्वस्य स्वर्गसाधनत्वे बाधाया दुर्वारत्वात्। स्वर्गाव्यवहितपूर्वक्षणवर्तिव्यापारत्वस्य च साधनत्वे साधनसाधनत्वे बोधकयजेरपूर्वबोधकत्वापत्तेः। एवमस्त्विति चेत्—न, पूर्वमपूर्वानवगतौ यजेस्तत्र वाचकत्वानवगमात्, यजितोऽपूर्वमवगम्य पुनस्तत्र यजेर्वाचकत्वावगम इति चेत्--न परस्पराश्रयप्रसङ्गात्। यजितोऽपूर्वेऽवगते यजेरपूर्ववाचकत्वज्ञानम्, यजेरपूर्ववाचकत्वज्ञाने च यजेरपूर्वावगम इति। एतेन यागमात्रं यजेरर्थः। साधनत्वं पुनरिष्टसाधनत्ववाचिनो लिङ्प्रत्ययस्येत्यपि प्रत्युक्तम्, स्वर्गाव्यवहितपूर्वक्षणवर्तिव्यापारवत्त्वरूपसाधनत्ववाचकत्वे लिङ्प्रत्ययस्यापूर्ववाचकत्वप्रसङ्ग इत्यादेरपसिद्धान्तप्रसङ्गाच्च, साध्यसाधनभावावगमानन्तरकल्प्यत्वादपूर्वस्य। यदाहुः

फलाय विहितं कर्म क्षणिकं परभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वमपि कल्प्यते॥ इति।

अथास्तु कामं स्वर्गाव्यवहितपूर्वक्षणवर्तित्वं साधनत्वं यागस्य। न च तच्चिरविनष्टस्य स्वर्गं प्रति बाधितम्। यागानन्तरमेव स्वर्गोऽपीति स्वीकारादित्यभिधत्से [चेत्] तदपि न, यागाव्यवहितोत्तरक्षणे स्वर्गस्य योग्यानुपलम्भनिरस्तत्वात्। तदानीं सूक्ष्मत्वादयोग्योऽसाविति चेत्—न, कालान्तरेऽप्ययोग्यत्वापत्तेः। कालान्तरे स्थूलतामापन्नो योग्य इति चेत्- न, सूक्ष्मस्थूलत्वयोर्विरुद्धधर्मत्वेन धर्मिभेदकत्वात्। उपलम्भयोग्यस्य च यागाव्यवहितोत्तरक्षणवर्तित्वाभावेन यागजन्यतदनुपपत्तेः। अथ नाव्यवहितपूर्वक्षणवर्तित्वादिकं साधनत्वं किं तूत्पादकत्वम्? तच्च न यागस्य स्वर्गं प्रति बाधितम्, इन्द्रियादिना यागस्य स्वर्गोत्पादकाभावनिश्चयात्। तदबाधितवेदावगतस्वर्गादिश्रेयःसाधनाभावो यागादिरेव धर्मता इति कथं न वेदाद् धर्मावगतिरिति मन्यसे- तदपि न, अव्यवहितपूर्वक्षणवर्तित्वादिव्यतिरिक्तोत्पादकसत्त्वे मानाभावात्। ...... स्याव्यवहित''''त्पादकमिति व्यवहित''''''व्यवहितपूर्वक्षणवृत्तित्वादेवोपपत्तेः।

अस्तु वाव्यवहितपूर्वक्षणवर्तित्वादिव्यतिरिक्तोत्पादकत्वम्, यागस्य तु स्वर्गोत्पादकत्वे मानाभावः।

स्वर्गकामो यजेत

इति वेदः प्रमाणमिति चेत्—न, यजेर्यागमात्रार्थत्वात्, ....[स्व]र्गकामपदस्य च स्वर्गकामनाविशिष्टपुरुषप्रतिपादकत्वात्। अथाख्यातप्रत्ययेनेष्टसाधनत्वरूपो विधिरभिधीयते ? किं तदिष्टमित्यपेक्षायां निरुपाधिकामनाविषयः स्वर्गः संबध्यते। इष्टसाधनत्वस्य वाचाश्रयाकाङ्क्षायां प्रकृत्यर्थो यागः संबध्यते, तेन स्वर्गसाधनं याग इति वाक्यार्थः संपद्यत इति चेत्—न, इष्टस्य स्वर्गपदोपात्तत्वेन तद्विशिष्टसाधनत्वस्य लिङर्थे वैयर्थ्यात्।

अस्तु साधनत्वमेव लिङर्थः। इष्टावच्छेदस्तु तस्य स्वर्गसमभिव्यहारेण लक्ष्यत इति चेत्—न, साधनत्वस्य लिङर्थत्वे प्रमाणाभावात्। अस्तु वेष्टसाधनत्वं लिङर्थः। स्वर्ग एव चेष्टः स[ः।] तथापि साधनत्वाश्रयाकाङ्क्षायां प्रकृत्यर्थाद् यागात् सन्निहितत्वेन प्रत्ययार्थो भावनैवान्वीयते। तेन भावना स्वर्गसाधनत्वमिति वाक्यार्थसंपत्तौ कथं यागस्य स्वर्गसाधनत्वसिद्धिरिति।

अपि च भट्टमते स्वर्गकामो यजेतेत्यत्र प्रेरणागोचरीभूता भावना प्रतीयते। सा च प्रथमं विभाव्यमपेक्षते, भाव्यनिष्ठभावकव्यापारत्वात्। तस्याः (।) तेन भाव्याकाङ्क्षायां द्वितीयासमानार्थत्वेन किमिति नोपात्तः स्वर्गः साध्यतया संबध्यते। ततः केनेति साधनाकाङ्क्षायां प्रकृत्यर्थो यागादिः साधनत्वेनान्वीयते। तेन भाव्यस्वर्गविशिष्टा साधनयागविशिष्टा च भावनैव वाक्यार्थं इति कथं यागस्य स्वर्गसाधनत्वसिद्धिः ? अथ भावना भाव्यमिव भाव्यसाधनमपेक्षते इति भाव्यसाधनतया यागस्यान्वय इति मतम् - तन्न, यागस्य स्वर्गसाधनत्वानुपपत्तेरुक्तत्वादिति।

**प्राभाकर**पक्षेऽपि स्वर्गकामो यजेतेत्यत्र लिङ्प्रत्ययेन स्थाय्यपूर्वं कार्यमभिधीयते। न तु यागादि। तस्य चिरविनष्टस्य काम्यमानस्वर्गसाधनस्य स्वर्गकामेन कार्यतया बोद्धुमशक्यत्वात्। कामी हि काम्यमानं साधनं कार्यतया बुध्यत इति न्यायात्। कार्यं च कृतिनिरूप्यम्, कृत्युद्देश्यकृतिसाध्यत्वात् तस्य। कृतिश्च प्रयत्नः स चक्षा [स्था] नादिवद्विषयनिरूप्य इति विषयाकाङ्क्षायां यागः प्रयत्नविषयत्वेनान्वीयते। तेन यजेतेति यागविषयकृतिसाध्यं कृत्युद्देश्यं वापूर्वमित्यर्थः संपद्येत। कृतिश्च यथा विषयमपेक्षते तथा आश्रयमपि। स एव कृतेराश्रयः यो ममेदं कार्यमिति कार्यं बुध्यते तेन कार्यबोद्ध्रपेक्षायां स्वर्गकामपदेन कार्यबोद्धा नियोज्यः समर्प्यते। कार्यं च स्वभावतः साध्यमपि काम्यमानं स्वर्गसाधनतयावतिष्ठते। कामी हि काम्यमानसाधनं कार्यतया बुध्यत इति न्यायात्। सेयं [सवँ] साध्यवृत्ति[विवृत्ति]रित्युच्यते साध्यस्यापूर्वस्य स्वर्गस्यसाध्यान्तरस्वीकारात्।

अथ यागस्य स्वर्गसाधनत्वाभावे स्वर्गकामकृतिविषयत्वं न स्यादित्युच्यते। [न, स्वसाधनापूर्वसाधनत्वेन] तेन स्वर्गशरीरभूतमपूर्वं नियोगापरपर्यायः स्वर्गकाम-



बोद्धृविशिष्टं यागविषयकृतिजन्यम्। कृत्युद्देश्यं च वाक्यार्थं इति कथं यागस्य स्वर्गसाधनत्वावगतिः। तत्प्रतिक्षेपेणैव लिङस्तात्पर्यापूर्ववाचकत्वसिद्धेः विधा.......

**अस्मन्मते**ऽबाधितानुभूतित्वस्य प्रमाणलक्षणत्वात्। न द्वितीयः, अभिधाने वा तत एव कृत्युपपत्तौ कार्यवाचित्वासिद्धेः। अथ नेष्टसाधनत्वमात्रात्....... तन्न, कृतिजन्येष्टसाधनत्वावगमादेव प्रवृत्त्युपपत्तौ कृत्युद्देश्यत्वादेरभिधेयत्वप्रसङ्गात्। न द्वितीयः, विकल्पानुपपत्तेः। तथाहि किमगृहीतसङ्गतय एव लिङादयो नियोगमभिदधति, गृहीतसङ्गतयो वा ? नाद्यः, बालानामपि तदवगमप्रसङ्गात्। द्वितीयेऽपि, किमनवगते सङ्गतिसंग्रहेऽ[ग्रहो]वगते वा ? नाद्यः, वाच्यावगमस्य तद्वाचकावगमकारणत्वात्। द्वितीयेऽपि तदवगतिः प्रमाणात् तर्काद्वा ?

नाद्यः, नियोगस्य भवद्भिः प्रमाणान्तरवेद्यत्वानङ्गीकारात्। न द्वितीयः, व्याप्यारोपेण व्यापकापादनस्य तर्कत्वात्। न च नियोगज्ञानात् पूर्वं नियोगव्याप्यतया किञ्चित् प्रमितम्, यदारोपेण नियोगापादनं स्यात्। अथ नियोज्यपरः स्वर्गकामपदसमभिव्याहारपर्यालोचनया स्थाय्यपूर्वं लिङा प्रतिपादनीयमिति तर्कज्ञानमाज्ञायत इति चेत्—न, स्थाय्यपूर्वं विना लिङा प्रतिपादनीयमिति लिङाः स्थाय्यपूर्ववाचकत्वज्ञानम्। न चापूर्वं ज्ञानमन्तरेण संभवति। अपूर्वज्ञानं च न प्रमाणात्, तस्य मानान्तरावेद्यत्वात्। नापि तर्कात्, तस्यापि पूर्ववत् तर्कान्तरापेक्षायामनवस्थापक[त्व]ात्।

किं च स्वर्गकामादिपदसमभिव्याहारपर्यालोचनयेत्यत्र किमनवगतसंगतिस्वर्गकामपदयजतिसंभूयोच्चारितलिङ्प्रत्ययपर्यालोचनया इति विवक्षितम्, किं वा अवगतसंगतिस्वर्गकामपदयजतिसमभिव्याहारपर्यालोचनयेति ? नाद्यः, बालादीनामपि तथाप्रत्ययप्रसङ्गात्। द्वितीयेऽपि किमनवगतसंगतेः लिङ्प्रत्ययस्य समभिव्याहारपर्यालोचनयेति विवक्षितम्, उतावगतसंगतेः ? नाद्यः, पूर्वोक्तदोषात्। द्वितीयेऽपि किमपूर्वकार्यावगतसंगतेर्लिङ्प्रत्ययस्य पर्यालोचनया, किं वा क्रियाकार्यावगतेर्लिङ्प्रत्ययस्य पर्यालोचनया ? नाद्यः, संगतिग्रहणार्थमपूर्वोपस्थापकतर्कात् पूर्वं लिङोऽवगतसंगतित्वानुपपत्तेः। द्वितीयेऽपि पक्षे किं क्रियाकार्यं स्वर्गकामनियोज्यान्वययोग्यं न वा ? प्रथमे स्वर्गकामनियोज्यान्वितक्रियाकार्यावगमः स्यात्। एवंविधसमभिव्याहारपर्यालोचनस्यैवंविधप्रत्ययजनकत्वात्। न तु स्थाय्यपूर्वप्रत्ययः स्वर्गकामनियोज्यपदयजिसमभिव्याहारक्रियाकार्यावगतसंगतिलिङ्प्रत्ययपर्यालोचनस्य प्रत्यक्षादिव्यतिरिक्तज्ञानजनकत्वे मानाभावात्। अथ यो यत्कामनियोज्यवाचकपदसमभिव्याहृतो लिङ्प्रत्ययः स तदव्यवहितपूर्वक्षणवर्तिकार्यवाचक इति व्याप्तिनिश्चयात् लिङादिवाक्यात् स्थाय्यपूर्वप्रत्यय इति न सामान्यतो व्याप्यावगमेऽप्ययं लिङ्प्रत्ययः स्थाय्यपूर्ववाचकइति निषेधनिष्ठज्ञानानुदयात् स्वर्गकामादिनियोज्यवाचकपदसमभिव्याहृतश्च लिङ्प्रत्यय इति विशेषनिष्ठव्याप्यज्ञानसहितो व्याप्तिनिश्चयो लिङः स्थाय्यपूर्ववाचकत्वप्रत्ययहेतुरिति चेत्—अनुमानं तर्हीदम्, न तु तर्कज्ञानम्। एवमस्त्विति चेत्—न, अपूर्वस्य माना-

न्तरावेद्यत्वात्, न चानुमानमपि संभवति । अयं लिङ्प्रत्ययः स्वर्गाव्यवहितपूर्वक्षणवर्तियागकृतिजन्ययागकृत्युद्देश्यवाचकः, स्वर्गकामपदादिसमभिव्याहृतलिङ्प्रत्ययत्वात् । यो यत्कामादिपदसमभिव्याहृतलिङ्प्रत्ययः स तदव्यवहितपूर्वक्षणवर्तिकार्यवाचकः । यथा तृप्तिकामो भुञ्जीतेत्येवमादिलिङ्प्रत्यय इत्यादेरप्रसिद्धविशेषणत्वात्, स्वर्गोत्पादकयागकृतिजन्यकृत्युद्देश्यतद्वाचकत्वयोरस्मान् प्रत्यसिद्धत्वात् । संगतिग्रहणात् पूर्वमेवंविधकार्यवाचकत्वस्य प्राभाकराणामप्यसिद्धत्वाच्च । यो यत्कामादिपदसमभिव्याहृतलिङ्प्रत्ययः स तत्काम्यमानोत्पादकार्थवाचक इति सामान्येनान्वय इति चेत्—न, यत्तच्छब्दयोः प्रकृतस्वर्गकामादिसमभिव्याहृतलिङ्प्रत्ययत्वस्वर्गोत्पादककार्यवाचकपरत्वे पूर्वोक्तान्वयविरहस्य तादवस्थ्यात्, तृप्तिकामपदसमभिव्याहृतलिङ्प्रत्ययत्वतृप्तिसाधनकार्यवाचकत्वपरत्वे तयोरेवान्वयसिद्धौ स्वर्गकामादिपदसमभिव्याहृतलिङ्प्रत्ययत्वस्वर्गोत्पादककार्यवाचकत्वयोरन्वयाभावस्य तदवस्थत्वात् । न च यत्तच्छब्दयोरनुगतं प्रतिपाद्यमस्ति मानाभावादिति एवंविधतर्कज्ञानस्य निष्प्रमाणकत्वाच्च । पदानां तात्पर्यावधारको न्यायस्तर्कः, तदुपस्थिते पूर्वे संगति.......... इति चेत्..........प्रत्ययस्तमानयोरेव न्यायपदान्तर.......किंच च तर्कोऽनुभूतिः स्मृतिर्वा ? आद्ये प्रमैव..........अ] बाधितानुभूतित्वस्य प्रमाणलक्षणत्वात् । न द्वितीयः संस्काराजन्यत्वात्..........अथ समानविषय...............ते, तन्न, अनुभवसापेक्षत्वं यद्यनुभवजन्यत्वम्, तत्प्रकृते न संभवति, भाविनः पूर्वक्षणवर्तित्वाभावेनाजनकत्वात् । जन्यत्वाव्यतिरिक्तस्य च अनुभवसापेक्षत्वस्य निष्प्रमाणत्वात् । न च स्मृत्यनुभवव्यतिरिक्तस्तर्क इति, स्मृत्याहितज्ञानस्यानुभवत्वात् । अनुभवत्वरहितस्य च ज्ञानस्य स्मृतित्वात् । तस्माल्लोके लिङादीनां क्रियाकार्ये व्युत्पत्तिः । वेदेतु मानान्तरापूर्वे स्थायिकार्य इति दुर्घटमेवेति ।

**अन्ये** तु वृद्धव्यवहारपर्यालोचनया कार्यपरत्वावगमो लिङादीनां तदनन्तरं **वेदे** स्वर्गकामनियोज्यसमभिव्याहारानुपपत्त्या स्थाय्यपूर्वकार्येऽव्युत्पत्तिः वाचकत्वबोधापरपर्यायलिङादीनाम् । तदनन्तरमपूर्वकार्यवाचिनां लिङादीनां लोके यत्कार्यबोधकत्वं तल्लक्षणयेति निर्णीयते । अपूर्वकार्यवाचिनां कार्यमात्रे लक्षणयापि प्रयोगोपपत्तौ वाचकत्वकल्पकाभावात् । क्रियाकार्ये वाचकत्वमपूर्वे तु लक्षणेऽतिदुर्घटमेव । अपूर्वस्य प्रमाणान्तरागोचरत्वेन तत्र लिङादीनां लक्षणानुपपत्तेः । मुख्यार्थबाधे तत्सम्बन्धिनि स्मृतिरूपत्वात् तस्याः । अस्मृतित्वेऽपि वाच्यसंबन्धावगमस्य लक्षणाङ्गत्वस्वीकारात् । तस्मादपूर्व एव धर्मरूपे व्युत्पत्तिः, प्रामाण्यं च लिङादीनामिति । तदपि न, अपूर्वे व्युत्पत्तिविरहस्य व्युत्पादितत्वात् । लोके च लिङादीनां वृद्धव्यवहारबलेनान्यत्रैव वाचकत्वव्युत्पादनादिति ।

**अन्ये** तु वृद्धव्यवहारपर्यालोचनया कार्ये व्युत्पत्तिर्लिङादीनाम् । न तु धात्वर्थापरपर्यायक्रियात्वाविशेषितेऽप्यवच्छेद्याभावेन विशेषणवैयर्थ्यात्, अन्यथा प्रमेयत्वाभिधेयत्वादिविशिष्टक्रियाकार्ये लिङादीनां व्युपत्तिप्रसङ्गात् । तथा च योगव्युत्पत्तिबलेना-



काङ्क्षितसन्निहितयोग्यस्वर्गकामनियोज्यान्वितकार्यं वेदे लिङादिभिरभिधीयते । तच्च न यागादिधात्वपूर्वं तस्य चिरविनष्टस्य कालान्तरभाविकाम्यमानस्वर्गसाधनत्वानुपपत्तौ योग्यताविरहेण स्वर्गकामनियोज्यान्वयानुपपत्तेः । कामी हि काम्यमानं साधनं कार्यतया बुध्यत इति न्यायात् । तच्च [न ?] यागातिरिक्तं कार्यं शब्दातिरिक्तमानागोचरत्वादपूर्वमित्युच्यते । स्वात्मानं नियुङ्क्ते प्रेरयतीति नियोग इत्याख्यायते । तेन लोकावगतकार्यव्युत्पत्तिबलेन स्थायिकार्ये वेदस्य प्रामाण्यम् । यत कार्यं तत्समवायिकारणजन्यम् । लोकावगतव्याप्तिबलेन चानुमानस्य परमाण्वादाविति–तदपि न युक्तम्, लोकेऽप्यानयनादेः कार्यस्य धात्वर्थत्वेन प्रत्ययार्थत्वानुपपत्तेः । धात्वर्थातिरिक्तकार्यस्य च लोके प्राभाकरैरनभ्युपगमात्, आनयनादयः कार्यविशेषा वा धात्वर्थाः । अनुगतं तु कार्यं प्रत्ययार्थं इति चेत्—न, आनयनादिविशेषनिष्ठकार्यत्वातिरिक्तानुगतकार्येऽनुमानाभावात् । कार्यं कार्यमित्यनुगतः प्रत्ययो मानमिति चेत्—न, कार्यत्वादेव तदुपपत्तेः । अन्यथा शावलेयादिविशेषनिष्ठगोत्वातिरिक्तानुगतगोपदार्थानुपपत्तेः ।

अथ लोके कार्यत्वे व्युत्पत्तिर्लिङादीनाम्, तदा कार्यत्वमाकाङ्क्षितसन्निहितयोग्यानयनादिधात्वर्थान्वितं लोकेऽभिधीयते । वेदे तु न यागादिधात्वर्थान्वितं कार्यत्वमभिधातुं शक्यते, तस्य चिरविनष्टस्य कालान्तरगामिस्वर्गसाधनत्वानुपपत्तौ स्वर्गकामिना कार्यत्वेन बोद्धुमशक्यत्वात् । तेन वेदे धात्वर्थातिरिक्तस्थायिकार्यत्वं सिद्धेरपर्यवसानादिति । तदपि न, वाचकत्वातिरिक्तापर्यवसानानिरुक्तेः । न तावदियं लक्षणा, वाच्यसंबन्धितया प्रमाणान्तरावगते लक्षणास्वीकारादपूर्वकार्यस्य । स च मानान्तरागोचरत्वात् विधौ च लक्षणां वदता न विधौ परः शब्दार्थं इति सूत्रसाक्षिकं प्राभाकरमनुविस्तृतम् ।

नापि गौणी, वाच्यकार्यगुणवत्ताया अपूर्वकार्यस्यानवगमात् । नापि वाचकत्वलक्षणा, गौणीव्यतिरिक्तपदस्य वृत्त्यन्तरमस्ति प्रमाणाभावात् । अथ कार्यस्य स्वभावः कार्यत्वम् । तच्च कार्यघटितमूर्तित्वात् । कार्यत्वमनभिधाय लिङादिभिः नाभिधातुं शक्यते इत्यपर्यवसानलभ्यमिति चेत्—न, यदि कार्यत्वमनभिधाय धात्वर्थमनभिधातुं शक्यते कार्यत्वमनभिधेयमेव । न त्वपर्यवसानलभ्यम् । एवं लोकेऽपि कार्यमभिधेयमेवेति गतं लिङादीनां कार्यत्ववाचकत्वकल्पनया । तस्मात् नष्टं प्राभाकरमतेऽपि धर्मे वेदस्य प्रामाण्यमिति ।

ननु यदि न धर्मे वेदस्य प्रामाण्यम्, क्व तर्हि स्वर्गकामो यजेतेत्यस्य प्रामाण्यम् । धर्मसाध्ये स्वर्गे तत्साधकेन च यागे । तथा च प्रशस्तपादाः—तस्य तु साधनानि श्रुतिस्मृतिविहितानीत्यादि । कः पुनः स्वर्गकामो यजेतेत्यस्यार्थः स्वर्गकामो यागं कुर्यादिति ।

ननु यदि न यागः स्वर्गसाधनं किमर्थं तर्हि स्वर्गकामेन क्रियते ? स्वर्गोत्पादक-

धर्मार्थमित्यवैहि । स्वर्गोत्पादको यागजन्यो धर्मः पुनर्वैशेषिकशास्त्रव्युत्पादितानुमान-समधिगम्य एवेति ।

तत्सिद्धं यतो न वेदाद् धर्मावगतिः, अतो धर्मं व्याख्यास्याम इति । विशब्दो विशेषे । विशेषश्च प्राधान्यम् । तेन विशेषतः प्राधान्येन धर्मं व्याख्यास्यामः । द्रव्यादिषट्पदार्थास्तु तदङ्गतयेति सिध्यति । यद् वा विशब्दो विविधयोगेन । विविधं प्रवर्तकनिवर्तकादिभेदेनानेकप्रकारं धर्मं व्याख्यास्याम इत्यर्थः । आङभिविधौ न मर्यादायाम्, परिवर्जनीयाभावात् सर्वस्यापि धर्मस्य प्रतिपादनमिति चेत्––न, धर्म-पदस्य यत्किञ्चिद्धर्मजातीयप्रतिपादनेन चरितार्थस्य सकलधर्मप्रतिपादकत्वाभावात् । अन्यथा गामभ्याजेत्यादौ सर्वगवामानयनप्रवृत्तेः गोपदेन सर्वगवामभिधानात् । व्या-ख्यास्याम इति ख्या प्रकथन इत्यस्य [धातो रूपम् । प्रकृष्ट[त्वं]निर्दुष्टधर्मप्रमाणत्वप्रति-पादकत्वम् ।] तच्च न शास्त्रान्तरेऽस्ति । तत्प्रतिपादितप्रमाणानां यथास्थानं दोषा-भिधानात् । यदा तु न शास्त्रान्तराणि धर्मप्रतिपादकानि किं तु वैशेषिकशास्त्रमेतद्धर्म-प्रतिपादकमिति निर्भरः, तदा न शास्त्रान्तरस्य धर्मकथनत्वाभावात् नेदं प्रकृष्टधर्म-कथनमिति ख्या प्रकथन इत्यस्येदं रूपम्, अपि तु चक्षिङः ख्याञित्यादेशस्य । आत्मनेपदप्रसङ्ग इति चेत्–न, व्याख्यानकर्तृगामिफलाभावात् । स्वरितञितः कर्त्रभि-प्राये क्रियाफले इति पाणिनिस्मरणात् । परमेश्वरप्रसादासादितसकलपुरुषार्थस्य भगवतः सूत्रकारस्यात्मगामिफलाभावात् । किमर्थं तर्हि धर्मव्याख्यानम् ? परार्थमि-त्यवैहि । परैरवगतो धर्मोऽनुष्ठीयते च परेषां स्वर्गापवर्गसिद्धिः । परगतौ स्वर्गापवर्गौ न फलमिति चेत्– न, परेषामेव फलत्वात् । परगतोऽपरस्य न फलमिति चेत्—न, नित्यमुक्तस्य भगवतः परमेश्वरस्य धर्माधर्मसाधनोपदेशवेदप्रणेतुः परगतस्वर्गा-पवर्गप्रयोजनत्वेन दृष्टान्तविरहात्, वैशेषिकसूत्रप्रणेतुः परगतौ स्वर्गापवर्गौ न प्रयोजन-मिति चेत्–न, ईश्वरस्यापि प्राचीनवैशेषिकमहासूत्रप्रणेतृत्वाभ्युपगमात् । एतद्वैशेषिक-सूत्रप्रणेतुः परगतौ स्वर्गापवर्गौ न प्रयोजनमिति चेत्—न, ईश्वरस्याप्येतत्सूत्रप्रणेतृ-त्वाभ्युपगमात् । अनीश्वरोपदेशानां द्विकर्तृकत्वाद् दृष्टान्ताभावाच्चेति ।

अत्राकारप्रश्लेषणादधर्मव्याख्यानप्रतिज्ञापि द्रष्टव्या । तथा च यतो वेदार्थाव-गतनरकादिजिहासवः तत्साधनजिज्ञासवः पृच्छन्ति, अतोऽधर्मं व्याख्यास्याम इत्यर्थः । अनेकार्थपरत्वे वाक्यभेद इति चेत्—न, अकारप्रश्लेषाप्रश्लेषाभ्यां वाक्यभेदस्येष्टत्वात्, अकारप्रश्लेषमन्तरेणापि सूत्राणामनेकार्थदर्शनेन वाक्यभेदस्यादूषणत्वाच्चेति । विश्व-तोमुखमित्यनेन सूत्राणामनेकार्थप्रतिपादकत्वस्य विवक्षितत्वात् । तदेवं प्रथमसूत्रेण धर्माधर्मौ शास्त्रप्रतिपाद्यौ दर्शितौ ॥ १ ॥

ननु यदि न धर्मे वेदः प्रमाणम्, किं तर्हि प्रमाणमित्याशङ्कापरिहारार्थं सूत्रम्,

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥ १.१.२ ॥**

इति । अभ्युदयः स्वर्गादिसुखं निःश्रेयसं मुक्तिः । तयोः सिद्धिरुत्पत्तिः सा यस्मात्



स धर्मः । तयोः सिद्धिरिति सिद्धेः पक्षधर्मत्वं दर्शयति । ननु उत्पत्तिप्रागभाव-प्रतियोगित्वादिति रूपाया अजन्यत्वात् । कथं यतोऽभ्युदयनिःश्रेयससिद्धिरिति हेतौ पञ्चमीस्मरणात् तसेश्च पञ्चम्यर्थे विव [क्षितत्वात्''''''] दुत्पत्तिं प्रति च धर्मस्या-हेतुत्वादिति न उत्पत्तिमता कारणसम्बन्धाद् यत उत्पत्तिरित्युक्तम् । यथा तन्तुभ्यः पटो जायत इत्यादि''''''यतोऽभ्युदयनिःश्रेयसे स धर्म इत्येतावतैवाभ्युदयनिःश्रेयसयोः कार्ययोः धर्मे प्रमाणत्वेनाभिधानाद् व्यर्थं सिद्धिग्रहणमिति चेत्—न, स्वर्गापवर्गयोर्ध-र्मत्वात्, उत्पत्तेर्लिङ्गत्वात्, लिङ्गस्य प्रमाणत्वादिति ।

तथा च स्वर्गापवर्गावस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणजन्यौ उत्पत्तेः । यत्र उत्पत्तिः तदस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणजन्यम्, यथा पतनम् । तथा चेदम् । तस्मात् तथेति । उत्पत्तिमत्त्वं हेतुः, न तूत्पत्तिरिति चेत् न, उत्पत्तेर्व्यभिचाराभावेन मत्वर्थवैयर्थ्यात् । एवं तर्हि धूमादित्येव वक्तव्यम्, न तु धूमवत्त्वादिति चेत्—एवमस्तु विचारयिष्यामश्चेदमनुमानावसरे । पतनं चास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुरुत्वगुणजन्यत्वात् सपक्ष''''''चात्र पतनत्वमुपाधिः, अवयवगुरुत्वजन्ये अवयविगुरुत्वे साध्यव्यापकत्वभङ्गात् । उक्त-साध्यसत्त्वेऽपि तत्र पतनत्वाभावात् । एवं विशेषणगुरुत्वजन्ये गुरुत्वविशिष्टज्ञाने गुरुत्वजन्ये अभिघातादौ च साध्याव्यापकत्वभङ्गो द्रष्टव्यः ।

नापि गुरुत्वजन्यत्वमत्रोपाधिः, गुरुत्वविशेषणस्य पक्षतुल्यमात्रव्यापकत्वात्, अजन्यानां च जन्यत्वेनैव व्यावृत्तत्वात् । पक्षतुल्यमात्रव्यावर्तकविशेषणश्च पक्षे गमकत्वेनानुपाधित्वात्, सकर्तृकत्वे शरीरजन्यत्वात् । स्वर्गापवर्गौ नास्मत्प्रत्यक्षनिष्ठ-गुणत्वावान्तरजातिमत्त्वरहितगुणजन्यौ गुरुत्वाजन्यत्वात् आकाशवदिति चेत्–न, अजन्यत्वेऽपि सोपाधित्वात् । नापि भावत्वमत्रोपाधिः गुरुत्वध्वंसे साध्यव्यापकत्व-भङ्गात् । तस्यास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुरुत्वगुणजन्यत्वात्, अभावत्वाच्च । गुरुत्वध्वंसो नागुरुत्वजन्यः । अयं गुरुत्वध्वंसो नैतद्गुरुत्वजन्यो वा ध्वंसत्वात् अभावत्वाच्च घटध्वंसवदिति चेत्-गुरुत्वजन्यत्वादेः क्वचिदप्रमिताव[त्व ?] प्रसिद्धविशेषणत्वात् । प्रतियोगिप्रमितिपूर्वकत्वादभावप्रमितेरन्वयव्यतिरेकसहितप्रत्य-क्षात्, क्वचित् प्रमितौ प्रकृतेनैव बाधात् साध्यसिद्ध्यर्थमुपजीव्यत्वात् तस्येत्याचार्याः ।

**वयं** तु ब्रूमः । गुरुत्वं गुरुत्वजन्यभावत्वरहितजनकम् । एतद्गुरुत्वमेत-ज्जन्यभावत्वरहितजनकम्, वाचकत्वात् घटवदिति सिद्धे गुरुत्वजन्येऽभावे ध्वंसत्वा-देर्व्यभिचारः, मूलानुमानोपाधेः भावत्वस्य साक्षाद् व्यापकत्वभङ्गश्चेति । तस्यापि गुरुत्वाजन्यत्वसाधने धर्मिग्राहकप्रमाणबाधात् गुरुत्वजन्यत्वेनैव तत्सिद्धेः । तेन मुक्तिर्नास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणजन्या अभावत्वात्, अन्योन्या-भाववदिति प्रतिषेधो निरस्तः । गुरुत्वजन्यत्वेनावसिते अभावे व्यभिचारात् अजन्य-त्वेन सोपाधित्वाच्च । अतो न मुक्तिर्नादृष्टजन्या भोगसाधनेतरत्वादित्युदयनोऽपि

निरस्तः, अजन्यत्वेन सोपाधित्वाददृष्टनिवृत्तौ व्यभिचाराच्च। अन्वयव्यतिरेकाभ्यां प्रतियोगिनः प्रध्वंसजनकत्वसिद्धेः। उदयनोऽपि पाकजोत्पत्तौ प्रागभावस्य प्रतियोगिकारणत्वव्युत्पादनात्, अदृष्टध्वंसे चादृष्टस्यैव प्रागभावत्वस्वीकारात्, भोगतत्साधनेतरत्वं च सुखदुःखतत्साधनेतरत्वं वा, सुखदुःखानुभवतत्साधनेतरत्वं वा, सुखदुःखनिवृत्तितत्साधनेतरत्वं वा ? प्रथमद्वितीययोः योगजधर्मात्मजन्यात्मसाक्षात्कारे व्यभिचारात्। सोऽपि सुखदुःखहेतुरिति चेत्—तन्न, मानाभावात्। तृतीये त्वसिद्धेः, मुक्तेर्दुःखनिवृत्तित्वेन तदितरत्वासिद्धेः। दुःखादौ गतत्वादुत्पत्तिरनैकान्तिकीति चेत्—न, धर्मजन्यत्वस्यासाध्यत्वात्। अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वगुणरहितगुणजन्यत्वसाध्याभावस्य दुःखाभावनिश्चयात्। अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहिताधर्मगुणजन्यत्वसम्भवात्। सन्दिग्धसाध्ये दुःखादौ गतत्वादुत्पत्तिः सन्दिग्धानैकान्तिकीति चेत्—न, सन्दिग्धसाध्यनिष्ठत्वस्य दूषणत्वे सर्वानुमानविलयात्, सर्वहेतूनां सन्दिग्धसाध्यपक्षनिष्ठत्वात्। अन्यथा पक्षधर्मत्वसिद्धेर्दुर्वारत्वात्। पक्षत्वरहितसन्दिग्धसाध्यनिष्ठत्वं दूषणमिति चेत्—न, पक्षत्वं किं सन्दिग्धसाध्यत्वं धर्मित्वेनोपात्तं वा ? प्रथमे दुःखादेरपि पक्षत्वात्। पक्षत्वरहितसन्दिग्धसाध्यनिष्ठत्वेनोत्पत्तेर्दुष्टत्वानुपपत्तेः। द्वितीये धूमादेरपि दुष्टत्वम्, धर्मित्वोपात्तपर्वतव्यतिरिक्तसन्दिग्धसाध्यपर्वतान्तरनिष्ठत्वेन सन्दिग्धानैकान्तिकत्वात्।

अथ धर्मित्वोपात्तव्यतिरिक्तः सन्दिग्धसाध्यः पक्षतुल्य उच्यते, पक्षवत् सन्दिग्धसाध्यत्वात्। सन्दिग्धसाध्यनिष्ठत्वं च पक्षत्वरहितविशेषितमविशेषितं वा न दूषणमनुमानमात्रविलयादित्युच्यते। तत् तर्हि प्रकृतेऽपि समानमिति सन्तोष्टव्यम्।

न चात्र गुरुत्वेन सिद्धसाधनम्, कर्मादेर्गुरुत्वजन्यत्वे मानाभावात्। मोक्षादिर्गुरुत्वजन्यः कार्यत्वात् पतनवदिति चेत्—न, अद्रव्यत्वेन सोपाधित्वात्, नित्यद्रव्याणां विपक्षाणां व्यावर्त्यत्वात् पक्षान्तरत्वानुपपत्तेः।

अथ मा भूद् गुरुत्वेन सिद्धसाधनम्, अर्थान्तरं तु भविष्यतीति चेत्—न, किमिदमनुमानमस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहित गुणस्य गुरुत्वजातिं गृह्णातीत्यर्थान्तरता, गुरुत्वजातिविरहं न गृह्णातीति वा ? नाद्यः, गुरुत्वजातेर्गुणविशेषणत्वेनानुपात्तत्वात्। अनुपात्तापि गुरुत्वजातिः व्याप्तिबलेन सिध्यतीति चेत्—न, अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुरुत्वगुणजन्यत्वे द्रव्यत्वस्येवोपाधेर्विद्यमानत्वात्। न द्वितीयः, गुरुत्वजातिविरह.......... गु ] रुत्वजाति[विरहस्तद्ग्रहणात् कथमस्मत्प्रत्यक्षनिष्ठगुणत्वावांतरजातिम त्त्वरहितमोक्षजनकगुणस्य गुरुत्वविरह इति चेत्—शृणु, अयं गुरुत्वजातिरहितः, मोक्षजनकत्वात्, तत्त्वसाक्षात्कारवदित्यादेः न चात्रास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणत्वाभाव उपाधिः, अस्मत्प्रत्यक्षगुणत्वावान्तरजातिमत्त्वरहितविशेषणस्य विपक्षरूपव्यावर्त्याभावात् विपक्षभूतस्य गुरुत्वस्य गुणत्वान्तर्भावेनैव व्यावृत्तत्वात्। व्यावर्त्यविपक्षरहितविशेषणवतश्च पक्षेतरत्वात्, तथापि पर्वतो वह्निमानित्यत्रापर्वतमवह्नि-



मत्त्वस्य पक्षेतरत्वम्। अपर्वतविशेषणस्य व्यावर्त्यविपक्षविरहात् वह्निरहितानां च वह्निरहितत्वेन व्यावृत्तत्वादिति।

अथायं गुरुत्वजातिमान् अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणत्वात् गुरुत्वादिति सत्प्रतिपक्षत्वम्। न चात्र मोक्षजनकत्वेन सोपाधित्वम्, गुरुत्वजातिरहितजनकानामजनकत्वेनैव व्यावृत्तत्वात्, अजनकस्य चान्त्यध्वंसादेर्मोक्षविशेषणेनाप्यव्यावृत्तेः। अजनके मोक्षजनकस्य विद्यमानत्वात् विपक्षरूपव्यावर्त्यरहितविशेषणवतश्च पक्षेतरत्वादिति मन्यसे, तन्न, एतत्पतनमेतज्जनकगुरुत्वजातिमत्त्वरहितास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणजन्यम्, कार्यत्वादन्यपतनवदिति सिद्धे गुरुत्वजातिरहितेऽस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणत्वाधारे व्यभिचारात्।

न चानेनैव धर्मसिद्धेः प्रथमानुमानवैयर्थ्यम्, अस्य धर्माधर्मसाधारणत्वेन धर्मसाधकत्वात्। प्रथमानुमानस्य च स्वर्गापवर्गजनकधर्मासाधकत्वात्। अथ मा भूत् गुरुत्वेनार्थान्तरता, अधर्मेण तु भविष्यतीति चेत्—किं मुक्तिरस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणजन्येत्यनुमानं मुक्तिजनकगुणस्याधर्मत्वं गृह्णातीति अर्थान्तरता, उत धर्मत्वेन गृह्णातीति ? नाद्यः, अधर्मत्वस्य व्यापकांशेऽनुपादानात्, साधनवतो गुरुत्वादेर्व्याप्यवृत्तित्वेनाव्यापकत्वाच्च। न द्वितीयः, धर्मत्वाग्रहणेऽपि यत्र धर्मत्वं तद्ग्रहणात्।

कथमत्र धर्मत्वमिति चेत्—शृणु, अयं धर्मत्वाधार। दुःखाजनकगुरुत्वरहितास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितं गुणत्वात् वक्ष्यमाणसुखजनकवत् सुखजनकत्वमुपाधिः, मोक्षहेतोर्योगजधर्मस्याष्टमहासिद्धिहेतुत्वेन सुखजनकत्वाङ्गीकारात्।

न च धर्मत्वासिद्धेरसिद्धविशेषणता, अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितसुखजनको गुणः धर्मलक्षणवतः व्यावृत्तत्वानधिकरणधर्मलक्षणवद्वृत्तिधर्मलक्षणरहितवृत्तित्वानधिकरणजातिमान् जातिमत्त्वात् गोवदिति धर्मत्वसिद्धेः। धर्मलक्षणं च दुःखाजनकगुरुत्वरहितास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणत्वम्। अस्मद्योगिदशायां गुरुत्वधर्मत्वादेरस्मत्प्रत्यक्षत्वेन तन्निष्ठगुणत्वावान्तरजातेरप्यस्मत्प्रत्यक्षनिष्ठत्वात् गुणत्वावान्तरजातिमत्त्वात् गुरुत्वधर्मादेरप्यस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वेन तदभिहितगुणत्वानुपपत्तेः अप्रसिद्धविशेषणत्वं बाधश्च प्रथमानुमान इति चेत्—न, योगजाजन्यजन्यसाक्षात्कारगोचरत्वमस्मत्प्रत्यक्षत्वम्, तच्च गुरुत्वधर्मादौ नास्तीति नापि बाध इति।

ननु योगजशब्देन योगजो धर्मो विवक्षितः, तदन्यत्वं वा ? प्रथमेऽप्रसिद्धविशेषणत्वम्, धर्मासिद्धौ योगजधर्मस्य सुतरामप्रसिद्धेः। द्वितीये तु अप्रसिद्धविशेषणत्वबाधौ तदवस्थौ गुरुत्वधर्मादिगोचरयोगिसाक्षात्कारस्यापि योगजयोगध्वंसाद्यजन्यत्वेन गुरुत्वधर्मादेरप्यस्मत्प्रत्यक्षत्वादिति चेत्—न, अनुपात्तधर्मतदन्यत्वविशे-

षणे योगजन्यस्य विवक्षितत्वात् । विशेषणविवक्षायां सर्वानुमानविलयादिति । एतच्छरीरजन्यसाक्षात्कारगोचरत्वं वास्मत्प्रत्यक्षत्वम् । न चैतच्छरीरजन्यसाक्षात्कारगोचरत्वं धर्मादेरपि संभाव्यमिति वाच्यम् ।

येन रूपेण शरीरादिसाक्षात्कारजनकेन धर्मादिगोचरसाक्षात्कारो जन्यते, तस्यैव तच्छब्देन विवक्षितत्वादिति । यदि वा देवदत्तो देवदत्तगतास्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितसुखजनकगुणवान् आत्मत्वात् यज्ञदत्तवदिति धर्मसिद्धिः। न चात्राप्रसिद्धविशेषणत्वं, यज्ञदत्तादावस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितगुणत्वाप्रसिद्धावपि यज्ञदत्तागतत्वे सति अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितसुखजनकगुणवत्त्वस्य प्रसिद्धत्वात् ।

न चैतदात्ममनःसंयोगानधिकरणत्वमत्रोपाधिः, आत्ममनोऽपि[न इति]विशेषणस्य व्यावर्त्यविपक्षाभावात् द्रव्याणां विपक्षाणां संयोगाधिकरणत्वेनैव व्यावृत्तेः । अद्रव्याणां चात्ममनःसंयोगानधिकरणत्वेनाप्यव्यावृत्तेः । नाप्येतदात्ममनःसंयोगानधिकरणत्वेना[सत्प्रतिपक्षता] स्मत्प्रत्यक्षता, अनात्मत्वेन सोपाधित्वात्, न चार्थान्तरताशङ्का अधर्मगुणत्वव्यतिरिक्तरूपादिगुणानामस्मत्प्रत्यक्षरूपादिनिष्ठगुरुत्वावान्तररूपादिजातिमत्त्वात् । भावनाया अप्यस्मत्प्रत्यक्षवेगनिष्ठगुणत्वावान्तरसंस्कारत्वजातिमत्त्वादिति, अधर्मगुरुत्वयोग्यसुखाजनकत्वात्, गुरुत्वस्यात्मनि बाधाच्च ।

न च रूपादिव्यतिरिक्तः पञ्चविंशतितमो गुणः सेत्स्यतीति । न तु धर्म एवेत्यर्थान्तरता, अस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितसुखजनकगुणत्वस्यैव धर्मलक्षणत्वात् । चतुर्विंशतितमधर्मसिद्धौ पञ्चविंशति [त] मेनार्थान्तरस्योद्भावयितुमशक्यत्वाच्चेति । यद्वा देवदत्तो देवदत्तबुद्धीच्छाप्रयत्नत्वरहितसुखजनकगुणवान् आत्मत्वात् यज्ञदत्तवदिति धर्मसिद्धिः । अर्थान्तरत्वादिनिरासः पूर्ववत् । आत्मत्वस्य च धर्मे प्रमाणत्वं यतोऽभ्युदयसिद्धिरित्यनेन सुखजनकं साध्यं मूर्छयतासूचितम् । बुद्ध्यादिव्यावर्तकमस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिमत्त्वरहितत्वादि विशेषणं च ।

यतोऽभ्युदयसिद्धिः स धर्म इति वदता यतोऽनभ्युदयसिद्धिः सोऽधर्म इति सूचितम्, तेन प्रथमानुमानेन दुःखपक्षीकरणेन द्वितीयतृतीययोश्च सुखजनकपदस्थाने दुःखजनकपदप्रक्षेपेणाधर्मसिद्धिर्द्रष्टव्या । सर्वार्थानां साक्षादभिधाने सूत्रत्वव्याकोपात्, यदाहुः,

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् ।<br>
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥

इति ॥ २ ॥

स्वर्गापवर्गसाधकमानाभावादाश्रयासिद्धिः प्रथमानुमान इति शङ्कापरिहारार्थं सूत्रम्—

**तद्वचनादाम्नायप्रामाण्यम् ॥ १.१.३ ॥**

इति ।



तदिति प्रकृतौ स्वर्गापवर्गौ परामृशति । तेन तयोः स्वर्गापवर्गयोः प्रतिपादनात् प्रमितिजननात् आम्नायस्य श्रुतिस्मृतीतिहासपुराणादेः प्रामाण्यं प्रमितिकरणत्वम् ।

आम्नायते धर्मकारणत्वेन पठ्यत इत्याम्नायः । तथा हि यद्यवधृतप्रामाण्योऽप्याम्नायः स्वर्गादौ न प्रमाणम्, तर्हि प्रतिपाद्यान्तराभावादप्रमाणमेव स्यात्, न च धर्मे वेदः प्रमाणमित्युक्तम् । [न ?] स च स्वर्गादावप्रमाणस्य तत्साधने साधनसाधने वा प्रामाण्यं संभवति । भवतु वा यागादिपदानां यागादौ प्रामाण्यम्, अनुष्ठापकत्वं दुर्घटमेव, प्रयोजनमन्तरेण प्रेक्षावतामप्रवृत्तेः । तेनानुष्ठानाङ्ग प्रमितिजनकत्वविरहादननुष्ठापकत्वलक्षणमप्रामाण्यं वेदस्य दुर्वारमिति ।

अत्र च तच्छब्देन नरकस्य परामर्शत्वात् स्वर्गवत् नरकेऽपि वेदः प्रमाणमिति द्रष्टव्यम् ।

तदेवं प्रथमसूत्रेण शास्त्रप्रतिपाद्यौ धर्माधर्मौ दर्शितौ । द्वितीयसूत्रेण तु स्वर्गापवर्गनरकपक्षीकारेण धर्माधर्मयोः प्रमाणं दर्शितम् । तृतीयसूत्रेण तु स्वर्गापवर्गनरकेष्वाम्नायः प्रमाणमभिहितमिति त्रिसूत्री व्याख्याता ।

यद् वा, प्रथमसूत्रेण शास्त्राभिधेयं धर्ममभिधाय यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म इति द्वितीयसूत्रे प्रयोजनं प्रतिपाद्यते । न ह्यनवगते शास्त्रे प्रतिपाद्यस्य धर्मस्य स्वर्गापवर्गसाधनत्वे श्रोतॄणां प्रवृत्तिः संभवति, इष्टसाधनबोधपूर्वकत्वाद् धर्मस्य स्वर्गापवर्गसाधनत्वाभावे शास्त्रश्रवणजन्यधर्मबोधस्येष्टत्वानुपपत्तेः स्वर्गापवर्गजन्यधर्मसाधनानुष्ठानानङ्गत्वात् । तस्मात् श्रोतॄणां शास्त्रे ण ? प्रवृत्तिमुत्पादयतां धर्मस्य स्वर्गापवर्गसाधनत्वं प्रतिपादनीयमिति ।

ननु निष्प्रमाणकः स्वर्गापवर्गयोः कथं प्रयोजनत्वमित्याशङ्क्य तद्वचनादाम्नायप्रामाण्यमिति तृतीयसूत्रेण प्रयोजनभूतयोः स्वर्गापवर्गयोः वेदः प्रमाणमिति प्रतिपाद्यते ।

ननु शास्त्रतात्पर्यगोचरधर्मप्रतिपादनपरत्वे सूत्रं व्यर्थम्, शास्त्रादेव तदवगमात् । अनवगमे तस्य शास्त्रगोचरत्वानुपपत्तौ प्रथमसूत्रस्य शास्त्रतात्पर्यगोचरधर्मप्रतिपादकत्वस्य व्याकोपादितः श्रोतृप्रवृत्तिजनकश्रोतृगतशास्त्रतात्पर्यविषयधर्मस्वर्गापवर्गसाधनत्वे बोधजनकतया धर्मबोधस्य श्रोतृप्रवृत्तेः पूर्वमेवापेक्षितत्वात् । न ह्यनवगते धर्मे तस्य स्वर्गापवर्गसाधनत्वं शक्यमधिगन्तुम्, विशेष्यज्ञानजन्यत्वाद् विशिष्टज्ञानस्य, तेन श्रोतॄणां शास्त्रश्रवणाङ्गधर्मस्वर्गापवर्गसाधनत्वबोधाय शास्त्राद्युत्पाद्यधर्मबोधः कर्त्तव्य इति सफलं सूत्रम् ।

न ह्य[न ?]भिधेयप्रवृत्तिमन्तरेण श्रोतॄणां न शास्त्रे प्रवृत्तिः । न ह्य[न ?]भिधेयादिप्रतिपादकसूत्रे वि[पि ?]नाभिधेयादिप्रतिपत्तिमन्तरेण श्रोतॄणां प्रवृत्तिरिति तत्रापि अभिधेयादिप्रतिपादकं सूत्रान्तरमारम्भणीयम् । तत्राप्येवं तत्राप्येवमित्यनवस्थेति चेत्—न,

शास्त्राभिधेयधर्मजिज्ञासायामवतरता प्रथमसूत्रेत्र शास्त्रप्रतिपाद्यवत् स्वप्रतिपाद्यस्यापि प्रतिपादितत्वात् । श्रोतृत्वाद् धर्मस्यैवोभयप्रतिपाद्यत्वात् । प्रतिपन्ने च शास्त्रप्रतिपाद्यप्रतिपादितसूत्रार्थे तत्प्रतिपाद्यजिज्ञासानुदये तज्ज्ञापकसूत्रान्तरारम्भणानवस्थेति ।

एवं शास्त्रप्रयोजनप्रतिपादकेनैव स्वप्रयोजनत्वस्यापि प्रतिपादितत्वात् न तत्प्रतिपादनार्थं सूत्रान्तरारम्भं [: ?] शास्त्रप्रयोजनस्यैव शास्त्रप्रयोजनप्रतिपाद्य[द]कप्रयोजनत्वादिति ।

यद् वा, द्रव्यादिपदार्थप्रतिपादकशास्त्रप्रयोजनधर्मप्रतिपादकम् अथातोधर्मं व्याख्यास्याम इति सूत्रं न शास्त्राभिधेयाभिधायकम्, वाक्यानामनभिधायकत्वात् । अभिधायाः पदधर्मत्वात्, नापि शास्त्रप्रतिपाद्यप्रतिपादकशास्त्रप्रतिपाद्यद्रव्यान्यप्रतिपादकत्वात् । धर्मस्य च त्रिसूत्रीव्यतिरिक्तशास्त्रप्रतिपाद्यत्वात् गुणविभागसूत्रेण धर्माधर्मयोः प्रतिपाद्यत्वात् । वाकारस्य च सूत्रान्तरप्रतिपादितधर्माधर्मसमुच्चयपरत्वे मानान्तराभावात् ।

अग्नेरूर्ध्वंज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितम् [५.२.१४] इत्यादेश्च दृष्टानुवादेन कारणत्वप्रतिपादकत्वात् । इच्छाद्वेषपूर्विका धर्माधर्मयोः प्रवृत्तिः [६.२.१७] इत्यादेश्च धर्माधर्मानुवादेन रागद्वेषजन्यत्वप्रतिपादकत्वात् । कारकत्वकार्यत्वविशिष्टधर्माधर्मस्वरूपप्रतिपादकानि भवन्ति इति चेत्—न, प्रकरणादिपर्यालोचनया कारणत्वादेरेव जिज्ञासितत्वात् । अग्नेरूर्ज्वंज्वलनादेः कारणत्वं जिज्ञासितम्, न तु कारणत्वमात्रमिति चेत्—न, घर्माधर्मयोः प्रथमसूत्रादेव ज्ञातत्वात् । तस्य प्रतिपाद्यान्तराभावे धर्माधर्मस्वरूपगोचरत्वात् ।

अत्रापि शास्त्रप्रतिपाद्यत्वं धर्मादिस्वरूपातिरिक्तं प्रतिपाद्यमस्ति । प्रतिपाद्यत्वे वा विशेषणीभूतसूत्रस्य शास्त्रप्रतिपाद्यत्वादिति चेत्—न, शास्त्रप्रतिपाद्यत्वस्य शास्त्राप्रतिपाद्यत्वात् । प्रतिपाद्यत्वे वा विशेषणीभूतशास्त्रस्यापि शास्त्रप्रतिपाद्यत्वापत्तेः । गुरुत्वद्रवत्वप्रतिपादकं तु सूत्रान्तरमस्तीति गुरुत्वात् पतनमस्तीति । नात्र द्रवत्वस्यन्दनकारणत्वम् [द्र० ५.२.५] इत्यादिसूत्राणामेव पतनस्यन्दनकारणत्वम् । विशिष्टगुरुत्वद्रवत्वादिपरत्वमङ्गीकृतम् ।

न च पतनादिकारणत्वप्रतिपादकसूत्रेण गुरुत्वादिसिद्धिवदूर्ध्वंज्वलनादिकारणत्वादिप्रतिपादकसूत्रैरेव धर्मादिसिद्धिरस्तु, किं प्रथमसूत्रेणेति वाच्यम्, सूत्रान्तरार्थस्यापि व्याख्यातृवचनादवगतिसंभवात् सूत्रान्तरानारम्भापत्तेः । द्रव्यादिप्रतिपादकं शास्त्रतात्पर्यवृत्त्या धर्मं प्रतिपादयतीति चेत्—न, तस्य द्रव्यत्वादावेव तात्पर्यात् स्वरूपेण द्रव्यादीनामपुरुषार्थत्वात् । धर्मसाधनतया द्रव्यत्वादयः प्रतिपादनीया इति द्रव्यादिधर्मसाधनत्वे शास्त्रस्य तात्पर्यं वक्तव्यम् ।

तथा च नागृहीतविशेषणन्यायेन साधनविशेषणधर्मेऽपि शास्त्रतात्पर्यसिद्धिरिति चेत्—न, प्रथमसूत्रे सत्यसति च शास्त्रस्य धर्मगोचरतात्पर्यविधारणानुपपत्तेः ।



सति प्रथमसूत्रे तत एव धर्मसिद्धेः शास्त्रस्य तत्र तात्पर्याभावात् । असति च प्रथमसूत्रे धर्मासिद्धौ शास्त्रस्य तद्गोचरतात्पर्यावधारणस्य दुर्घटत्वात् ।

अथ च किं समस्तशास्त्रार्थप्रतिपादकमिदं सूत्रम्, किं वा शास्त्रैकदेशार्थप्रतिपादकम् ? नाद्यः, शास्त्रवैयर्थ्यापत्तेः । न द्वितीयः, शेषशास्त्रार्थप्रतिपादनवदस्याप्रतिपादनेऽपि श्रोतृप्रवृत्तिघटनात् ।

अस्य विस्तरार्थं शास्त्रमिति चेत्--न, प्रतिपाद्यानतिरेके विस्तरवैयर्थ्यात् । एतत्सूत्रव्याख्यानार्थं शास्त्रमिति चेत्--न, किं व्याख्यानमन्तरेणास्य सूत्रस्यार्थो [न?] ज्ञायते ? न वा प्रथमे व्याख्यानस्य वैयर्थ्यम्, द्वितीये सूत्रवैयर्थ्यम्, शास्त्रादौ प्रतिपाद्यबोधजनकत्वात् । शास्त्रस्य निरपेक्षस्य बोधजनकत्वात् । तस्मात् सातिशयानेकविधप्रवर्तकनिवर्तकधर्मस्याश्रयोपकरणकार्यकारणोपभोगविनाशकरणसहितस्य शास्त्रप्रतिपाद्यस्य प्रतिपादकमित्यात्रेयाचार्यमतमुपेक्षणीयमिति प्रयोजनप्रतिपादनपरमेवेदं सूत्रमिति ।

शास्त्रप्रतिपाद्यानवगमे तस्येदं प्रयोजनमिति शिष्यैरवगन्तुमशक्यमिति चेत्--न, एतच्छास्त्रजन्यस्य ज्ञानस्य धर्मः प्रयोजनमित्यवगन्तुं शक्यत्वात्, अथैतच्छास्त्रप्रतिपाद्यानवगमे तद्विषयमेतच्छास्त्रजन्यं ज्ञानमवगन्तुमशक्यमिति चेत्--न, एतच्छास्त्रजन्यं ज्ञानमिति शब्देन विषयानवच्छिन्नस्यापि बोधात् अन्यथा ज्ञानशब्देनापि ज्ञानानवगमापत्ते. । अस्तु वा सामान्यतः किञ्चिदस्य शास्त्रप्रतिपाद्यावगमः न चैवं सति तदर्थमेवेदं सूत्रमस्तीति वाच्यम् वाक्यत्वादेव किञ्चित्प्रतिपाद्यावगमात् । सूत्रेण च प्रतिपाद्यधर्मविशेषप्रतिपादनादिति ।

ननु न धर्मः सुखं, नापि दुःखनिवृत्तिः । कथं प्रयोजनमित्याशङ्कापरिहारार्थं सूत्रम्—

यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः । [१. १. २]

इति । सुखादिवत् तत्साधनमपि पुरुषस्येष्टमिति भवति धर्मः प्रयोजनमन्नोदकादिवदिति भावः । तदेवं सूत्रद्वयेन प्रयोजनं समर्थितम् । किं पुनरधर्मे प्रमाणमित्याशङ्कायामनुमानप्रतिपादकं द्वितीयं सूत्रम् । आगमप्रतिपादकं तृतीयं सूत्रम्--

तद्वचनादान्मायप्रामाण्यम् । [१. १. ३]

इति । तदिति प्रकृतं स्वर्गापवर्गसाधनं धर्मं परामृशति । तेन स्वर्गापवर्गसाधनधर्मवचनादाम्नायस्य प्रामाण्यमिति । धर्मप्रमाणत्वेनाम्नायते पठ्यत इत्याम्नायः चतुर्दशविद्यास्थानमिति । आचारश्च । यदाह **याज्ञवल्क्यः**,

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इति ।

आचारश्चैव साधूनाम् ।

इति च ।

कथं धर्मबोधकत्वं वेदस्येति चेत्--लिङादीनामिष्टसाधनबोधकत्वादिति ब्रूमः। तथा ह्योदनकामः पचेदित्याद्युत्तमवृद्धप्रयुक्तवाक्यश्रवणानन्तरं मध्यमवृद्धं प्रवर्त्तमानमवलोक्य बालस्तावदेवमाकलयति, अयं कायपरिस्पन्दो जन्येष्टसाधनबोधजन्येच्छाजन्ययत्नजन्यः प्रवृत्तित्वात्, मत्प्रवृत्तिवदिति। तदनन्तरमयमिष्टसाधनताबोधो नेन्द्रियजन्यः [जन्यजन्यः ?] स्वाध्यापकादेरिन्द्रियासन्निकृष्टत्वात्, अतीतवर्तमानयोः प्रागभावरूपकारणरहितयोरसाध्यत्वात्। नाप्ययं पाक इष्टसाधनं पाकत्वादित्यनुमानजन्यः, धर्मसिद्धेः साध्यस्य पाकस्य प्रत्यक्षानुमानाभ्यामनवगमात्। पचतिना च केवलेन साध्यपाकाप्रतीतेः। यत्किञ्चित्पाकस्य चेष्टासाधनत्वानुमानेऽपि मध्यमवृद्धस्य साध्यपाकगोचरप्रवृत्त्यनुपपत्तेः प्रत्ययेन केवलेन भावनामात्रमभिदधता साध्यपाकानवगमात्। प्रकृतिप्रत्ययाभ्यां च कृतिजन्येष्टसाधनपाकानवगमेऽपि पाकस्येष्टसाधनत्वानुमानं व्यर्थम्, प्रागेव शब्दादिष्टसाधनत्वावगमात्। एतेनायं पाक इष्टसाधनं प्रैषगोचरत्वादित्यपि निरस्तम्, पक्षधर्मत्वासिद्धेः। मध्यमवृद्धेनेन्द्रियादीनां पाकगोचराप्ताभिप्रायानवगमात्।

लिङादिशब्दादेवावगम्यत इति चेत्—न, मध्यमवृद्धेन लिङादीनां तत्र सङ्गत्यग्रहात्, तस्य व्युत्पत्तिदशायां बाधत्वात्। बालेन च स्वात्मदृष्टान्तेन च प्रवर्तमानमध्यमवृद्धस्य प्रवृत्तिजनकप्रयत्नजनकेष्टकार्येष्टसाधनताबोधानुमानेऽपि प्रवृत्तिविषयगोचराप्ताभिप्रायानुमानात्, स्वात्मनि तथानवगमात्। न हि यथा बला[?] स्वगतस्तन्यनपानादिप्रवृत्तिजन्येष्टसाधनजन्येच्छाजन्यप्रयत्नपूर्वकत्वमन्वयव्यतिरेकाभ्यामवगच्छन्ति, तथा प्रवृत्तिविषयगोचरेष्टाभिप्रायज्ञानपूर्वकत्वमपि। न चानवगते प्रैषादौ लिङादिवाच्यत्वज्ञानं संभवति, वाच्यानवगमस्य तद्वाचकत्वकारणत्वोपगमादिति।

अथोपदेशे यत्र प्रयोज्यपुरुषगतं कर्मफलं तत्र भवतु नामेष्टसाधनवाचकत्वम्, लिङादेः प्रयोज्यपुरुषव्यावृत्तेरिष्टसाधनबोधपूर्वकत्वात्। यत्र पुनर्न प्रयोज्यपुरुषगतं कर्मफलं किं तु प्रयोक्तृपुरुषगतम्, यथा सूपकारं प्रति पचेति महामात्रं प्रति गजमानयेत्यादौ राजवाक्ये सूपकारकृतपाकादेः राजापेक्षितौदनादिसाधनत्वात् तत्र नेष्टसाधत्वे लिङादीनां व्युत्पत्तिः, प्रवर्तमानस्य सूपकारादेः पाकगोचरेष्टसाधनबोधादननुमानात्, पाकस्य सूपकारतृप्तिसाधनौदनविरहात्। किं तु प्रैषादौ पुरुषाभिप्राये तेन लिङादीनां क्वचिदिष्टसाधनवाचकत्वात्। क्वचित् च पुरुषाभिप्रायवाचकत्वमिति वाचस्पतिप्रभृतयः। तदपि न, राजतृप्तिसाधनस्यौदनस्य राज्ञस्तु सूपकारस्यापि वेतनदातृस्वामितृप्तिसाधनतया इष्टसाधनत्वेन पाकस्यापि सूपकारस्येष्टसाधनत्वात्।

अथ कथं स्वामितृप्तिसाधनौदनस्य सूपकारेष्टसाधनत्वमिति चेत्—स्वामितृप्तेः सूपकारेष्टत्वादित्यवैहि। ननु न स्वामितृप्तिः सूपकारसुखं स्वामिसमवेतत्वात्। नापि सूपकारसुखसाधनम्, अन्यगतसुखादेरन्यगतसुखाद्यसाधनत्वात्। तत्कथं सूपकारस्येष्टेति। उच्यते, स्वामितृप्तेः सुखस्वरूपतया स्वभावत एव सूपकारेष्टत्वात् स्वगतसुखवत्। स्वगतमेव सुखमिष्टमिति चेत्—न, पुत्रादिसुखस्यापीष्टत्वात्। अन्यथा



पुत्रजन्मनिमित्तायामिष्टौ पित्रानुष्ठीयमानायां पुत्रगतपूतत्वादेः फलत्वप्रसङ्गात्। स्वरूपेण सुखस्येष्टत्वे शत्रोरुदासीनस्य च सुखमिष्टं स्यादिति चेत्—न, प्रीतिविषयसुखस्येष्टत्वात्। यथा हि सुखादभीष्टसाधनत्वादात्मादयः पुत्रादयश्च, तथा वेतनदाता स्वाम्यपीति सिद्धं स्वामितृप्तिसाधनौदनसाधनपाकस्येष्टसाधनत्वम्। अन्यथा सूपकारस्य पाकगोचरेष्टसाधनविरहे तज्जन्येच्छानुत्पत्तौ तज्जन्यप्रयत्नानुदयात्।

अनिच्छन्नपि राजाज्ञया प्रवर्तत इति चेत्—न, चेतनप्रवृत्तेरिच्छाजन्यत्वात्। न चास्याश्चेष्टसाधनताबोधजन्यत्वात् क्वचित् प्रवृत्तिरिष्टसाधनताबोधजन्येच्छाजन्या, काचित् प्रैषादिजन्येति चेत्—न, प्रयोक्तृप्रैषादिरिच्छाविशेषस्य लिङाद्युच्चारणस्य प्रयत्नादीन् प्रागेव विनष्टस्य प्रवृत्त्यव्यवहितपूर्वक्षणरहितप्रवृत्तिजनकानुपपत्तेः। प्रयोक्तृप्रैषादिज्ञानं लिङादिजन्यं प्रवृत्तिहेतुर्न स्वरूपेण प्रैषादिरिति चेत्—न, अननुविधेयप्रैषाद्यवगमेऽप्यप्रवृत्तेः।

अनुविधेयप्रैषादिज्ञानं प्रवृत्तिहेतुरिति चेत्—न, किं कुर्यादिति विषयविशेषानवच्छिन्नप्रैषाद्यवगमेऽप्यप्रवृत्तेः। विषयविशेषानवच्छिन्नानुविधेयप्रैषादिज्ञानं प्रवृत्तिहेतुरिति चेत्—किं विषयविशेषानवच्छिन्नप्रैषादिज्ञानं स्वरूपेण प्रवृत्तिहेतुः, किं वेष्टसाधनत्वानुविधेयप्रैषस्य गोचरत्वविषयतयेष्टसाधनत्वानुमितीच्छाजननद्वारा ? नाद्यः, मानाभावात्, इयं प्रवृत्तिरेतत्प्रैषज्ञानजन्या तदनन्तरोत्पन्नत्वात् संस्कारवदिति चेत्—न, व्यवहितानन्तरोत्पन्ने व्यभिचारात्। अव्यवहिततदनन्तरोत्पन्नत्वं हेतुरिति चेत्—न, अव्यवहिततदनन्तरोत्पन्ने घटादिभिर्व्यभिचारात्। तेऽपि पक्षतुल्या इति चेत्—न, अपसिद्धान्तात्, अव्यवहितविशेषणासिद्धेश्च। प्रैषादिज्ञानादिष्टसाधनत्वज्ञानम्, इष्टसाधनत्वज्ञानादिच्छा, ततः प्रवृत्तिरिति स्वीकारात्। तत्र प्रवृत्तित्वेन सोपाधित्वाच्च। न चात्र पक्षेतरत्वाशङ्का। प्रैषादिज्ञानाजन्यस्तनपानादिप्रवृत्तेः विपक्षस्य व्यावर्तनात्। इयं प्रवृत्तिर्न प्रैषादिज्ञानजन्या प्रवृत्तित्वात्, स्तनपानादिप्रवृत्तिवदिति प्रतिपक्षसत्वाच्च।

न द्वितीयः, अनुविधेयप्रैषगोचरत्वज्ञानजन्येष्टसाधनत्वानुमितिजन्येच्छादित एव प्रवृत्तेरुत्पपन्नत्वेन प्रैषादिज्ञानस्याकारणत्वस्थितेः इष्टसाधनत्वज्ञानेन प्रैषादिज्ञानस्येच्छोत्पत्तिकाले नाशात् प्रवृत्त्यव्यवहितपूर्वक्षणविरहाच्च प्राचीनपक्षदोषाच्च।

अस्तु वा प्रैषादिज्ञानस्य प्रवृत्तिविशेषणहेतुत्वं कार्यस्येष्टसाधनज्ञानजन्येच्छाजन्यत्वं दुर्वारम्। इयं प्रवृत्तिर्जन्येष्टसाधनज्ञानजन्येच्छाजन्या प्रवृत्तित्वात्, संप्रतिपन्नवदित्यादेः सत्त्वात्। न च स्वमन्दिरदाहगोचरपिशाचादिप्रवृत्तौ व्यभिचारः, तस्या अपि पिशाचनिष्ठदाहादिष्टसाधनत्वज्ञानेच्छापूर्वकत्वात्। निजगृहदाहादिना पिशाचाद्यभिलषितसुखाद्युत्पत्तेः। न च जलपवनादिजन्यायां प्रवृत्तौ व्यभिचारः, जलादिनुद्यमानपुरुषेषु प्रयत्नरूपप्रवृत्तेरभावात्। तद्देहेषु च चेष्टात्वापरपर्यायप्रवृत्तिविरहात्। नापि भुवि बलात्पाषाणप्रवृत्तितः पुरुषप्रवृत्तौ व्यभिचारः, तस्या अप्यनिष्टसाधन-

पाषाणादिवहनपरिहाररूपपाषाणवहनेष्टसाधनबोधपूर्वके इच्छाजन्यत्वात्। पाषाणवहनस्य कथमनिष्टसाधनत्वमिति चेत्? आज्ञाविषयपाषाणवहनाभावस्य दुःखहेतुक····भिघातहेतुत्वादिति।

नापि विषभक्षणोदखादनादिप्रवृत्तौ व्यभिचारः, तस्या अप्यवमाननादिदुःखसाधनदेहविनाशेष्टसाधनबोधजन्येच्छापूर्वकत्वात्। नापि भगवतो महादेवस्य स्वर्गा द-प्रवृत्तौ व्यभिचारः, ईश्वरप्रयत्नकार्यत्वपक्षे तस्यापि पक्षतुल्यत्वात्। अजन्यत्वपक्षे कार्यत्वेन हेतुविशेषणात् जीवनयोनिव्यतिरिक्तजन्यप्रयत्नत्वस्य वा प्रवृत्तिशब्दार्थत्वादिति। तस्मात् सर्वत्रकार्येष्टसाधनबोधस्य प्रवृत्तिहेतुत्वमिति सिद्धं लिङादीनामिष्टसाधनत्ववाचकत्वमिति।

लिङादीनामिष्टसाधनत्वावाचकत्वे, विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् इति पाणिनिस्मृतिविरोध इति चेत्--न, विधिशब्देनेष्टसाधनत्वस्य प्रेरणापरपर्यायस्याभिधानात्। निमन्त्रण- शब्देन च यत्प्रत्याख्याने प्रत्यवायः तथाविधेष्टसाधनत्वप्रतिपादनात्, आमन्त्रणशब्देन यत्प्रत्याख्याने न प्रत्यवायः तथाविधेष्टसाधनत्ववचनात्। अधीष्टपदेन च सत्कारपूर्वकेष्टसाधनत्वाभिधानात्, पाणिनिस्मृतेर्व्युत्पादितन्यायत्वेनोपपत्तौ मूलान्तर- कल्पनानुपपत्तेः।

सन्तु वा प्रैषादय एव विध्यादिशब्दवाच्याः। तथापि न पाणिनिस्मृतिविरोधः। तेन प्रैषादेर्लिङादिवाच्यत्वमभिदधतापीष्टसाधनत्वस्य वाच्यत्वानिषेधात्। न्यायसिद्धेष्टसाधनत्ववाचकत्वस्मृतिसिद्धप्रैषादिवाचकत्वयोरविरोधात्, पाणिनिना च प्रैषादेस्तज्ज्ञानस्य प्रवर्तकत्वानभिधानात् न तन्निषेधेऽपि स्मृतिविरोधः। एतेनायं वाचक इष्टसाधनं प्रेरणागोचरत्वादित्यपि निरस्तम्, प्रेरणाशब्देन प्रैषाद्यभिधानवत् शब्दभावनाभिधानेऽपि आश्रयासिद्धिवत् पक्षधर्मत्वासिद्धेरपि वज्रलेपायमानत्वात्।

मध्यमवृद्धेन पाकगोचरत्वप्रवृत्त्यनुकूलशब्दव्यापारानवगमात्। तच्च व्युत्पत्तिविरहाद्युपपत्तिदशायां मध्यमवृद्धस्यापि बालत्वात्, बालेन च स्वभावदृष्टान्तेन मध्यमवृद्धस्य प्रयत्नजनकेच्छाजनककार्येष्टसाधनबोधानुमानेऽपि प्रवृत्तिविषयगोचरशब्दव्यापारबोधादनुमानात्।

स्वात्मनि तर्ह्यप्रवृत्तिहेतुत्वानवगमात् शब्दाश्रवणेऽपि बालस्य स्तनपानादौ प्रवृत्तेः स्वरूपासिद्धेश्च प्रवृत्त्यनुकूलशब्दव्यापारे मानाभावात्। अयं लिङादिप्रत्ययः प्रवृत्त्यनुकूलव्यापारवान् व्यापारातिरिक्तप्रवृत्तिजनकत्वात् आत्मवदित्यादेरिष्टसाधनबोधेनार्थान्तरत्वात्। विशेष्यासिद्धेश्च, शब्दस्य प्रवृत्तिजनकत्वे मानाभावात्। शब्दः प्रवृत्तिजनकः, तदव्यवहितपूर्वक्षणवृत्तित्वादिति हेतुसिद्धिरिति चेत्—न, व्योमादिभिर्व्यभिचारात्। अव्यवहितविशेषणासिद्धेश्च। शब्दादिष्टसाधनत्वज्ञानम्, तत इच्छा, ततः प्रवृत्तिरिति स्वीकारात्। इयं प्रवृत्तिर्लिङादिजन्या, तदव्यवहितोत्तरक्षणोत्पन्नत्वात्। तज्जन्यज्ञानवदिति हेतुसिद्धिरिति चेत्- न, तदव्यवहितोत्तरक्षणोत्पत्तौ



घटादिभिर्व्यभिचारात्, आत्मवदसिद्धेश्च। व्यापारेतरत्वविशेषणासिद्धेश्च लिङादेः प्रयोक्तृपुरुषव्यापारत्वसंभवात्। शब्दादेव प्रवृत्त्युपपत्तेः न प्रयोक्ता प्रवृत्तिहेतुरिति न शब्दस्य तद्व्यापारत्वमिति चेत्—न, शब्दजन्यज्ञानादेव प्रवृत्त्युपपत्तेः शब्दस्यापि प्रवृत्त्यजनकत्वे व्यापारकल्पनानुपपत्तेः। एतेन लिङादिर्व्यापारवान् व्यापारातिरिक्तकारणत्वादात्मवदित्यपि निरस्तम्।

अथ लौकिकवाक्येषु तावत् प्रेरणादिज्ञानं प्रवृत्तिहेतुर्न प्रैषादिविशेषणज्ञानं व्यभिचारात्। तथा च स्वर्गकामो यजेतेत्यादिवाक्यश्रवणानन्तरं भाविनी प्रवृत्तिः प्रेरणादिज्ञानपूर्विका प्रवृत्तित्वात् प्रैषज्ञानजन्यप्रवृत्तिवदित्यनुमीयते। न चेष्टसाधनत्वरूपप्रेरणाज्ञानेन सिद्धसाध्यता, तस्य प्रवृत्तिविषयगोचरत्वाभावात्। न हीष्टसाधनत्वं प्रैषादिवद्विषयनिरूप्यम्। शब्दव्यापारस्तु विषयनिरूप्यावकल्पित इति।

न चात्र प्रैषादिः संभवति, तस्य पुरुषाभिप्रायविशेषस्य अपौरुषेये वेदे असंभवात्। तेन तदतिरिक्तशब्दव्यापाररूपप्रेरणाज्ञानसिद्धिमा····तच्च ज्ञानं लिङादिजन्यं तदन्वयव्यतिरेकानुविधायित्वात् तद्गोचरज्ञानवदिति लिङादेस्तत्र सामर्थ्यं कल्प्यते। यदाहुः

अभिधाभावनामाहुरन्यामेव लिङादयः।

इति। अभिधाशब्दस्तस्य भावना प्रवृत्तिरूपा भाव्यनिष्ठव्यापार इति मन्यसे, तदपि न युक्तम्, प्रेरणाऽनिरुक्तेः। तथा हि (१) प्रेरणा किं प्रवृत्तिगोचरः प्रैषः, (२) किं वा प्रवृत्तिविषयागोचरः प्रैषः, (३) किं वा प्रवृत्तिविषयगोचराभ्यनुज्ञा, (४) किं वा प्रवृत्तिविषयगोचरः पुरुषाभिप्रायः, (५) किं वा प्रवृत्तिविषयगोचरः शब्दव्यापारः, (६) किं वा प्रवृत्तिविषयगोचरप्रेरणात्वाधारः, (७) किं वा प्रेरणात्वाधार इति।

न प्रथमद्वितीयौ, अभ्यनुज्ञानजन्यप्रवृत्तौ व्यभिचारात्। शब्दव्यापारासिद्धेश्च, वेदे प्रैषाद्यनभ्युपगमेनापसिद्धान्ताच्च।

न तृतीयः, प्रैषादिजन्यप्रवृत्तौ व्यभिचारात्, पूर्वदोषाच्च।

न चतुर्थः अप्रसिद्धविशेषणत्वात्, दृष्टान्तस्य साध्यविकल्पा[लत्वा]च्च।

न पञ्चमः(?) प्रैषादिज्ञानजन्यप्रवृत्तेः शब्दव्यापारज्ञानाजन्यत्वात्।

न षष्ठः, शब्दव्यापारासिद्धेः, प्रेरणात्वस्य शब्दव्यापारान्यत्वात्, शब्दव्यापारत्वाव्याप्यत्वाच्च। तदन्तरेणापि प्रैषादिसत्त्वात्।

नापि प्रेरणात्वं शब्दव्यापारावच्छिन्ने[न्न] स्वभात्रं घटाभाव इव घटावच्छिन्नस्वभाव इति वाच्यम्। प्रैषादनवच्छेदेनैव प्रतीतेरिति।

अथ वेदवाक्यानन्तरभाविप्रवृत्तिजनकज्ञानगोचरप्रेरणात्वेनानुनीयते। ज्ञा[मा]नस्य विरुद्धरूपत्वे व्यापारान्तरं कल्पनीयम्। सिद्धस्याव्यापारवत एव जनकत्वादिति व्यापाररूप एवासौ। स च तद्बुद्धिस्थापितधात्वर्थभावनादेस्तस्य प्रवृत्त्युत्तरकाल-

भाविनः प्रवृत्तिजनकव्यापारपूर्वक्षणवर्तित्वरहितस्य तज्जनकत्वानुपपत्तेः । तेन प्रवृत्तिपूर्वक्षणवर्तिनः शब्दस्यैवासौ व्यापार इति परिशेषात् कल्प्यत इति । तदपि न, तस्य सिद्धस्यापि ज्ञानमात्रेणापि प्रवृत्त्युपपत्तेः व्यापारकल्पनानवकाशात् । सिद्धत्वे सति जनकत्वेन प्रवृत्त्यनुकूलव्यापारानुमानस्य भट्टनये अर्थापत्त्यनुदयबाधितत्वात् ।

अस्मन्मते चासिद्धिग्रस्तत्वात्, प्रेरणायाः प्रागेव प्रवृत्तिहेतुत्वनिषेधात् व्यापारवत्त्वेऽपि शब्दगतत्वासिद्धेः प्रवर्त्यपुरुषहेतुत्वेनाऽपि प्रवृत्त्युपपत्तेः । लिङादि[ः]प्रवृत्तिजनकव्यापाराश्रयः व्यापारातिरिक्तप्रवृत्तिजनकत्वादात्मवदित्यादेः प्रागेव दूषितत्वात् । अशाब्दत्वेन सोपाधित्वाच्च । लिङादिव्यतिरिक्तशब्दानामपि पक्षरूपाणां व्यावर्त्यत्वात् न पक्षेतरत्वशङ्कापि ।

प्रवृत्तिविषयत्वं वा किं यत्किञ्चित्प्रवृत्तिविषयत्वं विवक्षितम्, एतत्प्रवृत्तिविषयत्वं वा ? प्रथमे व्यर्थविशेषणत्वम्, यत्किञ्चित्प्रवृत्तिविषयगोचरत्वस्य क्वचिदप्यनुपयोगात् । विषयगोचरत्वमात्रेण विषयनिरूप्येष्टसाधनरूपप्रेरणयार्थान्तरत्वनिरासात् । द्वितीये प्रैषादिज्ञानजन्यप्रवृत्तौ हेतोर्व्यभिचारः । पूर्ववद्वैयर्थ्यं च । अस्तु सद्विषयज्ञानपूर्वकत्वमात्रं साध्यमिति चेत्—न, वेदपौरुषेयत्वस्य पुरुषाभिप्रायेण सिद्धसाधनात् । अपौरुषेये वेदे पुरुषाभिप्रायो बाधित इति चेत्—न, वेदपौरुषेयत्वस्य वक्ष्यमाणत्वात् । अपौरुषेयत्वेऽपि इष्टसाधनत्वरूपप्रेरणाया[ः] सिद्धसाधनत्वस्य दुर्वारत्वात् । सविषयग्रहणेन निर्विषयमिष्टसाधनत्वं निरस्यत इति चेत्—न, विषयानिरुक्तेः । भावना धात्वर्थादिर[न]वच्छेदको विषय इति चेत्—न, अस्ति हीष्टसाधनत्वस्याप्यवच्छेदक इति तस्यापि सविषयत्वमेव ।

प्रैषादिजन्यप्रवृत्तिविषयत्वं धात्वर्थादेः विषयत्वमिति चेत्—न, इष्टसाधनत्वं प्रत्ययविशिष्टं इष्टसाधनत्वजन्यप्रवृत्तिविषयत्वात् । अन्यस्य च विषयत्वस्यानिरूपणादिति ।

अतएव न सप्तमः, सर्वेष्वपि पक्षेषु दृष्टान्तस्य साध्यविकलत्वाच्च । प्रवृत्तेः प्रैषादिज्ञानजन्यत्वस्य प्रागेव निरस्तत्वात्, प्रवृत्तित्वस्य बालस्तनपानादिप्रवृत्तिषु व्यभिचाराच्च । शब्दव्यवहितोत्तरक्षणोत्पन्नप्रवृत्तित्वं हेतुरिति चेत् न, शब्दाव्यवहितोत्तरक्षणोत्पन्नाभिः शब्दनिरपेक्षाभिः स्तनपानादिप्रवृत्तिभिः व्यभिचारात् । शब्दजन्यं[न्य] प्रवृत्तित्वं हेतुरिति चेत्—न, असिद्धत्वात् । अस्मन्मते शब्दस्य प्रवृत्तिजनकेच्छाजनकेष्टसाधनबोध एव हेतुत्वात् शब्दजन्यनि?बोधत्वात् शब्दजन्येष्टसाधनबोधजन्येच्छाजन्यजन्यप्रवृत्तित्वं हेतुरिति चेत्—न, तवासिद्धेः । इष्टसाधनबोधन? बोधस्य भवन्मते शब्दाजन्यत्वात्, शब्दाजन्यप्रेरणाज्ञानजन्येष्टसाधनबोधजन्येच्छाजन्यप्रवृत्तित्वं हेतुरिति चेत्—न, अस्मान् प्रत्यसिद्धेः । अस्माभिरिष्टसाधनत्वबोधस्य शब्दजन्यप्रेरणाज्ञानजन्यत्वानङ्गीकारात् । प्रेरणाज्ञानजन्यत्वे प्रवृत्तित्वाभावस्योपाधित्वाच्च । यत् प्रेरणाज्ञानजन्यं न तत् प्रवृत्तिरिति साध्यव्यापकत्वस्य प्रेरणा-



ज्ञानजन्यसंस्कारादौ निर्णयात् प्रवृत्तित्वरूपसाधनवद्व्यावृत्तत्वेन साधनाव्यापकत्वात् । प्रेरणाज्ञानजन्यप्रवृत्तिरूपविपक्षव्यावृत्तत्वेन पक्षेतरत्वनिरासाच्चेति ।

एतेनैतदपि पक्षद्वयं प्रत्युक्तं यदाहुः—लिङादेर्वाचकत्वातिरिक्तार्थप्रतिपत्त्यनुकूलव्यापारव्यापारत्वात् [वाचकत्वात् ?] । प्रेरणाप्रवृत्त्यनुकूलव्यापारान्तरकल्पने गौरवात् । स च लिङाद्यभिहितः प्रवृत्तिहेतुरिति । तदुक्तम्,

अभिधाभावनामाहुरन्यामेव लिङादयः ।

इति । अभिधा अर्थप्रतिपत्तिः । तस्यां भावना, तदनुकूलो व्यापारः । तामेव प्रवृत्त्यनुकूलत्वेन लिङादयो वदन्तीति ।

यद्वा लिङादेरर्थभावनादिवाचकत्वशक्तिरेव अर्थप्रतिपत्तिहेतुत्वादभिधाप्रवृत्तिहेतुत्वाच्च । [न ?] प्रेरणावाचकत्वातिरिक्तार्थप्रतिपत्त्यनुकूललिङादिव्यापारः य[त]त्कल्पने गौरवात्, सा च लिङाद्यभिहिता प्रवृत्तिविषयस्येष्टसाधनत्वं गमयन्ती प्रवर्तयति । यदाहुः,

अभिधाभावनामाहुरन्यामेव लिङादयः ।

इति । अभिधा वाचकत्वशक्तिः । सैव प्रवृत्तिभावत्वात् भावनां तां लिङादयो वदन्तीति वाचकत्वस्य प्रेरणात्वे पूर्वनिरस्तातिरिक्तप्रमाणाभावात् ।

प्रवृत्तिरेव प्रकारान्तरेणानुपपद्यमानत्वात् तत्र प्रमाणमिति चेत्—न, इष्टसाधनप्रैषादिबोधनादेव तदुत्पत्तेः । तस्मान्न प्रेरणागोचरत्वेन पाकस्येष्टसाधनतानुमानं तत्परिशेषादोदनकामः पचेदित्यादिवाक्यजन्यो मध्यमवृद्धस्य पाके इष्टसाधनत्वबोध इत्यवधारयति । तदनन्तरमावापोद्धाराभ्यां पाकमात्रं पचेरर्थ इष्टसाधनकृतिकर्तृसंयोगस्तु लिङ इति निर्धारयति ।

इष्टसाधने वानन्वित एव लिङभिहिते परस्परमाकाङ्क्षासन्निधियोग्यताबलादन्वीयते । अश्वमानयेत्यत्राश्वानयने, अन्यथेष्टसाधने च तदन्वये च वाचकत्वकल्पनापत्तेः । अस्तु वेष्टसाधनत्वमेव लिङादिवाच्यम् । इष्टसाधनत्वं च आश्रयसाकाङ्क्षा[क्षं?] सन्निहितं योग्यं च धात्वर्थमात्रमाश्रयते । कृतिश्च विषयसाकाङ्क्षा सन्निहिता योग्या च धात्वर्थमेवावलम्बते । अस्तु तेन कृतिसाध्यत्वं धातुसमभिव्याहारलभ्यम्, न तु लिङ्वाच्यम् । कृतिसाध्यत्वस्य लिङ्वाच्यत्वेऽपि न कृतिसाध्यत्वेष्टसाधनत्वयोरेकाधिकरणत्वं लिङ्वाच्यम् । तस्याकाङ्क्षासन्निधियोग्यताबललभ्यत्वात् । तेन कृतिसाध्येष्टत्वसाधनं पाक इति प्रकृतिप्रत्ययसमुदायात्मनः पचेदिति पदस्यार्थः ।

किं च तदिष्टं, किं च कृतिकर्तृसंख्ययोराश्रय इत्याकाङ्क्षायामोदनकाम इति पदेनेच्छाविषयौदनेच्छाधारपुरुषौ समर्प्येते । तेनाभिलाषविषयौदनसाधनाभिलाषवत्पुरुषकृतिसाध्यः पाक इत्योदनकामः पचेदिति वाक्यस्यार्थ इति व्युत्पद्यते । एवं व्युत्पन्नो ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादिना लिङ्प्रत्ययेनेष्टसाधनकृतिकर्तृसंख्याः प्रतिपाद्यन्ते[ते] । किं तदिष्टं, कश्च कृतिकर्तृसंख्ययोराश्रय इत्याकाङ्क्षायां स्वर्गकाम

इत्यनेन कामनाविषयस्वर्गकामनावत्पुरुषौ समर्प्येते। तदनन्तरं च किं तत्स्वरूपेष्टसाधनमित्याकाङ्क्षायां न धात्वर्थः संबध्यते। तस्याशुतरविनाशित्वेन कालान्तरभाविस्वर्गसाधनत्वस्य प्रागेव निरस्तत्वात्। नापि समानप्रत्ययोपात्ता कृतिः, तत एव। नापि समानप्रत्ययोपात्ता कर्तृसंख्या, कर्तुरात्मत्वात्। आत्मगतैकत्वस्य च नित्यत्वेन कृत्यसाध्यत्वात्। कृतिसाध्येष्टसाधनस्यैव लिङादिबोध्यत्वात्। कृतिसाध्येष्टसाधनबोधस्यैवान्वयव्यतिरेकाभ्यां प्रवृत्तिहेतुत्वावधारणात्। कर्तृसंख्यायाश्चेष्टार्थसाधनत्वे यागादेरप्यन्वयप्रसङ्गात्। समानप्रत्ययोपात्तकर्तृ[मं?]संख्यावरुद्धे साधनान्तरान्वयात्। कर्तृसंख्यायाश्चाजन्यत्वेन तत्साधनत्वेनाप्यन्वयात्। कर्तृसंख्यायागादेश्चाननुष्ठेयत्वेन कर्तृरसंभवे लिङादिप्रतिपादितायाः कर्तृसंख्यात्वव्याकोपाच्चेति। तस्माद् यागादिव्यतिरिक्तं कृतिसाध्यमिष्टसाधनं धर्मापरपर्यायं लिङादिभिः प्रतिपाद्यत इति।

न च तत्र संगतिग्रहानुपपत्तिः, तस्य पूर्वव्युत्पादितानुमानसिद्धत्वेन तत्र संगतिग्रहणोपपत्तेः। लोकावगतेष्टसाधनत्ववाचकबलेनैव लिङादेर्बोधकत्वोपपत्तौ पृथक् संगतिग्रहणानपेक्षणाच्च। नन्वानयनादेः लोके धातुनैवाभिहितत्वादिष्टसाधनत्वमात्रं लिङर्थो न त्विष्टसाधनादेर्धात्वर्थत्वमेवेति चेत्—न, लोकेऽपीष्टसाधनत्वस्यैव लिङर्थत्वात् तद्विशेषणस्य चानयनादेर्धात्वर्थत्वात्। अन्यथा लोके इष्टसाधनत्वं लिङर्थो वेदे पुनरिष्टसाधनमित्यनेकवाचकत्वकल्पनापत्तेः। न च लोकवेदयोरपीष्टसाधनत्वमेव लिङर्थ इति युक्तम्, वेदे इष्टसाधनानवगमप्रसङ्गात्। यागादेः प्रकृत्यर्थस्येष्टसाधनत्वान्वयायोग्यत्वात्। प्रत्ययाभिहितमिष्टसाधनत्वमाश्रयेण विनानुपपद्यमानं तमाक्षिपतीति चेत्—न, प्रत्ययस्याक्षिप्तपरत्वे इष्टसाधनस्य प्रत्ययार्थत्वासिद्धेः। अतत्परत्वे च पदार्थस्य वाक्यार्थे अन्वयानुपपत्तेः। उपपत्तौ चेष्टसाधनस्यैव वाक्यार्थत्वाङ्गीकारात्।

एतेनापर्यवसानाल्लक्षणया वेष्टसाधनलाभ इति निरस्तम्। कृतिसाध्येष्टसाधनबोधकत्वं च प्रत्ययस्य कृतिसाध्यत्वविशिष्टेष्टसाधनवाचकत्वाद् वा। परस्परानन्विताभिहितकृतीष्टसाधनयोराकाङ्क्षासन्निधियोग्यताबलात्, अन्वयाद् वा, कृतिर्हि कर्तव्यसाकाङ्क्षा, इष्टसाधनमप्युत्पादकसाकाङ्क्षम्। तथा हि तस्येवेष्टसाधनस्य लिङर्थत्वात्। अन्यथा कृत्यन्यथानुपपत्तौ प्रवृत्तिविरहापत्तेः। कृतिसाध्येष्टसाधनबोधस्य प्रवृत्तिहेतुत्वात्। कृतीष्टसाधनयोरेकप्रत्ययोपात्तत्वेन सन्निहितत्वाच्च। कृतिसंभवे कृतिसाध्येष्टसाधनबोधानुपपत्तौ प्रवृत्तिविरहापत्तेः।....................च्च कृतिकतव्यरूपस्य वान्वयबाधविरहस्य चायोग्यस्यापि संभवाच्चेति। कृतिश्च ज्ञानादिविषयनिरूप्येति विषयाकाङ्क्षतया प्रकृत्यर्थो यागः कृतिविषयतयान्वीयतेति....विषयत्वं च काम्यमानसाधनत्वे वा स्यात्, तत्साधनत्वे वा, तत्साधनत्वादिना वा? न प्रथमः, चिरविनष्टस्य यागस्य स्वर्गसाधनत्वानुपपत्तेः। नापि तृतीयः, साधनसाधनत्वेनान्वयोपपत्तौ तत्साधनत्वेनान्वयस्यातिव्यवधाननिरस्तत्वात्, तस्मात् प्रत्ययाभिहितकृतिसाध्येष्टसाधनत्वेनैव प्रकृत्यर्थस्य यागादेरन्वय इति द्वितीय एव पक्षो ज्यायानिति।



यद्वा कृतिसाध्यमिष्टसाधनसाधनमपेक्षत इति प्रकृत्यर्थस्य यागादेरिष्टसाधनसाधनत्वेनान्वय इति। कोऽसौ याग इति विशेषाकाङ्क्षायां ज्योतिष्टोमेनेति नाम्ना विशेषः समर्प्यते, ज्योतिष्टोमादिश्च जातिविशेषः, उपाधिविशेषो वा। तेन यागविषयस्वर्गकामकृतिजन्यं स्वर्गरूपेष्टसाधनं ज्योतिष्टोमेन स्वर्गकामो यजेतेति वाक्यार्थ[:र्थः] संबध्य[पय]ते। न तु ज्योतिष्टोमयागः स्वर्गसाधनमिति। नापि ज्योतिष्टोमेन यागेन स्वर्गं भावयेदिति वाक्यार्थः सौत्रान्तिकमते संभवति, भावनाऽनिरुक्तेः। प्रयत्नो भावनेति चेत्—न, किं यागोत्पादकः प्रयत्नो भावना, किं वा यागानुत्पादकस्वर्गोत्पादकः प्रयत्नः? नाद्यः, यागजनकप्रयत्ने यागस्य जनकत्वात् पूर्वक्षणवर्तित्वविरहात् परस्पराश्रयप्रसङ्गाच्च। अजनकस्य च करणत्वानुपपत्तेः जनकविशेष(ण)स्यैव का[क]रणत्वात्। तस्यैव यागेनेति तृतीयार्थकत्वात्। नापि द्वितीयः, यागजनकस्वर्गजनकप्रयत्नस्य प्रत्यक्षबोधितत्वेन न तत्र यागस्य करणत्वानुपपत्तेः। न हि साङ्गयागानुष्ठानानन्तरं स्वर्गानुकूलप्रयत्न उपलभ्यते अङ्गीक्रियते वेति। अयोग्योऽसाविति चेत्—न, जीवनयोनिव्यतिरिक्तस्य प्रयत्नस्य योग्यत्वनियमात्। स्पन्दो भावनेति चेत्—न, यागानुष्ठानानन्तरं स्वर्गानुकूलस्पन्दस्यापि योग्यानुपलम्भनिरस्तत्वात्, अनङ्गीकाराच्च।

ननु स्पन्दप्रयत्नातिरिक्तभावना सौत्रान्तिकैरङ्गीक्रियते। न चाविद्यमानायां यागस्य करणत्वं प्रयाजादेरितिकर्तव्यत्वं यागरूपकरणानि स्वर्गमिति वाक्यार्थो घटते। इष्टसाधनीभूतधर्मस्यैव वा भावनात्वात् भाव्यनिष्ठभावकव्यापारस्यैव भावनात्वात् तं प्रत्येव स्वर्गस्य भाव्यत्वोपपत्तेः। यागस्य साधनत्वघटनात् प्रयाजादेश्चेतिकर्तव्यतात्वनिर्वाहात्। यथा च गुणत्वाविशेषेऽपि यागादिजनकप्रयत्नस्य पुरुषव्यापारत्वम् तथा स्वर्गादिजनकधर्मस्यापि। यथा प्रयत्नस्य यागादिविषयत्वं तथा धर्मस्यापि स्वर्गविषयत्वमन्योत्पादनशीलत्वं व्यापारत्वम्। तच्चाधर्मस्यापि स्वर्गं प्रति न संभवति, धर्मानन्तरमेव स्वर्गानुदयादिति चेत्—न, किं यत्किञ्चदनन्तरमेव कार्योत्पादकत्वम् अन्योत्पादनशीलत्वे(?) किं वा स्वोत्पत्त्यनन्तरमेव कार्योत्पादकत्वम्? नाद्यः, सर्वस्यापि व्यापारत्वप्रसङ्गात्। यदा हि सर्वोऽपि कार्यमारभते, तदा यत्किञ्चिदुत्पत्त्यनन्तरमेव नापि·······अनन्तरमेव स्वगतगुणाद्यारम्भात्, एवं स्वोत्पत्त्यनन्तरमेव द्वितीयशब्दाद्यारम्भके प्रथमशब्दादौ व्यापारत्वप्रसङ्गो दुर्वारः। तस्मात् स्वकारणजन्यकार्यजनकत्वमेव व्यापारत्वम्। तच्च प्रयत्नप्रस्पन्दादिवद् धर्मस्याप्यस्त्येव स्वर्गोत्पादकस्वर्गकामपुरुषकार्ये सति स्वर्गजनकत्वाद् धर्मस्य। व्यापारत्वमाशुतरविनाशित्वव्याप्तं दृष्टम्। स्पन्दप्रयत्नादौ तद्धर्मान्निवर्तमानं व्यापारत्वं निवर्तयतीति चेत्—न, मासादिनिष्पाद्यपटादौ प्रथमदिवसोत्पन्नतन्तुसंयोगपदपूर्वादपूर्वादिश्चिरकालस्थायिनोऽपि व्यापारत्वस्वीकारात्। तस्माद् यागेन भावयेत् स्वर्गमिति वाक्यार्थो वैशेषिकमत एव घटत इति सिद्धनिष्ठ(?)साधने भावनापरपर्याये धर्मे वेदस्य प्रामाण्यं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यत्र दर्शा(?)दर्शशब्दाभिलप्यमानामावास्याकालनिष्पन्नयागत्रयजन्यानि त्रीण्यपूर्वाणि पूर्णमासशब्दाभिलाप्यमानपौर्णमासीकालनिष्पन्नयागत्रयजन्यानि च त्रीणीत्येवं

षडपूर्वाणीष्टसाधनतया लिङाभिधीयन्ते । न पुनरितिकर्तव्यतासहितप्रकृतषडपूर्वजन्यपरमापूर्वमिष्टसाधनतया लिङाभिधीयते । तत्र मानाभावात् । लिङ्प्रत्यय एव मानमिति चेत्-न, तस्य प्रकृतषडपूर्वव्यतिरिक्तापूर्वपरत्वे मानाभावात् । शब्दान्तरमेवापूर्वभेदकमिति चेत्--न, शब्दान्तरं किं प्रत्ययान्तरं प्रकृत्यन्तरं वा? उभयमपि प्रकृते न संभवति । लिङ्यजत्योः सत्त्वादेव । अभ्यासभेदत इति चेत्-न, साध्यानुबन्धभेदयोरेव भेदकत्वात् । यजत्याद्यभ्यासो यागादीननुबन्धं[न]भिनत्ति । अन्यथा वैयर्थ्यात् । अनुबन्धभेदाच्चापूर्वभेदः । अनुबन्धाति व्यवच्छिनत्ति इति व्युत्पत्त्या व्यावर्तकविशेषस्यैवानुबन्धत्वात् । व्यावृत्तिज्ञापकस्यैव व्यावर्तकत्वात् । व्यावृत्तेश्च व्यावर्तकरहितपदार्थभेदकत्वादिति चेत्--न, दर्शपूर्णमासेति नामपरतन्त्रस्य यजेः प्राकृतषड्भागानुवादकत्वस्य **भट्टप्राभाकराभ्यामङ्गीकारात्** ।

उत्पत्तिवाक्येष्वाग्नेयादीनां षण्णामेकैकशोऽनुबन्धत्वमिति भवत्वनुमितानां समुदितानामनुबन्धत्वमिति । अनुबन्धभेदादुत्पत्त्यपूर्वेभ्योऽधिकारापूर्वं भिद्यत इति चेत्--न, समुदायसमर्पकाभावात् । यजेः समुदितत्वासमुदितत्वोदासीनप्रकृतयागानुत्पादकत्वात् । यदैकस्मिन् अपूर्वे षड्भागानां युगपदनुबन्धत्वं तदार्थसिद्धः समुच्चय इति चेत्--न, अपूर्वैकत्वासिद्धेः । न ह्यपूर्वगतमेकत्वं प्रत्ययार्थः । नापि कल्पनालाघवात् प्रत्ययार्थस्यैकत्वम्, एकत्व एव कल्पनागौरवात् । एकमधिकारापूर्वं, षडुत्पत्त्यपूर्वाणि । तेषां च परमापूर्वं प्रति कारणत्वमिति गौरवम् । यदा तु षडुत्पत्त्यपूर्वाणि एव स्वर्गरूपेष्टसाधनतयाधिकारवाक्यगतेन लिङ्प्रत्ययेनाभिधीयन्ते, न तदा ततोऽधिकपरमापूर्वकल्पना नापि परमापूर्वं प्रति षडपूर्वाणां कारणत्वप्रकल्पनेति लाघवम् ।

न च प्रमाणत्वा[त्वा]द् गौरवमप्याश्रयणीयम् । अवश्याङ्गीकरणीयाग्नेयाद्यपूर्वषट्केन सकलानुपपत्त्युपशमे तदतिरिक्तापूर्वे प्रमाणानवतारात् । न च प्रकृतापूर्वपरत्वेऽधिकारवाक्यानर्थक्यं प्रकृतषड्भागजन्येष्टसाधनापूर्वषट्कस्य स्वर्गरूपेष्टसाधनपरत्वात् ।

किं चेदं षड्भागानां चरमापूर्वं प्रत्यनुबन्धत्वं **प्राभाकरणाम्** ? किं कृतिजन्यत्वेनावगतस्य अपूर्वस्य सिद्धरूपतया साक्षात्कृतिजन्यत्वानुपपत्तौ व्यापारत्वेन मध्ये प्रवेशः? किं वापूर्वजनककृतेर्विषयाकाङ्क्षाया विषयत्वेन प्रवेशः? प्रथमेऽपि, किं षड्भागजनकैकैककृतिजन्यत्वमपूर्वस्य? किं वा षड्भागजनकषट्कृतिजन्यत्वम्? किं वा षड्भागजनकैककृतिजन्यत्वम्?

न प्रथमः, समुदितानां षड्भागानामेकैकवृत्तिजन्यत्वानुपपत्तेः । यागानां चामावास्यापौर्णमास्यनिष्पन्नानामाशुतरविनाशानां समुदितत्वानुपपत्तौ समुदितानामपूर्वजनकत्वानुपपत्तेः । समुदायासम्भवे समुदितानां कृतिजन्यत्वानुपपत्तेश्च । कृतीनां समुदायासम्भवे समुदितानां समुदितयागजनकत्वानुपपत्तेश्च । यथासम्भवं षट्कृतयः



षड्भागानुत्पादयन्त्योऽपूर्वं जनयन्तीति चेत्—न, अतीतानां कृतीनां यागानां चापूर्वजनकत्वानुपपत्तेः ।

न तृतीयः, षड्भागजनकैकैककृत्यसम्भवात् । आशुतरविनाशित्वात् तस्याः । दर्शपूर्णमासोपक्रमादारभ्य यावत्परमापूर्वोदयं निरन्तरं जायमान-कृतिसमूह एकापूर्वजनकत्वात् एककृतित्वेन व्यपदिश्यते । पाकोपक्रमादारभ्य यावदोदनोदयं जायमानो व्यापारसमूह इवैकपाकत्वेनेति चेत्—न, सकलोत्तराङ्गानुष्ठानोत्तरकालं जायमानपरमापूर्वाव्यवहितपूर्वक्षणवृत्तिकृतिव्यतिरिक्तकृतीनां प्रागेव विनष्टत्वेनापूर्वजनकत्वानुपपत्तौ एकपरमापूर्वजनकत्वेनाप्येकत्वेन व्यपदेष्टुं शक्यत्वात् । अतीता अपि कृतयोऽपूर्वद्वारा परमापूर्वं जनयन्तीति चेत्—न, तासां परमापूर्वजनकत्वासिद्धौ तदनुकूलापूर्वकल्पनस्य निष्प्रमाणकत्वात् तदङ्गगोचरकृतीनां तत्तदङ्गोत्पादकत्वमात्रेण चरितार्थत्वात् । ओदनोत्पत्तौ च तदव्यवहितपूर्वक्षणवर्तिन एव व्यापारस्य पाकशब्दाभिलप्यस्य कारणत्वात् । व्यवहितानां च तदुपयोगिकार्यान्तरजनकत्वादिति ।

द्वितीयेऽपि पक्षे किं परमापूर्वजनकषड्भागजनकैकैककृतिविषयत्वेन समुदितानां षड्भागानामन्वयः, किं वा परमापूर्वजनकसमुदितषड्भागजनकैकैककृतिविषयत्वेन समुदितानां षड्भागानामन्वयः, किं वा परमापूर्वजनकषड्भागजनकषट्कृतिविषयत्वेन समुदितानां षड्भागानामन्वय इति? न प्रथमः, समुदितानां षड्भागानामेकैककृतिविषयत्वासम्भवात् । न द्वितीयः, समुदितषड्भागजनकैककृतेरसम्भवात् । न तृतीयः, कृतीनां यागानां [च] अन्यसमुदायानुपपत्तेरुक्तत्वादिति । न **प्रभाकर**मते आग्नेयादिषड्पूर्वातिरिक्तपरमापूर्वसिद्धेरिति ।

**भट्ट**मते तु परमापूर्वकल्पना दुर्घटैव, कल्पकाभावात् । दर्शपूर्णमासशब्दाभिलप्यषड्भागानामाशुतरविनाशिनां कालान्तरभाविस्वर्गसाधनत्वमनुपपद्यमानं परमापूर्वकल्पकमिति चेत्—न, षड्भागजन्यापूर्वषट्केनैवोपपन्नत्वात् परमापूर्वस्य षड्भागजन्यषडपूर्वजन्यस्य षड्भागजन्यत्वेन तद्व्यापारत्वानुपपत्तौ तत्साधनत्वानिर्वाहकत्वात् । षड्भागजन्यानि षडपूर्वाणि परमापूर्वमुत्पाद्य स्वर्गादर्वागेव विनष्टानीति कथं स्वर्गोत्पादकानीति चेत् न, स्वर्गसाधनत्वानुपपत्तौ तेषां यागोत्तरक्षणादारभ्य स्वर्गपूर्वक्षणवर्त्तिनामेव कल्पनात् । एकफलोत्पत्तावेकफलएव व्यापारो दृष्टः । पटोत्पत्ताविवान्त्यतन्तुसंयोग इति चेत्—न, दृष्टान्तस्य साध्यविकलत्वात् अन्य[न्त्य] तन्तुसंयोगवत् तन्तुसंयोगान्तराणामपि पटोत्पादकानां व्यापारत्वस्वीकारात् । अन्यथा तैर्विनापि पटोदयप्रसङ्गात् । दृष्टान्तान्तरस्वीकारे पट एव व्यभिचारात् । दर्शपूर्णमासयोरेव व्यभिचाराच्च । परमापूर्ववदपूर्वाणामपि स्वर्गानुकूलव्यापारत्वात् । अवान्तरापूर्वपरमापूर्वयोरेव स्वर्गयागसाध्यसाधनभावनिर्वाहकत्वेन व्यापारत्वात् । परमापूर्वोत्पत्तावुत्पत्त्यपूर्वाणां व्यापारत्वम् । स्वर्गोत्पत्तौ तु परमापूर्वस्यैवेति चेत्—न, तस्य यागाजन्यत्वेन तद्व्यापारत्वानुपपत्तेः, परमापूर्वं एव व्यभिचाराच्च ।

तस्योत्पत्ताववान्तरापूर्वाणां षण्णामपि व्यापारत्वात्। असुखत्वानेकफलमिति चेत्—न, सुखसाधनत्वेन तस्यापि घटादिवत् फलत्वात्। एतेन दर्शपूर्णमासशब्दाभिलप्ययागसमुदायद्वयजन्यमपूर्वद्वयमपि निरस्तम्।

अथ दर्शपूर्णमासशब्दाभिलप्ययागसमुदायद्वयस्यासाधारणान्यङ्गानि सम्भवन्ति। यथा च चतुर्होत्रा पूर्णमासीमभिस्पृशेत्। पञ्चहोत्रामावास्यामिति। तथा संस्थाप्य पौर्णमासीं वैवृध [ ? वैधृत ] मनुवर्तयन्तीति तेषां च परमापूर्वप्रयुक्तत्वे प्रयाजादिवत् षड्भागसाधारणत्वप्रसङ्ग इति समुदायद्वयजन्यमपूर्वद्वयं साधारणाङ्गप्रयोजनं कल्प्यत इति मन्यसे—तन्न, चतुर्होत्रादौ पौर्णमासीनिष्पन्नयागवज्जन्यापूर्वत्रयस्यैव प्रयोजकत्वात्। पञ्चहोत्रादौ चामावास्याकालनिष्पन्नयागत्रयजन्यापूर्वत्रयस्यैव प्रयोजकत्वमिति सिद्धमाग्नेयादिषडपूर्वाण्येव दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति लिङ्प्रत्ययेन स्वर्गरूपेष्टसाधनतया समर्प्यंत इति ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमाभ्यासापूर्वाणि तावन्ति स्वर्गरूपेष्टसाधनतया समर्प्यंत इति सिद्धं धर्मे प्रामाण्यमिति। इष्टसाधनबोधस्य प्रवृत्तिहेतुत्वे अतीतेष्टसाधनभोजनादौ प्रवृत्तिप्रसङ्ग इति चेत्—न, इष्टसाधनबोधप्रवृत्तिजनकेच्छामात्रोपक्षीणस्य प्रवृत्ति[त्य ?]जनकत्वात्। इष्टसाधनबोधेनेच्छामापाद्य तया तत्कार्या प्रवृत्तिरापाद्यत इति चेत्—न, इष्टसाधनबोधस्येच्छाच [ प ? ] रमकारणत्वानङ्गीकारात्, इच्छायाश्च प्रवृत्तिचरमकारणत्वानङ्गीकारात्। अचरमकारणेन च स्वोत्पत्त्यन्तरक्षणे कार्यानारम्भात्। तन्त्वादीनां पटादिवत्। किं चेष्टसाधनबोधनत्वेन प्रवृत्तिजनकत्वमापादनीयम्। तच्च न विपर्ययापर्यवसानात्। प्रवृत्तिजनकेच्छाजनकत्वादित्यादेर्विपर्ययस्य बाधितत्वात्। एतेन चन्द्रोदयादाविष्टसाधनबोधनात् प्रवृत्तिप्रसङ्ग इति निरस्तम्। तस्य पुनर्हेतोर्विरहात्। चन्द्रोदयादाविष्टसाधनज्ञानमिच्छा वा प्रवृत्तिं न जनयतीति चेत्—न, प्राप्ते चन्द्रोदयादावप्राप्तिरूपकारणविरहात्। अप्राप्ते पुनश्चन्द्रोदयादाविच्छा भवत्येव। सत्यां पुनरिच्छायां चन्द्रोदयगोचरप्रवृत्त्यनुपपत्तिः तस्यास्तदजनकत्वादेव। अजनकत्वं च कार्यानुत्पत्तिगम्यम्। एवमन्यत्रापीच्छाप्रवृत्तिकारणविरहो न (?) यथासम्भवं व्युत्पादनीयम्।

**मण्डनवाचस्पति**प्रभृतयस्तु कृतिसाध्येष्टसाधनबोधं प्रवर्तकमाहुः, तदनुपपन्नम्, कृतिसाध्येति विशेषणवैयर्थ्यात्। अतीतेष्टसाधनबोधव्यावृत्त्यर्थं विशेषणमिति चेत्—न, तस्यापि कृतिसाध्यत्वात्। अनुत्पन्नत्वे सति कृतिजन्यत्वं कृतिसाध्यत्वम्, तच्चातीते नास्तीति चेत्—न, अतीतस्यापि तदुत्पादितस्यापि कदाचिदनुत्पन्नत्वात्। प्रवृत्तिकाले अनुत्पन्नत्वं विवक्षितमिति चेत्—न, तस्यापि तदुत्पादकप्रवृत्तिकाले अनुत्पन्नत्वात्। इष्टसाधनबोधकाले अनुत्पन्नत्वं विवक्षितमिति चेत्—न, अतीतस्यापि तदुत्पादकप्रवृत्तिकालिनेषु साधनबोधकालेऽनुत्पन्नत्वादेव। वर्तमानकालेऽनुत्पन्नत्वं विवक्षितमिति चेत्—न, तदुत्पत्तिकालस्यापि कदाचिद् वर्तमानत्वादेव। इदानीमनुत्पन्नत्वम[म्]विवक्षितमिति चेत्—एवं सति अतीतभोजनादावपि इदानीमनुत्पन्नत्वे सति कृतिजन्यत्वविरहात्



प्राचीनतदुत्पादकप्रवृत्तिर्न स्यात्। यदी[दि]ष्टसाधनबोधनानन्तरं यत्र यस्य प्रवृत्तिस्तदिष्टसाधनबोधकालेऽनुत्पन्नत्वे सति तत्कृतिजन्यत्वं कृतिसाध्यत्वमिति चेत्—न, यत् तदन्यत्र तत्र शब्दानामनुगतार्थानिर्वचनात्। प्रकृतिविशेषपरत्वे च कृतिसाध्यत्वस्याननुगतत्वानुपपत्तौ बालेन स्वात्मदृष्टान्तेन मध्यमवृद्धस्य कृतिसाध्येष्टसाधनबोधानुमाने लोके लिङादीनामनुगतेष्टसाधनवाचकत्वानवगमे वेदे लिङादिभ्यः तदनवगमप्रसङ्गात्।

आत्मादिनित्येष्टसाधननिवृत्त्यर्थं कृतिसाध्यत्वविशेषणमिति चेत्—न, तस्य साध्यत्वविशेषणेनैव निवृत्तौ कृतिग्रहणवैयर्थ्यस्य तदवस्थत्वात्। जन्यत्वापरपर्यायसाध्यत्ववतः क्षित्यादयः कृतिग्रहणेन निवर्तन्त इति चेत्—न, तेषामपीश्वरकृतिजन्यत्वात्।

अस्तु तर्हि साध्येष्टसाधनबोधः प्रवर्तक इति चेत्—न, तत्रापि प्रवृत्तिप्रसङ्गात्। क्षित्यादावीश्वरस्य प्रवृत्तिर्जायत इति चेत्—न, **मीमांसकै**स्तथानङ्गीकारात्। **न्यायवैशेषिकै**रपि परमेश्वरे प्रयत्नरूपां प्रवृत्तिं नित्या(म)भ्युपगच्छद्भिरशरीरतया वा शरीरस्वरूपां प्रवृत्तिमन्विच्छद्भिस्तथानङ्गीकाराच्च। अनित्यप्रयत्नं शरीरिणमीश्वरमभ्युपगच्छद्भिस्तु तत्प्रवृत्तेः कृतिसाध्यत्वाविशेषिते इष्टसाधनबोधपूर्वकत्वस्य पूर्ववद्व्युत्पादयितुं शक्यत्वादिति। अपि च येषामप्यनुत्पन्ने कृतिजन्येष्टसाधनबोधः प्रवर्तकः, तेषामपि प्रथमदिवसोत्पन्नद्वितीयदिवसभोजनगोचरेष्टसाधनबोधात् प्रवृत्तिः किं न स्यात्? द्वितीयदिवससहकारिविरहादिति चेत्—न ह्येष्टसाधनबोधात् प्रवृत्तिः पक्षेऽपि। नातीतेष्टसाधनगोचरप्रवृत्तिप्रसङ्गोऽतीतकालस्य सहकारिणो विरहादिति सिद्धम् कृतिसाध्यत्वाविशेषितेष्टसाधनस्य प्रवर्तकत्वमिति। कृतिसाध्यत्वरहितस्तु[स्य] सुवर्णरजतस्रक्चन्दनवनितादौ प्रवृत्तेश्च। सुवर्णादिजन्ये भोगे प्रवृत्तिर्न सुवर्णादाविति चेत्—न, [न] तस्य कालान्तरभाविनः प्रवृत्त्यजन्यत्वात्। सुवर्णाद्युत्पादने प्रवृत्तिः न सुवर्णादाविति चेत्—न, उपादानं किं स्वत्वं स्वीकारो वा प्राप्तिर्वा? नाद्यद्वितीयौ, प्रागेव स्वत्वस्वीकारव[रा]त् स्वपितृकस्यापिततत्सुवर्णादिषु प्रवृत्तौ[त्तेः]। तृतीयेऽपि प्राप्तिः किं संयोगः समवायो वा, अन्यद्वा? नाद्यः, उपवृत्त्यान्येन ग्राहितसुवर्णादौ तदसंभवात्। न द्वितीयः, सुवर्णादौ तदसंभवात्। समवायस्य नित्यत्वेन प्रवृत्त्यविषयत्वाच्चेति। न तृतीयः, अनिरुक्तेः। न त्वि[न्वि]ष्टसाधनत्वं किं यत्किञ्चिद् इष्टसाधनत्वं विवक्षितं, स्वेष्टसाधनत्वं वा? प्रथमे देवदत्तेष्टसाधनत्वबोधाद् यज्ञदत्तादेः प्रवृत्तिप्रसङ्गः। द्वितीयेऽपि स्वशब्दस्यासर्वात्मानुगतार्थपरत्वे [स] एव दोषः। तद्विशेषपरत्वे चानुगतत्वानुपपत्तिरिति चेत्—न, अविवक्षितविशेषेष्टसाधनबोधस्याविशेषितप्रवृत्तिकारणत्वस्वीकारात्। देवदत्तेष्टसाधनबोधत्वस्य च देवदत्तप्रवृत्तिकारणत्वस्वीकारात्। देवदत्तेष्टसाधनबोधनत्वस्य देवदत्तप्रवृत्तिजनकत्वे यज्ञदत्तगतदेवदत्तेष्टसाधनत्वबोधस्य देवदत्तप्रवृत्तिजनकत्वापत्तिरिति चेत्—न, देवदत्तगतदेवदत्तेष्टसाधनस्याबोधस्य देवदत्तप्रवृत्तिकारणत्वस्वीकारात्।

अथ प्रवृत्तिर्नेष्टसाधनबोधजन्या प्रयत्नत्वात् जीवनयोनिप्रयत्नवदिति चेत्— न, इष्टसाधनादिसकलवस्तुगोचरेश्वरज्ञानाजन्यत्वग्राहकं मानबाधितत्वात्। दृष्टान्तस्य साध्यविकलत्वाच्च। जीवनयोनिप्रयत्नस्यापीष्टसाधनगोचरेश्वरज्ञानजन्यत्वात्। इष्ट-साधनसहितपराभिमतप्रवर्तकज्ञानान्यत्वेन बाधाच्च। इयं प्रवृत्ति[र्नै] तदिष्टसाधन-बोधजन्या प्रवृत्तित्वात् जन्यप्रवृत्तिवदिति चेत्—न, एतदिष्टसाधनबोधजन्यत्वस्य क्वचिदप्रवृत्तौ तन्निषेधस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात्। अन्वयव्यतिरेकसहित-प्रत्यक्षेण क्वचित् प्रमितौ तेनैव बाधात्। अयमिष्टसाधनबोध एतज्जन्यप्रवृत्तिवरहित-जनको जनकत्वात् पटवदिति सिद्धायामेतज्जन्यप्रवृत्तौ प्रवृत्तित्वस्य व्यभिचारात्। तस्या अप्येतदिष्टसाधनबोधजन्यत्वसाधने धर्मिग्राहकमानबाधात् इयं प्रवृत्तिरेतदिष्ट-साधनबोधजन्यप्रवृत्तिः। एकत्वान्नेयमेवन्न यदेवं न तदेवं, यथा पट इति व्यतिरेकिणा सत्प्रतिपक्षितत्वाच्च। न चात्राप्रसिद्धविशेषणता प्रकृतव्यभिचार साधकानुमानसिद्धायामेतदिष्टसाधनबोधजन्यप्रवृत्तौ विशेषणासिद्धेः।

नापि तेनैव गतार्थत्वाद् व्यतिरेकवैयर्थ्यम्। तेनैतदिष्टसाधनबोधजन्यप्रवृत्ति-सिद्धावप्येतत्प्रवृत्तेरेतदिष्टसाधनबोधजन्यत्वासिद्धेः। अस्मादिष्टसाधनबोधादहं प्रवृत्त इति प्रयत्नबाधाच्च। एतेनायमिष्टसाधनबोधेनैतत्प्रवृत्तिजनकः इष्टसाधनबोधत्वात्। इष्टसाधनबोधान्तरवदिति निरस्तम्। पूर्वोक्तप्रत्यक्षविरोधात् इयं प्रवृत्तिरिष्टसाधन-बोधव्यतिरिक्तैतज्जनकत्वरहितजन्याजन्यत्वात् घटवदिति सिद्धेः। एतत्प्रवृत्तिजनकेष्ट-साधनबोधे व्यभिचाराच्च। अयमिष्टसाधनबोध एतत्प्रवृत्तिजनकेष्टसाधनबोधः, एतत्त्वा-दिति व्यतिरेकिणा सत्प्रतिपक्षत्वाच्च। न चाप्रसिद्धविशेषणता पूर्वानुमानव्यभिचार-साधकानुमानसिद्धे एतत्प्रवृत्तिजनकेष्टसाधनबोधविशेषणे प्रसिद्धेः। इष्टसाधनबोधत्वस्ये-श्वरबोधे व्यभिचाराच्च। एवमिष्टसाधनबोधस्य प्रवृत्तिहेतुत्वनिषेधकानुमानान्तराण्यपि निराकरणीयानि। इष्टसाधनत्वस्य यजेतेति प्रत्ययार्थत्वे ज्योतिष्टोमेनेति तृतीयानर्थिका स्यादिति चेत्—न, स्वर्गरूपेष्टसाधनत्वस्य धर्मनिष्ठस्य प्रत्ययार्थत्वात्। धर्मसाधन-त्वस्य च यागनिष्ठस्य तृतीयार्थत्वादिति। इष्टसाधनत्वस्य प्रत्ययार्थत्वे दरुणो दारु-मन्वीयादित्युक्तेः कृत इति प्रश्नोऽयं यस्मादतो नित्यः सिद्ध्यतीत्युत्तरं च न स्याद् इति चेत्—न, इष्टसाधनत्वस्यावगमेऽपि इष्टसाधनत्वगोचरप्रश्नोत्तरयोरुपपत्तेः। इष्टसाध-नस्य प्रत्ययार्थत्वे

तरति ब्रह्महत्यां योऽश्वमेधेन यजते

इत्यादौ वर्तमानापदेशेऽपीष्टसाधनत्वस्यावगमात्। तस्मात्

अश्वमेधेन यजेत

इति लिङ्प्रत्ययकल्पना न स्यादिति चेत्—न, वर्तमानापदेशादिष्टसाधनत्वावगमे लिङ्-प्रत्ययानङ्गीकारात्। इष्टसाधनत्वावगमे तु तदवगमार्थं लिङ्प्रत्ययकल्पनस्य दुर्वा-रत्वादिति। कुर्याः कुर्यामित्यत्र मध्यमोत्तमपुरुषयोर्विधिर्विहितेनैव लिङेष्टाभ्युपायता-माह, किं तु वक्तृसंकल्पम्। नहि मध्यमोत्तमपुरुषयोर्ममायमिष्टाभ्युपाय इति कुर्याः



कुर्यामिति पदार्थः। किं तु तत्प्रतिपत्तेरनन्तरं योऽयमस्य संकल्पः कुर्याः कुर्यामिति पदार्थः, तेन प्रथमपुरुषेऽपि कुर्यादिति लिङो[ङि]ष्टसाधनत्ववाचीत्यनुमीयते इति चेत्—न; कुर्या इत्यादेरपीष्टसाधनत्ववाचकत्वात्। तर्हि तदुच्चारणानन्तरमिष्टसाधनत्वबोधात् प्रवृत्तिः स्यादिति चेत्—सत्यं, मध्यमपुरुषार्थत्वं कुर्या इत्यादेः प्रवर्तत एव। अहं कुर्यामित्यादेरुत्तमपुरुषादेव मत्प्रकृतिसाध्यमिष्टसाधनमित्यधिगम्य प्रवर्तत एव। कृतिसाध्येष्टसाधनबोधानन्तरभाविनी चिकीर्षा लिङर्थ इति तु भ्रान्तिरेव। लिङस्त-दनुशासनाभावात्, मानान्तरविरहाच्च। तस्मात् कृतिसाध्यमिष्टसाधनमेव कुर्यामिति पदार्थः इति स्थितेन दृष्टान्तेन प्रथमपुरुषलिङ इष्टसाधनवाचकत्वमिति लोके लिङः......पुरुषाभिप्रायवाचकत्वं क्लृप्तमिति न। वेद इष्टसाधनत्ववाचकत्वमिति चेत्—न, लोकेऽपि इष्टसाधनत्वमात्रवाचकत्वस्य व्युत्पादितत्वात्। इष्टसाधनवाचकत्वे लिङो ब्राह्मणं न हन्यादित्यत्र निषेधे हननमिष्टसाधनं न इत्यर्थः स्यात्। तथा च बाधो ब्राह्मणहननस्य च तदीयस्य द्रव्यादीष्टसाधनत्वात्। इष्टसाधनभावस्य चोपे-क्षणीये अनिष्टसाधनत्वस्य व्यभिचारात्। निषेधाधिकारे च लिङोऽनिष्टसाधनत्वाभ्यु-पगमे नञो निरर्थकत्वापत्तेः, लिङैवानिष्टसाधनत्वस्योक्तत्वात्। नोद्यन्तमादित्य-मीक्षेतेत्यत्रानीक्षणसंकल्पवत् न हन्यादित्यवहननसंकल्पो विधीयत इति कल्पनायां व्रताधिकारभावनानिरस्तत्वात् निषेधानुपपत्तेरिति चेत्—न हन्यादित्यत्र नञो विरो-धिवचनत्वात्, प्रत्ययार्थेष्टसाधनत्वान्तर्गतेष्टमात्रेण संबन्धाच्च। तेन नेष्टमित्यनिष्ट-मिति स्थितेऽनिष्टस्य प्रत्ययार्थसाधनान्वयेऽनिष्टसाधनमधर्मेण नञः सहितः प्रत्ययार्थः स्यात्। तस्यानिष्टसाधनस्याधर्मस्य साधनाकांक्षायां हननं साधनत्वेन संबध्यते। यद् वा विरोधिवचनस्य नञः प्रत्ययार्थे इष्टसाधनं[ने] संबन्धेनेष्टसाधनमित्यस्येष्टसाधनवि-रोध्यनिष्टसाधनमधर्मोऽर्थः स्यात्। तस्य च साधनाकांक्षायां हननं साधनत्वेन संब-ध्यते। तथा चानिष्टसाधनाधर्मसाधनात् ब्रह्महननादेर्निवृत्तिरुपपन्नैव। न च संभोगा-दिष्टसाधनं हन्तव्यब्राह्मणादिद्रव्यसाधने ब्राह्मणहनने व्यापारलौकिकानिष्टदुःखसाधना-धर्मसाधनत्वं बाधितम्। संभोगसाधनद्रव्यादिसाधनत्वपारलौकिकदुःखसाधनाधर्म-साधनत्वयोरविरोधात्। तथा च यस्य ब्राह्मणादेर्द्रव्यगोचरः समुत्कटो रागः स निषेधराजदण्डावतिक्रम्य ब्राह्मणहनने प्रवर्तत एव। यस्य तु नरकासाधनाधर्मसाध-नात् ब्राह्मणहनने समुत्कटो द्वेषः स ब्राह्मणहननात् निवर्तत एव। यस्य चाहन्तव्य-ब्राह्मणादिद्रव्यगोचरो रागः, निषेधराजदण्डानुसन्धानः राजदण्डवचनाध्यवसायो वा स ब्राह्मणहनने प्रवर्तत एव। यस्य तु न हन्तव्यब्राह्मणादिद्रव्यगोचरो रागः सत्यपि वा रागे निषेधराजदण्डानुसन्धानं राजदण्डवञ्चनानध्यवसायो वा स ब्राह्मणहननात् निवर्तत एव। यस्य तु ब्राह्मणहननजन्यद्रव्यलाभाधर्मगोचरौ रागद्वेषौ तुल्यावेव स ब्राह्मणहनने न प्रवर्तते एव नापि निवर्तत इति सर्वं समञ्जसम्।

अथवा विरोधिवचनस्य नञः प्रत्ययार्थेष्टसाधनसंबन्धेनेष्टसाध[न]मित्यनिष्टस्य साधनमिति स्थिते किं तदनिष्टसाधनमिति विशेषजिज्ञासायां प्रकृत्यर्थो हननं विशेष

**[ण] तया संबध्यते।** तथा च ब्राह्मणं न हन्यादिति ब्राह्मणहननमनिष्टसाधनमिति **निषेधवाक्यार्थः** किं न स्यादिति चेत्—न स्यात्, ब्राह्मणहननस्य चिरविनष्टस्य कालान्तरभाविनरकादिदुःखसाधनत्वानुपपत्तेः, निषेधवाक्यस्याधर्मप्रमाणत्वानुपपत्तेश्च, हननरूपानिष्टसाधनत्वस्याधर्मत्वासंभवादिति।

**प्रभाकरमते** तु ब्राह्मणं न हन्यादिति ब्राह्मणहननाभावविषयकृतिसाध्यमपूर्वमिति निषेधवाक्यार्थः। सोऽपि न, हननप्रागभावात्यन्ताभावयोरनादित्वेन व्यापारत्वानुपपत्तौ कृतिविषयत्वानुपपत्तेः। प्रागभावप्रतिपादनस्य च प्रागभावव्यतिरिक्तस्य निरूपयितुमशक्यत्वात्। शक्यत्वे वा तत्तद्बोधकशब्दाभावाच्च। हननप्रध्वंसस्य च कृतिविषयत्वे प्रतियोगिनो ब्राह्मणहननस्यावश्यकत्वापत्तेश्च। एवं मतान्तरेऽपि निषेधानुपपत्तिर्द्रष्टव्या।

**प्राभाकराः** पुनरियं प्रवृत्तिरिष्टसाधनबोधजन्या, प्रवृत्तित्वान्मत्प्रवृत्तिवदित्यत्र दृष्टान्तस्य साध्यविकल्प[ल]तामाहुः। बालो हि ममेदं कार्यमिति कार्यबोधात् प्रवृत्तो नेष्टसाधनबोधात्। तेन गामानयेत्युत्तमवृद्धप्रयुक्तवाक्यश्रवणानन्तरं मध्यमवृद्धं प्रवर्तमानमुपलभ्य तत्प्रवृत्तेः कार्यबोधपूर्वकत्वमनुमायान्वयव्यतिरेकाभ्यां वाक्यस्य तत्र कारणत्वं निर्धार्य लिङादेः कार्यपरत्वमध्यवस्यति। तदनन्तरं लोकावगतकार्यपरत्वबलेन

ज्योतिष्टोमेन स्वर्गकामो यजेत

इत्यादि वेदवाक्यगतलिङ्प्रत्ययेन कार्यमेव समर्पणीयमिति मन्यते। तच्च न यागादिधात्वर्थरूपं तस्य क्षणभङ्गित्वेन चिरविनष्टस्य कालान्तरभाविकाम्यमानस्वर्गसाधनत्वानुपपत्तौ स्वर्गकामनियोज्यौ कार्यतया बोद्धुमशक्यत्वात्। ततो जागादिव्यतिरिक्तं यागादिः कृतिजन्यं कालान्तरभाविस्वर्गाव्यवहितपूर्वक्षणवर्तितया स्वर्गसाधनत्वं समर्थं स्थाय्यपूर्वं लिङादिभिरभिधीयत इति निर्धारयतीति पदार्थान्तरान्वितस्थायिकार्यमेव वेदार्थं इति।

तदप्ययुक्तम्, कार्यत्वानिरुक्तेः। कार्यत्वं किं कृतिसाध्यत्वं, किं वा कृतिप्रधानत्वं, किं वा कृतिप्रधानत्वे सति कृतिसाध्यत्वम्? नाद्यः, भारवाहनादावनिष्टसाधनत्वेऽपि प्रवृत्त्यापत्तेः। तस्यापि कृतिसाध्यत्वात्। न द्वितीयः, कृतिप्रधानत्वानिरुक्तेः। कृत्युद्देश्यत्वं तदिति चेत्—न, तस्याप्यनिरुक्तेः। कृतिप्रयोजनं तदिति चेत्—न, कृतेरचेतनायाः प्रयोजनविरहात्। प्रकृत्याधारप्रयोजनत्वमेव कृतिप्रयोजनत्वमिति चेत्—न, प्रयोजनत्वं किं [तु] सुखत्वं, सुखसाधनत्वं वा, दुःखसाधननिवृत्तित्वं वा, साधनत्वं वा, इष्टत्वं वा, इष्टसाधनत्वं वा? प्रथमे गवानयनादावपूर्वे च कार्यत्वानुपपत्तिः, तस्यासुखत्वात्। द्वितीयेऽपि स एव दोषः गवानयनादेर्नित्यनिषेधापूर्वयोश्च सुखसाधनत्वविरहात्। प्रयोक्तुः सुखसाधनमानयनमिति चेत्- न, आनयनेन साक्षात् प्रयोक्तृगतसुखानुदयात्। आनीतायां गवि दुग्धादिलाभः, ततः सुखमिति चेत्—न, एवं सत्यानयनस्य दुग्धादिहेतुत्वं स्यात्, न सुखहेतुत्वं, दुग्धादेरेव सुखोपपत्तेः। आनयनस्य चिरविनष्टत्वेन सुखाव्यवहितपूर्वक्षणवर्तित्वविरहाच्च। न चानयनस्य दुग्धलाभहेतुत्वं चिरविनष्टत्वादेव प्रातरानीतायां गवि सायं दुग्धलाभात् दोहनादेव दुग्धलाभोपपत्तेश्च। दोहनहेतुः संयोगापरपर्यायसन्निधिहेतुरानयनमिति चेत्? एवमस्तु। सुखहेतुत्वं तु तस्य दुर्घटमेव। इष्टसाधनबोधस्य प्रवर्तकत्वेऽपि कथं गवानयने प्रवृत्तिरिति चेत्? सुखहेतुदुग्धजनकदोहनक्रियोत्पादकदेशसन्निधिरूपेष्टसाधनत्वात् सुखवत् तत्साधनसाधनसाधनादेरपि इष्टत्वादित्यवेहि। तृतीयचतुर्थयोरपि स एव दोषः, गवानयनादेरपूर्वस्य च दुःखनिवृत्तितत्साधनत्वयोरभावात्। पञ्चमेऽपि स एव दोषः, आनयनादेः क्लेशरूपस्य दुःखसाधनत्वेन तन्निवृत्तित्वानुपपत्तेः, भावत्वाच्च। षष्ठेऽपि स एव दोषः। आनयनादेर्दुःखसाधननिवृत्तिहेतुत्वाभावस्योभयवादिसिद्धत्वात्। सप्तमेऽपि फलेऽपि प्रवृत्तिप्रसङ्गः, तस्यापीष्टत्वापरपर्यायकार्यत्वात्। इष्टत्वं चेष्टाविषयत्वम्। तच्चेच्छाविशेष एव, इच्छाविषयत्वं वा? तच्चोभयं सत् तथैव प्रवृत्तिकारणम्, न ज्ञानमिच्छायाः सत्तयैव प्रवृत्तिजनकत्वाङ्गीकारात्। तथा च कार्यबोधात् प्रवृत्तिरिति दुर्घटमेव। अष्टमे तु सिद्धं नः समीहितम्। इष्टसाधनत्वस्यैव भवता कार्यत्वेनाभिधानादिति चेत्? साध्यत्वे सति कृतिसाधनत्वं कार्यत्वमित्यपि पक्षो न युक्तः, कृतिप्रधानत्वानिरुक्तेरेव। किं च कृतिसाध्यत्वं धात्वर्थस्यैव यागादेः कृतिप्रधानत्वं च फलस्यैव। तेन कृतिसाध्यत्वकृतिप्रधानत्वयोरेकत्रासंभवात् कार्यलक्षणस्यासंभवित्वमेव। अव्यापकं चेदं लक्षणम्, लौकिकानयनादिक्रियाकार्ये लौकिकानयनादिति क्रियाकार्यमेव भवतीति चेत्? कथं तर्हि लोके लिङादीनां वृद्धव्यवहारात् कार्यपरत्वावगतिः? कथंतरां च लोकावगतकार्यपरत्वबलेन वेदे लिङादीनां स्वाधिकार्थे व्युत्पत्तिः? कथंतमां च पदार्थान्तरान्विते स्थायिकार्ये वेदस्य प्रामाण्यमिति? कृतिप्रधानत्वं च नित्यनिषेधापूर्वयोरप्यव्यापनं तयोरिष्टत्वं तत्साधनानिष्टनिवृत्तित्वं, तत्साधनत्वविरहेण कृत्युद्देश्यत्वासंभवात्। कृतिसाध्यत्वं च निषेधापूर्वव्यापकं, निर्विषयायाः कृतेरसंभवात्। हननस्य च प्रागभावरूपस्यानादित्वेनासाध्यस्य कृतिविषयत्वानुपपत्तेः। तस्मान्नापूर्वकार्ये वेदस्य प्रामाण्यमिति सिद्धं स्वर्गादीष्टसाधने धर्मे वेदस्य प्रामाण्यमिति।

तदिदमुक्तम्,

**तद्वचनादाम्नायस्य प्रामाण्यम्** [१.१.३]

इति। यद्वा,

**अथातो धर्मं व्याख्यास्यामः** [१.१.१]

**इत्यनेन** साक्षात्कृतधर्मादिपदार्थः क्षित्यादिनिर्माता भगवानीश्वरः प्रतिपाद्यते। **तत्राथातश्शब्दौ** पूर्ववत्। धर्ममिति धर्मोपदेष्टारमीश्वरमित्यर्थः। व्याख्यास्याम इति विशब्देनानेकप्रकारवाचिना परमेश्वरे बहूनि प्रमाणानि दर्शयति। तथा हि धर्मोपदेशप्रणेतृनिष्ठभ्रमसमानाधिकरणे [ण] धर्मविषयत्वरहितसाक्षात्कारविषयः, मेय-

त्वात्, घटवदिति। भ्रमसमानाधिकरणविषयत्वरहितग्रहणं किमर्थमिति चेत्? योगिदशायां धर्मगोचरसाक्षात्कारवद्भिरस्मदादिभिरर्थान्तरतापरिहारार्थम्। भवन्ति हि योगिदशायामस्मदादयोऽपि योगजधर्मसहकृतमनोजन्यधर्मगोचरसाक्षात्कारवन्तः उपदेष्टारश्च धर्मादीनां तेन धर्मोपदेशप्रणेतृसाक्षात्कारगोचरत्वमस्मदादिभिरर्थान्तरताग्रस्तम्, सिद्धसाधनताग्रस्तं चेति। तत्परिहारार्थं भ्रमसमानाधिकरणधर्मविषयत्वरहितग्रहणम्। अस्मदादिसाक्षात्कारो हि भ्रमसमानाधिकरणो धर्मविषयश्चेति भ्रमसमानाधिकरणधर्मविषयत्वरहितग्रहणेन निवर्त्यत इति भ्रमसमानाधिकरणत्वरहितग्रहणेनैवास्मदादिभिरर्थान्तरतापरिहाराद्व्यर्थं धर्मविषयत्वग्रहणमिति चेत् – न, अप्रसिद्धविशेषणतापरिहारार्थत्वात्, अस्मदादिसाक्षात्कारस्य भ्रमसमानाधिकरणत्वेन तद्रहितत्वानुपपत्तेः। यदा तु धर्मविषयत्वपदमुपादीयते, तदा धर्मविषयत्वरहितास्मदादिसाक्षात्कारेषु विशेषणप्रसिद्धिर्घटत एव, तेषां भ्रमसमानाधिकरणत्वे सति यद् धर्मविषयत्वं तद्रहितत्वात्, धर्मविषयत्वरहितग्रहणेनैवाप्रसिद्धविशेषणतापरिहाराद्व्यर्थं भ्रमसमानाधिकरणत्वग्रहणमिति चेत्—न, परोपपादितार्थान्तरादिपरिहारार्थत्वात्, व्याघातपरिहारार्थत्वाच्च। धर्मो धर्मगोचरत्वरहितसाक्षात्कारगोचर इति व्याहतमेव। यदा तु धर्मो भ्रमसमानाधिकरणधर्मविषयत्वरहितसाक्षात्कारगोचर इति साध्यते न तदा व्याघातः, भ्रमसमानाधिकरणत्वाभावेनापि साध्यपर्यवसानात्। यथा हि भ्रमसमानाधिकरणधर्मविषयत्वाभावो विशेष्यधर्मविषयत्वाभावेन [तथा विशेषणभ्रमसमानाधिकरणत्वाभावो[1] विशेष्यधर्मविषयत्वाभावेन] तथा विशेषणभ्रमसमानाधिकरणत्वाभावेनापि विशिष्टभावस्योभयथाप्युपपत्तेरिति अपेक्षितभ्रमाभावसिद्ध्यर्थं भ्रमसमानाधिकरणग्रहणम्। असति भ्रमसमानाधिकरणविशेषणे कथं तद्विशिष्टधर्मविषयत्वाभावो विशेषणाभावो [वे ?] पर्यवस्येत्, धर्मविषयत्वाभावस्य व्याहतत्वेऽपि भ्रमाभावपर्यवसानोपायाभावादिति। एवं भ्रमपदस्थाने विप्रलिप्सापदोपादानेन विप्रलिप्साभावोऽपि धर्माधर्मोपदेशप्रणेतरि साधनीयः, पुरुषविशेषलाभार्थत्वात्। असति ह्युपदेशपदे भ्रमादिरहितपुरुषोऽल्पदेशासिद्धौ न? न तद्दृष्टान्तेन तृतीयभ्रमविप्रलिप्साभावसाधनं च भ्रमरहितोपदेशत्वेन विप्रलिप्सारहितोपदेशत्वेन च तदुपदेशप्रामाण्यज्ञापनार्थः। तद्दृष्टान्तावष्टम्भेन भ्रमविप्रलिप्सारहितवचनत्वेन वेदप्रामाण्यज्ञापनार्थं च धर्मोपदेशप्रणेतृनिष्ठग्रहणं व्यर्थमिति चेत्—न, पुरुषविशेषलाभार्थत्वात्। असति ह्युपदेशप्रणेतृनिष्ठग्रहणे भ्रमसमानाधिकरणधर्मविषयत्वरहितो धर्मविषयः साक्षात्कारः सिध्येत्। न तु तदाश्रयः पुरुषविशेषः। प्रणेतृनिष्ठग्रहणादेव पुरुषविशेषसिद्धेः व्यर्थमुपदेशग्रहणमिति चेत्—न, उपदेशप्रणेतृलाभार्थत्वात्। असति ह्युपदेशपदे भ्रमादिरहितपुरुषोपदेशासिद्धौ न तद्दृष्टान्तेन तृतीयसूत्रे वेदप्रामाण्यं सिध्येदिति सफलमुपदेशग्रहणम्। केवलान्वयिनि

१. प्रथममातृकायां दीर्घो ग्रन्थपातः।



चोपाधिप्रतिरोधासंभवं वक्ष्यामः। यद्वा, कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकं तत्समवाय्यसमवायिनिमित्तकारणगोचरसाक्षात्कारवन्निष्ठयत्नहेतुः कार्यत्वात्। यन्न तत्समवाय्यसमवायिनिमित्तकारणगोचरसाक्षात्कारवद्यत्नजन्यं न तत्कार्यं, यथा गगनम्। कार्यं चेदम्। तस्मात् तथेति योगजधर्मसहितमनोजन्यपरमाणुसाक्षात्कारवद्भिरस्मदादिभिरर्थान्तरता स्यादिति तत्परिहारार्थं कार्ययत्नकालीनत्वरहितक्रियाजन्यपरमाणुसंयोगजन्यद्व्यणुकस्य धर्मत्वेनोपादानम्।

न चैतद् द्व्यणुकधर्मत्वेऽर्थान्तरतावकाशः धर्मिग्राहकप्रमाणबाधेनास्यानुमानस्यास्मदादिनिष्ठकार्ययत्नजन्यत्वापर्यवसायित्वात्। धर्मिग्राहकेण द्व्यणुकारम्भकसंयोगजनकक्रियायाः कार्ययत्नकालीनत्वाभावं साधयता द्व्यणुकपूर्वक्षणे कार्ययत्नमात्राभावस्य साधनात् द्व्यणुकपूर्वक्षणस्यापि द्व्यणुकारम्भकसंयोगजनकक्रियावत्त्वात् द्व्यणुकारम्भकसंयोगेन द्व्यणुकोत्पत्तिक्षणे द्व्यणुकारम्भकसंयोगजनकक्रियाविनाशादिति कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकासिद्धेराश्रयासिद्धिरिति चेत्—न, अयं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावान्, नित्यत्वे सति स्पर्शवत्त्वात्, यदेवं तदेवं, यथान्यः परमाणुरिति तत्सिद्धेः। कार्ययत्नकालीनत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्येतावतैवापेक्षितसिद्धेः व्यर्थमेतन्निष्ठग्रहणमिति चेत् – न, अप्रसिद्धविशेषणतापरिहारार्थत्वात्। न ह्यस्मादनुमानात् पूर्वं कार्ययत्नकालीनत्वरहितद्व्यणुकारम्भकसंयोगजन[नि?]का क्रिया क्वचित् प्रसिद्धा। तेनाप्रसिद्धविशेषणतापरिहारार्थमेतन्निष्ठग्रहणम्। कार्ययत्नकालीनत्वरहिताया द्व्यणुकारम्भकसंयोगजनकक्रियायाः क्वचिदप्रसिद्धत्वेऽपि कार्ययत्नकालीनैतत्परमाणुनिष्ठत्वरहिताया द्व्यणुकारम्भकसंयोगजनकक्रियायाः परमाण्वन्तरेषु प्रसिद्धत्वात्। कार्ययत्नकालीनत्वविशिष्टैतन्निष्ठत्वाभावस्य कार्ययत्नकालीनत्वविशेषणाभावेनैतन्निष्ठत्वरूपविशेष्याभावेनापि घटनादिति। एतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्येवास्तु। व्यर्थं कार्ययत्नकालीनग्रहणमिति चेत्—न, व्याघातपरिहारार्थत्वात्। अपेक्षितकार्ययत्नकालीनत्वरहितत्वसिद्ध्यर्थाच्च। द्व्यणुकारम्भकसंयोगजनकक्रियाया एतन्निष्ठत्वरहितैतन्निष्ठत्वयोर्व्याघातस्य दुर्वारत्वात्। सति कार्ययत्नकालीनत्वग्रहणे न व्याघातः। कार्ययत्नकालीनैतन्निष्ठत्वाभावस्य कार्ययत्नकालीनत्वाभावेनापि पर्यवसानात्। एवमसति कार्ययत्नकालीनत्वग्रहणेन द्व्यणुकारम्भकसंयोगजनकक्रियायाः कार्ययत्नकालीनग्रहणं कृतमिति। अयं परमाणुप्रयुक्त[र्य]यत्नकालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावान् इत्येवास्तु व्यर्थं कार्यग्रहणमिति चेत्–न, प्रकृतानुमानधर्म[मि]कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकसिद्ध्यर्थत्वात्। असति हि कार्यग्रहणे यत्नकालीनत्वरहितपरमाणुक्रियाजन्यसंयोगजन्यद्व्यणुकः सिध्येत्। न च तस्य धर्मित्वे तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्यत्वं शक्यं साधयितुं, धर्मिग्राहकप्रमाणबाधात्। तेन द्व्यणुकारम्भकसंयोगजनकक्रियाया यत्नकालीनत्वाभावमेव गमयता द्व्यणुकपूर्वक्षण-

यत्नमात्राभावो निर्णीतः। द्व्यणुकाव्यवहितपूर्वक्षणस्यापि द्व्यणुकारम्भकसंयोगजनकक्रियावत्त्वात्। तस्या द्व्यणुकारम्भकसंयोगेन द्व्यणुकोत्पत्तिक्षणे विनाशात्। अतो यत्नकालीनत्वरहितक्रियाजन्यद्व्यणुकस्य तदुपादानादिगोचरसाक्षात्कारवन्निष्ठप्रयत्नजन्यत्वानुमानं बाध्यते। द्व्यणुकं प्रति प्रयत्नस्य कारणत्वग्राहिणा द्व्यणुकपूर्वक्षणे प्रयत्नस्य साधनात्। पूर्वक्षणसत्त्वग्रहत्वात् कारणत्वस्य। सति तु कार्यग्रहणे न धर्मिग्राहकबाधावकाशः। धर्मिग्राहकमानेन द्व्यणुकारम्भकसंयोगजनकक्रियायाः कार्ययत्नकालीनत्वाभावस्य मुखेन द्व्यणुकपूर्वक्षणे सकलकार्ययत्नाभावमवगमयताप्य-कार्ययत्नाभावस्याकलनात्। द्वितीयानुमानस्य वा कार्ययत्नमादायापि पर्यवसानादिति।

अयं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितक्रियावानित्येवास्तु। व्यर्थं द्व्यणुकारम्भकसंयोगजनकग्रहणमिति चेत् – न, द्व्यणुकरूपधर्मिसिद्ध्यर्थत्वात्। असति द्व्यणुकारम्भकसंयोगजनकग्रहणे कार्ययत्नकालीनत्वरहिता क्रियैव सिध्येत्। न द्व्यणुकादि। तामेव पक्षीकृत्य तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्यत्वं साध्यताम्, किं द्व्यणुकादिनेति चेत् - न, संहारकालीनास्मदादिनिष्ठसकलकार्ययत्न-विनाशक्षणोत्पन्नकार्ययत्नकालीनत्वरहितक्रियासृष्टिमध्य एव वा कदाचिद् युगपत्कारणसमवधानसमुत्पन्नसकलकार्ययत्नविनाशक्षणोत्पन्नकार्ययत्नकालीनत्वरहितक्रियाया वा धर्मित्वे योगजधर्मसहितमनोजन्यपरमाणुगोचरसाक्षात्कारवदस्मदादिनिष्ठकार्ययत्न-जन्यत्वसिद्धावर्थान्तरस्य दुर्वारत्वात्। संहारमध्यपतितसृष्ट्याद्यद्व्यणुकारम्भकसंयोगजनकक्रियायाश्च धर्मित्वे धर्म्यसिद्धेः।

अयं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितक्रियावानित्येतावन्मात्रस्य पूर्वोपपादितसंहाराद्यसृष्टिमध्यपतितक्रियाविषयत्वेनाप्युपपत्तेः। तदविषयत्वेऽपि संहार-मध्यवर्तित्वसृष्ट्याद्यत्वविशिष्टक्रियायामपर्यवसानात्। न हि पर्वतो वह्निमानिति न गोमयवह्नौ न पर्यवसितमिति चन्दनवह्नौ पर्यवस्यतीति। तस्मात् सृष्ट्याद्यां क्रियां धर्मित्वेनोपाददता तत्सिद्ध्यर्थं द्व्यणुकारम्भकसंयोगजनकपदमुपादेयमिति। तथा च धर्मित्वोपात्तद्व्यणुकसिद्धिर्दुर्वारेति। अथायं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहित-संयोगजनकक्रियावान्। न च द्व्यणुकरूपधर्म्यसिद्धेरीश्वरानुमानाप्रवृत्तिः कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगधर्मित्वेनोपादाय तदुपादानादिगोचरसाक्षात्कारवन्निष्ठ-यत्नजन्यत्वानुमानाप्रवृत्तेः। नापि योगजधर्मसहितमनोजन्यपरमाण्वादिगोचरसाक्षात्कारपदस्थानादिकार्ययत्नजन्यत्वेनार्थान्तरता। कार्ययत्नकालीनत्वरहितक्रियाजन्य-संयोगसाधकप्रमाणेन संयोगपूर्वक्षणे सकलकार्ययत्नकालीनत्वरहितां क्रियां साधयता संयोगपूर्वक्षणे सकलकार्ययत्नभावसाधनाद्यर्थं द्व्यणुकग्रहणमिति मन्यसे, तन्न धर्मित्वेनोपात्तद्व्यणुकसिद्ध्यर्थत्वात्। द्व्यणुकसिद्धेश्च द्व्यणुकं तदुपादानादिगोचर-साक्षात्कारवन्निष्ठयत्नजन्यमिति ईश्वरानुमित्यर्थत्वात्। संयोगमेव धर्मित्वेनोपादाय-तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्य इतीश्वरानुमितिर्भविष्यतीति चेत्—न,



संयोगस्तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्य इतीश्वरानुमितितो द्व्यणुकं द्व्यणुकोपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्यमितीश्वरानुमितेर्भिन्नजातीयत्वेन संयोगधर्मिनिष्ठकार्यत्वादिलिङ्गज्ञानाजन्यत्वात्। अन्यथा पर्वते धूम[व]त्त्वेन वह्न्यनुमित्यन्तरं देशान्तरे धूमवत्त्वेन वह्न्यनुमितेरपि वैयर्थ्यापत्तेरिति। न च संयोगप्रतिपत्त्यनन्तरमेव सृष्ट्याद्यं द्व्यणुकं प्रतिपत्तव्यमित्यस्ति नियमः। तन्निरूपणाधीननिरूपणत्वविरहात्। द्व्यणुकारम्भकविशेषणवता प्रकृतानुमानेनैव तयोर्युगपदुपलम्भादिति। अस्तु वा द्व्यणुकारम्भकविशेषणवैयर्थ्यम्, तथापि नास्माकं काचित् क्षतिः। कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगपक्षीकरणेनापि ईश्वरादि-सिद्धिरिति।

नन्वस्तु नाम स्पर्शवन्नित्यत्वेन कार्ययत्नकालीनैतन्निष्ठत्वरहितक्रिया तज्जन्य-संयोगतज्जन्यद्व्यणुकानां संभवति, तेषां स्पर्शवन्नित्यत्वरूपसाधनवत् स्वानाधारपर-माणुनिष्ठात्यन्ताभावप्रतियोगित्वात्। अव्यापकत्व[ञ्च] पक्षव्यापकपक्षसंसर्गातिरिक्तं नानुमितिगोचर इति। तन्न, तत्संसर्गातिरिक्तमव्यापकं नानुमितिगोचर इति किं समयः, अनुमानं वा? नाद्यः, एवंविधसमयानङ्गीकारात्। न द्वितीयः, अनुमानानिरूपणात्। द्व्यणुकतदारम्भकसंयोगतदारम्भककर्माणि, अयं परमाणुः कार्ययत्न-कालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्यनुमितिगोचराणि न भवन्ति। पक्षतत्संसर्गातिरिक्तत्वे सति स्पर्शवन्नित्यत्वाव्यापकत्वात् पटवत् इत्यनुमानमिति चेत् - न। अयं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोग-जनकक्रियावान् स्पर्शवन्नित्यत्वात् इत्यनुमानसिद्धेः। तत्परमाणुक्रियातज्जन्यसंयोग-तज्जन्यद्व्यणुकानां तद्धर्मित्वेऽपि सिद्धसाधनात्। अयं परमाणुः कार्ययत्नकालीनै-तन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्यनुमानसिद्धे तत्परमाणुक्रिया-तज्जन्यसंयोगतज्जन्यद्व्यणुकानां धर्मित्वेऽपि सिद्धसाधनात्! अयं परमाणुः कार्ययत्न-कालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्यनुमानसिद्धे तत्परमाणु-क्रियातज्जन्यसंयोगतज्जन्यद्व्यणुकानां च धर्मित्वे व्याघातात्। एतदनुमितिविषयत्वैतदनुमितिविषयत्वाभावयोर्विरोधात्। अथायं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहित-द्व्यणुकारम्भकसंयोगजनकक्रियावानित्यनुमितिः, द्व्यणुकतदारम्भकसंयोगजनकक्रियाल-[म्ब]म्भना न भवति, अनुमितित्वात्, वह्न्यनुमितिवत् इत्युच्यते, तदपि न द्व्यणुकारम्भकसंयोगजनकक्रियालम्बनत्वं क्वचिदप्रसिद्धं प्रसिद्धं वा? नाद्यः, तस्य क्वचिदप्रसिद्धौ तन्निषेधस्याप्यप्रसिद्धत्वात्। द्वितीये द्व्यणुकाद्यालम्बनत्वं किं द्व्यणुकालम्बनसाक्षात्कारे प्रसिद्धम्, अनुमितौ वा? नाद्यः, द्व्यणुकादिगोचरसाक्षात्कारस्याप्यसिद्धेः। द्व्यणुकादयः साक्षात्कारगोचराः प्रमेयत्वादिति तत्सिद्धिरिति चेत्—न, अस्यामेव द्व्यणुकाद्यालम्बनानुमितावनुमितित्वस्य व्यभिचारात्, द्व्यणुकादेरप्यसिद्धेश्च। अनुमानात् तत्सिद्धिरिति चेत्? तर्हि द्व्यणुकाद्यालम्बनत्वनिषेधसाधकानुमानस्य तत्रैवानैकान्तिकत्वात्। द्वितीयेऽपि किमयं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितद्व्यणु-

कारम्भकसंयोगजनकक्रियावानिति अनुमितौ साध्यप्रसिद्धिः, अनुमित्यन्तरे वा ? प्रथमे बाधः, द्व्यणुकाद्यालम्बनत्वग्राहकप्रमाणस्य द्व्यणुकाद्यालम्बनत्वनिषेधसाधकानुमानेन साध्यप्रतियोगिसाधकतयोपजीव्यत्वात् । द्वितीये तु तत्रैव व्यभिचारः । अथायं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितद्व्यणुकारम्भकसंयोगजनकक्रियावानित्यनुमितिर्न व्यापकतद्धर्मिसंसर्गधर्मिव्यतिरिक्तालम्बनानुमितित्वात् संप्रतिपन्नवदित्यनुमीयते, तदपि न, द्व्यणुकारम्भकसंयोगतज्जनकक्रियाणां स्वात्मादिव्यापकत्वेन स्वगतधर्मधर्मित्वेन प्रकृतानुमितेस्तदालम्बनत्वेऽपि प्रकृतसाध्यस्योपपन्नत्वेन तदालम्बनत्वनिषेधापर्यवसानात् द्व्यणुकात्यन्ताभाववदवृत्तित्वेन द्व्यणुकादिव्यापकत्वस्य सुदृढत्वात् । द्रव्यत्वादिसाधकप्रमाणविषयत्वेन च प्रमेयत्वद्रव्यत्वादिधर्मवत्त्वस्यापि निर्णीतत्वादिति । अथेयमनुमितिर्द्व्यणुकारम्भकसंयोगजनकक्रियावत्त्वतत्पक्षीकृतपरमाणुसंसर्गपक्षीकृतपरमाणुव्यतिरिक्तालम्बनेति साध्यं विवक्षसि, तदा साध्यविकलत्वं दृष्टान्तस्य । अनुमित्यन्तरे वानैकान्तिकत्वम् । वह्न्यनुमित्यादेरपि द्व्यणुकारम्भकसंयोगजनकक्रियावत्त्वतत्पक्षीकृतपरमाणुसंसर्गपक्षीकृतपरमाणुव्यतिरिक्तवह्निमत्त्वसंसर्गपर्वताद्यालम्बनत्वात् ।

अथायं परमाणुः कार्ययत्नकालीनैतन्निष्ठत्वरहितद्व्यणुकाद्यारम्भकसंयोगजनकक्रियावानित्यनुमितिः स्वोत्पादकलिङ्गव्यापकधर्मादिव्यतिरिक्तालम्बना अनुमितित्वात् । या यानुमितिः सा सा स्वोत्पादकलिङ्गव्यापकधर्मितत्संसर्गातिरिक्तालम्बना यथा वह्न्यनुमितिरिति सामान्यतोदृष्टमनुमानमाहेत्य·······से, तदपि न, स्वशब्दस्य प्रकृतविशेषणपरत्वेऽन्वयाभावात् । व्यापकधर्मिमात्रादिपरत्वे च पूर्वोक्तदोषादिति । अथास्यानुमितेर्द्व्यणुकतदारम्भकसंयोगतदारम्भकक्रियालम्बनत्वे किं प्रमाणम् ? मानसप्रत्यक्षमेव ममेयमनुमितिर्द्व्यणुकाद्यारम्भ[क]संयोगजनकक्रियालम्बनोत्पन्नेत्यनुव्यवसायात् । आलम्बनत्वं पुनरनुमितेर्नानुव्यवसीयते । तदनुमितिगोचर इति व्यवस्था । एवमनुमानान्तरेष्वपि द्रष्टव्या । तदेवमीश्वरानुमाने पक्षीकृतद्व्यणुकादिसिद्धिः ।

नापि व्यापकत्वोपात्तपक्षीकृतद्व्यणुकसमवायिकारणासमवायिकारणनिमित्तकारणगोचरसाक्षात्कारवन्निष्ठयत्नहेतोरन्वितत्वव्यापक[ा]सिद्धिरप्रसिद्धविशेषणत्वापरपर्याया एतद्द्व्यणुकसमवाय्यसमवायिनिमित्तकारणानि जनकयत्नवन्निष्ठसाक्षात्कारविषयाणि प्रमेयत्वात् घटवदिति व्यापकसिद्धेः । एतद्द्व्यणुकसमवाय्यसमवायिनिमित्तकारणगोचरसाक्षात्कारवन्निष्ठजनकप्रयत्नस्य व्यापकत्वात् । जनकप्रयत्नवन्निष्ठसाक्षात्कारः परमाण्वादिगोचरोऽनेन सिध्यति, न तु परमाण्वादिगोचरसाक्षात्कारवन्निष्ठो जनकयत्न इति चेत्—न, परमाण्वादिगोचरजनकप्रयत्नवन्निष्ठसाक्षात्कारं साधयता परमाण्वादिगोचरसाक्षात्कारवन्निष्ठजगत्प्रयत्नसाधनात् जनकप्रयत्नवदिति । जगज्जनकप्रयत्नाश्रये निष्ठाश्रितत्वं यस्यासौ जनकप्रयत्नवन्निष्ठः । स चासौ साक्षात्कारश्चेति जनकसाक्षात्कारयोः समानाधिकरणप्रतिपादनात् सिध्यतु, जनकप्रयत्नवन्निष्ठसाक्षात्कारग्रहणात् । जनकप्रयत्नसामानाधिकरण्यमसाक्षात्कारस्य, साक्षा-



त्कारसामानाधिकरण्यं तु जनकप्रयत्नस्य सिध्यति । तदेव व्यतिरेकिसाध्यमिति चेत्—न, सामानाधिकरण्यस्योभयनिष्ठत्वेनैव सिद्धेरिति । नन्वेतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्यत्वं व्यापकत्वं क्वचित्प्रसिद्धं न वा ? प्रथमे तत्रैव जन्यत्वापरपर्यायकार्यत्वसिद्धेः केवलव्यतिरेकित्वभङ्गः । द्वितीयेऽप्रसिद्धविशेषणतेति चेत्—न, एतद्द्व्यणुकसमवायिकारणा[दि]गोचरसाक्षात्कारवन्निष्ठयत्नहेतोरेव व्यापकत्वात् । अथ बुद्धिजनको यत्नः आत्मन्येवाश्रितः कार्यत्वं च तद्रहित एव घटादौ वर्तत इति विरुद्धमिति चेत्—न, यत्र कार्यत्वं तत्रैव तद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठो यत्नो हेतुरिति व्याप्यव्यापकभावाङ्गीकारो, न तु यत्र कार्यत्वम् तत्रैवैतद् द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठो जनको यत्न आश्रित इति । यथा यत्र कार्यत्वं तत्रादृष्टादिहेतुरिति । ननु यत्र कार्यत्वं तत्रात्मादृष्टादिहेतुराश्रित इति आत्मादृष्टादेः कार्यानाश्रितत्वादात्मादृष्टादिहेतुमत्त्वं कार्यत्वसमानाधिकरणं कार्यत्वस्य व्यापकं, नत्वात्मादृष्टादिहेतुरिति चेत् न, आत्मादृष्टादिहेतुर्यत्राश्रिता तदात्मादृष्टादिहेतुमत् । तस्य भाव आत्मादृष्टादिहेतुमत्त्वं व्यापकं विवक्षितम्, उतात्मादृष्टादिहेतुर्यस्य तदात्मादृष्टादिहेतुमत् । तस्य भाव आत्मादृष्टादिहेतुमत्त्वं व्यापकं विवक्षितम् ? न प्रथमः, आत्मादृष्टादेः कार्यानाश्रितत्वात् । न द्वितीयः, आत्मादृष्टादेः कार्येण हेतुत्वातिरिक्तसंबन्धाभावात् हेतुत्वमेव संबन्धोऽस्तीति चेत् ? एवं तर्हि यत्र कार्यत्वं तत्रात्मादृष्टादिहेतुरिति आत्मादृष्टादिहेतोरेव व्यापकत्वमुपपन्नं व्यर्थं मतुबुपादानम् । तस्मात् सिद्धमेतद्[मेव तद्] द्व्यणुकोपादानादिगोचरसाक्षात्कारन्निष्ठप्रयत्नहेतोः कार्यत्वव्यापकत्वमिति नाप्रसिद्धविशेषणता । अस्तु वैतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठप्रयत्नहेतुमत्त्वं व्यापकत्वम् । तच्च नाप्रसिद्धम् । एतद्द्व्यणुकसमवाय्यसमवायिनिमित्तकारणानि किञ्चिज्जनकयत्नवन्निष्ठसाक्षात्कारविषयाणि प्रमेयत्वाद् घटवदिति साध्ये किञ्चिदिति विशेषणवता पूर्वानुमानैव सिद्धेः । अथ किञ्चिदिति विशेषणोपादानादेतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारविन्निष्ठयत्नहेतुकमात्रं सिध्यति, न त्वेतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुकत्वमनुगतमिति चेत्—न, इदं द्व्यणुकमेतत्समवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुभिन्नं मेयत्वादित्येतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुकान्तरस्याननुगतैतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतु[क]त्व [विशिष्ट] विशिष्टस्यैव सिद्धेः । तस्यानुगतत्वे तद्वतो द्वितीयस्यासिद्धेः ।

अस्तु वैतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुकान्तरसिद्धावनुगतव्यवहारबलादेवानुगतैतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुकत्वसिद्धिः, शावलेयादिगतानुगतगोत्वादिसिद्धिवदिति । किञ्चिज्जनकयत्नवन्निष्ठैतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवतो **महेश्वरस्य** विशेषणसाधकानुमानेनैव सिद्धेः । व्यतिरेकिवैयर्थ्यमिति चेत्—न, किञ्चिज्जनकयत्नवन्निष्ठैतद्द्व्यणु-

कसमवायिकारणादिविषयत्वसाक्षात्कारवत्त्वस्य योगजधर्मजन्यसर्वविषयवदस्मदादिषूपपत्तेः, विशेषणसाधकस्य परमेश्वरद्वारा साधकत्वादिति ।

अथ मा भूतामाश्रयासिद्धिव्यापकासिद्धौ । व्याप्यत्वासिद्धिस्तु भविष्यति । एतद्द्व्यणुकसमवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतोः साध्येऽणुत्वाभावस्योपाधित्वादिति चेत्—न, **मीमांसकमते** साध्यसाधकाप्रसिद्धत्वेन साध्यव्यापकस्यानिश्चयात् । **न्यायमते** द्व्यणुक एवोक्तसाध्यवति साध्यव्यापकत्वभङ्गात् । **नैयायिकैकदेशिन** एवंविधोपाधिबलेन द्व्यणुकादेरेवंविधसाध्यवत्तायां वा विवदन्त इति चेत्— न, तेषामप्येवंविधसाध्याप्रसिद्धौ साध्यव्यापकत्वानिश्चयात् । प्राचीनन्यायेन साध्यप्रसिद्धिरिति चेत्—न, धर्मिविशेषावच्छेद[क]मन्तरेण साध्यप्रसिद्धावपि यत्र यत्र साध्यं तत्र तत्रोपाधिरिति धर्मिविशेषावच्छेदप्रवृत्तसाध्यव्यापकत्वनिश्चयात् । अनिर्धारितविशेषे यत्किञ्चिद्धर्मावच्छेदेन साध्यप्रसिद्धिपक्षेऽपि तत्र हेतोः साध्यानिश्चयवदुपाधिसत्त्वस्याप्यनिश्चयात्, साध्यव्यापकत्वात् निश्चयस्य तदवस्थत्वात् । नापि विपक्षवृत्तित्वात् व्याप्यत्वासिद्धिः, कार्यत्वस्योक्तसाध्याभाववत् वृत्तित्वानिश्चयात् । न च व्याप्तिग्रहणोपायसाध्यसाधनभूयोदर्शनाभावाद् व्याप्यत्वासिद्धिः । व्यतिरेकिणि व्याप्तिग्रहणोपायस्य वक्ष्यमाणत्वादिति । अथ कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यं द्व्यणुकम्, तत्समवायिकारणादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुरहितमणुत्वात् परमाणुवदिति सत्प्रतिपक्षत्वमिति चेत्—न, अप्रसिद्धविशेषणत्वात् कार्ययत्नकालीनत्वरहितद्व्यणुकोपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतोः स्वयमप्रसिद्धस्यापरैर्निषेद्धुमशक्यत्वात् ।

एतेन कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यं द्व्यणुकं तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नहेतुरहितं प्रमेयत्वात् घटवदिति प्रतिक्षेपो निरस्तः, कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकोपादानादि किञ्चिज्जनकयत्नवन्निष्ठसाक्षात्कारविषयः प्रमेयत्वात् घटवदिति सिद्धे तदुपादानादिगोचरसाक्षात्कारवन्निष्ठयत्नजन्ये प्रमेयत्वस्य व्यभिचाराच्चेति । यद्वायमन्वयव्यतिरेक्येवास्तु । न च सपक्षाभावः, कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकोपादानादीनि घटजनकयत्नवत्कुलालसाक्षात्कारविषयाः प्रमेयत्वात् घटवदिति सिद्धस्य कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकोपादानादिगोचरसाक्षात्कारवत् कुलालयत्नजन्यस्य घटस्य घटस्य सपक्षत्वादिति ।

ननु धर्म एव नास्ति प्रमाणाभावादितीश्वरसाधकप्रथमानुमाने आश्रयासिद्धत्वाप्रसिद्धविशेषणत्वे धर्मस्यैव यद्धर्मत्वेनोपादानात् धर्मोपदेशप्रणेतृनिष्ठभ्रमसमानाधिकरणधर्मविषयत्वरहितसाक्षात्कारविषयत्वस्य विशेषणत्वेनोपादानात् । द्वितीयानुमाने चाप्रसिद्धविशेषणत्वं कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यं द्व्यणुकं तत्समवाय्यसमवायिनिमित्तकारणगोचरसाक्षात्कारवन्निष्ठयत्नजन्यमित्यत्र कारणपदेन धर्मादेरिष्टत्वादिति शङ्कापरिहारार्थं द्वितीयं सूत्रम् —



यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।

इति । अथ भगवानीश्वरो न धर्मोपदेशार्थं समर्थनीयः, धर्मस्य स्वरूपतः पुरुषार्थत्वाभावादिति शङ्कापरिहारार्थं द्वितीयं सूत्रम्—

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः [१.१.२]**

इति । धर्मस्य स्वरूपतः पुरुषार्थत्वविरहेऽपि स्वर्गापवर्गसाधनत्वात्पुरुषार्थत्वमिति भावः ।

ननु भवतु नाम साक्षात्कृतस्वर्गापवर्गसाधनधर्मादिपदार्थसार्थो धर्मोपदेष्टा भगवानीश्वरः । ततः किमित्याशङ्कायां तृतीयं सूत्रम्—

**तद्वचनादाम्नायप्रामाण्यम् [१.१.३]**

इति । तदिति सर्वनाम्ना प्रथमसूत्रगतधर्मपदोपात्तो धर्मोपदेष्टा सर्वज्ञः परामृश्यते । वचनादिति च भावप्रधानो निर्देशः वचनत्वादित्यर्थः । आम्नाय इति वेदो विवक्षितः । प्रामाणमित्यत्र साधनीयमिति विशेषः । प्रयोगस्तु, वेदवाक्यं प्रमाणमीश्वरवाक्यत्वात्, संप्रतिपन्नतद्वाक्यवत् । न च दृष्टान्ताभावः, ईश्वरसाधकानुमानेषु प्रमाणवाक्यप्रणेतृविशेषणोपादानेन दृष्टान्तसिद्धेः । अथेश्वरसाधकानुमानेषु अप्रमाणवाक्यप्रणेतृविशेषणोपादानादीश्वरप्रणीताप्रमाणवाक्यसिद्धेः, ईश्वरवाक्यत्वस्य अनैकान्तिकत्वमिति चेत् न, भ्रमरहितत्वाप्रमाणवाक्यप्रणेतृत्वयोः व्याघातेनाप्रमाणवाक्यप्रणेतृत्वासिद्धेः । अप्रमाणवाक्यप्रणेतृभ्रान्तत्वयोः परस्पराविनाभूतत्वात् अभ्रान्तत्वाप्रमाणवाक्यप्रणेतृत्वसिद्धिरपि मा भूदिति चेत् ? सत्यम्, न भवत्येव । अप्रमाणवाक्यप्रणेतृत्वविशेषणवत्[ता] भ्रान्तत्वसिद्धिरपि[रिति]तद्विधुरेण पुनरभ्रान्तत्वसिद्धिर्भवन्ती केन वार्यते ? अथ भ्रमसमानाधिकरणधर्मविषयत्वरहितयोश्च परस्पराभावाविनाभूतत्वाच्च । यत्राभ्रान्तत्वं न तत्राप्रमाणवाक्यप्रणेतृत्वं, यथा घटादौ भ्रमवत्त्वाभावस्याभ्रान्तस्य घटादौ सत्त्वात् अप्रमाणवाक्यप्रणेतृत्वस्य चाप्रमाणवाक्यार्थज्ञानतद्विवक्षातत्समानविषयप्रयत्नादिमत्त्वस्य चाभावात् । अप्रमाणवाक्यप्रणेतृत्वव्याघातादभ्रान्तत्वसिद्धिरपि मा भूदिति चेत् ? सत्यम् । न भवत्येवाप्रमाणवाक्यप्रणेतृत्वविशेषणवता भ्रान्तत्वसिद्धिरपि । तद्विधुरेण पुनरभ्रान्तत्वसिद्धिर्भवन्ती केन वार्यते ? अथ भ्रमसमानाधिकरणधर्मविषयत्वरहितत्वविशेषणरहितेन धर्मोऽप्रमाणवाक्यप्रणेतृसाक्षात्कारगोचरः प्रमेयत्वात् घटवदित्यादिना प्रमाणवाक्यप्रणेतृसिद्धिर्भवन्ती केन वार्यत इति चेत्—न, केनचिदुत्तमप्रमाणवाक्यप्रणेतारोऽप्यस्मदादयो योगजधर्मदशायां धर्मादिसाक्षात्कारभाजो भवन्तीति ईश्वरः प्रमाणवाक्यप्रणेता पुरुषत्वादहमिवेति वा दृष्टान्तसिद्धेः । ईश्वरोऽप्रमाणवाक्यप्रणेता पुरुषत्वात् अनाप्तवदिति सत्प्रतिपक्षत्वमिति संप्रतिपन्नवदिति चेत्— न, प्रमाणवाक्यप्रणेतृत्वाप्रमाणवाक्यप्रणेतृत्वयोरस्मदादौ सहानवस्थितयोः परस्परविरोधात् परस्परविरुद्धत्वापर्यवसायित्वाच्च । महाविद्यासाध्यवत् प्रमाणवाक्यप्रणेतृत्वाभावसाधने च नास्मदादयो दृष्टान्तः, अस्मदादेः प्रमाणवाक्यप्रणेतृत्वात् । घटो दृष्टान्त इति चेत्—न, पुरुषत्वादेः साधनविक-

लत्वात्। ईश्वरातिरिक्तात्मत्वरहितत्वादेश्चानात्मत्वेन सोपाधिकत्वादिति, ईश्वरोऽप्रमाणवाक्यप्रणेता पुरुषत्वादहमिवेति सिद्धे परमेश्वरवाक्य ईश्वरवाक्यत्वमिति चेत्—न, अप्रमाणवाक्यप्रणेतृत्वे भ्रान्तत्वस्योपाधित्वात्। तस्यापि साधने धर्मिग्राहकप्रमाणबाधात्। तेनाभ्रान्तत्वेनैवेश्वरसाधनादिति। यद्वेश्वरसाधकप्रथमानुमानेऽप्रमाणवाक्यप्रणेतृनिष्ठधर्मविषयत्वरहितधर्मोपदेशप्रणेतृनिष्ठपदमुपादाय धर्मोप्रमाणवाक्यप्रणेतृनिष्ठधर्मविषयत्वरहितधर्मोपदेशप्रणेतृनिष्ठसाक्षात्कारगोचरः प्रमेयत्वात् घटवदिति परमेश्वरः साधनीयः। तथा च धर्मिग्राहकप्रमाणेनैवेश्वरस्याप्रमाणवाक्यप्रणेतृत्वाभावसिद्धेर्धर्मिग्राहकप्रमाणबाधितमीश्वरस्याप्रमाणवाक्यप्रणेतृसाधनमिति नानैकान्तिकमीश्वरवाक्यत्वमिति। न चैवं धर्मिग्राहकप्रमाणेनैव वेदस्य प्रामाण्यसिद्धेर्वेदवाक्यं प्रमाणमीश्वरवाक्यत्वादित्यस्य वैयर्थ्यमिति वाच्यम्। अप्रमाणवाक्यप्रणेतृत्वाभावविशिष्टधर्मोपदेशप्रणेतृत्वसाधकेन प्रमाणत्वविशिष्टधर्मोपदेशासाधनात्। न ह्यप्रमाणत्वाभावादावप्रमाणत्वम्, अपि तु प्रमितिसाधनत्वमिति। भवतु वाऽप्रमाणत्वाभाव एव प्रमाणत्वम्। सिध्यतु च तद्विशिष्टत्वं धर्मोपदेशस्य, तथापि वेदप्रामाण्यं तेन न सिध्यति, तेन वेदस्य धर्मोपदेशत्वासाधनात् यत्किञ्चिद्धर्मोपदेशेनापि तस्य चरितार्थत्वादिति व्याघाताभावलक्षणयोग्यत्वयोर्विरहाच्च। वेदवाक्यं न प्रमाणं वेदवाक्यान्यप्रमाणत्वरहितत्वादित्यस्यापि

अग्निर्हिमस्य भेषजम्

इत्यादौ व्यभिचारात्। सर्वेषां प्रतिपक्षहेतूनां वेदवाक्यत्वाभावेन सोपाधिकत्वाच्च। न चास्य पक्षेतरता,

अग्निर्हिमस्य भेषजम्

इत्यादेरर्थवादस्य न यथाश्रुतेऽर्थे प्रामाण्यमिति दृष्टान्तः साध्यविकल इति चेत्—न, बाधकाभावेन यथाश्रुतेऽर्थे प्रामाण्यस्य दुर्वारत्वात्। लक्षणयान्यत्र प्रामाण्याभ्युपगमेऽपि प्रामाण्याविवादाभावेन दृष्टान्तस्य साध्यविकलतापरिहाराच्चेति। नत्वेवं सति

चैत्यं वन्देत स्वर्गकामः

इति **बुद्धवाक्यं** प्रमाणम्, बुद्धवाक्यत्वात्—

अहिंसा धर्मसाधनम्

इति वाक्यवत् इति बुद्धागमानामपि प्रामाण्यं स्यादिति? न, नैरात्म्यक्षणभङ्गादिप्रतिपादकवाक्येषु बुद्धवाक्यत्वस्य व्यभिचारात्। नैरात्म्यक्षणधर्मादिप्रतिपादकवाक्यानां च तत्र तत्र वक्ष्यमाणबाधकबलेनाप्रामाण्यनिश्चयात्। एतेन चैत्यवन्दनादिकं वाक्यं प्रमाणं सर्वज्ञवाक्यत्वात्—

अहिंसा धर्मसाधनम्



इति वाक्यवदिति निरस्तम्। अनाप्तवाक्ये व्यभिचाराच्च। तस्यापि योगदशायां सर्वज्ञत्वात्। किञ्चिन्निष्ठसर्वविषयकज्ञानजन्यवाक्यत्वमिति चेत्—न, अस्यापि पूर्वदूषणगत[ग्र]स्तत्वादिति। एतेन—

केशोल्लुञ्छनं स्वर्गसाधनम्

इति वाक्यं प्रमाणं जिनवाक्यत्वात् सर्वज्ञवाक्यत्वम्। तच्चानाप्तवाक्ये नास्तीति चेत्—न, अनाप्तवाक्यस्यापीश्वरनिष्ठसर्वविषयज्ञानजन्यत्वात्। **बुद्धज्ञानस्य** किञ्चिन्निष्ठत्वानङ्गीकाराच्च हेतोर्विशेषणासिद्धत्वात्। सर्वविषयज्ञानजन्यवाक्य[त्व]मेव सर्वज्ञवाक्यत्वम्। न तु किञ्चिन्निष्ठसर्वविषयज्ञानजन्यवाक्यत्वमिति चेत्—न, अस्यापि पूर्वदूषणग्रस्तत्वादिति। एतेन—

केशोल्लुञ्छनं स्वर्गसाधनम्

इति वाक्यं प्रमाणं जिनवाक्यत्वात् संप्रतिपन्नवाक्यवदिति **जैनागमवाक्यप्रामाण्य**साधनप्रतिपत्तिरपि निरस्तः। अथेश्वरवाक्यत्वमनाप्तवाक्येऽनैकान्तिकम्, अनाप्तवाक्यस्यापीश्वरजन्यत्वेनेश्वरवाक्यत्वादिति चेत्—न, ईश्वरशरीरताल्वोष्ठपुटव्यापारजन्यवाक्यस्येश्वरवाक्यत्वात्। तस्य चानाप्तवाक्येऽसत्त्वात्। अथ किं साक्षादीश्वरप्रयत्नाधिष्ठितत्वमीश्वरशरीरत्वम्, किं वेश्वरभोगायतनत्वम्, किं वेश्वरज्ञानजनितेन्द्रियाश्रयत्वम्? प्रथमेऽनाप्तशरीरस्यापीश्वरशरीरत्वम्, सर्वपदार्थानां साक्षादीश्वरप्रयत्नविषयत्वादिति तटस्थमेवानैकान्तिकत्वम्। द्वितीये परमेश्वरेऽपि सुखदुःखापत्तिः। तृतीये परमेश्वरे कार्यज्ञानाद्यापत्तिरिति चेत्—न, परमेश्वरगिरिजासंभोगवियोगजन्यसुखदुःखकार्यज्ञानाद्यङ्गीकारात् **पुराणादौ** गिरिजासंभोगवियोगजन्यसुखदुःखेन्द्रियज्ञानादिशालिनो[ऽ]**विग्रहवतः** एव चन्द्रशेखरस्य श्रवणात्। धर्माधर्माभावे कथमीश्वरस्य सुखदुःखादीनि इति चेत्—न, ईश्वरे धर्माधर्मयोरप्यङ्गीकारात्। पुराणादौ परमेश्वरस्य तपोजन्यधर्मब्रह्मशिरश्छेदजन्याधर्मयोः श्रवणात्। सुखदुःखादिमत्त्वे परमेश्वरस्यास्मदादिभ्यः [न] कोऽपि विशेष इति चेत्—न, अभ्रान्तत्वसृष्टिसंहारकर्तृत्ववेदनिर्मातृत्वसकलभुवनस्वामित्वादिकमित्यवेहि। अन्यथा सुखदुःखाविशेषे राज्ञोऽपि पामरादिभ्यो विशेषो न स्यात्। देशस्वाम्यविशिष्टवनितासंभोगजन्यसुखादयः पामरादिभ्यो राज्ञो विशेषा इति चेत्—न, एवं तर्हि विश्वस्वाम्यगिरिजासंभोगजन्यसुखादयो राजादिभ्यः परमेश्वरस्य विशेषा इति संतोष्टव्यम्। एतेन वेदनिर्माणे परमेश्वरस्य प्रयोजनाभाव इति प्रत्युक्तम्। परमेश्वरे वेदादिनिर्माणजन्यधर्मसुखादेरस्वीकारात्।

**आत्रेयाचार्यस्तु** परमेश्वरे धर्मतज्जन्यशरीरसुखादीनि मन्यन्ते। न त्वधर्मतज्जन्यशरीरदुःखादीनि इति। तदयुक्तम्, धर्मसुखादिसाधकधर्मिग्राहकानुमानादिपुराणादेरधर्मदुःखादावपि तुल्यत्वात्। एवं स्मृतिहेतुसंस्कारद्वेषावपि धर्मिग्राहकानुमानादिबलात् परमेश्वरे स्वीकर्तव्यौ। तस्मात् बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारवान् परमेश्वर इति। अथ कार्ययत्नकालीनत्वरहितक्रियाजन्यसंयोगजन्यद्व्यणुकजनकप्रयत्ना-

श्रयतया परमेश्वरः सिध्यन् न कार्यप्रयत्नवानेव धर्मिग्राहकात् सिध्यतीति कथं धर्मिग्राहकादेव कार्ययत्नवतः परमेश्वरस्य सिद्धिः ? कार्याकार्यप्रयत्नयोरेकत्र विरोधादिति चेत्— न, व्याप्तिपक्षधर्मताबलात् कार्याकार्यप्रयत्नवन्तमीश्वरं साधयता धर्मिग्राहकप्रमाणेन कार्याकार्यप्रयत्नयोरविरोधात्। ननु वेदवाक्यं प्रमाणमित्यत्र प्रमाणत्वं प्रमितिजनकत्वं साध्यम्, तथा च किमाद्यस्य वेदवाक्यस्य धर्मित्वम्, तदारब्धादेर्मध्यमस्य वा,

शब्दः शब्दान्तरमारभते

इति न्यायेन श्रवणदेशोत्पन्नस्यान्तस्य वा ? न प्रथमद्वितीयौ, बाधात्. प्रथममध्यमवाक्यानामश्रूयमाणानां प्रमित्यजनकत्वात्। न तृतीयः, अन्तवाक्यस्य स्वविषयसाक्षात्कारप्रमित्यजनकत्वेनार्थान्तरग्रस्तत्वात्। साक्षात्कारिणि ज्ञाने विषयस्यापि कारणत्वेन त्वयाङ्गीकृतत्वात्। अनङ्गीकारेऽप्यनेनैव तत्सिद्धिरस्त्विति वक्तुं शक्यत्वादिति चेत्— न, श्रूयमाणवाक्यस्यैव धर्मित्वेनोपदेशात्।

न च स्वविषयसाक्षात्कारी[रि]प्रमितिजनकत्वेनार्थान्तरता, इदं वाक्यं नैतद्विषयसाक्षात्कारजनकं वाक्यत्वात् वाक्यान्तरवदिति तन्निषेधात्। एतद्वाक्यमेतद्गोचरसाक्षात्कारज्ञानजनकमेतद्वाक्यत्वादिति व्यतिरेकिणा सत्प्रतिपक्षत्वमिति चेत्—न, एतद्गोचरसाक्षात्कारजनकेन्द्रियादेः सपक्षादप्यस्य व्यावृत्तत्वेनासाधारणत्वात्। एतद्वाक्यमेतद्वाक्यगोचरसाक्षात्कारजनकमेतद्वाक्यश्रोत्रान्यतरत्वात् श्रोत्रवदिति चेत्—न, वाक्यत्वाभावेन सोपाधित्वात्।

न चास्य पक्षेतरता, एतद्गोचरसाक्षात्काराजनकत्वेन विपक्षस्य वाक्यान्तरव्यावर्त्यस्य सत्त्वादिति। यद्वा, अर्थान्तरतानिरासार्थमेतद्वेदवाक्यमेतज्जन्यसाक्षात्कारत्वरहितप्रतीतिजनकमिति साध्यनिर्देशः कर्तव्यः। अथैतद्वेदवाक्यं स्वगोचरसाक्षात्कारव्यतिरिक्तां स्वकारणादिगोचरां प्रमितिं लिङ्गत्वेन जनयत्वित्यर्थान्तरत्वं तदवस्थमिति चेत्—न, इदं वेदवाक्यं कारणजन्यं पौरुषेयं वा वाक्यत्वादित्यादौ वाक्यस्य धर्मित्वात्, तद्गतवाक्य[त्व]स्यैव लिङ्गत्वात्। आकाशमितरेभ्यो भिद्यत एतद्वाक्यत्वात् यत्त्वितरेभ्यो न भिद्यते न तत्त्वेतद्वा[द्वेदवा?]क्यम्, यथा घट इत्यादाविदं वेदवाक्यं लिङ्गत्वेन प्रमितिजनकमिति चेत्-न, एकैकस्मादेव वर्णादाकाशमितरेभ्यो भिद्यते इति प्रमित्युत्पत्तौ क्रमविशेषानवच्छिन्नवर्णसमुदायरूपपदसमुदायस्याकांक्षासन्निधियोग्यतासहितस्य तज्जनकत्वे प्रमाणाभावात्। अन्यथा सर्वेषां व्यर्थविशेषणानामनुमितिजनकत्वापत्तेः धर्मित्वेनैव वेदवाक्यमनुमितिजनकं भविष्यतीति चेत् ? एकैकस्मादेव वर्णधर्मिणोऽनुमित्युपपत्तौ वर्णसमुदायरूपपदसमुदायस्याकांक्षासन्निधियोग्यतासहितस्य धर्मित्वेन तज्जनकत्वे प्रमाणाभावात्। अन्यथा सर्वेषां व्यर्थविशेषणानामनुमितिजनकत्वापत्तेः। धर्मित्वेनैव वेदवाक्यमनुमितिजनकं भविष्यतीति चेत् ? एकैकस्मादेव वर्णादनुमित्युपपत्तौ वर्णसमुदायरूपपदसमुदायस्याकांक्षासन्निधियोग्यतासहितस्य धर्मित्वेन तज्जनकत्वे प्रमाणाभावात्। धर्मिज्ञानादेवानुमित्युपपत्तेः धर्मिणोऽनुमितिजनकत्वात्। एवं सति लिङ्ग-



ज्ञानादेवानुमित्युपपत्तेर्लिङ्गमप्यनुमितिजनकं स्यादिति चेत् न, धूमादग्निं प्रत्येमीति धूमस्यानुमितिं प्रति कारणत्वानुभवात्। पर्वतादग्निं प्रत्येमीति धर्मिलिङ्गमप्यनुमित्यजनकं स्यादिति चेत्—न, धूमादग्निं प्रत्येमीति धूमस्यानुमितिं प्रति कारणत्वानुभवात् पर्वतादग्निं प्रत्येमीति धर्मिणोऽनुमितिजनकत्वानुभवाच्च। लिङ्गस्यानुमितिजनकत्वे चार्थान्तरस्य दूरनिरस्तत्वाच्च। यद्वा, अर्थान्तरनिरासार्थमेतज्जन्यानुमितित्वरहितविशेषणमुपादेयमिति। अन्धो मणिमविन्ददित्यादावीश्वरवाक्यत्वमनैकान्तिकमिति चेत्—न, एवमादीनां लक्षणयान्यत्र प्रमितिजनकत्वाङ्गीकारात्। यथाश्रुते च योग्यताविरहेण वाक्यत्वस्यैवाभावेनानैकान्तिकत्वानुपपत्तेः। एतेन विषापहरणमन्त्र ........ प्रत्युक्तम्।

न चेश्वरेवाक्यत्वं सोपाधिकमाप्तवाक्यत्वाबाधितानुभवजनकत्वादेः साधनव्यापकत्वात्। ईश्वरवाक्यत्वरहितत्वादेश्च विपक्षरूपव्यावृत्ताभावेन पक्षेतरत्वात्।

अग्निर्हिमस्य भेषजम्

इत्यादौ साध्या[ध्य ?]व्यापकत्वभङ्गाच्च।

न चेश्वरवाक्यत्वस्य सत्प्रतिपक्षता इदं वेदवाक्यं न प्रमाणं वेदवाक्यत्वात्। अन्धो मणिमविन्दद् इत्यादेः

अग्निर्हिमस्य भेषजम्

इत्यादावनैकान्तिकत्वात् दृष्टान्तस्य साध्यविकलत्वाच्च। अन्धो मणिमविन्ददित्यादेरपि लक्षणयान्यत्र प्रामाण्याभ्युपगमात्। झडित्यादीनां च दृष्टान्तत्वे साधनविकलत्वात्। अवाचकानामपदत्वेन पदसमुदायरूपवाक्यत्वविरहात् आकांक्षादिमत्पदकदम्बकत्वविरहाच्च। तदुत्पाद्यसंसर्गावगमाभावेन तदुत्पाद्यसंसर्गावगमप्रागभावरूपाकांक्षाभावात् पदप्रतिपादितक्रियाद्यवगमानन्तरं तत्प्रतियोगिकारकादिजिज्ञासारूपाया अप्याकांक्षाया असंभवाच्च पदानामर्थाभावेन पदार्थबुद्धिः। ततो लक्षणसन्निधानासंभवाच्च। अवाचकत्वेन पदत्वानुपपत्तौ पदबुद्धिस्थतालक्षणसन्निधानासंभवाच्च पदानामर्थासंभवादेव पदार्थसंसर्गबाधाभवात् पदार्थसंसर्गबाधस्योन्मूलनात् व्याघातादसिद्धिरिति चेत् ? किमेकस्मिन् प्रयत्ने कार्याकार्यत्वयोर्व्याघातः किं वैकस्मिन् परमेश्वरे कार्याकार्यप्रयत्नयोः ? न प्रथमः, अनङ्गीकारात्। द्वितीयेऽपि किं परस्पराभावाद् व्याघातः, किं वा परस्पराभावाविनाभावनिश्चयात् ? न प्रथमः, अनङ्गीकारादेव। न द्वितीयः, अकार्यप्रयत्नासिद्धौ कार्याकार्यप्रयत्नयोः परस्पराभावाविनाभावानिश्चयात्। सिद्धौ तु तत्साकेनैवेश्वरे कार्यप्रयत्नसिद्धेः। कार्याकार्यप्रयत्नयोः परस्पराभावाविनाभावभङ्गात्। मा भूद्वा धर्मिग्राहकप्रमाणादकार्यप्रयत्नवति परमेश्वरे कार्यप्रयत्नसिद्धिः। कार्यप्रयत्नाभावसिद्धिस्तु परमेश्वरे नास्तीति कथमकार्यप्रयत्नस्य कार्यप्रयत्नाभावाविनाभावनिश्चयः। ईश्वरो न कार्यप्रयत्नवान् ईश्वरघटसंयोगाधिकरणत्वात् घटवदित्यादिना ईश्वरे कार्यप्रयत्नाभावसिद्धिरिति चेत्—न, अनात्मत्वेन सोपाधित्वादिति।

एतेन परमेश्वरे कार्याकार्यज्ञानयोः कार्याकार्येच्छयोरसर्वविषयज्ञानयोश्च विरोधो निरस्त इति। ईश्वरवाक्यत्वं वेदवाक्यानामसिद्धमिति चेत्—न, वेदवाक्यमीश्वरताल्वोष्ठपुटव्यापारवाक्यजन्यवाक्यं वेदवाक्यत्वात् यदीश्वरताल्वोष्ठपुटव्यापारजन्यं वाक्यं (न ?) न तद्वेदवाक्यम्, यथा घट इति सिद्धेः। न चात्राप्रसिद्धविशेषणता। ईश्वरो वाक्यजनकताल्वोष्ठपुटव्यापारवान् पुरुषत्वात् अहमिवेति ईश्वरताल्वोष्ठपुटव्यापारजन्यवाक्यसिद्धेः। ईश्वरो न वाक्यजनकताल्वोष्ठपुटव्यापारवान् ईश्वरघटसंयोगाधिकरणत्वादिति सत्प्रतिपक्षत्वमिति चेत्—न, अनात्मत्वेन सोपाधित्वात्। यद्वा ईश्वरो वेदवाक्यजनकताल्वोष्ठपुटव्यापारवान् ईश्वरत्वात्। यो न वेदवाक्यजनकताल्वोष्ठपुटव्यापारवान् नासावीश्वरो यथा घट इति वेदवाक्यानामीश्वरवाक्यत्वसिद्धिः।

न चात्राप्रसिद्धविशेषणता, वेदवाक्यं ताल्वोष्ठपुटव्यापारजन्यं वाक्यत्वाद् देवदत्तवाक्यवदिति विशेषणप्रसिद्धेः। अथ वेदवाक्यमीश्वरताल्वोष्ठपुटव्यापारजन्यमित्यत्र किं सृष्ट्यादिकालीनं वेदवाक्यं धर्मि, इदानीं श्रूयमाणं वा ? प्रथमे आश्रयासिद्धिः। द्वितीये बाधः। इदानीन्तनवेदवाक्यानामध्येतृताल्वोष्ठपुटव्यापारजन्यानामीश्वरताल्वोष्ठपुटव्यापाराजन्यत्वादिति चेत्—न, इदानीं श्रूयमाणस्य वेदवाक्यस्यैव धर्मित्वेनोपादानात्, न च बाधः, इदानीं श्रूयमाणवेदवाक्येश्वरताल्वोष्ठपुटव्यापारवान्[रा?]जन्यत्वाभावस्य प्रत्यक्षादिना(न ?)वगमात्। श्रूयमाणवेदवाक्यपूर्वक्षण एव परमेश्वरताल्वोष्ठपुटव्यापाराभावोऽधिगन्तव्यः। श्रूयमाणवेदवाक्यपूर्वक्षणश्च सृष्ट्यादिक्षण एव सृष्ट्यादौ परमेश्वरताल्वोष्ठपुटव्यापारादुत्पन्नस्य वेदस्य वाक्यस्य यावत्संहारमेकस्यैवास्माभिरभ्युपगमात्। सृष्ट्यादिक्षणे च वेदवाक्यजनकेश्वरताल्वोष्ठपुटव्यापाराभावः प्रत्यक्षेण किमिदानीन्तनपुरुषैरधिगन्तव्यः, सृष्ट्यादिकालीनैर्वा ? नाद्यः, सृष्ट्यादिक्षणविशिष्टेश्वरताल्वोष्ठपुटव्यापाराभावस्येदानीन्तनैः साक्षात्कर्तुमशक्यत्वात्। न द्वितीयः, सृष्ट्यादिकालीनैर्वेदवाक्यजनकेश्वरताल्वोष्ठपुटव्यापाराभावं साक्षात्क्रियत इत्यत्र मानाभावात्। तैर्वेदवाक्यजनकेश्वरताल्वोष्ठपुटव्यापार एव साक्षात्क्रियत इत्यस्माभिरभ्युपगमाच्च। सृष्ट्यादिक्षणो न वेदवाक्यजनकेश्वरताल्वोष्ठपुटव्यापारवान्क्षणत्वात्, एतत्क्षणवदिति सृष्ट्यादिक्षणे वेदवाक्यजनकपरमेश्वरताल्वोष्ठपुटव्यापाराभावसिद्धिरिति चेत्-न, अप्रसिद्धविशेषणत्वात्। परेषामीश्वर(ा सिद्धौ तत्ताल्वोष्ठपुटव्यापारवत्त्वस्यासिद्धत्वेन तन्निषेधस्याप्यसिद्धेः। ईश्वरताल्वोष्ठपुटव्यापारवत्त्वस्य क्वचित् क्षणे सिद्धौ वा तत्रैव क्षण(त्व)स्यानैकान्तिकत्वादिति। ननु यदि सृष्ट्यादावीश्वरताल्वोष्ठपुटव्यापारादुत्पन्नं वेदवाक्यं यावत्संहारमनुवर्तते तत्किमिति नोपलभ्यत इति चेत्—न, अध्येतृव्यापारानन्तरमुपलम्भात्। तदभावे किमिति नोपलभ्यत इति चेत्—व्यञ्जकाभावादित्यवेहि। एतेन सृष्ट्यादावुत्पन्ना वर्णाः पदानि यावत्संहारमनुवर्तन्ते व्यञ्जकाभावाच्च नोपलभ्यत इति समाधेयम्। वर्णपदवाक्यानामाशुतरविनाशित्वाभ्युपगमविरोध इति चेत्—न, अस्माभिर्वर्णपदवाक्यानामाशुतरविनाशि-



त्वानभ्युपगमात्, विनाशित्वमात्राभ्युपगमात्। उदयनादिभिराशुतरविनाशित्वमङ्गीक्रियत इति चेत्—न, अस्माभिरुदयनादीनां प्रामाणिकत्वानङ्गीकारात्। सूत्रे चाशुतरविनाशित्वाप्रतिपत्तेरिति। क्रमवन्ति च पदानि वाक्यम्, क्रमश्च प्रत्युच्चारणं भिन्न इति कथं सृष्ट्यादावुत्पन्नं वेदवाक्यं यावत्संहारमनुवर्तत इति चेत्—न, सृष्ट्यादावुत्पन्नस्य वेदे पदमात्रस्य यावत्संहारमेकस्यैवानभ्युपगमात्।

ननु न क्रमो द्रव्युगुणकर्मविशेषात्मकः, तेषां द्रव्यमात्रनिष्ठत्वेन पदनिष्ठत्वानुपपत्तेः। नापि सामान्यं नित्यत्वेन सृष्ट्यादाबुत्पत्त्यसंभवात्। नापि समवायः। तत एव नाप्यभावः, निषेधत्वेनानवभासात्। तत्कथं पदेषु वर्णेषु वा क्रम इति चेत्—न, पदवर्णादिक्रमस्य गुणत्वात्। कोऽयं गुणः कस्य वेति चेत्—शब्दो गगनस्येति ब्रूमः। कथमस्य शब्दत्वं, कथं च गगननिष्ठत्वमिति चेत् ? सामान्यवत्त्वे सति श्रोत्रग्राह्यत्वात्। शब्दत्वं शब्दादिवच्च गगननिष्ठमिति ब्रूमः। कथं क्रमस्य सामान्यवत्त्वमिति चेत् ? अयं क्रमोऽयं क्रम इत्याद्यनुगप्रत्ययबलेन क्रमत्वादिसामान्यसिद्धिः। एवं तर्हि न पदवर्णादिनिष्ठ क्रम इति कथं क्रमवन्ति पदानि वाक्यम्, क्रमवन्तो वा वर्णाः पदमिति चेत्—न, गगननिष्ठस्यैव क्रमस्यैकार्थसमवायबलेन गगननिष्ठपदवर्णादिविशेषणत्वात् स्वरव्यञ्जनवत्। यथा मुहुरकारादयः स्वराः ककारादीनां व्यञ्जनानामेकार्थसमवायेन विशेषणम्। यथा वा स्वराणां व्यञ्जनानां चानुस्वारविसर्जनीयावेकार्थसमवायेन विशेषणम्। तथा क्रमोऽपि पदवर्णादीनामिति। सृष्ट्यादावुत्पन्नं वेदवाक्यं यावत्संहारमनुवर्तत इत्यत्र किं प्रमाणमिति चेत्—अनुमानम्, सृष्ट्यादिकालीनम्—

अग्निमीले पुरोहितम्

इति वाक्यान्न भिन्नम्

अग्निमीले पुरोहितम्

इति वाक्यवत्। न च सृष्ट्यादिकालीनम्

अग्निमीले पुरोहितम्

इति वाक्यं संहारपूर्वकालीन—

अग्निमीले पुरोहितम्

इति वाक्याद् भिन्नं सृष्ट्यादिकालीनत्वात् तत्कालीनघटवदिति सत्प्रतिपक्षत्वमिति वाच्यम्।

अग्निमीले पुरोहितम्

इति वाक्यत्वाभावेन सोपाधित्वात्, तस्यापि साधने बाधात्। संहारकालीन—

अग्निमीले पुरोहितम्

इति वाक्यस्य संहारपूर्वकालीन—

अग्निमीले पुरोहितम्

इति वाक्यभिन्नत्वरहितत्वेन विपक्षस्य व्यावर्त्यस्य सत्त्वात्। पक्षेतरत्वानुपपत्तेः। संहारपूर्वकालीन—

अग्निमीले पुरोहितम्

इति वाक्याद् भिन्नत्वे सृष्ट्यादिकालीनत्वाभाव उपाधिरिति चेत्—न, साध्यव्यापकत्वानिश्चयात् । किस्व[किमस्य?]साध्यव्यापकत्वम् । संहारपूर्वकालीन—

अग्निमीले पुरोहितम्

इति वाक्ये निश्चीयते, तदन्यत्र वा ? तत्र,

अग्निमीले पुरोहितम्

इति वाक्यभिन्नत्वानिश्चयेऽपि सृष्ट्यादिकालीनत्वाभावानिश्चयेन तस्य तद्व्यापकत्वानिश्चयात् । साध्यवन्निष्ठात्यन्ताभावाप्रतियोगित्वस्य साध्यव्यापकत्वस्य साध्यवन्निष्ठत्वमनिश्चित्योपाधेर्निश्चेतुमशक्यत्वात् । न द्वितीयः, साध्याभावेनोपाधेस्तद्व्यापकत्वानिश्चयादेव । एवं संहारकालीन—

अग्निमीले पुरोहितम्

इति वाक्यं सृष्ट्यादिकालीन—

अग्निमीले पुरोहितम्

इति वाक्यान्न भिन्नम्—

अग्निमीले पुरोहितम्

इति वाक्यत्वात् । सृष्ट्यादिकालीन—

अग्निमीले पुरोहितम्

इति वाक्यवदिति प्रयोक्तव्यमिति । उपाधिप्रतिरोधौ च पूर्ववन्निराकरणीयौ । एवं वेदवाक्यान्तराणामपि सृष्ट्यादिकालीनानां यावत्संहारमेकत्वमनुमातव्यमिति ।

न च सृष्टिसंहारासिद्धेः तत्कालीनवाक्यासिद्धिरिति प्रकृतानुमानयोराश्रयासिद्धिरप्रसिद्धविशेषणत्वं चेति वाच्यम् । सृष्टिसंहारयोर्व्युत्पादयिष्यमाणत्वात् । अथवा यन्मया गुरुमुखादधीतं

अग्निमीले पुरोहितम्

इति वाक्यं तदिदानीन्तन -

अग्निमीले पुरोहितम्

इति वाक्यान्न भिन्नम् —

अग्निमीले पुरोहितम्

इति वाक्यत्वात्, इदानीन्तन—

अग्निमीले पुरोहितम्

इति वाक्यवत् इति……………

अग्निमीले पुरोहितम्

इति वाक्यस्य यावत्स्थविरकालमनुवृत्तिः साधनीया । एवं तच्छिष्यैरपि तदध्यापित—

अग्निमीले पुरोहितम्



इति वाक्यस्य यावत्स्थविरकालमनुवृत्तिः साधनीया । एवं तच्छिष्यै… वेदवाक्यानां यावत्संहारमेकत्वसिद्धिरिति प्रत्यभिज्ञानाच्च । यदेव मया बाल्ये—

अग्निमीले पुरोहितम्

इति वाक्यं गुरुमुखादधीतम्; तदेव स्थविरकाले बालमध्यापयामीति प्रत्यभिज्ञानस्यानु…… …………एवं तच्छिष्यतच्छिष्यतच्छिष्याणामपि, यदेव मया

अग्निमीले पुरोहितम्

इति वाक्यं बाल्ये गुरुमुखादधीतं तदेव स्थविरकाले शिष्यमध्यापयामीति प्रत्यभिज्ञानबलाद्

अग्निमीले पुरोहिम्

इति वाक्यस्य यावत्संहारमेकत्वसिद्धिरिति । भ्रान्तं प्रत्यभिज्ञानमिति चेत्—न, विरुद्धधर्माध्यासाभावेन प्रत्यभिज्ञानस्य प्रामाण्यनिश्चयात् । अन्यथा स एवायं घट इति प्रत्यभिज्ञानविलयापत्तेः । सैवेयं ज्वालेत्यादिप्रत्यभिज्ञानस्य का गतिरिति चेत्—भ्रान्तत्वमिति ब्रूमः । पूर्वापरज्वालानां ह्रस्वदीर्घत्वादिविरुद्धधर्माध्यासस्य सर्वलोकानुभवसिद्धत्वात् । यत्र ह्रस्वत्वदीर्घत्वादिविरुद्धधर्माध्यासो नास्ति, तत्र सैवेयं ज्वालेति प्रत्यभिज्ञानस्य का गतिरिति चेत् ? प्रमात्वमिति ब्रूमः । अथानेनैव न्यायेन

अग्निमीले पुरोहितम्

इत्यादिवाक्यानां पूर्वपूर्वकालीनत्वसिद्धेरनादित्वसिद्धिः । उत्तरोत्तरकालीनत्वसिद्धेरविनाशित्वसिद्धिरिति दूरनिरस्तम् वेदादीनामीश्वरप्रणीतत्वमिति चेत्—न, संहारकालविच्छेदेन प्रत्यभिज्ञाविरहात् । अतीतसंहारपूर्वकालीनम्

अग्निमीले पुरोहितम्

इति वाक्यमीदानीन्तन—

अग्निमीले पुरोहितम्

इति वाक्यान्न भिन्नम्

अग्निमीले पुरोहितम्

इति वाक्यत्वात् इदानीन्तन—

अग्निमीले पुरोहितम्

इति वाक्यवदित्यादेराश्रयासिद्धत्वादिग्रस्तत्वात् । अतीतसंहारपूर्वकाले

अग्निमीले पुरोहितम्

इत्यादि वेदवाक्यसद्भावे प्रमाणाभावात् । अतीतसंहारपूर्वकालः अग्निमीले पुरोहितम् इत्यादि वेदवाक्यवान् सृष्टिकालत्वात्, एतत्सृष्टिकालवदिति प्रमाणमिति

अग्निमीले पुरोहितमिति

चेत्—न, वाक्यं किञ्चित्सृष्टिकालनिष्ठप्रागभावप्रध्वंसप्रतियोगि वाक्यत्वात्, अन्य वाक्यवदिति सिद्धेः ।

अग्निमीले पुरोहितम्

इति वाक्यप्रागभावप्रध्वंसाभाववति सृष्टिकाले व्यभिचारात्। ननु चातीतसंहारपूर्वकाले

अग्निमीले पुरोहितम्

इति वेदवाक्याभावे कथं धर्मानुष्ठानमिति वाच्यम्। एतद्विलक्षणधर्मादिप्रतिपादकवेदवाक्यादिति ब्रूमः।

प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते

इति आगमाच्चायमर्थोऽध्यवसेयः। अपि च सिध्यतु नामातीतसंहारपूर्वकाले

अग्निमीले पुरोहितम्

इत्यादि वाक्यम्, तस्यानादित्वसिद्धिस्तु कुतः? न हि तदेवानादित्वमनादित्वव्याप्तं वा। तत्कालीनघटादीनामप्यादिमत्त्वात्। वेदवाक्यमादिमत् वाक्यत्वात्; अन्यवाक्यवदित्यादिमत्त्वसिद्धेश्च। एवम्

अग्निमीले पुरोहितम्

इत्यादि वेदवाक्यानामुत्तरोत्तरसृष्ट्यादिकालसम्बन्धसिद्धावपि नाविनाशित्वसिद्धिः। न हि तत्कालमेवाविनाशित्वमविनाशित्वव्याप्तं वा? तत्कालीनस्यापि घटादेर्विनाशित्वात्,

अग्निमीले पुरोहितम्

इति वाक्यं विनाशि, वाक्यत्वादिति विनाशसिद्धेश्च। साधितं चेश्वरप्रणीतत्वम्

अग्निमीले पुरोहितम्

इत्यादि वेदवाक्यानाम्। अपि च वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत् इति वेदवाक्यानां पौरुषेयत्वसिद्धौ स पुरुष ईश्वरः वेदवाक्योत्पादकताल्वोष्ठपुटव्यापारजनकप्रयत्नवत्वात्। न यदेवम्, न तदेवमिति व्यतिरेकिणा वेदप्रणेतृपुरुषस्येश्वरत्वसिद्धे वेदवाक्यानामीश्वर(जन्य)त्वसिद्धरिति पुरुषप्रयत्नजन्यताल्वोष्ठपुटव्यापारजन्यत्वमिह पौरुषेयत्वमिति न साध्यानिरुक्तिः प्रथमानुमाने। नापि शरीरजन्यत्वादिकमुपाधिः साधनव्यापकत्वात्। नापि वेदवाक्यमपौरुषेयमस्मर्यमाणकर्तृकत्वाद् गगनवत् इति सत्प्रतिपक्षत्वं वाक्यत्वाभावेन सोपाधित्वात् तस्यापि साधने बाधात्। न चास्य पक्षेतरता कालिदासादिवाक्याद् विपक्षादपि व्यावृत्तेः। अस्मर्यमाणकर्तृकत्वस्यासिद्धेश्च सृष्टिकालीनपुरुषैर्वेदवाक्यप्रणेत्रनुभवजन्यसंस्कारवद्भिः तत्स्मरणात् आप्तवाक्यजन्यवेदवाक्यप्रणेत्रनुभवजन्यसंस्कारवद्भिरस्मदादिभिरपि स्मरणाच्च। मीमांसकैर्वेदकर्ता न स्मर्यंत इति चेत्—अस्मदादिवाक्यपौरुषेयत्वानुमानजन्यानुभवजन्यसंस्कारवद्भिर्वेदप्रणेतृस्मरणात्। मीमांसकैरस्मरणेऽपि पुरुषान्तरैस्तत्स्मरणात्। (अ ?)स्मर्यमाणकर्तृकत्वासिद्धेः तदवस्थानाच्च। न मीमांसकैरस्मर्यमाणकर्तृक(त्वेन ?) सत्प्रतिपक्षत्वं मीमांसकाननुभूतकर्तृकास्मदादिवाक्येषु व्यभिचारात्। नापि प्रत्यक्षावगतार्थप्रतिपादकत्वाभावेन सत्पतिपक्षत्वम्, असिद्धत्वात्। अनाप्तवाक्येषु व्यभिचाराच्च। वाक्यत्वाभावेन सोपाधित्वाच्चेति वेदवाक्योत्पादकताल्वोष्ठपुटव्यापारजनकप्रयत्न-



वत्त्वमसिद्धमिति चेत्—न, पुरुषनिष्ठप्रयत्नजन्यताल्वोष्ठपुटव्यापारजन्यत्वं साधयता पौरुषेयत्वानुमानेन तत्सिद्धेः। यद् वा, ईश्वरो वेदवाक्योत्पादकताल्वोष्ठपुटव्यापारजनकप्रयत्नाश्रयः ईश्वरत्वात्। न यदेवं न तदेवं यथा घटः इति व्यतिरेकिणा ईश्वरस्य प्रणेतृत्वसिद्धिरिति। यद्वा वेदवाक्यप्रणेता नेश्वराद् भिद्यते एतत्त्वात्, न यदेवं न तदेवं यथा घट इति। न चास्येश्वररूपसपक्षसत्त्वादसाधारणत्वम्। सपक्षे सत्त्वेऽपि ततो व्यावृत्त्यनिश्चयादसाधारणत्वानुपपत्तेः। एवमीश्वरो न वेदवाक्यप्रणेतुर्भिद्यते एतत्त्वादित्यपि प्रयोक्तव्यमिति। यद्वा

अथातो धर्मं व्याख्यास्यामः

इति धर्मपदेन धर्मप्रतिपादको वेदो विवक्षितः। तेन वेदं व्याख्यास्याम इत्यर्थः। विशब्दोऽनेकप्रकारवाची। वेदव्याख्यानत्वं चास्य शास्त्रस्य वैदिकपदप्रतिपाद्यद्रव्यादिपदार्थव्युत्पादकत्वात्। न हि वैदिकपदानां द्रव्यादिव्यतिरिक्तः कश्चिदर्थोऽस्ति। न च द्रव्यादिष्वव्युत्पादितेषु वैदिकपदानां तत्र सङ्गतिग्रहः सम्भवति। न चागृहीतसंगमता[ती ?]नि पदानि पदार्थबुद्धिजननद्वारेण वाक्यार्थमवगमयन्तीति वैदिकपदानां पदार्थविशेषवाक्यार्थविशेषतात्पर्यावधारणजनकत्वाद् वा यस्य शास्त्रस्य वेदव्याख्यानत्वं न ह्यनवगतपदतात्पर्यविशेषः श्रोता पदेभ्यः पदार्थविशेषान् वाक्यार्थविशेषान् वाधिगच्छति। न च प्रत्यक्षादिप्रमाणमन्तरेण तात्पर्यावधारणं सम्भवति। न च प्रत्यक्षानुमानादिकं पदार्थज्ञानमन्तरेण शक्यमधिगन्तुम्। न च पदार्थज्ञानं विना वैशेषिकशास्त्रादिति॥

अथेत्यधीतवेदशिष्यस्य वेदार्थजिज्ञासानन्तर्यमाह। अत इति वेदव्याख्यानस्य वेदार्थप्रतीतिहेतुत्वमाह। ननु धर्मस्य प्रमाणान्तरेणावगतत्वात् न तत्र लिङ्गादीनां संगतिग्रहणम्। नापि फलसाधनादिविशिष्टे धर्मे वेदस्य तात्पर्यावधारणमित्यप्रमाणमेव वेदः स्यादित्याशङ्कां द्वितीयतृतीयसूत्राभ्यां निवारयति—

**यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः॥१।१।२॥**

**तद्वचनादाम्नायप्रामाण्यम्॥१।१।३॥**

इति। अभ्युदयनिःश्रेयससाधनत्वेनानुमिते धर्मे लिङ्गादीनां संगतिग्रहणं वेदस्य तात्पर्यावधारणमिति वेदस्य तत्र प्रमितिजनकत्वमुपपन्नमिति सूत्रद्वयतात्पर्यम्। तद्वचनादिति तस्य धर्मस्य लिङ्गादिभिरवगतसंगतिभिरभिधानात्। वेदेन चावधृततात्पर्येण साधनेतिकर्तव्यताफलविशिष्टधर्मस्य प्रतिपादनाद् धर्मे वेदस्य प्रामाण्यमिति। यद्वा—

**अथातो धर्मं व्याख्यास्यामः [१।१।१]**

इत्यत्र धर्मशब्देनानुमितिसाधनं लिङ्गापरपर्यायः तत्त्वाभिधेयत्वद्रव्यत्वादिलक्षणो धर्मो विवक्षितः। तेन धर्मं व्याख्यास्याम इति लिङ्गापरपर्यायमनुमानं व्याख्यास्याम इत्यर्थः। ननु कथं धर्मशब्देन लिङ्गमुच्यते, धर्मत्वस्य लिङ्गशब्दप्रवृत्तिनिमित्तत्वात्। न ह्याश्रितत्वाभिधेयत्वादिशब्दवाच्यत्वात् धर्मत्वादन्य(त्र)लिङ्गशब्दप्रवृत्तिनिमित्तत्वमस्ति।

लिङ्गलक्षणमेव लिङ्गशब्दप्रवृत्तौ निमित्तं भविष्यतीति चेत्—न, धर्मत्वस्यैव लिङ्गलक्षणत्वात्। ननु न धर्मत्वं लिङ्गलक्षणम्, अपि तु व्याप्तत्वे सति पक्षधर्मत्वमिति चेत्—न, व्यावर्त्यधर्माभावेन व्याप्तत्वपक्षयोर्विशेषणानुपपत्तेः। व्यभिचारिपक्षधर्मत्वरहितधर्मव्युदासार्थं व्याप्तत्वादिविशेषणत्वमिति चेत्—न, शब्दो नित्यः प्रमेयत्वादित्यादौ अनित्यत्वादिव्यभिचारिणोऽपि प्रमेयत्वादेरभिधेयत्वादिसकलकेवलान्वयिधर्मिलिङ्गत्वेन तद्व्यावृत्त्यर्थं व्याप्तत्वविशेषणत्वानुपपत्तेः लिङ्गादपि व्यावृत्तत्वेन लिङ्गलक्षणस्याव्यापकत्वप्रसङ्गात् अनित्यत्वादिव्यभिचारिणोऽप्यभिधेयत्वादिव्याप्तत्वेन व्याप्तविशेषणेन व्यावर्तयितुमशक्यत्वात्। व्यर्थविशेषणस्य दुर्वारत्वाच्चेति। एवं शब्दो नित्यो घटत्वादित्यादौ घटत्वादेर[पर]पक्षधर्मस्याप्ययं घटो नित्यो घटत्वात् संप्रतिपन्नवदित्यादौ लिङ्गत्वेन तद्व्यावृत्त्यर्थं पक्षविशेषणमुपादेयम्। लिङ्गलक्षणस्य व्यापकत्वापत्तेः। घटत्वादेः शब्दपक्षधर्मरहितस्यापि पक्षत्वोपात्तघटधर्मत्वेन पक्षधर्मविशेषणेन व्यावर्तयितुमशक्यत्वात। व्यर्थविशेषणत्वस्य तदवस्थत्वाच्च। न हि विशेषणपदेत्वतद्व्यावर्त्यमिति। एतेन पक्षधर्मत्वसपक्षसत्त्वविपक्ष[ा]व्यावृत्तत्वासत्प्रतिपक्षत्वाबाधितविषयत्वोपपन्नं लिङ्गमिति लिङ्गलक्षणं निरस्तम्। धर्मत्वस्य सकललिङ्गव्यापकत्वादलिङ्गव्यावृत्तत्वाच्च तदतिरिक्तविशेषणानां व्यर्थत्वात् केवलान्वयिकेवलव्यतिरेकिलिङ्गाव्यापकत्वाच्च विपक्षव्यावृत्तत्वेऽस्य[त्वस्य] केवलान्वयिन्यभावात् सपक्षसत्त्वस्य केवलव्यतिरेकिन्यविद्यमानत्वाच्च। एवं पक्षधर्मत्वासत्प्रतिपक्षत्वाबाधितविषयत्वोपपन्नं लिङ्गमित्येतावदेव लिङ्गलक्षणमस्त्विति चेन्न–अनैकान्तिकासाधारणत्वयोरपि गतत्वेनातिव्यापकत्वात्। पक्षधर्मत्वं सपक्षसत्त्वविपक्षासत्त्वोपपन्नं लिङ्गमित्यपि लिङ्गलक्षणं निराकरणीयमिति। अथैकैकघटादिनिष्ठधर्माणामन्वयाभावेन लिङ्गत्वरहितानां लिङ्गत्वस्थितौ तत्रापि गतत्वेनातिव्यापकत्वात् न धर्मत्वं लिङ्गलक्षणमिति चेत्—न, तेषामन्वयाभावेऽपि व्यतिरेकबलेनानुमितिसाधनानां लिङ्गत्वादेवातिव्याप्तिनिरासात्। तस्मात् धर्मत्वमेव लिङ्गलक्षणम्। तथा च धर्मो लिङ्गशब्दवाच्यः धर्मत्वात्। यो न लिङ्गशब्दवाच्यः, नासौ धर्मः। यथा गगनम्। धर्मश्चायम्। तस्माल्लिङ्गशब्दवाच्य इति। न चात्राप्रसिद्धविशेषणत्वम्। लिङ्गपदं कस्यचिद् वाचकम्, पदत्वात् गोपदवदिति विशेषणप्रसिद्धेः। लिङ्गशब्दवाच्यस्योभयवादिसंप्रतिपन्नत्वाच्चेति। लिङ्गाभासलक्षणं तु नास्त्येव। धर्मविरुद्धत्वरहितस्यापि गगनादेरपक्षधर्मत्वेन लिङ्गाभासत्वात्। लिङ्गाभासशब्दप्रवृत्तिनिमित्तं तु प्रमेयत्वादिकम्। एवं पक्षतदाभासादिकेष्वपि। अथास्तु धर्मत्वं लिङ्गसामान्यलक्षणम्, वह्न्यादिलिङ्गलक्षणं तु किमिति चेत्—वह्न्यादिव्याप्यत्वविशेषितं धर्मत्वमेव। तथापि वह्निव्याप्यत्वे सति धर्मत्वं वह्निलिङ्गलक्षणम्। अनित्यत्वव्याप्यत्वे सति धर्मत्वमनित्यलिङ्गलक्षणम्। सकर्तृकव्याप्यत्वे सति धर्मत्वं सकर्तृकत्वलिङ्गलक्षणमित्यादि। वह्निव्याप्यत्वमेव लिङ्गलक्षणमस्तु व्यर्थं धर्मग्रहणमिति चेत्—न, वह्निलिङ्गत्वरहितगगनादिनिवृत्त्यर्थत्वात्। व्याप्यत्व[ा]ग्रहणेनैव गगनादयो निवर्तन्त इति चेत्—न, वह्न्यत्यन्ताभाववद्वृत्तित्व-



रहितत्वस्य वह्निव्याप्य[त्व]स्य गगनादावपि विद्यमानत्वेन तद्व्यावर्तकत्वानुपपत्तेः। वह्न्यत्यन्तभाववद्वृत्तित्वरहितत्वे सति धर्मत्वमेव वह्निव्याप्यत्वम्। तच्च गगनादौ नास्तीति व्याप्यत्वग्रहणादेव गगनादयो व्यावर्तन्त इति चेत्—न, एवं सति वह्निव्याप्यत्वशब्दार्थे धर्मत्वमन्तर्भावयता धर्मत्वविशेषणस्य त्वयाप्यङ्गीकृतत्वादेव। अथ वह्निव्याप्यत्वे गगनादयोऽपि कथं न वह्निलिङ्गमिति चेत् वह्न्यनुमित्यजनकत्वेन तेषु वह्निलिङ्गत्वव्यवहाराभावादिति ब्रूमः। तस्माद्वह्निव्याप्यत्वे सति धर्मत्वमेव वह्निलिङ्गलक्षणम्। अनित्यत्वादिव्याप्यत्वे सति धर्मत्वमेवानित्यत्वादिलिङ्गविशेषलक्षणमिति सूत्रे केन शब्देन संगृहीतमिति चेत्—विशेषवाचिना विशब्देनैव विशेषत आख्यास्याम इति विवक्षितत्वात्। अथ केवलान्वयिकेवलव्यतिरेक्यन्वव्यतिरेकिलिङ्गलक्षणं किमिति चेत्—न, केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिणां परस्परव्यावृत्तलक्षणत्रयस्य निर्वक्तुमशक्यत्वात्। अथ केवलान्वयिव्याप्यत्वे सति धर्मत्वं केवलान्वयिलिङ्गलक्षणम्, केवलव्यतिरेकिव्याप्यत्वे सति धर्मत्वमेव केवलव्यतिरेकिलिङ्गलक्षणम् अन्वयव्यतिरेकिव्याप्यत्वे सति धर्मत्वमन्वयव्यतिरेकिलिङ्गलक्षणम्। केवलान्वयिनो लिङ्गं केवलान्वयिलिङ्गमिति विवक्षितत्वात्। केवलान्वयित्वस्य साध्यनिष्ठत्वात्। अत्यन्ताभावाप्रतियोगित्वं हि केवलान्वयित्वम्। तच्च प्रत्यक्षत्वादिसाध्यनिष्ठमेव। न तु साधननिष्ठम्। परमाणवः प्रत्यक्षाः, द्रव्यत्वादित्यादौ केवलान्वयित्वस्य विरहात्। द्रव्यत्वादेर्गुणादिनिष्ठात्यन्ताभावप्रतियोगिनोऽत्यन्ताभावप्रतियोगित्वरहितत्वस्य केवलान्वयित्वस्याभावात्। तस्मात् साध्यनिष्ठमेव केवलान्वयित्वम्, न तु साधननिष्ठमिति मन्यसे तन्न, उक्तप्रकारेण केवलव्यतिरेक्यन्वयव्यतिरेकिव्यावृत्तकेवलान्वयिलिङ्गलक्षणसंभवेऽपि केवलव्यतिरेक्यन्वयव्यतिरेकिणोः परस्परव्यावृत्तलक्षणद्वयस्यासंभवात्। केवलव्यतिरेकिव्याप्यत्वे सति धर्मत्वमेव केवलव्यतिरेकिलिङ्गलक्षणमुक्तमिति चेत्—न, केवलव्यतिरेकित्वस्य निर्वक्तुमशक्यत्वात्। अत्यन्ताभावप्रतियोगित्वं केवलव्यतिरेकित्वमिति चेत्—न, तस्यान्वयव्यतिरेकिगतत्वेनातिव्यापकत्वात्। अन्वयरहितत्वे सति अत्यन्ताभावप्रतियोगित्वं केवलव्यतिरेकित्वमिति चेत्—न, अन्वयशब्देन किं क्वचित् सत्त्वं विवक्षितम्, हेतुमति सत्त्वं वा, किञ्चिन्निष्ठत्वेनावगतत्वं वा, हेतुमन्निष्ठत्वेनावगतत्वं वा, अनुमानप्रवृत्तेः पूर्वं किञ्चिन्निष्ठत्वेनावगतत्वं वा, अनुमानप्रवृत्तेः पूर्वं साधनवन्निष्ठत्वेनावगतत्वं वा, एकमात्रानिष्ठत्वं वा ? नाद्यः, केवलव्यतिरेकिसाध्यस्य पक्षनिष्ठत्वेनान्वयरहितत्वानुपपत्तेः। नापि द्वितीयः, पक्षस्य हेतुमत्त्वात्। अन्यथा हेतोरसिद्धत्वापत्तेः। नापि तृतीयः, श्रोत्रं शब्दाश्रयः श्रोत्रत्वात्। न यदेवम्, न तदेवम्। यथा शब्द इत्यादेः केवलव्यतिरेकिसाध्यस्य शब्दः क्वचिदाश्रितो गुणत्वात् रूप[त्व]वदित्यादिना किञ्चिन्निष्ठत्वावगमात् केवलव्यतिरेकिसाध्यस्य प्रकृतानुमानादेव किञ्चिन्निष्ठत्वावगमाच्च। नापि चतुर्थः, हेतुमति पक्षाभावसाध्यस्य हेतुनावगतत्वात्। नापि पञ्चमः, एतदनुमानोत्तरकालप्रवृत्तानुमितेः पूर्वं केवलव्यतिरेकिसाध्यस्य प्रकृतहेतुना पक्षनिष्ठ-

त्वानवगमात् । नापि षष्ठः, एतदनुमानोत्तरकाले प्रवृत्तानुमितेः पूर्वं केवलव्यतिरेकिसाध्यस्य प्रकृतहेतुना साधनवत् पक्षनिष्ठत्वावगमात् । प्रकृतानुमितेः पूर्वं साधनवन्निष्ठत्वेनानवगतत्वमन्वयः । तदभावश्चान्वयरहितत्वमिति चेत्—न, एतदनुमानोत्तरकालप्रवृत्तानुमितीनामपि कदाचित् प्रकृतत्वेन पूर्वोक्तादवस्थ्यात् । केवलव्यतिरेक्यनुमितेः पूर्वं साधनवन्निष्ठत्वेनानवगतत्वमन्वयविरहीति चेत्—न, एतदनुमानोत्तरकालप्रवृत्तकेवलव्यतिरेक्यन्तरजन्यानुमितेः पूर्वं प्रकृतव्यतिरेकिणा प्रकृतव्यतिरेकिसाध्यस्य साधनवत् पक्षनिष्ठत्वावगमात् । प्रकृतव्यतिरेक्यनुमितेः पूर्वं साध्यस्य साधनवन्निष्ठत्वेनानवगतत्वमन्वयविरहितत्वमिति चेत्—न, एतदुत्तरकालप्रवृत्तकेवलव्यतिरेक्यजन्यानुमितेरपि कदाचित् प्रवृत्तत्वादेव । एतत्केवलव्यतिरेक्यजन्यानुमितेः पूर्वं साधनवन्निष्ठत्वेनावगतत्वमन्वयरहितत्वमिति चेत्—न, एतद्व्यतिरेकजन्यानुमितेः पूर्वमप्येतद्व्यतिरेकिजन्यानुमित्यन्तरेण प्रकृतव्यतिरेकिसाध्यस्य साधनवत्पक्षनिष्ठत्वावगमात् । एतद्व्यतिरेकिजन्यानुमितित्वाहितप्रमितिविषयीकृतसाधनवन्निष्ठत्वान्वयाभावेऽन्वयरहितत्वमिति चेत् न, एतद्व्यतिरेकजन्यानुभवपूर्वकैतद्व्यतिरेकिजन्यानुमितित्वरहितस्मरणज्ञानेन व्यतिरेकिसाध्यस्य साधनवन्निष्ठत्वाग्रहणादन्वयविरहानुपपत्तेः । एतद्व्यतिरेकजन्यानुमितित्वरहितज्ञानविषयीकृतसाधनवन्निष्ठत्वाभावेऽन्वयरहितत्वमिति चेत्--न, एतद्व्यतिरेकिजन्यानुमितिरहितत्वयोगिपरमेश्वरनिष्ठज्ञानेन प्रकृतिव्यतिरेकिसाध्यस्य प्रकृतसाधनवन्निष्ठविषयीकरणादन्वयसंभवेन (?) चेत् -न, एतद्व्यतिरेकिजन्यानुभवपूर्वकैतद्व्यतिरेकिजन्यानुमितित्वरहितस्मरणज्ञानेन व्यतिरेकिसाध्यस्य साधनवन्निष्ठत्वाग्रहणादन्वयविरहानुपपत्तेः । एतद्व्यतिरेकिजन्यानुमितित्वरहितप्रमितिविषयीकृतसाधनवन्निष्ठत्वाभावे अन्वयरहितत्वमिति चेत्—न, एतद्व्यतिरेकिजन्यानुमितिरहितत्वयोगिपरमेश्वरनिष्ठज्ञानेन प्रकृतिव्यतिरेकिसाध्यस्य प्रकृतसाधनवन्निष्ठत्वविषयीकरणादन्वयसंभवेन तद्विरहानुपपत्तौ लक्षणस्यासंभवात् । अस्य लक्षणस्य व्यतिरेकिसाध्यान्तराव्यापकत्वाच्च । तेषामेतद्व्यतिरेकिजन्यानुमितित्वरहितव्यतिरेकिजन्यानुमितिविषयीकृतं तत्साधनवन्निष्ठत्वानामन्वयसंभवेन तद्विरहानुपपत्तेः । एतद्व्यतिरेकिजन्यानुमितित्वरहितज्ञानविषयीकृतमेतत्साध्यगतमेतत्साधनवन्निष्ठत्वमन्वयः । तद्विरहाच्च[हश्च]व्यतिरेकिसाध्यान्तरेऽप्यस्तीति नाव्यापकं केवलव्यतिरेकिलक्षणमिति चेत्—न, एवं सत्यन्वयव्यतिरेकिकेवलान्वयिनोरपि गतत्वेनास्य लक्षणस्यातिव्यापकत्वात् । न ह्येतद्व्यतिरेकप्रमितित्वरहितज्ञानविषयीकृतमेतत्साध्यगतमेतत्साधनवन्निष्ठत्वमन्वयस्तत्र संभवति । अथैतद्व्यतिरेकिजन्यत्वं प्रमितित्वरहितज्ञानविषयीकृतमेतन्निष्ठसाध्यगतमेतत्साधनवन्निष्ठत्वमन्वयः । तद्विरहश्चैतत्साध्यगतो व्यतिरेक इति व्यतिरेकिविशेषणमिति चेत्—न, व्यतिरेकिसामान्यलक्षणावसरे तद्विशेषलक्षणस्याप्रस्तुतत्वात् । किं च यद्येतत्साध्यगतमेतत्साधनवन्निष्ठं प्रमितम्, तर्हि अन्वय्येवेदं साध्यं न व्यतिरेकि । अथाप्रमितम्, तर्हि तद्विरहस्य व्यतिरेकस्य प्रत्येतुमशक्यत्वाद् व्यतिरेकित्वानुपपत्तेः ।



नापीदं द्व्यणुकमेतद्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यं कार्यत्वादित्यादेरनेकाश्रितस्य व्यतिरेकिसाध्यस्यासंभवात् । तस्मादन्वयव्यतिरेकिसाध्यव्यावृत्तस्य केवलव्यतिरेकिसाध्यस्य निरूपयितुमशक्यत्वात् विविधमेव साध्यमन्वयव्यतिरेकि च । अत्यन्ताभावाप्रतियोग्यन्वयी । अत्यन्ताभाव[ा]प्रतियोगी व्यतिरेकी । अन्वयव्याप्यत्वे सति धर्मत्वमन्वयिलिङ्गलक्षणम् । व्यतिरेकव्याप्यत्वे सति धर्मत्वं व्यतिरेकिलिङ्गलक्षणम् । साध्यगतयोरेवान्वयिव्यतिरेकत्वयोः साधनगतत्वेनोपचारादिति सिद्धमन्वयव्यतिरेकि चेति द्विविधमेव लिङ्गमिति । अन्वयव्यतिरेकी केवलान्वयी केवलव्यतिरेकी चेति त्रिविधो हेतुरिति सिद्धान्तविरोध इति चेत्—न, सूत्रकारेण त्रैविध्यानभिधानात् । अन्येषां न्यायविरुद्धानामस्माभिरनङ्गीकारात् । पक्षधर्मत्वसपक्षसत्त्वविपक्षव्यावृत्तत्वाबाधितविषयत्वासत्प्रतिपक्षत्ववानन्वयव्यतिरेकि - गतत्वेना(?)पक्षधर्मत्वसपक्षसत्त्वाबाधितविषयत्वासत्प्रतिपक्षत्ववान् केवलान्वयी । पक्षधर्मत्वविपक्षव्यावृत्तत्वाबाधितविषयत्वासत्प्रतिपक्षत्ववान् केवलव्यतिरेकीति परस्परव्यावृत्तलक्षणत्रयसंभवात् त्रिविध एव हेतुरिति चेत्—न, केवलान्वयिकेवलव्यतिरेकिलक्षणयोरन्वयव्यतिरेकिगतत्वेनातिव्यापकत्वात् । केवलान्वयिलक्षणे अविद्यमानविपक्षत्वम्, केवलव्यतिरेकिलक्षणे चाविद्यमानसपक्षत्वं विशेषणमुपादेयमिति चेत्—न, केवलान्वयिलक्षणेऽविद्यमानविपक्षत्वविशेषणमुपाददता विपक्षपदेन किं यत्किञ्चित्साध्याभाववान् विवक्षितः किं वा प्रकृतसाध्याभाववान् ? न प्रथमः, गगनमभिधेयं प्रमेयत्वादित्यादौ गगनसामान्ययोः पक्षसपक्षयोरपि यत्किञ्चिन्नित्यत्वादिसाध्याभाववत्त्वेन विपक्षत्वादविद्यमानविपक्षत्वासंभवात् । न द्वितीयः, केवलान्वयिसाध्याभावाप्रतिपत्तौ तद्वतोऽपि पक्षस्याप्रतीतेः तदभावस्यावगन्तुमशक्यत्वेनाविद्यमानविषय[पक्ष]त्वानिश्चयात्, केवलान्वयिसाध्याभाववतश्च प्रतीतावविद्यमानविपक्षत्वासंभवात् । एवं केवलव्यतिरेकिलक्षणेऽप्यविद्यमानसपक्षत्वं विशेषणमुपाददता सपक्षपदेन यत्किञ्चित्साध्यवान् विवक्षितः, किं वा प्रकृतसाध्यवान्, किं वा पक्षातिरिक्तप्रकृतसाध्यवान् ? न प्रथमः, द्व्यणुकं द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यमित्यादौ द्व्यणुकगगनयोः पक्षविपक्षयोरपि यत्किञ्चिद्द्रव्यत्वादिसाध्यवत्त्वेन सपक्षत्वादविद्यमानसपक्षत्वासंभवात् । न द्वितीयः, पक्षस्यापि प्रकृतसाध्यवत्त्वेन सपक्षत्वादविद्यमानसपक्षत्वासंभवात् व्यतिरेकिप्रवृत्तेः पूर्वं सपक्षत्वानिश्चयेऽपि तस्य सपक्षत्वानपायात् व्यतिरेकिणा साध्यवत्त्वनिश्चयात् । अन्यथा साध्यसाधकप्रमाणप्रवृत्तेः पूर्वं सपक्षत्वानिश्चयात् सर्वसपक्षाणामसत्पक्षत्वप्रसङ्गात् । न तृतीयः, पक्षातिरिक्तस्य प्रकृतसाध्यवतः प्रमितौ तदभावस्यासंभवात् । अप्रमितौ तदभावस्यानिश्चयादिति । अथ साध्यनिरूप्या साधननिष्ठा व्याप्तिरन्वयः, साधनाभावनिरूप्या साध्याभावनिष्ठा व्याप्तिर्व्यतिरेकः, तदुभयव्याप्तिमानन्वयव्यतिरेकी, केवलान्वयव्याप्तिमान् केवलान्वयी । केवलव्यतिरेकव्याप्तिमान् केवलव्यतिरेकी[ति]परस्परव्यावृत्तं लक्षणत्रयमिति मन्यसे—तदपि न, अन्वयव्यतिरेकव्याप्तिमत्त्वस्य केवलव्यतिरेकिण्यपि गतत्वेनातिव्यापक-

त्वात् । केवलव्यतिरेकिणः साध्येन पक्ष एवान्वयव्याप्तिसंभवात् व्यभिचाररहितस्योपाधिरहितस्य वा साहित्यस्य वा व्याप्तिशब्दार्थत्वात् । योऽन्वयव्यतिरेकव्याप्तिमत्तया-निश्चितोऽनुमितिं जनयति, सोऽन्वयव्यतिरेकीति लक्षणम् । केवलव्यतिरेकी पुनरन्वयव्याप्तिमान् (?) नान्वयव्याप्तिमत्तया निश्चितोऽनुमितिं जनयति व्यतिरेकिजन्यानुमितेः पूर्वं पक्षे साध्येन सह तस्यान्वयनिश्चयासंभवादिति न लक्षणस्यातिव्यापकतेति चेत्–न, व्यतिरेकिण्यप्यन्वयव्याप्तिनिश्चयस्याभ्युपगन्तव्यत्वात् । अन्यथा व्याप्यत्वासिद्धेर्दुष्परिहरत्वात् । साध्याभावस्य साधनाभावेन व्याप्तिनिश्चयान्न व्याप्यत्वासिद्धिरिति चेत्—न, साध्याभावस्य साधनाभावेन व्याप्तिनिश्चयेऽपि साध्येन सह साधनस्य व्याप्तिनिश्चयाभावेन हेतोर्व्याप्यत्वासिद्धेर्वज्रलेपायमानत्वात् । साध्यसाधकस्य व्यतिरेकिणो बाधाया दुर्वारत्वात् साधनाभावव्याप्तसाध्याभावस्य पक्षधर्मत्वनिश्चये विपक्षे साधनाभावानुमितिः स्यादिति व्यतिरेकिणोऽपक्षधर्मत्वापत्तेश्चेति । साध्याभावस्य साधनाभावव्याप्यत्वनिश्चयः साधनस्य च पक्षधर्मत्वनिश्चयो व्यतिरेक्यनुमित्यङ्गमिति चेत्—न, समानाधिकरणयोरेव व्याप्तिपक्षधर्मत्वयोश्चान्वयव्यतिरेक्यनुमितिजनकत्वनिर्णयात्, अन्यथातिप्रसङ्गात् । तदुक्तं **शिवादित्यमिश्रैः—**

हेतुर्व्याप्तिसहायो हि साध्यसाधनमिष्यते ।
स्वनिष्ठा साभ्युपेतव्या प्रकृते दुर्लभं त्विदम् ॥
अन्यस्मिन् ज्ञातसंबन्धे कथमन्यस्य लिङ्गता ।
अलिङ्गजं च विज्ञानमनुमानमलौकिकम् ॥ इति ।

व्यतिरेकव्याप्तिनिश्चयस्य चानुमितिजनकत्वे केवलान्वयिनोऽनुमित्यनुदयप्रसङ्गात् । केवलान्वयिन्यन्वयव्याप्तिनिश्चयोऽनुमितिहेतुः । केवलव्यतिरेकिणि तु व्यतिरेकव्याप्तिनिश्चयोऽनुमितिजनक इति चेत्—न, अन्वयव्याप्तिनिश्चयाभावे व्यतिरेकिणि व्यतिरेकव्याप्तिनिश्चयाभावे वा अन्वयिनि जायमानाया अनुमितेस्तज्जन्यत्वानुपपत्तेः । अनुमित्यवान्तरपरस्परसहानवस्थितजातिद्वयोपगृहीते अन्वयव्याप्तिनिश्चयव्यतिरेकव्याप्तिनिश्चययोः कारणत्वमिति चेत्—न, अनुमितित्वावान्तरपरस्परसहानवस्थितजातिद्वये मानाभावात् । न तावदत्र प्रत्यक्षं मानम्, अननुभवात् । परस्परसहानवस्थितान्वयव्यतिरेकव्याप्तिनिश्चयकारणत्वावधारणवता अनुभूयत इति चेत्—न, परस्परसहानवस्थितजातिद्वयानुभवात् पूर्वं तदुपग्रहेणान्वयव्यतिरेकनिश्चययोः कारणत्वावधारणम् । अन्वयव्यतिरेकनिश्चयोः कारणत्वावधारणे सति जातिद्वयावधारणमिति नास्यानुमानम्, लिङ्गाभावात् । परस्परव्यावृत्तमन्वयव्यतिरेकव्याप्तिनिश्चयकारणत्वं जातिद्वये लिङ्गमिति चेत्—न, जातिद्वयनिश्चयात् पूर्वं तस्यावगन्तुमशक्यत्वात् । अनवगतस्य च लिङ्गस्यानुमित्यजनकत्वात् । एतेनान्वयव्यतिरेककारणानुपपत्त्या जातिद्वयं कल्प्यत इत्यपि निरस्तम् । अनुपपद्यमानस्यापि निश्चितस्यैव कल्पकत्वादिति केवलव्यतिरेकिण्यप्यन्वयनिश्चयादेवानुमित्युपपत्तेः । जातिद्वयकल्पनात्पूर्वं क्वचिदन्वयनिश्चयोऽनुमित्यङ्गं क्वचिद् व्यतिरेकनिश्चयोऽनुमित्यङ्गमित्यादिकल्पनाया निर्बी-



जत्वाच्च । पक्षे साध्यनिश्चयात् पूर्वं व्यतिरेकिणि कथमन्वय इति चेत्—व्यतिरेकनिश्चयादेव । तथा हि—कार्यत्वमेतद्द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वव्याप्यम्, एतद्द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वात्यन्ताभावव्यापकात्यन्ताभावप्रतियोगित्वात् । एतद्द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्ववदिति व्याप्यव्यापकभावस्य भेदाधिष्ठानत्वात् तस्यैव तद्व्याप्यत्वानुपपत्तेः साध्यविकलो दृष्टान्त इति चेत् – न, एतद्व्याप्यत्वं तदत्यन्ताभाववद्वृत्तित्वाभावो वा स्यात्, तद्व्यापकात्यन्ताभावप्र[वद्]वृत्तित्वाभावो वा स्यात् । तदुभयमप्यभेदे दुर्वारमेव । न हि तदेव तदत्यन्ताभाववति वर्तत इति संभवति । स्वप्रतियोगिसमानाधिकरणत्वरहिताभावत्वस्यात्यन्ताभावलक्षणत्वात् । नापि तदेव तद्व्यपकात्यन्ताभाववति वर्तत इति संभवति । तदत्यन्ताभाववति वर्तमानत्वे तस्य तद्व्यापकत्वभङ्गात् । तद्वन्निष्ठात्यन्ताभाव[ा]प्रतियोगित्वस्य व्यापकत्वलक्षणत्वादिति । एतद्द्व्यणुकगुणोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वव्याप्यत्वे एतद्द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वमुपाधिरिति चेत् – न, एतद्द्व्यणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वमेतद्द्वयणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वव्याप्यान्यत् मेयत्वात् घटवदिति सिद्धे अन्यव्याप्य उपाधेः साध्यव्यापकत्वभङ्गात् द्व्यणुकोपादानगोचरप्रजत्नन्यैकैकनिष्ठेषु तदत्यन्ताभावादिषु साध्यव्यापकत्वभङ्गादिति । एतद्द्वणुकोपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वविशेषणाप्रसिद्धौ तद्व्याप्यत्वस्याप्यप्रसिद्धेरप्रसिद्धविशेषणत्वे व्याप्यत्वासाधको हेतुरिति चेत्—एतद्द्व्यणुकोपादानं किञ्चिज्जनकप्रयत्नवत्साक्षात्कारगोचरो मेयत्वाद् घटवदिति व्यतिरेकिसाध्यप्रसिद्धौ तद्व्याप्यत्वप्रसिद्धेस्तु सुकरत्वादिति । एतेन व्यतिरेकिसाध्याप्रसिद्धौ तदभावस्य साधनाभावेन व्यतिरेकव्याप्तिनिश्चयो दुर्घटः । साध्यप्रसिद्धौ च साध्यसन्देहानुपपत्तेः पक्षत्वासंभवादपक्षधर्मत्वं केवलव्यतिरेकिण इति निरस्तम् । एतदुपादानगोचरसाक्षात्कारवत्प्रयत्नजन्यत्वाभावस्य कार्यत्वाभावेन व्याप्तिः केन प्रमाणेन गृह्यत इति चेत्—संबन्धिनोः प्रत्यक्षत्वे प्रत्यक्षेणैवानुमेयत्वे अनुमानेनैवेति । वक्ष्यामश्च व्यतिरेकग्रहणोपायं पुरस्तादिति सर्वं सुस्थम् ।

अयं च द्विविधो हेतुः अनेकप्रकारवाचिना व्याख्यास्याम इति विशब्देनैव संगृहीतः । अथ द्विविधं लिङ्गं सामान्यतो दृष्टं, विशेषतो दृष्टं च । सामान्यत इति सामान्यव्याप्यतया दृष्टं सामान्यतो दृष्टम् । विशेषत इति विशेषव्याप्ततया दृष्टं विशेषदृष्टमिति निर्वचनादिति । सामान्यशब्देन साधारणो धर्मो विवक्षितः, न तु जातिरेव जातित्वरहिता । नित्यत्वसकर्तृकत्वादिलिङ्गस्य कार्यत्वादेव सामान्यतोदृष्टत्वाभावप्रसङ्गात् । विशेषत इति चासाधारणधर्माधारो विवक्षितः । न तु जात्याधार एव । नाप्यन्यविशेषः जातित्वान्त्यविशेषत्वरहितध्वंसविशेषानुमानादेर्विशेषतो दृष्टत्वाभावप्रसङ्गात् । एतत्सामान्यतोदृष्टविशेषतोदृष्टलिङ्गलक्षणद्वयं सूत्रे केन संगृहीतमिति चेत्—विविधप्रकारवाचिना सूत्रगतविशब्देनैवेति सन्तोष्टव्यम् ।

आख्यास्याम इत्यभिविधौ, न तु मर्यादायाम्। तेन सर्वमपि लिङ्गलक्षणं धर्मं व्याख्यास्याम इति सूत्रार्थ इति।

अथेत्यधीतवेदस्य वेदप्रामाण्यसाधके परमेश्वरसंसारिपुरुषपरमाणुदिक्काला-काशधर्माधर्मादिवैदिकपदार्थसाधकलिङ्गजिज्ञासानन्तर्यमाह। **अत** इति। लिङ्गव्या-ख्यानस्य लिङ्गप्रतीतिहेतुत्वमाहेति।

ननु लिङ्गापरपर्यायधर्माधर्मप्रतिपत्तिः स्वर्गापवर्गसाधनमिति व्यर्थं धर्मव्या-ख्यानमित्याशङ्कापरिहारार्थं द्वितीयं सूत्रम्—

### यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः [१.१.२]

इति। अत्र च **सिद्धि**शब्देनानुमितिर्विवक्षिता। **अभ्युदय**शब्देन चाभ्युदेत्यस्मात् कार्य-मिति व्युत्पत्त्या कारणं वेदप्रामाण्यं परमेश्वरसंसारिपुरुषादिविवक्षितम्। **निःश्रेयस-शब्देन** मुक्तिर्विवक्षिता। तेनाभ्युदयनिःश्रेयसयोः (सिद्धिः) यस्माद्धर्मात् लिङ्गादुत्पद्यते स धर्मो व्याख्येय इत्यर्थः। न हि लिङ्गव्याख्यानमन्तरेण लिङ्गप्रतिपत्तिः। न चाप्रतिपन्नात् लिङ्गात् वेदप्रामाण्यपरमेश्वरसिद्धिः। न च वेदप्रामाण्यासिद्धौ पारलौकिककर्मानुष्ठा-नम्। न च परमेश्वरासिद्धौ परमेश्वरोक्तत्वेन वेदप्रामाण्यसिद्धिः। न च संसारिपुरुषा-सिद्धौ निःश्रेयससाधनसंसारपुरुषसाक्षात्कारः, तस्य संसारिपुरुषानुमितिरूपमानसा-ध्यत्वात्। न च परमाण्वाकाशकालदिगाद्यसिद्धौ तद्विविक्तात्मानुमानेनापरपर्यायं (?) सिध्यति। तस्मात् स्वर्गापवर्गानुकूलसकलानुमितिसाधनं धर्मव्याख्यानं कर्तव्यमिति **सिद्धम्**॥

ननु कस्माद् धर्माद् वेदप्रामाण्यसिद्धिरित्याशङ्कापरिहारार्थं तृतीयं सूत्रम्—

### तद्वचनादाम्नायप्रामाण्यम् [१.१.३]

इति। तदिति परमेश्वरादिजिज्ञासानन्तर्यमभिदधता शब्देन प्रतिपादितः परमेश्वरः प्रतिपाद्यते। वचनादिति च भावप्रधानो निर्देशः। तेन तद्वचनत्वात् परमेश्वरवचन-त्वात् वेदप्रामाण्यमिति वदता सूत्रकारेण परमेश्वरवचनत्वमेव वेदप्रामाण्यसाधको धर्म इति दर्शितम्।

यद् वा परमेश्वरसंसारिपुरुषधर्माधर्मादिगोचरानुमितेः निष्प्रयोजनत्वात् व्यर्थं तत्साधनधर्मव्याख्यानमित्याशङ्कापरिहारार्थं

तद्वचनादाम्नायप्रामाण्यम्

इति तृतीयं सूत्रम्। **तद्वचनादिति**। तस्य परमेश्वरसंसारिपुरुषाकाशदिक्कालधर्मादेः [वचनात्] अभिधानाद् वाचकवृत्त्या प्रतिपादनात् आम्नायस्य वेदस्य **प्रामाण्यं** वाक्यार्थप्रमितिजनकत्वमिति। तत्तदीश्वरादिवाचकपदे संगतिग्रहणार्थमीश्वराद्यनुमि-तिरवश्यमङ्गीकरणीयेति सिद्धम्।

ननु यदि धर्मो व्याख्येयत्वेन प्रतिज्ञातः, न तर्हि दिक्का[ला]काशात्मानो व्याख्येयत्वेनाभिप्रेता अपि संगृह्यन्त इति न्यूनं सूत्रमिति चेत्—न, तेषामपि संयोग-



वृत्त्या सकलमूर्ताश्रितत्वस्वीकात्, धर्मपदेनैव वा तदाक्षेपात्। धर्माश्रितत्वरूपस्याश्रय-रूपपुरुषधर्मिसापेक्षत्वादिति।

यद् वा,

### अथातो धर्मं व्याख्यास्यामः [१.१.१]

इत्यत्र धर्मपदेन धर्माश्रयस्तत्र विवक्षितः। तेन धर्मं व्याख्यास्याम इत्यात्मानं व्याख्या-स्याम इत्यर्थः। न चैवं परमेश्वरासंग्रहः, तस्यापि धर्मादिविशेषगुणस्वीकारात्।

ननु किमर्थं धर्मव्याख्यानमित्याशङ्क्य

यतोऽभ्युदयनिःश्रेयससिद्धिः

इति द्वितीयं सूत्रम्। यत इति यस्मिन्नभ्युदये निःश्रेयससिद्धिरिति अभ्युदयनिःश्रेय-सयोरुत्पत्तिर्ज्ञप्तिर्वा विवक्षिता।

किं पुनरात्मनि प्रामाण्यमित्याशङ्कायां तृतीयं सूत्रम्—

### तद्वचनादाम्नायप्रामाण्यम् [१.१.३]

इति। तस्यात्मनः। वचनात् प्रतिपादनात्। आम्नायस्य प्रामाण्यम्। सर्वोपनिषदा-मात्मनि तात्पर्यनिर्णयात् स्वर्गयागादिसाध्यसाधनभावबोधकाम्नायस्याप्यसति पर-लोकफलभोक्तरि आत्मनि प्रामाण्यानुपपत्तेश्चेति,

यतोऽभ्युदयनिःश्रेयस—

इत्येतावतैव चरितार्थे **सिद्धि**ग्रहणं मङ्गलार्थमिति॥

॥ इति श्रीयदुकुलकमलकलिकाविकासभास्करभूपाललित-
महाराजाधिराजश्रीकृष्णभूपालविरचिते
तर्कसागरनाम्नि वैशेषिकसूत्र-
वार्त्तिके त्रिसूत्रीव्याख्या
समाप्ता॥

अथातो धर्मं व्याख्यास्यामः

इति सूत्रेण प्रमेयमात्रं व्याख्येयतया प्रतिज्ञातम्। तथा हि यदा तावत् धर्माधर्मव्याख्यानं सूत्रार्थः, तदा धर्माधर्मतया, तदुत्पादकतया वा, धर्माधर्मप्रमित्युत्पादकतया वा, तदुत्पादकाद्युत्पादकतया वा प्रमेयमात्रं व्याख्येयम्। आत्मा तावद् धर्माधर्मयोस्तत्प्रमितेश्च [ समवायि- ] कारणम्। आत्ममनःसंयोगश्चासमवायिकारणम्। शरीरादयश्च निमित्तकारणम्। आत्ममनःसंयोगजनकक्रियाशरीरावयवादयश्च कारणकारणम्। आत्ममनःसंयोगजनकपूर्वसंयोगनिवृत्तिजनकविभागादयश्च कारणकारणकारणम्। एवं तत्कारणत्वेन द्वयणुकपरमाणुपर्यन्तं संग्राह्यम्। आकाशं च धर्मजनकप्रणवादिधर्मप्रमितिजनकवेदादिकारणम्। एवं यागहोमदानजनकपुरोडाशादयः कारणकारणम्। तदवयवाश्च तत्तत्कारणत्वेन संग्राह्याः। रूपरसगन्धस्पर्शाश्च धर्मजनकदेवब्राह्मणतृप्तिकारणम्। शुक्लमधुरसुरभिमृदुना भक्तादिना तृप्तिजननात्। संख्यापरिमाणे धर्मजनके, गोसहस्रमहत्सुवर्णकलशादिदाने धर्मजननात्। पृथक्त्वं च परम्परया धर्मकारणम्, पृथक्त्वजन्यपृथक्त्वविशिष्टव्रीह्यादिसाधनावगमस्य धर्मजनकयागादिजनकत्वात्। वैधर्म्यान्योन्याभावविशिष्टव्रीह्यादिबोधादेव यागाद्यनुष्ठानं न पृथक्त्वविशिष्टव्रीह्यादिबोधादिति चेत्—न, पृथक्त्वविशिष्टबोधाद् द्रव्यानुमानसम्भवे वैधर्म्यान्योन्याभावविशिष्टबोधादेवानुष्ठानं भविष्यतीति नियन्तुमशक्यत्वात्। परत्वापरत्वयोरपि परम्परया धर्मकारणत्वम्, सामान्यपरत्वविशिष्टबोधवता परस्मिंश्च परत्वविशिष्टबोधवता पराभिवादादिना धर्मजननात् परत्वापरत्वविशिष्टबोधयोश्च परत्वापरत्वजन्यत्वात् धर्माधर्मादिजनकदिक्कालादिबोधजनकत्वाद् वा परत्वापरत्वयोर्व्याख्यानम्। बुद्धीच्छाद्वेषप्रयत्नानां धर्माधर्मकारणत्वं साक्षात् परम्परया वा स्पष्टमेव। गुरुत्वस्य च परम्परया धर्मकारणत्वम्, गलन्तिकादिजलेन गुरुत्वादधःस्थितलिङ्गोपरि पतता धर्मजननात्। मेघादिजलेन गुरुत्वादधःपतता व्रीह्यादिधर्मसाधनजननात्। द्रवत्वस्य च परम्परया धर्मकारणत्वम्, द्रवत्वात् परितः स्यन्दमानाभिरद्भिर्व्रीह्यादिधर्मसाधनजननात्। स्नेहस्य च परम्परया धर्मकारणत्वम्, स्नेहजन्यसंग्रहणवता व्रीह्यादिविशिष्टे हि पुरोडाशादिसाधनधर्मजननात्। संस्कारस्य च परम्परया धर्मकारणत्वम्, धर्मजनकानुष्ठास्यमानपदार्थस्मृतिजनकत्वात्। धर्माधर्मयोश्च परम्परया धर्मकारणत्वम्, धर्माधर्मजनकशरीरादिकारणत्वात्। धर्मस्य च धर्माधर्मजनकत्वेऽपि स्वर्गापवर्गसाधनत्वेन फलवत्त्वात्। अधर्मस्य च धर्माधर्मजनकत्वेऽपि मोक्षोपयोगिवैराग्यजनकदुःखजनकत्वेन फलवत्त्वात्। शब्दश्च प्रणवादि[:] धर्मकारणम्, वेदादिश्च धर्माधर्मेश्वरादिप्रमितिकारणम्।

कर्माणि च परम्परया धर्मकारणम्, धर्मसाधनव्रीह्यादिजनकसंयोगजनकत्वात्।



सामान्यं च व्रीहित्वादिपरम्परया धर्मकारणम्, व्रीहित्वजन्यव्रीहित्वे[त्व] विशिष्टबोधस्य धर्मजनकानुष्ठानहेतुत्वात्।

विशेषाश्च मोक्षजनकमोहादिविविक्तात्मसाक्षात्कारसाधनत्वात् व्याख्येयाः, धर्माजनकत्वेऽपि देहादिविविक्तात्मसाक्षात्कारजनकयोगजधर्मसहकारित्वात्।

समवायोऽपि अनुष्ठानाङ्गव्रीहित्वादिविशिष्टव्रीह्यादिबोधजनकद्वारेण धर्मसाधनम्, विशिष्टबोधस्य विशेषणविशेष्यसम्बन्धजन्यत्वात्। धर्मजनकप्रणवादिधर्माधर्मेश्वरमोक्षादिप्रमितिजनकवेदादिसाक्षात्कारजनकत्वाच्च समवायो व्युत्पादनीयः। शब्दश्रोत्रसमवायस्य शब्दसाक्षात्कारहेतुत्वात्।

अभावः साक्षात् परम्परया च धर्माधर्ममोक्षादिसाधनम्, प्रतिबन्धाभावप्रागभावयोः सर्वकार्यजनकत्वात्। पूर्वसंयोगप्रध्वंसस्य धर्मादिजनकव्रीह्यादिजनकोत्तरसंयोगजनकत्वाच्च। दुःखध्वंसस्य च परमपुरुषार्थमोक्षसाधनत्वात् सुतरामभावो व्युत्पादनीयः।

तस्मादुपयोगित्वाद् द्रव्यगुणकर्मसामान्यविशेषसमवायाभावरूपं प्रमेयं व्युत्पादनीयमिति सिद्धम्। यदापि वेदव्याख्यानं सूत्रार्थः, तदापि वैदिकपदार्थतया तत्प्रतीत्युपयोगितया [ च ] द्रव्यादिप्रमेयमात्रं व्याख्येयमेव। तथा हि व्रीहिगवादिपदानां जातिव्यक्तितत्सम्बन्धवाचकत्वपक्षे जातिद्रव्यसमवायाः पदार्थाः। व्रीहित्वाश्रयव्यक्तिवाचकत्वपक्षे व्रीह्यादिद्रव्यमेव पदार्थः। शुक्लादिपदानां च जातिव्यक्तितत्सम्बन्धवाचकत्वपक्षे जातिगुणसमवायाः पदार्थाः। व्यक्तिवाचकत्वपक्षे तु शुक्लादिगुण एव पदार्थः। गमनादिपदानां च जातिव्यक्तितत्सम्बन्धवाचकत्वपक्षे जातिक्रियासमवायाः पदार्थाः। व्यक्तिवाचकत्वपक्षे तु कर्मैव पदार्थः। गोत्वादिपदानां जातिरेव पदार्थः। विशेषादिपदानां च विशेष एव पदार्थः। समवायसम्बन्धादिपदानां च समवायः पदार्थः। नञादिपदानां चाभावः पदार्थः। तस्माद् वेदं व्याचक्षता वैदिकपदार्था द्रव्यगुणसामान्यविशेषसमवायाभावाश्च व्युत्पादनीया एव, तदनवगमे तत्र सङ्गतिग्रहणायोगात्। अनवगतसंगतीनां च पदेभ्यः प्रतिपत्तुमशक्यत्वादिति।

यदापि धर्मोपदेष्टृव्याख्यानं सूत्रार्थः, तदापि वेदापरपर्यायधर्मोपदेशपदार्थतया द्रव्यादयो व्युत्पादनीयाः। एवं धर्मोपदेशकर्तुरेव धर्मोपदेष्टृत्वात् वेदस्यैव धर्मोपदेशत्वात्। अनवगतपदार्थानां वेदाद् धर्मप्रतिपत्त्यसम्भवादिति।

यदापि लिङ्गरूपधर्मव्याख्यानं सूत्रार्थः, तदापि धर्मतया तदाश्रयतया च द्रव्यगुणकर्मसामान्यविशेषसमवायाभावरूपं प्रमेयं व्याख्येयमेव।

एवं सूत्रव्याख्यानान्तरेऽपि द्रव्यादिप्रमेयमात्रं व्याख्येयमेवेति॥

तद्विभागार्थं सूत्रम्—

**पृथिव्यप्तेजो वायुराकाशं कालो दिगात्ममन इति द्रव्याणीति ॥१.१.४॥**

अत्र च प्रमेयं द्विविधम्--सदसच्चेति विभागः प्रथमं सूत्रकारस्याभिप्रेतः, नवमाध्यायव्यतिरिक्तेषु नवाध्यायेषु सतो व्युत्पादनात्। तदनन्तरं सत् षोढा द्रव्यं गुणः कर्म सामान्यं विशेषः समवाय इति विभागः सूत्रकारस्याभिप्रेतः, अग्रे द्रव्यादिषट्कस्य व्युत्पादनात्। यद् वा प्रमेयं सप्तविधं द्रव्यं गुणः कर्म सामान्यं विशेषः समवायोऽभाव इति सूत्रकारस्य विवक्षितम्, द्रव्यादिसप्तकस्याग्रे व्युत्पादनात्। इदं तु सूत्रं द्रव्यविभागपरम्। विभागस्य किं प्रयोजनमिति चेत्-- विशेषप्रतिपत्तिरिति ब्रूमः। न हि द्रव्यमित्युक्ते पृथिव्युदकतेजोवा [ यु ] रित्यादिविशेषप्रतिपत्तिर्जायते। पृथिव्युदकं तेज इत्युक्ते तु पृथिव्यादिविशेषप्रतिपत्तिर्जायत इति। पृथिव्यादिषु द्रव्यत्वप्रतिपत्तिर्वा विभागवाक्यप्रयोजनं न हि द्रव्यमित्युक्ते पृथिव्यादिषु नवसु द्रव्यत्वप्रतिपत्तिर्जायते विभागवाक्यात् तु ज्ञायत इति। पृथिव्यादिविशेषप्रतिपत्तेः, पृथिव्यादिविशेषनिष्ठद्रव्यत्वप्रतिपत्तेर्वा किं प्रयोजनमिति चेत्—पृथिव्यादिविशेषलक्षणप्रवृत्तिः, द्रव्यत्वेन पृथिव्यादिविशेषनिष्ठधर्मानुमिते[ति]र्वा। न ह्यनवगते पृथिव्यादौ विशेषे लक्षणप्रवृत्तिः, द्रव्यत्वेन तन्निष्ठधर्मानुमितिर्वा सम्भवति। यथासम्भवं प्रत्यक्षानुमानाभ्यां पृथिव्यादिविशेषसिद्धेः पृथिव्यादिविशेषनिष्ठद्रव्यत्वसिद्धेश्च व्यर्थं विभागवाक्यमिति चेत्—न, अनिश्चितात्प्रभावे सूत्रकारविभागवाक्यस्य तत्तद्विशेषनिष्ठद्रव्यत्वादिगोचरप्रमाणे जिज्ञासाजननद्वारेण प्रत्यक्षानुमानपर्यवसायित्वाभावावगमात्। निश्चितात्प्रभावसूत्रकारविभागवचनस्य प्रत्यक्षानुमानजन्यसाक्षात्कारानुमितिविजातीयप्रमितिजनकत्वेन सफलत्वात्। अन्यथा विभागवचनादेव पृथिव्यादिविशेषतन्निष्ठद्रव्यत्वासिद्धेः प्रत्यक्षानुमानयोः विफलत्वस्य दुष्परिहरत्वात्। सूत्रकारवचनं न प्रमाणमिति चेत्—प्रत्यक्षानुमानावगतार्थप्रतिपादकत्वे विभागवचनस्याप्रमाणत्वानुपपत्तेः। प्रत्यक्षानुमानावगतार्थप्रतिपादकत्वे च वैयर्थ्याभिधानस्योन्मत्तप्रलापत्वात्।

**उदयनादयस्तु न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागवचनमित्याहुः।** तदयुक्तम्, विभागवचने पृथिव्यादिविशेषणत्वेन नवसंख्यानुपादानात् तन्न्यूनाधिकसंख्याव्यवच्छेदासंभवात्, पृथिव्यादिषु नवसंख्याया दुर्घटत्वाच्च। आकाशकालदिग्व्यतिरिक्तानाम् अनन्तत्वेनैकत्वानुपपत्तौ विवक्षितनवसंख्यानुपपत्तेः, एकैकपृथिव्यादिव्यक्तिदिक्कालाकाशेषु नवसंख्यासंभवेऽपि द्वितीयपृथिव्यादिव्यक्त्यपेक्षयाधिकसंख्योपपत्तेः। अधिकसंख्याव्यवच्छेदसंभवस्य दुर्घटत्वात्। गुणादिषु संख्यावार्त्ताया अप्यसंभवात्।

अथ मा भूत् न्यूनाधिकसंख्याव्यवच्छेदो विभागफलम्, द्रव्यन्यूनत्वाधिकत्वव्यवच्छेदस्तु विभागफलं भविष्यतीति चेत्—न, द्रव्यन्यूनत्वाधिकत्वयोरप्रमितौ तदभावस्यावगन्तुमशक्यत्वात्। प्रमितौ तदभावावगमस्य बाधितत्वात् पृथिव्याद्यन्यतमस्मिन् द्रव्यत्वाद्यत्यन्ताभावस्य व्यवच्छेदः पृथिव्यादिव्यतिरिक्ते च द्रव्यत्वव्यवच्छेदो विभागफलं भविष्यति, द्रव्यत्वात्यन्ताभावद्रव्यत्वयोः प्रमितत्वेन पृथिव्याद्यन्यत-



मस्मिन् पृथिव्यादिव्यतिरिक्ते च निषेद्धुं शक्यत्वादिति चेत्—न, द्रव्यत्वात्यन्तव्यवच्छेदः किं द्रव्यत्वात्यन्ताभावात्यन्ताभावः, किं वा द्रव्यत्वात्यन्ताभावात्यन्ताभावात्यन्ताभावव्यवच्छेदः, किं वा द्रव्यत्वात्यन्ताभावात्यन्ताभावप्रत्ययः ? न प्रथमः, द्रव्यत्वात्यन्ताभावात्यन्ताभावस्यानादित्वे विभागवाक्यफलत्वानुपपत्तेः। द्वितीयेऽपि किं द्रव्यत्वात्यन्ताभावाभावः किं द्रव्यत्वमेव किं वा द्रव्यातिरिक्तः ? प्रथमे संप्रतिपत्तिरेव, पृथिव्यादिषु मनःपर्यन्तेषु द्रव्यत्वप्रतिपत्तेः विभागवाक्यफलत्वेनास्माभिरप्यङ्गीकारात्। द्वितीयेऽपि किं पृथिव्याद्यन्यतमस्मिन् विप्रतिपन्नो द्रव्यत्वात्यन्ताभावप्रत्ययं विभागवाक्यं जनयतीति तस्य विभागवाक्यफलत्वं विवक्षितम्। किं वा विभागवाक्यावगतं द्रव्यत्वं तद् जनयतीति तस्य विभागवाक्यफलत्वं विवक्षितम्, न प्रथमः, विभागवाक्यस्य पृथिव्यादिषु द्रव्यत्वप्रत्ययचरितार्थस्य पृथिव्यादिनिष्ठद्रव्यत्वात्यन्ताभावात्यन्ताभावप्रतिपत्त्यजनकत्वात्। न द्वितीयः, संप्रतिपत्तेरेव। पृथिव्यादिव्यतिरिक्तद्रव्यत्वव्यवच्छेदो विभागवाक्यफलमित्यत्रोऽपि किं विभागवाक्यं पृथिव्यादिव्यतिरिक्तोद्रव्यत्वात्यन्ताभावात्यन्ताभावप्रत्ययं जनयतीति तस्य विभागवाक्यफलत्वं विवक्षितम्, किं वा विभागवाक्यावगतं पृथिव्यादिनिष्ठद्रव्यत्वं पृथिव्याद्यतिरिक्ते द्रव्यत्वात्यन्ताभावप्रत्ययं जनयतीति तस्य तस्य विभागवाक्यफलत्वम् ? न प्रथमः, विभागवाक्यस्य पृथिव्यादिद्रव्यसंसर्गावगममात्रचरितार्थस्य पृथिव्यादिव्यतिरिक्तद्रव्यत्वात्यन्ताभावसंसर्गाबोधकत्वात्, पृथिव्यादिद्रव्यत्वसंसर्गस्य प्रकारान्तरेण सिद्धत्वात्। पृथिव्यादिव्यतिरिक्तद्रव्यत्वात्यन्ताभावसंसर्गपरं विभागवाक्यमिति चेत्—न, प्रकारान्तरेण इति किमुद्देशवाक्यादिति विवक्षितम्, किं वा प्रत्यक्षानुमानाभ्यामिति ? न प्रथमः, द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः प्रमेयमित्यादेरुद्देशवाक्यस्य द्रव्यत्वादिप्रमेयत्वादिसंसर्गमात्रप्रतिपादकत्वेन पृथिव्यादिद्रव्यत्वसंसर्गत्वाप्रतिपादकत्वात्। न द्वितीयः, प्रत्यक्षानुमानाभ्यां पृथिव्यादिद्रव्यत्वसंसर्गस्य अवगतत्वेन विभागवाक्यस्य तदप्रतिपादकत्वे पृथिव्यादिव्यतिरिक्तद्रव्यत्वात्यन्ताभावसंसर्गस्यापि प्रत्यक्षानुमानावगतत्वेन विभागवाक्यस्य तदप्रतिपादकत्वप्रसङ्गात्। मुख्ये बाधकमन्तरेण वाक्यस्य स्वार्थपरित्यागार्थान्तरकल्पनयोर्निष्प्रमाणकत्वाच्च विभागवाक्यादेवोद्देशाक्षेपे उद्देशवाक्यबलेन विभागवाक्यस्यान्यथाकर्तुमशक्यत्वाच्च। द्रव्यान्तरं पृथिव्यादि (?) न लक्षणवाक्यादेव पृथिव्यादिद्रव्यत्वसिद्धेः। विभागवाक्यं पृथिव्यादिव्यतिरिक्तं द्रव्यत्वनिषेधपरमिति चेत्—न, पृथिव्यादिलक्षणवाक्यानां पृथिव्यादिलक्षणमात्रप्रतिपादकत्वेन पृथिव्यादिद्रव्याप्रतिपादकत्वात्। अग्रे पृथिव्यादीनां गुणवत्त्वप्रतिपादनात् पृथिव्यादीनां द्रव्यत्वसिद्धेः, विभागवाक्यं पृथिव्यादिव्यतिरिक्तं[क्ते] द्रव्यत्वनिषेधपरमिति चेत्—न, तस्य गुणत्वप्रतिपादकत्वेन द्रव्यत्वाप्रतिपादकत्वात्। तत्प्रतिपादितगुण[त्व]वत्त्वमेव द्रव्यत्वं प्रतिपादयतीति चेत्—न, विभागवाक्येन पृथिव्यादीनां द्रव्यत्वाप्रतिज्ञाने गुणवत्त्वहेत्वभिधानस्यानवकाशात्। प्रतिज्ञाने वा विभागवाक्यस्य पृथिव्यादिद्रव्यप्रतिपादकत्वेन पृथिव्यादिव्यतिरिक्तद्रव्यत्व-

निषेधाप्रतिपादकत्वात्। नापि द्वितीयः विभागवाक्यावगतपृथिव्यादिनिष्ठद्रव्यत्वस्य पृथिव्यादिव्यतिरिक्ताद्रव्यत्वसाधनेऽपक्षधर्मत्वाद् विरुद्धत्वाच्च। अद्रव्यत्वस्य द्रव्यत्वात्यन्ताभावत्वात् द्रव्यत्वतदत्यन्ताभावत्वयोश्च विरोधस्योद्भूतत्वादिति।

ननु

पृथिव्यापस्तेजो वायुरात्मा मनः

इत्यत्र पृथिव्यादिपदानि पृथिवीत्वाद्याश्रयव्यक्तिपराणि किं वा पृथिवीत्वादिजातिपराणि, प्रथमे किमेकैकपृथिवी[त्वा]द्याश्रयव्यक्तिपराणि, किं वा सर्वपृथिवीत्वाद्याश्रयव्यक्तिपराणि, आद्ये विभागन्यूनत्वम्, एकैकपृथिवीत्वाद्याश्रयव्यक्तिव्यतिरिक्तपृथिवीत्वादिव्यक्तीनामविभ[ञ्]जनात्, आप इति बहुवचनानुपपत्तेश्च, एकस्यामुदकव्यक्तौ बहुत्वासंभवात्—

बहुषु बहुवचनम्

इति पाणिनिस्मरणात्। एकस्मिन्नेवेदं बहुवचनं दारा इतिवदनुशासनबलादिति चेत्—न, आप इति बहुवचनस्यैकत्वेऽनुशासनाभावात्। आपःशब्दो नित्यबहुवचनान्त इत्यनुशासनमस्तीति चेत्—न, तस्य नियमेन बहुत्ववाचकत्वेनाव्युत्पत्तेः।

बहुषु बहुवचनम्

इत्यनेनैव आप इति बहुवचनस्य बहुत्ववाचकत्वे सिद्धे पुनरापःशब्दो बहुवचनान्तमिति विधानम् एकस्मिन् द्वयोश्च बहुवचनप्राप्त्यर्थमिति चेत्—न, सिद्धे सत्यारम्भो नियमायेति न्यायेन आपःशब्दस्य पुनर्बहुवचनान्तत्वविधानस्य बहुवचनान्त एवायम्, न द्विवचनान्तो नैकवचनान्त इति ज्ञापनार्थत्वादिति। न द्वितीयः, पृथिवी तेजो वायुरित्याद्येकवचनानुपत्तेः पृथिव्यादिप्रातिपदिकानामनन्तव्यक्तिपरत्वात्। नापि तृतीयः, विभागन्यूनत्वाधिकत्वयोरापत्तेः पृथिव्यादिपदानां पृथिवीत्यादिजातिपरत्वे पृथिव्यादिव्यक्तीनामप्रतिपादनात्। विभागन्यूनत्वं द्रव्याणामपि पृथिवीत्यादिजातीनां विभ[ञ्]जनाद् विभागाधिकत्वं आप इति बहुवचनानुपपत्तेश्च, अप्त्वस्यैकत्वादिति—तन्न, पृथिव्यादिपदैः पृथिवीत्वाद्याश्रयसमस्तव्यक्तिप्रतिपादनात्। न चैवमेकवचनानुपपत्तिः पृथिवीत्वादिजातिगतैकत्वप्रतिपादकत्वेन तदुपपत्तेः। पृथिवीत्वादिजातीनां प्रतिपादिकार्थत्वाभावात् न ताभिः प्रत्ययार्थस्यैकत्वस्यान्वय इति चेत्—जातेरपि प्रातिपदिकार्थत्वात्। जातेरप्रातिपदिकार्थत्वेऽप्युपलक्षणतया बुद्धिस्थया जात्या प्रत्ययार्थस्यैकत्वस्यान्वयो भविष्यति। प्रातिपदिकोपात्तानां तद्व्यक्तिभिरेकत्वस्यान्वयानुपपत्तेः। उपलक्षणभूतया जात्या प्रत्ययार्थस्यैकत्वस्यान्वयो न दृष्ट इति चेत्–न, अस्मिन् वत्सरे ब[व्री]हिरेव निष्पन्न इत्यादौ दर्शनात्। पृथिवीत्वादिजातिगतैकत्वप्रतिपादने सूत्रकारस्य किं प्रयोजनमिति चेत्—सकलपृथिव्यादिव्यक्तिसंग्रहः। पृथिवीत्वानामनेकत्वे तु पृथिवीपदेनैकपृथिवीत्वाश्रयः, सकलव्यक्तिसंग्रहे पृथिवीत्वान्तराश्रयव्यक्तीनामसंग्रहात्, विभागन्यूनत्वस्य तदवस्थत्वाच्च।



अक्षशब्दप्रवृत्तिनिमित्ताक्षशब्दानां विभीतकत्वेन्द्रियपातकटाक्षत्वरूपाणां भेदस्थितावेकस्मिन् प्रयोगेऽक्षशब्देन सकलविभीतकत्वाश्रयसंग्रहेऽपि इन्द्रियत्वाद्याश्रयाणामसंग्रहस्य सर्वसंप्रतिपन्नत्वात्। इतिशब्दः समाप्तौ। तेन समाप्तानि द्रव्याणि, इतोऽतिरिक्तानि न सन्तीत्यर्थः। एतावन्त्येव द्रव्याणीत्यत्र किं प्रमाणमिति चेत्–सूत्रकारवचनमेव तत्प्रमाणमिति चेत्—न, अबाधितानुभवजनकत्वस्य प्रामाण्यस्य कणादवचनत्वेन अग्न्युष्णत्वप्रतिपादककणादवचनवदनुमानात्, न चाबाधितत्त्वं त्रैकालिकबाधाभावरूपं दुरवधारणमिति अप्रसिद्धविशेषणतेति वाच्यम्। अबाधितत्वस्य कालत्रयबाधविरहत्वस्यानङ्गीकारात्। तर्हि किं [अ]बाधितत्वमिति चेत्– बाधितत्वात्यन्ताभावः। बाधितत्वमेव किमिति चेत्—इदं बाध्यमिदं बाध्यमित्यनुगतबुद्धिसिद्धौ बाध्यज्ञाननिष्ठो ज्ञानत्वावान्तरो जातिविशेषः, उपाधिर्वास्तु। तदत्यन्ताभावश्च बाध्यत्वं मानसप्रत्यक्षसिद्धमेवेति कथमबाध्यस्य दुरवधारणता? अन्यथा जनितज्ञानस्याप्यबाधितत्वानवधारणे वेदान्तप्रामाण्यस्यापि दुरवधारणत्वापत्तेः। अबाधितानुभवजनकत्वं प्रामाण्य उपाधिरिति चेत्–न, तस्यैव तत्रानुपाधित्वात्। प्रमात्वजातित्वसाधनत्वं प्रामाण्यं साध्यमितरमबाधितानुभवजनकत्वं च ततो भिन्नमुपाधिरिति चेत्—न, साधनव्यापकत्वात्। आप्तोक्तत्वमत्रोपाधिरिति चेत्—न, प्रत्यक्षादौ साध्यव्यापकत्वात् तेषां प्रामाण्येऽप्याप्तोक्तत्वाभावात्। साधनव्यापकत्वाच्च। सूत्रकारवचनस्य प्रमाणत्वे तत एव सकलपदार्थसिद्धौ सूत्रकारादीनां परमाण्वादिसाधकप्रमाणव्युत्पादनं व्यर्थमिति चेत्—न, मूलप्रमाणवत्त्वेन सूत्रकारवचनस्याप्तवचनत्वसिद्ध्यर्थत्वात् प्रमाणान्तरादपि तत्सिद्धित्व? ख्यापनार्थत्वाच्च। न ह्यागमसिद्ध आत्मेति तद्गोचरप्रत्यक्षानुमानव्युत्पादनं व्यर्थमिति। अपि चैतावन्त्येव द्रव्याणीति किं प्रमाणमिति किमेतावता द्रव्यत्वसाधकप्रमाणेन गुणादिव्यावृत्तस्यैव द्रव्यत्वस्य सुप्रश्नः किं वा एतावद्व्यतिरिक्तानामद्रव्यत्वसाधकप्रमाणप्रश्नः? प्रथमे द्रव्यत्वसाधकानुमानमेवेत्युत्तरम्। द्वितीयेऽप्येतदेवोत्तरम्। द्रव्यत्वसाधकप्रमाणेन गुणादिव्यावृत्तस्यैव द्रव्यत्वस्य साधनात्। किं च, एतावद्व्यतिरिक्तस्याद्रव्यत्वे किं प्रमाणमित्यत्रैतावद्व्यतिरिक्तपदेन किं गुणकर्मसामान्यविशेषसमवायाभावा विवक्षिताः, तद्व्यतिरिक्तं वा? प्रथमे गुणकर्मसामान्यविशेषसमवायाभावा द्रव्यत्वरहिता गुणवत्त्वरहितत्वात्। यन्न द्रव्यत्वरहितम्, न तद्गुणवत्त्वरहितम्, यथा घटः। गुणवत्त्वरहिताश्च गुणकर्मसामान्यविशेषसमवायाभावाः। तस्माद् द्रव्यत्वरहिता इत्युत्तरम्। द्रव्यत्वरहितस्याप्रसिद्धेरप्रसिद्धविशेषणतेति चेत्—न, द्रव्यत्वरहितत्वस्याप्रसिद्धत्वे गुणादयो न द्रव्यमित्यत्र किं प्रमाणमिति प्रश्नस्यैवानुपपत्तेः। द्रव्यत्वं द्रव्यत्वान्योन्याभावव्यतिरिक्तप्रागभावप्रध्वंसत्वरहिताभावप्रतियोगि प्रमेयत्वात् घटवत्। द्रव्यत्वमत्यन्ताभावप्रतियोगि जातित्वात् गोत्वादि[वदि]त्यादि[ना] विशेषणत्वप्रसिद्धेः। द्रव्यत्वसाधकेन गुणादिव्यावृत्तद्रव्यत्व[ा]प्रसिद्धेश्च नाप्रसिद्धविशेषणता। गुणादयो द्रवत्ववन्तः, मेयत्वात् घटवदिति व्यतिरेकिणः

सत्प्रतिपक्षत्वमिति चेत्—न, द्रव्यत्वसाधकप्रमाणबाधात्। गुणवद्व्यावृत्तत्वरहितगुणादिव्यावृत्तजातेः द्रव्यत्वशब्दार्थत्वात्।

अथ गुणवद्व्यावृत्तत्वरहितत्वे सति गुणव्यावृत्तजातित्वात् द्रव्यत्वशब्दार्थो, न तु गुणवद्व्यावृत्तत्वरहितत्वे सति गुणकर्मविशेषसमवायाभावव्यावृत्तजातित्वं कर्मसामान्यविशेषसमवायाभावा एव धर्मत्वेनोपादीयन्ते। तेन न द्रव्यत्वसाधकप्रमाणबाध इति चेत्—न, एवं सति प्रमेयत्वस्य गुण एव व्यभिचारात्। द्रव्यत्वरहितत्वेन गुणस्य विपक्षत्वात् गुणत्वरहितत्वेन हेतुर्विशेषणीय इति चेत्— न, गुणवत्त्वेन सोपाधित्वात्। द्रव्यत्वरहितत्वेन विपक्षाद् गुणादेव व्यावृत्तत्वात्। द्रव्यत्वं द्रव्यत्वान्योन्याभावव्यतिरिक्तप्रागभावत्वप्रध्वंसत्वरहितकिञ्चिन्निष्ठाभावप्रतियोगि मेयत्वात्। द्रव्यत्वं किञ्चिन्निष्ठात्यन्ताभावप्रतियोगि जातित्वात् गोत्ववदित्यादिना सिद्धे द्रव्यत्वात्यन्ताभाववति मेयत्वस्यानैकान्तिकत्वाच्चेति।

द्वितीये तु प्रश्नानुपपत्तिरेव। गुणकर्मसामान्यविशेषसमवायाभावव्यतिरिक्तपदेनोभयवादिसिद्धपृथिव्यादिद्रव्याभिधाने ततो द्रव्यत्वसाधकप्रमाणप्रश्नस्य व्याहतत्वात्। उभयवादिसिद्धपृथिव्यादिद्रव्याव्यतिरिक्ताभिधाने च तत्र प्रमाणं वक्तव्यम्। अप्रामाणिके द्रव्यत्वाभावसाधकप्रमाणप्रश्नस्योन्मत्तप्रलापत्वात्। गुणकर्मसामान्यविशेषसमवायाभावव्यतिरिक्तत्वं नोभयवादिसिद्धपृथिव्यादिद्रव्यव्यतिरिक्तवृत्ति गुणकर्मसामान्यविशेषसमवायाभावव्यतिरिक्ताव्यावृत्तत्वात्, मेयत्ववदिति। ""न, गुणकर्मसामान्यविशेषसमवायाभावव्यतिरिक्तत्वं नोभयवादिसिद्धपृथिव्यादिद्रव्यव्यतिरिक्तवृत्ति गुणकर्मसामान्यविशेषसमवायाभावाव्यतिरिक्तवृत्तित्वात् पृथिवीत्ववत् इत्यादिना सत्प्रतिपक्षत्वादिति।

अथ द्रव्यमुभयवादिसिद्धपृथिव्यादिद्रव्यव्यतिरिक्तवृत्ति द्रव्यव्यावृत्तत्वात् सत्तावदिति द्रव्यान्तरसिद्धेरेतावन्त्येव द्रव्याणीत्युपपन्नमिति चेत्—न, पृथिव्यादिशब्देन किमेकैका पृथिव्यादिव्यक्तिर्विवक्षिता, किं वा यावत्प्रतिपन्नाः पृथिव्यादिव्यक्तयः, किं वा सर्वा एव पृथिव्यादिव्यक्तयः, किं वा पृथिव्यादिजातीयम्। प्रथमे अर्थान्तरता। एकैकपृथिव्यादिव्यक्तिव्यतिरिक्तपृथिव्यादिव्यक्तिसिद्ध्यास्य चरितार्थत्वेन द्रव्यान्तरासाधकत्वात्। द्वितीयेऽपि अर्थान्तरता, यावत्प्रतिपन्नपृथिव्यादिव्यक्तिव्यतिरिक्तसिद्धिमात्रेणास्य चरितार्थत्वात्। तृतीयेऽप्यप्रसिद्धविशेषणत्वम्, सर्वपृथिव्यादिव्यक्तीनामवगन्तुमशक्यत्वेन तद्व्यतिरिक्तवृत्तित्वस्याप्रसिद्धत्वात्। चतुर्थेऽपि यत्किञ्चित्पृथिव्यादिसिद्ध्यार्थान्तरता, यस्य कस्यापि पृथिव्यादेः किञ्चित्पृथिवीजातीयादिव्यतिरिक्तत्वात्।

अथ पृथिव्यादिव्यतिरिक्तपदस्थाने पृथिवीत्वादिरहितपदमुपादीयते, तथा च न पृथिव्यादीनामर्थान्तरत्वम्, तस्य पृथिव्यादिव्यतिरिक्तत्वे पृथिवीत्वाद्याक्रान्तत्वेऽपि न पृथिवीत्वरहितत्वानुपपत्तेरिति मन्यसे ? न, पृथिव्यन्तरादिसिद्ध्यर्थान्तरपरिहारेऽप्याकाशकालदिगन्तरसिद्ध्यार्थान्तरस्य दुष्परिहरत्वात्। आकाशान्तरादेरपि प्रथमाकाशादिव्यतिरिक्तत्वोपपत्तेः। आकाशान्तरादेरप्याकाशादित्वेनाकाशादिव्यतिरिक्तत्वानुपपत्तिरिति चेत्—न, आकाशान्तरादेरप्याकाशादित्वेऽपि प्रथमाकाशादिव्यतिरिक्तत्वेनाकाशादिव्यतिरिक्तत्वोपपत्तेः। प्रथमाकाशस्याप्याकाशत्वात्।



अर्थान्तरतापरिहारार्थमाकाशकालदिग्व्यतिरिक्तपदस्थानेऽप्याकाशत्वकालत्वदिक्त्वरहितपदमुपादीयते—तन्न, आकाशत्वकालत्वदिक्त्वानि किं जातयः, किं वाकाशकालदिग्लक्षणानि, किं वाकाशकालदिक्शब्दप्रवृत्तिनिमित्तानि ? प्रथमेऽप्रसिद्धविशेषणत्वम्, आकाशात्वादिजातीनामप्रसिद्धत्वेन तद्रहितवृत्तित्वस्याप्यसिद्धत्वात्। द्वितीये आकाशादीनामर्थान्तरत्वम्, आकाशस्याप्याकाशशब्दाश्रयत्वेन आकाशलक्षणरहितत्वात्। न चैवं शब्दस्यापक्षधर्मत्वम् आकाशनिष्ठत्वेन तदभावाभावात्। दिक्कालयोरपि दिक्काललक्षणपरत्वविशेषजनकसंयोगात्यन्ताभावाश्रयत्वेन दिक्काललक्षणरहितत्वात्। शब्दसंयोगादेः स्वात्यन्ताभावसमानाधिकरणस्याव्याप्यवृत्तित्वस्य स्वीकारात्। एवंविधाव्याप्यवृत्तित्वं नेष्यत इति चेत्—न, अनेवंविधाव्याप्यवृत्तित्वसिद्ध्याप्यर्थान्तरस्य दुर्वारत्वात्। शब्दस्याव्याप्यवृत्तित्वानङ्गीकारे सर्वैः सर्वशब्दोपलम्भप्रसङ्गात्। सर्वशब्दानां सर्वपुरुषश्रोत्रवृत्तित्वसिद्ध्याप्यस्य चरितार्थत्वेनास्य तादवस्थ्याच्चेति। तृतीयेऽप्याकाशादीनामर्थान्तरत्वम्, आकाशादेरप्याकाशादिशब्दप्रवृत्तिनिमित्ताकाशादिरहितत्वात्। आकाशादिशब्दप्रवृत्तावाकाशादेरेव निमित्तत्वात्। व्यभिचाराभावेन तद्गतधर्मान्तरस्य निमित्तस्यानङ्गीकारादिति। किंच पृथिव्यादिव्यतिरिक्तवृत्तित्वादावद्रव्यत्वमुपाधिः। न चास्य पक्षेतरता। पृथिव्यादिव्यतिरिक्तवृत्तित्वादिसाध्याभाववतः पृथिवीत्वादेरेव विपक्षात् व्यावृत्तत्वात् द्रव्यत्वम्। पृथिवीत्वादिव्यतिरिक्तवृत्तीत्यादौ च द्रव्यत्वं न पृथिव्यादिव्यतिरिक्तवृत्ति, अद्रव्यावृत्तित्वात् पृथिवीत्ववदित्यादिना सत्प्रतिपक्षत्वमिति। एतेन पृथिव्यादिव्यतिरिक्तं द्रव्यवृत्ति पृथिव्यादिव्यतिरिक्ताव्यावृत्तत्वात् मेयत्ववदिति द्रव्यान्तरसाधनं प्रत्युक्तम्। किञ्चित्पृथिव्यादिव्यतिरिक्तत्वस्य तदन्यपृथिव्यादिद्रव्यवृत्तित्वेनार्थान्तरग्रस्तत्वात् पृथिव्यादिव्यतिरिक्तत्वस्थाने पृथिवीत्वाप्त्वतेजस्त्ववायुत्वात्मत्वमनस्त्वरहितत्वोपादाने आकाशान्तरादिद्रव्यसिद्ध्यार्थान्तरस्य दुर्वारत्वात्। आकाशकालदिग्व्यतिरिक्तत्वपदस्थानेऽपि आकाशत्वकालत्वदिक्त्वरहितत्वोपादानेऽप्याकाशत्वकालत्वदिक्त्वानां जातित्वपक्षे आश्रयासिद्धत्वात्। आकाशत्वकालत्वदिक्त्वजातीनामसिद्धत्वेन तद्रहितत्वस्याप्यसिद्धेः। आकाशत्वकालत्वदिक्त्वानामाकाशादिलक्षणत्वपक्षे च आकाशादीनामर्थान्तरत्वात्। आकाशादीनामाकाशादिलक्षणशब्दात्यन्ताभाववत्त्वेनाकाशादिलक्षणरहितत्वात्। आकाशादिशब्दप्रवृत्तिनिमित्तत्वादिरहितपक्षीकृताकाशादिद्रव्यभिन्नत्व आकाशादीनामप्याकाशादिशब्दप्रवृत्तिनिमित्ताकाशादिरहितत्वात्। द्रव्यवृत्तित्वे चाकाशादिव्यतिरिक्तत्वरहितत्वस्योपाधित्वाच्चेति। न चास्य पक्षेतरत्वम्, गुणत्वकर्मत्वादिद्रव्यवृत्तित्वरहितत्वस्य व्यावर्त्यस्य सत्त्वात्। पृथिव्यादिव्यतिरिक्तत्वं न द्रव्यवृत्ति पृथिव्यादिव्यतिरिक्तत्वरहितावृत्तित्वात् गुणत्ववदित्यादिना सत्प्रतिपक्षत्वाच्चेति। अथाकाशं पृथिवीत्वप्त्वतेजस्त्ववायुत्वात्मत्वमनस्त्वदिक्काललक्षणरहितद्रव्यभिन्नम्,

सत्त्वात् घटवदिति द्रव्यान्तरसाधनम्। न चात्राप्यप्रसिद्धविशेषणत्वं पृथिवीत्वाप्त्व-तेजस्त्ववायुत्वात्मत्वमनस्त्वदिक्काललक्षणरहितपक्षीकृताकाशद्रव्यभिन्नत्वस्य घटादौ प्रसिद्धत्वात्, न च पृथिवीत्वादिरहितपक्षीकृताकाशादिद्रव्यभिन्नत्वसिद्धार्थान्तरता। पक्षीकृताकाशस्य पक्षीकृताकाशभेदसाधने व्याघातबाधयोर्दुर्वारत्वादिति मन्यसे—तन्न, दिक्काललक्षणव्यावृत्तत्वस्वीकारे दिक्काललक्षणरहितदिक्कालद्रव्यान्यत्वसिद्धा(न्त) र्थान्तरस्य तदवस्थत्वात्। आकाशान्तरसिद्धयास्य चरितार्थत्वेन द्रव्यान्तर-साधकत्वात्।

अथैतद्व्यावृत्त्यर्थं पक्षीकृताकाशव्यतिरिक्ताकाशत्वरहितत्वविशेषणमुपादीयते—तन्न, अप्रसिद्धविशेषणत्वात्। पक्षीकृताकाशव्यतिरिक्ताकाशस्य एतदनुमानप्रवृत्तेः पूर्वमप्रसिद्धत्वात्। अथायं घट एतदन्यपृथिवीत्वाप्त्वतेजस्त्ववायुत्वात्मत्वमनस्त्वदिक्का-लाकाशलक्षणरहितद्रव्यभिन्नं सत्त्वात् पटवदिति द्रव्यान्तरं साधयसीति—तन्न, अव्याप्यवृत्ति[:]शब्दाद्याकाशलक्षणरहिताकाशादिद्रव्यभिन्नत्वसिद्धार्थान्तरस्य तदवस्थ-त्वात्। अयं घट एतदन्यपृथिवीत्वाप्त्वतेजस्त्ववायुत्वात्मत्वमनस्त्वदिक्कालाकाश-लक्षणरहितद्रव्यभिन्नत्वरहितः, एतत्त्वात् न यदेवं न तदेवमिति व्यतिरेकिणा सत्प्रति-पक्षत्वाच्च। न चात्राप्रसिद्धविशेषणत्वम्, एतदन्यपृथिवीत्वाप्त्वतेजस्त्ववायुत्वात्मत्व-मनस्त्वदिक्कालाकाशलक्षणरहितद्रव्यभिन्नत्वं स्वान्योन्याभावत्वरहितप्रागभावत्व-प्रध्वंसत्वरहिताभावप्रतियोगि मेयत्वाद् घटवदिति विशेषणप्रसिद्धेरिति ॥१।१।४॥

अथ गुणविभागपरं सूत्रम्—

**रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणाः इति ॥१.१.५॥**

रूपरसगन्धस्पर्शा [इत्यत्र] समासस्य किं प्रयोजनमिति चेत्—विभक्तिलाघव-मिति ब्रूमः। यदि रूपं रसो गन्धः स्पर्श इति व्यस्तमुपादीयेत, तदा प्रत्येकं विभक्ति-प्रयोगात् चतस्रो विभक्तयः प्रयोक्तव्या इति विभक्तिगौरवम्। समासपक्षे पुनरेकैव विभक्तिः प्रयुज्य इति। **आत्रेयाचार्यास्तु** रूपरसगन्धस्पर्शा इति समासस्य रूपरस-गन्धस्पर्शानां नित्यानित्यत्वपाकजत्वादिसाधर्म्यप्रतिपादनं प्रयोजनमित्याहुः। तन्न, रूपरसगन्धस्पर्शनित्यत्वानित्यत्वपाकजत्वानामग्रे सूत्रकारेण साक्षादेव प्रतिपादनात् तत्सूचनस्य विफलत्वादिति। एवं तर्हि रूपादीनां प्रयत्नान्तानां विभक्तिलाघवार्थं समासः सूत्रकारेण किं न क्रियत इति चेत्—अवान्तरप्रयोजनार्थम्। तच्च प्रतिपदं वक्ष्यामः।

संख्या इति बहुवचनं संख्यात्वतदवान्तरैकत्वद्वित्वत्रित्वादिपरिग्रहार्थम्। तेन यत् **कैश्चिद्** उक्तम्—एकत्वमेव संख्या, द्वित्वादयः पुनरेकत्वसमुच्चयविशिष्टा इति तन्निरस्तम्। द्वित्वत्रित्वादिजातिविशेषव्यतिरिक्तस्यैकत्वसमुच्चयविशेषस्यानि-रूपणादिति।



परिमाणानीति बहुवचनं परिमाणत्वावान्तराणुत्वमहत्त्वह्रस्वत्वदीर्घत्वख्याप-नार्थम्। तेन यत् **केनचिद्** उक्तम्—महत्त्वमेव परिमाणम्। अपकृष्टं च महत्त्व-मेवाणुत्वम्। तदेव च ह्रस्वत्व[म्]। महत्त्वविशेष एव च दीर्घत्वमिति तन्निरस्तम्। समर्थयिष्यामश्चैतदिति।

पृथक्त्वमित्येकवचनं पृथक्त्वावान्तरद्विपृथक्त्वादिजातिनिरासार्थम्। द्वौ पृथ-गित्यादिव्यवहारस्य द्वित्वावच्छिन्नपृथक्त्वादेवोपपत्तेरिति केचित्। तन्न, एकैकनिष्ठ-पृथक्त्वव्यावृत्तानां द्विनिष्ठत्रिनिष्ठपृथक्त्वादिजातीनां जात्यन्तरसमानन्यायेन सिद्ध-त्वात्। तस्मात् पृथक्त्वमित्येकवचनं पृथक्त्वत्वजातेरेकत्वख्यापनार्थम्। अथ रूपं रस इत्याद्येकवचनं किं न कृतमिति चेत्—न, क्वचिदेकवचनेन जात्येकत्वे ख्यापिते तत्समानन्यायेन रूपादिजातीनामेकत्वस्य निर्धारयितुं शक्यत्वादिति।

संयोगविभागौ परत्वापरत्वे इत्यादावपि समासः पूर्ववत् विभक्तिलाघ-वार्थम्।

बुद्धय इति बहुवचनं बुद्धिबहुत्वख्यापनार्थम्। तेन बुद्धिरेकैव बुद्धिभेदव्यव-हारस्तु चन्द्रभेदव्यवहारवन्मिथ्यैवेति **मायावेदान्त**सिद्धान्तो निरस्तः। यद् वा, बुद्धय इति बहुवचनं बुद्धित्वावान्तर[प्रमातृ]साक्षात्कारित्वानुमितित्वसंशयत्वविपर्य-यत्वादिजातिबहुत्वख्यापनार्थम्। तेन ज्ञानत्वावान्तरजातयो न सन्तीति वदन्तः **प्राभाकरा** निरस्ताः।

प्रयत्नश्चेति चकारोऽनुक्तगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दसमुच्चयार्थः।

अनुक्तत्वाविशेषेऽपि कथमेतावन्त एव समुच्चीयन्त इति चेत्—अनुक्ताना-मेतावतामेव गुणत्वात्। तस्मात् कण्ठोक्तरूपादयः चशब्दसमुच्चिताश्च गुरुत्वादयो गुणा इति। कथमेतावन्त एव गुणा इति चेत्—न, एतावन्त्येव द्रव्याणीति न्यायेन दत्तोत्तरत्वादिति ॥१।१।५॥

अथ कर्मविभागार्थं सूत्रम्—

**उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ॥१.१.६॥**

उत्क्षेपणत्वं जातिविशेषः। तदाश्रय उत्क्षेपणम्। एवमवक्षेपणादयोऽपि निर्वक्तव्याः। उत्क्षेपणमित्याद्येकवचनमुत्क्षेपणत्वादिजात्येकत्वख्यापनार्थम्। उत्क्षेपणादिव्यक्तीनामनन्तत्वेनैकत्वानुपपत्तेः। उत्क्षेपणादिजातिगतैकत्वप्रति-पादनस्य किं प्रयोजनमिति चेत्—न, पृथिवीत्यत्र जातिगतैकत्वप्रति-पादनस्य प्रयोजनस्य दर्शितत्वात्। भ्रमणरेचनस्यन्दनोर्ध्वज्वलनादीनामपि सद्भावात् न्यूनो विभाग इति चेत्—न, भ्रमणादीनां गमनत्वात्। उत्क्षेपणत्वाव-क्षेपणत्वाकुञ्चनत्वप्रसारणत्वरहितकर्मत्वस्य गमनलक्षणत्वात्। उक्तलक्षणवन्मात्रनिष्ठ-जातेश्च गमनत्वशब्दार्थत्वात्। तथा च प्रयोगः, भ्रमणादयो न गमनत्ववन्तः, उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वरहितकर्मत्वात्, संप्रतिपन्नगमनवदिति। न

चात्राप्रसिद्धविशेषणत्वम्, गमनत्वस्येदं गमनमिदं गमनमित्यनुगतप्रत्यक्षसिद्धत्वात्। गमनं गमनलक्षणवद्वृत्तिगमनलक्षणवद्व्यावृत्तत्वरहितगमनलक्षणवद्वृत्तित्वरहितजातिमत् जातिमत्त्वाद् गोत्वादिवदिति विशेषणप्रसिद्धेः। न च गमनं गमनलक्षणवद्वृत्तिगमनलक्षणवद्व्यावृत्तत्वरहितगमनलक्षणवद्वृत्तिगमनलक्षणरहितजातिरहितम्, गमनत्वरहितजातित्वरहितत्वाद् अभाववदिति सत्प्रतिपक्षत्वं जातिमत्त्वरहितत्वेन सोपाधिकत्वात्। तस्यापि साधने बाधात्। न चास्य पक्षेतरता, एवंविधजातिमतोऽपि पक्षात् घटादेर्व्यावृत्तत्वादिति। गमनशब्दवाच्यत्वं वा साध्यम्। तथा च भ्रमणादयो गमनशब्दवाच्याः, उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वरहितकर्मत्वात्, संप्रतिपन्नगमनवत्। न च भ्रमणादयो गमनत्ववन्तः, नापि गमनशब्दवाच्याः संप्रतिपन्नगमनातिरिक्तत्वात् घटवदिति पूर्वानुमानयोः सत्प्रतिपक्षत्वम्, उत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वरहितकर्मत्वाभावेन सोपाधित्वादिति। अथ वोत्क्षेपणत्वावक्षेपणत्वाकुञ्चनत्वप्रसारणत्वरहितकर्मत्वमेव गमनत्वम्। तच्च भ्रमणादौ प्रत्यक्षसिद्धमेव। तदभावसाधने प्रत्यक्षबाध एवेति सर्वमनवद्यम्। उत्क्षेपणावक्षेपणाकुञ्चनप्रसारण[गमनानां] समासो विभक्तिलाघवार्थं किं [न] कृत इति चेत्—उत्क्षेपणत्वादिजातिगतैकत्वप्रतिपत्तिप्रयोजनानुरोधेन विभक्तिलाघवस्योपेक्षणादिति ॥१।१।६॥

अथ द्रव्यादीनां साधर्म्यवैधर्म्यप्रतिपादनार्थं **सूत्रम्**—

**सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेष इति ॥१.१.७॥**

सदिति भावप्रधानो निर्देशः। सत्त्वमित्यर्थः। एवमनित्यमिति, द्रव्यवदिति, कार्यमिति, कारण[मिति,]सामान्यविशेषवदित्यादयो भावप्रधाना एव निर्देशाः। सामान्यविशेषवदिति सामान्यवत् विशेषवत् सामान्यविशेषवदिति विवेचनीयम्। तेन सत्त्वानित्यत्वद्रव्य[व]त्त्वकार्यत्वकारणत्वसामान्यवत्त्वविशेषवत्त्वानि द्रव्यगुणकर्मणां साधर्म्याणीत्युक्तं भवति। इति शब्द एवंविधाभिधेयत्वप्रमेयत्वादिपरिग्रहार्थः। सत्त्वमस्तित्वं सकलपदार्थनिष्ठो धर्मविशेषः। तत्र किं प्रमाणमस्तीति चेत्--प्रत्यक्षमेव। अथास्तित्वं सत्तैव, सा च द्रव्यगुणकर्मस्वेव वर्तते। सामान्यादिषु पुनरस्तीति प्रत्ययो भ्रान्तिरिति चेत्--न, बाधकाभावात्। न हि सामान्यादयो न सन्तीति बाधकमुदेति। कालान्तरे बाधकं भविष्यतीति चेत्--न, घटोऽस्तीत्यादिप्रत्ययस्यापि कालान्तरे बाधकं भविष्यतीति वक्तुं शक्यत्वात्। सामान्यादयोऽस्तित्ववन्तः प्रमेयत्वाद् घटवदित्यनुमानं प्रमाणम्। सामान्यवत्त्वमत्रोपाधिरिति चेत्--न, साधनव्यापकत्वात्, पक्षेतरत्वाच्च। केवलान्वयिसाध्याभावस्याप्रसिद्धत्वे साध्याभाववतो विपक्षस्याविद्यमान ·······विपक्षाद्व्यावृत्तत्वात् (?)। न चास्य केवलान्वयिसाध्याभावस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वादिति। नन्वस्तित्वमस्तित्वे वर्तते वा न वा? प्रथमे आत्माश्रयः।



द्वितीये अस्तित्वस्य सकलपदार्थवृत्तित्वानुपपत्तिः। स्वस्मादेव व्यावृत्तत्वादिति न, अस्तित्वेऽप्यस्तित्वाङ्गीकारात्। उत्पत्तिप्रमितिप्रतिबन्धकत्वाभावेनात्माश्रयस्य प्रकृते दूषणत्वानङ्गीकारात्। अस्तित्वेऽस्तित्वं वर्तत इत्यत्र किं प्रमाणमिति चेत्--प्रमेयत्वादिकमेव। जात्यादयोऽस्तित्वरहिताः द्रव्यत्वगुणत्वकर्मत्वरहितत्वात्। न यदेवं न तदेवम्। यथा घट इति व्यतिरेकिणा सत्प्रतिपक्षत्वमिति चेत्—न, अप्रसिद्धविशेषणत्वात्। अथ यत्र भावरूपः साध्यम्, तत्राप्रसिद्धविशेषणत्वं दूषणम्। प्रमातुमशक्यत्वेन तस्य साधनाभावेन व्याप्तेर्ग्रहीतुमशक्यत्वात्। प्रकृते पुनरभावरूपं साध्यम्। तत्राप्रसिद्धविशेषणत्वं दूषणम्। विशेषणाप्रसिद्धत्वेऽपि तदभावस्य भावरूपतया प्रमातुं शक्यत्वेन तस्य साधनाभावेन[ा]व्याप्तिग्रहणोपपत्तेरिति मन्यसे--तन्न, विशेषणाप्रसिद्धौ तेन सह हेतोर्व्याप्तेर्ग्रहीतुमशक्यत्वेन व्याप्यत्वासिद्धेर्दुष्परिहरत्वात्। साध्याभावस्य साधनाभावेन व्याप्तिग्रहणसंभवेऽप्यपक्षधर्मत्वात्। व्यतिरेकव्याप्तेश्चान्वयव्याप्तिग्रहणोपायत्वेन स्वीकारात्। उपपादितं चैतत् पुरस्तात्।

अप्रसिद्धविशेषणत्वे च साध्यसमर्पकपदस्यावाचकत्वेन निरर्थकेऽन्तर्भावाच्च। धर्मिग्राहकप्रमाणबाधितत्वेन व्यतिरेकिणो दुर्लभत्वाच्च। जात्यादिग्राहकप्रमाणेन तेषामस्तित्वेन ग्रहणात्।

अथास्तित्वं प्रमेयाद्व्यावृत्तं जातित्वाद् गोत्ववदिति सिद्धे अस्तित्वाभाववति प्रमेयेऽस्तित्वसाधकप्रमेयत्वस्यानैकान्तिक[त्व]मिति मन्यसे--तन्न, प्रमेयाद्व्यावृत्तत्वे साध्ये सद्व्यावृत्तित्वस्योपाधित्वात्। तदभावे सत्प्रतिपक्षत्वाच्च। न चास्य पक्षेतरता, प्रमेयाद् व्यावृत्तत्वरहितत्वात् प्रमेयत्वादेर्व्यावृत्तत्वात्। एतेनास्तित्वं व्यावृत्तं जातित्वाद् गोत्ववदित्यस्तित्वाभावस्य प्रसिद्धत्वात् जात्यादयोऽस्तित्वरहिताः इत्यस्य व्यतिरेकिणो नाप्रसिद्धविशेषणतेति प्रत्युक्तम्।

अथास्तित्वं जातिर्धर्मान्तरं वा? जातिरिति ब्रूमः। जात्यादौ जातेरसंभव इति चेत्--न, बाधकाभावात्। जातौ जातिस्वीकारेऽनवस्था बाधकमिति चेत्--न, द्रव्यत्वादावस्तित्वाङ्गीकारेऽनवस्थाया निरूपयितुमशक्यत्वात्। अस्तित्वेऽप्यस्तित्वान्तरं तत्राप्यस्तित्वान्तरमित्यनवस्थेति चेत्—न, अस्तित्वे अस्तित्वानङ्गीकारात् मूलक्षतेरभावेनैवंविधानवस्थाया दूषणत्वानङ्गीकाराच्च। समवाये जातिस्वीकारे संबन्धाभावो बाधक इति चेत्—न, समवायाभावयोः विशेषणविशेष्यभावसंबन्धाङ्गीकारात्। समवाये जातिस्वीकारे समवायाभावो बाधक इति चेत्—न, समवायेऽपि समवायसंभवात्। समवायान्तरस्वीकारे तत्रापि समवायान्तरमित्यनवस्थेति चेत्—न, तस्यैव समवायस्य तत्राङ्गीकारात्। आत्माश्रयः स्यादिति चेत्—अस्तु, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभाव आत्माश्रयस्य दूषणत्वानङ्गीकारात्। समवायस्य समवायाश्रयत्वेन समवायभिन्नत्वप्रसङ्गो घटवदिति चेत्-न, विपर्ययापर्यवसायित्वेनास्य तर्काभासत्वात्। समवायः समवायानाश्रयः समवायानाश्रितश्च समवायभिन्नत्वरहितत्वादित्यादेः

सपक्षवृत्तित्वानिश्चयेनान्वयित्वानुपपत्तेः । समवायानाश्रितादभावात् समवायानाश्रिताच्च घटादेः सपक्षादपि व्यावृत्तत्वेन व्यतिरेकित्वानुपपत्तेश्च । अस्तु वा समवाये समवायान्तरम्, तथापि नानवस्था, द्वितीये समवाये प्रथमसमवायस्यैव स्वीकारात् । न चैवं परस्पराश्रयदोषः उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावे परस्पराश्रयस्यापि दोषत्वानङ्गीकारात् । यद् यत्राश्रितं न तत् तस्याश्रयो यथा पटस्तन्तूनाम् । प्रथमसमवायाश्रितश्च द्वितीयः समवायः । तस्मान्न प्रथमसमवायाश्रित इति चेत्—न, यत्तत्शब्दार्थस्यानुगतस्य वक्तुमशक्यत्वात् । प्रमेयत्वादौ व्यभिचाराच्च । पिण्डाश्रितपिण्डाश्रय ··· ··········विषाणादौ व्यभिचाराच्च । यत् प्रथमसमवायाश्रितं न तत्प्रथमसमवायाश्रयो यथा प्रथमसमवायाश्रितो भावः । प्रथमसमवायाश्रितश्च द्वितीयः समवायः । तस्मान्न प्रथमसमवायाश्रय इति चेत्—न, द्वितीयसमवायः प्रथमसमवायाश्रयः प्रथमसमवायान्यभावत्वात् घटवदित्यादिना सत्प्रतिपक्षत्वात् । न द्वितीयः, समवायस्यासिद्धत्वेन प्रथमहेतोराश्रयासिद्धत्वाच्च । प्रथमसमवायाश्रिताभावेऽपि प्रथमसमवायाङ्गीकारात् दृष्टान्तस्य साध्यविकलत्वाच्च । भाववदभावेऽपि समवायसाधकप्रमाणस्य तुल्यत्वात्, बाधकाभावाच्च । अस्तु वा द्वितीयसमवायेऽपि समवायान्तरम् । तथा च नानवस्था, तृतीयसमवाये प्रथमसमवायस्यैवाङ्गीकारात् । न चैवं चक्रकदोषः, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावे चक्रकस्यादूषणत्वात् । एवं चतुर्थपञ्चमसमवायाभ्युपगमेऽपि नानवस्था । अस्तु वानवस्था, तथापि नासौ दोषः उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावेऽनवस्थाया अप्यदूषणत्वात् । समवायानन्त्यप्रसङ्ग इति चेत्—न, इष्टत्वादिति ।

विशेषेषु सत्ताङ्गीकारे स्वरूपहानिप्रसङ्ग इति चेत्—न, सत्ताया स्वरूपहान्या सह व्याप्तिविरहेण प्रसङ्गस्य प्रशिथिलमूलत्वात् । विशेषेषु सत्ताङ्गीकारे विशेषलक्षणहानिः । सत्तारहितत्वे सत्येकद्रव्यसमवेतत्वस्य विशेषलणत्वादिति चेत्—न, अन्त्यविशेषलक्षणत्वानुपपत्तावपि गुणकर्मरहितत्वे सत्येकमात्रसमवेतस्य विशेषलक्षणत्वोपपत्तेः । विशेष[ण]त्वजातेर्वा विशेषलक्षणत्वात्, वक्ष्यामश्च विशेषलक्षणान्तराणीति न किञ्चिदेतदिति ।

अभावे सत्ताङ्गीकारेऽस्तीतिप्रत्ययविषयत्वम्, न तु घटोऽस्तीति प्रत्ययविषयत्वस्य स्वीकारात् । घटो नास्तीत्यस्यापि घटाभावास्तित्वगोचरत्वात् । घटो नेत्येतावता घटाभावप्रतिपादनात् । घट इत्यनेन प्रतियोगिनो घटस्याभिधानात् । नञा चाभावाभिधानाद् अस्तीति च सत्ताभिधानादिति । अभावे सत्ताङ्गीकारे नवमाध्याये सूत्रकारस्यासत्त्वादिति व्यवहारो विरुद्ध इति चेत्—न, अभावत्वाभिप्रायेणासदितिव्यवहारोपपत्तेः । सत्तैव भावत्वम्, सत्ताभावोऽभावत्वम् । तत् कथमभावे सत्ताङ्गीकारे घटत इति चेत्—न, सत्ताया भावत्वाङ्गीकारे द्रव्यादिषट्कलक्षणान्यतमत्वस्यैव भावत्वात् । द्रव्यादिषट्कलक्षणात्यन्ताभावस्य चाभावत्वादिति ।

जातिषु सत्ताङ्गीकारे



**सामान्यविशेषेषु सामान्यविशेषाभावात् तत् एव ज्ञानम्** ॥ ८ ॥ इति सूत्रविरोध इति चेत्—न, सामान्यविशेषाभावादित्यनेन सामान्यविशेषमवान्तरं सामान्यं निषेधता सत्ताया अनिषेधात् । अन्यथा सामान्याभावादित्येतावतैव सामान्यनिषेधे सिद्धे सूत्रगतविशेषपदवैयर्थ्यापत्तेरिति ।

तत् सिद्धं सत्ताजातिरेवास्तित्वं सकलपदार्थसाधर्म्यमिति । यदुक्तं **प्रशस्तपादभाष्यकारैः—**

**स चानुवृत्तेरेव हेतुत्वात् सामान्यमेवेति ।**

**उदयनस्तु,**

यदि सत्ता सामान्यादिभ्यो व्यावर्तेत तदा सामान्यादिभ्यो व्यावृत्तबुद्धेरपि हेतुत्वात् द्रव्यत्वादिवत् सामान्यविशेष एव स्यात् । न तु सामान्यमेवेत्यनुवृत्तेरेव हेतुत्वात् सामान्यमेवेत्युक्तं **भाष्यकृते**ति वर्णयांबभूव । तदयुक्तम्, जात्यादिभ्यो व्यावृत्तायाः सत्ताया जात्यादिभ्यः स्वाश्रयव्यावर्तकत्वे गुणादिव्यावृत्तस्यापि द्रव्यादेर्गुणादिभ्यः स्वाश्रयाभावव्यावर्तकत्वाभावप्रसङ्गात् ।

अथ द्रव्यत्वादिकं विशेषेण स्वाश्रये स्वात्यन्ताभावव्यावृत्तवत्प्रत्ययं जनयतीति द्रव्यत्वादेर्व्यावर्तकत्वमिति चेत्—न, अस्तित्वेऽपि समानत्वादिति ।

अनित्यत्वं विनाशप्रतियोगित्वं कार्यद्रव्यगुणकर्मप्रागभावनिष्ठो धर्मविशेषः ।

द्रव्य[व]त्त्वं द्रव्याश्रितत्वं कार्यद्रव्यगुणकर्मसामान्यविशेषसमवायद्रव्यप्रवृत्ति(?) सामान्याभावनिष्ठो धर्मविशेषः ।

कार्यत्वं प्रागभावप्रतियोगित्वमनित्यत्वमनित्यद्रव्यानित्यगुणकर्मप्रध्वंसनिष्ठो धर्मविशेषः ।

कारणत्वं जनकत्वं सकलपदार्थनिष्ठो धर्मविशेषः ।

ननु किमिदं जनकत्वम् ? न तावत् पूर्ववृत्तित्वम्, चिरविनष्टानामपीदानीं जायमानघटादिकारणत्वप्रसङ्गात् । नाप्यव्यवहितपूर्वक्षणवृत्तित्वं घटाद्यव्यवहितपूर्वक्षणवृत्तीनां रासभादीनामपि घटादिकारणत्वप्रसङ्गात् । नापि नियमेनाव्यवहितपूर्वक्षणवृत्तित्वम्, नियमेन तद्घटपूर्वक्षणवृत्तीनां रासभादीनामेतद्घटजनकत्वप्रसङ्गात् । नापि नियमेनैतज्जातीयाव्यवहितपूर्वक्षणवृत्तिजातीयत्वम्, जातिरहिते प्रध्वंसादौ जातिरहितानां प्रागभावादीनां घटादावकारणत्वप्रसङ्गात् । शब्द[ब्दे] गगनस्याप्यकारणत्वप्रसङ्गात् । गगनस्य नित्यत्वेन पूर्वक्षणवृत्तिजातीयत्वाभावात् । नियमेनाव्यवहितपूर्वक्षणवृत्तिजातीयत्वस्य च कारणत्वेन गगनादीनां सर्वकार्यजनकत्वप्रसङ्गाच्च । नाप्यन्वयव्यतिरेकत्वं गगनादीनां शब्दादावकारणत्वप्रसङ्गात् । नित्यत्वेन कालतो व्यतिरेकाभावात् । विभुत्वेन देशतो व्यतिरेकाभावाच्च । तन्तुरूपादीनां घटादिजनकत्वप्रसङ्गाच्च ।

किं च कारणत्वे प्रमाणं न तावदिन्द्रियम्, प्रथमाक्षसन्निपातेन तदप्रतिपत्तेः । नाप्यन्वयव्यतिरेकसहितम्, तदनुसन्धानरहितानामन्वयव्यतिरेकसत्त्वेनापि कारणत्वा-

प्रतीतेः। नाप्यन्वयव्यतिरेकानुसन्धानसहितम्, अन्वयव्यतिरेकानुसन्धानसहितेन्द्रिय-सन्निपातेऽपि तन्तुरूपादौ घ[प]टादिकारणत्वाप्रतीतेः। अन्वयव्यतिरेकतदनुसन्धानविरहेऽपि गगनादि षुकारणत्वप्रतीतेश्च। अन्वयव्यतिरेकानुसन्धानादेव कारणत्वप्रतीत्युपपत्तेरिन्द्रियस्याकारणत्वप्रसङ्गाच्च। नापि लिङ्गम्, तदभावात्। अन्वयव्यतिरेकौ लिङ्गाविति चेत्—न, तयोः पटाजनकतन्तुरूपादिगतत्वेनानैकान्तिकत्वात्। अनन्यथासिद्धान्वयव्यतिरेकौ लिङ्गमिति चेत्—न, अनन्यथासिद्धत्वं किं कारणनिष्ठत्वम्, किं वा कारणत्वारहित[ा]निष्ठत्वम्? नाद्यः, तन्तुरूपादीनां पटकारणकारणत्वादिरहितत्वं न तदन्वयव्यतिरेकयोः कारणकारणाद्यनिष्ठत्वेन अनैकान्तिकत्वस्य तदवस्थत्वात्। न द्वितीयः, असिद्धत्वात्, तन्त्वादीनां पटकारणत्वसिद्धेः पूर्वं तन्त्वादिगतान्वयव्यतिरेकयोः पटकारणत्वरहितानिष्ठत्वासिद्धेः। नापि प्रमाणान्तरम्, अनिरूपणात्, तस्मादशक्यविवेचनं कारणत्वं निष्प्रमाणकं चेति।

अत्रोच्यते, किं कारणत्वमशक्यविवेचनम्, किं वा तद्विशेषो घटादिकारणत्वम्? नाद्यः, जनकत्वस्यैव कारणत्वात्। जनकत्वमेव किमिति चेत्—जनकत्वमेव। जनकत्वे पृष्टे जनकत्वमेवेत्युत्तरमनुपपन्नमिति चेत्—न, अस्यैवोपपन्नत्वात्। अर्थान्तराभिधाने बाधात्, अर्थान्तरापत्तेश्च। न हि किं पटत्वमिति पृष्टे पटत्वमित्युत्तरं बाधात् अर्थान्तरत्वे अतिक्रामतीति संभवति। कारणत्वस्य किं लक्षणमिति चेत्—[अ]कारणत्वात्यन्ताभावः। कथमयं कारणत्वस्य लक्षणमिति चेत्—कारणत्वव्यतिरिक्तानिष्ठत्वे सति कारणत्वनिष्ठत्वात्। कारणत्वस्य किमाश्रय इति चेत्—द्रव्यादिकमेव, कियदिति चेत्—सर्वमेव। कारणत्वे किं प्रमाप्रमिति चेत्—इदं कारणमिदं कारणमिति प्रत्यक्षमेव, यथेदं सदिदं सदिति प्रत्यक्षं सत्तायाः प्रमाणं तथेदं कारणमिदं कारणमिति प्रत्यक्षं कारणत्वे प्रमाणम्। अबाधितानुभवजनकत्वस्योभयत्राविशेषात्। अबाधितानुभव एव कथं सिद्ध इति चेत्—मानसप्रत्यक्षात्। अनुभवबाधितत्वात्यन्ताभावयोः मानसावसेयत्वात्। इदं कारणमिदं कारणमित्यविसंवादिव्यवहाराच्च। गगनादौ कारणत्वे किं प्रमाणमिति चेत्—प्रमेयत्वादिकमेव। नापि द्वितीयः, घटजनकत्वस्य घटकारणत्वात् पटजनकस्यैव पटकारणत्वात्। आक्षेपान्तराणां च पूर्ववदेव परिहारादिति।

कारणलक्षणं किमिति चेत्—कारणलक्षणं किं कारणधर्मो विवक्षितः, कारणाव्यावृत्तो वा, कारणशब्दप्रवृत्तिनिमित्तं वा, अकारणावृत्तिकारणाव्यावृत्तो धर्मो वा? प्रथमे द्रव्यत्वादिकमेव। द्वितीये कारणत्वास्तित्वप्रमेयत्वादिकमेव। तृतीये कारणत्वमेव। चतुर्थे प्रमाणानुपपत्तेः। अकारणाप्रमितौ तदप्रवृत्तेः धर्मस्याप्रमितत्वेन प्रष्टुमशक्यत्वात्। शक्यत्वे वा न किञ्चिदित्येवोत्तरम्। अकारणवृत्तेर्धर्मस्यास्माभिरनङ्गीकारात्। अथात्यन्तमुक्तिरेव कारणत्वम्, प्रसिद्धादनन्तरभाविकार्यस्यासंभवेन तस्याः कारणत्वानुपपत्तिः। तदनन्तरं च कार्यानुपपत्तिः। सर्वोत्पत्तिमन्निमित्तादृष्टप्रयोजनयोरभावादिति मन्यसे—तन्न, अत्यन्तमुक्त्यनन्तरमपि परमाणुकर्मतज्जन्यसंयोगाङ्गीकारात्। तस्य



च भोगतत्साधनेतरत्वेनादृष्टाजन्यत्वात्, प्रयोजनरहितत्वाच्च। अन्त्य[त्यन्त]मुक्तेः कारणत्वे किं प्रमाणमिति चेत्—अन्त्य[त्यन्त]मुक्तिः कारणं मेयत्वात् घटवदित्यादि। न चात्रोपाधिसंभवः। व्यावर्त्यविपक्षाभावेन यस्य कस्यचिदुपाधित्वेनाभिधीयमानस्य पक्षेतरत्वात्। विपक्षाभावश्च केवलान्वयिसाध्याभावस्याप्रसिद्धत्वेन तद्वतो विपक्षस्यासंभवात्। [ न चात्र प्रतिपक्षसंभवः, केवलान्वयिसाध्याभावस्याप्रसिद्धत्वेन तद्वतो विपक्षस्यासंभवात्। ] न चात्र प्रतिपक्षसंभवः, केवलान्वयिसाध्याभावस्याप्रसिद्धत्वेन तदभावव्याप्यस्य क्वचिदप्यवगन्तुमशक्यत्वात्। अत्यन्तमुक्तेरकारणत्वपक्षेऽत्यन्तमुक्त्यन्यत्वस्यैव कारणलक्षणत्वादिति।

अथ किं समवायिकारणलक्षणम्—कार्याश्रयत्वमेव। समवायिकारणविशेषलक्षणानि तु यथा सं[भवं]……द्रष्टव्यानि। तथा हि घटासंयुक्तत्वे सति कारणत्वमिति चेत्—न, रूपादिसमवायिकारणघटादावतिव्यापकत्वात्। घटादीनामपि घटरूपादिकारणघटावयवसमवेतत्वेन तद्गतघटाश्रयत्वं घटसमवायिकारणलक्षणं पटासंयुक्तत्वे सति पटाश्रयत्वं च पटसमवायिकारणलक्षणं घटरूपाद्याश्रयत्वं च घटरूपादिसमवायिकारणलक्षणम्। यद् वा, घट……टरूपसमवायिकारणकारणलक्षणमित्यादि।

अथ किं[किम] समवायिकारणलक्षणम्?[न] नसमवायिकारणसमवेतत्वेन कारणत्वे सति प्रत्यासन्नत्वात्[त्वम्] सुखदुःखादिजनकधर्मादावतिव्यापकत्वाच्च। धर्माधर्मादीनां सुखादिजनकत्वे सति तत्कारणात्मसमवेतत्वात्, कारणैकार्थसमवायवत् कार्यैकार्थसमवायस्य प्रत्यासत्तित्वात्। परमाणुपरिमाणादावतिव्यापकत्वाच्च। तेषाम[पि]विशिष्टज्ञानादिजनकत्वेन जनकत्वात्। त्र्यणुकादिजनकद्व्यणुककारणसमवेतत्वेन प्रत्यासन्नत्वाच्च। सामान्यविशेषयोरतिव्यापकत्वाच्च। तयोरप्यनुवृत्तव्यावृत्तत्वबुद्धिजनकत्वात्। संयोगादिकार्यैकार्थसमवेतत्वाच्च। आत्मविशेषगुणमात्रजनकत्वरहितत्वेन विशेषणे चात्ममनःसंयोगो[गे]ऽव्यापकत्वप्रसङ्गात्। अथ यद्यत्प्रत्यासन्नत्वे सति यस्य कारणत्वं तत् तस्यासमवायिकारणमिति चेत्—न, यत्तच्छब्दयोरनुगतार्थपरत्वे लक्षणातिव्यापकत्वस्य तदवस्थत्वात्। तद्विशेषपरत्वे च लक्षणस्याव्यापकत्वादिति प्रत्यासत्तिशब्दार्थयोः कारणैकार्थसमवायकार्यैकार्थसमवाययोरनुगतत्वेन लक्षणस्याव्यापकत्वाच्च। तस्मादनुपपन्नमसमवायिकारणलक्षणमिति—तन्न, द्रव्यत्वरहितात्म[गुण]विशेषगुणत्वरहितध्वंसाद्यात्मविशेषगुणमात्रजनकत्वरहितभावस्यासमवायिकारणसामान्यलक्षणत्वात्। न चैवं पूर्वोक्तदोषः, घटादीनां द्रव्यत्वरहितग्रहणेन व्युदासात्। धर्माधर्मादीनां चात्मविशेषगुणत्वरहितग्रहणेन निराकरणात्। ध्वंसाद्यन्यात्मगुणविशेषगुणमात्रजनकानामनेकसंख्यानेकपृथक्त्वपरिमाणसंयोगविभागपरत्वापरत्वान्त्यावयविरूपरसगन्धस्पर्शसामान्यविशेषसमवायानां ध्वंसाद्यात्मविशेषगुणमात्रजनकत्वरहितग्रहणेन निराकरणात्। ध्वंसान्यात्मविशेषगुणव्यतिरिक्तजनकानां रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागगुरुत्वद्रवत्वस्नेहसंस्कारकर्मणां समवायिकारणानां संग्रहाच्चेति। प्रागभावप्रतिबन्धकाभावान्त्यमुक्तानां च भावग्रहणेन

निरासात्। न चैवमात्ममनःसंयोगाव्याप्तिः, तस्य ध्वंसात्मविशेषगुणव्यतिरिक्तमनः-क्रियाहेतुत्वात्। मनःकर्मण्यसमवायिकारणान्तराभावादिति। द्रव्यत्वरहिताकाशा-[दि] द्रव्यानारम्भकनिष्ठस्नेहद्रव्यत्वव्यतिरिक्तविशेषगुणत्वरहितध्वंसाद्यज्ञानमात्रजनकत्व-रहितभावत्वस्य समवायिकारणसामान्यलक्षणत्वात्। आकाशादिद्रव्यानारम्भकनिष्ठ-स्नेहद्रव्यत्वव्यतिरिक्तगुणविशेषगुणत्वरहितग्रहणेनात्मावयविविशेषगुणा..ां निरासात्। अपि च किमसमवायिकारणाभिप्रेतेषु तदितरव्यावृत्तमिदमसमवायिकारणमिदमसम-वायिकारणमित्यनुवृत्तो व्यवहारोऽस्ति न वा ? अस्ति चेत्—तर्हि तत्सिद्धमसमवायि-कारण[त्वम]समवायिलक्षणं भविष्यति। नास्ति चेत्—किमसमवायिकारणलक्षणेनानु-गतव्यवहाराभावेन तत्सिद्धचर्थं लक्षणानपेक्षणात्। अनुगतजातेरभावेन तत्सिद्धचर्थ-मसमवायिकारणलक्षणानपेक्षणात्। इतरभेदप्रत्ययार्थमसमवायिकारण[लक्षण ?]मिति चेत् - न, तत्तद्वयक्तिलक्षणेनैव तस्या व्यक्तेरितरभेदप्रत्ययोपपत्तेः। असमवायिकार-णाभिप्रेतसर्वव्यक्तीनां युगपदितरभेदप्रत्ययार्थमसमवायिकारणलक्षणमिति चेत्—न, युगपदसमवायिकारणाभिप्रेतसकलव्यक्तिगोचरेतरव्यावृत्तप्रत्ययस्य प्रमाणप्रयोजन-विरुद्धत्वेनाङ्गीकारात्। इदमत्रासमवायिकारणमिदमत्रासमवायिकारणमिति असम-वायिकारणविशेषव्यवहारस्य चासमवायिकारणविशेषलक्षणादेवोपपत्तेः। विशेषगुण-लक्षणाभावात् तदधीन[म]समवायिकारणलक्षणमयुक्तमिति चेत्-न, रूपत्वरसत्वगन्ध-त्वस्पर्शत्वरहितपृथिवीनिष्ठनिष्ठत्वाधिकरणगुणनिष्ठजातिमत्त्वस्य विशेषगुणलक्षण-त्वात्। न चेदं सांसिद्धिकद्रवत्वाव्यापकं तस्यापि रूपत्वरसत्वगन्धत्वस्पर्शत्वपृथिवी-निष्ठनैमित्तिकद्रवत्वादिनिष्ठत्वरहितगुणत्वावान्तरशब्दाभिलप्यजातिमत्त्वात्। नापि तैजसद्रव्य[व]त्वेऽतिव्यापकम्, तस्य रूप[त्व]रसत्वगन्धत्वस्पर्शत्वरहितपृथिवीनिष्ठ-नैमित्तिकद्रवत्वादिनिष्ठत्वरहितगुणत्वावान्तरजातिरहितत्वात् नैमित्तिकद्रवत्वशब्दा-भिलप्यजातेः पृथिवीनिष्ठत्वात् तदवान्तरतैजसद्रवत्वमात्रवृत्तिजातेश्च निष्प्रमाणकत्वा-दिति। पृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तित्वरहित-गुणत्वावान्तरजातिमत्त्वस्य वा विशेषगुणलक्षणत्वात्। न चैवं रूपादावव्याप्तिरिति वाच्यम्, रूपत्वादीनां पृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तित्वेऽपि तदवान्तराणां नीलत्वपीतत्वादीनां पृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तित्वरहितानां पृथिव्यादिरूपादौ विद्यमानत्वात् नीलत्वादीनां पृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तिविरहात्। स्वच्छ-त्वभास्वरत्वादीनां अपृथिवीवृत्तित्वेऽपि पृथिवीवृत्तिवृत्तित्वविरहात्। उदकतेजसोः नीलपीतादिरूपविरहात्। पृथिवीशुक्लरूपेऽपि उदकतेजोरूपव्यावृत्तशुक्लत्वावान्तर-जातिस्वीकारात्। पृथिवीरसे च जलरसव्यावृत्तव्यक्तमधुरत्वकटुत्वादिजातीनां स्वी-कारात्। पृथिवीस्पर्शे च जलादिस्पर्शव्यावृत्तस्पर्शावान्तरपाकजस्पर्शत्वादिजातिस्वी-कारात्। उदकरूपे च पृथिव्यादिरूपव्यावृत्तशुक्लत्वावान्तरस्वच्छत्वस्वीकारात्। उद-करसे च पृथिवीरसव्यावृत्तमधुरत्वावान्तराव्यक्तमधुरत्वाङ्गीकारात्। तेजोरूपे च जला-दिरूपव्यावृत्तशुक्लत्वावान्तरभास्वरत्वाङ्गीकारात्। विप्रतिपन्नं [न्न] पृथिवीस्पर्शादौ



पृथिवीवृत्तिवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तित्वरहितजातीनां स्पर्शत्वादिनानुमानात्। न च परममहत्त्वेऽतिव्याप्तिः। तत्र महत्त्वावान्तरपरममहत्त्वाभावात्। भावे वा तदति-रिक्तत्वेन विशेषणादिति। असमवायिकारणविशेषलक्षणानि तु घटजनकघटावयवघटसंयो-गत्वं घटासमवायिकारणलक्षणम्। घटरूपजनकरूपत्वं घटावयवरूपत्वं वा घटरूपासम-वायिकारणलक्षणम्। घटरसजनकरसत्वादिकं च घटरसाद्यसमवायिकारणलक्षणम्। एकत्वजनकैकत्वं च एकत्वासमवायिकारणलक्षणम् एकत्वजातिरेव। द्वि[त्वा]द्यस-मवायिकारणलक्षणम्। एकपृथक्त्वजनकैकपृथक्त्वं चैकपृथक्त्वासमवायिकारणलक्षणम्। एकपृथक्त्वजातिरेव द्विपृथक्त्वाद्यसमवायिकारणलक्षणम्। परत्वजनकसंयोगत्वं च परत्वासमवायिकारणलक्षण ……… ष्टवदात्मपरत्वाधारसंयोगादावतिव्यापक……… रत्वाजनकत्वात्। जनकत्वे वा तस्याप्यसमवायिकारणत्वात्। अपरत्वजनकसंयोगत्वं चापरत्वासमवायिकारणलक्षणम्, ज्ञानजनकात्ममनः संयोगत्व……… नाद्यसमवायि-कारणलक्षणम्। शब्दजनकत्वे सत्याकाशनिष्ठत्वं शब्दासमवायिकारणलक्षणम्। कर्मासमवायिकारणत्वं च कर्मासमवायिकारणलक्षणम्। कर्मासमवायिकारणत्वं चेदं कर्मासमवायिकारणमिदं कर्मासमवायिकारणमित्यनुगतव्यवहारसिद्धम्। अनुगत-व्यवहाराभावे च लक्षणस्यैवानङ्गीकारात्। एवं यत्र यत्र लक्षणविशेषानिरुक्तिः, अनुगतश्च व्यवहारोऽस्ति, तत्र तत्रानुगतव्यवहारसिद्धो धर्म एव लक्षणमिति समर्थ-नीयमिति।

निमित्तकारणस्य किं लक्षणमिति चेत्—कारणत्वमेव। समवायिकारणत्वा-समवायिकारणत्वयोरपि ज्ञानाद्युत्पत्तौ निमित्तकारणत्वात्। निमित्तकारणविशेष-लक्षणं तु घटसमवायिकारणघटासमवायिकारणलक्षणरहितत्वे सति घटकारणत्व-मित्यादिकमित्यलं विस्तरेणेति।

सामान्यवत्त्वमनुवृत्ताश्रयत्वं विशेषवत्त्वं व्यावृत्त्या सामान्यविशेषवत्त्वम् अनुवृत्त-व्यावृत्ताश्रयत्वे। एतच्च त्रयं सर्वपदार्थसाधर्म्यम्, अनुवृत्तव्यावृत्तधर्माणां सर्वत्र विद्य-मानत्वात्। प्रमेयत्वं प्रमाविषयत्वम्। ज्ञेयत्वं ज्ञानविषयत्वम्। अभिधेयत्वमभिधान-विषयत्वमिति यावत्। एतानि च सकलपदार्थसाधर्म्या[णि]। प्रमेयत्वादीनां स्वस्मा-देव व्यावृत्तत्वात्, न सकलपदार्थधर्मत्वमिति चेत् - न, प्रमेयत्वादीनां प्रमेयत्वाद्या-श्रयत्वात्। प्रमेयत्वं प्रमेयत्वाश्रयोऽभिधेयत्वात्। अभिधेयत्वमभिधेयत्वाश्रयः, प्रमेय-त्वात् घटवदित्यादिप्रमाणसत्त्वात्। आत्माश्रयस्योत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावेना-दूषणत्वात्। नन्वनित्यत्वकार्यत्वद्रव्याश्रितत्वादीनि न द्रव्याणि, गुणरहितत्वात्। गुणाश्रितत्वात् कर्माश्रितत्वाच्च। नापि गुणः कर्म वा, गुणाश्रितत्वाच्च। नापि जातयः, अभावाश्रितत्वात्, द्रव्यत्वेन जातिसङ्करप्रसङ्गाच्च। द्रव्यत्वस्यानित्यत्वका-र्यत्वद्रव्याश्रितत्वपरिहारेण गगनादौ वर्तमानत्वात्। अनित्यत्वकार्यत्वद्रव्याश्रितत्वा-दीनां च द्रव्यत्वपरिहारेण कर्मादौ विद्यमानत्वात्। गुणत्वेन जातिसङ्करप्रसङ्गाच्च। सामान्यवत्त्वादीनां च सत्तया तुल्यव्यक्तिकदोषग्रस्तत्वात्। न समवायः, अभावेऽपि

विद्यमानत्वात्, असंबन्धत्वाच्च । न विशेषः, अनेकाश्रितत्वात् । नाभावः, प्रतियोग्यनिरूप्यत्वात् । नापि पदार्थान्तरम्, अनङ्गीकारादिति ।

उच्यते । जातय एवैताः, अभावाश्रितत्वस्य च सत्तायां व्यभिचारात् । जातिसङ्करस्य चादूषणत्वात् । दूषणत्वे वा द्रव्यत्वस्याप्युच्छेदात् । विशेषग्रहणाभावात् । ये परस्परपरिहारवत्त्वे सति समानाधिकरणे न ते जाती । यथा भूतत्वेन्द्रियत्वे । परस्परपरिहारवत्त्वे सति स[ा]मानाधिकरण[णे] च द्रव्यत्वानित्यत्वे । तस्मान्न जातीयमिति [जाती त इति] चेत्—न, द्रव्यत्वांशे बाधात् ।

अथानित्यत्वादयो न जातयः द्रव्यत्वसमानाधिकरणत्वे सति द्रव्यत्वाभावत्वनिष्ठत्वात्, रूपाभाववदिति चेत्—न, सत्तायां व्यभिचारात्, सत्तान्यत्वेन हेतुविशेषणत्वे च बाधात् । नित्यत्वे सत्यनेकाश्रितभावत्वस्य नित्यत्वे सत्यनेकसमवेतत्वस्य वा जातित्वस्य प्रकृते प्रमाणसिद्धत्वात् । तुल्यव्यक्तिकत्वस्यापि जातिदूषणत्वानङ्गीकारात् । सन्तु वा नित्यत्वद्रव्याश्रित[त्व]ादयः पदार्थान्तराणि, द्रव्यादिलक्षणरहितत्वात् ।

न च षडेव भावा इति नियमव्याकोपः सप्तमभावस्यापि प्रमितत्वेन षडेव भावा इति नियमस्यानङ्गीकारात् । न चैवं पदार्थानामानन्त्यम् । प्रमेयत्वादीनामनन्तत्वेऽपि धर्मत्वेनैव···· किं धर्मपदार्थस्य लक्षणम् ? द्रव्यादिषट्कलक्षणरहितत्वे सति भावत्वमेव, सन्तु वा नित्यत्वद्रव्याश्रय[त्व]ादयो भावविशेषा एव । अथानित्यत्वद्रव्याश्रितत्वादयो भावाः प्रतियोग्यनिरूप्यत्वात् घटवदिति चेत्—न, भावत्वं किं सत्ता, किं वा षल्लक्षणान्यतमत्वम्, किं वा भावोऽयं भावोऽयमित्यनुगतप्रतीतिसिद्धो धर्मविशेषः, प्रतियोग्यनिरूप्यत्वं वा, निष्प्रतियोगित्वं वा ? प्रथमे सिद्धसाधनम्, अभावे सत्ताङ्गीकारात् । द्वितीये बाधः । तृतीयेऽप्रसिद्धविशेषणत्वम्, भावोऽयं भावोऽयमित्यनुगतमतेरसिद्धत्वेन धर्मविशेषणस्याप्यसिद्धेः, सिद्धत्वेऽपि हेतोरसिद्धत्वात् । चतुर्थे साध्यविशिष्टत्वम्, अपक्षधर्मत्वं बाधश्च प्रमेयत्वादिनिरूपकेन्द्रियादीनां स्वभावप्रतियोगित्वेन प्रमेयत्वादीनां प्रतियोगिनिरूप्यत्वात् । दृष्टान्तस्य साध्यविकलत्वं च । घटादीनामपि स्वभावप्रतियोगीन्द्रियानिरूप्यत्वात् । अपि च प्रमेयत्वं नाम प्रमाविषयत्वम् । तच्च प्रमानिरूप्यं घटाभाव इव घटनिरूप्यं तदवच्छेदेन प्रतीतेः । एवं ज्ञेयत्वं ज्ञाननिरूप्यम् । अभिधेयत्वमभिधानविषयत्वम् । कार्यत्वं कार्यनिरूप्यम् । अनित्यत्वमनित्यनिरूप्यम् । द्रव्याश्रितत्वं द्रव्याश्रितनिरूप्यमिति । प्रमेयत्वादीनां प्रतियोग्यनिरूप्यत्वमसिद्धमिति । पञ्चमेऽपि हेतोरसिद्धत्वं बाधश्च, प्रमेयत्वादीनां प्रमादिप्रतियोगिकत्वस्यानुभवसिद्धत्वात् प्रमेयत्वादीनां किं भावत्वे प्रमाणमिति चेत्—न, अभावत्वं यदि भावलक्षणकर्मत्वाभावः, अभावशब्दवाच्यत्वं वा तदा द्रव्यादिषल्लक्षणात्यन्ताभाववत्त्वमेव तत्र प्रमाणम्, अथ द्रव्यादिषल्लक्षणात्यन्ताभाववत्त्वम्, तदा तस्य घटाभावादौ प्रत्यक्षत्वे प्रकृतेऽपि प्रत्यक्षमेव । अनुमेयत्वेऽनुमानमेवेति सन्तोष्टव्यम् । अथ प्रमेयत्वं कस्याभावः ? प्रमाया एव । अथ प्रमेयत्वं प्रमाया न प्रागभावः अनाशित्वात्, न प्रध्वंसः उत्पत्तिरहितत्वात्, नात्यन्ताभावः प्रमासमाना-



धिकरणत्वात्, नान्योन्याभावः, प्रमायामपि विद्यमानत्वादिति मन्यसे तन्न, प्रमेयत्वस्य प्रमायामभावत्वाङ्गीकारात् ।

**अन्ये** तु, प्रमेयत्वं प्रमात्यन्ताभावः, प्रमानिष्ठत्वे सति प्रमाभावत्वस्य प्रमात्यन्ताभावलक्षणत्वादित्याहुः । तन्न, अस्य प्रमालक्षणस्य प्रमान्योन्याभावगतत्वेनातिव्यापकत्वात् । अन्योन्याभावलक्षणं हि तत्त्वेन लक्षणं विशेषणीयमिति चेत्—न, तस्यैव वक्तुमशक्यत्वात् । शक्यत्वे वा प्रमेयत्वस्य प्रमात्यन्ताभाव एवान्तर्भावानङ्गीकारादिति । एवमभिधेयत्वादयोऽपि निर्वक्तव्याः ।

यद् वा प्रमेयत्वं प्रमात्यन्ताभावः । अथ प्रमात्यन्ताभावशब्देन किमेकैकस्याः प्रमाया अत्यन्ताभावो विवक्षितः किं वा सर्वप्रमाणानां, सर्वात्यन्ताभावः, सर्वप्रमाप्रतियोगिक एकोऽत्यन्ताभावो वा ? नाद्यः, एकैकप्रमात्यन्ताभावस्य एकैकप्रमाश्रय एवाविद्यमानत्वेन प्रमेयत्वस्य केवलान्वयित्वभङ्गात् । न द्वितीयः, सर्वप्रमाप्रतियोगिसर्वप्रमात्यन्ताभावानां क्वचिदप्यविद्यमानत्वेन केवलान्वयित्वभङ्गात् । न तृतीयः, सर्वप्रमाप्रतियोगिकस्यैकस्यात्यन्ताभावस्यासंभवात् प्रतियोगिभेदस्याभावभेदत्वादिति मन्यसे—तन्न, एकैकप्रमात्यन्ताभावस्यैव प्रमेयत्वेनाङ्गीकारात् । न चैवं प्रमेयत्वस्य केवलान्वयित्वभङ्गः, तत्तत्प्रमाश्रयेऽपि तस्यास्तस्याः प्रमाया अत्यन्ताभावाङ्गीकारात् । ज्ञानादीनामप्यवृत्तित्वात् । एवं सति प्रमाव्यक्तीनामानन्त्यात् अनन्तानि प्रमेयत्वादीनि स्युरिति चेत्—सत्यमेतत्, अनन्तप्रतियोगिकानन्तप्रमात्यन्ताभावनां सर्वैरप्यङ्गीकारात् । अस्तु वा सर्वप्रमाप्रतियोगिक एकोऽत्यन्ताभावः प्रमेयत्वम् । न चास्य केवलान्वयित्वानुपपत्तिः, कतिपयप्रमावत्सु सर्वात्मसु सर्वप्रमाप्रतियोगिकैकात्यन्ताभावसंभवात् ।

एवं ज्ञानात्यन्ताभावो ज्ञेयत्वम् । शब्दात्यन्ताभावोऽभिधेयत्वमिति । यद् वा कालात्यन्ताभावः प्रमेयत्वम् । दिगत्यन्ताभावो ज्ञेयत्वम् । आकाशात्यन्ताभावोऽभिधेयत्वमिति । यद् वा प्रमात्यन्ताभाववत्त्वं प्रमेयत्वम् । ज्ञानात्यन्ताभाववत्त्वं ज्ञेयत्वम् । शब्दात्यन्ताभाववत्त्वमभिधेयत्वमिति ।

ननु प्रमात्यन्ताभाववत्त्वं किं प्रमाविशेषात्यन्ताभावः, प्रमाविशेषात्यन्ताभावाश्रयत्वं वा, सर्वप्रमाप्रतियोगिकाः सर्वेऽत्यन्ताभावो वा, तद्वत्त्वं वा, सर्वप्रमाप्रतियोगिक एकैकात्यन्ताभावो वा, तद्वत्त्वं वा ? नाद्यः, गतार्थत्वात् । न द्वितीयः, वत्यर्थवैयर्थ्यात् । न तृतीयः, पूर्ववदेव दूषितत्वात् । न चतुर्थः, तत एव वत्यर्थवैयर्थ्याच्च । न पञ्चमः, गतार्थत्वादेव । न षष्ठः, वत्यर्थवैयर्थ्यादिति । तन्न, प्रमाविशेषात्यन्ताभाववन्निष्ठस्य प्रमात्यन्ताभाववत्त्वस्य प्रमेयत्वेन विवक्षितत्वात् । न च प्रमावत्यात्मनि प्रमात्यन्ताभावासंभवात् प्रमात्यन्ताभाववत्त्वं प्रमेयत्वं न घट इति प्रमेयत्वस्य केवलान्वयित्वस्यानुपपत्तिरिति वाच्यम् । देवदत्तनिष्ठप्रमावत्यपि देवदत्तयज्ञदत्तनिष्ठप्रमात्यन्ताभावसंभवात् । यथा हि देवदत्तस्य यज्ञदत्तादिनिष्ठप्रमासंभवेऽपि देवदत्तनिष्ठप्रमासंभवात् प्रमावत्त्वम्, एवं देवदत्तनिष्ठप्रमात्यन्ताभावासंभवेऽपि यज्ञदत्तनिष्ठप्रमात्यन्ता-

भावसंभवात् । प्रमात्यन्ताभाववत्त्वमपि यज्ञदत्तनिष्ठप्रमाणां प्रमात्वेन तदत्यन्ताभावानामपि प्रमात्यन्ताभाववत्त्वात् । तेन प्रमावत्यपि प्रमात्यन्ताभाववत्त्वं प्रमेयत्वं दुर्वारम् । न च वत्यर्थवैयर्थ्यम्, सर्वेषामपि प्रमात्यन्ताभावानां स्वप्रतियोगिसमानाधिकरणत्वासंभवेन केवलान्वयित्वानुपपत्तेः । अस्मिन् पक्षे विज्ञानादीनामव्याप्यवृत्तित्वानङ्गीकारात् यदि न प्रमात्यन्ताभावः केवलान्वयी, तर्हि तद्वत्त्वमपि केवलान्वयित्वम् । तद्व्यावृत्तिस्थल एव तद्वत्त्वस्यापि व्यावृत्तेरिति चेत्--न, एकप्रमात्यन्ताभावव्यावृत्तिस्थले तद्वत्त्वस्यैव व्यावृत्तत्वेऽपि प्रमात्यन्ताभावान्तरसंभवेन प्रमात्यन्ताभाववत्त्वस्याव्यावृत्तत्वात् । एकधूमाभाववति तद्धूमवत्त्वस्य व्यावृत्तत्वे धूमान्तरसंभवेन धूमवत्त्वाव्यावृत्तेः सर्वलोकसिद्धत्वात् । अन्यथैकधूमव्यावृत्तौ पर्वते धूमवत्त्वस्य व्यावृत्तत्वेन अपक्षधर्मत्वप्रसङ्गात् । महानसे चैकधूमव्यावृत्तौ धूमवत्त्वस्य व्यावृत्तत्वेन व्याप्यत्वाभावप्रसङ्गाच्च । प्रमात्यन्ताभावानां व्यावृत्तत्वे प्रमात्यन्ताभाववत्त्वमनुवृत्तमित्यत्र किं प्रमाणमिति चेत्--अयं प्रमात्यन्ताभाववान्, अयं प्रमात्यन्ताभाववानिति प्रत्यक्षमेव । अयं धूमवानयं धूमवानिति प्रत्यक्षमिव धूमवत्त्वस्यानिवृत्तत्वे प्रमावत्त्वप्रमात्यन्ताभावयोरेकत्र समावेशे प्रमावत्त्वतदत्यन्ताभावयोर्विरोधोच्छेदप्रसङ्ग इति चेत्--न, प्रमात्यन्ताभाववत्त्वस्य प्रमावत्त्वात्यन्ताभाववत्त्वस्य प्रमावत्तात्यन्ताभाववत्त्वानङ्गीकारात् । प्रमावत्त्वात्यन्ताभावस्य च प्रमावत्त्वेनैकत्र समावेशानङ्गीकाराच्च । तर्हि प्रमात्यन्ताभाववत्त्वं तस्याभाव इति चेत्--न, प्रमात्यन्ताभावस्यैव धूमवत्त्वमिव धूमस्य, घटत्वमिव घटस्येति ।

यद् वा, प्रमान्योन्याभाववत्त्वं प्रमेयत्वम् । ज्ञानान्योन्याभाववत्त्वं ज्ञेयत्वम् । शब्दान्योन्याभाववत्त्वमभिधेयत्वमिति । न च वत्यर्थवैयर्थ्यम्, प्रमाविशेषान्योन्याभावानां स्वप्रतियोगिव्यावृत्तत्वेन केवलान्वयित्वानुपपत्तेः । प्रमान्योन्याभाववत्त्वस्य चायं प्रमान्योन्याभाववान् अयं प्रमान्योन्याभाववानित्यनुवृत्तप्रत्ययवत्त्वेन केवलान्वयित्वोपपत्तेः । एवं शब्दान्योन्याभावत्वादावपि वाच्यमिति ।

यद् वा, ईश्वरप्रमाविषयत्वं प्रमेयत्वम्, ईश्वरज्ञानविषयत्वं ज्ञेयत्वम्, ईश्वरेच्छाविषयत्वमभिधेयत्वमिति । यदा पुनरस्तित्वं सत्ताव्यतिरिक्तम्, तदास्तित्वं सदत्यन्ताभाववत्त्वं, सदन्योन्याभाववत्त्वं वा, संयोगात्यन्ताभावो वा, ईश्वरविषयप्रयत्नविषयं वेति निर्वक्तव्यमिति ।

यद् वा, प्रमेयत्वं प्रमाभाववत्त्वम्, ज्ञेयत्वं ज्ञानभाववत्त्वम्, अभिधेयत्वं शब्दाभाववत्त्वमिति । न च प्रमेयत्वादौ केवलान्वयित्वानुपपत्तिः । आत्मप्रमाप्रागभावप्रध्वंसयोरन्यत्र च प्रमात्यन्ताभावान्योन्याभावयोश्च विद्यमानत्वेन प्रमाभाववत्त्वस्य सर्वत्र विद्यमानत्वात् । एवं ज्ञेयत्वादावपि वाच्यमिति ।

एवं प्रमाविषयत्वसंशयविषयत्वविपर्ययविषयत्वानध्यवसायविषयत्वस्मृतिविषयत्वसाक्षात्कारविषयत्वानुमितिविषयत्वादयः सकलपदार्थसाधर्म्याणि ।

द्रव्यगुणकर्मसामान्यविशेषसमवायानां भावत्वम् । ननु किमिदं भावत्वम्—प्रतियोगिनिरूप्यत्वाभावो वा, षडन्यतमलक्षणत्वं वा, विधिप्रत्ययविषयत्वं वा,



निर्विकल्पकविषयत्वं वा पृथक्त्वसंयोगविभागपरत्वापरत्वसमवायलक्षणरहितत्वे सति सविकल्पकमात्रविषयत्वाभावो [वा], द्रव्यादिषल्लक्षणरहितत्वाभावो वा, विभागो[भावो]ऽयमिति प्रत्ययविषयत्वं वा, धर्मान्तरं वा ? नाद्यः, द्रव्यादीनां स्वभावप्रतियोगीन्द्रियादिनिरूप्यत्वेन तद्रहितत्वापत्तेः । न द्वितीयः, द्रव्यादिषल्लक्षणातिरिक्ततदन्यतमवत्त्वस्य निर्वक्तुमशक्यत्वात् । न तृतीयः, विधिप्रत्ययस्यानिरूपणात् । प्रत्ययत्वावान्तरो वा जातिविशेषो विभागस्य विभज्यमाननिरूप्यत्वेन पृथक्त्वपरत्वापरत्वानां चावधिनिरूप्यत्वेन प्रतियोगिनिरूप्यत्वाभाववन्निर्विकल्पकविषयत्वासंभवात् । अभाव[अथ]विधिप्रत्यय(विषय)त्वमिति चेत्—न, तत्र प्रमाणाभावात् ।

न चतुर्थः, संयोगविभागपृथक्त्वपरत्वापरत्वसमवायेष्वव्यापकत्वात् संयोगसमवाययोः संबन्धिनिरूप्यत्वेन विभागस्य विभज्यमाननिरूप्यत्वेनाभावेऽतिव्यापकत्वाच्च । अभावो निर्विकल्पकविषयः प्रमेयत्वात्, घटवदित्यनुमानात् । न चास्य समवायाभावानैकान्तिकत्वम्, तेषामपि पक्षतुल्यत्वात् । अथ घटाभावादीनां प्रतियोगिघटितमूर्त्तित्वेन सविकल्पकविषयत्वनियमान्निर्विकल्पकविषयत्वं बाधितमिति चेत्—न, प्रतियोगिघटितमूर्त्तित्वं किं प्रतियोगिभिन्नत्वाभावः, प्रतियोग्यवच्छिन्नत्वं वा ? न प्रथमः, प्रतियोगितदभावयोर्भेदस्य प्रत्यक्षसिद्धत्वात् । द्वितीयेऽपि प्रतियोग्यवच्छिन्नत्वं किमभावधर्मः, स्वरूपं [वा] ? नाद्यः, तदप्रतीतावप्यभावस्य निर्विकल्पकविषयत्वसम्भवात् । धर्मानवच्छेदेनापि घटादेर्निर्विकल्पकविषयत्वात् । न द्वितीयः, प्रतियोग्यवच्छिन्नस्याभावधर्मत्वेन तत्स्वरूपत्वे प्रमाणाभावात् । घटाप्रतियोगित्वस्य सकलघटाभावनिष्ठत्वेन परस्परव्यावृत्तघटाभावस्वरूपत्वानुपपत्तेश्च ।

न पञ्चमः, अभावस्य निर्विकल्पकाविषयत्वेन सविकल्पकमात्रविषयत्वासम्भवेन तदभावस्यासम्भवग्रस्तत्वात् । गुरुत्वमहत्त्वदीर्घत्वाभावव्यापकत्वाच्च । गुरुत्वमहत्त्वादेरिदमस्माद् गुरु, इदमस्मान्महदिति प्रतियोगिनिरूप्यत्वेन निर्विकल्पकाविषयत्वात् सविकल्पकमात्रविषयत्वसम्भवात् । तेषामवधिनिरूप्यत्वेऽपि निर्विकल्पकविषयत्वमिति चेत्—न, पृथक्त्वादीनामप्यवध्यादिनिरूप्याणां निर्विकल्पकविषयत्वसम्भवेन तत्तद्व्यावर्तकविशेषणानर्थक्यप्रसङ्गात् । सुखशब्दाद्युत्कर्षनिकर्षादिजाताव्यापकत्वाच्च । उत्कर्षनिकर्षादेरिदमस्मादुत्कृष्टम्, इदमस्मादुत्कृष्टमिति प्रतियोगिनिरूप्यत्वेन निर्विकल्पकाविषयत्वात् । सविकल्पकमात्रविषयत्वात् तदभावसम्भवात् ।

नापि षष्ठः, द्रव्यादिषल्लक्षणरहितत्वस्य सर्वत्र सम्भवेन तदभावस्यासम्भवग्रस्तत्वात् । द्रव्यादीनामेकैकलक्षणवत्त्वेऽपि षल्लक्षणरहितत्वात् ।

नापि सप्तमः, भावोऽयमिति बुद्धिशब्देन किं भावबुद्धिमात्रं विवक्षितम्, भावोऽयमिति बुद्धिविशेषो वा ? नाद्यः, परस्पराश्रयप्रसङ्गात् । भावेन बुद्धिनिरूपणात्, तया च भावनिरूपणात् । न द्वितीयः, अव्यापकत्वप्रसङ्गात्, अतीतानागतभावाना-

मेतद्विषयत्वासम्भवात्, अस्या बुद्धेरेतद्विषयत्वासम्भवाच्च ज्ञानस्वप्रकाशत्वनिषेधात् ।

नाप्यष्टमः, तत्र मानाभावादिति—तन्न, द्रव्यादिषल्लक्षणान्यतमवत्त्वस्यैव भावत्वात् । न च द्रव्यादिषल्लक्षणान्यतमवत्त्वमशक्यनिरूपणम्, द्रव्यादिषल्लक्षणप्रतियोगिकषडन्योन्याभाववत्त्वात्यन्ताभावस्य द्रव्यादिषल्लक्षणान्यतमत्वात् । द्रव्यादिषल्लक्षणप्रतियोगिकषडत्यन्ताभाववत्त्वात्यन्ताभावो वा भावत्वलक्षणम् । न चेदं द्रव्यादावभावव्यापकम्, द्रव्यादिषल्लक्षणप्रतियोगिकषडत्यन्ताभाववत्त्वस्य द्रव्यादावसम्भवात् । अस्तु वा भावत्वं धर्मान्तरम् । न च प्रमाणाभावः, भावोऽयं भावोऽयमिति प्रत्यक्षस्यैव तत्र प्रमाणत्वात् । न चेदं प्रत्यक्षमप्यसिद्धम्, भावोऽयमित्यनुगतव्यवहारादेव तत्सिद्धेः । अनुमानं वा तत्र प्रमाणम् । अयं घट एतत्प्रवृत्तिद्रव्यावृत्तित्वानधिकरणैतद्वृत्तिगुणव्यावृत्तित्वा[द]नधिकरणैतत्प्रवृत्तिकर्मव्यावृत्तत्वानधिकरणैतत्प्रवृत्तिजातिव्यावृत्तत्वानधिकरणैतद्वृत्तिविशेषव्यावृत्तत्वानधिकरणैतत्प्रवृत्त्यभावव्यावृत्तत्वसमवायव्यावृत्तत्वानधिकरणैतद्वृत्त्यधिकरणवत् मेयत्वात्, घटवदिति । न चात्राप्रसिद्धविशेषणत्वम्, एतद्वृत्तित्वे सति द्रव्यव्यावृत्तत्वान्यतमस्यैतद्घटान्योन्याभावादेः पटादौ प्रसिद्धत्वाच्च । न चात्रैतद्घटत्वमुपाधिः, पक्षेतरत्वात् । द्रव्यव्यावृत्तत्वरहितगुणव्यावृत्तत्वरहितकर्मव्यावृत्तत्वरहितजातिव्यावृत्तत्वरहितविशेषव्यावृत्तत्वरहितसमवायव्यावृत्तत्वरहिताभावव्यावृत्तत्वरहिताधिकरणमित्येतावतैव भावत्वसिद्धेः व्यर्थं प्रत्येकमेतत्प्रवृत्तिग्रहणमिति चेत् — न, एवंविधधर्मस्याप्रसिद्धत्वेन अप्रसिद्धविशेषणत्वापत्तौ तत्परिहारार्थमेतत्प्रवृत्तिपदस्योपादानात् । द्रव्यादिव्यावृत्तत्वाभाववृत्तित्वरहितस्याप्रसिद्धत्वेऽप्येतद्वृत्तित्वविशिष्टद्रव्यव्यावृत्तत्वादिरहितस्यैतद्वृत्तित्वविशिष्टाभाववृत्तित्वरहितस्य चैतद्घटान्योन्याभावादेः प्रसिद्धत्वात् द्रव्यादिषल्लक्षणान्यतमवत्त्वादिनार्थान्तरतेति चेत्—न, अभावव्यावृत्तद्रव्यादिषट्पदार्थानुगतधर्मे विप्रतिपन्नं प्रत्यनुमानोपन्यासात् । द्रव्यादिषल्लक्षणान्यतमत्वद्रव्यादिषल्लक्षणात्यन्ताभाववत्त्वात्यन्ताभावव्यतिरिक्तत्वेन साध्यविशेषणाच्च । अभावव्यावृत्तद्रव्यादिषट्पदार्थानुगतधर्ममात्रचरितार्थस्य द्रव्यादिषल्लक्षणान्यतमवत्त्वादावौदासीन्याच्च ।

न चैवं द्रव्यादिद्वित्रिचतुःपञ्चपदार्थमात्रवृत्तिधर्मसिद्धिप्रसङ्गः, इष्टत्वात् । यद् वा, अयं घट एतद्वृत्तिव्यावृत्तत्वरहितैतद्वृत्तिजातिमत्त्व[स्य]व्यावृत्तत्वरहितैतद्वृत्तिविशेषव्यावृत्त[त्व]रहितैतद्वृत्तिसमवायव्यावृत्तत्वरहिताभावव्यावृत्तत्वरहितजातिमान्, जातिमत्त्वात्, पटवदिति भावत्वापरपर्यायजातिसाधनम् । न चात्राप्रसिद्धविशेषणत्वम्, पटत्वादौ साध्य[ा]प्रसिद्धेः । न च जात्यादौ सत्ताङ्गीकारे जातिमत्त्वस्य व्यभिचारः, तेषां पक्षतुल्यत्वात्, जातित्वविशेषत्वादिजातिस्वीकारात् । न चाभावे सत्ताङ्गीकारे जातिमत्त्वस्य तत्र व्यभिचारः, अभावे सत्त्वमभ्युपगच्छता तत्र घटाभावत्वादिस्वीकारात् । घटत्वपटाभावत्वादेस्तुल्ययोगक्षेमत्वात् । न चानेनैव न्यायेन द्रव्यादिद्वित्रि-



चतुःपञ्चपदार्थमात्रवृत्तिपृथिव्यादिद्वित्र्यादिमात्रवृत्तिरूपादिद्वित्र्यादिमात्रवृत्तिजात्यादिसिद्धिप्रसङ्गः । असति बाधे तत्सिद्धेरिष्टत्वात् । सति बाधे तत्रैव तन्निवारणादिति ।

सेयं जातिर्भावत्वम्, तदभावश्चाभावत्वमिति । द्रव्यादीनां पञ्चानां समवायलक्षणरहितत्वे सति भावत्वम् ।

द्रव्यादीनां पञ्चानां समवायित्वमनेकत्वं [च]

साधर्म्यमिति प्रशस्तपादाः । तन्न, समवायित्वं किं समवायः, समवायाश्रयत्वं वा ? नाद्यः, समवाया[दाव]पि समवायस्वीकारात् । न द्वितीयः, तत एव समवायस्यैव साधर्म्यत्वोपपत्तेराश्रयत्वविशेषणवैयर्थ्याच्च । अनेकत्वं च किं संख्या, स्वरूपभेदो वा ? नाद्यः, गुणादावसंभवात् । न द्वितीयः, स्वरूपभेदस्य व्यावृत्तत्वेनानुगतत्वानुपपत्तेः, धर्मत्वासंभवाच्च । गुणकर्मसामान्यविशेषसमवायाभावानां द्रव्यत्वरहितत्वगुणत्वरहितत्वकार्याश्रयत्वरहितत्वादिगुणाभावस्यैव धर्मत्वोपपत्तेः वत्यर्थवैयर्थमिति चेत्—न, गुणाभावस्य द्रव्येष्वपि विद्यमानत्वात् स्वगतकार्यगुणप्रागभावप्रध्वंसगुणान्योन्याभावानां सर्वत्र संभवात्, द्रव्यान्तरवर्तिगुणानां द्रव्यान्तरेऽत्यन्तासंभवाच्च ।

अनुत्पन्नक्रियविनष्टद्रव्यव्यतिरिक्तमूर्तव्यतिरिक्तानां क्रियावत्त्वाभावं साधर्म्यम् । नित्यद्रव्यव्यतिरिक्तानामाश्रितत्वम् । परमाणूनां घटादिवत् भूतलाश्रितत्वमस्तीति चेत्—न, प्रमाणाभावात् । न तावत् परमाणूनामाश्रितत्वे प्रत्यक्षं प्रमाणमनङ्गीकारात् । नाप्यनुमानम्, लिङ्गाभावात् । परमाणव आश्रिताः, [अ]मूर्तत्वात् पटवदिति चेत्—न, नित्यद्रव्यत्वाभावेन सोपाधित्वात् । परमाणवो नाश्रिताः नित्यद्रव्यत्वात्, गगनवदिति सत्प्रतिपक्षत्वाच्च । यद् वा, आश्रितत्वं सकलपदार्थधर्मः, गगनादीनामाश्रितत्वात्, कालाश्रितत्वाद् वा । न चात्र मानाभावः, गगनादय आश्रिताः, कालाश्रिता वा प्रमेयत्वात्, कालगुणवदित्यनुमानात् । न चात्र नित्यद्रव्यत्वाभाव उपाधिः, साध्याभाववतो व्यावर्त्यस्याभावेन पक्षेतरत्वात् । न च काल एव व्यभिचारः, कालस्यापि कालाश्रितत्वात् । न चात्माश्रयदोषः, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावे आत्माश्रयत्वस्य दूषणत्वाभावादिति । तन्न, कालानाश्रिते कालान्योन्याभावकालगुणात्यन्ताभावादौ व्यभिचारात् । भावत्वेन हेतुविशेषणे व्यर्थविशेष्यत्वापातात् । भावत्वमेव हेतुरत्रेति चेत्—न, शब्दज्ञानादौ व्यभिचारात् । तेऽपि कालाश्रिता एवेति चेत्—न, गगनादिलक्षणानामभिव्यापकत्वप्रसङ्गात् । तस्माद् गगनादीनां कालाश्रितत्वं निष्प्रमाणकम्, आश्रितत्वं च सप्रमाणकमिति सिद्धम् । गगनादयः कुत्राश्रिता इति चेत्—मूर्तेष्वेव । अतएव गगनादीनां सर्वगतत्वम् आचार्या मन्यन्ते ।

द्रव्यादीनां त्रयाणामेव सत्तासंबन्धः सामान्यविशेषवत्त्वं स्वसमयार्थशब्दाभिधेयत्वं साधर्म्यमित्यपि न युक्तम्, सत्तासंबन्धस्य सत्तायामपि विद्यमानत्वात्, संबन्धस्योभयनिष्ठत्वात्, गोत्वादावपि विद्यमानत्वाच्च । सत्तानिष्ठसमवायस्य तत्राप्यङ्गीकारात् । सत्ताश्रयत्वं संबन्धः, न तु सत्तासमवाय इति चेत्—न, तस्यापि जात्यादौ

स्वीकारात्, संबन्धपदवैयर्थ्याच्च। सत्तैव साधर्म्यमस्तीति चेत्—न, तस्याः सकलपदार्थधर्मत्वात्। अथायं घट एतद्वृत्तिद्रव्यव्यावृत्तत्वरहितैतद्वृत्तिगुणव्यावृत्तत्वरहितैतद्वृत्तिकर्मव्यावृत्तत्वरहितैतद्वृत्तिद्रव्यत्वगुणत्वकर्मत्वरहितजातिमान्, जातिमत्त्वात् पटवदित्यनुमानसिद्धा जातिः सत्ता। सा च द्रव्यादीनां त्रयाणां साधर्म्यमिति मन्यसे—तन्न, तस्याः सत्त्वव्यवहाराहेतुत्वेन सत्ताशब्दवा[च्यत्वा ?]नङ्गीकारात्। सद्व्यवहारहेतुत्वं च तदभावेऽपि जात्यादौ सद्व्यवहारदर्शनात्। अन्यथा द्रव्यादेरपि सद्व्यवहारहेतुत्वापत्तौ सत्ताशब्दवाच्यत्वापत्तेः।

सामान्यविशेषवत्त्वमपि न त्रयाणामेव। जात्यादावपि जातित्वादिविशेषसामान्यसंभवात्।

स्वसमयार्थशब्दाभिधेयत्वमपि न युक्तम्, पूर्वोपपादितद्रव्यादित्रयमात्रवृत्तिनिमित्तत्वोपपत्तेः। **सूत्रकारेण** एवंविधसमयस्याकृतत्वाच्च। **सूत्रकारशिष्यैः** एवंविधः समयः कृत इति चेत्—न, प्रमाणाभावात्। प्रवृत्तिनिमित्त[ा]संभवेऽपि समयकरणस्योन्मत्तप्रलापत्वात्। द्रव्यादित्रयमात्रवृत्तिनिमित्तासंभवेऽपि द्रव्यत्वगुणत्वकर्मत्वनिमित्तसंभवेनार्थशब्दस्याक्षादिपदवदनेकार्थोपपत्तेश्च। धर्मजनकत्वं धर्मजनकानामेव। अधर्मजनकत्वमप्यधर्मजनकानामेव।

कार्यत्वं कारणवतामेव। अनित्यत्वं विनाशकारणवतामेव।

सामान्यादीनामेव बुद्धिलक्षणत्वं साधर्म्यमिति **प्रशस्तपादाः**। तन्न, बुद्धौ सामान्यादिनिष्ठत्वाभावेन सामान्यादिलक्षणत्वानुपपत्तेः, आत्मनिष्ठत्वेनातिव्यापकत्वाच्च। बुद्धिशब्देन बुद्धिविषयत्वं विवक्षितमिति चेत्—न, द्रव्यादावतिव्यापकत्वात्। अथानुवृत्तबुद्धिविषयत्वं सामान्यलक्षणम्, व्यावृत्तबुद्धिविषयत्वं विशेषलक्षणम्, इहेदमिति बुद्धिविषयत्वं समवायलक्षणमिति मन्यसे—तन्न, अनुगतबुद्धिविषयत्वादीनां सामान्यान्यैकैकनिष्ठत्वेन सामान्यविशेषत्वादिसमानधर्मत्वानुपपत्तेः उपपत्तौ वा सामान्यादिलक्षणत्वानुपपत्तेः। अथानुवृत्तबुद्धिविषयत्वव्यावृत्तबुद्धिविषयत्वेनेदमिति बुद्धिविषयत्वान्यतमत्वं बुद्धिलक्षणत्वं विवक्षितम्—तदपि न, तस्य द्रव्यादावपि संभवात्। घटोऽयमित्याद्यनुवृत्तबुद्धेः घटव्यावृत्तादिग्राहकत्वात् व्यावृत्तः परमाणुरित्यादेश्च परमाण्वादिग्राहकत्वात्। इह तन्तुषु पट इत्यादिबुद्धेश्च तन्तुपटादिग्राहकत्वादिति। अथानुवृत्तबुद्धिविषयत्वव्यावृत्तविषयत्वेन इदमिति बुद्धिविषयाव्यतिरिक्तलक्षणरहितत्वं बुद्धिलक्षणत्वशब्देन विवक्षितमिति मन्यसे—तन्न, सामान्यादिलक्षणान्तराणां वक्ष्यमाणत्वादिति ॥ ७॥

## द्रव्याणि द्रव्यान्तरमारभन्त इति ॥१.१.८॥

नन्वत्र द्रव्यारम्भकत्वं यदि द्रव्यसमवायिकारणत्वम्, तदा द्रव्याणीति किं सर्वद्रव्याणि विवक्षितानि, मूर्तानि वा, स्पर्शवन्ति वा, **अन्त्यावयवित्वरहितानि स्पर्शवन्ति** वा? नाद्यः, आकाशकालदिगात्ममनसां घटादीनां च द्रव्यसमवायिकारणत्वप्रसङ्गात्। न द्वितीयः, मनसोऽपि द्रव्यसमवायिकारणत्वप्रसङ्गात्। न तृतीयः,



घटादीनामपि द्रव्यसमवायिकारणत्वप्रसङ्गात्। न चतुर्थः, अन्त्यावयवित्वानिरुक्तेः, दिक्कालात्मनां द्रव्यजनकत्वप्रसङ्गाच्चेति—तन्न, यदा द्रव्यारम्भकत्वं द्रव्यसमवायिकारणत्वम्, तदा द्रव्याणीत्यनेन अन्त्यावयवित्वरहितस्पर्शवतां परिग्रहात्। न चान्त्यावयवित्वानिरुक्तिः, अवयवत्वरहितावयवित्वस्यान्त्यावयवित्वात्। यदा तु द्रव्य……
…… काशमनोव्यतिरिक्तद्रव्यपरिग्रहात्, मा भूद् वा द्रव्याणीत्युपात्तानां द्रव्याणामुपसङ्ग्राहकान्तरम्, तथापि द्रव्यसमवायिकारणत्वं तदा द्रव्याणीत्यनेनान्त्यावयवित्वरहितस्पर्शवतां परिग्रहात्। न चान्त्यावयवित्वानिरुक्तिः, अवयव[त्व]रहितावयवित्वस्यान्त्यावयवित्वात्। यदा तु द्रव्यारम्भकत्वं द्रव्यकारणत्वं वा साधर्म्यं घटत एव, तत्केषामिति चेत्—तन्त्वादीनामिति ब्रूमः। कियतामिति चेत्—न, संख्याविशेष[प]रिज्ञानस्यादूषणत्वात्। किमुपसंग्राहवतामिति चेत्—न, उपसंग्राहकान्तरानङ्गीकारात्। किमत्र प्रमाणमिति चेत्—न, इदं द्रव्यसमवायिकारणमिदं द्रव्यसमवायिकारणम्, इदं द्रव्यकारणमिदं द्रव्यकारणमिति प्रत्यक्षमेव। यदि च द्रव्यकारणत्वे गगनमनोऽन्यद्द्रव्यत्वमुपसंग्राहकमिष्यते, तदा गुणानां द्रव्यकारणत्वं न स्यात्। उपसंग्राहकस्याप्युपसंग्राहकान्तरापेक्षायामनवस्थानात्। उपसंग्राहकान्तरमन्तरेणापि तदवगमसंभवे द्रव्यसमवायिकारणत्वादेरपि तथैवागमसंभवात् मूलक्षतेरभावात् नेयमनवस्था दूषणमिति चेत्—न, पूर्वपूर्वोपसंग्राहकानवगमे तदुत्तरानवगमात् मूलक्षतेरावश्यकत्वात्। द्रव्याणि द्रव्यमारभन्त इत्येतावतैव चरितार्थत्वे व्यर्थमन्तरग्रहणमिति चेत्—न, आरभ्यारम्भकद्रव्ययोर्भेद इति प्रतिपादनार्थत्वात्।

सांख्या हि कार्यकारणयोरभेदमिच्छन्ति। प्रमाणयन्ति च तन्तवः पटान्न भिद्यन्ते पटकारणत्वात्। यत् पटाद् भिद्यते न तत् पटकारणम्, यथा घट इत्यादि—तन्न, पटकारणत्वस्य कुविन्दादौ व्यभिचारात् तेऽपि पक्षतुल्या इति चेत्—न, प्रत्यक्षबाधात्। पटाद् भिन्नाः कुविन्दादय इत्यपरोक्षानुभवस्य सर्वलोकसिद्धत्वात्। किं च घटादीनां पटभिन्नत्वमप्रमितं प्रमितं वा? नाद्यः, व्यतिरेकग्रहणाभावप्रसङ्गात्। न द्वितीयः, तेनैव न्यायेन तन्तूनामपि पटभेदसिद्धेर्दुर्वारत्वात्। पटकरणत्वस्य पटभिन्नरहितत्वाद् व्यावृत्तत्वेनासाधारणत्वाच्च। एतेन पटस्तन्तुभ्यो न भिद्यते, तन्तुकार्यत्वात्, यत् तन्तुभ्यो भिद्यते न तत् तन्तुकार्यम्, यथा घट इत्यादयः प्रयोगा निरस्ताः।

आरभ्यारम्भकयोर्भेदे किं प्रमाणमिति चेत्—अयं तन्तुरेतस्मात् पटाद्भिन्नः, अयं पट एतस्मात् तन्तोर्भिन्न इत्यादि प्रत्यक्षमनुमानं वा। अयं तन्तुरस्मात् पटाद् भिद्यते, तन्तुत्वात् [तन्त्वन्तरवत्।] अयं पट एतस्मात् तन्तोर्भिद्यते, पटत्वात् पटान्तरवदित्यादि। सोऽयमारभ्यारम्भकयोर्भेदान्तरग्रहणेन ज्ञाप्य इति सफलमन्तरग्रहणमिति। आरभ्यारम्भकभावस्य प्रत्यक्षानुमानाभ्यामेवावगतेः व्यर्थमन्तरग्रहणमिति चेत्—न, आरभ्यारम्भकभावस्यापि प्रत्यक्षानुमानावगतत्वेन तत्प्रतिपादक(स्यान्तरग्रहणस्य व्यर्थत्वे) सूत्रस्यापि व्यर्थत्वादिति ॥

## गुणाश्च गुणान्तरम् ।।१.१.९।।

आरभन्त इत्यनुषज्यते । अत्र च गुणाश्चेत्येकं सूत्रम् । गुणान्तरमिति द्वितीयमिति सूत्रकारस्य विवक्षितम् । तेन न केवलं द्रव्याणि द्रव्यान्तरमारभन्ते, अपि तु गुणा अपीति प्रथमसूत्रार्थः, **द्रव्यारम्भकसंयोगेश्वरज्ञानादीनां पटादिद्रव्यजनकत्वात् ।** चकारोऽनुक्तद्रव्यप्रागभावप्रतिबन्धकाभावसमुच्चयार्थः, द्रव्यप्रागभावप्रतिबन्धकाभावयोरपि द्रव्यकारणत्वात् । तेन द्रव्यजनकत्वं द्रव्यजनकद्रव्यगुणाभावानां साधर्म्यमिति सूत्रद्वयतात्पर्यम् । यदा तु

गुणाश्च गुणान्तरम्

इत्येतावदेकं सूत्रम्, आरम्भकत्वं च जनकत्वम्, चकारश्चानुक्तद्रव्यादिसमुच्चयार्थः, तदा सर्वपदार्थानां गुणजनकत्वं साधर्म्यमिति सूत्रार्थः । सर्वपदार्थानां विशेषणत्वेन विशेष्यत्वेन वा विशिष्टज्ञानजनकत्वेन गुणजनकत्वात् । यदा त्वारम्भकत्वमत्रासमवायिकारणत्वं चकारश्च कर्मसमुच्चयार्थः, तदा गुणकर्मणोरसमवायिकारणत्वं साधर्म्यमिति सूत्रार्थः । अथारम्भ इतिवदन्तरपदस्यापि पूर्वसूत्रगतस्यात्राप्यन्वयसंभवात्, अन्तरग्रहणं व्यर्थमिति चेत्—न, अनन्तरपदस्य द्रव्यपदानुपपत्तेरिति । यद् वा गुणाश्च इत्ययं चकारो **गुणान्तरम्** इत्यस्यानन्तरमावर्तनीयः । तेन गुणाश्चेत्यत्र चकारोऽनुक्तसमुच्चयार्थः । गुणान्तरम् इत्यत्र च कर्मसमुच्चयार्थः । तेन यथा गुणद्रव्ययोः ( द्रव्यजनकत्वं तथा ) गुणकर्मजनकत्वमपीति सूत्रार्थः संपद्यते ।। ९ ।।

यथा द्रव्यजनकत्वं द्रव्याणां साधर्म्यम्, गुणजनकत्वं [च] गुणानाम्, तथा कर्मजनकत्वं कर्मणां किं न स्यात् ? यथा वा द्रव्यगुणयोः कर्मजनकत्वं तथा ( कर्मणोऽप्यस्तु इति ) कर्मणान्वयपरिहारार्थं सूत्रम्

## कर्म कर्मसाध्यं न विद्यते ।।१.१.१०।।

इति । न तावत् कर्मणः कर्मजनकत्वे प्रत्यक्षं प्रमाणम्, इदं कर्म कर्मजनकमिति अपरोक्षानुभवविरहात् । नाप्यनुमानं लिङ्गाभावात् । अथ प्रथमकर्म कर्मजनकम्, नियमेन तदव्यवहितपूर्वक्षणवृत्तित्वात् शरवदिति चेत्—न, कर्मत्वाभावेन सोपाधित्वात् । न चास्य पक्षेतरत्वम्, जनकत्वरहितात्यन्तकर्मणो विपक्षाद् व्यावृत्तत्वात् । कर्मत्वेन सत्प्रतिपक्षाच्च । (प्रयोग)श्च कर्मणः कर्म[ा]जनकत्वे प्रमाणम् । आद्यं कर्म न कर्मजनकं कर्मत्वात् अन्त्यकर्मवदिति । अथ कर्म कर्मसाध्यं नेत्येतावतैव चरितार्थत्वात् विद्यत इति व्यर्थमिति चेत्—न, प्रमाणप्रतिपादकत्वात् । कुतो न कर्म कर्मसाध्यमित्यपेक्षायां विद्यते तत्र प्रमाणं कर्मत्वादिकमिति सूत्रव्याख्यानाच्च । अथ

कर्म कर्मसाध्यं न विद्यते

इति न युक्तम्, कर्मणः कर्मजनकत्वनिषेधावसरे कर्मणः कर्मजनक[न्य]त्वनिषेधस्याप्रस्तुतत्वात् । निषेधे अर्थात् कर्मणः कर्मजनकत्वनिषेधोऽपि सिध्यतीति चेत्—न, साक्षादेव कर्मणः कर्मजनकत्वनिषेधस्य कर्तुम[म]शक्यत्वेन कर्मणः कर्मजनक[न्य]त्व-



निषेधमुखेन तत्प्रतिपादनस्य[ा]गरीयस्त्वात् । तस्मात् कर्म कर्मजनकं न विद्यत इति [सूत्रणीय]मिति—तन्न, सूत्रार्थापरिज्ञानात् । कर्म साध्यं यस्य तत् कर्मसाध्यं, कर्मजनकम् । तेन कर्मजनकमिति साक्षादेव कर्मजनकत्वनिषेधः सिध्यतीति । यद् वा,

**सदनित्यं द्रव्यवत् कार्यम् [ १.१.७ ]**

[इत्यादिना] द्रव्यादीनां कारणत्वादिसाधर्म्यमुक्तम् । तदुपपादनार्थं

**द्रव्याणि द्रव्यान्तरमारभन्ते [ १.१.८ ]**

**गुणाश्च गुणान्तरम् [ १.१.९ ]**

इति सूत्रद्वयम् । ननु भवतु द्रव्यादीनां कारणत्वं द्रव्यादिजनकत्वात् । कर्मणस्तु न का[र्यम्] । न तावत् कर्मणः [न] कर्म कार्यं कर्मत्वादेव । नापि कार्यान्तरम्, अविद्यमानत्वादित्याशङ्कापरिहारार्थं सूत्रम्

**कर्म कर्मसाध्यं न विद्यते [ १.१.१० ]**

इति । यद्यपि कर्म कर्मसाध्यं न, तथापि संयोग इति कर्मणः कारणत्वोपपत्तिरिति सूत्रार्थः ।। १० ।।

## कार्याविरोधि द्रव्यं कारणाविरोधि च ।। १.१.११ ।।

कार्यमविरोधि अविनाशकं यस्य तत् कार्याविरोधि । कार्याविनाश्यमित्यर्थः । कारणमविरोधि यस्य तत् कारणाविरोधि । तदनेन कार्यकारण[ा]विरोधित्वं द्रव्याणां साधर्म्यमुक्तमिति भाष्यकारादयः । तदयुक्तम्, सर्वकार्यद्रव्याणां समवायिकारणासमवायिकारणविनाशविनाश्यानां कार्यविनाश्यत्वेन तद्विरहानुपपत्तेः । समवायिकारणासमवायिकारणविनाशयोः कार्यत्वात् स्वकार्यविनाश्यत्वाभावः कार्याविनाश्यत्वमिति चेत्—न, स्वशब्देन किं कारणमात्रं विवक्षितम्, समवायिकारणं वा, द्रव्यसमवायिकारणं वा, समवायिकारणविशेषो वा ? न प्रथमः पूर्वोक्तदोषात्, समवायिकारणासमवायिकारणविनाशयोरपि कारणकार्यत्वात् । न द्वितीयः, तत एव समवायिकारणासमवायिकारणविनाशयोरपि ईश्वरकालादिद्रव्यजन्यत्वात् । न तृतीयः, तत एव द्रव्यसमवायिकारणविनाशस्यापि द्रव्यसमवायिकारणजन्यत्वात् । विनाशे प्रतियोगिनोऽपि कारणत्वात् । न चतुर्थः, तत्कार्यविनाशित्वस्य क्वचिदप्रसिद्धत्वे तदभावस्याप्रसिद्धत्वेन समानधर्मत्वानुपपत्तेः । तत्कार्यसंयोगविनाशस्य कर्मादौ च प्रसिद्धत्वे तदभावस्य शब्दादावपि विद्यमानत्वेन शब्दादीनामपि कार्याविरोधित्वप्रसङ्गात् ।

एतेन कारणाविरोधित्वं द्रव्याणां साधर्म्यमिति प्रत्युक्तम् । सर्वकार्यद्रव्याणां समवायिकारणासमवायिकारणविनाशविनाश्यानां कारणविनाश्यत्वेन तद्विरहानुपपत्तेः । समवायिकारणविनाशयोरपि स्वकार्यकारणत्वात् । स्वस्वकारणद्रव्याविनाश्यत्वं कारणाविरोधित्वमिति चेत्—न, सर्वकार्यद्रव्याणां स्वस्वकारणेश्वरादिद्रव्यविनाश्यत्वेन तद्विरहानुपपत्तेः । ईश्वरदिक्कालव्यतिरिक्तस्वस्वकारणद्रव्यविनाश्य-

त्वाभावः कारणाविरोधित्वमिति चेत्—न, ईश्वरदिक्कालव्यतिरिक्तस्वस्वकारणद्रव्यविनाश्यत्वस्य क्वचिदप्रसिद्धत्वेन तदभावस्यावगन्तुमशक्यत्वेन समानधर्मत्वानुपपत्तेः भवदभिमतकारणविरोध्यन्त्यशब्दादौ विद्यमानत्वाच्च। घटादिवदन्त्यशब्दस्यापि घटादिकारणविनाश्यत्वात् शब्दकारणाविनाश्यत्वं कारण[ा]विरोधित्वम्। तच्चान्त्यशब्दे नास्तीति चेत्—न, सर्वकार्यद्रव्याणां शब्दकारणेश्वरादिविनाश्यत्वेन तद्विरहानुपपत्तेः। ईश्वरादिव्यतिरिक्तशब्दकारणाविनाश्यत्वं कारणाविरोधित्वमिति चेत् न, तस्यान्त्यशब्देऽपि संभवात्। अन्त्यशब्द ईश्वरादिव्यतिरिक्तेन स्वकारणेनोपान्त्यशब्देन नाश्यत इति चेत्—न, निराकरिष्यमाणत्वादिति ॥ ११ ॥

सूत्रम्—

**उभयथा गुणः ॥ १.१.१२ ॥**

उभयथेति। कार्यविरोधी कारणविरोधी चेति व्याख्येयम्। न तु कार्याविरोधी कारणाविरोधी चेति। कार्याविरोधित्वस्य प्रथमादिशब्दे ज्ञानादिजनकज्ञानादौ च बाधात्। कारणाविरोधित्वस्य चोपान्त्यशब्दविनाश्यान्त्यशब्दे बाधाच्च।

कार्याविरोधित्वकारण[ा]विरोधित्वप्रतियोगित्वेन कार्या[र्य]विरोधित्वकारणविरोधित्वयोरपि प्रकृतत्वादिति **प्रशस्तपादशिष्याः**। तन्न, कार्यविरोधित्वस्य द्रव्येष्वपि संभवात्। समवायिकारणासमवायिकारणविनाश्ययोरपि कार्यत्वात्। स्वस्वकार्यविनाश्यत्वस्य च तत्तद्विशेषनिष्ठत्वेन शब्दबुद्ध्यादिसमानत्वानुपपत्तेः। कारणविनाश्यत्वस्यापि द्रव्येष्वपि संभवात्, द्रव्यविनाशस्यापि कारणत्वात्, स्वस्वकारणविनाश्यत्वस्यापि द्रव्येष्वपि संभवात्, कार्यद्रव्यगुणानां स्वस्वकारणेश्वरादिविनाश्यत्वात्। स्वस्वकारणसमवायिकारणविनाश्यत्वस्य च तद्विशेषमात्रनिष्ठत्वेन समानधर्मत्वानुपपत्तेः। गुणेष्वसंभवाच्च। अन्त्यशब्दस्योपान्त्यनाश्यत्वे प्रमाणाभावात्। अन्त्यशब्दः शब्दविनाश्यः शब्दत्वात् आद्यशब्दवदिति चेत्—न, स्वविनाश्यत्वसिद्ध्यास्योपपन्नत्वेनार्थान्तरग्रस्तत्वात्। अन्त्यशब्दस्य स्वविनाश्यत्वेन स्वोत्पत्त्यनन्तरमेव विनाशात् क्षणिकत्वप्रसङ्ग इति चेत्—न, अन्त्यशब्दस्योपान्त्यविनाश्यत्वेऽप्यस्य दुर्वारत्वात्। अन्त्यशब्दोऽन्त्यशब्दव्यतिरिक्तविनाश्यः शब्दत्वादाद्यशब्दवदिति चेत्—न, उपान्त्यशब्दव्यभिचारात्। उपान्त्यशब्दस्तेनैव तत्पूर्वभाविना वा शब्देन विनाश्यत इति चेत्—न, स्वोत्पत्त्यनन्तरक्षणोत्पन्नविनाशकानपेक्षायां उपान्त्यशब्दस्य क्षणिकत्वापत्तेः। तत्कार्यशब्दापेक्षायां च तत एव उपान्त्यविनाशसिद्धेस्तयोरकारणत्वव्यवस्थितेरिति अन्त्यशब्दव्यतिरिक्तशब्दनाश्यत्वेन शब्दजनकत्वस्योपाधित्वाच्च। तद्विरहस्य प्रतिपक्षत्वाच्च।

न चास्य पक्षेतरता। अन्त्यशब्दव्यतिरिक्तशब्दनाश्यत्वरहिताद् रूपादेरेव व्यावृत्तत्वात्। अथायमन्त्यशब्दः एतद्व्यतिरिक्तशब्दविनाश्यः शब्दत्वात्, आद्यशब्दवदिति। न चात्र शब्दजनकत्वमुपाधिः, अन्त्यशब्दान्तरेण साध्याव्यापकत्वात्।



तस्य स्वविनाश्यत्वेनैतच्छब्दव्यतिरिक्तशब्दनाश्यत्वेऽपि मन्यसे—तन्न, अन्त्यशब्दान्तरस्यापि स्वविनाश्यत्वाभावात्। विनाशकान्तरानपेक्षायां तस्य[ा]क्षणिकत्वापत्तेः। अपेक्षायां च तत एव तद्विनाशोपपत्तौ तस्य कारणत्वव्यवस्थितेः। क्षणिकत्वस्याप्रतिपन्नत्वेन कथं तदापादनमिति चेत्—न, एतदुत्पत्तिक्षणानन्तरक्षणोत्पन्नविनाशप्रतियोगित्वस्यापाद्यत्वात्। तस्य चैतदनन्तरक्षणविनष्टघटादिषु प्रसिद्धत्वात्। न चैवंविधक्षणिकत्वमन्त्यशब्दादाविष्टमेवेति वाच्यम्, तस्यापि स्वोत्पत्तिक्षणव्यतिरिक्तक्षणसंबन्धित्वस्य प्रमेयत्वेनानुमानादिति। एतद्व्यतिरिक्तयत्किञ्चिच्छब्दविनाश्यत्वेनास्योपपन्नत्वेनोपान्त्यशब्दविनाश्यत्वासाधकत्वाच्च। अन्त्यशब्दविनाशकं शब्दान्तरं नोपलभ्यत इति चेत्—न, उपान्त्यशब्दस्याप्यनुपलम्भात्। देशान्तरगतत्वादुपान्त्यशब्दो नोपलभ्यत इति चेत्—तुल्यं शब्दान्तरेऽपि। अयमन्त्यशब्दो नैतदुपान्त्यविनाश्यः, तदजनकत्वाद् रूपवदिति प्रतिपक्षग्रस्तत्वाच्च। न चास्योपान्त्यशब्दे व्यभिचारः, तस्य तदजनकत्वेऽपि तद्विनाश्यत्वाभावात्। एतेनायमन्त्यशब्दविनाशः एतच्छब्दव्यतिरिक्तशब्दजन्यः शब्दविनाश[क]त्वात्, आद्यशब्दविनाशवदित्यादयः प्रयोगाः निरस्ताः एतद्व्यतिरिक्तयत्किञ्चिच्छब्दजन्यत्वेनास्योपपन्नत्वेनोपान्त्यशब्दजन्यत्वासाधकत्वात्। महाप्रलयकालीनशब्दविनाशे व्यभिचाराच्च। तस्यैव तच्छब्दव्यतिरिक्तशब्दजन्यत्वाभावात्, तदनन्तरं शब्दानुत्पत्तेः प्रतियोगिनश्च स्वविनाशकारणत्वाभावात्। उपान्त्यशब्दादेश्चान्त्यशब्दविनाशकत्वासंभवात्। अन्यथा क्षणभङ्गापत्तेरिति। अयमन्त्यशब्दविनाशो नैतदुपान्त्यशब्दजन्यः, एतज्जनकशब्दविनाशत्वात्, संप्रतिपन्नवदिति सत्प्रतिपक्षत्वाच्च।

उपान्त्यशब्दस्यान्त्यविनाशकत्वाभावे किं प्रमाणमिति चेत्—उपान्त्यशब्दो नान्त्यशब्दविनाशहेतुः शब्दत्वादाद्यशब्दवत्। अयमुपान्त्यशब्दो नैतदन्त्यशब्दविनाशनहेतुः शब्दत्वादाद्यशब्दवदित्यादिकमनुमानम्। कः पुनरन्त्यशब्दविनाशहेतुरिति चेत्—स्पर्शवद्द्रव्यसंयोगविशेष इत्या**त्रेयाचार्याः**।

यथा हि शरगतो वेगः स्पर्शवत्कुड्यादिशरसंयोगेन विनाश्यते, तथा शब्दोऽपि कुड्यादिव्यवहितेन शब्दानुपलब्धेरिति।

तदयुक्तम्, विप्रतिपन्नः स्पर्शवद्द्रव्यसंयोगो न शब्दविनाशहेतुः संयोगत्वात् संप्रतिपन्नवत्। विप्रतिपन्नो नैतदन्त्यशब्दविनाशहेतुः, संयोगत्वात् संप्रतिपन्नवदित्यादिना प्रतिषेधात्, स्पर्शवद्द्रव्यसंयोगविशेषस्य अन्त्यशब्दविनाशकत्वे प्रमाणाभावाच्च। परिशेषः प्रमाणमिति चेत—न, तत्रापि प्रतिषेधस्योक्तत्वादिति। तर्हि कोऽन्त्यशब्दविनाशहेतुरिति चेत्—ईश्वरज्ञानेच्छाप्रयत्नदिक्कालादृष्टानि। ईश्वरादिव्यतिरिक्तः कोऽन्त्यशब्दविनाशहेतुरिति चेत्—अयमन्त्यशब्द ईश्वरादिव्यतिरिक्तहेतुजन्यः कार्यत्वात्, घटवदित्यनुमानसिद्धः पदार्थविशेषः। अयमसाविति विशेषतो निर्दिश्यतामिति चेत्—न, प्रयोजनाभावात्, विशेषतः तन्निर्धारकप्रमाणाभावाच्च।

तर्हि न सिद्धयेदिति चेत्—न, किं सामान्येन[न ?]सिद्धये[ध्ये]दिति विवक्षितम् । विशेषतो न सिध्येदिति वा ? नाद्यः, पूर्वोक्तानुमानादेव तत्सिद्धेः । न द्वितीयः, इष्टत्वात्, इदं द्रव्यमन्त्यशब्दविनाशकं न भवति द्रव्यत्वात्, संप्रतिपन्नवत् । अयं गुणो नान्त्यशब्दविनाशहेतुः गुणत्वात् संप्रतिपन्नवदित्यादिना द्रव्यादिसकलपदार्थानामन्त्यशब्दविनाशहेतुत्वनिषेधात् ।

प्रकृतमनुमानमबाधितमिति चेत्—न, प्रकृतानुमानसिद्धव्यतिरिक्तानां धर्मित्वे सिद्धसाधनात् । प्रकृतानुमानसिद्धस्य धर्मिग्राहकप्रमाणबाधात् । प्रकृतानुमानसिद्धस्य च द्रव्यत्वादिनिर्धारकप्रमाणाभावेन द्रव्यत्वगुणत्वादीनां सन्दिग्धासिद्धत्वाच्च । सर्वेषामेषां प्रकृतानुमानसाध्याभावासाधकत्वेनार्थान्तरग्रस्तत्वाच्च । किं च यावत्प्रतिपन्नं द्रव्यगुणादीनामन्त्यशब्दविनाशहेतुत्वप्रतिषेधे च प्रकृतानुमानस्य तद्वयतिरिक्ते पर्यवसानात् । तद्वयतिरिक्तानां च प्रतिपन्नत्वेन धर्मित्वेनोपादातुमशक्यत्वाच्चेति । तस्मात्

**उभयथा गुणः [ १.१.१२ ]**

इति सूत्रं कार्यकारणविरोधित्वसाधर्म्यप्रतिपादनार्थमिति । कस्तर्हि

**कार्याविरोधि द्रव्यं कारणाविरोधि च [ १.१.२१ ]**

**उभयथा गुणः [ १.१.१२ ]**

इति सूत्रार्थः ? उच्यते,

सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः [ १.१.७ ]

इति सूत्रे द्रव्यगुणकर्मणामनित्यत्वमुक्तम् । अनित्यत्वं च विनाशित्वम् । विनाशः कार्यत्वात् कारणजन्यः इति द्रव्यादिविनाशकारणचिन्तायां किं द्रव्यादिविनाशे तत्तद्द्रव्यादिकार्यं हेतुः, किं वा तत्तद्द्रव्यादिकारणम्, किं वा तत्तद्द्रव्यादिकारणविनाशः, किं वा तत्तद्द्रव्यादिकार्यकृतिविनाश इति ? तत्र प्रथमपक्षनिराकरणार्थं सूत्रम्—

**कार्याविरोधि द्रव्यम् [ १.१.११ ]**

इति । द्वितीयतृतीयपक्षनिराकरणार्थं सूत्रम्—

**कारणाविरोधि च [ १.१.११ ]**

इति । अत्र कार्यशब्देन स्वस्वकार्यमभिप्रेतम्, कारणशब्देन स्वस्वकारणमीश्वरज्ञानेच्छाप्रयत्नदिक्कालादिव्यतिरिक्तमभिप्रेतम् । कार्यादीनां द्रव्यविनाशकत्वमिति चेत्—साधकमानाभावात् । एतमेव तद्विना जनकमिति प्रत्यक्षेण द्रव्यनाशकारणत्वाभावावधारणाच्च, द्रव्याणां च स्वस्वकार्यविनाश्यत्वे परमाणोः द्वयणुकेन, तन्त्वादीनां पटादिभिः द्वितीयक्षण एव विनाशप्रसङ्गात् । स्वस्वकारणविनाश्यत्वे च घ[प]टादीनां



द्वितीयक्षण एव तन्त्वादेर्विनाशप्रसङ्गात्, अपेक्षणीयान्तराभावात् । भावे वा तत एव घ[प]टादिविनाशसिद्धेः तन्त्वादीनां विनाशकत्वासिद्धेः । चकारः कार्यकारणकार्यनाशव्यतिरिक्तानां द्रव्यविनाशाकारणत्वसमुच्चयार्थः । तन्तुपटादीनां यत्किञ्चिद्विनाश्यत्वे द्वितीयक्षण एव विनाशप्रसङ्गात् । तत्तद्द्रव्यविनाशे तत्तत्कार्यकारणयोरहेतुत्वमुपपाद्य तत्तद्गुणविनाशेऽपि तत्तत्कार्यकारणयोरहेतुत्वोपपादनार्थं सूत्रम्—

**उभयथा गुणः [ १.१.१२ ]**

इति । उभयथेति, कार्याविरोधि कारणाविरोधि चेत्यर्थः । अत्र च गुणशब्देन स्वस्वकार्यविनाश्यशब्दात्मविशेषगुणव्यतिरिक्तो गुणो विवक्षितः । आद्यशब्द[ो] बुद्ध्यादीनां स्वस्वकार्यशब्दबुद्ध्यादिविनाश्यत्वात् ।

चतुर्थपक्षसमर्थनार्थं सूत्रम्—

कारणाभावात् कार्याभावः [१.२.१]

इति ।

पञ्चमपक्षनिषेधार्थं सूत्रम्—

न तु कार्याभावात् कारणाभावः (१.२.२)

इति । अनेकसूत्रव्यवहितयोर्द्वितीयाह्निकसूत्रयोः[1] कथमत्रान्वय इति चेत्—आकाङ्क्षितत्वात् योग्यत्वाच्चेति ब्रूमः । आकाङ्क्षादिवत् सन्निधिरप्यन्वयकारणम् । स चात्र नास्तीति चेत्—न, बुद्धिस्थत्वस्य सन्निधेरत्रापि विद्यमानत्वात् । अव्यवहितोच्चारणस्यापि कर्तुं शक्यत्वात् । अत्रैव तर्हि सूत्रे पठनीये इति चेत्—न, तत्रापि प्रयोजनसंभवात् । तत्रात्र च पठनीये इति चेत्—न, एकत्र पठनेऽप्यन्यत्राप्यन्वयसंभवात् । अत्र किं न पठिते इति चेत् न, अत्र पाठे [तत्र] किं न पठिते इति वक्तुं शक्यत्वादिति । अस्तु वा,

कार्याविरोधि द्रव्यं कारणाविरोधि च (१.१.११)

उभयथा गुणः (१.१.१२)

इति सूत्राणामेव कारणविनाशात् कार्यद्रव्यगुणकर्मणाम[पि] विनाश इत्यत्र तात्पर्यम् । गुणस्य गुणविनाशकारणत्वमग्निसंयोगरूपादिविनाशप्रतिपादकेन ।

अग्निसंयोगाच्च [७.१.५]

इति सूत्रेण सिद्धम् । कर्मणो गुणविनाश्यत्वमुत्तरसूत्र एव भविष्यति । तस्माद् द्रव्यविनाशे समवायिकारणविनाशोऽसमवायिकारणविनाशो वा कारणम् । गुणविनाशे समवायिकारणविनाशे वा समवायिकारणविनाशो वा गुणो वा कारणम् । कर्मविनाशे समवायिकारणविनाशः संयोगो वा कारणमिति व्यवस्थेति । समवायिकारणविनाशाद् द्रव्यविनाश इति न युक्तम्, प्रमाणाभावात् । कार्यस्य च समवायिकारणविनाशजन्या-

१. एतत्सूत्रद्वयं सूत्रपाठे प्रथमस्य द्वितीयाह्निकस्थम् ।

समवायिकारणविनाशादेवोपपत्तेः । तथा च विप्रतिपन्नो द्रव्यविनाशोऽवयवसंयोगविनाशजन्यः द्रव्यविनाशत्वात्, तन्तुसंयोगविनाशजन्यपटविनाशवदिति चेत्—न, तन्तुविनाशात् पटविनाश इति प्रत्यक्षविरोधात् । अविरोधे वा सर्वत्रावयवसंयोगविनाशस्यैव द्रव्यविनाशकारणत्वाङ्गीकारात् । कार्यविरोधि उत्पन्नं कर्म विभागसंयोगवेगानारभ्य निवर्तत इति प्रत्यक्षसिद्धम् । सा च कर्मनिवृत्तिर्नाश्रयविनाशजन्या, आश्रयस्य प्रत्यक्षसिद्धत्वात् । नाप्यसमवायिकारणविनाशजन्या, सत्यपि गुरुत्वद्रव्यत्ववेगादावसमवायिकारणे कर्मनिवृत्तेरुपलम्भात् । गुरुत्वादिजन्यकर्मनिवृत्तेरसमवायिकारणविनाशजन्यत्वेऽपि नोदनाभिघातजन्यकर्मनिवृत्तिरसमवायिकारणजन्या भविष्यतीति चेत्—न, गुरुत्वादिजन्यकर्मनिवृत्तेः संयोगजन्यत्वसिद्धेश्च । विमता कर्मनिवृत्तिः न नोदनाभिघातकर्मनिवृत्तिजन्या, कर्मनिवृत्तित्वात्, गुरुत्वाजन्यकर्मनिवृत्तिवत् । विमता नोदनाभिघातनिवृत्तिः न कर्मनिवृत्तिकारणम्, संयोगनिवृत्तित्वात् संप्रतिपन्नवत् । इयं कर्मनिवृत्तिः नैतन्नोदननिवृत्तिजन्या, कर्मनिवृत्तित्वात् अन्यकर्मनिवृत्तिवत् । इयं नोदननिवृत्तिः नैतत्कर्मनिवृत्तिकारणम्, नोदननिवृत्तित्वात् अन्यनोदननिवृत्तिवदित्यादिना प्रतिषेधात् ।

नापि विभागजन्यसंयोगात् पूर्वसंयोगनिवृत्तिक्षणे निवृत्तेः तदनन्तरमुत्तरसंयोगानुदयप्रसङ्गात् । पूर्वसंयोगनिवृत्तिसहितो विभागः कर्मनिवृत्तिहेतुरिति न पूर्वसंयोगनिवृत्त्युदयक्षणे कर्मनिवृत्तिरिति चेत्—न, पूर्वसंयोगनिवृत्तेः कर्मनिवृत्त्यजनकत्वात् । जनकत्वे वा तत एव तदुपपत्तौ विभागस्याकारणत्वप्रसङ्गात् । अयं विभागो नैतत्कर्मनिवृत्तिकारणम्, विभागत्वादन्यविभागवत् । इयं कर्मनिवृत्तिर्नैतद्विभागजन्या कर्मनिवृत्तित्वात् अन्यकर्मनिवृत्तिवदिति प्रतिषेधाच्च । विभागादुत्तरसंयोग इति चेत्—न, अयं विभागो नैतत्संयोगहेतुः विभागत्वात्, अन्यविभागवत् । अयं संयोगो नैतद्विभागजन्यः संयोगत्वात् अन्यसंयोगवदिति प्रतिषेधात् । विभाग एवोत्तरसंयोगः कर्मणा जन्यत इति चेत्—न, विभागजन्यपूर्वसंयोगनिवृत्तेरप्युत्तरसंयोगहेतुत्वस्य प्रत्यक्षसिद्धत्वात् । इयं पूर्वसंयोगनिवृत्तिः नैतदुत्तरसंयोगहेतुः संयोगनिवृत्तित्वात्, अन्यसंयोगनिवृत्तिवत् । अयं संयोगो नैतत्संयोगनिवृत्तिजन्यः संयोगत्वादन्यसंयोगवदिति चेत्—न, एतत्संयोगहेतुत्वस्य क्वचिदप्रमितौ तदभावस्याप्रसिद्धत्वात् । प्रमितौ वा तेनैव न्यायेन पूर्वसंयोगनिवृत्तेरुत्तरसंयोगहेतुत्वसिद्धेर्बाधात् । एवं द्वितीयानुमानेऽपि । पूर्वसंयोगनिवृत्तिरपि विभागक्षण एव कर्मणा जन्यते इति विभागानन्तरक्षण एव विभागात् कर्मनिवृत्तिः, कर्मणश्चोत्तरसंयोगो भविष्यतीति चेत्—न, पूर्वसंयोगो न कर्मविनाश्यः गुणत्वात्, रूपवत् । अयं पूर्वसंयोगो नैतत्कर्मविनाश्यः, संयोगत्वादन्यसंयोगवत् । एतत्कर्मैतत्संयोगविनाशकं कर्मत्वात् अन्यकर्मवदिति प्रतिषेधात् ।

नापि वेगः, विभागा[त्] पूर्वसंयोगनिवृत्तिक्षण एव वेगात् कर्मनिवृत्तौ तदनन्तरमुत्तरसंयोगानुदयप्रसङ्गात् । अयं वेगो नैतत्कर्मनिवृत्तिहेतुः वेगत्वात् अन्यवेग-



वत् । इयं कर्मनिवृत्तिः नैतद्वेगजन्याकर्मनिवृत्तित्वात् अन्यकर्मनिवृत्तिवदिति प्रतिषेधाच्च ।

नापि रूपादयो विभागक्षण एव रूपादिभ्यः कर्मनिवृत्तावुत्तरसंयोगानुदयप्रसङ्गात् । तस्मात् उत्तरसंयोगः कर्मनिवृत्तिहेतुः परिशेषात् । अयं संयोगो नैतत्कर्मनिवृत्तिहेतुः संयोगत्वात्, अन्यसंयोगवत् । इयं कर्मनिवृत्तिः नैतत्संयोगजन्या कर्मनिवृत्तित्वादन्यकर्मनिवृत्तिवदिति चेत्—न, कर्मनिवृत्तिहेतोरसिद्धौ तदभावस्याप्रसिद्धत्वात् । सिद्धौ वा तेनैव न्यायेनोत्तरसंयोगस्यापि कर्मनिवृत्तिहेतुत्वसिद्धेः बाधात् । उत्तरसंयोगान्निवृत्तं कर्मेत्यपरोक्षानुभवबाधाच्च । विभागादीनां कर्मविनाशकत्वाभावसाधनान्यपि प्रत्यक्षबाधितानीति चेत्—न, विभागान्निवृत्तं कर्मेत्याद्यपरोक्षानुभवाभावात् । भावे वा विभागवेगयोरपि कर्मविनाशकत्वाभ्युपगमात् । न चैवं विभागानन्तरक्षण एव कर्मनिवृत्तेरुत्तरसंयोगानुपपत्तिः । विभागजन्यपूर्वसंयोगनिवृत्तेरपि कर्मविनाशकत्वाभ्युपगमात् । अत एव **भगवान्**

## कार्यविरोधि कर्म ॥१.१.१३॥

इत्यसूत्रयत्, न तु संयोगविरोधि कर्मेति । अन्यकर्मनिवृत्तिरेतज्जनकासंयोगत्वरहिताजन्या कार्यत्वात् पटवदिति सिद्धायां संयोगजन्यकर्मनिवृत्तौ कर्मनिवृत्तिजनकसंयोगे चानैकान्तिकत्वाच्च । कर्मनिवृत्तेश्च संयोगजनकत्वे प्रत्यक्षं प्रमाणमनुमानं च । इयं कर्मनिवृत्तिरेतत्संयोगव्यतिरिक्तैतज्जनकत्वरहितजन्या कार्यत्वात् पटवदिति ।

यद् वा, एतत्कर्माव्यवहितपूर्वक्षणोत्पन्नम् एतत्कर्मनिवृत्तिजनकम् । एतत्संयोग एतत्कर्मनिवृत्त्यव्यवहितपूर्वक्षणोत्पन्नै[न्न ए]तज्जनकत्वात् । न यदेवं न तदेवं यथा घटः । अयं संयोग एतत्कर्मनिवृत्त्यव्यवहितपूर्वक्षणोत्पन्न एतज्जनककर्मनिवृत्तिजनकः । न यदेवं न तदेवम्, यथा पट इति व्यतिरेकिणा । न चैतत्कर्मनिवृत्त्यव्यवहितपूर्वक्षणवृत्त्येतज्जनकासिद्धेराश्रयासिद्धिः । प्रथमानुमानसिद्धविशेषणत्वं च द्वितीयानुमान इति वाच्यम् । इयं कर्मनिवृत्तिरेतदव्यवहितपूर्वक्षणोत्पन्नजन्या एतत्क्षणोत्पन्नत्वात् एतत्क्षणोत्पन्नपटवदिति तत्सिद्धेः । अन्यथैतत्कर्मनिवृत्तेः पूर्वमेव जन्मप्रसङ्गात् । अव्यवहितपूर्वक्षणोत्पन्नस्यापेक्षणीयस्याभावात्, विद्यमानस्व[स]पक्षत्वादसाधारणत्वमनयोरिति चेत्—न, विद्यमानसपक्षत्वेऽपि हेतोस्तद्व्यावृत्तत्वानिश्चयात् । सपक्षव्यावृत्तत्वनिश्चयेन चासाधारणस्य दूषणत्वात् । अनेनैव न्यायेन विभागवेगपूर्वसंयोगनिवृत्तीनामपि कर्मनिवृत्तिकारणत्वसिद्धेरिति चेत्—न, असति बाधे तत्सिद्धेरिष्टत्वात् । सति तु तत्सिद्धिनिवारणादिति ॥ १३ ॥

अथ द्रव्यादिलक्षणप्रकरणम् । अत्र द्रव्यलक्षणसूत्रम्—

## क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥१.१.१४॥

इति । साधर्म्यावसरे लक्षणकथनमयुक्तमिति चेत्—न, द्रव्यादिलक्षणानामपि सकल-

द्रव्यादिसमानधर्मत्वात् । द्रव्यादिविभागानन्तरं तद्धर्मजिज्ञासायां साधर्म्यवैधर्म्यस्यापि प्रस्तुतत्वाच्च । पूर्वं किमिति वैधर्म्यं न प्रतिपादितमिति चेत्--न, पूर्वं वैधर्म्यप्रतिपादनेऽपि इदानीं तत्प्रतिपादनाविरोधात् । केवलान्वयिव्यतिरिक्तपूर्वंप्रतिपादितसकलसाधर्म्याणां वैधर्म्यरूपत्वाच्च । क्रियावद् गुणवत् समवायिकारणमिति भावप्रधानो निर्देशः । क्रियावत्त्वं गुणवत्वं समवायिकारणत्वमित्यर्थः । क्रियावत्वं न द्रव्यलक्षणम्, आकाशादिव्यावृत्तत्त्वेनाव्यापकत्वादिति चेत्—न, क्रियावत्त्वस्य क्रियावद्द्रव्यलक्षणत्वात् । न चैवं द्रव्यलक्षणत्वानुपपत्तिः क्रियावद्द्रव्याणामपि द्रव्यत्वेन तल्लक्षणस्य द्रव्यलक्षणत्वात् । न चैवं पृथिव्यादिलक्षणानां द्रव्यलक्षणत्वापत्तिः, इष्टत्वात् । यद् वा, क्रियाशब्देनात्र न कर्माभिप्रेतम्, किं तु उत्पत्तिविनाशौ, साध्यत्वात् । धात्वर्थं च **वैयाकरणानां** क्रियाशब्दप्रयोगात् । उत्पत्तिविनाशयोः कथं धात्वर्थत्वमिति चेत्--उत्पद्यते विनश्यतीत्यादिप्रयोगदर्शनात् । उत्पत्तिश्च प्रागभाव एव (इति सद् द्रव्यं कथं) क्रियावदिति चेत्—क्रिया विद्यतेऽस्मिन्निति सप्तम्यर्थे वतिः तेन क्रियावदिति प्रागभावाधिकरणं प्रध्वंसाधिकरणं चेत्यर्थः स्यात् । तथा च प्रागभावाधिकरणं द्रव्यम्, प्रध्वंसाधिकरणं द्रव्यमिति लक्षणद्वयं सिध्यति । न चानयोरव्यापकत्वं सर्वद्रव्याणां संयोगादिप्रागभावप्रध्वंसाधिकरणत्वात् । नाप्यतिव्यापकत्वम्, प्रागभावप्रध्वंसयोः समवायिकारणमात्रनिष्ठत्वाङ्गीकारात् । गुणवत्त्वं गुणत्वेऽतिव्यापकम्, तस्यापि गुणसमवायित्वेन गुणवत्त्वात् ।

तदस्यास्तीति

संबन्धमात्रे वत्यनुशासनादिति चेत्-न, गुणवत्त्वशब्देन गुणाश्रयत्वस्य विवक्षितत्वात् ।

तदस्मिन्नस्तीति

तदाश्रयत्वेऽपि वत्यनुशासनात् । गुणत्वस्य च गुणाश्रयित्वेन गुणाश्रयत्वविरहात् । गुणाश्रितत्वेऽपि गुणत्वं गुणाश्रयोऽपीति गुणाश्रयत्वमिति व्यापकमित्या**त्रेयाचार्याः** । तन्न, गुणत्वस्य गुणाश्रयत्वे प्रमाणाभावात् शुक्लो घटः संयुक्तोऽयं घट इतिवत् शुक्लगुणत्वसंयुक्तं गुणत्वमित्यननुभवात् । लिङ्गाभावाच्च । गुणत्वं गुणाश्रयः गुणसमवायित्वाद् द्रव्यवदिति चेत्—न, गुणसमवायित्वं किं गुणनिष्ठसमवायः, किं वा गुणनिष्ठसमवायाश्रयत्वम्, किं वा गुणाश्रयत्वम् ? न प्रथमः, गुणेषु व्यभिचारात् । गुणसमवायस्य गुणत्ववत् गुणेष्वपि विद्यमानत्वात् । समवायस्योभयनिष्ठत्वात् कर्मादौ व्यभिचाराच्च । समवायस्यैकत्वेन गुणसमवायस्य तत्रापि विद्यमानत्वात् । न द्वितीयः, तत एव व्यावृत्त्यभावेनाश्रयत्वस्य व्यर्थत्वाच्च । न तृतीयः, साध्य[ा]विशिष्टत्वात् गुणत्वमगुणमिति प्रत्यक्षविरोधाच्च । तस्मात् नातिव्यापकं गुणत्वम् ।

**आत्रेयाचार्याः** पुनर्गुणवता[दित्य]स्य गुणत्वेऽतिव्याप्तिपरिहारार्थं क्रियावदिति विशेषणं **सूत्रकारे**णोपात्तमित्याहुः । तन्न, प्रत्यक्षबाधमुल्लङ्घ्य गुणवत्त्वे गुणत्वमभ्युपगच्छता क्रियावत्त्वस्यापि निषेद्धुमशक्यत्वेनातिव्याप्तेस्तदवस्थत्वात् । क्रियावत्त्वेन गुणवत्त्वेऽतिव्याप्तिपरिहारेऽपि सत्तायामतिव्याप्तेस्तदवस्थत्वाच्च । तत्परिहारार्थं



समवायिकारणमिति विशेषणमिति चेत्--न, सत्तायामपि गुणादिसमवायित्वे सति स्वविशिष्टबोधकारणत्वेन समवायिकारणत्वात् । कार्याश्रयत्वं समवायिकारणत्वम् । तच्च सत्तायां नास्तीति चेत्--न, गुणाश्रयत्ववत् कार्याश्रयत्वस्यापि सत्तायां संभवात् । गुणेनेव च कार्येणापि सत्तायाः समवाया[य]संभवात् । कार्याश्रिता सत्ता, न तु कार्याश्रय इति चेत्--न, तर्हि गुणाश्रिता सत्ता न गुणाश्रय इति गुणाश्रयत्वस्यातिव्याप्तिपरिहारार्थं कार्याश्रयत्वं नोपादेयमेव । तस्माद् यथा कार्याश्रयत्वं द्रव्यलक्षणम्, तथा गुणाश्रयत्वमपीति सिद्धम् ।

इतिशब्द एवंलक्षणान्तरपरिग्रहार्थः । तद्यथा संख्याश्रयो द्रव्यम् । परिमाणाश्रयो द्रव्यम् । पृथक्त्वाश्रयो द्रव्यम् । संयोगाश्रयो द्रव्यम् । विभागाश्रयो द्रव्यमिति । संख्यायामपि, एकत्वाश्रयो द्रव्यम् । द्वित्वाश्रयो द्रव्यम् । त्रित्वाश्रयो द्रव्यमित्यादि । पृथक्त्वेऽपि, एकपृथक्त्वाश्रयो द्रव्यम् । द्विपृथक्त्वाश्रयो द्रव्यम् । त्रिपृथक्त्वाश्रयो द्रव्यम् इत्यादि । पृथक्त्वाश्रयो द्रव्यमित्येतावतैव चरितार्थत्वाद् व्यर्थमेकत्वादिग्रहणमिति चेत्—न, अत्रैकपृथक्त्वशब्दाभ्यामेकत्वपृथक्त्वयोरनभिधानात् । द्विपृथक्त्वशब्दाभ्यां च द्वि[त्व]पृथक्त्वयोरनभिधानात् । किं च अखण्डेन द्विपृथक्त्वादिशब्देन द्विपृथक्त्वाद्य[न]भिधानात् । यदि हि पृथक्त्वपदं पृथक्त्वमभिदध्यात्, तर्हि पृथक्त्वाश्रयो द्रव्यमित्येतावतैव द्रव्यलक्षणसिद्धेः द्विशब्दाभिहितं द्वित्वविशेषणं व्यर्थं भवेत् । यदा पुनर्द्विपृथक्त्वशब्देन पृथक्त्वावान्तरजातिर्वि[वि]शेषवदभिधीयते न तदा व्यर्थविशेषणत्वम् । द्विशब्देन द्वित्वस्यानुपादानाच्च । पृथक्त्वशब्देन पृथक्त्वानुपादानाच्च । अथ द्वयोः पृथक्त्वं द्विपृथक्त्वम्, तेन द्विपृथत्वाश्रयो द्रव्यमिति लक्षणं[ण] वाक्यार्थः स्यादिति द्विषु (त्व ?) विशेषणम् । ..........त्वमिति चेत्—न, अस्य व्युत्पत्तिमात्रत्वात् । द्विषु पृथक्त्वजातिमात्रवृत्तिजातिमदाश्रयत्वस्य द्रव्यलक्षणत्वात् । अन्यथा पङ्कजत्वं कमललक्षणम्, पङ्काज्जातं पङ्कजमिति व्युत्पत्तिमाश्रित्य भेकादावतिव्यापकं स्यात् । गोत्वं च गवां लक्षणं गच्छतीति गौरिति व्युत्पत्तिमाश्रित्य घटादावतिव्यापकं स्यात् । अथ पङ्काज्जातं पङ्कजमिति गच्छतीति गौरिति च व्युत्पत्तिमात्रमात्रम्, पङ्कजत्वजातिः कमलानां गोत्वजातिर्गवां लक्षणमिति विवक्षितम्, तर्हि द्वयोः पृ[थ]क्त्वमिति व्युत्पत्तिमात्रमपि द्विपृथक्त्वमात्रवृत्तिजातिमदाश्रयद्रव्यलक्षणम् । पृथक्त्वमात्रवृत्तिजातिमदाश्रयत्वस्य द्रव्यलक्षणत्वोपपत्तेर्व्यर्थं द्विष्ठविशेषणमिति चेत्—न, द्विष्ठपृथक्त्वमात्रवृत्तिजातिपदेन जातिविशेषस्योपलक्षणात् तद्वदाश्रयत्वस्य द्रव्यलक्षणत्वात् जातिविशेषोपलक्षकद्विष्ठपृथक्त्वमात्रवृत्तिजातिमदाश्रय[पदान्तयं] च पृथक्त्वपदार्थाश्रयत्वस्य द्रव्यलक्षणत्वोपपत्तेः द्विष्ठमात्रवृत्तिजातिमत्यद[दित्येतद्]वैयर्थ्यं तदवस्थमिति चेत्—न, द्विष्ठपृथक्त्वमात्रवृत्तिजातिमदाश्रयो द्रव्यमित्यत्र द्विष्ठपदसमभिव्याहृतपृथक्त्वपदेन पृथक्त्वावान्तरजातिविशिष्टवाचिना पृथक्त्वजातिविशिष्टानभिधानात् । अभिधाने वा पृथक्त्वाश्रयस्याप्रतीतेः । पृथक्त्वपदस्य पूर्वोत्तराभ्यां द्विष्ठ.......पदाभ्यां निराकाङ्क्षस्याश्रयपदेनाश्रयपदस्य च जातिमत्पदनिराकाङ्क्षस्य

पृथक्त्वपदेनान्वयाभावात् । जातिमदाश्रयो द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तेः द्विष्ठपृथक्त्वमात्रवृत्ति इति व्यर्थमिति चेत्—न, द्विष्ठपृथक्त्वमात्रवृत्तिपदसमभिव्याहृतजातिपदस्य जातिविशेषपरत्वेन जातिमात्र[त्रा ?]समर्पकत्वात् । अन्यथा गुणाश्रयो द्रव्यमित्यत्रापि गुणब्देन सामान्यपदगुणकर्मत्वरहिताभिधाने सामान्यपदाश्रयो द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तेः गुणकर्मत्वरहितेति व्यर्थं स्यात् । गुणशब्देन गुणत्ववतोऽभिधाने च गुणशब्देन सामान्यगुणकर्मत्वरहितमात्रवृत्तिजात्यभिधाने च जातिमदाश्रयो द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तेः सामान्यपदगुणकर्मत्वरहितवृत्तीति व्यर्थं स्यात् । अथ सामान्यवद्गुणकर्मत्वरहितमात्रवृत्तिपदसमभिव्याहृतजातिपदेन जातिविशेषो विवक्षितः, न तु जातिमात्रमिति नोक्तदोष इति मन्यसे, तर्हि तुल्यं प्रकृतेऽपीति सन्तोष्टव्यम् । यत्तु सदाश्रयो द्रव्यम्, जातिमदाश्रयो द्रव्यमिति लक्षणद्वयम्—तन्न, गुणकर्मादावतिव्यापकत्वात् । गुणत्वकर्मत्वादीनां सदाश्रयत्वात् जातिमदाश्रयत्वाच्च । सत्तावान्तरजातिमदाश्रयो····रिति द्रव्यलक्षणमस्तीति चेत्—न, गुणत्वा(दी)नां सत्तावान्तरजातित्वादिजातिमत्त्वेन गुणादावतिव्यापकत्वस्य तदवस्थत्वात् । विप्रतिपन्नं गुणत्वादयोऽवान्तरजातिमन्तो मेयत्वात् घटवदित्यनुमानात् । गुणकर्मावृत्तिजातिमद्द्रव्यम् इत्यपि न द्रव्यलक्षणम्, सामान्यादावतिव्यापकत्वात् । तेषां गुणकर्म[ा]वृत्ति[जाति]जातित्वादिजातिमत्त्वात् । गुणावृत्तिगगनवृत्तिजातिमद्द्रव्यम्, गुणावृत्तिकालवृत्तिजातिमद्द्रव्यमित्याद्यपि न द्रव्यलक्षणम्, कर्मादावतिव्यापकत्वात् । तथा च गगनं गगनवृत्तिकर्मव्यावृत्तत्वरहितगगनवृत्तिगुणवृत्तित्वरहितजातिमज्जातिमत्त्वात् घटवदित्यादि । न चात्र सत्प्रतिपक्षत्वादिसंभवः, केवलान्वयित्वात् । एतेन कर्मावृत्तिगगनवृत्तिजातिमद्द्रव्यम्, कर्मावृत्तिकालवृत्तिजातिमद्द्रव्यम् इत्यादि द्रव्यलक्षणं निरस्तम् । गगनवृत्तिसत्तावान्तरजातिमद्द्रव्यम् इत्यपि न द्रव्यलक्षणम्, गुणादावतिव्यापकत्वात् । तथा च गगनं गगनवृत्तिगुणव्यावृत्तत्वरहितसर्वव्यावृत्तजातिमत्, जातिमत्त्वात्, प्रमेयत्वाच्च घटवदिति । गगनवृत्तिगुणव्यावृत्तत्वरहिताच्च । गगनवृत्तित्वरहिता वा, गुणव्यावृत्तत्वरहिता वा ? आद्या गगने व्याहता, गुणव्यावृत्तत्वरहिता च । सत्ता वा तदवान्तरा वा ? आद्या सद्व्यावृत्तग्रहणेन निरस्ता । तस्माद् गगनेगुंणव्यावृत्तत्वरहितसत्तावान्तरजातिसिद्धिरिति चेयमपि सिद्धान्तनिरस्ता । गुणगगनवृत्तिजातिविरहस्य **सूत्रकारेणा**प्रतिपादनात् गुणगगनवृत्तिजातिः **सूत्रकारेण** न प्रतिपादितेति तद्व्युत्पादनोऽपसिद्धान्त इति चेत्—न, घटत्वादिव्युत्पादनेऽपसिद्धान्तप्रसङ्गात् । **सूत्रकार**व्युत्पादितविपरीताभिधानेऽप्यपसिद्धान्तो न तु **सूत्रकारा**प्रतिपादित इति चेत्—तुल्यम् । तस्मात् द्रव्यगुणयोः कर्मव्यावृत्ताद् द्रव्यकर्मणोगुंणाव्यावृत्तगुणकर्मणोः द्रव्यव्यावृत्ता सत्तावान्तरजातिरनु··· ·······भ्युपगम्यत एवेति । यद् वायं गुणः एतद्वृत्तिगगनव्यावृत्तत्वरहितसत्त्वव्यावृत्तिजातिमान् जातिमत्त्वात् घटवदिति । एतेन गगनवृत्तिसत्ताव्यतिरिक्तजातिमत्त्वं द्रव्यमिति द्रव्यलक्षणं निरस्तम् । द्रव्याकाशपदस्थाने कालादिपदप्रक्षेपेण प्रवृत्तानि द्रव्यलक्षणानि निराकार्याणि ।



क्रियासमानाधिकरणसत्तासाक्षाद्व्याप्यजातियोग्यद्रव्यमित्यपि न द्रव्यलक्षणम्, गुणादावतिव्यापकत्वात् । तथा च गुणादयः क्रियासमानाधिकरणाः सत्तासाक्षाद्व्याप्यजातिमन्तो जातिमत्त्वाद्घटवदिति । गुणादौ क्रियासमानाधिकरणसत्तासाक्षाद्व्याप्यजातिसिद्धेः सत्ताया अपि सत्तासाक्षाद्व्याप्यत्वेन गुणादीनां क्रियासमानाधिकरण····साक्षाद्व्याप्यजातिमत्त्वाच्च । कथं सत्ता सत्ताव्याप्येति चेत्—सत्तात्यन्ताभाववद्वृत्तित्वाभावस्य सत्ताव्याप्यत्वस्य सत्तायामुभयवादिसिद्धत्वात् । अस्तु सत्ता सत्ताव्याप्या, न तु साक्षादिति चेत्—न, सद्व्यावृत्तिजातिव्याप्यत्वाभावस्य साक्षात्त्वस्य सत्तायामपि विद्यमानत्वात् । अन्यस्य च साक्षात्त्वस्यानिरुक्तेः । येषामपि न सत्ताव्याप्येति न गुणादावतिप्रसङ्गः, तेषामपि साक्षाद्ग्रहणं व्यर्थमेव । क्रियासमानाधिकरणसत्ताव्याप्यजातिमत्त्वस्याव्याप्त्यतिव्याप्तिपरिहृतत्वेन विशेष[ण]ान्तरानपेक्षणादिति । अस्तु तर्हि क्रियासमानाधिकरणसत्तासाक्षाद्व्याप्यजातियोगि द्रव्यमिति द्रव्यलक्षणमिति चेत्—न, सत्तात्यन्ताभाववद्वृत्तित्वाभावस्य सत्ताव्याप्यस्य सत्तायां विद्यमानत्वेन गुणादावतिव्यापकत्वात् । सत्ताव्यतिरिक्तत्वे सति सत्तात्यन्ताभाववद्वृत्तित्वाभावः सत्ताव्याप्यत्वम्, तच्च सत्तायां नास्तीति चेत्—न, सत्तात्यन्ताभाववद्वृत्तित्वाभावविशेषणवैयर्थ्यात् । क्रियायाः समानाधिकरणसत्ताव्याप्यजातियोगित्वस्य द्रव्यलक्षणत्वोपपत्तेरिति संयोगवृत्तिसत्तावान्तरजातियोगि द्रव्यमित्यपि न लक्षणम्, पूर्वोक्तन्यायेन गुणकर्मादावतिव्यापकत्वात् । संयोगवद्द्रव्यमित्येतावतैव द्रव्यलक्षणत्वोपपत्तौ तद्वृत्तिसत्तावान्तरजातियोगिग्रहणवैयर्थ्याच्च । जातिमन्निष्ठात्यन्ताभावप्रतियोग्याकाशवृत्तिजातियोगि द्रव्यमित्यपि न द्रव्यलक्षणम्, गुणादावतिव्यापकत्वात् । तथा च गुणादयो जातिमन्निष्ठात्यन्ताभावप्रतियोग्याकाशवृत्तिजातियोगिनः, जातिमत्त्वात् पटवदिति । एतेन कार्यसमानाधिकरणसत्तावान्तरजात्यधिकरणं द्रव्यम्, गुणसमानाधिकरणसत्तावान्तरजात्यधिकरणं द्रव्यमित्यादि द्रव्यलक्षणं निरस्तम् । कार्याधिकरणं द्रव्यम्, गुणाधिकरणं द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तौ समानाधिकरणसत्तावान्तरजातिग्रहणवैयर्थ्याच्च । पृथिव्यादिनवान्यतमत्वमपि न द्रव्यलक्षणम् । पृथिव्यादिनवव्यक्तिविवक्षायां तदतिरिक्तद्रव्याव्यापकत्वात् । पृथिव्यादिनवलक्षणविवक्षायां च सर्वद्रव्येषु विद्यमानत्वात् । द्रव्यत्वरहितेषु नवलक्षणेषु वर्तमानत्वाच्च । तस्मात् पृथिव्यादिनवलक्षणान्यतमाधिकरणं द्रव्यमिति द्रव्यलक्षणम् । नवलक्षणान्यतमत्वं च नवलक्षणप्रतियोगिकनवान्योन्याभाववत्त्वात्यन्ताभावः ।

संयोगवदितरानधिकरणसंयोगवद्धर्माधिकरणं द्रव्यमिति **विद्याधरमिश्राः** । तन्न, संयोगवदितरानधिकरणत्वं किं संयोगव्यतिरिक्तानधिकरणत्वं विवक्षितम्, किं वा संयोगवत्संयोगवदितरानधिकरणत्वम् ? न प्रथमः संयोगवद्धर्मग्रहणवैयर्थ्यात् । सर्वेषां संयोगवतां संयोगवदितरत्वेन धर्माणां संयोगवदितरानधिकरणत्वेन तद्रहितत्वानुपपत्तेः, लक्षणस्यासंभवाच्च । न द्वितीयः, संयोगवद्ग्रहणसंयोगवद्धर्मग्रहणयोः वैयर्थ्यात् । संयोगवदितरानधिकरणत्वस्यैव द्रव्यलक्षणत्वोपपत्तेः । सर्वेषां संयोगवतां

स्वान्यसंयोगवदितरत्वेन तद्धर्माणां संयोगवत् संयोगवदितरानधिकरणत्वेन तद्रहितत्वानुपपत्तेः, लक्षणस्यासंभवाच्च। संयोगवदितरपदेन संयोगत्वरहितं विवक्षितम्। तेन संयोगत्वरहितानधिकरणं द्रव्यमिति द्रव्यलक्षणमिति चेत्—न, संयोगवत्त्वस्य द्रव्यलक्षणत्वोपपत्तौ रहितानधिकरणाधिकरणग्रहणवैयर्थ्यात्। संयोगाधिकरणं द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तौ वतिप्रत्ययरहितानधिकरणग्रहणवैयर्थ्यात्। एतेन संयोगपदस्थाने विभागसंख्यापरिमाणपृथक्त्वगुणकार्यादिपदप्रक्षेपेण द्रव्यलक्षणनि निरस्तानि। संयोगवत्त्वरहितावृत्तिमदधिकरणं द्रव्यमित्यपि न द्रव्यलक्षणम्। संयोगाधिकरणं द्रव्यमित्येतावतैव द्रव्यलक्षणोपपत्तौ वतित्वप्रत्ययरहितावृत्तिमद्ग्रहणवैयर्थ्यात्। वतित्वप्रत्ययान्तस्य संयोपदस्याधिकरणपदेनान्वयासंभव इति चेत्—न, निष्प्रयोजनत्वेनापसारितवतिप्रत्ययस्य संयोगपदस्याधिकरणपदेनान्वयसंभवात्। असंभवे वैवमादीनां द्रव्यलक्षणत्वस्वीकारात्। एतेन संयोगपदस्थाने विभागसंख्यापरिमाणपृथक्त्वपदप्रक्षेपेण द्रव्यलक्षणानि निरस्तानि। यदा तु न द्रव्यगुणकर्मव्यतिरिक्तानां जातिमत्त्वं तदा सदाश्रयो द्रव्यम्, जातिमदाश्रयो द्रव्यम्, गुणकर्मावृत्तिजातिमद् द्रव्यम्, गुणावृत्तिगगनवृत्तिजातिमद् द्रव्यम्, गुणावृत्तिकालवृत्तिजातिमद् द्रव्यम्, गुणावृत्तिदिग्वृत्तिजातिमद् द्रव्यम्, गुणावृत्तिघटवृत्तिजातिमद् द्रव्यम्। एवं यावन्त्यो द्रव्यव्यक्तयः, तावन्ति द्रव्यलक्षणानि।

तथा गगनवृत्तिसत्तावान्तरजातिमद् द्रव्यम्। गगनवृत्तिसत्ताव्यतिरिक्तजातिमद् द्रव्यम्, गगनपदस्थाने कालादिपदप्रक्षेपेण यावन्त्यो द्रव्यव्यक्तयः, तावन्ति द्रव्यलक्षणानि।

तथा क्रियासमानाधिकरणसत्तावान्तरजातिमद् द्रव्यम्, द्रव्यसमानाधिकरणसत्तावान्तरजातिमद् द्रव्यम्, पूर्वोपपादितवैयर्थ्याद्धारणसामर्थ्ये च कार्यसमानाधिकरणं सत्तावान्तरजातिमद् द्रव्यम्, गुणसमानाधिकरणसत्तावान्तरजातिमद् द्रव्यम्, एवं क्रियापदस्थाने रूपादिपदप्रक्षेपेण तत्तद्रूपादिव्यक्तिपदप्रक्षेपेण च गुणपदस्थाने च संख्यापरिमाणपृथक्त्वसंयोगविभागपदप्रक्षेपेणानन्तानि द्रव्यलक्षणानि। तथा सत्तावान्तरपदस्थाने सत्ताव्यतिरिक्तपदप्रक्षेपेणानन्तानि द्रव्यलक्षणानि। तथा जातिनिष्ठात्यन्ताभावप्रतियोग्याकाशवृत्तिजातिमद्द्रव्यम्, आकाशादिपदस्थाने च कालादिपदप्रक्षेपेण यावन्त्यो द्रव्यव्यक्तयः तावन्ति द्रव्यलक्षणानि द्रष्टव्यानि।

अस्मन्मते तु कार्याश्रयो द्रव्यम्, गुणाश्रयो द्रव्यम्, प्रागभावाश्रयो द्रव्यम्, प्रध्वंसाभावाश्रयो द्रव्यम्, संख्याश्रयो द्रव्यम्, परिमाणाश्रयो द्रव्यम्, पृथक्त्वाश्रयो द्रव्यम्, संयोगाश्रयो द्रव्यम् तथा संख्यादिपदस्थाने एकत्वादिपदपदप्रक्षेपेणानन्तानि द्रव्यलक्षणानि। तथा पृथिव्यादिनवलक्षणान्यतमाश्रयो द्रव्यमिति।

केचित् तु मन्यन्ते कार्यत्वरहितावृत्तिमदाश्रयो द्रव्यम्, गुणत्वरहितावृत्तिमदाश्रयो द्रव्यम्, संख्यात्वरहितावृत्तिमदाश्रयो द्रव्यम्, परिमाणरहितावृत्तिमदाश्रयो द्रव्यम्, पृथक्त्वरहितावृत्तिमदाश्रयो द्रव्यम्, संयोगत्वरहितावृत्तिमदाश्रयो



द्रव्यम्, विभागत्वरहितावृत्तिमदाश्रयो द्रव्यम्, संख्यापृथक्त्वस्थाने चैकत्वैकपृथक्त्वादिपदप्रक्षेपेणानन्तानि द्रव्यलक्षणानि। तथा कार्यवत्त्वरहितावृत्तिमद्द्रव्यम्, गुणत्वरहितावृत्तिमद्द्रव्यम्। तथा गुणपदस्थाने संख्यादिपदप्रक्षेपेणानन्तानि द्रव्यलक्षणानि द्रष्टव्यानीति।

कार्यत्वं गुणवत्त्वं च उत्पत्तिक्षणे घटादौ नास्तीत्यव्यापकमिति चेत्—न, घटादीनां कार्यगुणप्रागभावाश्रयत्वेऽपि कार्यवत्त्वगुणवत्त्वात्यन्ताभावरहितत्वाल्लक्ष्यत्वाभिमतनिष्ठात्यन्ताभावप्रतियोगित्वस्य चाव्यापकशब्दार्थत्वात्। कार्यगुणयोश्च द्रव्यलक्षणत्वानङ्गीकारात्। अनङ्गीकारे वा घटाद्युत्पत्तिक्षणे पटनिष्ठकार्यगुणयोः प्रागभावसंभवेऽप्यत्यन्ताभाव[ा]संभवेनाव्यापकत्वानुपपत्तेः। लक्ष्यत्वाभिमतनिष्ठात्यन्ताभावप्रतियोगित्वस्याव्यापकत्वशब्दार्थत्वात्। घटादावुत्पत्तिक्षणे कार्यगुणप्रागभाववत् कार्यवत्त्वगुणवत्त्वयोरभावोऽस्त्येव। स चात्यन्ताभाव एव, कार्यवत्त्वगुणवत्त्वयोरनादित्वेन प्रागभावासंभवात्। ततश्च लक्षणस्याव्यापकत्वमिति चेत्—न, अत्यन्ताभावस्य प्रतियोगिसमानदेशत्वानुपपत्तेः। तत् किं प्रथमक्षणेऽपि घटादौ कार्यवत्त्वं गुणवत्त्वं चास्त्येव, बाढं, कार्यगुणयोरभावे कथं कायवत्त्वं गुणवत्त्वं चेति चेत्—कार्यगुणाभ्यामव्यापकत्वादिति सर्वं सुन्दरम्।

ननु लक्षणस्य प्रयोजनं किं द्रव्यज्ञानम्, द्रव्यशब्दवाच्यत्वज्ञानं वा, द्रव्यापहारो वा, इतर[द्र]व्यावृत्तद्रव्यज्ञानं वा, गुणत्वादिरहितत्वविशिष्टद्रव्यज्ञानत्वं वा? नाद्यः, द्रव्यत्वसाक्षात्क[ा]रणस्येन्द्रियादेवोपपत्तेः। द्रव्यत्वानुमितेश्च लिङ्गादेवोपपत्तेः। द्रव्यलक्षणमेव द्रव्यत्वलिङ्गमिति चेत्—न, द्रव्यत्वादि[प्र]सिद्धावप्रसिद्धविशेषणत्वात्, सिद्धौ वा साधनवैयर्थ्यात्। न द्वितीयः, द्रव्यशब्दवाच्यत्वासिद्धौ अप्रसिद्धविशेषणत्वात्, सिद्धौ वा साधनवैयर्थ्यात्, द्रव्यशब्दवाच्याद्रव्यत्वाद् व्यावृत्तत्वेनासाधारणत्वाच्च। द्रव्यत्वमपि पक्ष एवेति चेत्—न, तत्र गुणावस्याप्रसिद्धत्वात्। प्रसिद्धव्यवहारादेव द्रव्यशब्दवाच्यत्वसिद्धेश्च। न तृतीयः, द्रव्यज्ञानादेव द्रव्यार्थिनः प्रवृत्तिसिद्धेः द्रव्यशब्दज्ञानादेव द्रव्यशब्दप्रयोगतज्जन्यज्ञानोपपत्तेः। न चतुर्थः, इतरशब्देन न द्रव्यवतीं लक्षणवतीमप्युपादाने व्याघातात्, बाधाच्च। अद्रव्यलक्षणरहितोपादाने च द्रव्यलक्षणरहितरसादिव्यावृत्तिमतो रूपादेः सपक्षादपि व्यावृत्तत्वेन द्रव्यलक्षणस्याधारणत्वप्रसङ्गात्। द्रव्यलक्षणरहितपदेन सर्वं द्रव्यलक्षणरहितं विवक्षितमिति चेत्—न, सर्वशब्देन त्वधिगतमात्रविवक्षायां त्वदधिगतद्रव्यलक्षणरहितव्यावृत्तिमतोऽस्मदाद्यधिगतद्रव्यलक्षणरहितत्वात् [।] सपक्षादपि व्यावृत्तत्वेन द्रव्यलक्षणत्वस्यासाधारणत्वप्रसङ्गात्। त्वदधिगतानधिगतविवक्षायां च………। अनधिगते विवक्षानुपपत्तेः। अनधिगतव्यावृत्तेः अधिगन्तुमशक्यत्वेनाप्रसिद्धविशेषणत्वाच्च। द्रव्यलक्षणरहितं सर्वं मयाधिगम्यत इति चेत्—न, असन्निकृष्टे त्वदिन्द्रियाप्रवृत्तेः। अननुसंहितलिङ्गे च तवानुमि[त्यसंभ-

वात्।..........[अ]पि च किमिह द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकैकाव्यावृत्तिः साध्यते, द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकाः सर्वा व्यावृत्तयो वा ? नाद्यः, प्रतियोगि..........द्रव्यलक्षणरहित..........प्रति]योगिकैकव्यावृत्तेरसंभवात्। न द्वितीयः, सर्वव्यावृत्तिविरहाणामेकत्रासंभवेन साध्याभावस्य साधनाभावेन व्याप्त्यसंभवात्।

अथ द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तिविरहाणामेकत्र अ[ना]सम्भव इति चेत्—सर्वेषामपि द्रव्यलक्षणरहित.......स्वस्वव्यावृत्तिरहितत्वेऽपि स्वान्यद्रव्यरहितव्यावृत्तिमत्त्वेन तद्रहितत्वासम्भवात्। एतस्य च द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिविरहस्य निष्प्रमाणकत्वात्। प्रतियोगिभेदस्याभावभेदनियतत्वाच्च। **उदयनादिमते** चाभावस्य भावत्वेन द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तिविरहाणां द्रव्यलक्षणरहितसर्वव्यक्तिव्यतिरिक्तत्वाभावेन द्रव्यलक्षणरहिते साध्याभावस्य साधनाभावेन व्याप्त्यसम्भवाच्च। अपि च द्रव्यलक्षणरहितः सर्वव्यक्तिभेदः क्वचिदप्रमितः प्रमितो वा ? नाद्यः, अप्रसिद्धविशेषणत्वात्। द्वितीयेऽपि पक्षादन्यत्र, पक्षे वा ? नाद्यः, तत्र हेतोर्वृत्तावन्वयसम्भवेन केवलव्यतिरेकित्वभङ्गात्। व्यावृत्तौ च सपक्षादपि व्यावृत्तत्वेनासाधारणत्वापातात्। न द्वितीयः, साधनवैयर्थ्यप्रसङ्गात्। प्रत्यक्षद्रव्येष्वितरभेदस्य प्रत्यक्षसिद्धत्वात् [।] नाप्रसिद्धविशेषणत्वम्, अप्रत्यक्षद्रव्येष्वपि इतरभेदसाधनात् न साधनवैयर्थ्यमिति चेत्—न, प्रत्यक्षद्रव्येष्वेव गुणवत्त्वादीनामितरभेदान्वयनिश्चयात्, केवलव्यतिरेकित्वभङ्गात्। अनुमानप्रवृत्तेः पूर्वमन्वयनिश्चयाभावस्य व्यतिरेकानिश्चयाजन्यान्वयनिश्चयाभावस्य वा केवलशब्दार्थत्वात्। सपक्षेऽन्वयनिश्चयाभावः केवलशब्दार्थ इति चेत्—न, सपक्षविशेषणवैयर्थ्यात्, सपक्षानिरुक्तेश्च। निश्चितसाध्यः सपक्ष इति चेत्—न, साध्यवत्त्वेन विशेषणप्रसिद्धिस्थलस्यापि सपक्षत्वात्। पक्षव्यतिरिक्तो निश्चितसाध्यवान् स इति चेत्—न, पक्षव्यतिरिक्तत्वविशेषणवैयर्थ्यात्। अस्मिन्नपक्षत्वेन सोपाधित्वाच्च। विशेषणप्रसिद्धिस्थल एव साध्यव्यापकत्वनिश्चयात्, द्रव्यलक्षणवदप्रत्यक्षद्रव्यव्यावृत्तत्वेन साधनाव्यापकत्वात्। इतरभेदरहितपरमाणुरूपादिव्यावृत्तत्वेन पक्षेतरत्वाभावाच्च। प्रत्यक्षद्रव्येषु प्रत्यक्षेण द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तिनिश्चयासम्भवाच्च। प्रत्यक्षद्रव्येषु द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तयः प्रत्यक्षेण द्रव्यलक्षणरहिताप्रत्यक्षव्यक्तिव्यावृत्तयश्चानुमानेन निश्चीयन्त इति चेत्—न, द्रव्यलक्षणरहिताप्रत्यक्षानन्तव्यक्तिव्यावृत्तिनियतानन्तलिङ्गाननुसन्धानात्। प्रत्यक्षद्रव्येष्वपि द्रव्यलक्षणरहितप्रत्यक्षाप्रत्यक्षव्यक्तिव्यावृत्तीनां प्रत्यक्षानुमानाभ्यामेव निश्चयोपपत्तेर्व्यतिरेकिवैयर्थ्यस्य तदवस्थत्वाच्च। अप्रत्यक्षनिष्ठो[ऽ]भावो न प्रत्यक्ष इति चेत्—न, अप्रत्यक्षगगनादिनिष्ठघटाभावादीनां भूतलादौ प्रत्यक्षत्वात्। अप्रत्यक्षे धर्मिणि भावः (?) प्रत्यक्ष इति चेत्—न, वायौ रूपाभावप्रत्यक्षत्वस्य **उदयनादिभि**रप्यङ्गी-



कारात्। अधिकरणज्ञानप्रतियोगिज्ञानेन्द्रियसन्निकर्षादिप्रत्यक्षप्रतियोगिकाभावप्रत्यक्षसामग्रीसम्पत्तावपि प्रत्यक्षानुपपत्तेरुन्मत्तप्रलापत्वाच्च। अप्रत्यक्षद्रव्येषु द्रव्यलक्षणरहितप्रत्यक्षाप्रत्यक्षव्यावृत्तीनामप्रत्यक्षत्वेऽपि द्रव्यव्यावृत्तिनिश्चयेऽपि द्रव्यलक्षणरहितप्रत्यक्षव्यक्तित्वरहिताप्रत्यक्षव्यावृत्तिवदनुमातुं शक्यत्वाच्च। प्रत्यक्षद्रव्येषु व्यतिरेकिवैयर्थ्यस्य तदवस्थत्वाच्च।

सर्वद्रव्यपक्षीकरणे द्रव्यत्वस्येतरभेदव्याप्यत्वमितरभेदस्य द्रव्यत्वव्यापकत्वं व्यतिरेकिणा सिध्यतीति न व्यतिरेकिवैयर्थ्यमिति चेत्—न, इतरभेदेनैव द्रव्यत्वस्येतरभेदव्याप्यत्वेनेतरभेदस्य च द्रव्यत्वव्यापकत्वेन व्यतिरेकिणो व्याप्तिविरहात्। पक्षधर्मतायाश्च व्यापकपक्षसंसर्गातिरिक्तसाधकत्वात्। सर्वशब्दावच्छिन्नधर्मिविशेषणं विधीयमानधर्मव्याप्यं यथा, सर्वः पटो रक्त इत्यत्र पटत्वं रक्तत्वव्याप्यम्। विधीयमानधर्मत्वसर्वपटावच्छिन्नधर्मविशेषणव्यापको यथा, रक्तः पट इत्यत्र रक्तत्वं पट इत्यस्येति चेत्—न, अस्य मानान्तरत्वात्, सर्वद्रव्यपक्षीकरणे सर्वद्रव्यसम्बन्ध इतरभेदस्य प्रमाणान्तरानवगतो व्यतिरेकिणा सिध्यतीति न व्यतिरेकिवैयर्थ्यमिति चेत्—न, सम्बन्धिद्रव्यभेदेनेतरभेदसर्वद्रव्यसम्बन्धानामनेकत्वात्। सर्वद्रव्यसम्बन्धा एवेतरभेदस्य सम्बन्धस्य च गुणवत्त्वादेरेव प्रत्यक्षद्रव्याव्यवसितेरभेदान्वयात् सिद्धेर-युगपत् सकलद्रव्यानामितरभेदो न व्यक्तिरेकिणमन्तरेण सिध्यतीति न व्यतिरेकिवैयर्थ्यमिति चेत्—न, अव्यापकस्य व्यापकत्वसंसर्गातिरिक्तस्य च योगपद्यस्य व्यतिरेकिणाप्यसिद्धेः असकलद्रव्यपक्षीकरणप्रवृत्तव्यतिरेकिणमन्तरेणेतरभेदविशिष्टसकलद्रव्यगोचरैका प्रतीतिर्न जायत इति न द्रव्यव्यतिरेकिवैयर्थ्यमिति चेत्—न, व्यतिरेकिप्रमेयस्य प्रमाणान्तरादेवावगतत्वेन प्रतिगतस्यैकत्वस्य च निष्प्रयोजनत्वे तद्व्यतिरेकिवैयर्थ्यस्य तदवस्थत्वात्। एकैकस्यैव धर्मित्वेनैकैकद्रव्यपर्यवसितेतरभेदप्रतीतीनामनेकत्वेनेतरभेदविशिष्टसकलद्रव्यगोचरैकप्रतीत्यसम्भवाच्च।

प्रत्यक्षद्रव्येष्वितरभेदसाक्षात्कारस्य प्रत्यक्षादुत्पन्नत्वेऽपि न व्यतिरेकिवैयर्थ्यमितरभेदानुत्पत्तेः फलस्य सत्त्वादिति चेत्—न, प्रत्यक्षद्रव्याणां सन्दिग्धसाध्यत्वाभावेन पक्षत्वानुपपत्तौ तद्धर्मस्यापक्षधर्मत्वेन अनुमितिफलत्वानुपपत्तेः। सन्दिग्धसाध्यत्वं न पक्षत्वम्, किं तु विप्रतिपत्तिगोचरत्वमिति चेत्—न, निश्चितेतरभेदेषु प्रत्यक्षद्रव्येष्वितरभेदविप्रतिपत्तेरभावात्। धर्मित्वेनोपात्तत्वम्, न त्वन्यदिति चेत्—न, उभयवादिसम्प्रतिपन्नसाध्यवत्त्वेन प्रत्यक्षद्रव्याणां परं प्रति धर्मित्वेनोपादानानुपपत्तेरिति चेत् न, प्रत्यक्षद्रव्याणां सन्दिग्धसाध्या[त्वा ?]भावेन पक्षत्वानुपपत्तौ तद्धर्मस्यापक्षधर्मत्वेनानुमितिफलत्वानुपपत्तेः अर्थान्तरस्य दुर्वारत्वात्। स्वार्थानुमाने न धर्म्युपादानाभावेन हेतोरपक्षधर्मत्वप्रसङ्गात्। धर्मित्वमेव पक्षत्वमिति चेत्—न, प्रत्यक्षनिर्णीतवह्नौ महानसादौ धूमवत्त्वेन वह्न्यनुमित्यनुदयात्। उपपद्यत एव तत्र वह्न्यनुमितिरिति चेत्—न, प्रमाणाभावात्। महानसे च वह्निमनुमिनोमीत्य-

नुव्यवसायाभावात् वह्निव्यवहारस्य च प्रत्यक्षादेवोपपत्तेः। वह्न्यनुमितिसामग्र्या तदनुमितिरिति चेत् न, साध्यसन्देहस्य साध्यनिर्णयस्य वानुमितिकारणस्यासम्भवात् । द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तीनामन्योन्यद्रव्यव्यावृत्तलक्षणरहितसर्वव्यक्तिष्वेव प्रसिद्धत्वान्नाप्रसिद्धविशेषणत्वम्, द्रव्येषु वा साधनान्न साधनवैयर्थ्यमिति चेत्—न, इतरव्यावृत्तीनां प्रसिद्धत्वेऽपि तद्विरहाणामेकत्रासम्भवेन साध्याभावस्य साधनाभावेन व्याप्त्यसम्भवात् इतरव्यक्तीनामितरव्यावृत्तिग्रहणकाल एवेतरव्यावृत्तिग्रहणप्रमाणेन द्रव्याणामपीतरव्यावृत्तिग्रहणसम्भवेन व्यतिरेकिवैयर्थ्यस्य तदवस्थत्वाच्च ।

द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिमत्त्वं साध्यम्, तदभावस्य चैकत्वात् साधनाभावेन व्याप्तिर्घटत इति चेत्—न, द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिमत्त्वस्याप्रसिद्धत्वात् । इतरभेदस्याप्रसिद्धत्वेऽपि तदभावस्य भावत्वेन व्यतिरेकव्याप्ति [ ······उ ] पपत्तेर्नाप्रसिद्धविशेषणत्वमत्र दोष इति चेत्—न, इतरभेदपदाभिलप्यद्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिविरहाणामेकत्रासम्भवेन साधनाभाव······पञ्चमः गुणत्वकर्मत्वजाति[ त्व ]विशेषत्वसमवायत्वाभावत्वविरहाभावानां गुणत्वादीनामेकत्वाभावेन साध्याभावस्य साधनाभावेन व्याप्त्यसम्भवात् । गुणत्वकर्मत्वजातित्वविशेषत्वसमवायत्वाभाव[वत्]त्वप्रतियोगिकषडत्यन्ताभाववत्त्वविरहस्य च गुणत्वादिव्यतिरेकिणो भावस्य प्रतियोगिप्रसिद्धिमन्तरेण ग्रहीतुमशक्यत्वेन साधनाभावेन व्याप्तिग्रहणासम्भवात् । द्रव्यगुणत्वादिरहितमिति प्रतिज्ञावाक्यादेव साध्यम[न]वगम्य साध्याभावस्य साधनाभावेन व्याप्तिमवधार्य प्रतिपादितव्यतिरेकिणा पक्षे साध्यमनुमिनोतीति चेत्—न प्रतिज्ञापदाभ्यां परस्परासंसृष्टधर्मिसाध्यपरतयोच्चरिताभ्यां संसर्गानवगमात् । संसर्गावगमेऽपि वैकैकगुणत्वादिविरहसंसर्गस्यैवावगमात् । गुणत्वादिविरहषट्कवत्त्वसाध्यानप[व]गमात् । अ[व]गमेऽपि वा प्रतिज्ञावाक्यावगतसाध्यस्य निष्प्रमाणकत्वेन तदभावस्यापि निष्प्रमाणकत्वात् । प्रतिज्ञावाक्यस्य च प्रमाणवत्त्वे व्यतिरेकिवैयर्थ्यात् । अप्रसिद्धमेव साध्यं व्यतिरेकी साधयति । अप्रसिद्धमेव साध्यसंसर्गमन्वयोति चेत्—न, साध्याप्रसिद्धौ तदभावस्याप्रसिद्धत्वेन व्यतिरेकग्रहणासम्भवात् । अप्रामाणिकसाध्यप्रतियोगिकाभावस्य च सर्वत्र विद्यमानत्वेन साधनप्रतिपक्ष एव साधनाभावेन व्याप्तिभङ्गाच्च । व्यतिरेकिप्रमाणत्वात् साध्यस्य तदभावेनाप्रामाणिक इति चेत् – न, व्यतिरेकिप्रामाण्यसिद्धेः ।

**श्रीकरस्तु** गुणत्वात्यन्ताभाव[वः]कर्मत्वात्यन्ताभावादिपञ्चकसमानाधिकरणत्वातिरिक्तगुणत्वात्यन्ताभावनिष्ठत्वरहितत्वात्[वान्] प्रमेयत्वाद् घटवदिति गुणत्वात्यन्ताभावस्य कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणत्वं प्रसाध्य द्रव्य[व्यं]कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणगुणत्वात्यन्ताभाववत्, गुणत्वात् । न यदेवं न तदेवमिति प्रयोक्तव्यमित्याह—तन्न, कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणगुणत्वात्यन्ताभाववतः



कर्मादेः सपक्षादपि व्यावृत्तत्वेन गुणवत्त्वादेः साधारणत्वस्य दुर्वारत्वात् । पक्षे कर्मत्वात्यन्ताभावपञ्चकासिद्धेः साधनवैयर्थ्याच्च । यत्र क्वचन गुणत्वाभावस्य कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणत्वेऽपि कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणगुणत्वाभावस्य पक्षनिष्ठत्वोपपत्तेः । कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणत्वस्य विशेषणसाधकप्रमाणादेव सिद्धत्वाच्च । पक्षे गुणत्वात्यन्ताभावपक्षस्य च गुणत्वात्यन्ताभाववदित्येतावतैव सिद्धेः कर्मत्वात्यन्ताभावपञ्चकसमानाधिकरणत्वविशेषणवैयर्थ्यात् गुणत्वात्यन्ताभाववत्त्वे साध्ये कर्मादेः सपक्षादपि व्यावृत्तत्वेन गुणवत्त्वादेरसाधारणत्वं स्यादिति चेत्—न, एतद्विशेषणोपादानेऽप्यसाधारणत्वस्य तदवस्थत्वेन साध्यगतविशेषणवैयर्थ्यस्य वज्रलेपायमानत्वात् । गुणात्यन्ताभावः कर्मत्वात्यन्ताभावसमानाधिकरणत्वात्यन्ताभावातिरिक्तगुणत्वात्यन्ताभावनिष्ठत्वरहितवान् प्रमेयत्वात् पटवदिति विशेषणसाधकस्य सत्प्रतिपक्षत्वाच्च ।

**शिवादित्यमिश्रास्तु** गुणत्वात्यन्ताभावस्य कर्मत्वात्यन्ताभावसमानाधिकरणत्वानुमानेन द्रव्यविशेषानवच्छिन्नं गुणत्वादिप्रतियोगिकषडत्यन्ताभावत्वं प्रसाध्य द्रव्यं गुणत्वादिप्रतियोगिकषडत्यन्ताभाववत् गुणत्व[ा][व]त् । न यदेवं न तदेवमिति व्यतिरेकिणं प्रवर्तयति । तदपि न, विशेषणसाधकानुमानस्य सत्प्रतिपक्षत्वादिसकलदोषग्रस्तत्वात् । प्रपञ्चितं **चैतन्महाविद्याविडम्बने** । तस्मात् निष्प्रयोजनानि लक्षणप्रतिपादकानि सूत्राणि नारम्भणीयानीति । तदसुन्दरम्, द्रव्यत्वसिद्धेः द्रव्यलक्षणप्रयोजनत्वात् प्रत्यक्षद्रव्येषु द्रव्यत्वसाक्षात्कारस्य गुणवत्त्वाद्यवगमसहितेन्द्रियजन्यत्वम्, असति गुणवत्त्वाद्यवगमे सत्यपीन्द्रियादेर्घटपटादौ द्रव्यं द्रव्यमित्यनुगतापरोक्षप्रतीत्यनुदयात् । अप्रत्यक्षद्रव्येषु द्रव्यत्वानुमितेरन्वयव्यतिरेकिगुणवत्त्वादिद्रव्यलक्षणजन्यत्वात् । न चात्र पृथिवीत्वगन्धवत्त्वरसवत्त्वशुक्ल[वत्]त्वादयः उपाधयः प्रत्यक्षावासितद्रव्यत्वे चलनादौ साध्य[ा]व्यापकत्वभङ्गात् । नापि रूपवत्त्वस्पर्शवत्त्वभूतत्वेन्द्रियत्वविशेषगुणवत्त्वकार्यवत्त्वास्मत्प्रत्यक्षत्वादयः, कालो द्रव्यत्वातिरिक्तकालनिष्ठत्वरहितवान् मेयत्वादिति कालनिष्ठद्रव्यत्वसिद्धेः काले साध्यव्यापकत्वभङ्गात् । न चैवं काले पूर्वानुमानवैयर्थ्यं तदतिरिक्तानामेव धर्मित्वेनोपादानात् । यद् वा कालो द्रव्यत्वातिरिक्तकालनिष्ठत्वरहितवान् गुणत्वात् पटवदित्यादिना केवलान्वयिना द्रव्यलक्षणेनाप्रत्यक्षद्रव्येषु द्रव्यत्वानुमानात् । न चात्राप्रसिद्धविशेषणत्वम्, द्रव्यत्वातिरिक्तत्वविशिष्टकालत्वरहितस्य रूपादेर्घटादौ प्रत्यक्षसिद्धत्वात् । न च साधनवैयर्थ्यम्, अप्रत्यक्षद्रव्येषु प्रत्यक्षेण द्रव्यत्वासिद्धेः । न चास्य सोपाधित्वादिसंभवः केवलान्वयित्वादेव । अस्तु वा प्रत्यक्षद्रव्येषु द्रव्यत्वसिद्धिः केवलव्यतिरेकिणा द्रव्यलक्षणेन । न चात्र विद्यमानसपक्षत्वादसाधारणता, गुणवत्त्वादेः सपक्षादव्यावृत्तेः । नाप्यन्वयसंभवेन व्यतिरेकिभङ्गः, साध्यप्रसिद्धेरेवान्वयनिश्चयस्यानुपजीव्यत्वेन केवलव्यतिरेकिप्रवृत्तेः पूर्वमवश्यम्भावेनान्वयनिश्चयदशायां केवलव्यतिरेकित्वोपपत्तेः । अस्तु वा सर्वद्रव्यसिद्धि[र्]द्रव्यलक्षणादेव केवलव्यतिरेकिणः । न चाप्रसिद्धविशेषणत्वम्, साध्याप्रसिद्धेरनुमानाङ्गवैकल्यरूपत्वा-

भावात्, अनुमानाङ्गवैकल्यानापादकत्वाच्च । साध्याप्रसिद्धिः साध्यसंदेहं विघटयन्ती पक्षधर्मताभङ्गे पर्यवस्यति सन्दिग्धसाध्यस[स्य]पक्षत्वादिति चेत्—न, साध्यसन्देहस्यानुमाना[न]ङ्गत्वात्, साध्य[ा]निर्णयादेवानुमानोपपत्तेः, अनिर्णीतसाध्यस्यैव पक्षत्वात् । अन्यथा व्युत्पन्नविपर्यस्तयोरनुमित्युदयप्रसङ्गात् । साध्याप्रसिद्धौ साध्याभावस्य साधनाभावेन व्याप्त्यनवगमात् व्यतिरेकय प्रवृत्तिरिति चेत्—न, साध्याभावनिष्ठसाधनाभावव्याप्तेः साधननिष्ठत्वेन साध्यानुमित्यजनकत्वस्य पूर्वमेवावि[वे]दितत्वात् । साधननिष्ठसाध्यव्याप्तेरेव साध्यानुमितिजनकत्वात् । व्यतिरेकव्याप्त्यनवगताप्य[वप्यु]पायाभावात् गुणवत्त्वस्य द्रव्यत्वेन व्याप्तिग्रहणासंभव इति चेत्—न, प्रत्यक्षस्येवोपायत्वात् गुणवत्त्वनिष्ठद्रव्यत्वव्याप्तेः प्रत्यक्षस्यान्वयादिना प्रत्यक्षस्यान्वयवादिनाप्यङ्गीकारात् । द्रव्यत्वाग्रहे द्रव्यत्वेन गुणत्वस्य व्याप्तिः प्रत्यक्षेण न गृह्यत इति चेत्—किं द्रव्याश्रितत्वात् तदग्रहे न गृह्यत इति विवक्षितम्, द्रव्यत्वानवच्छिन्नत्वाद् द्रव्यज्ञानत्वज्ञानजन्यज्ञानविषयत्वाद् वा, द्रव्यत्वज्ञानाजन्यज्ञानाविषयत्वाद् वा, द्रव्यत्वविषयज्ञानविषयत्वाद् वा, द्रव्यत्वाविषयज्ञानाविषयत्वाद् वा ? नाद्यः, द्रव्यत्वव्याप्तेः द्रव्यत्वव्याप्यत्वापरपर्यायगुणवत्वनिष्ठाया द्रव्यत्वानाश्रितत्वात् । द्वितीयेऽपि द्रव्यत्वावच्छिन्नत्वं किं द्रव्यत्वविशिष्टत्वम् द्रव्यत्ववैशिष्ट्यरूपत्वं वा ? नाद्यः, द्रव्यत्वविशिष्टानामपि घटादीनां द्रव्यत्वाग्रहेऽपि ग्रहणात् । न द्वितीयः, द्रव्यमात्रवृत्ते····द्यात् । द्रव्यगुणपञ्चवृत्तेर्व्याप्यत्वस्य भिन्नत्वात् । न तृतीयः, द्रव्यज्ञानजन्यद्रव्यत्वविशिष्टाज्ञानविषयस्यापि घटादेर्द्रव्यत्वाग्रहेऽपि ग्रहणात् । न चतुर्थः, मानाभावादसिद्धेः, द्रव्यत्वव्याप्यत्वं······· द्रव्यत्वज्ञानाजन्य····प्रमेयत्वात् पटवदित्यनुमानाच्च । न पञ्चमः, घटादेरिव द्रव्यत्वविषयज्ञानविषयस्यापि द्रव्यत्वविषयज्ञानविषयत्वात् । न षष्ठः, मानाभावादसिद्धेः । द्रव्यत्वव्याप्यत्वं द्रव्यत्वाविषयज्ञानविषयः द्रव्यत्वान्यत्वात् पटवत् । द्रव्यत्वाव्याप्यत्वाविषयज्ञानविषयः, मेयत्वात् पटवदित्यनुमानाच्च । न चैवमादीनां····द्रव्यत्वाभावे व्यभिचारः, तस्य पक्षतुल्यत्वात् सपक्षाभावात् कुत्र व्याप्तिर्गृह्यत इति चेत्—न, व्याप्त्याश्रयप्रश्ने गुणवत्व इत्युत्तरम्, ग्रहणाश्रयत्वप्रश्ने च आत्मनीत्युत्तरम् । गुणवत्वं पक्षः सपक्षो वेति चेत्– न साध्यद्रव्यत्वरहितत्वेन तस्य विपक्षत्वात्, सपक्षे व्याप्तिर्गृह्यते न तु पक्ष इति चेत्—न, अन्वयित्वपक्षेऽपि द्रव्यत्वाभाव इति गुणवत्व एव व्याप्यत्वग्रहणात् । अन्यत्र सत्वात् । सपक्षे व्याप्तिर्गृह्यते इति प्रसिद्धेश्च सपक्षावगतसाधननिष्ठत्वग्रहणाभिप्रायेणोपपत्तेः । तथापि सपक्षावगतसाधननिष्ठतया व्याप्तिर्गृह्यते । न तु पक्षावगततत्साधननिष्ठतयेति चेत्—न, अवगतसाधननिष्ठतया व्याप्तिग्रहणोपपत्तौ साधनगतसपक्षत्वस्यानुपयोगित्वात् । द्रव्यत्वव्याप्यत्वं नाम द्रव्यत्ववन्मात्रवृत्तित्वं द्रव्यत्वात्यन्ताभाववृत्तित्वात्यन्ताभावो वा । तत्र द्वयमपि द्रव्यत्वावगमेनावगन्तुमशक्यमिति चेत्—न, उक्तोत्तरत्वात् । केवलान्वयिन्यसंभवेन चानयोर्व्याप्यत्वरूपानङ्गीकाराच्च । किं तर्हि द्रव्यत्वव्याप्यत्वमिति चेत्—द्रव्यत्वानुमितिजनको गुणवत्त्वनिष्ठो धर्मविशेषः । स च द्रव्यत्वानवगमेऽप्यवगन्तुं शक्यत एव । पर्वतनिष्ठ-



वह्निविशेषानवगमेऽपि पर्वतनिष्ठवह्निविशेषानुमितिजनकपर्वतनिष्ठधूमविशेषनिष्ठपर्वतनिष्ठवह्निव्याप्यत्ववत् । अन्यथा पर्वतनिष्ठधूमविशेषेण केवलव्यतिरेकिणा पर्वतनिष्ठवह्निविशेषानुमित्यनुदयप्रसङ्गात् । अन्वयिना धूमवत्वेन पक्षधर्मताबलात् पर्वतनिष्ठवह्निविशेषणसिद्धेः निराकरिष्यमाणत्वात् ।

यद् वा, साध्यविशेषसमर्पकतया द्रव्यलक्षणं द्रव्यत्वानुमितिं जनयति, न लिङ्गतया । अयं घट एतद्वृत्तिद्रव्यलक्षणव्यावृत्तत्वरहितैतद्वृत्तिद्रव्यलक्षणरहितवृत्तित्वानधिकरणजातिमान् जातिमत्त्वादित्यादौ साध्यस्य द्रव्यलक्षणगतत्वात् । न च प्रकारान्तरेणापि प्रत्यक्षसिद्धेरप्यवैयर्थ्यम्, तस्यानुपजीव्यत्वात् । अन्यथानेनापि प्रकारेण द्रव्यत्वसिद्धेः प्रकारान्तरेण वैयर्थ्यस्य दुष्परिहरत्वात् । यदापि द्रव्यत्वं द्रव्यलक्षणम्, तदापि द्रव्यत्वसिद्धिर्लक्षणप्रयोजनम्, द्रव्यत्वनिर्विकल्पकस्य द्रव्यत्वजन्यत्वात् । द्रव्यत्वसविकल्पकस्य च द्रव्यत्वतदवगमजन्यत्वात् । अप्रत्यक्षद्रव्येषु च द्रव्यत्वानुमितेः द्रव्यत्वावगमजन्यत्वाच्च । द्रव्यशब्दवाच्यत्वादिसिद्धिर्वा प्रयोजनम् । तस्माद् द्रव्यत्वसिद्धिर्द्रव्यलक्षणप्रयोजनम् ।

यद् वा, द्रव्यशब्दवाच्यत्वसिद्धिर्द्रव्यलक्षणप्रयोजनम् । तथा च पृथिव्यादयो द्रव्यशब्दवाच्याः गुणवत्त्वात् । न यदेवं न तदेवम्, यथा रूपमित्यादि । न चात्राप्रसिद्धविशेषणत्वम्, द्रव्यपदं वाच्यवत् पदत्वात् गोपदवदिति विशेषणप्रसिद्धेः । न चैवं विद्यमानसपक्षत्वात् द्रव्यलक्षणस्यासाधारणत्वं सपक्षाव्यावृत्त्यनिश्चयात् । नाप्यन्वयसंभवेन केवलव्यतिरेकित्वभङ्गः, सपक्षे हेतोर्वृत्त्यनिश्चयात् । नापि व्यतिरेकिवैयर्थ्यम्, पक्षे द्रव्यशब्दवाच्यत्वस्य विशेषकसाधनानुमानेनानिश्चयात् । नापि वृद्धव्यवहारादेव द्रव्यशब्दवाच्यत्वसिद्धेः व्यतिरेकिवैयर्थ्यम्, तस्यानुपजीव्यत्वात् । अन्यथा व्यतिरेकिणैव द्रव्यशब्दवाच्यत्वसिद्धेः वृद्धव्यवहारवैयर्थ्यस्य दुष्परिहरत्वात् । अस्तु वा प्रत्यक्षद्रव्येषु द्रव्यशब्दवाच्यत्वसिद्धिः वृ[द्]धव्यवहारात् । अप्रत्यक्षद्रव्येषु न द्रव्यशब्दवाच्यत्वसिद्धिः, केवलव्यतिरेकिणो द्रव्यलक्षणत्वात् । न चात्र विद्यमानसपक्षत्वेनासाधारणता, ततो हेतोर्निश्चयात् । नाप्यन्वयसंभवेन केवलव्यतिरेकित्वभङ्गः विशेषणप्रवृत्तेरिवान्वयप्रसिद्धेरनुपजीव्यत्वेन तदभावदशायां केवलव्यतिरेकित्वसंभवात् । नापि साधनवैयर्थ्यम्, अप्रत्यक्षद्रव्येषु वृद्धव्यवहाराभावात् । भावेऽपि वा तस्यानुपजीव्यत्वात् । न चात्र पूर्वोक्ता उपाधयः पूर्वोक्तादेव न्यायादिति ।

अस्तु वा प्रत्यक्षद्रव्येषु द्रव्यशब्दवाच्यत्वसिद्धिरन्वयव्यतिरेकिणो द्रव्यलक्षणात् । न चात्र अस्मत्प्रत्यक्षादय उपाधयः पूर्वोक्तादेव न्यायात् । न चोपाधिविरहेण सत्प्रतिपक्षत्वम्, द्रव्यलक्षणाभावेऽपि न सोपाधित्वादिति । अस्तु वा प्रत्यक्षद्रव्येषु द्रव्यशब्दवाच्यत्वसिद्धिः, केवलान्वयिनो द्रव्यलक्षणात् । परमाणुद्रव्यशब्दवाच्यत्वव्यतिरिक्तपरमाणुनिष्ठत्वरहितवान्, गुणवत्त्वात् घटवदित्यादेः सर्वत्र प्रत्यक्षद्रव्येषु

सुलभत्वादिति भेदापरपर्याय.........द्रव्यलक्षणरहितव्यावृत्तिमत्त्वसिद्धिः। न च द्रव्यलक्षणरहितसर्वव्यक्तीनामवगन्तुमशक्यत्वेन तद्व्यावृत्तिमत्त्वस्याप्रसिद्धेः अप्रसिद्धविशेषणता, यावत्प्रतिपन्नद्रव्यलक्षणरहितव्यक्तिव्यावृत्तिमत्त्वस्यैव साध्यत्वात्। नापि यावत्प्रतिपन्नद्रव्यत्वलक्षणरहितव्यक्तिव्यावृत्तिमत्त्वस्य क्वचिदप्रसिद्धत्वादप्रसिद्धविशेषणता, घटादावेव प्रसिद्धत्वात्। द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वस्यानुमानसिद्धत्वात्। न च स्वयं प्रत्यक्षानुमानावगतद्रव्यलक्षणरहितव्यक्तिव्यावृत्तिमन्तः परावगतद्रव्यलक्षणरहितात् सपक्षादपि व्यावृत्तत्वादसाधारणता, तस्य स्वयं साध्यवत्त्व[त्त]यानवगतत्वेन ततो हेतुव्यावृत्त्यनिश्चयात्। न च घटे द्रव्यलक्षणरहितानन्तप्रत्यक्षव्यक्तिव्यावृत्तिनियतलिङ्गासंभवः, घटद्रव्यलक्षणरहितानन्ताप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वमभ्युपगच्छता परेणापि तन्नियतलिङ्गस्यावश्यं वक्तव्यत्वात्। नापि साधनवैयर्थ्यम्, घटादिनिष्ठद्रव्यलक्षणरहितप्रत्यक्षाप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वसाधकप्रत्यक्षानुमानाभ्यां प्रत्यक्षद्रव्येषु द्रव्यलक्षणप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वानिश्चयात् प्रत्यक्षद्रव्यनिष्ठद्रव्यलक्षणरहितसर्वप्रत्यक्षाप्रत्यक्षव्यक्तिव्यावृत्तत्वनिश्चयस्य चानुपजीव्यत्वात्।

अस्तु वा द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वमेव साध्यम्। न चाप्रसिद्धविशेषणता, घट एव साध्यप्रसिद्धेः। न च विद्यमानसपक्षत्वादसाधारणता, हेतोः सपक्षादव्यावृत्तत्वात्। नापि सपक्षे अन्वयनिश्चयसंभवेन केवलव्यतिरेकित्वभङ्गः, साध्यप्रसिद्धेरिवान्वयनिश्चयस्यानुपजीव्यत्वेन केवलव्यतिरेकिप्रवृत्तेः पूर्वमवश्यंभावाभावेन तदभावदशायां केवलव्यतिरेकिप्रवृत्तेर्दुर्वारत्वात्। नापि साधनवैयर्थ्यम्, प्रत्यक्षद्रव्येषु द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तिमत्त्वसाधकप्रत्यक्षेणाप्रत्यक्षद्रव्येषु द्रव्यलक्षणरहितसर्वप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वानिश्चयात्। अप्रत्यक्षद्रव्येषु द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वस्य[।]प्रत्यक्षेणाग्रहणाच्च। ग्रहणेऽपि वा तस्यानुपजीव्यत्वात्। नापि घटादौ व्यतिरेकिवैयर्थ्यम्, तेषां धर्मित्वेनानुपजीव्यत्वात्। अस्तु वा घटव्यतिरिक्तप्रत्यक्षद्रव्याणां धर्मित्वम्, तथापि साधनवैयर्थ्यम्, घटनिष्ठद्रव्यलक्षणरहितसर्वप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वापरोक्षानुभवस्य च घटादिनिष्ठद्रव्यलक्षणरहितसर्वप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वागोचरत्वात्। अस्तु वा घटस्य धर्मित्वम्, तथापि न साधनवैयर्थ्यम्, घटनिष्ठसाध्यप्रसिद्धेरनुपजीव्यत्वात्। घटादिनिष्ठसाध्यत्वप्रसिद्धेश्चोपजीव्यत्वेऽपि घटनिष्ठसाध्यागोचरत्वात्। न च द्रव्यलक्षणरहितसर्वव्यक्तीनामवगन्तुमशक्यत्वेन तद्व्यावृत्तिमत्त्वस्याप्रसिद्धेरप्रसिद्धविशेषणता द्रव्यलक्षणरहितसर्वव्यक्तीनामनवगमेऽपि तद्व्यावृत्तीनामिन्द्रियसन्निकृष्टानां घटनिष्ठत्वेन ग्रहणोपपत्तेः विनापि प्रतियोगिग्रहणमभावरूपस्य उपपादितत्वात्। परप्रत्यक्षावगतद्रव्यलक्षणरहितव्यक्तिव्यावृत्तिमत्त्वस्यैव वा साध्यत्वात्। न च द्रव्यलक्षणरहितप्रत्यक्षव्यक्तिव्यावृत्तिमत्त्वसाधने परमाणुरूपादेः सपक्षादपि व्यावृत्तत्वेन द्रव्यलक्षणस्यासाधारणता। अप्रत्यक्षद्रव्यवदप्रत्यक्षगुणानामपि अनिश्चितसाध्यवत्त्वेन सपक्षत्वासंभवात्, प्रमाणान्तरात्



तत्साध्यवत्त्वनिश्चये च ततः पूर्वं व्यतिरेकिप्रवृत्तेन दुर्वारत्वात्। न च द्रव्यलक्षणरहितसर्वप्रत्यक्षव्यक्तिव्यावृत्तिविरहाणामेकत्र संभवात् व्यतिरेकानुपपत्तिः। द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तिमत्त्वस्य साध्यत्वात्। तदभावस्यैकस्य गुणादौ सर्वत्र संभवात्। एतेन द्रव्यलक्षणरहितसर्वव्यक्तिव्यावृत्तिविरहाणां द्रव्यलक्षणरहितसर्वव्यक्तिरूपाणामेकत्रासंभवात् व्यतिरेकानुपपत्तिरित्यपि न युक्तम्। द्रव्यलक्षणरहितप्रत्यक्षसर्वव्यक्तिप्रतियोगिन्येका व्यावृत्तिः साध्यते। न चैवंविधसाध्याप्रसिद्धेरप्रसिद्धविशेषणता, इयं रूपव्यावृत्तिः एतदन्यद्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकत्वरहितद्रव्यलक्षणरहितव्यावृत्त्यन्या प्रमेयत्वात् घटवदित्यादिना साध्यप्रसिद्धेः। सन्तु वा द्रव्यलक्षणरहितसर्वप्रत्यक्षव्यक्तिप्रतियोगिन्यः सर्वव्यावृत्तयः साध्याः। न चैवमप्रसिद्धविशेषणता, द्रव्यलक्षणरहितप्रत्यक्षसर्वव्यक्तिव्यावृत्तीनामेकत्राप्रसिद्धत्वेऽपि परस्परव्यावृत्तद्रव्यलक्षणरहितप्रत्यक्षव्यावृत्तिष्वेव प्रत्यक्षसिद्धत्वात् न चास्य व्यतिरेकासंभवो दोष[ः] [तस्यानुमा]नानङ्गत्वात्। द्रव्यलक्षणरहितप्रत्यक्षसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिव्याप्यत्वस्य च प्रत्यक्षेणावगन्तुमशक्यत्वात्, साध्यप्रसिद्धेः संभवात्। साध्याप्रसिद्धावपि तद्व्याप्यत्वग्रहणस्योपपादितत्वाच्च। न चात्र पूर्वोक्ता उपाधयः पूर्वोक्तादेव न्यायात्। द्रव्यलक्षणरहितप्रत्यक्षसर्वव्यक्तिप्रतियोगिकैकव्यावृत्तेश्च धर्मविशेषानवच्छेदेनैव सिद्धेरुपाधेः साध्यव्यापकत्वानिश्चयाच्च। द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तीनामेकत्रासंभवेनोपाधेः साध्यव्यापकतानिश्चयाच्च। न चात्र प्रमेयत्वादिभिः सत्प्रतिपक्षत्वम्, साध्यप्रसिद्धिस्थले घटादौ व्यभिचारात्। नाप्यस्मत्प्रत्यक्षादिविरहेण सत्प्रतिपक्षत्वम्, द्रव्यलक्षणविरहेण सोपाधित्वात्। न चास्य पक्षेतरता, साध्यप्रसिद्धिस्थलात् घटादेः विपक्षव्यावृत्तत्वादिति। तस्मादप्रत्यक्षद्रव्याणि द्रव्यलक्षणरहितसर्वव्यक्तिप्रतियोगिकसर्वव्यावृत्तिमन्ति गुणत्वात्, न यदेवम्, न तदेवम्। यथा रूपमित्यादि प्रतियोक्तव्यमिति।

यद् वा गुणत्वकर्मत्वजातित्वविशेषत्वसमवायत्वाभावत्वप्रतियोगिकषडत्यन्ताभाववत्त्वसिद्धिर्द्रव्यलक्षणप्रयोजनम्। न चात्राप्रसिद्धविशेषणता, घटादौ साध्यप्रसिद्धेः। नापि साधनवैयर्थ्यादयः, पूर्वोक्तादेव न्यायात्। अस्तु वा गुणवत्त्वात्यन्ताभावादिरेकैक एव साध्यः। न चात्राप्रसिद्धविशेषणत्वं दोषाय, साध्याप्रसिद्धावपि तदभावस्य गुणत्वादेव तवावगन्तुं शक्यत्वेन व्यतिरेकग्रहणोपपत्तेः। नापि व्यतिरेकासंभवः, गुणत्वात्यन्ताभावात्यन्ताभावस्य गुणत्वादेर्गुणादिष्वेकैकस्य संभवात्। नापि गुणत्वात्यन्ताभावसाधनेनैकधर्मादेः सपक्षादपि व्यावृत्तात् द्रव्यलक्षणस्यासाधारणता, कर्मादेरप्यनिर्णीतसाध्यतया पक्षतुल्यतया सपक्षत्वासंभवात्। नापि साधनवैयर्थ्यम्। अप्रत्यक्षद्रव्येषु गुणत्वाभावस्य प्रत्यक्षेणानवगमात्। प्रत्यक्षद्रव्येष्वपि गुणत्वाभावसाधकप्रत्यक्षस्यानुपजीव्यत्वेन तदभावदशायां गुणत्वाभावव्यवहारसाधकप्रतीतिजनकत्वेन व्यतिरेकिणः सफलत्वात्। गुणत्वाप्रत्यक्षत्वपक्षे च गुणत्वाभावस्य घटादावप्रत्यक्ष-

त्वाच्च । प्रत्यक्षप्रतियोगित्वाभावस्यैव प्रत्यक्षत्वात् । न चास्य गुणत्वसाधकप्रमेयत्वादिना सत्प्रतिपक्षत्वम्, घटनिष्ठगुणत्वाभावप्रत्यक्षबाधितत्वेन दुर्बलत्वात् । न चैवं गुणत्वाभावसाधकप्रत्यक्षेणैव साध्यप्रसिद्धेः व्यतिरेकवैयर्थ्यम्, पूर्वमेव निरस्तत्वात् । न चासत्प्रतिपक्षत्वोपपादकतयास्योपजीव्यत्वं घटनिष्ठगुणत्वाभावसाधकप्रत्यक्षस्योपजीव्यत्वेऽपि तेन पटादौ गुणत्वाभावप्रसाधनात् । गुणत्वशब्देन च किं गुणलक्षणवद्व्यावृत्तत्वरहिता जातिर्विवक्षिता, गुणलक्षणवद्व्यावृत्ते[त्तत्वे] सति सद्व्यवृत्ता वा ? नाद्यः, प्रतिपक्षहेतोः सत्तयार्थान्तरप्रसङ्गात् । न द्वितीयः, व्यावृत्तिस्थल एव प्रमेयत्वादेर्व्यभिचारात् । अस्तु वा सर्वद्रव्येषु गुणत्वादिप्रतियोगिकेऽपि षडत्यन्ताभाववत्त्वं साध्यं व्यतिरेकिणः । न चात्राप्रसिद्धविशेषणत्वम्, गुणत्वात्यन्ताभावपञ्चकसमानाधिकरणत्वातिरिक्तगुणत्वात्यन्ताभावनिष्ठत्वरहितवान् प्रमेयत्वात् घटवदित्यादिना तत्सिद्धेः । न च……… पक्षत्वादिसंभवः, केवलान्वयिसाध्याभावस्याप्रसिद्धत्वेन तेन सह कस्यचिदपि हेतोर्व्याप्तिग्रहणासंभवात् । अर्थान्तरसाधने चार्थान्तरस्य दुर्वारत्वात् । **महाविद्या**दूषणान्तराणां च यथास्थानमुद्धरणात् । तस्मात्……………… ।

यत्र यत्रास्मदादिषु दूषणोद्धारसंभवः ।
तं तं पन्थानमाश्रित्य व्यतिरेकी समर्थ्यताम् ॥

तस्माद् द्रव्यज्ञानजनकत्वात् द्रव्यशब्दवाच्यत्वज्ञानजनकत्वात् गुणादिव्यावृत्तद्रव्यज्ञानजनकत्वात् गुणत्वादिरहितद्रव्यज्ञानजनकत्वाच्च द्रव्यलक्षणं प्रयोजनवदिति युक्तः सूत्रारम्भः इति । द्रव्यत्वज्ञानं च गुणादिव्यावृत्तद्रव्यज्ञानजनकमेव, द्रव्यं गुणादिभ्यो भिद्यते द्रव्यत्वात्, न यदेवं न तदेवमिति व्यतिरेकिप्रवृत्तेः । तथा गुणत्वादिरहितद्रव्यज्ञानमपि गुणादिव्यावृत्तद्रव्यज्ञानजनकत्वमेव । द्रव्यं गुणादिभ्यो भिद्यते गुणत्वरहितत्वादित्यनुमानप्रवृत्तेर्गुणादिव्यावृत्तज्ञानं च गुणादिव्यावृत्तनिदिध्यासनहेतुः । गुणादिव्यावृत्तद्रव्यनिदिध्यासनं च गुणादिव्यावृत्तद्रव्यसाक्षात्कारहेतुः । गुणादिव्यावृत्तद्रव्यसाक्षात्कारश्चापवर्गहेतुरिति । पृथिव्याद्यष्टद्रव्यादिगुणादिव्यावृत्तात्मसाक्षात्कारो मुक्तिहेतुः । [तच्च]पृथिव्याद्यष्टद्रव्यगुणादिव्यावृत्तात्मनिदिध्यासनजन्यम् । तच्च पृथिव्याद्यष्टद्रव्यगुणादिव्यतिरिक्तात्ममननजन्यम् । तच्चात्मलक्षणादेवेति व्यर्थं द्रव्यलक्षणमिति चेत्—न, गुणादिव्यावृत्तात्मस्वरूपद्रव्यस्य द्रव्यलक्षणादवगतौ पृथिव्याद्यष्टद्रव्यव्यतिरिक्तत्वस्य चानुमानान्तरादवगतौ पृथिव्याद्यष्टद्रव्यलक्षणादिव्यतिरिक्तात्मस्वरूपनिदिध्यासनस्योपपत्तेः, द्रव्यलक्षणस्याप्यर्थवत्त्वादिति ॥ १४ ॥

**द्रव्याश्रयी न गुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्** ॥१.१.१५॥

आश्रयोऽस्यास्तीति आश्रयी आश्रित इति यावत् । द्रव्ये आश्रयी **द्रव्याश्रयी** द्रव्याश्रितः । यद् वा, द्रव्यश्च तदाश्रयश्च द्रव्याश्रयः । सोऽस्यास्तीति द्रव्याश्रयी द्रव्याश्रित इत्यर्थः । तेन द्रव्याश्रितो गुणरहितः संयोगविभागानपेक्षकारणत्वरहितो



गुण इति गुणलक्षणम्, द्रव्याश्रितविशेषणेन द्रव्यानाश्रितगगनादिव्युदासात्, गुणरहितविशेषणेन च गुणवद्घटादिनिराकरणात्, संयोगविभागानपेक्षकारणत्वरहितविशेषणेन संयोगविभागानपेक्षकारणकर्मव्यावर्तनादिति केचित् । तन्न, द्रव्याश्रितसामान्यसमवायाभावेष्वतिव्यापकत्वात्, द्रव्याश्रितविशेषणवैयर्थ्याच्च । गगनादीनां गुणरहितग्रहणेनैव व्युदासात् । अथ लक्षणवाक्यगतेन पदेन सामान्यादिव्यावर्तकं विशेषणं समर्पणीयम्, तस्यैवापेक्षितत्वात् । सामान्यवत्त्वं च सामान्यादिव्यावर्तकम् । तच्च न यथाश्रुतेन द्रव्यादिपदेन शक्यं समर्पयितुमिति द्रव्याश्रितपदं सामान्यवत्त्वं लक्षयति तेन द्रव्याश्रितपदवैयर्थ्यम् । नापि सामान्यादौ लक्षणस्य व्यावर्तकं विशेषणं समर्पणीयम्, तस्यैवापेक्षितत्वात् । सामान्यवत्त्वं च सामान्यादिव्यावर्तकम् तच्च न यथाश्रुते[ऽ]व्याप्तिरिति मन्यसे, तदपि न संयोगविभागकारणत्वरहितत्वेनैव कर्मव्यावृत्तिसिद्धौ अनपेक्षत्वविशेषणवैयर्थ्यात् । संयोगविभागकारणत्वरहित्वमेव विशेषणमिति चेत् – न, एवं सति गुणत्वरहितविशेषण[वैयर्थ्यम्, संयोगविभागानपेक्ष]कारणत्वरहितत्वेनैव द्रव्याणां व्युदासात् । अदृष्टेश्वरज्ञानेच्छाप्रयत्नेऽपि तत्त्वेनैव कर्मव्यावृत्तिसिद्धा…… संयोगविभागकारणत्वरहितत्वमेव विशेषणमिति चेत् – न, एवं सति गुणरहितविशेषणवैयर्थ्यात् । संयोगविभागकारणत्वरहितेनैव द्रव्याणां व्युदासात् । अदृष्टेश्वरज्ञानेच्छाप्रयत्नेषु लक्षणस्याव्यापकत्वाच्च । तेषां सर्वोत्पत्तिमज्जनकत्वेन संयोगविभागकारणत्वात् । अथेश्वरज्ञानाद्यव्याप्तिपरिहारार्थं कर्मण्यतिव्याप्तिपरिहारार्थं च संयोगविभागानपेक्षकारणत्वरहितविशेषण ईश्वरज्ञानादीनां संयोगविभागकारणत्वेऽपि संयोगविभागसापेक्षकारणत्वेन संयोगविभागानपेक्षकारणत्वरहितत्वात् । कर्मणश्च संयोगविभागानपेक्षकारणत्वरहितत्वविशेषणात् । न च गुणरहितत्वविशेषणवैयर्थ्यम्, द्रव्याणां संयोगविभागानपेक्षकारणत्वरहितत्वेन निराकर्तुमशक्यत्वादिति मन्यसे—तदपि न, विभागानपेक्षकारणत्वरहितत्वेनैव कर्मण्यतिव्याप्तेरीश्वरज्ञानादौ [अ]व्याप्तेर्निराकरणसिद्धौ संयोगानपेक्षकारणत्वविशेष[ण]वैयर्थ्यम्, सामान्यादीनामपि सामान्यवत्त्वस्य व्युत्पादितत्वेनातिव्याप्तेः तदवस्थत्वाच्चेति ।

**आत्रेयाचार्यास्तु** संयोगविभागयोरकारणं गुण इत्येतावदेव लक्षणम् । परं शेषस्वरूपकथनार्थमित्याहुः । तदपि न, संयोगविभागकारणत्वस्य सामान्यादावतिव्यापकत्वात् तद्व्युदासार्थं कारणत्वविशेषणमुपादेयमिति चेत्—न, सामान्यादीनामपि स्वविशिष्टबोधनत्वकारणत्वात् । विशिष्टज्ञानस्य विशेषणजन्यत्वात् सामान्यादयः कारणाः भावत्वात् घटवदित्यनुमानाच्च । अथ ज्ञानत्वरहितघटादिकारणत्वविशेषणमुपादेयम्. न चैवमन्त्यावयविपरिमाणाद्यव्याप्तिः, अस्यापि ज्ञानत्वरहितत्वप्रध्वंसादिकारणत्वात् । नापि परमाणुपरिमाणाव्याप्तिः, तस्यापि कर्मकारणत्वात् । मूर्तपरिमाणस्यान्वयव्यतिरेकाभ्यां कर्महेतुत्वावधारणादिति मन्यसे—तन्न, ज्ञानत्वरहितघटादिजनकप्रागभावप्रतिबन्धादौ पटरूपादिविनाशजनकपटप्रध्वंसादौ चातिव्यापक-

त्वात्। तद्व्यावृत्त्यर्थं भावत्वविशेषणमुपादेयमिति चेत्— न, एवमतिव्याप्तिपरिहारेऽप्यदृष्टेश्वरज्ञानेच्छाप्रयत्नेष्वव्याप्तेर्दुष्परिहरत्वात्। तेषां सर्वकार्यजनकत्वेन संयोगविभाग[ा]जनकत्वानुपपत्तेः। गगनपरिमाणादावव्यापकत्वाच्च। तेषां संयोगविभागाजनकत्वेऽपि ज्ञानत्वरहिताजनकत्वात्।

**अन्ये** तु द्रव्याश्रयीत्येतन्न गुणवान् संयोगविभागेष्वनपेक्षकारणमित्यपरमिति सूत्रार्थं **वर्णयन्ति**। तदपि न, द्रव्याश्रितत्वस्य कर्मादावतिव्यापकत्वात्। कर्मव्यावृत्त्यर्थं सर्वद्रव्याश्रितत्वं विवक्षितमिति चेत्— न, सत्ताद्रव्यत्वादावतिव्यापकत्वात्। अद्रव्यानाश्रितत्वे सति सकलद्रव्याश्रितत्वं विवक्षितमिति चेत्-न, द्रव्यत्वेऽतिव्यापकत्वात्। द्रव्यत्वव्यतिरिक्तत्वे सति इति चेत्— न, द्रव्यलक्षणान्तरेष्वतिव्यापकत्वात्। द्रव्यलक्षणव्यतिरिक्तत्वं विशेषणमुपादेयमिति चेत्—न, एवमतिव्याप्तिपरिहारेऽपि सकलगुणाव्याप्तेर्दुर्वारत्वात् सर्वद्रव्याश्रितत्वस्य क्वचिदप्यसंभवात्। सर्वद्रव्यवृत्तिनिष्ठावान्तरजातिमत्त्वं सर्वद्रव्यवृत्तित्वमिति चेत्— न, आकाशवृत्तिनिष्ठावान्तरजातिमत्त्वादेर्लक्षणत्वोपपत्तौ सर्वपदोपात्तद्रव्यान्तरवृत्तिनिष्ठत्वात् न वैयर्थ्यात्। गुणरहितः संयोगविभागानपेक्षकारणत्वरहितो गुण इत्यपि न लक्षणम्, सामान्यादावतिव्यापकत्वात्। सामान्यवत्त्वं विशेषणमुपादेयमिति चेत्— न, सामान्यादेरपि सामान्यवत्त्वेन लक्षणातिव्यापकत्वस्य तदवस्थत्वात्। सामान्यविशेषसमवायाभावव्यतिरिक्तत्वे सतीति चेत्— न, अध्याहारप्रसङ्गात्। एवमतिव्याप्तिपरिहारेऽपि लक्षणस्य दुरवगमत्वाच्च। ज्ञाते गुणरहितत्वे गुणलक्षणज्ञानम्, गुणलक्षणे च ज्ञाते गुणरहितत्वज्ञानमिति परस्पराश्रयात्।

**अन्ये** तु गुणवानित्यत्र गुणविशेषस्पर्शो विवक्षितः। तेन द्रव्याश्रितस्पर्शरहितः संयोगविभागानपेक्षकारणत्वरहितो गुण इति लक्षणं **वर्णयन्ति**। तदपि न, द्रव्याश्रितसामान्यादावतिव्यापकत्वात्। तद्व्यावृत्त्यर्थं सामान्यविशेषसमवायव्यतिरिक्तभाववत्त्वं विशेषणमुपादेयमिति चेत्—न, अध्याहारप्रसङ्गात्। द्रव्याश्रित इत्यत्र न [च] द्रव्यविशेषणवैयर्थ्याच्च। आश्रितत्वेनैव अनाश्रितगगनादिव्युदासात्। संयोगविभागानपेक्षकारणत्वरहित इत्यत्र संयोगविभागापेक्षकारणत्वरहितत्वविशेषणवैयर्थ्याच्च। विभागानपेक्षकारणत्वरहितत्वेनैव कर्मव्युदासात्। संयोगानपेक्षकारणत्वरहितत्वेन कर्मणो निवर्तयितुमशक्यत्वाच्च। कर्मणः संयोगानपेक्षकारणत्वविरहात्। विभागात् पूर्वसंयोगनिवृत्त्यनन्तरं कर्मणा संयोगजननात्। तस्मादनुपपन्नं गुणलक्षणं सूत्रमिति अत्रोच्यते, द्रव्यमाश्रयो यस्य असौ द्रव्याश्रयः। द्रव्यगुणकर्मवृत्तिजात्यादिव्यावृत्त्यर्थं अर्थत्वापरपर्यायसामान्यं यत् **उदयनादिभिः** सत्तेत्युच्यते, द्रव्याश्रयोऽस्मिन्नस्तीति द्रव्याश्रयी, अर्थत्ववानित्यर्थः। उपपादितं चार्थत्वम्। न गुणवानित्यत्र गुणशब्देन गुणविशेषाः संख्यापरिमाणपृथक्त्वसंयोगविभागा गृह्यन्ते। संयोगविभागेषु अकारणमनपेक्ष इति संयोगविभागानपेक्षकारणत्वरहितत्वं विवक्षितम्, कारणपदस्यानपेक्षपदेनान्वयात्। नञा समानार्थस्याकारणस्यानपेक्षकारणेन सम्बन्धात। अकारस्य च



नञा समानार्थत्वम् अमानोना प्रतिषेधा इत्यनुशासनात्। न कारणमकारणमिति नञः समासाभ्युपगमे च संयोगविभागयोरकारणमिति गुणलक्षणस्य ईश्वरज्ञानाद्यव्यापकत्वप्रसङ्गात्। ईश्वरज्ञानादीनां संयोगविभागकारणत्वात् संयोगविभागानपेक्षकारणत्वं च संयोगकारणत्वे सति विभागनपेक्षकारणत्वम्, अनपेक्षपदस्य विभागेनैवान्वयात्। संयोगेनाप्यन्वये विभागक्षण एव संयोगोदयप्रसङ्गात्। संयोगकारणत्वमात्रेण लक्षणोपपत्तौ अनपेक्षत्वविशेषणवैयर्थ्याच्च। विभागानपेक्षकारणरहितत्वेनैव कर्मण्यतिव्याप्तेः ईश्वरेच्छाप्रयत्नादृष्टेषु अव्याप्तेश्च परिहारात् व्यर्थं संयोगकारणत्वग्रहणमिति चेत्—न, शरीरकुड्यविभागजनकहस्तकुड्यादिविभागादावव्याप्तिपरिहारार्थत्वात् हस्तकुड्यविभागादेः शरीरकुड्यविभागानपेक्षकारणत्वेन तद्रहितत्वानुपपत्तेः। संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहितत्वस्य च शरीरकुड्यविभागजनकहस्तकुड्यादिविभागादावपि संभवात्। न चैवमितरेतराश्रयः, गुणरहितत्वस्य गुणलक्षणविशेषणत्वानङ्गीकारात्। संख्यादेश्च संख्यात्वादिनैव निरूपणात्।

तस्मात् अर्थत्वाश्रयः संख्या[द्य]नाश्रयः संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहितो गुण इति लक्षणं सिध्यति। एवं संख्यापदस्थाने परिमाणपृथक्त्वसंयोगविभागपदप्रक्षेपेण लक्षणचतु[ष्टयं]द्र[ष्ट]व्यम्।

यद् वा, गुणवानित्यत्र गुणरहितत्वाभावेन द्रव्यत्वाभावो लक्ष्यते। तथा च न परस्पराश्रयः, गुणरहितत्वस्य लक्षणविशेषणत्वाभावात्। द्रव्यत्वस्य च गुणमन्तरेणापि समवायिकारणत्वेनैव निरूपणसंभवात्। तस्मात् अर्थत्वाश्रयो द्रव्यत्वरहितः संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहितो गुण इति सूत्रार्थः।

यद् वा, न गुणवानिति गुणविशेषस्पर्शाभावो विवक्षितः, अनाश्रितगगनादिव्युदासार्थः। द्रव्याश्रितत्वविशेषणलाभाय च द्रव्याश्रयीति पदं पुनरावर्तनीयम्। द्रव्यं च तदाश्रयश्च द्रव्याश्रयः। सोऽस्यास्तीति द्रव्याश्रयीति द्रव्याश्रितत्वलाभात्। न च द्रव्यलक्षणस्य व्यावर्त्याभावः, तस्य लक्षणान्तर्गतत्वाभावात्। न चैवं द्रव्यग्रहणवैयर्थ्यं गुणानामद्रव्यवृत्तित्वशङ्कानिरासार्थत्वात्। तथा च नेतरेतराश्रयः, गुणरहितत्वस्य लक्षणविशेषणत्वाभावात् स्पर्शस्य च स्पर्शेनैव निरूपणात्। तस्मादर्थत्वाश्रय आश्रितस्पर्शरहितः संयोगविभागानपेक्षकारणत्वरहितो गुण इति लक्षणं सूत्रार्थः।

यद् वा, न गुणवानिति गुणरहितकर्मत्वमेव लक्षणविशेषणम्। न चैवमितरेतराश्रयः। गुणेन गुणरहितत्वनिरूपणेऽपि गुणरहितत्वादिलक्षणेन गुणानिरूपणात्, तस्येतरभेदमात्रनिरूपकत्वाच्च। गुणेन गुणरहितत्वादिलक्षणनिरूपणेऽपि गुणरहितत्वादिलक्षणमन्तरेणापि गुणत्वेनैव गुणनिरूपणाच्च। गुणत्वस्य च रूपादिव्यावृत्तत्वरहितरूपत्वादिचतुर्विंशतिजातिरहितावृत्तिजातित्वेन निर्वचनात्। गुणरहि-

तत्वादिगुणलक्षणानवगमेऽपि रूपं रूपवृत्तिरूपव्यावृत्तत्वरहितरूपवृत्तिरसादिव्यावृत्तत्वरहितरूपवृत्तिरूपत्वादिचतुर्विंशतिजातिरहितावृत्तिजातिमत् जातिमत्त्वाद् घटवत् इत्यादिना गुणत्वस्यावगन्तुं शक्यत्वाच्च। अस्तु वा गुणलक्षणेनैव गुणत्वनिरूपणम्, तथापि नेतरेतराश्रयः, गुणरहितत्वादिवर्जितेनार्थत्वाश्रयः संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहित इत्यादिना गुणनिरूपणात् एवं सति एतदेवास्तु किं तेनेति चेत्—न, तस्यापि निर्दोषत्वेन लक्षणत्वानपायात्। परस्पराश्रयपरिहारार्थमवश्योपजीव्येनानैनैव इतरभेदादिसिद्धेः व्यर्थं गुणरहितत्वादिलक्षणमिति चेत्—न, गुणलक्षणान्तराजन्येतरभेदानुमितिजनकत्वेनास्याव्यर्थत्वात्। एतद्व्यतिरिक्तेनापि गुणलक्षणेन गुणनिरूपणसिद्धेरस्यावश्योपजीव्यत्वाभावाच्च। न चैवं सति तदेवास्ती[स्त्वि ?]तिवाच्यम्, लक्षणान्तरेणापि गुणनिरूपणसिद्धेः तस्योपजीव्य……निरूपणार्थमुपजीव्यमिति चेत्—न उक्तन्यायेन सर्वेषामवश्योपजीव्यत्वाभावसिद्धेः। संयोगविभागेष्विति बहुवचनं स्वरूपकथनार्थम्। न तु लक्षणान्तर्गतं व्यावर्त्याभावात्।

यद् वा……[सं]योगविभागानपेक्षकारणत्वरहितत्वं संयोगविभागासमवायिकारणत्वरहितत्वं विवक्षितम्। संयोगविभागासमवायिकारणरहितत्वं च कारणत्वे सति विभागासमवायिकारणत्वाभावः, विभागकारणत्वे सति संयोगासमवायिकारणत्वाभावो वा, उभयाभावो वा। उभयत्रासमवायिकारणविवक्षायां विशेषणवैयर्थ्यात्। शरीरकुड्यविभागासमवायिकारणहस्तकुड्यादावव्याप्तिपरिहारार्थं संयोगकारणत्वे सतीति विशेषणम्। शरीरकुड्यसंयोगासमवायिकारणहस्तकुड्यसंयोगादावव्याप्तिपरिहारार्थं च विभागकारणत्वे सतीति विशेषणम्। अत्र चासमवायिकारणनिरुक्तिपर्यालोचनप्रयुक्तदूषणपरिहारे च प्रयत्नः कर्तव्यः। उपेक्षणीयं वेति।

इति शब्दश्च सूत्रे एवंविधे लक्षणान्तरपरिग्रहार्थः। तथा च, द्रव्यकर्मावृत्तिमानर्थो गुणः। द्रव्यत्वकर्मत्वरहितोऽर्थो गुणः। संख्यावद्वृत्तित्वरहितकर्मवृत्तित्वरहिताधिकरणमर्थो गुणः। संख्यावद्वृत्तित्वरहितत्वोत्क्षेपणाकुञ्चनप्रसारणगमनावृत्तिमानर्थो गुणः। एवं संख्यापदस्थाने परिमाणपृथक्त्वसंयोगविभागपदप्रक्षेपेण कर्मवृत्तित्वरहितत्वविशेषणोपादाने चत्वारि लक्षणानि। तथा कर्मवृत्तित्वरहितपदस्थाने उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनवृत्तिपदप्रक्षेपेण चत्वारि लक्षणानि द्रष्टव्यानि। संयोगवद्वृत्तित्वरहितकर्मवृत्तिकर्मवृत्तित्वरहिताधिकरणमर्थो गुणः। संयोगवद्वृत्तित्वरहितोत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमना[त्] वृत्तिमानर्थो गुणः। विभागवद्वृत्तित्वरहितकर्मवृत्तित्वरहिताधिकरणमर्थो गुणः। विभागवद्वृत्तित्वरहितोत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनावृत्तिमानर्थो गुणः। परिमाणवृत्तित्वरहितकर्मवृत्तित्वरहिताधिकरणमर्थो गुणः। परिमाणवद्वृत्तित्वरहि-



तोत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनावृत्तिमानर्थो गुणः। पृथक्त्ववद्वृत्तित्वरहितकर्मावृत्तिमानर्थो गुणः। गुणवद्वृत्तित्वरहितोत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनावृत्तिमानर्थो गुणः। न चानयोरितरेतराश्रयत्वं दोषः, गुणलक्षणमन्तरेणापि गुणत्वेन निरूपणसंभवात्। न च सर्वत्रार्थग्रहणवैयर्थ्यम्, सामान्यादिव्युदासार्थत्वात्।

यत्तु **विद्याधरमिश्रादि**भिरुक्तम्—उत्क्षेपणावृत्तिसंयोगासमानाधिकरणसत्तासाक्षाद्व्याप्यजातिमद्गुण इति [तत्] न युक्तम्, जात्यादावतिव्यापकत्वात् उत्क्षेपणावृत्तेः संयोगसमानाधिकरणत्वरहितायाः सत्तासाक्षाद्व्याप्याया जातित्वविशेषणत्वादिजातेः जात्यादावपि सत्त्वात्……क्षणरहितावृत्तिजातिमती प्रमेयत्वादित्यादेः दुर्वारत्वात्। अवक्षेपणादावतिव्यापकत्वादुत्क्षेपणावृत्तेः संयोगसमानाधिकरणत्वरहितत्वस्य सत्तासाक्षाद्व्याप्यस्यावक्षेपणादेरेव तत्र सत्त्वात्। अवक्षेपण[त्व]ादिकं सत्तासाक्षाद्व्याप्यं न भवतीति चेत्—न, सत्तासाक्षाद्व्याप्यत्वं किमपरोक्षसत्तासाक्षाद्व्याप्यत्वमभिप्रेतम्, सत्ताश्रयव्यावृत्तजात्यव्याप्यत्वे सति सत्ताव्याप्यत्वं वा, सत्ताश्रयव्यावृत्तजातिव्याप्यत्वरहितत्वे सति सत्ताव्याप्यत्वं वा? नाद्यः, अवक्षेपणादेरपि सत्ताव्याप्यस्यापरोक्षत्वात्। न द्वितीयः, अवक्षेपणादेरपि सत्ताश्रयव्यावृत्तघटत्वाद्यव्याप्यत्वात्। न तृतीयः, गुणत्वस्यापि सत्ताश्रयव्यावृत्तगुणत्वव्याप्यत्वेन सत्ताश्रयव्यावृत्तजातिव्याप्यत्वरहितत्वानुपपत्तौ गुणलक्षणस्यासंभवत्वापत्तेः। द्रव्यादेरपि सत्ताश्रयव्यावृत्तद्रव्यत्वादिव्याप्यत्वेन तद्रहितत्वानुपपत्तौ सत्तासाक्षाद्व्याप्यत्वाभावप्रसङ्गाच्च। गुणत्वव्यतिरिक्तसत्ताश्रयव्यावृत्तजातिव्याप्यत्वरहितत्वे सति सत्ताव्याप्यत्वं सत्तासाक्षाद्व्याप्यत्वं गुणत्वे घटत इति चेत्—न, कर्मत्वादेर्गुणत्वव्यतिरिक्तसत्ताश्रयव्यावृत्तकर्मादिव्याप्यत्वेन तद्रहितत्वानुपपत्तौ सत्तासाक्षाद्व्याप्यत्वाभावसंभवात् एवमस्त्विति चेत्—न, उत्क्षेपणावृत्तित्वविशेषणवैयर्थ्यप्रसङ्गात्। कर्मत्वस्य साक्षाद्व्याप्यत्वविशेषणेनैव व्यावृत्तत्वात्। एतेन सत्तावान्तरजात्यवान्तरजातित्वरहितत्वे सति साक्षाद्व्याप्यत्वं सत्तासाक्षाद्व्याप्यत्वमित्यपि निरस्तम्। सत्ताश्रयव्यावृत्तजात्याश्रयव्यावृत्तत्वस्यैव सत्तावान्तरजात्यवान्तरशब्दार्थत्वात्। तस्य च पूर्वमेव दूषितत्वात्। गुणत्वकर्मत्वान्यतमत्वसत्तासाक्षाद्व्याप्यत्वमिति चेत्—न, गुणत्ववान् गुणः इत्येतावतैव गुणलक्षणसिद्धौ विशेषणान्तरवैयर्थ्यस्य च वज्रलेपायमानत्वादिति। अवक्षेपणादावुत्क्षेपणवृत्तिसंयोगसमानाधिकरणावक्षेपणरूपादिवृत्तिसत्तासाक्षाद्व्याप्यजातिसम्भवाच्च। उत्क्षेपणावक्षेपणवृत्तित्वरहितसंयोगसमानाधिकरणावक्षेपणवृत्तित्वरहितरूपादिव्यावृत्तावक्षेपणावृत्तित्वरहितजातिमत् प्रमेयत्वात् घटवदित्यनुमानात्। जातिग्रहणवैयर्थ्याच्च। उत्क्षेपणावृत्तिसंयोगसमानाधिकरणसत्तासाक्षाद्व्याप्यरूपावक्षेपणातिरिक्तत्वात्यन्ताभाववता अवक्षेपणादिनातिव्याप्तिपरिहारार्थं जातिग्रहणमिति चेत्—न, जातित्वं किं जातिः, नित्यत्वे सत्यनेकसमवेत-

त्वादिकं वा ? नाद्य:, भवद्भिरनभ्युपगमात् । न द्वितीय:, समवायत्वेनैवातिव्याप्तिपरिहारोपपत्ते:, अनित्यत्वे सत्यनेकाश्रितत्वस्य व्यर्थत्वात् । समवायत्वे सत्याश्रितत्वस्यैव समवेतपदार्थत्वात् । एतेन घटावृत्तिसंयोगाजन्यसंयोगासमवायिकारणवृत्तिसत्तासाक्षाद्व्याप्यजातिमान् गुण इति लक्षणं निरस्तम् । संयोगजन्यत्वरहितसंयोगासमवायिकारणावृत्तिसंयोगासमानाधिकरणजातिमान् गुण इत्यपि न लक्षणम्, जात्यादावतिव्यापकत्वात्, पूर्वोक्तवैयर्थ्याच्च ।

संयोगासमवायिकारणत्वं च किं संयोगसमवायित्वरहितत्वे सति संयोगकारणत्वम्, असमवायिकारणत्वे सति संयोगकारणत्वं वा ? नाद्य:, गुणलक्षणस्येश्वरज्ञानेच्छाप्रयत्नादृष्टादावव्यापकत्वप्रसङ्गात् । ईश्वरज्ञानादीनां संयोगासमवायित्वे सति संयोगकारणत्वेन तन्निष्ठजातीनां संयोगासमवायित्वे संयोगकारणावृत्तित्वानुपपत्ते: । न द्वितीय:, द्रव्यत्वरहितात्माविशेषगुणत्वरहितत्वं साध्यात्मविशेषगुणमात्रजनकत्वरहितभावत्वाद्यसमवायिकारणत्वलक्षणस्य गुणानर्हत्वेन गुणेन गुणलक्षणनिरूपणे गुणलक्षणेन च गुणनिरूपणे परस्पराश्रयपरिहारार्थमसमवायिकारणगर्भाणि गुणलक्षणानि प्रणयतां **नवीनतार्किकाणां** तदेवोपस्थितमिति महान् प्रमाद: ।

**अस्मन्मार्गेण** परस्पराश्रयपरिहारेऽप्यसमवायिकारणलक्षणान्तर्गताद्यविशेषलक्षणत्वपर्यालोचनया वैयर्थ्यस्य दुष्परिहरत्वात् । स्वात्मनिष्ठत्वे सति विशेषगुणत्वस्यात्मविशेषगुणशब्दार्थत्वात् । तथा चात्मनिष्ठत्वरहितसंयोगाजन्यसंयोगकारणावृत्तिसंयोगासमानाधिकरण इति निरस्तम् । वेगाजन्यवेगासमवायिकारणावृत्तिवेगासमानाधिकरणजातिमान् गुण इति न युक्तम्, पूर्वोक्तदोषात् । आत्मनि अतिव्यापकत्वाच्च । वेगाजन्यवेगासमवायिकारणवृत्ते: वेगसमानाधिकरणस्यात्मत्वस्यात्मनि संभवात् । सत्तासाक्षाद्व्याप्यविशेषणस्य च प्रागेव दूषितत्वात् । वेगाजन्यवेगासमवायिकारणावृत्तिसंयोगासमानाधिकरणजातिमान् गुण इत्यपि न युक्तम्, दिक्कालादावतिव्यापकत्वात् । अनेकदिक्कालाभ्युपगमपक्षे दिक्कालत्वादिजातिस्वीकारात् । तस्याश्च संस्कारासमानाधिकरणत्वात् । दिक्कालाकाशेषु च ज्ञानरहितपरममहत्त्वव्यङ्ग्यजातिस्वीकारात् । दिक्कालयोश्च तद्विशेषगुणरहितमहत्त्वस्य न जातिस्वीकारात् । काल: संस्कारसमानाधिकरणकालनिष्ठत्वरहितवेगाजन्यवेगासमवायिकारणवृत्तिकालनिष्ठत्वरहितजातिमान् प्रमेयत्वात् इत्यादेर्न दुर्वारत्वात् । पूर्वोक्तदोषाच्च, ज्ञानासमवायिकारणासमवायिकारणावृत्तिज्ञानासमवायिकारणजातीयासमानाधिकरणजातिमान् गुण इत्यपि न लक्षणम्, पूर्वोक्तदोषात्, अभिघातकर्मण्यतिव्यापकत्वात्............जन्यमन:कर्मव्यावृत्ताभिघातजन्यवृत्तिज्ञानासमवायिकारणजातीयासमानाधिकरणजातिमत्त्वात् । मानसं च स्पर्शरहितत्वेनाभिघातासंभवे मन:कर्मणोऽभिघाताजन्यत्वात् । विप्रतिपन्नं प्रत्यभिघातजं वा......च्च वृत्तित्वरहितजातिमान् जातिमत्त्वात् घटवदित्यनुमानम्, संयोगासमवायिकारणत्वविशिष्टविभागासमवायिकारणावृत्तित्वेनैव कर्मव्यावृत्तिसिद्धे: ।



आत्मनिष्ठसत्तेतरजातिमान् गुण इत्यपि न लक्षणम्, विशेषादावतिव्यापकत्वात् । तेषामप्यात्मनिष्ठविशेषादिनिष्ठविशेषत्वादिजातिमत्त्वात् । घटावृत्तिरूपवृत्तिजातिमान् गुण इत्यपि न युक्तम्, कर्मण्यतिव्यापकत्वात् । द्रव्यावृत्तिगुणकर्मवृत्तिजातेरूपपादितत्वात्, जात्यादावतिव्यापकत्वाच्च । तेष्वप्यद्रव्यमात्रवृत्तिजातिस्वीकारात् । संस्कारवृत्त्यपरजातिमान् गुण इत्यपि न लक्षणम्, द्रव्यकर्मणोरतिव्यापकत्वात्, गुणकर्ममात्रवृत्तिजाते: संस्कारवर्तिन्या: कर्मण्यपि स्वीकारात् । एवमन्यान्यपि जातिपुरस्कारेण **नवीनतार्किकोत्प्रेक्षितानि** दूषणाय निरुपादि (?) ।

चतुर्विंशत्यन्यतमो गुण इत्यपि न युक्तम्, सर्वरूपव्यक्तीनां ज्ञातुमशक्यत्वेन तदन्यतमस्यापि ज्ञातुमशक्यत्वात् । यावदधिगतरूपाद्यन्यतमत्वस्य चानधिगतरूपाद्यव्यापकत्वात् । रूपादिधर्मव्यतिरिक्तधर्मवान् गुण इत्यपि न लक्षणम् । सर्वरूपादीनां ज्ञातुमशक्यत्वेन तद्धर्मव्यतिरिक्तव्यतिरिक्तत्वस्यापि ज्ञातुमशक्यत्वात् । यावदवगतरूपादिधर्मव्यतिरिक्तव्यतिरिक्तधर्मत्वस्य च भवदनधिगतरूपाद्यव्यापकत्वात् । रूपत्वादिचतुर्विंशतिजातिव्यतिरिक्तत्वरहिताधिकरणं गुण इति तु गुणलक्षणं सम्यगेव । तस्मादिदमत्र रहस्यम्,

यत्र यत्रास्मदभी[दादी]ष्टदूषणोद्धारसंभव: ।
तत्तदस्तु यथाकामं गुणानामत्र लक्षणम् ॥

लक्षणप्रयोजनं चोक्तमेवेति सर्वं रमणीयमिति ॥ १५ ॥

## एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्मलक्षणम् ॥१.१.१६॥

एकद्रव्यमाश्रयोऽस्यास्तीति एकद्रव्यम्, एकद्रव्यव्याप्यत्वमिति यावत् । न गुण: अगुणम् [अ]गुणत्वमिति यावत् । कारणपदं च संयोगविभागाभ्यां संबध्यते । संयोगविभागेष्विति बहुवचनं कर्मणो बहुसंयोगविभागजनकद्रव्यगुणादिभि: बहुसंयोगविभागजनकत्वसामर्थ्यप्रतिपादनार्थम् । व्यावर्त्याभावेन संयोगविभागबहुत्वस्य लक्षणान्तर्गतत्वानुपपत्ते: । अनपेक्षपदं तु अविभागेनैव संबध्यते । संयोगेनापि सम्बन्धे कर्मण: संयोगानपेक्षकारणत्वेन विभागक्षण एव संयोगोदयप्रसङ्गात् । लक्षणानुपयोगिनि संयोगानपेक्षकारणत्वे सूत्रकारस्य तात्पर्याभावाच्च । तस्मादेकत्वव्याप्यं विभागानपेक्षकारणं कर्म । गुणत्वरहितं विभागानपेक्षकारणं कर्म । संयोगकारणत्वे सति विभागानपेक्षकारणं कर्मेति लक्षणत्रयं सूत्रार्थ: । संयोगकारणत्वे सति विभागकारणं कर्मेत्यदेवास्तु, किमनपेक्षत्वेन विभागविशेषणेति चेत्—न, ईश्वरज्ञानेच्छाप्रयत्नादृष्टादिषु अतिव्याप्तिपरिहारार्थत्वात् ।

ननु किमिदं विभागानपेक्षकारणत्वम् ? न तावत् कारणान्तरनिरपेक्षत्वे सति विभागकारणत्वं समवायिकारणा[न]पेक्षणात् । नापि समवायिकारणादिष्व[व्य]ति-

रिक्तकारणानपेक्षत्वे सति विभागकारणत्वमीश्वरज्ञानेच्छाप्रयत्नादृष्टादेरपेक्षणात्। नापि समवायिकारणेश्वरज्ञानेच्छाप्रयत्नादृष्टदिक्कालात्मव्यतिरिक्तकारणानपेक्षयत्कि········ घटादिकर्मण्यतिव्यापकत्वे सति विभागकारणत्वम्, विभागप्रागभावस्यापेक्षणात्। उभयकर्मजविभागे च कर्मणा द्वितीयकर्मणोऽनपेक्षत्वाच्च। नापि द्रव्यत्वरहितेश्वरज्ञानेच्छाप्रयत्नादृष्टप्रागभावकर्मव्यतिरिक्तकारणानपेक्षत्वे सति विभागकारणत्वम्, कालसमवायिकारणेश्वरादीनामपि विभागानपेक्षकारणत्वप्रसङ्गात्। तेषामपि द्रव्यत्वरहितेश्वरज्ञानेच्छाप्रयत्नादृष्टप्रागभावकर्मव्यतिरिक्तकारणानपेक्षत्वात्। नापि द्रव्यत्वरहितेश्वरज्ञानेच्छाप्रयत्नादृष्टप्रागभावद्वितीयकर्मव्यतिरिक्तकारणानपेक्षत्वे सति विभागकारणत्वं समवायिकारणादीनामपि विभागानपेक्षत्वप्रसङ्गात्। नापि स्वोत्पत्त्यनन्तरक्षणोत्पन्नकारणानपेक्षत्वे सति विभागकारणत्वम्। च[स्व]शब्देन व्यक्तिविशेषानभिधाने लक्षणस्याननुगमापत्तेः। कर्माभिधानेऽसमवायिकारणेश्वरेच्छाज्ञाने सति विभागानपेक्षकारणत्वप्रसङ्गात्। तेषामपि विभागजनने कर्मानन्तरोत्पन्नकारणानपेक्षत्वात्। नापि विभागचरमकारणत्वम्, तस्याप्यनिरूपणात्। विभागचरमकारणत्वं किं विभागचरमत्वे सति कारणत्वम्, चरमत्वे सति विभागकारणत्वं वा, विभागाव्यवहितपूर्वक्षणोत्पन्नत्वे सति विभागकारणत्वं वा? नाद्यः, विभागात् पूर्वमुत्पन्नत्वेन विभागचरमत्वासंभवात्। पश्चाद्भावस्य चरमशब्दार्थत्वात्। न द्वितीयः, यतः कुतश्चिच्चरमत्वे घटादेरपि विभागचरमकारणत्वापत्तेः। विभागकारणचरमत्वे च विभागकारणघटानन्तरोत्पन्नविभागकारणपटादेरपि विभागानपेक्षकारणत्वप्रसङ्गात्। सकलविभागकारणचरमत्वस्य चासम्भवात्। कर्मणः स्वचरमत्वानुपपत्तेः विभागकारणचरमत्वासम्भवात्। नापि तृतीयः, घटादावतिव्यापकत्वात्। तेषामपि घटाद्यव्यवहितोत्तरक्षणोत्पन्नस्तम्भादिविभागाव्यवहितपूर्वक्षणोत्पन्नत्वे सति स्वगतविभागकारणत्वादिति। तदयुक्तम्, विभागकुर्वद्रूपत्वापरपर्यायविभागजननशीलत्वस्य कर्मविशेषस्यानपेक्षकारणत्वशब्दार्थत्वात्। तस्य च पदार्थान्तरव्यावृत्तस्य विभागाजनककारणा·······कारणविभागकार्यत्वरहितवृत्त्य···· ····तद्वृत्तित्वरहिताधिकरणं प्रमेयत्वात् घटवदित्यनुमानात्। विभागानपेक्षकारणत्वं च जातिरेव। न च गुणादिना जातिसंकरः। तस्यादूषणत्वात्। ··········पत्तिः, प्रमेयत्वादिवत् तस्याभावान्तर्भावात्। अस्तु तर्हि विभागानपेक्षकारणं कर्मलक्षणम्, किं संयोगकारणत्वादिनेति चेत्—न, शरीरस्य विभागाजनकहस्तकुड्यविभाग······· गानपेक्षकारणत्वादिति।

यद् वा, संयोगविभागानपेक्षकारणत्वं कर्मत्वमेव, तथा च कर्म कर्मेति लक्षणम्। न चैवं कर्मणैव कर्मनिरूपणादात्माश्रयः। कर्मणश्च कर्मवृत्तित्वानुपपत्तेः ··········त्वस्य लक्षणत्वात्। कर्म कर्मेति कर्मत्वाश्रयो कर्मेति व्याख्यानात्। न च कर्मत्वेन कर्मनिरूपणम्, कर्मणा कर्मत्वनिरूपणमिति परस्पराश्रयः। कर्मत्वेन कर्मनिरूपणेऽपि कर्मणा कर्मत्वानिरूपणत्वा·············वृत्तजातित्वं कर्मत्वम्। तच्च



कर्मणा निरूप्यत इति चेत्—न, उत्क्षेपणावक्षेपणाकुञ्चनप्रसारणगमनव्यावृत्तत्वरहितत्वे उत्क्षेपणावक्षेपणत्वाकुञ्चनत्वप्रसारणत्व·············कर्मत्वनिरूपणात्। कर्मत्वेन कर्मानिरूपणाच्च। न हि लक्षणे लक्ष्यं निरूप्यते किं तस्येतरभेदादित्युक्तत्वात्। कर्मत्वस्य कर्माश्रयत्वेन कर्मलक्षणत्वोपपत्तेरिति।

यद् वा, ए··············कर्मणो द्रव्यत्वनिषेधार्थमिति। तथा च कर्म न द्रव्यम्, एकद्रव्यत्वात्, गुणरहितत्वाच्च रूपवत्। नन्वेकद्रव्यत्वं यद्येकत्वाधिकरणद्रव्याश्रितत्वम्, तदा घटादावनैकान्तः, तेषाम··············श्रितत्वात्। अथानेकद्रव्यानाश्रितत्वम्, तदा गगनादावनैकान्तः, तेषामनाश्रितत्वेनानेकाश्रितत्वात्। अथानेकानाश्रितत्वे सति द्रव्यानाश्रितत्वम्, तदा असिद्धिः। कर्मणो············ निषेधार्थत्वात्।

**केचिदाहुः**, घटे चलति रूपादयः चलन्तीति तन्निरासार्थं कर्मणो द्रव्याश्रितत्वग्रहणम्; तथा च रूपादयो न कर्मवन्तः, अद्रव्यत्वात् कर्मवदिति। कर्म द्रव्यं सामान्यवत्त्वे सति··············संयोगविभागजनककारणत्वात् घटवदिति सत्प्रतिपक्षत्वमिति चेत्—न, विभागानपेक्षकारणत्वाभावेन सोपाधित्वात्। तत्साधने च बाधनादिति कर्म द्रव्यसाधन··········· वृत्तत्वरहितत्वे सति पृथिव्यादिनवलक्षणरहितावृत्तिजातेर्द्रव्यशब्दार्थत्वात्। गुणवद्द्व्यावृत्तत्वरहितत्वे निर्गुणावृत्तिजातित्वं द्रव्यत्वम्। तच्च न बाधितमिति चेत्—न, निर्गुणे कर्मणि·············णत्वादिति।

यद् वा, संयोगविभागावेव कर्मेति **केचित्**। तन्निरासार्थमुक्तमेकद्रव्यमगुणमिति। संयोगविभागावनेकद्रव्यौ, गुणौ च। कर्म पुनरेकद्रव्यम्, गुणत्व············· विभागौ नैतत्कर्मसंयोगविभागौ। तेन तत्कर्मसंयोगविभागत्वात् अन्यसंयोगविभागवदिति।

यद् वा, कर्म गुण इति **भूषणः**। तन्निरासार्थमुक्तमगुणमिति, न गुण अगुणमिति व्याख्यानात्।············ सति तन्तुनिष्ठत्वात् पटवत्। कर्मगुणवृत्तिकर्मवृत्तित्वरहिताधिकरणम्, मेयत्वात् घटवदिति। कर्मवद् वा गुणः, विभागानपेक्षकारणत्वात् विभागवत्। सामान्यवत्त्वे सत्येकाश्रितत्वात् रूपवदिति सप्रतिप·············भिप्रेतं जातिर्वा? नाद्यः, संयोगविभागानपेक्षकारणत्वरहितत्वादिगुणलक्षणसाधने बाधात्। न द्वितीयः, गुणलक्षणवन्मात्रवृत्तिजातिसाधने बाधादेव। द्रव्यावृत्तिगुणवृत्तिजाति·············कर्मवृत्तिजातिस्वीकारात्। अस्वीकारेऽपि तथाविधजातिसाध्यार्थान्तरस्य दुर्वारत्वात्।

इतिशब्द एवंविधलक्षणान्तरपरिग्रहार्थः। तथा च द्रव्यत्वं गुणत्वरहितोऽर्थः। कर्म द्रव्य ················वक्षेपणत्वाकुञ्चनत्वप्रसारणत्वगमनत्वव्यतिरिक्तत्वाधिकरणं कर्मेत्यादि। संख्यावृत्तित्वरहितसंयोगासमानाधिकरणसत्तासाक्षाद्व्याप्यजातिमत् कर्मेति विद्य·············प्तेः तेषां संख्याव्यावृत्तित्वरहितसंयोगसमानाधिकरणवृत्तित्वपरिमाणत्वादिजातिमत्त्वात्।

ननु तद्व्याावृत्त्यर्थं सत्तासाक्षाद्व्याप्यग्रहणमिति चेत्—न, प्रागेव दूषितत्वात् ।'''''''''''णवृत्तिसंयोगासमानाधिकरणजातिमत् कर्मेत्यपि न लक्षणम्, सामान्यादावतिव्यापकत्वात्, रूपादावतिव्यापकत्वाच्च । तेष्वपि संयोगसमानाधिकरणत्वरहितसंयोग'''''''''''''''रणकर्मवृत्तिजातिमत्त्वात् । गुणकर्मणोरप्यव्यावृत्तजातिस्वीकारात् । एतेन विभागाजन्यविभागसमवायिकारणवृत्तिविभागासमानाधिकरणजातिमत् कर्म, वेगाजन्यवेगासमवायिकारण''''''''''''जातिमत् कर्मेति लक्षणद्वयं निरस्तम् । घटसमवायिकारणासमवायिकारणवृत्तिघटावृत्तिजातिमत् कर्म इत्यपि न लक्षणम्, पूर्वोक्तदोषात्, रूपादावतिव्यापकत्वाच्च । घटा'''''''''''''वावयवसंयोगस्यापि कारणत्वसंभवात् । तद्वृत्तेश्च गुणत्वस्य घटावृत्ते रूपादावसिद्धत्वात् । संयोगासमवायिकारणत्वविशिष्टविभागासमवायिकारणवृत्तिजातिमद्व्यावृत्त''''''''''दोषात् । संयोगासमवायिकारणत्वविशिष्टेत्यत्रासमवायिविशेषणवैयर्थ्याच्च । नित्यपृथिवीरूपासमवायिकारणसमवायिकारणवृत्तिपरमाण्ववृत्तिजातिमत्कर्मेत्यपि न लक्षणम्, पू''''''''''''''''वैयर्थ्याच्च । नित्यरूपासमवायिकारणत्वेनैवापेक्षितसंयोगाभावात्, परमग्रहणवैयर्थ्याच्च । परमाण्ववृत्तित्वेनैव सत्तानिरासात्, रूपादावतिव्यापकत्वाच्च ।''''''''''''परमाणुरूपासमवायिकारण''''''''''''पार्थिवपरमाणुवद्व्यणुकावयवसंयोगस्यापि कारणत्वसंभवात् । तद्वृत्तिगुणत्वस्य च परमाणुवृत्ते रूपादिषु सत्त्वात् । कालावृत्त्युत्क्षेपणावक्षेपणवृत्तिजातिमत् कर्मेत्यपि न लक्षणम् । कार्यद्रव्यगुणेष्वतिव्यापकत्वात् । तेष्वपि कार्यत्वस्य कार्यमात्रवृत्तिजातिस्वीकारात् । तस्य च कालावृत्तित्वे सत्युत्क्षेपणावृत्तित्वात् । एतेन सत्तेतरोत्क्षेपणवृत्तिजातिमत् कर्मेत्यपि लक्षणं निरस्तम् । कार्यद्रव्यगुणेषु कार्यव्यङ्ग्यजातिस्वीकारात् । विप्रतिपन्नं प्रति घटः कार्यव्यावृत्तिघटव्यावृत्तित्वरहितकार्यवृत्तिघटवृत्तित्वरहितजातिमान् जातिमत्त्वात् पटवदित्यनुमानात् । अनित्यमात्रवृत्तिसत्तासाक्षाद्व्याप्यजातिमत् कर्मेत्यपि न लक्षणम् । अनित्यद्रव्यगुणेष्वतिव्यापकत्वात् । अनित्यमात्रवृत्तिजातेरप्यनित्यमात्रवृत्तित्वे सति सत्तासाक्षाद्व्याप्यत्वात् । सत्तासाक्षाद्व्याप्यत्वस्य प्रागेव दूषितत्वाच्च ।

इदमत्र रहस्यम्—

यत्र यत्रास्मदादीष्टदूषणोद्धारसंभवः ।
तत्तदस्तु यथाकामं कर्मणामत्र लक्षणम् ॥ इति ।

यद् वा, द्रव्यत्वं द्रव्यलक्षणम् । गुणत्वं गुणलक्षणम् । कर्मत्वं कर्मलक्षणम् । आकाशकालदिग्व्यतिरिक्तपृथिव्यादिद्रव्यविशेषलक्षणानि पृथिवीत्वादकत्वादिजातयः । रूपादिगुणविशेषाणां रूपत्वादिजातयो लक्षणानि । कर्मविशेषोत्क्षेपणादीनां चोत्क्षेपणत्वादिजातयो लक्षणानि । सामान्यस्य च जातिमत्त्वमेव । तत्र जातिरुपाधिर्वा । समवायस्य च नित्यसंबन्धत्वम्, संयोगव्यतिरिक्तसंबन्धत्वं वा, [अ]द्रव्यसंबन्धत्वं वा, गुणसंबन्धत्वं वा, कर्मसंबन्धत्वं वा, जातिसंबन्धत्वं वा, विशेषसंबन्धत्वं वा । संबन्धत्वं च जातिरेव, जातिविशेषसमवायेष्वपि जातिस्वीकारात् । अभावस्य चाभावत्वमेव लक्षणम् । प्रागभावस्य प्रागभावत्वम्, प्रध्वंसस्य च प्रध्वंसत्वम्, अन्योन्याभावस्यान्योन्याभावत्वम्, अत्यन्ताभावस्य अत्यन्ताभावत्वं लक्षणम् । प्रागभावत्वादयश्च जातय एव गोत्वादितुल्ययोगक्षेमत्वादिति ।



यद् वा, पृथिव्या गन्धवत्त्वम्, शीतत्वे सति गुरुत्वाश्रयत्वम्, उष्णत्वशीतत्वरहितत्वे सति रूपवत्त्वम्, वायुव्यतिरिक्तत्वे सत्यनुष्णाशीतस्पर्शवत्त्वं लक्षणम् । उदकस्य च शीतस्पर्शवत्त्वम्, स्नेहवत्त्वम्, सांसिद्धिकद्रवत्वाधिकरणत्वम्, निर्गन्धत्वे सति रसवत्त्वम्, निर्गन्धत्वे सति गुरुत्वाधिकरणत्वं लक्षणम् । तेजसस्तूष्णत्वम्, भास्वररूपवत्त्वम्, रसरहितत्वे सति रूपवत्त्वम्, गुरुत्वरहितत्वे सति रूपवत्त्वं लक्षणम् । वायोस्तु नीरूपत्वे सति स्पर्शवत्त्वम्, निर्गन्धत्वे सत्यनुष्णाशीतस्पर्शवत्त्वम्, अगुरुत्वे सत्यनुष्णाशीतस्पर्शवत्त्वम्, स्पर्शव्यञ्जकस्पर्शवत्त्वं लक्षणम् । आकाशस्य शब्दः विभिवन्द्रियत्वम्, श्रोत्रत्वम्, आकाशान्यत्वात्यन्ताभावश्च लक्षणम् । कालस्य च नित्यनिष्ठपरत्वजनकत्वसंयोगरहितत्वे सत्यपरत्वजनकसंयोगवत्त्वे सति विभुत्वम्, तत्त्वे नित्यनिष्ठापरत्वजनकसंयोगरहितत्वे सति परत्वजनकसंयोगवत्त्वे सति विभुत्वादिव्यतिरिक्तत्वे सति विशेषगुणरहितत्वे सति महत्त्वम्, कालान्यत्वात्यन्ताभावश्च लक्षणम् । दिशस्तु परमाणुनिष्ठापरत्वजनकसंयोगवत्त्वे सति विभुत्वम्, विशेषगुणरहितत्वे सति कालान्यमहत्त्वम् । विशेषगुण[रहितत्वे सति] कालान्यविभुत्वम्, [दिगन्य]त्वात्यन्ताभावश्च लक्षणम् । आत्मनश्च ज्ञानाश्रयत्वादीनि लक्षणानि, [तथा] आकाशव्यतिरिक्तत्वे सति विशेषगुणवत्त्वे सति विभुत्वं लक्षणम् । मनसस्तु सुखग्राहकेन्द्रियत्वम्, दुःखग्राहकेन्द्रियत्वम्''''''''''ग्राहकेन्द्रियत्वम्, स्मृतिजनकेन्द्रियत्वम्, स्पर्शरहितपरमाणुत्वम्, विशेषगुणरहितपरमाणुत्वम्, ज्ञानादिजनकसंयोगाश्रयत्वे सति अणुत्वं लक्षणम् ।

रूपस्य च स्पर्शाग्राह्यत्वे सति चक्षुर्ग्राह्यगुणत्वम्, स्पर्शनाग्राह्यचक्षुर्ग्राह्यजातिमत्त्वं लक्षणम् । रसस्य रसनाग्राह्यगुणत्वम्, त्वगिन्द्रियाग्राह्यरसनजातिमत्त्वं लक्षणम् । गन्धस्य घ्राणग्राह्यगुणत्वम्, त्वगिन्द्रियाग्राह्यघ्राणग्राह्यजातिमत्त्वं लक्षणम् । स्पर्शस्य तु चक्षुरग्राह्यत्वगिन्द्रियग्राह्यगुणत्वम्, चक्षुरग्राह्यत्वगिन्द्रिय[ग्राह्य]जातिमत्त्वं लक्षणम् । संख्यायास्तु पृथक्त्वावृत्त्येकत्ववृत्तिजातिमत्त्वम्, संयोगावृत्त्येकत्ववृत्तिजातिमत्त्वम्, विभागावृत्त्येकत्ववृत्तिजातिमत्त्वम्, पृथक्त्वावृत्तिद्वित्ववृत्तिजातिमत्त्वम्, संयोगावृत्तिद्वित्ववृत्तिजातिमत्त्वम्, विभागावृत्तिद्वित्ववृत्तिजातिमत्त्वम्, पृथक्त्वावृत्तिबहुत्ववृत्तिजातिमत्त्वम्, संयोगावृत्तिबहुत्ववृत्तिजातिमत्त्वम्, विभागावृत्तिबहुत्ववृत्तिजातिमत्त्वं लक्षणम् । परिमाणस्य तु संख्यावृत्तिमहत्त्ववृत्तिजातिमत्त्वम्, संख्यावृत्त्यणुत्ववृत्तिजातिमत्त्वम्, संख्यावृत्तिह्रस्वत्ववृत्तिजातिमत्त्वम्, संख्यावृत्तिदीर्घत्ववृत्तिजातिमत्त्वं लक्षणम् । पृथक्त्वस्य तु संयोगविभागावृत्त्यनेकवृत्तिनिष्ठजातिमत्त्वे सत्यनेकद्रव्यत्वम्, संख्यासंयोगविभागावृत्त्यनेकवृत्तिजातिमत्त्वे सति गुणत्वं लक्षणम् । संयोगस्य तु संख्यापृथक्त्व[ा]वृत्त्यनेकनिष्ठजा-

तिमत्त्वे सत्यद्रव्यत्वम्, संख्यापृथक्त्वविभागावृत्त्यनेकनिष्ठजातिमत्त्वे सति गुणत्वम्, संख्यावृत्तितन्तुसंयोगवृत्तिजातिमत्त्वं लक्षणम्। विभागस्य तु पृथक्त्वसंयोगसंख्यावृत्त्यनेकवृत्तिनिष्ठजातिमत्त्वे सत्यद्रव्यत्वम्, पृथक्त्वसंयोगसंख्यावृत्त्यनेकनिष्ठवृत्तिजातिमत्त्वे सति गुणत्वं लक्षणम्। परत्वस्य तु संख्यापरिमाणपृथक्त्वसंयोगविभागवेगापरत्वकर्मावृत्तिमनोनिष्ठजातिमत्त्वम्, संयोगापरत्वव्यतिरिक्तविशेषगुणरहितविभुसंयोगजन्यत्वं लक्षणम्। अपरत्वस्य तु संख्यापरिमाणसंयोगविभागवे[ग]पृथक्त्वपरत्वकर्मत्वावृत्तिमनोनिष्ठजातिमत्त्वम्, संयोगपरत्वव्यतिरिक्तविभुविशेषगुणरहितसंयोगजन्यत्वं लक्षणम्। बुद्धेस्तु इच्छावृत्तिज्ञानवृत्तिजातिमत्त्वं लक्षणम्। एवमिच्छापदस्थाने प्रयत्नादिपदप्रक्षेपेण बहूनि बुद्धिलक्षणानि द्रष्टव्यानि। सुखस्य त्वदृष्टावृत्तिज्ञानव्यतिरिक्तभोजनजन्यात्मगुणवृत्तिजातिमत्त्वं लक्षणम्। दुःखस्य त्वदृष्टावृत्तिज्ञानव्यतिरिक्त··········जन्यात्मगुणवृत्तिजातिमत्त्वं लक्षणम्। इच्छायास्तु अदृष्टावृत्तिघटजनकदेवदत्तगुणवृत्तिजातिमत्त्वं लक्षणम्। द्वेषस्य त्वदृष्टावृत्तिविरोधिहिंसाजनकदेवदत्तगुणजनकदेवदत्तगुणवृत्तिजातिमत्त्वं लक्षणम्। प्रयत्नस्य त्वदृष्टावृत्तिघटजनकदेवदत्तगुणवृत्तिजातिमत्त्वं [लक्षणम्]। गुरुत्वस्य चादृष्टावृत्तिघृतमुक्तफला··········फलगुणवृत्तिजातिमत्त्वं लक्षणम्। द्रवत्वस्य त्वदृष्टावृत्त्यन्यस्यन्दनजनकजलवृत्तिजातिमत्त्वं लक्षणम्। स्नेहस्य त्वदृष्टप्रयत्नद्रव्यत्वावृत्तिसंरम्भजनकजन्यगुणवृत्तिजाति··········संग्रहजनकसंयोगद्रवत्वव्यतिरिक्तोदकगुणत्वं लक्षणम्। संस्कारस्य तु अदृष्टावृत्तिभावनावृत्तिजातिमत्त्वं लक्षणम्। भावनायास्त्वदृष्टव्यतिरिक्तस्मृतिजनकज्ञानव्यतिरिक्तकार्यजनकविशेषगुणत्वं लक्षणम्। वेगस्य तु स्थितस्थापकभावना[न्य]संस्कारत्वम्, स्थितस्थापकव्यतिरिक्तकर्मजनकसंस्कारत्वं लक्षणम्। स्थितस्थापकस्य तु वेगाजन्यकर्मजनकसंस्कारत्वं लक्षणम्। अदृष्टस्य त्वस्मत्प्रत्यक्षावृत्तिसाक्षाद्गुणत्वावान्तरजातिमदात्मगुणत्वं लक्षणम्। धर्मस्य दुःखजनकावृत्तिसुखजनकवृत्तिजातिमत्त्वं लक्षणम्, गुणत्वव्यावृत्तदुःखजनक[ा]वृत्तिजातिरहितसुखजनकगुणत्वं वा लक्षणम्। अधर्मस्य तु सुखजनकावृत्तिदुःखजनकवृत्तिजातिमत्त्वम्, गुणव्यावृत्तसुखजनकावृत्तिजातिरहितदुःखजनकगुणत्वं वा लक्षणम्। शब्दस्य तु श्रोत्रग्राह्यगुणत्वम्, त्वगिन्द्रियाग्राह्यश्रोत्रग्राह्यजातिमत्त्वं वा लक्षणम्।

उत्क्षेपणस्य तूत्क्षिपामीतीच्छाजन्यप्रयत्नजन्यकर्मत्वं लक्षणम्। अवक्षेपणस्य त्ववक्षिपामीतीच्छाजन्यप्रयत्नजन्यकर्मत्वम्। आकुञ्चनस्य त्वाकुञ्चामीतीच्छाजन्यप्रयत्नजन्यकर्मत्वं लक्षणम्। प्रसारणस्य तु प्रसारयामीतीच्छाजन्यप्रयत्नजन्यत्वं लक्षणम्। गमनस्य तूत्क्षेपणावक्षेपणाकुञ्चनप्रसारणव्यतिरिक्तकर्मत्वं लक्षणम्।

सामान्यस्य तु नित्यत्वे सत्यनेकाश्रितत्वे सति समवायित्व[म्,] नित्यत्वे सत्यनेकाश्रितत्वे सति समवायव्यतिरिक्ताभावत्वं लक्षणम्।

विशेषस्य तु अनेकाश्रितसत्तारहितसमवायित्वम्, अनेकानाश्रितसत्तारहितभावत्वं वा लक्षणम्।



अभावस्य तु भावत्वात्यन्ताभावः। प्रागभावस्य त्वनादित्वे सति विनाशित्वं लक्षणम्। प्रध्वंसस्य तु कार्यत्वे सति अविनाशित्वम्, प्रागभावप्रतियोग्यभावत्वं वा लक्षणम्। अत्यन्ताभावस्य तु प्रागभावप्रध्वंसाभावान्योन्याभावव्यतिरिक्त[ा]भावत्वं लक्षणम्। अन्योन्याभावस्य त्वन्योन्याभावत्वं लक्षणम्।

न चान्योन्याभावत्वे प्रमाणाभावः, घटान्यत्वपटान्यत्वादीनामन्योन्याभावत्वात्। पटान्यत्वादिषु चेदमन्यत्वमिदमन्यत्वमित्यनुगतानुभवसिद्धस्यान्यत्वस्य[ा]प्रत्यक्षसिद्धत्वात्। यथा परत्वा[परत्वा]दिषु इदं परत्वमिदं परत्वमित्यनुभवसिद्धं परत्वादिकं धर्मविशेषः। तथा घटपटान्यत्वादिषु अन्यत्वधर्मविशेषः प्रत्यक्षसिद्धोऽर्थोऽ(दुर)पह्नवः। अन्यथा परत्वादिष्वपि परत्वादिधर्माणामपह्नवप्रसङ्गात्।

न चैषां लक्षणानां सूत्रानारूढत्वमिति शङ्कनीयम्। इति द्रव्यलक्षणम्, इति गुणलक्षणम्, इति कर्मलक्षणमिति चशब्देनैर्वविधलक्षणसंग्रहात्। इतिशब्दस्यैवंप्रकारवाचित्वात्। द्रव्यविशेषगुणविशेषकर्मविशेषाणां च द्रव्यगुणकर्मत्वात्। सामान्यादिलक्षणानामप्येवंप्रकारत्वात्। न द्वितीयाध्यायादीनां लक्षणप्रतिपादकानां पुनरुक्तत्वम्, तेषां लक्षणपरीक्षापरत्वादिति ॥ १६ ॥

॥ इति श्रीहरकिङ्करपरमपण्डितन्यायाचार्यभट्टवादीन्द्रविरचिते<br>वैशेषिकसूत्रवार्तिके प्रथमाध्याये<br>प्रथमाह्निकम् ॥

# द्वितीयाह्निकम्

## अथ कारणसामान्यप्रकरणम्

### द्रव्यगुणकर्मणां द्रव्यं कारणं सामान्यम् ।। १.१.१७ ।।

द्रव्याणि च गुणाश्च कर्माणि च द्रव्यगुणकर्माणि, तेषामेक[ं] द्रव्यं कारणम्। यथैकः पार्थिवः परमाणुः क्रमेणानन्तानि द्व्यणुकादिक्रमेणानन्ता[नि द्रव्याणि, अनन्तां]श्च·········द्रवत्ववेगपरत्वापरत्वसंयोगविभागानेकसंख्यानेकपृथक्त्वानि च गुणान् क्रमेणानन्तानि च कर्माण्यारभते, तथा आप्यतैजसवायवीयाश्च परमाणवः क्रमेणानन्तानि द्व्यणुकसंस्कारपरत्वापरत्व···········विभागानेकसंख्यानेकपृथक्त्व-कर्माण्यारभन्ते, तैजसाः परमाणवो नैवमिति द्रवत्वादीनि च कार्यद्रव्याणि च, द्व्यणुकतन्त्वादीनि क्रमेण बहूनि द्रव्याणि रूपादींश्च गुणान् कर्माणि चारभन्ते, येऽपि तन्त्वादयो द्वे एव द्वितन्तु[का]दिके एकमेव वा द्वितन्तुकादिकं जनयित्वा द्वितन्तुकादिकमजनयित्वैव वा निवर्तन्ते, तेषामपि बहुद्रव्यजनकत्वं तन्तुत्वादेवानु-मेयम्। बहुद्रव्यानुत्पत्तिस्तु तन्तुविनाशादेव। यद् वा, ये च तन्त्वादयो द्वे एव द्रव्ये जनयित्वा निवर्तन्ते, तेषां द्विद्रव्यजनकत्वमेव। ये त्वेकमेव जनयित्वा निवर्तन्ते, तेषामेकद्रव्यत्वमेव। ये तु द्रव्यमजनयित्वैव निवर्तन्ते तेषां द्रव्याजनकत्वमेव, अन्त्या-वयविममानांस्तु[नांसि तु] गुणकर्माण्यारभन्ते। आकाशं तु गुणानेव। संसारिणस्तु बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनानेकसंख्यानेकपृथक्त्वसंयोगविभागानारभन्ते, घटादिद्रव्यगुणकर्माणि च। तस्मात् यद्घटद्रव्यं यावन्ति कार्याणि जनयति, तेषामेकं कारणमिति सूत्रार्थः।

साधर्म्यावसरे साधारणकारणनिरूपणमसङ्गतम्, कारणस्य कार्यधर्मत्वानुप-पत्तेरिति चेत्—न, साधारणकारणनिरूपणस्य तत्कार्याणामतत्कार्यजनकत्वधर्म-प्रतिपादनार्थत्वात्। तथा च यः परमाणुर्यावन्ति द्रव्यगुणकर्माणि आरभन्ते[ते]तावतां तत्परमाणुजन्यत्वं साधर्म्यमित्यादिसमानधर्मप्रतिपादनावसरे समानकारणस्यापि प्रसङ्गेन निरूपणसम्भवाच्च।

कारणमपि कार्यधर्म एवेत्यन्ये, इदमत्र कारणमिति प्रतीतेः। अन्यथा द्व्यणुकादौ कार्यत्वेनेश्वरपरमाण्वादिकारणाननुमानभावप्रसङ्गात्। कारणस्य पक्ष-निष्ठत्वासम्भवेन पक्षे साध्यबाधात्। सपक्षनिष्ठत्वासम्भवेन कारणेन च कार्यत्व-स्यान्वयाभावप्रसङ्गाच्च। ईश्वरपरमाण्वादीनां द्व्यणुकानाश्रितत्वात् तद्धर्मत्वा-सम्भव इति चेत्-न, तदनाश्रितत्वेऽपि तद्विशेषणत्वात्। तद्विशेषणस्यैव धर्म-लक्षणत्वादिति।



द्रव्याणि द्रव्यान्तरमारमन्ते ।।१.१.८।।

इति सूत्रेण इदं गतार्थमिति चेत्--न, तस्य द्रव्यारम्भकनिष्ठद्रव्यारम्भकत्वादिसा-धर्म्यप्रतिपादकत्वादस्य तत्तद्द्रव्यविशेषजन्यद्रव्यगुणकर्मनिष्ठतत्तद्द्रव्यविशेषजन्यत्वा-दिसाधर्म्यप्रतिपादनार्थत्वात्। एवमुत्तरसूत्रेऽपि

गुणाश्च गुणान्तरम् [१.१.९] आरभन्ते

इत्यनेन पौररुक्त्यं परिहरणीयमिति ।। १७ ।।

### तथा गुणः ।।१.१.१८।।

यथा द्रव्यं द्रव्यगुणकर्मणां साधारणं कारणम्, तथा गुणोऽपीश्वरज्ञानेच्छा-प्रयत्नधर्माधर्मैः द्रव्यगुणकर्मजननात्। तूलपिण्डयोर्वर्तमानेन प्रचयनोद[न]ाच्च········ ········संयोगेन गुणेन द्वितूलकतद्गतमहत्त्वतूलपिण्डकर्मणां जननाच्च। यथा हि तूलपिण्डयोर्वर्तमानं प्रचयनोदनाख्यसंयोगः तूलपिण्डयोर्द्वितूलकं द्रव्यमारभते, आरम्भ-कसंयोगत्वात्। तथा हि द्वितूलके महत्त्वं प्रचयात्। अप्र··········तुल्यमहत्त्व-द्वयारब्धमहत्त्वात् द्वितूलकत्रितूलकमहत्त्वस्योत्कृष्टत्वात्। तथा तूलपिण्डान्तरे कर्म नोदनादिति तस्माद् यो गुणो यानि द्रव्यगुणकर्माणि जनयति स तेषां साधारण-मिति सूत्रार्थः।

यस्तु द्रव्यगुणावेव जनयति स तयोरेव साधारणं कारणम्। यथा समवायि कारणस्पर्शगतस्पर्शयोः, स्पर्शस्य द्रव्यारम्भकत्वम्, अस्पर्शानां मनसां द्रव्यानारम्भक-त्वात्। य[व]स्तु गुणो गुणकर्मणो एव जनयति, स तयोः साधारणं कारणम्। यथा अवयवगुरुत्वद्रवत्वमहत्त्वानि, तेषामवयविनि गुरुत्वद्रवत्वमहत्वारम्भकत्वात्, स्वाश्रये च कर्मारम्भकत्वात्। मूर्तपरिमाणस्य कर्मजनकत्वात्, अमूर्तेषु गगनादिषु कर्मानु-दयात्। वेगोऽपि स्वाश्रये कर्मारभते, वेगवज्जलावयवारब्धे जलावयविनि वेगमिति **प्रशस्तपादाचार्याः। तदात्रेयाचार्या** नानुमन्यन्ते, प्रमाणाभावात्। वेगवज्जला-वयवारब्धे जलावयविनि वेग एव तत्र प्रमाणमिति चेत्—न, तस्य द्रवत्व-जन्यकर्मणैवोपपत्तेः। तथा सति द्रवत्वकाल एव वेगो न स्यादिति चेत्--सत्यम्, न जायत एव प्रमाणाभावात्। प्रत्यक्षं प्रमाणमिति चेत्—न, द्रवत्वोत्पत्तिक्षणे वेगोऽ-स्तीति प्रत्यक्षाभावात्। वेगवज्जलमिति प्रत्यक्षस्य च द्रवत्वजन्यकर्मान्तरोत्पन्नवेगे-नान्यथासिद्धत्वात्। अवयववेगस्यावयविवेगाजनकत्वे वेगरहितावयवारब्धेऽपि तादृश-वेगप्रसङ्गः इति चेत्—न, इष्टत्वात्। नोदनादिजन्यकर्मणोऽपि तादृशवेगोदयात्। वेगत्वं वेगजन्यवृत्ति वेगवृत्तित्वात्, सत्तावत्। वेगत्वं वेगजन्यवृत्ति वेगाव्यावृत्तत्वात् सत्तावदित्यनुमानं प्रमाणमिति चेत्—न, अवेगवृत्तित्वेन सोपाधित्वात्। तदभावेन सत्प्रतिपक्षत्वात्। जलावयविवेगस्य जलावयवेगजन्यत्वासाधकत्वेनार्थान्तरग्रस्तत्वात् अयं वेगो न वेगजन्यो वेगत्वात् इत्यनुमानाच्च। न चात्र प्रतिपक्षसंभवः, वेगाजन्य-त्वेन सोपाधित्वात्। कर्माजन्यत्वे वेगत्वाभावप्रसङ्गाच्च। अन्वयव्यतिरेकाभ्यां

कर्मणो वेगजनकत्वावधारणादिति । यस्तु गुणो गुणानेव जनयति, स गुणानां साधारणं कारणम् । यथा परमाणुरूपं तज्जन्यानेकद्व्यणुकरूपाणाम्, रसादयश्च रसादीनामिति । आद्यः शब्दः सर्वतोदिशानां शब्दानाम्, भावना च स्मृतीनाम्, वेगश्च कर्मणामित्यादिः ॥ १८ ॥

## संयोगविभागानां कर्म ॥१.१.१९॥

कारणं सामान्यमित्यनुवर्तते, उपलक्षणं चैतत् । वेगेऽपि कर्मणः कारणत्वम् । तेन यावन्तः संयोगविभागवेगाः येन कर्मणा जन्यन्ते, तावता तत्कर्म साधारणम् । तज्जन्यत्वं च तेषां साधर्म्यमिति सूत्रार्थः ।

इदं सूत्रमनारम्भणीयमेव, संयोगविभागविशेषाणां संयोगविभागत्वात् तत्कर्मविशेषजन्यत्वमत्राधिकं प्रतिपाद्यत इति चेत्—न, तस्यापि तत एव सिद्धेः । कर्मविशेषाणां संयोगविभागविशेषजनकत्वे प्रतिपादिते संयोगविभागविशेषाणां कर्मविशेषजन्यत्वस्यार्थसिद्धत्वात् । तेषां कर्मविशेषणाजन्यत्वे कर्मविशेषाणां तज्जनकत्वानुपपत्तेः । तत् सूत्रं कर्मणः संयोगविभागकारणत्वप्रतिपादकम् । इदं तु संयोगविभागानां कर्मकार्यत्वे प्रति न तस्याप्यततसिद्धत्वात् संयोगविभागानां कर्मजन्यत्वे कर्मणस्तज्जनकत्वासंभवात् । शब्दपुनरुक्तत्वपदार्थपुनरुक्तत्वस्यापि दूषणत्वात् । संयोगविभागानां कर्मजन्यस्यापि कर्मणः संयोगविभागकारणत्वप्रतिपादकत्वाच्च । कर्मणः संयोगविभागकारणत्वप्रतिपादकमपीदं पुनरुक्ततया संयोगविभागानां कर्मकार्यत्वपरतया व्याख्यायत इति चेत्—न, तथाप्यर्थपुनरुक्तत्वस्य तदवस्थत्वात् । कर्मणः संयोगविभागकारणत्वप्रतिपादकत्वे तस्यापि पूर्वसूत्रस्य संयोगविभागानां कर्मजन्यत्वपरतया व्याख्यानासंभवाच्च । पूर्वसूत्रस्योभयपरत्वे वाक्यभेदो दोष इति चेत्—न, सूत्रेषु तस्यादूषणत्वात् ।

संयोगविभागाः कर्मणाम् ॥१.१.२८॥

इत्यनेन गतार्थत्वप्रसङ्गाच्चेति न संयोगविभागद्रव्याणां कर्मकारणमिति वक्तव्यम् ॥१९॥

अन्वयव्यतिरेकाभ्यां परमाण्वादिकर्मणो द्व्यणुकादिकारणत्वाशङ्कापरिहारार्थं सूत्रम्—

## न द्रव्याणां व्यतिरेकात् ॥१.१.२०॥

व्यतिरेकादिति द्रव्यगुणाभावव्यतिरिक्तत्वादित्यर्थः । तथा च कर्म न द्रव्यजनकम्, द्रव्यत्वगुणत्वरहितभावत्वात्, सामान्यवदिति । न चात्र सामान्यवत्त्वाभाव उपाधिः, गगनादौ साध्य[ा]व्यापकत्वभङ्गात् । नापि सामान्यवत्त्वेन सत्प्रतिपक्षत्वम्, गगनादौ व्यभिचारादिति ।

यद् वा, कर्म न द्रव्यकारणम्, व्यतिरेकात्, तदभावेऽपि द्रव्यस्योदयात् । यथै[दै]कतन्तुसंयोगविनाशाद् विनष्टे पटेऽवस्थितसंयोगेभ्यः पटान्तरमुत्पद्यते, तदा पूर्वक्षणे



कर्मणोऽभावात् न तत् पटजनकत्वम् । यदा च तन्तुसंयुक्तस्यांशोरंश्वन्तरेण संयोगात् तन्त्वन्तरमुत्पद्यते तदनन्तरं तु अंशुतन्तुसंयोगात् तन्तोः संयोगः तदनन्तरं च द्वितन्तुकमुत्पद्यते, न तदा द्वितन्तुकपूर्वक्षणे कर्मास्ति, तन्वोर्निष्क्रियत्वात् । अंशुकर्मणश्चांशुद्रव्यसंयोगेन तन्तूत्पत्तिक्षणे अवयवनाशात् तेन कर्माभावेऽपि द्रव्योत्पत्तेर्न कर्म द्रव्यकारणम् ।

यद् वा, न कर्म द्रव्यकारणम्, व्यतिरेकात् । सत्यपि तस्मिन् दूरदेशस्थिततन्तुभ्यां द्वितन्तुकानुत्पत्तेः । सत्यपि तस्मिन् संयोगपूर्वक्षणे द्वितन्तुकानुत्पत्तेश्च । स्वजन्यसंयोगाद्यारम्भः कर्मणापेक्ष्यत इति चेत्—न, संयोगादेव द्रव्यसिद्धौ कर्मणः कारणत्वे प्रमाणाभावात् । अन्वयव्यतिरेकयोरसंयोगजनकत्वेनान्यथासिद्धत्वात् । अन्यथा कर्मजनकनोदनादेरपि द्रव्यकारणत्वप्रसङ्गात् ।

यद् वा, व्यतिरिच्यते द्रव्यादिभ्यो भिद्यते कर्मानेनेति व्यतिरेकः कर्मत्वम्, तस्मात् कर्म न द्रव्यकारणम् । तथा च विमतं कर्म न द्रव्यकारणम्, कर्मत्वात् घटकर्मवदिति ।

यद् वा, व्यतिरिच्यते मन आदिभ्यो भिद्यते द्रव्यमनेनेति व्यतिरेको द्रव्यत्वम्, (न) तस्मात् कर्म न द्रव्यकारणम् । तथा च विमतं द्रव्यं न कर्मजन्यं द्रव्यत्वात् गगनवदिति ।

यत् पुनरात्रेयाचार्यव्याख्यानम्—कर्म न द्रव्यकारणं व्यतिरेकात् विनाशात् । आरम्भकसंयोगाद् विनष्टे कर्मणि द्रव्योदयादिति तदयुक्तम्, आरम्भकसंयोगात् द्रव्योत्पत्तिक्षणे कर्मविनाशेऽपि द्रव्यपूर्वक्षणेऽपि कर्मणो विद्यमानत्वात् । विनश्यदवस्थं न कारणमिति चेत्—न, विनश्यदवस्थस्यापि द्वित्वादेः द्वित्वविशिष्टद्रव्यज्ञानादिकारणत्वात् । न विनश्यदवस्थाना[म]समवायिकारणत्वमिति चेत्—न, प्रत्यासन्नस्य स्वावधृतसामर्थ्यस्यासमवायिकारणत्वनिषेधे बाधात् । असमवायिकारणलक्षणस्यातिव्यापकत्वाच्चेति ॥२०॥

अथाद्यं कर्म उत्तरकर्मणां साधारणं कारणं किं न स्यादित्याशङ्कापरिहारार्थं सूत्रम्—

## गुणवैधर्म्यान्न कर्मणाम् ॥१.१.२१॥

**कर्मणो गुणवैधर्म्यं गुणत्वाभावः ।** तस्मात् न [कर्म] कर्मकारणम्, तथा च कर्म न कर्मासमवायिकारणम्, गुण[त्व]रहितत्वाद् घटवदिति । कर्म न द्रव्यत्वरहिताभावत्वे सति कर्मकारणम्, गुण[त्व]रहितत्वाद् घटवदिति । न चात्र प्रतिपक्षसंभवः, अकर्मत्वेन सोपाधित्वादिति ।

यद् वा, गुणवैधर्म्यादिति कर्मासमवायिकारणगुरुत्वद्रवत्वसंस्कारसंयोगगुणवैधर्म्यादिति सूत्रार्थः । तद्वैधर्म्यं च गुरुत्वद्रवत्वसंस्कारसंयोगरहितत्वमेव । तथा च कर्म न कर्मासमवायिकारणम्, गुरुत्वद्रवत्वसंस्कारसंयोगरहितत्वात् घटवदिति । आद्यपतनं पतनासमवायिकारणम्, पतनासमवायिकारण[क]म्, आद्यपतनव्यतिरिक्तत्वे

सति गुरुत्वसमवायिकारणजन्यत्वात् अवयविगुरुत्ववदिति सत्प्रतिपक्षत्वमिति चेत्—न, प्रथमानुमाने आद्यपतनव्यतिरिक्तस्यैव कर्मणो धर्मित्वेन प्रतिपक्षस्यार्थान्तरग्रस्तत्वात् । अकर्मत्वेन सोपाधित्वाच्च । आद्यपतनत्वं च किं पतनजनकपतनमन्यद् वा ? नाद्यः, हेतोरसिद्धत्वात् । न द्वितीयः, पुनरुक्तेरेवेति, एतेनाद्यस्यन्दनं स्यन्दनजनकम्, अन्यस्यन्दनान्यत्वे सति द्रवत्वासमवायिकारणजन्यत्वात्, अवयवविद्रवत्ववदिति प्रतिपक्षो निरस्तः । तस्मात् कर्म न कर्मणां साधारणं कारणमिति ।

इदं च सूत्रमनारम्भणीयमेव,

कर्म कर्मसाध्यं न विद्यते ॥१.१.१०॥

इत्यनेनैव गतार्थत्वात् । तत्र कर्मसाध्यत्वं निषिध्यते, अत्र पुनरनेककर्मकारणत्वं निषिध्यत इति चेत्—न, कर्मणः कर्मकारणत्वनिषेधादेवानेककर्मकारणत्वनिषेधासिद्धेः, कर्मजनकस्यानुपपत्तेः । अत्र प्रतिज्ञामात्रम्, न हेतुर[भि]धीयत इति न गतार्थतेति चेत्—न, अत्र न कर्मणामिति प्रतिज्ञाया अविद्यमानत्वात् । तत्र कर्मत्वेन कर्मणः कर्मकारणत्वं निषिध्यते, अत्र तु गुणवैधर्म्येणेति चेत्—न, तत्र कर्मत्वस्य हेतु(त्वे)नानभिधानात । तत्र कर्मत्वं च हेतुत्वमभिप्रेतमिति चेत्—न, कर्मत्वस्यापि गुणवैधर्म्यानतिरेकात् । गुणवैधर्म्यविशेषः कर्मत्वमत्र हेतुत्वेनाभिप्रेतम् । तद्व्यतिरिक्तं गुणवैधर्म्यमत्रेति चेत्—न, गुणवैधर्म्यमात्रस्य तत्र हेतुत्वविवक्षया सर्वोपपत्तावेतत्सूत्रप्रणयनवैयर्थ्यस्य तदवस्थत्वात् । तत्र कर्मणः कर्माजनकत्वे प्रत्यक्षं प्रमाणमभिप्रेतम्, इहत्वनुमानमिति चेत्—न, प्रत्यक्षेण कर्मणः कर्माजनकत्वाननुभवात् तत्र साधकप्रमाणाभावो विवक्षितः, अत्र बाधकमनुमानमभिधीयत इति चेत्—न, बाधकाभिधानादेव साधकाभावे सिद्धे सति साधकस्य बाधकत्वानुपपत्तेरिति ॥ २१ ॥

॥ अथ [कार्य]सामान्यप्रकरणम् ॥

## द्रव्याणां द्रव्यं कार्यं सामान्यम् ॥ १.१.२२ ॥

न सामान्यमेकमवशिष्टमिति यावत् । तथान्यं यद्द्रव्यं यैर्द्रव्यैर्जन्यते, तत् तेषामेकं कार्यम् । यथा द्व्यणुकं परमाणुद्वयदिक्कालेश्वराणाम् । त्र्यणुकं च द्व्यणुकत्रयदिक्कालेश्वराणामित्यादि । यदा······द्रव्यसमवायिकारणानामिति विवक्ष्यते, तदा द्रव्ये च द्रव्याणि चेति विग्रहाश्रयणात् किञ्चिद् द्रव्यं द्वयोर्द्रव्ययोः कार्यम् । यथा परमाण्वोर्द्व्यणुकम् । किञ्चिद् बहूनां द्रव्याणां कार्यम् । यथा त्रयाणां द्व्यणुकानां त्र्यणुकमिति ।··········तदनुपपन्नम् । तत्र द्रव्याणां द्रव्यारम्भकत्वं साधर्म्यं व्युत्पाद्यते, अत्र तु द्वयोर्द्रव्ययोः बहूनां वा द्रव्याणां द्रव्यारम्भकत्वं व्युत्पाद्यत इति चेत्—न, द्वयोर्बहूनां वा आरम्भकत्वस्य तेनैव गतार्थत्वात् । द्रव्ये द्रव्याणि चेति विग्रहस्य तत्रापि संभवात् । पुनरुक्तत्वप्रसङ्गाच्च । तत्र यथा न विग्रह इति चेत्—न, तत्रैवंविधविग्रहाश्रयाणां वैतत्सूत्रप्रयोजनसिद्धावेतत्सूत्रारम्भस्य निष्प्रभावत्वात् । द्वयोर्बहूनां च द्रव्यारम्भकत्वव्युत्पादकेनानेनैव द्रव्यारम्भकत्वसिद्धेः पूर्वसूत्रवैयर्थ्यस्य दुर्वारत्वाच्च ।



तस्माद् अन्यथा सूत्रं व्याख्यास्यते । कार्यद्रव्यं द्रव्याणां सामान्यं साधर्म्यम् । तथा द्व्यणुकपरमाण्वोर्द्व्यणुकं च त्रयाणां द्व्यणुकाणामाश्रितत्वस्यैव धर्मलक्षणत्वात् । न चैवं पूर्वसूत्रेण गतार्थता, तेन कार्यद्रव्याणां समानधर्मत्वाप्रतिपादनात् । द्रव्याणां द्रव्यसमवायिकारणत्वव्युत्पादनाद् अर्थसिद्धं कार्यद्रव्यस्यानेकद्रव्याधर्मत्वम्, स्वसमवेतकार्यारम्भकत्वस्यैव समवायिकारणलक्षणत्वादिति चेत्—न, तेन द्रव्यसमवायिकारणत्वाप्रतिपादनात्, द्रव्यकारणत्वमात्रस्य प्रतिपादनात् । न चानेनानेकद्रव्यसमवायिकारणजन्यत्वं कार्यद्रव्याणां व्युत्पादयता द्रव्याणां द्रव्यकारणत्वव्युत्पादनात्—

द्रव्याणि द्रव्यान्तरमारभन्ते ॥१.१.८॥

इत्यस्य गतार्थत्वम् । अनेन द्रव्याणां द्रव्यसमवायिकारणत्वव्युत्पादनात् कार्यद्रव्याणां समानधर्मत्वप्रतिपादनादिति ॥ २२ ॥

## तथा गुणाः ॥ १.१.२३ ॥

यथा द्व्यणुकादिद्रव्यं परमाणुद्वयदिक्कालेश्वरादीनां द्रव्याणां समानं कार्यम्, तथा द्व्यणुकादिरूपादयोऽपि द्व्यणुक[ादि]दिक्कालेश्वरादिद्रव्याणां समानं कार्यमित्यर्थः ।

**आत्रेयाचार्यास्तु** द्व्यणुकरूपादीनामेकैकद्व्यणुकादिद्रव्यकार्यत्वानुपपत्तेः, द्वित्वादीनां चानेकद्रव्यकार्यत्वस्य द्वित्वप्रभृतयश्च संख्या इत्यनेनैव गतार्थत्वादिदं सूत्रम् अफलमिति मन्वाना उपेक्षितवन्तः । तदयुक्तम्, रूपादिविषयस्योपपादकत्वादिति ॥ २३ ॥

## द्वित्वप्रभृतयश्च संख्याः पृथक्त्वसंयोगविभागाश्च ॥१.१.२४ ॥

कार्यं सामान्यमित्यनुवर्तते । द्वित्वादयः संख्या द्विपृथक्त्वादीनि पृथक्त्वानि सर्वसंयोगविभागाश्च द्रव्याणां [अनेकेषां समवायिनां]कार्यं सामान्यम् । तथा[हि], घटपट[द्वि]त्वं घटपटयोः कार्यम् । घटपटस्तम्भत्रित्वं च घटपटस्तम्भानां कार्यम् । घटपटपृथक्त्वं च घटपटयोः कार्यम् । घटपटस्तम्भपृथक्त्वं च घटपटस्तम्भानां कार्यमिति । संयोगविभागौ च द्वयोर्द्वयोरेव कार्यमिति सूत्रार्थ इति । तदनुपपन्नम्, अस्य सूत्रस्य

तथा गुणः [१.१ १८]

इत्यनेन गतार्थत्वात् अनेकसमवायिकारणजन्यत्वमनेन प्रतिपाद्यत इति चेत्—न पूर्वेणैव गतार्थत्वात् । दिक्कालेश्वराणामपि समवायिकारणत्वेन रूपादीनामप्यनेकसमवायिकारणजन्यत्वात् । अस्य पूर्वसूत्रस्य च

गुणाश्च गुणान्तरम् [१.१.२]

इत्यनेनैव गतार्थत्वाच्च ।

तस्मादन्यथेदं व्याख्येयम् । यथा कार्यद्रव्यं द्रव्याणां साधर्म्यम्, तथा त्रित्वा-

दयः संख्याः पृथक्त्वादीनि च। यथा द्व्यणुकादिद्रव्यं द्रव्ययोः साधर्म्यम्, तथा द्वित्वद्विपृथक्त्वसंयोगविभागाश्चेति। न चैवं

गुणाश्च गुणान्तरम् [१.१.९]

इत्यादिना गतार्थत्वेन द्वित्वादीनामनेकद्रव्यसमानधर्मत्वाप्रतिपादनात् सर्वमिदमनुपपन्नम्, घटादिव्यतिरिक्तसंख्यानामसत्त्वात् गुणत्वेऽपि अकार्यत्वात्। कार्यत्वेऽपि कारणानिरूपणादिति चेत्—न, एकत्वस्य प्रागेव व्युत्पादनात्। द्वित्वादीनां च द्वे त्रीणीत्यादिप्रत्यक्षसिद्धत्वात्। द्वौ घटावित्यादिप्रत्यक्षेण घटादिनिष्ठस्य द्वित्वादेरनुभवात्। इदं द्वित्वमेतद्घटाद्भिन्नम्, एतद्विशेषणत्वाद् रूपवदित्यनुमानाच्च। न चायमसिद्धः शुक्लो घट इति[वत्]द्वौ घटावित्यादिप्रत्यक्षस्य सर्वलोकसिद्धत्वात्। न चैतद् द्वित्वमेतद्घटभिन्नत्वरहितम्, एतत्त्वात्। न यदेवम्, न तदेवम्, यथा पट इत्यादि व्यतिरेकेण सत्प्रतिपक्षत्वात्। एतद्घटभिन्नत्वस्य क्वचिदप्रसिद्धा तदभावस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात्। प्रमितौ वा तेनैव न्यायेन द्वित्वस्याचेतनघटभिन्नत्वसिद्धेर्व्यतिरेकिणो बाधितत्वात्। घटाद् भिन्नत्वेऽपि पटत्वस्य घटेनैव पटेनापि अभिन्नत्वस्वीकारात्। न चैकत्वद्वयमेव द्वित्वम्। इदं द्वित्वमेतदेकत्वद्वयव्यतिरिक्तं द्वित्वात्। अन्यद्वित्ववदिति न [च ?] व्यतिरेकिसिद्धेः। न चैतद् द्वित्वमेतदेकत्वद्वयात्मकमेकत्वादिति व्यतिरेकिणा सत्प्रतिपक्षता। एतदेकत्वद्वयात्मकस्य क्वचिद् द्रव्यस्य प्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात्। न चैतद्घटपटद्वित्वमेतद्घटैकत्वात्मकम्, एतत्त्वादिति व्यतिरेकिणा सत्प्रतिपक्षत्वम्। यदेतद्घटैकत्वात्मकं न भवति न तदेतत् द्वित्वमिति व्यतिरेकव्याप्तेः पटैकत्वे भङ्गात् भवता घटपटद्वित्वस्य घटपटैकात्मकत्वस्वीकारात्। न चैतद्घटपटद्वित्वमेतद्घटपटैकत्वव्यतिरिक्तत्वरहितमेतत्त्वादिति प्रतिपक्षणीयम्, विकल्पानुपपत्तेः। तथा हि किं घटपटैकत्वप्रतियोगिकं यदेतद्व्यतिरिक्तत्वं तदभावः साध्यते, किं वा घटपटैकत्वप्रतियोगिके द्वित्वव्यतिरिक्तत्वे तयोरेको भावः साध्यते, किं वा घटपटैकत्वप्रतियोगिके ये द्वे व्यतिरिक्तत्वे तयोर्यदभावद्वयं तद्वत्ता साध्यते, किं वा घटपटैकत्वप्रतियोगिके ये द्वे व्यतिरिक्तत्वे तयोरभावद्वयं साध्यते, किं वा घटपटैकत्वप्रतियोगिके ये द्वे व्यतिरिक्तत्वे तद्वत्ताभावः साध्यते ? न प्रथमः, अप्रसिद्धविशेषणत्वात्। प्रतियोगिभेदस्य व्यक्तिभेदनियतत्वेन घटपटैकत्वप्रतियोगिकैकत्वव्यतिरिक्तत्वानुपपत्तौ तदभावस्याप्यप्रसिद्धत्वात्। न द्वितीयः, घटपटैकत्वप्रतियोगिके ये द्वे व्यतिरिक्तत्वे तयोरेकस्याभावस्यानुपपत्तेः प्रतियोगिभेदस्याभावभेदनियतत्वात्। न तृतीयः, अप्रसिद्धविशेषत्वादेव। घटपटैकत्वप्रतियोगिके ये द्वे व्यतिरिक्तत्वे तयोर्यदभावद्वयं तद्वत्वस्य क्वचिदप्यप्रसिद्धेः। घटैकत्वपटैकत्वप्रतियोगिकव्यतिरिक्तः..........यव्यतिरिक्ततदभावद्वयस्य व्याहतत्वात्। घटैकत्वे च घटैकत्वव्यतिरिक्तत्वाभावोपपत्तावपि पटैकत्वव्यतिरिक्तत्वाभावानुपपत्तेः। व्यतिरिक्तत्वद्वयाभावद्वयस्य बाधितत्वात्। एवं घटैकत्वेऽपि। न चतुर्थः, विरुद्धत्वात्..............व्यतिरिक्तत्वाभावद्वयाधिकरणत्वरूपविरुद्धत्वधर्मापरपर्यायघटपटैकत्वभेदसाधकत्वात् घटपटैकत्वादिषु। न च घटपटै-



कत्वव्यतिरिक्तत्वाभावद्वयाधिकरणत्वस्य विरुद्धधर्मत्वात्। अनपेक्षितसाधकत्वे............पदस्यापि विरुद्धत्वात्। अविरुद्धत्वे वा हेत्वाभासान्तरत्वात्। अप्रसिद्धविशेषणत्वं पुनः चतुर्थपक्षे न संभवत्येव। घटपटैकत्वव्यतिरिक्तत्वाभावद्वयस्य घटपटैकत्वनिष्ठस्य प्रसिद्धत्वात्। अभाव..............धिकरण्यमप्रसिद्धमिति चेत्—न, सामानाधिकरण्यस्य व्यापकांशनिवेशाभावात्। न पञ्चमः, अर्थान्तरत्वात्। न घटपटैकत्वव्यतिरिक्तत्वद्वयाधिकरणत्वाभावस्य प्रथमानुमानव्यापकघटपटैकत्वव्यतिरिक्तत्वद्वयाभावत्वविरहात्, तद्व्याप्यत्वविरहात्। अन्यथा घटपटैकत्वव्यतिरिक्तत्वद्वयाधिकरणत्वाभिहिते घटपटैकत्वे च घटैकत्वव्यतिरिक्तत्वद्वयाभावद्वयप्रसङ्गात्। न च घटपटैकत्वव्यतिरिक्तत्वद्वयाधिकरणत्वाभावः पक्षीकृतः घटपटैकत्वव्यतिरिक्तत्वद्वयाभावद्वयं विनानवयवस्य नित्यत्वात् सत्प्रतिपक्षत्वमिति वाच्यम्। घटपटैकत्वादाविव तेन विनापि पर्यवसानात् घटपटैकत्वव्यतिरिक्तत्वद्वयाभावद्वयपर्यवसाने च पूर्वोपपादितविरुद्धत्वस्य दुर्वारत्वाच्च। किं च घटपटैकत्वविरुद्धधर्मत्वेन घटपटैकत्वव्यतिरिक्तत्वं क्वचिदप्रमितं वा ? नाद्यः, अप्रसिद्धविशेषणत्वात्। घटपटैकत्वव्यतिरिक्तत्वाप्रमितौ तदभावस्याप्रसिद्धत्वात्। न द्वितीयः, घटपटैकानिष्ठोभयवृत्तित्वरूपविरुद्धधर्मवत्त्वेन द्वित्वभाविघटपटैकत्वव्यतिरेकसिद्धेः द्वित्वस्योभयवृत्तित्वं च द्वाविति प्रत्यक्षासिद्धम्, संयुक्ताविति प्रत्यक्षसिद्धत्वमिव संयोगस्य। एतद्घटव्यतिरिक्तवृत्तित्वैतत्पटव्यतिरिक्तवृत्तित्वयोश्चैतद्घटपटैकत्वानिष्ठत्वेन तद्विरुद्धधर्मयोरेतद्घटपटद्वित्वे प्रत्यक्षसिद्धत्वाच्च। किं च एतद्द्वित्वमेतद्घटव्यतिरिक्तवृत्तित्वयोराधारः द्वित्वादन्यद्वित्ववदिति। न चैतद् द्वित्वमेतद्घटव्यतिरिक्तवृत्तित्वैतत्पटव्यतिरिक्तवृत्तित्वयोर्नाधारः, संयोगत्वविभागत्वपृथक्त्वरहितैतद्घटगुणवद्रूपवदिति सत्प्रतिपक्षत्वमिति वाच्यम्, अयं घटः संयोगत्वविभागत्वपृथक्त्वरहितत्वानेत(?)न्निष्ठगुणाधिकरणं द्रव्यत्वात् पटवदिति सिद्धे गुणप्रतिपक्षहेतोरनैकान्तिकत्वात्। न चैतद्द्वित्वमेतद्घटपटैकत्वव्यतिरिक्तमित्यत्र एतद्द्वित्वशब्देन किमेतद्घटपटैकत्वे एव विवक्षिते न तद्व्यतिरिक्तपटे। आद्ये व्याघातः, द्वितीये त्वाश्रयासिद्धिरिति, एतद्घटपटैकव्यतिरिक्तत्वासंभवाच्च। व्यतिरिक्तत्वाभ्यां विप्रतिपन्नस्य द्वाविति प्रत्यक्षसिद्धस्य द्वित्वस्य धर्मित्वात् द्वित्वशब्देन किमेतद्घटपटैकत्वे एव विवक्षिते तद्व्यतिरिक्तत्वं वा ? अन्यथा वह्निमान् पर्वत इत्यत्र किं वह्निरहितः पर्वतो धर्मः वह्निमान् वा ? आद्ये व्याघातः। द्वितीये त्वाश्रयासिद्धिरिति वक्तुं शक्यत्वात्। ननु मूलानुमानमयुक्तम्, धर्मिदृष्टान्तद्वित्वभेदासंभवात्। तदसंभवश्च द्वित्वादीनां जातित्वेन सर्वत्रैकत्वात्। न च द्वित्वादीनां जातिसंक्रमो बाधकः, तस्यादूषणत्वात्। द्वित्वत्रित्वादीनां सकलद्रव्यप्रवृत्तित्वेन व्याप्यव्यापकभावसंभवाच्च। नापि द्वित्वत्रित्वादीनां जातित्वे तुल्यव्यक्तिकत्वं बाधकमङ्गीकारादेव। न च द्वित्वत्रित्वादीनां तु तयोर्द्रव्यगुणादिव्यतिरिक्तत्वात् गोत्ववदिति चेत्—न, असिद्धेः, गुणव्यतिरिक्तत्वसाधकप्रमाणाभावात्, गुणविसाधकत्वस्य वक्ष्यमाणत्वाच्च। नापि द्वित्वादयो जायतः नित्यत्वे सत्यनेकसमवायत्वादिति

वाच्यम्, असिद्धेरेव, द्वित्वादीनां नित्यत्वे प्रमाणाभावात्, अनित्यत्वसाधकस्य वक्ष्यमाणत्वाच्च । तस्मादुपपन्नं पूर्वानुमानमिति ।

एवं त्रित्वादयोऽप्येकत्वव्यतिरिक्ताः समर्थनीयाः । ··············नेकसंख्यायाः प्रमाणान्तरसत्त्वाच्च । अयं घटः क्रमसंयोगविभागाजन्यपृथक्त्वलक्षणाक्रान्ताने(?)-तन्निष्ठगुणाधिकरणं द्रव्यत्वात् पटवत् । अयं घटः संयोगत्वविभागत्वपृथक्त्वान्याक्रा··············द्र]व्यत्वात् पटवत् । अयं घटः अनेतन्निष्ठसंख्याधिकरणं द्रव्यत्वात् घटवत् । अयं घटः कालनिष्ठसंख्याधिकरणं द्रव्यत्वात् कालवत् । आकाशं पृथक्त्वलक्षणानाक्रान्तसंयोगरहितकालनिष्ठगुण ·············· भूसंयोगेनार्थान्तरतापरिहारार्थं संयोगत्वरहितग्रहणम् । न तु विभागेनार्थान्तरतात्वस्योभयवादिसिद्धत्वात् । नापि पृथक्त्वलक्षणानाक्रान्तसंयोगत्वरहितकालनिष्ठगुणसम्भवात् । पटस्या·········भागस्य पटे सम्भवात् । न चैवमनेकसंख्यामात्रसिद्धेः द्वित्वाद्यसिद्धिः अनेकसंख्यासाधकानुमानसाध्येषु बहुवृत्तित्वाधिकरणत्वबहुत्वजात्यनधिकरणत्वादिविशेषणोपादा··············पृथक्त्वलक्षणानाक्रान्ताकाशत्वनिष्ठगुणाधिकरणं द्रव्यत्वात् घटवत् । अयं घट आकाशघटनिष्ठसंख्याधिकरणं द्रव्यत्वात् घटवदित्यादिना च बहुत्वसिद्धेः । बहुत्वसाधकानुमानसाध्येषु च·······मानेन द्वित्वसिद्धेः । अयं स्तम्भः पृथक्त्वलक्षणा(ना)क्रान्ताकाशघटपटनिष्ठगुणाधिकरणं द्रव्यत्वात् घटवदित्यादिना चतुष्ट्वसिद्धेः । अयं स्तम्भः आकाशघटपटनिष्ठसंख्याधिकरण········· ···संख्यासिद्धिः । अयं स्तम्भः एतत् प्रत्येतत्स्तम्भाकाशघटपटव्यतिरिक्तवृत्तित्वरहिताकाशघटपटनिष्ठपृथक्त्वरहितगुणाधिकरणं द्रव्यत्वात् घटवत् । अयं स्तम्भः एतत्प्रत्येतत्स्तम्भाकाशघट[पटव्यतिरिक्तवृत्तित्वरहिताका]शघटपटनिष्ठसंख्याधिकरणं द्रव्यत्वात् घटवदित्यादिना चतुष्ट्वसिद्धेः । अनेनैव न्यायेनोत्तराणां तत्तत्संख्यासिद्धिः ।

परार्धातिरिक्तानेकसंख्या नास्तीति **प्रशस्तः । यदात्रे[यः**··········सं]ख्या तु द्वित्वादिका परार्धान्तेति, तदनुपपन्नम्, परार्धादिसंख्याया अपि पूर्वोक्तन्यायसिद्धत्वात् । सैकं परार्धमित्यनुभवसिद्धत्वाच्च । अन्यथा परार्धादिसंख्याया अदृश्यरूपत्वात् । अथैकत्व·······कं परार्धमिति व्यवहारोपपत्तेः न परार्धाधिकसंख्यासिद्धिरिति मन्यसे, तन्न, एकत्ववदशसंख्यादिनैव एकादशादिव्यवहारोपपत्तेः एकादशसंख्याविलयप्रसङ्गात् । परार्धं किञ्चित् संख्याव्यू········मानाच्च । यतः परमा न संख्या तत् परार्धमिति धर्मिग्राहकप्रमाणेन सिद्धौ व्याघातो वेति चेत्—न, एवं सिद्धपरार्धस्य निष्प्रमाणकत्वेनास्माभिर्धर्मित्वेनानुपादानात् । एकं दशकमित्यादि दशोत्तरवृद्धिसिद्धसहस्रादि······संख्यायाश्च धर्मित्वात् । तस्मादनन्तैव संख्या न परार्धान्तेति ।

द्वित्वादिषु च संख्यात्वं प्रत्यक्षसिद्धमेव, एकत्वं संख्या द्वित्वं संख्येति प्रतीतिप्रयोगयोः सर्वलोकसिद्धत्वात् । अस्ति चैकत्वद्वित्वादिषु गणनाव्यवहारः ।············ संख्यात्वं न [त्वस्य] च जातित्वं गोत्वसमानन्यायसिद्धम् । एकत्वमेकत्ववृत्त्यनेकत्वव्या-



वृत्तत्वरहितैकत्ववृत्त्यनेकत्वरहितजातिमत्, जातिमत्त्वाद् घटवत् गोत्ववदित्यनुमानाच्च ।

न च द्वित्वादिगुणत्वे प्रमाणाभावः । द्वित्वा·········मात्रप्रमाणत्वात् । पटमहत्त्वजनकतन्तुबहुत्वं गुणः परिमाणासमवायिकारणत्वात्, अपटत्वे सत्यद्विष्ठपटगुणजनकतन्तुसमवेतत्वात् । अपटत्वे सति महत्त्वजनकतन्तुसमवेतत्वात् प्रचयवदित्यनु[मानात्··········]त्वेन महत्त्वजनकबहुत्ववत् गुणत्वानुमानाच्च ।

ननु संख्या न गुणः संप्रतिपन्नगुणानतिरिक्तत्वात् पटवत्, विमतं बहुत्वं न गुणः परिमाणत्वसंयोगत्वरहितामहत्त्वजनकतन्तुनिष्ठत्वात् पटवत् । महत्वाजनक·········महत्त्वजनकसंख्यावत् बहुत्वं न गुणः, पृथक्त्वातिरिक्तबहुसमवेतत्वात् गोत्ववदिति सत्प्रतिपक्षविरहेण सोपाधित्वमिति चेत्—न, विकल्पासहत्वात् । [न] गुण इति किं [1]गुणत्वाभावः साध्यते, [2]गुणलक्षणाभावो वा, [3][द्रव्यत्वकर्मत्वरहि]तजातिमत्त्वाभावो वा, [4]गुणशब्दप्रवृत्तिनिमित्त[त्व]ाभावो वा, [[5]कर्मत्वरहितासमवायिकारणत्वाभावो वा, [6]असमवायिकारणत्वाभावो वा] ? न प्रथमः, अप्रसिद्धविशेषणत्वात् प्राभाकरन्यायभूषणवृत्तिकारादीनां गुणत्वासिद्धेः तदभावस्याप्रसिद्धत्वात् । न द्वितीयः, [संख्याव्यावृत्तगुणलक्षणाभा]वसाधने सिद्धसाधनात् संख्याव्यावृत्तत्वरहितगुणलक्षणाभावसाधने[च]बाधात् । अर्थान्तरत्वाच्च । गुणलक्षणाभावस्य गुणत्वाभावत्वविरहात् । गुणत्वानङ्गीकारवादिनां गुणलक्षणाभावस्य [गुणत्वाभावव्याप्यत्वानङ्गी]काराच्च । गुणत्वासिद्धौ तदभावस्यासिद्धत्वेन तद्व्याप्यत्वस्याप्यसिद्धेः । न तृतीयः, अर्थान्तरत्वात् । बलाच्च (?) द्रव्यकर्मत्वरहितजातिमत्त्वस्य प्रत्यक्षसंख्यायां प्रत्यक्षसिद्धत्वाच्च । न चतुर्थः, पू[र्वोपपादितार्थान्तरग्रस्तत्वात्], सिद्धसाधनाच्च, संख्यागुणवादिनापि संख्यायां द्रव्यत्वकर्मत्वसंख्यात्वरहितजातिमत्त्वाभावस्याङ्गीकारात् । न पञ्चमः, पूर्ववदर्थान्तरग्रस्तत्वात्, गुणत्वाभावेन सोपाधित्वाच्च । न चा[न्त्यः पूर्ववदर्थान्तरत्वात् । ············] सिद्धौ गुणत्वाभावस्याप्यसिद्धत्वेन तस्य साधनव्यापकत्वानुपपत्तेः । न च गुणत्वासिद्धौ गुणत्वाभावस्याप्यसिद्धेरुपाधेः स्वरूप[ा]सिद्धत्वमपि वाच्यम्, अस्याभिन्नगुणत्वस्य स··············रत्वात् । गुणत्वस्य गुणशब्दप्रवृत्तिनिमित्तत्वाभावमात्रप्रचरितार्थत्वेनास्य संख्यात्वस्य गुणनिषेधासाधकत्वेनापि अर्थान्तरत्वात् । गुणत्वाभावेन सोपाधित्वाच्च । न चास्य साधनव्याप्य··············न संख्यात्वं न गुणजातिः संख्यावृत्तित्वात् मेयत्ववदित्यादयः प्रतिपक्षा निरस्ताः । गुणशब्दार्थानिरूपणात् संख्यात्वस्य जातित्वाभावमात्रसिद्धस्य चरितार्थत्वेन संख्याया गुणत्वाभावा·········[न] च वादिनोऽपि संख्यागुणत्वसाधने अप्रसिद्धविशेष[ण]त्वम्, अस्माभिर्गुणत्वस्य गुणशब्दप्रवृत्तिव्युत्पादनादिति । न च द्वित्वादीनां कार्यत्वे प्रमाणाभावः घटादिवत्, घटादिनिष्ठद्वित्वाभावमात्रसिद्ध·············मपि कार्यत्वस्य प्रत्यक्षतः सिद्धत्वात् । अन्यथा घटादीनामपि कार्यत्वाभावप्रसङ्गात् । अनुमानाच्च । घटनिष्ठमनेकत्वं

कार्यं कार्यगुणत्वात् अनेकगुणत्वात् घटपटगुणत्वात् संयोगवदिति । न…………… चास्य साधनव्यापकत्वम्, घटैकत्वभावकार्यगुणत्वस्यैकत्वाभावव्यभिचारात् । अनैकान्तिकं च कार्यगुणत्वं घटैकत्वे घटैकत्वं न…………दिति घटैकत्वस्याकार्यत्वसिद्धेरिति चेत् — न, एकत्वमेकत्वानेकवृत्तिरहितसंख्यात्वरहितावृत्तिकार्यंनिष्ठजातिमत्, संख्यात्वात् द्वित्ववदिति सिद्धे कार्यैकत्वे उपाधेः साध्यव्यापकत्वभङ्गात् व्यभिचार[:] साधकानुमानस्यानैकान्तिकत्वाच्च ।

न च नित्यमात्रनिष्ठद्वित्वादीनां कार्यत्वे प्रमाणाभावः, धर्मिग्राहकप्रमाणादेव तत्सिद्धेः । यस्य कस्यापि नित्यमात्रनिष्ठद्वित्वादिसाधकस्य द्वित्वादिकार्यत्वसाधकत्वात् नित्यमात्रनिष्ठद्वित्वादि कार्यम् अनेकसंख्यात्वात् घटबहुत्ववदिति ।

न च नित्यमात्रवृत्ति द्वित्वादिकं न कार्यं नित्यमात्रवृत्तिसंख्यात्वात्, अकाशैकत्ववदिति सत्प्रतिपक्षत्वम् । कालोऽनित्यवृत्तित्वरहितसंयोगत्वविभागत्वपृथक्त्वरहितानेतन्निष्ठकार्यगुणाधिकरणं नित्यद्रव्यत्वादात्मवदिति सिद्धायामनित्यवृत्तित्वरहितकार्यसंख्यायां व्यभिचारात् न चार्थान्तरता, संयोगत्वविभागत्वरहितपृथक्त्वरहिताकालनिष्ठकालगुणत्वस्य कालनिष्ठानेकसंख्यालक्षणत्वात् अनित्यवृत्तित्वरहितसंयोगत्वविभागत्वपृथक्त्वरहिताकालकालनिष्ठो गुणः अनेकसंख्यासंयोगत्वविभागत्वपृथक्त्वरहिता कालगुणत्वात् कालनिष्ठद्वित्ववदिति मन्यसे । तस्यानेकसंख्यात्वसिद्धत्वे च कालो नानित्यवृत्तित्वरहितसंयोगत्वविभागत्वपृथक्त्वरहितानेतन्निष्ठकार्यगुणाधिकरणम् , आत्मत्वरहिताकाशान्यमूर्त्तत्वात् रूपवदिति सत्प्रतिपक्षत्वम् । प्रतिपक्षहेतोराश्रितत्वेन सोपाधित्वात् ।

न च द्वित्वादीनामनित्यत्वे प्रमाणाभावः, कार्यत्वसाधकादेव तत्सिद्धेः । कार्यत्वे चानुमानम् । न च द्वित्वादीनां कारणत्वानुपपत्तिः । द्रव्याणां समयायिकारणत्वात्, एकत्वादीनां चासमवायिकारणत्वात्, अपेक्षाबुद्ध्यादीनां च निमित्तकारणत्वात् । न चात्र प्रमाणाभावः, द्रव्यादीनां द्वित्वादिजनकत्वस्य प्रत्यक्षसिद्धत्वात् । अनेकसंख्या एकत्वजन्या कार्यसंख्यात्वात् घटैकत्ववदित्यनुमानाच्च । न चानेकसंख्या नैकत्वजन्या अनेकनिष्ठत्वात् संयोगविभागवदिति सत्प्रतिपक्षत्वम् । परमाणुः संयोगत्वविभागत्वपृथक्त्वरहितैकत्वजन्यमहत्वनिष्ठगुणाधिकरणं द्रव्यत्वादिति सिद्धायाः परमाणुमहन्निष्ठसंख्याया अपि धर्मित्वे धर्मिग्राहकप्रमाणबाधात् तद्व्यतिरिक्तानेकसंख्यायाश्च धर्मित्वे तत्रैवानैकान्तिकत्वात् ।

न चात्रार्थान्तरता, संयोगत्वपृथक्त्वरहितमहत्परमाणुनिष्ठगुणत्वस्य महत्परमाणुनिष्ठानेकसंख्यालक्षणत्वात् संयोगत्वविभागत्वपृथक्त्वरहितैकत्वजन्यमहत्परमाणुनिष्ठो गुणः महत्परमाणुनिष्ठानेकसंयोगविभागत्वपृथक्त्वरहितमहत्परमाणुगुणत्वात् । महत्परमाणुनिष्ठद्वित्ववदित्यनुमानाच्च । न चैवंविधे स्थले प्रतिपक्षसंभवः प्रतिवादिनश्चाश्रयासिद्धेरित्युक्तम् ।



घटपटद्वित्वादीनामपेक्षाबुद्धिजन्यत्वे प्रमाणम् घटपटद्वित्वं घटपटैकत्वगोचरबुद्धिजन्यम्, कार्यत्वात् संस्कारवत् । ईश्वरापेक्षाबुद्धिजन्यत्वे[न] प्रमाणम्—घटपटद्वित्वं घटपटैकत्वगोचरेश्वर[ापेक्षाबुद्धि]जन्यं कार्यत्वादित्यादि । न चात्र दृष्टान्तासंभवः, घटपटैकत्वगोचरेश्वरबुद्धिः कार्यजनिका बुद्धित्वात् अस्मद्बुद्धिवदिति दृष्टान्तसिद्धेः । न चास्यान्त्यबुद्धौ व्यभिचारः, तस्या अपि प्रध्वंसजनकत्वा[त् न च]घटपटैकत्वगोचरत्वासिद्धेरत्राश्रयासिद्धत्वम्, घटपटैकत्वादिकमीश्वरबुद्धिविषयो मेयत्वादिति ईश्वरबुद्धेः घटपटैकत्वगोचरत्वसिद्धेः । न चात्रापि घटदृष्टान्ताभा…… सिद्धिः किंविषयिणी बुद्धित्वादिति तत्सिद्धेः ईश्वरबुद्धेः किञ्चित्कार्यत्वकिञ्चिद्विषयत्वयोः धर्मिग्राहकप्रमाणादेव सिद्धेश्च ।

अस्मदाद्यपेक्षाबुद्धिजन्यत्वे द्वित्वादीनां प्रमाणम् -अहं घटपट[द्वि]त्वजनकघटपटैकत्वगोचरसाक्षात्कारवान् आत्मत्वादीश्वरवदित्यादि । न चात्रेश्वरत्वमुपाधिः, क्षित्यादिकर्तृत्वनित्यज्ञानत्वादिरूपेश्वरत्वस्य विपक्षरूपं व्यावर्त्यं हि तद्विशेषणत्वेन पक्षेतरत्वात् । ईश्वरनिष्ठान्त्यविशेषैकत्वादीनां चेश्वरो घटपटद्वित्वजनकघटपटैकत्वगोचरसाक्षात्कारवद् अन्योहमयत्वात् [अन्यो मेयत्वात्] घटपटवदिति सिद्धे घटपटद्वित्वजनकघटपटैकत्वगोचरसाक्षात्कारवति साध्याव्यापकत्वेनानुपाधित्वात् ।

न चेश्वरत्वेनास्य सत्प्रतिपक्षत्वम्, उपाधेः साध्यव्यापकत्वभङ्गस्थले व्यभिचारात् । न च नाहं घटपटद्वित्वजनकघटपटैकत्वगोचरसाक्षात्कारवान् मदन्यचेतनरहितरहितत्वात् घटवदिति सत्प्रतिपक्षत्वम्, अनात्मत्वेन सोपाधिकत्वात् ।

किं च घटपटैकत्वगोचरो मत्साक्षात्कारः अनेकत्वजनकः घटपटैकत्वगोचरसाक्षात्कारत्वात् ईश्वरसाक्षात्कारवदिति । न चास्य विनश्यदवस्थघटपटैकत्वगोचरसाक्षात्कारे व्यभिचारः, तस्यापि द्वित्वजनकत्वात् । तदनन्तरक्षणे च घटपटद्वित्वानुपपत्तेश्च घटपटविनाशादेवोपपत्तेः । न च घटपटैकत्वगोचरो मन्निष्ठसाक्षात्कारो नाशकत्व(?)जनको मत्साक्षात्कारत्वात् अन्यमत्साक्षात्कारवदिति सत्प्रतिपक्षत्वं प्राचीनानुमानसिद्धद्वित्वजनकघटपटैकत्वगोचरमन्निष्ठसाक्षात्कारे व्यभिचारात् । एतद्घटपटद्वित्वस्य एतद्घटपटैकत्वगोचरमत्साक्षात्कारजन्यत्वे प्रमाणम् — अहमेतद् द्वित्वजनकैतद्घटपटैकत्वगोचरसाक्षात्कारवान्, योगधर्माजन्यैतद्द्वित्वसाक्षात्कारत्वात् ईश्वरवदिति । न च योगधर्माजन्यत्वविशेषणवैयर्थ्यम्, एतद्द्वित्वजनकैतद्घटपटैकत्वगोचरसाक्षात्कारविरहितस्य तद्द्वित्वसाक्षात्कारवति चिरमुक्तेर्भविष्यन्मुक्तेश्च व्यभिचारपरिहारार्थत्वात् ।

न च नाहमेतद्द्वित्वजनकैतद्घटपटैकत्वगोचरसाक्षात्कारवान् द्वित्वात् संप्रतिपन्नवदित्यादिना सत्प्रतिपक्षत्वम् ईश्वर एतद्द्वित्वजनकैतद्घटपटैकत्वगोचरसाक्षात्कारवदन्यो मेयत्वात् घटवदिति सिद्धेः । एतद्द्वित्वजनकैतद्घटपटैकत्वगोचरसाक्षात्कारवतीश्वरव्यतिरिक्ते चेतनत्वेन दुःखाधिकरणे व्यभिचारात् । इदमेतद्घटपटैक-

त्वगोचरं ज्ञानमेतद्द्वित्वजनकम्, एतदन्यकार्यत्वरहितज्ञानत्वात् ईश्वरज्ञानवदिति । न च नेदमेतद्द्वित्वजनकं ज्ञानत्वात् संप्रतिपन्नवदित्यादिना सत्प्रतिपक्षत्वम्, प्राचीनानुमानसिद्धैतद्द्वित्वजनकतन्निष्ठसाक्षात्कारे व्यभिचारात् । न चैतद्द्वित्वं नैतद्घटपटैकत्वगोचरसाक्षात्कारजन्यं द्वित्वात् अन्यद्वित्ववदिति सत्प्रतिपक्षत्वं, प्रथमानुमानव्यापकाभावाद् व्याप्यत्वात् । न चार्थात् सत्प्रतिपक्षत्वम्, प्रथमानुमानसाध्याभावमन्तरेण द्वितीयानुमानसाध्यापर्यवसानस्य निर्वक्तुमशक्यत्वात् । इदं घटपटैकगोचरं ज्ञानं द्वित्वजनकम्, एतदन्यकार्यत्वरहितज्ञानत्वादिति सिद्धे[:,] एतज्ज्ञानजन्यद्वित्वे व्यभिचाराच्च । तन्निष्ठैतद्घटपटैकत्वगोचरैतत्साक्षात्कारजन्यद्वित्वव्यतिरिक्तद्वित्वानामस्मदादिनिष्ठापेक्षाबुद्धिजन्यत्वे प्रमाणम्—मन्निष्ठैकत्वगोचरसाक्षात्कारजन्यद्वित्वव्यतिरिक्तास्मदादिप्रत्यक्षद्वित्वादियोगजधर्माजन्यजन्यैकत्वगोचरसाक्षात्कारजन्यादियोगजधर्माजन्यसाक्षात्कारगोचरद्वित्वात् घटपटैकत्वगोचरसाक्षात्कारजन्यद्वित्ववत् ।

यद् वा द्वित्वसामान्यमेकत्वस्यापरज्ञानजन्यवृत्ति द्वित्वाव्यावृत्तत्वात् सत्तावत् । न चात्र द्वित्ववृत्तित्वमुपाधिः, असिद्धविशेषस्य विपक्षरूपव्यावर्त्यरहितत्वेनास्य पक्षेतरत्वात् । अवृत्तीनां..................प्रवृत्तिग्रहणेनैव व्युदासात् । द्वित्वमात्रवृत्तीनां च द्वित्व.................. सामान्यव्यतिरिक्तानां पक्षतुल्यत्वात् । द्वित्वसामान्यस्य च पक्षत्वादिति ।

न च दृष्टान्तस्य साध्यविकलत्वम्, सत्ताया एकत्वज्ञानजन्यैकत्वविशिष्टद्रव्यज्ञानादिवृत्तित्वात् । न चास्य एकद्वित्वापेक्षाबुद्धिजत्वमात्रेण चरितार्थत्वात् । न सर्वद्वित्वानामपेक्षाबुद्धिजत्वमसिद्धिरिति वाच्यम्, विप्रतिपन्नानि द्वित्वान्येकत्वगोचरज्ञानजन्यानि द्वित्वात्, एकत्ववदिति सिद्धेः । एवं द्वि[त्रि ?]त्वादिष्वपि ।

किं च द्वित्वादीनि एकत्वगोचरज्ञानजन्यानि अनेकसंख्यात्वात् द्वित्ववदिति । यद् वा सर्वद्वित्वादीनि एकत्वगोचरज्ञानजन्यानि कार्यत्वात् एकत्वज्ञानजन्यैकत्वविशिष्टद्रव्यज्ञानवत् । न चात्र ज्ञानत्वमुपाधिः एकत्वज्ञानजन्यैतत्प्रध्वंसाभावसाध्य[ा]व्यापकत्वात् एकत्वज्ञानजन्यसंस्कारेऽपि साध्याव्यापकत्वाच्च ।

एकत्वविशिष्टद्रव्यज्ञानजन्यः संस्कारः, न त्वेकत्वज्ञानजन्य इति चेत्—न, एकत्वविशिष्टद्रव्यज्ञानस्याप्येकत्वगोचरत्वेनैकत्वज्ञानत्वात् । न च कार्यत्वस्य घटादौ व्यभिचार(स्त)स्यापि एकत्वगोचरेश्वरज्ञानजन्यत्वात् । न चात्र संख्यात्वाभाव उपाधिः, एकत्वगोचरेश्वरज्ञानजन्यत्वघटैकत्वादौ साध्याव्यापकत्वात् । द्वित्वादिकं नैकत्वज्ञानजन्यं संख्यात्वादेकत्ववदिति चेत्—न, घटादिनिष्ठैकत्वस्य दृष्टान्तत्वे घटादिनिष्ठैकत्वव्यभिचारात् । तस्येश्वरनिष्ठैकत्वव्यभिचारात् । तस्येश्वरनिष्ठैकत्वगोचरज्ञानजन्यत्वात् । घटादिनिष्ठैकत्वं पक्षतुल्यम् ईश्वरासिद्धेरिति चेत्—न, भगवतः सर्वज्ञस्य व्युत्पादितत्वात् । अकार्यत्वेन सोपाधित्वात् । पूर्वोपपादितैकत्वज्ञानजन्यद्वित्वादौ व्यभिचाराच्च ।



यद् वा अयं घट एतद्घटपटैकत्वगोचरज्ञानाजन्यैतन्निष्ठत्वरहितद्वित्वाधिकरणं द्वित्वाधिकरणत्वात् पटवदिति । यद् वा अयं घटः घटपटैकत्वगोचर[म]ज्ञानाजन्यघटनिष्ठत्वरहितद्वित्वाधिकरणं स्पर्शाधिकरणत्वात् पटवदित्यादि । यद् वाहं द्वित्वाजनकमन्निष्ठत्वरहितैकत्वज्ञानवान् आत्मत्वात्, अन्यवत् । यद् वा अहमेतद्द्वित्वाजनकमन्निष्ठैकत्वरहितैकत्वज्ञानवान् आत्मत्वात्, अन्यात्मवत् । यद् वा अयं घटपटैकत्वगोचरसाक्षात्कारः एतद्द्वित्वपरमकारणम्, एकत्वात् । न यदेवम्, न तदेवम् । यथा गगनमिति । न चात्रैतद्द्वित्वपरमकारणत्वानिरुक्तिर्दोषाय । एतद्द्वित्वजनकप्रागभावसमानकालीनत्वरहितैतद्द्वित्वकारणत्वस्य क्षणाकारणत्व एतद्व्यवहितपूर्वक्षणोत्पन्ना..............कारणत्वस्य क्षणकारणत्वे च क्षणव्यतिरिक्त एकत्वव्यवहितपूर्वक्षणोत्पन्नैतत्परमकारणत्वात् । इदं द्वित्वमेतद्व्यवहितपूर्वक्षणोत्पन्नजन्य एतदुत्पत्तिक्षणोत्पन्न एतदुत्पत्तिक्षणोत्पन्नपटवदिति साध्यप्रसिद्धेः । एतद्द्वित्वचरमकारणस्योभयवादिसिद्धत्वाच्च ।

न चायं घटपटैकत्वसाक्षात्कारो नैतद्द्वित्वपरमकारणम्, साक्षात्कारत्वात् संप्रतिपन्नवदिति सत्प्रतिपक्षत्वम् । अहमेतद्द्वित्वाच्चरमकारणमन्निष्ठत्वरहितसाक्षात्कारवान् आत्मत्वादन्यात्मवदति सिद्धे, एतद्द्वित्वचरमकारणसाक्षात्कारे व्यभिचारात्, न चात्र साक्षात्कारत्वाभाव उपाधिः, प्रतिपक्षहेतोर्व्यभिचारस्थले साध्यव्यापकत्वाभावात् । साध्याव्यापकत्वादिश्च एतद्द्वित्वचरमकारणस्य साक्षात्कारित्वाभावानिश्चयादिति । न च द्वित्वादीनां विनाशकारणानुपपत्तिः, अपेक्षाबुद्धिविनाशाश्रयविनाशयोः संभवात् । तथा चैतद्द्वित्वजनकैकत्वगोचरसाक्षात्कारनाश एतद्द्वित्वनाशचरमकारणमेतत्त्वात्, न यदेवम्, न तदेवम्, यथा गगनमित्यादि ।

न चात्राप्रसिद्धविशेषणत्वम्, पूर्वोक्तादेव न्यायात् । नाप्ययमेकत्वगोचरसाक्षात्कारविनाशो नैतद्द्वित्वविनाशचरमकारणम् विनाशत्वादिति सत्प्रतिपक्षत्वम् । अहमेतद्द्वित्वविनाशचरमकारणत्वरहितमन्निष्ठैकत्वरहितैकत्वसाक्षात्कारनाशवान् आत्मत्वादन्यात्मवदिति सिद्धे एतद्द्वित्वविनाशचरमकारणविनाशे व्यभिचारात् ।

न च प्रकृते विनाशत्वाभाव उपाधिः, प्रतिपक्षहेतोर्व्यभिचारस्थले साध्यव्यापकत्वभङ्गात्, साध्यव्यापकत्वानिश्चयाच्च । एतद्द्वित्वविनाशचरमकारणस्य विनाशत्वाभावानिश्चयात् । एतत्त्वगोचरसाक्षात्कारनाशस्य एतद्द्वित्वविनाशजनकत्वे प्रमाणम् । अहमेतद्द्वित्वविनाशजनकत्वसाक्षात्कारविनाशवान् आत्मत्वादन्यवदिति अन्यद्वित्वस्य द्वित्वनिमित्तकारणविनाशविनाश्यत्वे प्रमाणम् । इदं द्वित्व[त्वं]निमित्तकारणविनाशद्रव्यविनाशविनाश्यम्, द्वित्वात् । ईश्वरापेक्षाबुद्धिजपरमाणुद्वित्ववदिति ।

न च दृष्टान्तस्य साध्यविकलत्वम्, ईश्वरापेक्षाबुद्धिजपरमाणुद्वित्वस्य तन्निमित्तकारणादृष्टविनाशविनाश्यत्वात् विप्रतिपन्नं प्रति ईश्वरापेक्षाबुद्धिजन्यं परमाणुद्वित्वं

द्वित्वकारणविनाशविनाश्यम्, द्वित्वात् । आश्रयविनाशविनाश्यद्वित्ववदित्यनुमानात् । न चात्र समवायिकारणविनाशसंभवः परमाणुतदेकत्वयोरविनाशित्वात् आश्रयविनाशविनाश्यघटपटद्वित्वादीनां द्वित्वादिकारणविनाशविनाश्यत्वेऽपि इदमेव प्रमाणमिति ।

ननु द्वित्वत्रित्वादीनां भेदानुपपत्तिः, कारणभेदासंभवात् । द्वित्वस्य द्वे समवायिकारणे त्रित्वस्य त्रीणीत्यपि न युक्तम् । द्वित्वत्रित्वोत्पत्तेः पूर्वं द्वे त्रीणीत्यसंभवात् त्रित्वस्य द्वित्वे असमवायिकारण[त्व]म् । त्रित्वस्य एकत्वान्यसमवायिकारणानीत्यपि न युक्तम्, उक्तदोषात् । एकत्वादौ द्वित्वादेरसंभवाच्च । एकत्वद्वयज्ञानं द्वित्वे कारणम् । एकत्वत्रयज्ञानं च त्रित्वे कारणमित्यपि न युक्तम् । पूर्वोक्तदोषादिति । तदयुक्तम्, विकल्पानुपपत्तेः । किमत्र कारणभेदाभावेन भेदाभाव आपाद्यते, अनुमीयते वा ? नाद्यः, मूलशैथिल्यात् । द्वित्वाजनककारणजन्यत्वेऽपि नित्येषु द्वित्वभेदवत्त्वात् । द्वित्वाजनककारणजन्यत्वेन द्वित्वभिन्नकार्यत्वाभाव आपाद्यत इति चेत्—न, द्वित्वादीनां द्वित्वाजनककारणजन्यत्वाभ्युपगमात् । घटपटस्तम्भत्रित्वादीनां घटपटद्वित्वाजनकस्तम्भगतैकत्वतद्विषयबुद्धीनामपि कारणत्वात् । घटपटस्तम्भत्रित्वाजन्यजनककारणाजनकत्वेन घटपटद्वित्वेन घटपटस्तम्भत्रित्वादिजनककार्यत्वाभाव आपादित इति चेत्—न, घटपटद्वित्वेऽपि घटपटत्रित्वाजनकस्तम्भगतैकत्वाविषयास्मदादिबुद्धेः कारणत्वात् ।

परमाणुद्वयतदतिरिक्तद्रव्यनिष्ठत्रित्वादन्यजनककारणाजन्यत्वेन परमाणुद्वयतदतिरिक्तनिष्ठत्रित्वादभिन्नकार्यत्वाभाव आपाद्यत इति चेत्—न, परमाणुद्वित्वेऽपि परमाणुद्वयतदतिरिक्तनिष्ठैकत्वाविषयपरमाणुद्वयनिष्ठैकत्वविषयपरमेश्वरबुद्धेः कारणत्वाभ्युपगमात् । ईश्वरज्ञानस्य सर्वविषयत्वात् । परमाणुद्वयव्यतिरिक्तनिष्ठैकत्वाविषयत्वेन घटत इति चेत्—न, ईश्वरे सर्वविषयज्ञानसर्वपदसर्वविषयज्ञानाभ्युपगमात् । न चैवमीश्वरे सर्वज्ञत्वभङ्गप्रसङ्गः, सर्वविषयज्ञानस्याप्यभ्युपगमात् । सर्ववस्तुसर्वविषयज्ञानाभ्युपगमेऽपि सर्वज्ञत्वोपपत्तेः । न च सर्वविषयैकज्ञानस्याभावापत्तिर्दोषाय, इष्टत्वात् । न चेश्वरापेक्षाबुद्धेर्नित्यत्वात् परमाणुद्वित्वस्य सर्वदोत्पत्तिप्रसङ्गः, इष्टत्वादेव । इश्वरापेक्षाबुद्धेरनित्यत्वाच्च । न चैवमीश्वरे[ऽ]नित्यज्ञानापत्तिः इष्टत्वात् । न चैवमीश्वरे नित्यज्ञानाभ्युपगमविरोधः नित्यज्ञानस्यानभ्युपगमात् । चैवंविधापेक्षाबुद्धौ प्रमाणाभावः, एतत्परमाण्वेकत्वविषयैतद्द्वितीयपरमाण्वैकत्वाविषयत्वरहितैतदेकत्वविषयैतत्परमाणुद्वयैकत्वव्यतिरिक्तैकत्वविषयत्वरहितकार्यसाक्षात्कारविषयो मेयत्वात् घटवदित्यनुमानात् । न च शरीरादिकारणाभावात् परमेश्वरे कार्यज्ञानानुत्पत्तिः, शरीरादेः अभ्युपगमात् । तथा च,

> भगवन्तमुमाकान्तं चन्द्रचूडं त्रिलोचनम् ।
> श्रुतिस्मृतिपुराणानि वदन्ति परमेश्वरम् ॥



न च स्मृत्यादौ [सृष्ट्यादौ] शरीराद्यसंभवात् परमेश्वरस्य स्मृत्यादि[सृष्ट्यादि]द्व्यणुकपरिमाणाजनकद्वित्वजनकापेक्षाबुद्ध्यसंभवः । एतद्ब्रह्माण्डवर्तिशरीरासंभवात् सर्वब्रह्माण्डप्रलयानन्तरं का गतिरिति चेत्—न, तदानीं परमाणुद्वित्वोत्पत्तेर[न]ङ्गीकारात् सृष्टादिद्व्यणुकपरिमाणस्य प्रलयपूर्वकालीनपरमेश्वरापेक्षाबुद्धिजन्यद्वित्वजन्यत्वाभ्युपगमाच्च । न च प्रलयपूर्वकालीनद्वित्वस्य यावत्समनुवृत्त्यसंभव इति वाच्यम्, बाधकाभावात्, न चेदं द्वित्वमाशुतरविनाशि[द्वि]त्वादन्यद्वित्ववदिति वाच्यम्, परेणापि परमाणुद्वित्वस्यापेक्षाबुद्धिजन्यत्वमिच्छता प्रलयपूर्वकालीनस्यापि यावत्सर्गमनुवृत्त्यङ्गीकारात्, परमाणुदृष्टान्तस्य साध्यविकलत्वात् । परेण घटपटद्वित्वादीनामपि यावदाश्रयमनुवृत्त्यङ्गीकारात् परमाणुद्वित्वस्य नित्यसर्वविषयापेक्षाबुद्धिजन्यत्वेऽपि परमाणुद्वयव्यतिरिक्तनिष्ठद्वित्वाजनकद्व्यणुकारम्भकसंयोगजन्यत्वस्वीकाराच्च । अन्यथा प्रागपि तदुदयापत्तेः सामग्रीसत्त्वात् । न चैवं सत्यनारम्भकपरमाणुनिष्ठत्रित्वानुत्पत्तिप्रसङ्गः, इष्टत्वात्, अनारम्भकपरमाणुनिष्ठद्वित्वे प्रमाणाभावात् । द्व्यणुकपरिमाणादेः कार्यस्य विरहात् । [प्रपञ्चितं] चैतदस्माभिः **हरप्रसादनाम्नि किरणावलीदर्पणके ।**

अस्तु वा परमाणुद्वित्वे परमाणुद्वयतत्तद्व्यतिरिक्तनिष्ठत्रित्वान्यजनकपरमाणुद्वयव्यतिरिक्तनिष्ठैकत्वानालम्बनं परमाणुद्वयैकत्वाल······ ·····मुत्पादकम् । न चात्र प्रमाणाभावः । एतत्परमाण्वेकत्वमेतत्परमाण्वेकविषयत्वविषयैकद्वितीयपरमाण्वेकत्वाविषयत्वरहितैतदेकत्वविषयैतत्परमाणुद्वयैकत्वव्यतिरिक्तैकत्वविषयत्वरहितोऽस्मदादिसाक्षात्कारवि······प्रमेयत्वात् घटवदित्यनुमानात् । न चास्मदादीनां सर्गान्यद्व्यणुकपरिमाणजनकद्वित्वोत्पादकज्ञानासंभवः, तदास्मदादिशरीरविरहादिति वाच्यम् । अस्मदादीनां तदानीमेतद्ब्रह्माण्डवर्तिशरीरसंभवात् । न चास्मदादीनां परमाणुगतैकत्वसाक्षात्कारानुपपत्तिः,············ योगगजधर्मबलादुपपत्तेः । तस्मात् सर्वद्वित्वानां द्वित्वान्यजनककारणोपपत्तेर्न त्रित्वादिभिर्न कार्यत्वापत्तिरिति ।

नापि द्वितीयाया[द्वितीयः,]बाधात् द्वित्वत्रित्वादिभेदस्य प्रत्यक्षसिद्धत्वात् कारण[ा]भेदस्योक्तप्रकारेणासिद्धत्वाच्च । द्वित्वत्रित्वादीनां द्वित्वप्रागभावादिरूपादिकारणभेदसत्त्वाच्चेति । न च प्रथममेकत्वसामान्यज्ञानं तदनन्तरमेकत्वविशिष्टानेकत्वज्ञानं तदनन्तरं द्वित्वसामान्यज्ञानं तदनन्तरं द्वित्वसामान्यविशिष्टद्वित्वज्ञानं तदनन्तरं द्वित्वगुणविशिष्टद्वित्वज्ञानं तदनन्तरं द्वित्वगुणविशिष्टद्रव्यज्ञानत्वात् शुक्लो घट इति ज्ञानवदिति चेत्—न, द्वित्वाव्यवहितपूर्वक्षणोत्पन्नव्यतिरिक्तैकत्वविशिष्टद्रव्यज्ञानानां धर्मित्वे सिद्धसाधनात् । द्वित्वाव्यवहितपूर्वक्षणोत्पन्नैकत्वविशिष्टद्रव्यज्ञानस्य धर्मित्वे चाश्रयासिद्धेः । तथाविधस्य भवद्भिरनभ्युपगमात् । अभ्युपगमे वा द्वे द्रव्ये इति ज्ञानानुत्पत्तिप्रसङ्गात् । एकत्वविशिष्टद्रव्यज्ञानेन द्वित्वोत्पत्तिक्षण एव भवदभिमतापेक्षाबुद्धिविनाशात् द्वित्वसामान्यज्ञानक्षणे वापेक्षाबुद्धिविनाशेन द्वित्वविनाशादिति । तस्मादेकत्वगुणविशिष्ट-

द्रव्यज्ञानव्यतिरिक्तापेक्षाबुद्धिर्निष्प्रमाणिकैवेत्येकत्वविशिष्टद्रव्याहृतं [द्रव्यज्ञानं] सविकल्पकमेवापेक्षाबुद्धिरिति ।

अस्तु वा निर्विकल्पकमेकत्वसामान्यानेकैकत्वगोचरं ज्ञानमपेक्षाबुद्धिः । तत्र च प्रमाणमिदमेकमिदमेकत्वविशिष्टद्रव्यज्ञानमेव । न त्वनुव्यवसायः । द्वित्वोत्पत्तिक्षणे तदुत्पादैकत्वविशिष्टद्रव्यज्ञानानुत्पादात् द्वित्वोत्पत्त्यनन्तरक्षणेऽनुव्यवसायोत्पाद एव, तदानीं द्वित्वसामान्यज्ञानानुत्पादात् । द्वित्वोत्पत्त्यनन्तरक्षणे चानुव्यवसायोत्पादे तदानीं द्वित्वसामान्यज्ञानानुत्पादात् ज्ञानयोर्युगपदुत्पत्त्य[न]ङ्गीकारात् । तदनन्तरक्षणे च द्वित्वसामान्यज्ञानोत्पादे तदनन्तरभाविद्वित्वविशिष्टद्रव्यज्ञानानुत्पत्तिः, द्वित्वक्षणोत्पन्नैकत्वविशिष्टद्रव्यज्ञानेनानुव्यवसायक्षणेऽपेक्षाबुद्धेर्विनाशात् । अपेक्षाबुद्धिविनाशेन च द्वित्वसामान्यज्ञानक्षणे द्वित्वविनाशात् ।

न च द्वित्वोत्पत्तिक्षणे एकत्वविशिष्टद्रव्यज्ञानोत्पत्तौ तेन द्वित्वसामान्यज्ञानक्षणे अपेक्षाबुद्धिविनाशात् । अपेक्षाबुद्धिविनाशेन च द्वित्वगुणज्ञानक्षणे द्वित्वविनाशात् द्रव्यज्ञानानुत्पत्तिर्भवतामपि समानैवेति शङ्का । इयमस्माभिर्द्वित्वसामान्यज्ञानानन्तरक्षण एव द्वित्वविशिष्टज्ञानस्वीकारात् । निर्विकल्पकत्वसामान्यज्ञानस्य द्वित्वगुणालम्बनत्वेन विशेषणज्ञानत्वोपपत्तेः । तस्मात् एकत्वसामान्यसहितानेकैकत्वगोचरं निर्विकल्पकम्, तस्मादनिर्द्वित्वसामान्यज्ञानानन्तरमेवापेक्षाबुद्धिर्न पुनरनेकत्वसामान्यविशिष्टानैकैकत्वज्ञानम्, तत्र प्रमाणाभावात् । द्वित्वादेश्चैतन्यसामान्यानेकैकत्वगोचरनिर्विकल्पकादेवोपपत्तेरिति ।

न चानेकैकत्वगोचरं निर्विकल्पकं (न) तद्द्वित्वजनकं निर्विकल्पकत्वात् । संप्रतिपन्नवदिति वाच्यम् । अनेकैकत्वानालम्बनत्वेन सोपाधित्वेन सोपाधित्वात् पूर्वोपपादितन्यायेन तस्य द्वित्वजनकत्वाच्च । तेन द्वित्वसामान्यज्ञानानन्तरं द्वित्वसामान्यविशिष्टगुणज्ञानमपि प्रत्युक्तम्, प्रमाणाभावात् । न च द्वे द्रव्ये इति ज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् त्रि[त्व]ज्ञानवदिति वाच्यम् । निर्विकल्पकसामान्यज्ञानौ (?) सिद्धसाधनात् । तस्यापि द्वि[त्व]गुणालम्बनत्वात् । जातिव्यक्त्योरेकालम्बनत्वनियमस्योभयवादिसिद्धत्वात् । द्वित्वसामान्यज्ञानस्य द्वित्वालम्बनत्वासिद्धावपि तेनार्थान्तरस्य दुर्वारत्वात् । द्वित्वसामान्यज्ञानस्य द्वित्वालम्बनमात्रेण चरितार्थस्य साधनस्य द्वित्वसामान्यविशिष्टज्ञानेऽपर्यवसानात् ।

अथ द्वे द्रव्ये इत्यत्र द्वित्वसामान्यद्वित्वविशेषणं न च निर्विकल्पकद्वित्वसामान्यज्ञानस्य द्वित्वसामान्यस्य विशिष्टं द्वित्वं विषय इति तद्व्यतिरिक्तद्वित्वज्ञानसिद्धिरिति चेत्—न, कार्यस्य द्वित्वसामान्यविशिष्टद्वित्वता तद्द्रव्यविशेषणम् किं वा द्वित्वसामान्यं तद्विशिष्टता, किं वा द्वित्वसामान्यविशिष्टताविशिष्टद्वित्वमिति ।

नाद्यः, निर्विकल्पकद्वित्वसामान्यज्ञानस्यापि द्वित्वविशिष्टताधारद्वित्वविषयत्वेन सिद्धसाधनतार्थान्तरतयोस्तदवस्थत्वाच्च । न द्वितीयतृतीयौ द्वित्वसामान्यद्वित्वसामान्यविशिष्टयोर्द्वित्वनिष्ठयोर्द्रव्यविशेषणत्वासम्भवात् । सम्भवे वा अनङ्गीकारात् । न चतुर्थः, पूर्ववद् विकल्प्य तद्दोषैरेव निराकरणात्, तस्मादनुपपन्ना **प्राचीनाचार्याणां** दिक् ।



**अस्माकं** तु प्रथमै[ममे]कत्वसामान्यैकत्वगुणद्रव्यगोचरं निर्विकल्पकम् । तदनन्तरमेकत्वसामान्यविशिष्टानेकैकत्वविशिष्टद्रव्यज्ञानमपेक्षाबुद्धिः । तदनन्तरमपेक्षाबुद्ध्यनुव्यवसायादपेक्षाबुद्धिविनाशात् द्वित्वसामान्यद्वयगुणद्रव्यगोचरं निर्विकल्पकं च । तदनन्तरमपेक्षाबुद्धिविनाशाद् द्वित्वविनाशद्वित्वसामान्यविशिष्टद्वित्वगुण······ द्वित्वगुणविशिष्टद्रव्यगोचरे द्वे द्रव्ये इति सविकल्पकं चेति प्रक्रिया ।

यद् वा प्रथममनेकत्वसामान्यानेकैकत्वद्रव्यगोचरं निर्विकल्पकमपेक्षाबुद्धिः । तदनन्तरमेकत्वसामान्यविशिष्टैकत्वगुणैकत्वगुणविशिष्टद्रव्यं द्विगोचरं सविकल्पकं द्वित्वं च । तदनन्तरं सविकल्पकादपेक्षाबुद्धिविनाशकद्वित्वसामान्यद्वित्वगुणद्रव्यगोचरं निर्विकल्पकं च । तदनन्तरमपेक्षाबुद्धिविनाशात् द्वित्वविनाशद्वित्वसामान्यविशिष्टद्वित्वगुणत्वस्य द्वित्वगुणविशिष्टद्रव्यगोचरं द्वे द्रव्ये इति सविकल्पकं चेति प्रक्रिया । द्वित्वसामान्यादिगोचरनिर्विकल्पकत्वे सविकल्पकमेव प्रमाणम् । सविकल्पकमेवानुव्यवसाय इति ।

ननु द्वे द्रव्ये इति ज्ञानस्य द्वित्वसामान्यविशिष्टं द्वित्वम् । [अ]द्वित्वविशिष्टे च द्रव्ये विषय इत्यनुपपन्नम् । द्वे द्रव्ये इति ज्ञानक्षणे द्वित्वस्याभावात् वर्तमानविषयत्वाच्च प्रत्यक्षस्य । यदि च विशिष्टज्ञानं विशेषणविशेष्यतत्सम्बन्धविषयं, तदा सुरभि चन्दनमिति ज्ञानं न स्यात् चक्षुषः सौरभ्याग्राहकत्वेन घ्राणस्य चन्दनाग्राहकत्वेन सुरभि चन्दनमिति ज्ञानजनकत्वानुपपत्तेः । न च विशेषणविशेष्यभावोऽपि पदार्थातिरिक्तो भावरूपः संभवति, अनभ्युपगमात् ।

न चायं समवाय एव । तस्यातीन्द्रियत्वेन चक्षुर्जन्यसाक्षात्कारगोचरत्वानुपपत्तेः । न चायं भाव एव प्रतियोगिविशेषतस्तन्निरूपणात् ।··············युक्तम्, अयमेको द्वावित्यनयोरविशेषप्रसङ्गात् । विशेषणात्यन्ताभाववद्व्यावृत्तिविशेष्ये विशिष्टप्रत्ययविषय इति **उदयनादयः** । तदपि न युक्तम्, विकल्पानुपपत्तेः । विशेषणात्यन्ताभाव····················· विशेषणात्यन्ताभावाधिकरणैकत्वव्यक्त्यन्योन्याभावः, किं वा विशेषणात्यन्ताभावाधिकरणसर्वव्यक्तिप्रतियोगिकः एकोऽन्योन्याभावः, किं वा विशेषणात्यन्ताभावाधिकरणसर्वव्यक्तिप्रतियोगिकाः सर्वे अन्योन्याभावाः किं[वा]विशेषणात्यन्ताभावात्यन्ताभावः, किं[वा] विशेषणात्यन्ताभावाधिकरणत्वात्यन्ताभावः, किं वा विशेष्यात्यन्ताभावः ?

नाद्यः, अयमयं च न रूपम्, एतौ द्वावित्यविशेषप्रसङ्गात्, रूपस्याप्येतद्द्वित्वात्यन्ताभावाधिकरणत्वात् ।

न द्वितीयः, अनेकप्रतियोगिकैकान्योन्याभावानुपपत्तेः, वक्ष्यमाणदोषाच्च

न तृतीयः, एतद्द्वित्वात्यन्ताभावाधिकरणसर्वव्यक्त्यप्रतीतौ तदभावानां प्रत्येतुमशक्यत्वात्। एतद्द्वित्वात्यन्ताभावाधिकरणातीन्द्रियव्यक्त्यन्योन्याभावानां साक्षात्कारगोचरत्वानुपपत्तेश्च। अनन्तान्योन्याभावाप्रतिभासाच्च। अप्रतियोगिज्ञान-संभवाच्च। तद्धि न तावत् द्वित्वसामान्यज्ञानक्षणे जायते। नापि द्वित्वगुणज्ञानक्षणे, युगपज्ज्ञानानुत्पत्तेः। नापि द्वितीयोत्पत्तिक्षणे। अस्मन्मते सविकल्पकापेक्षाबुद्धिपक्षे तदनुव्यवसायेन निर्विकल्पकापेक्षाबुद्धिपक्षे चैकत्वविशिष्टद्रव्यज्ञानेन युगपदुत्पत्ति-प्रसङ्गात्। उदयनादिमतेन च सामान्यज्ञानकाले विनष्टस्य प्रतियोगिज्ञानस्य तदुत्तर-कालभाविद्वित्वविशिष्टद्रव्यज्ञानजनकत्वानुपपत्तेः। नापि द्वित्वगुणज्ञानोत्तरक्षणे द्वित्व-विशिष्टज्ञानेन यदुत्पत्ति[?]प्रसङ्गात्। युगपदुत्पन्नत्वेन कारणभावाभावविशेष्ययोरा-लम्बनयोरविशेषात्। तस्मात् द्वित्वस्यापेक्षाबुद्धिविनाशप्रसङ्गाच्च।

नापि चतुर्थः, विशेषणात्यन्ताभावात्यन्ताभावस्य विशेषणस्वरूपानतिरेके द्वे द्रव्ये इति ज्ञानस्य द्वित्वगोचरत्वप्रसङ्गात्। अतिरेके च पूर्ववत् प्रतियोगिज्ञानासंभवेन तद्ग्रहणानुपपत्तेः। तत एव द्वाविति ज्ञानोत्पत्तौ द्वित्वासिद्धिप्रसङ्गात्। द्वित्वसामान्य-विशिष्टतद्द्वित्वगुणज्ञानात् द्वित्वसिद्धिरिति चेत्—न, तस्य प्रागेव निरस्तत्वात्। द्वित्वनिर्विकल्पकाद् द्वित्वसिद्धिरिति चेत्—न, द्वित्वसविकल्पकाभावे द्वित्वनिर्विकल्प-कासिद्धेः तस्य सविकल्पकोन्नेयत्वात्।

द्वित्वासिद्धौ तदत्यन्ताभावादेरप्यसिद्धेश्च नापि पञ्चमः।

तत एव नापि षष्ठः। तत एव एतौ द्वावेतौ पृथगेतौ संयुक्तावेतौ विभक्ताविति प्रत्ययानामविशेषप्रसङ्गाच्च। विशेष्यात्यन्ताभावाविशेष्ययोरालम्बनयोरविशेषात्।

तस्मात् द्वित्वस्यापेक्षाबुद्धिविनाश्यत्वे द्वे द्रव्ये इति प्रत्ययानुपपत्तिविषयत्वा-दिति। तदयुक्तम्। द्वे द्रव्ये इति प्रत्ययस्य द्वित्वविशिष्टद्रव्यादिविषयत्वात् द्वे द्रव्ये इति प्रत्ययकालेऽपि नष्टद्वित्वक्षणस्य विषय इति चेत्—न, बाधकाभावात्। इदं द्वित्वं नैतत्साक्षात्कारविषयम्, एतत्कालीनरहितत्वात् भविष्यद्घटवदिति चेत्—न, तत्त-त्साक्षात्कारविषयत्वे द्वित्वस्यैवासिद्धेः। आश्रयासिद्धत्वात्। एतत्साक्षात्कारविषयत्वे च तदभावसाधनस्य च बाधितत्वात्। किं चैतत्साक्षात्कारविषयत्वस्य क्वचिदप्रसिद्धा-वप्रसिद्धविशेषणत्वात। प्रसिद्धौ वानेनैव न्यायेनास्य द्वित्वस्यैतत्साक्षात्कारगोचरत्वा-सिद्धेर्बाधात्। अन्यद्द्रव्यमेतत्साक्षात्कारगोचरो द्रव्यत्वात् भाविघटवत् इत्यादेर्दुर्वार-त्वादसिद्धत्वाच्च।

अस्मन्मते द्वित्वसामान्यद्वित्वगुणगोचरनिर्विकल्पकेन द्वित्वगुणविशिष्टद्रव्य-गोचरसविकल्पकक्षणे अपेक्षाबुद्धिविनाशात् तदनन्तरक्षणे चापेक्षाबुद्धिविनाशेन द्वित्व-विनाशाच्चेति द्वे द्रव्ये इति ज्ञानं बाधकाभावात् केवलविशेष्यालम्बनं विशिष्टज्ञान-त्वात् सुरभि चन्दनमिति ज्ञानवदिति चेत्—न, अनुमानज्ञानादौ व्यभिचारात्। तस्यापि केवलविशेष्यालम्बनत्वपक्षे साध्यासिद्धिप्रसङ्गात्। प्रत्यक्षत्वेन हेतुविशेषणे



दृष्टान्तस्य साध्यविकलत्वात्। सुरभि चन्दनमित्यस्यापि सौरभ्यविशिष्टद्रव्यग्राहकत्वात्। सौरभ्यविशिष्टद्रव्यस्य च घ्राणेनैवोपगमात्। घ्राणरसनयोरपि द्रव्यग्राहकत्वात्। अन्वयव्यतिरेकाभ्यां गन्धविशिष्टद्रव्यज्ञानस्य घ्राणजन्यत्वावगमात्। रसविशिष्टद्रव्य-ज्ञानस्य च रसजन्यत्वावगमात्। अन्यथा चक्षुःस्पर्शनयोरपि द्रव्याग्राहकत्वप्रसङ्गात् घ्राणजन्यसौरभ्यज्ञानसहकृतचक्षुःस्पर्शनाभ्यां वा सौरभ्यविशिष्टद्रव्यग्रहणात्।

न चैवं गन्धस्यापि चक्षुःस्पर्शनग्राह्यत्वापत्तिः, इष्टत्वात्। न चैवं घ्राणविकला-नामपि सौरभ्यविशिष्टद्रव्यावगमप्रसङ्गः, घ्राणजन्यसौरभ्यावगमस्यापि सहकारित्वा-भ्युपगमात्। एवं रसनजन्यरसज्ञानसहकृताभ्यां चक्षुःस्पर्शनाभ्यां रसविशिष्टद्रव्या-वगमात्। दृष्टान्तस्य साध्यविकलत्वात्। सुरभि चन्दनमिति ज्ञानस्यानुमानत्वात्। इदं चन्दनमेतत्सौरभ्यवदेतत्वात् न यदेवं न तदेवं यथा घट इति केवलव्यतिरेकि-प्रयुक्तेन वा प्रसिद्धविशेषणत्वं एतत्सौरभ्यघ्राणसिद्धत्वात्।

न चैतत्सौरभ्यस्य प्रसिद्धावपि तद्वत्त्वस्याप्रसिद्धेरप्रसिद्धविशेषणता, तस्य पक्ष-धर्मावसेयस्य व्यापकत्वानङ्गीकारात्। इदं सौरभ्यं क्वचिदाश्रितं गुणत्वात् रूपवदि-त्यादि तद्द्वित्वस्यापि प्रसिद्धत्वात्। विशिष्टताकानुभवसिद्धा षट्पदार्थव्यतिरेकिण्या भावविशेषा एव प्रमेयत्वादिवत्। द्वित्वमेकत्वान्तरसहितं त्रित्वजनकम्। त्रित्वमेक-त्वान्तरसहितं चतुष्टयजनकं चेति। द्वित्वे चतुष्कजनके इत्यादिकं न स्यादिति चेत्—साधकप्रमाणाभावादित्यवेहि।

द्वित्वादिकमनेकसंख्याजनकं संख्यात्वादेकत्ववदिति चेत्—न, एकत्वान्तरान-नुसन्धानदशायां त्रित्वादिकमनुत्पाद्य नष्टेषु द्वित्वादिषु व्यभिचारात्। आश्रय-विनाशविनष्टद्वित्वादिषु व्यभिचाराच्च। भवन्मते परार्धसंख्यायां व्यभिचाराच्च। तेषामपि धर्मित्वे बाधाच्च। द्वित्वादिकं नानेकसंख्याजनकमनेकसंख्यात्वात्, आश्रयविनाशविनष्टद्वित्वादिवदिति सत्प्रतिपक्षाच्च। त्रित्वादिकं नानेकसंख्याजन्यं संख्यात्वात् एकत्ववदित्यनुमानाच्च।

किं चानेकसंख्याकारणत्वं किमनेकसंख्यासमवायिकारणत्वम्, अनेकसंख्या-कारणत्वं वा? नाद्यः, एकत्वेन सोपाधित्वात्। न द्वितीयः, अनेकगुणस्वभावेनैव सोपाधित्वात्। त्रित्वादीनां द्वित्वादिजन्यत्वे नियतहेतुत्वप्रसङ्गाच्च। घटपटद्वित्वे घटपटैकत्वज्ञानमपेक्षाबुद्धिः घटपटद्वित्वे च घटपटस्तम्भैकत्वज्ञानमपेक्षाबुद्धिः घट-पटद्वित्वस्तम्भैकत्वज्ञानं वा घटपटस्तम्भकुड्यचतुष्केष्वधिकत्वात्। घटपटस्तम्भ-कुड्येष्वेकत्वज्ञानमपेक्षाबुद्धिः घटपटस्तम्भत्रिकुड्यैकत्वज्ञानं वा घटपटद्वित्वस्तम्भ-कुड्यद्वित्वज्ञानं वेति।

न च नियतहेतुकत्वं त्रित्वादौ जातिभेदस्वीकारात्। अन्यथा दश पञ्च पञ्चदशे-त्यादिगणितव्यवहारविलोपप्रसङ्गात्। यत्र ……………प्राचीनैकत्वचक्षुरादिसन्नि-कर्षविरहादशेषैकत्वगोचरमेकं ज्ञानं न जायते, जायते च शतमित्यबाधितं ज्ञानं तत्र

नवतिसंख्यासहितैकत्वान्तरज्ञानमपेक्षाबुद्धिः, अन्त्यैक[त्वानुभव]जनितसंस्कारानन्तरं सकलत्वविषयं स्मरणं वा प्रकारान्तरासंभवात्। अन्त्यैकत्वानुभवतदनन्तरोत्पन्नप्राचीनैकत्वस्मरणाभ्यां शतसंख्योत्पत्तिरिति तु न युक्तम्, प्राचीनैकत्वस्मरणेन शतसंख्योत्पत्तिक्षणेऽन्त्यानुभवैकत्वानुभवनाशात्। अन्त्यैकत्वानुभवनाशेन च शतसंख्यात्वसामान्यज्ञानक्षणे शतसंख्यानाशात् तदनन्तरक्षणे शतमिति ज्ञानानुत्पत्तिप्रसङ्गात्। प्राचीनैकत्वाभावजनितसंस्कारान्त्यैकत्वसन्निकृष्टेन्द्रियाभ्यामशेषैकत्वगोचरं ग्रहणस्मरणात्मकं ज्ञानं शतसंख्योत्पादकं जायत इति चेत्—न, ग्रहणत्वप्रमितौ ग्रहणत्वेनैव स्मृतित्वाभावानुमानात्। स्मृतित्वप्रमितौ च स्मृतित्वेनैव ग्रहणत्वाभावानुमानादिति।

अन्त्यैकत्वानुभवानन्तरमशेषैकत्वगोचरमनुव्यवसायात्मकं साक्षात्कारिमानसज्ञानमुत्पन्नं शतसंख्योत्पादकमिति **आत्रेयाचार्याः**। तन्न, तादृशज्ञाने प्रमाणाभावात्। शतसंख्यायाश्चोक्तप्रकारेणाभ्युपपत्तेः। मनसो बहिरस्वातन्त्र्याच्च। शतसंख्याज्ञानं च घटादौ चाक्षुषमेव। न चाशेषशतसंख्याश्रयत्वं सन्निकर्षाभावात् कथं चक्षुषा शतसंख्याज्ञानं जन्य[ते] इति वाच्यम्। एकाश्रयसन्निकर्षेणापि जातिवत्। तत एव ग्रहणोपपत्तेः। शतमित्यनुभवस्या[न]पह्नवत्वात्। एवं परार्धादिसंख्यास्वपीति।

ननु पृथक्त्वमनेकेषां धर्म इति न युक्तम्। पृथक्त्वे प्रमाणाभावात्। पृथगिति प्रत्यक्षं प्रमाणमिति चेत्—न, तस्यान्योन्याभावावलम्बनत्वात्। पृथक्त्वमेव विनिरूप्यम्। अयमस्मात् पृथगित्येव, अवधौ पञ्चमीप्रयोगात्। अन्योन्याभावस्तु नावधिनिरूप्यः। अयमयं नेत्यत्रापि पञ्चमीप्रसङ्गादिति चेत्—न, अयमस्मादन्यः, अयमस्माद् भिन्न इत्यादावन्योन्याभावस्यापि अवधिनिरूप्यत्वात्। अन्यभिन्नादिशब्दा अपि पृथक्त्ववाचिन एवेति चेत्—न, पृथक्त्वाभावेऽपि रूपाद् रसो भिन्नः, अन्य इत्यादिप्रयोगात्। [प्रसादौ] रसादौ पृथक्त्वारोपात् भिन्नादिपदप्रयोग इति चेत्—न, बाधकाभावात्। पृथक्त्वं न तु गुणवर्ति गुणत्वात् रूपवदिति बाधकमिति चेत्—न, पृथक्त्वस्य गुणत्वासिद्धेः। अन्यादिशब्दानामन्योन्याभावव्यापकत्वे अयमस्मादन्य इत्यादि पञ्चमीप्रयोगो न स्यात्, तस्यावधिनिरूप्यत्वाभावादिति चेत्—न, तस्याप्यवधिनिरूप्यत्वात्। तर्हि नायमयमित्यत्रापि पञ्चमीप्रसङ्ग इति चेत्—न, अत्र सतोप्यवधित्वस्याविवक्षितत्वात्। अवधित्वविवक्षायां पञ्चमीप्रसङ्ग इति चेत्—न, अयमयं न इत्येतावतैवान्योन्याभावप्रतीत्युपपत्तौ निष्प्रयोजनावधित्वविवक्षासंभवात्। अवधित्वविवक्षायां पृथगादिपदप्रयोगेऽपि पञ्चमी न स्यादिति चेत्—न, सत्त्वं(?)घटः पृथगित्यादिप्रयोगदर्शनात् पृथक्त्वस्याप्यवधिनिरूप्यत्वाभावाच्च।

घटादीनामवधिनिरूप्यत्वे प्रमाणाभावात् पटाद् घटः पृथगिति पञ्चम्येवावधित्वप्रमाणमिति चेत्—न, तस्याः पृथगन्यभिन्नाद्युपपदत्वलाभादन्योऽन्याभावप्रतियोगिन्युदयसंभवात्। न चैवं घटः पटो नेत्यत्रापि पञ्चमीप्रसङ्गोऽन्योन्याभावप्रतियोगित्वसंभवेऽपि पृथगन्याद्युपपदाभावात् नञश्च **पाणिनिशा[कटा]यनादिभिरुप**पादितत्वानभिधानात् अन्यतरादितरतल्लक्षणकत्वात् अन्यपदपर्यायोपलक्षणत्वात् मय्यपीदमुपलक्षणमस्तीति चेत् ? घटः पटो नेत्यत्रापि पञ्चमीप्रसङ्गात्। इतरवदनारम्भप्रसङ्गाच्च। तस्याप्यन्यपदपर्यायत्वात्। तत्सदृशवाचकमितरपदं नत्वन्यपदपर्याय इति चेत्—न, प्रमाणाभावात्। इतरपदानारम्भ एव तत्र प्रमाणमिति चेत्—न, तस्येतरपदायोगे पञ्चमीप्राप्तर्थत्वात्। उपपदविभक्तित्वे पञ्चमी निरर्थिका स्यादिति चेत्—न, अन्योन्याभावप्रतियोगित्वेनार्थवत्त्वात्। पृथगन्यभिन्नादिपदानां पञ्चमीप्रयोजकत्वे गौरवप्रसङ्गात् अवधित्वं कल्प्यत इति चेत्—न, क्लृप्तोपपदमहिम्नैव पञ्चम्युपपत्ताववधित्वकल्पनस्यैव गरीयस्त्वात्। अन्यथा सकलोपपदविभक्तिविलयप्रसङ्गात्। न तत्राप्यवधित्ववदर्थान्तरकल्पनोपपत्तेरवश्यं वास्या उपपदविभक्तित्वमङ्गीकर्तव्यम्। अन्यथा



अन्यारादितरर्त

इति **सूत्रानारम्भप्रसङ्गात्** अवधौ पञ्चमीविधानादेव घटादन्यः पट इत्यादावपि पञ्चमीप्राप्तेरवधित्वस्य निर्वक्तुमशक्यत्वाच्च। निरूपकत्वमेवावधित्वमिति चेत्—न, घट[:] पटो नेत्यत्रापि पञ्चमीप्रसङ्गात्। पटादेरपि घटनिष्ठान्योन्याभावनिरूपकत्वान्योन्याभावप्रतियोगित्वरहितत्वे सति निरूपकत्वमेवावधित्वमिति चेत्—न, एवंविधस्यासंभवात्। यस्य कस्यापि कुतः ? कुतश्चित् अन्यत्वेनान्योन्याभावप्रतियोगित्वेन तद्रहितत्वानुपपत्तेः। घटात् पटः पृथगित्यादौ पञ्चम्यनुदयप्रसङ्गाच्च घटादीनामन्योन्याभावप्रतियोगित्वेन तद्रहिताभ्यामसंभवात्। पृथक्त्वं निरूपकत्वमवधित्वमिति चेत्—न, तस्याप्यनिरूपणात्। किं च पटाद्यत्रापि(?)पञ्चमीप्रसङ्गात्, पटादेरपृथक्त्वनिरूपकत्वात्। अन्यथा पटात् घटः पृथगित्यत्रापि पञ्चम्यनुदयप्रसङ्गात्। अयमस्मात् पर इत्यादौ पञ्चम्यनुदयप्रसङ्गाच्च। पृथक्त्वनिरूपकस्याप्रतिपादनात् पृथक्त्वेनावधिनिरूपणम्, अवधिना च पृथक्त्वनिरूपणमिति परस्पराश्रयप्रसङ्गाच्च। गुणनिरूपकत्वमवधित्वमिति चेत्—न, घटः पटो नेत्यत्रापि पञ्चमीप्रसङ्गात्। घटादेरपि पृथक्त्वपरत्वादिगुणनिरूपकत्वात्, घटत्वात् परा सत्तेत्यादौ पञ्चम्यनुदयप्रसङ्गाच्च। अपादानत्वमवधित्वमिति चेत्—न, तस्याप्यनिरूपणात्।

किं च पटादिनिष्ठावधित्वाङ्गीकारेऽन्योन्याभावस्यापि अवधिनिरूप्यत्वात् पटादिना अवधिना अन्योन्याभावनिरूपणात् पटादिनिष्ठावधित्वाङ्गीकारे च पृथक्त्वस्यापि अवधिनिरूप्यत्वासंभवात् पटादीनामवधित्वाभावात्। पटादिनिष्ठेनावधिना पृथक्त्वं निरूप्यते न त्वन्योन्याभाव इति चेत्—न, पटादिनिष्ठत्वावधित्वनिरूप्यत्वयोरपि निष्प्रमाणकत्वात्। एतेन पृथक्त्वमन्योन्याभावाद् भिद्यते। भावो वा गुणो वावधिनिरूप्यत्वात् परत्ववदित्यनुमानमपि निरस्तम्। पृथक्त्वमन्योन्याभावः पृथक्त्वात्, न यदेवं न तदेवम्। यथा घटः घटपृथक्त्वघटान्योन्याभावः..............

अन्योन्याभावत्वात्। न यदेवं न तदेवं यथा घटः। घटान्योन्याभावः पटपृथक्त्वं घटान्योन्याभावत्वात्। न यदेवं न तदेवं यथा घटः इत्यादि व्यतिरेकि.............. अन्योन्याभावपृथक्त्वादीनां सुप्रसिद्धत्वात्। तद्भिन्नाभावत्वस्यापि सुप्रसिद्धत्वाच्च।

तस्मात् नास्ति पृथक्त्वं प्रमाणाभावादिति। तदयुक्तम्, विकल्पासहत्वात्। तथा हि किं पृथक्त्वे प्रमाणाभा.........अन्योन्याभावव्यतिरेकत्वे वा? नाद्यः, पटाद् घटः पृथगित्यादिप्रत्यक्षस्यैव सत्त्वात्। न द्वितीयः, पटपृथक्त्वं न पटान्योन्याभावः पृथक्त्वात् घटपृथक्त्वादौ सत्त्वात्। न च पटपृथक्त्वं पटान्योन्याभावः पटपृथक्त्वात्। न यदेवं न तदेवम् यथा घट इति व्यतिरेकिणा सत्प्रतिपक्षत्वम्, अगुणवत्त्वेन सोपाधित्वात्। न चास्य साधनव्यापकत्वं घटपृथक्त्वस्यासाधारणत्वेन गुणाभावसाधकत्वात्। रूपादेर्गुणादिवत्, कर्मादेरगुणादपि व्यावृत्तत्वात्। न चास्य च पक्षेतरत्वम्, पटान्योन्याभावत्वरहिताद् रूपादेर्विपक्षादपि व्यावृत्तत्वात्। न चास्य साध्यव्यापकत्वम्, पटान्योन्याभावत्वस्य गुणत्वाभावव्याप्यत्वनिश्चयात्। गुणत्वाभावस्य पटान्योन्याभावत्वव्यापकत्वनिश्चयात् पटः पटपृथक्त्वव्यतिरिक्तान्योन्याभावप्रतियोगी मेयत्वात् पटवदिति सिद्धत्वात्। पटान्योन्याभावात् सपक्षादपि व्यावृत्तत्वेन पटपृथक्त्वस्यासाधारणत्वाच्च। किं पटपृथक्त्वशब्देन पटान्योन्याभावविषयाणां सिद्धसाधनात्। गुणविशेषविवक्षायां च तवाश्रयासिद्धेः। सिद्धौ वा धर्मिग्राहकप्रमाणा(?)बाधात् पृथक्प्रतीतिसिद्धस्य धर्मित्वमिति चेत् न, घटनिष्ठरूपादीनामपि इन्द्रियसन्निकृष्टानां पृथक्प्रतीतिविषयाणां धर्मित्वे बाधात्। घटतन्निष्ठरूपादिव्यतिरिक्तस्य घटात् पटः पृथगिति प्रतीतिविषयस्य धर्मित्वमिति चेत्--न, **भवन्मते** पटान्योन्याभावस्यैव घटतन्निष्ठरूपादिव्यतिरिक्तस्य पटाद् घटः पृथगिति प्रतीतिविषयत्वात् **अस्मन्मते**ऽपि पटान्योन्याभावस्येन्द्रियसन्निकृष्टस्य पटाद् घटः पृथगिति प्रतीतिविषयत्वात्। तस्य च धर्मित्वे सिद्धसाधनात्। घटतन्निष्ठरूपादि पटान्योन्याभावव्यतिरिक्तस्य पटाद् घटः पृथगिति प्रतीतिविषयस्य च धर्मित्वे बाधात्, तवाश्रयासिद्धेश्च। पृथक्पदवाच्यस्य धर्मित्वमिति चेत्--न, पृथक्त्वपदेन पृथक्त्वविशिष्टद्रव्यवाचिना पृथक्त्ववैशिष्ट्यद्रव्ययोरप्यभिधानात्। तयोश्च धर्मित्वबाधात् पृथक्त्वशब्दवाच्यस्य धर्मित्वमिति चेत्--न, **भवन्मते** अन्योन्याभावस्यैव पृथक्त्वशब्दवाच्यत्वात्। **अस्मन्मते** च गुणविशेषवदन्योन्याभावस्यापि पृथक्त्वपदवाच्यत्वात्। पृथक्पदस्यानेकार्थत्वस्वीकारात्। तस्य च धर्मित्वे सिद्धसाधनात्। अन्योन्याभावव्यतिरिक्तस्य पृथक्पदवाच्यस्य धर्मित्वमिति चेत्--न, तस्यान्योन्याभावत्वसाधने बाधादिति पटान्योन्याभावे न पटपृथक्त्वमभावत्वात् संप्रतिपन्नवदिति प्रतिषेधाच्च।

पटान्योन्याभावः पटपृथक्त्वम्, पटान्योन्याभावत्वात् न यदेवं न तदेवम्, यथा घट इत्यादिना व्यतिरेकिणा सत्प्रतिपक्षत्वमिति चेत्--न, अस्य विशेषविरुद्धत्वात्। हेतुविशेषस्याभावत्वस्य साध्याभावव्याप्तत्वेन साध्यविरुद्धत्वात्। विशेष्यासिद्धवत्



विरुद्धस्यापि दूषणत्वात्। विशेष्यविरुद्धस्यादूषणत्वे च विरुद्धान्तरस्याप्यदूषणत्वप्रसङ्गो न्यायस्य तुल्यत्वात्। घटः पटपृथक्त्वातिरिक्तान्योन्याभावप्रतियोग मेयत्वात् घटवदिति सिद्धे पटपृथक्त्वभिन्ने पटान्योन्याभावे पटान्योन्याभावस्य गतत्वेन विरुद्धत्वाच्च। पटपृथक्त्वशब्देन पटान्योन्याभावविवक्षायां सिद्धसाधनात्। गुणविशेषविवक्षायां च बाधात् पृथक्प्रतीतिसिद्धपृथक्त्वशब्दवाच्यविवक्षायां च पूर्वोक्तदोषात्। एतेन पृथक्त्वमन्योन्याभावः पृथक्त्वात्। अन्योन्याभावः, पृथक्त्वमन्योन्याभावत्वादिति व्यतिरेकिणौ निरस्ताविति।

पटपृथक्त्वं न पटान्योन्याभाव इत्यादि भवदीयानुमानेऽपि पृथक्त्वशब्देनान्योन्याभावविवक्षायां गुणविशेषविवक्षायां चाश्रयासिद्ध्यादिरिति चेत्--न, **अस्माभिर्**गुणविशेषस्य वक्ष्यमाणन्यायेन साधनादिभिः पटः पटपृथक्त्वव्यतिरिक्तपटनिष्ठत्वरहितभावाश्रयः द्रव्यत्वात् घटवदित्यादिना पटपृथक्त्वस्य भावत्वसिद्धेश्च।

न च तृतीयः। अयं घटः पृथक्त्वातिरिक्तघटनिष्ठत्वरहितगुणाधिकरणं वा पृथक्त्वातिरिक्त एतन्निष्ठत्वरहितगुणाधिकरणं वा पटपृथक्त्वातिरिक्तैतन्निष्ठत्वरहितगुणाधिकरणं वा द्रव्यत्वात् गुणत्वात् समवायिकारणत्वात् च पटवदित्यादिना पटपृथक्त्वादेः गुणत्वसिद्धेरनुमानाच्च पृथक्त्वगुणसिद्धेः। तथा च पृथिवी रूपरसगन्धस्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारव्यतिरिक्तगुणाधिकरणं द्रव्यत्वात्, आत्मवत्। द्रव्यत्वरहितपृथिवीपक्षीकरणे च द्रव्यत्वातिरिक्तविशेषणं नोपादेयमेव द्रव्यत्वेन सिद्धसाधनार्थान्तरयोरसंभवात्। न चात्रात्मत्वमुपाधिः, आकाशे साध्यव्यापकत्वभङ्गप्रसङ्गात्। नापि सर्वगतत्वपरममहत्त्वे उदके साध्यव्यापकत्वभङ्गात्। तत्र रूपादिव्यतिरिक्तस्य स्नेहस्य सत्त्वात्। नाप्यपृथिवीत्वमुपाधिः पक्षेतरत्वात्। न चास्य कालादौ व्यभिचारः। तेषां चैवासिद्धपृथक्त्वसंभवेन पक्षतुल्यत्वात्। न चात्र प्रतिपक्षसंभवः द्रव्यत्वादिना सोपाधित्वात्। उदकं रूपरसगन्धस्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारातिरिक्तगुणधिकरणमात्मवत्। तेजो रूपस्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारातिरिक्तगुणाधिकरणं गुणत्वादात्मवत्। रसरहिततेजः पक्षीकरणे तु द्रवत्वातिरिक्तविशेषणं नोपादेयमेव। वायुः स्पर्शसंख्यापरिमाणसंयोगविभागपरत्वापरत्वसंस्कारातिरिक्तगुणाधिकरणं गुणत्वादात्मवत्। न चात्र गन्धेनार्थान्तरता, वायो रूपत्वादिना (?) गन्धाभावसिद्धेः, तन्निरासार्थं गन्धव्यतिरिक्तत्वस्य विशेषणस्य चोपादानात्। आकाशं शब्दसंख्यापरिमाणसंयोगविभागातिरिक्तगुणाधिकरणं द्रव[्य]त्वात् आत्मवत्। दिक्कालौ संख्यापरिमाणसंयोगविभागातिरिक्तगुणाधिकरणं द्रव्यत्वादात्मवत्। आत्मा बुद्धिसुखदुःखे[च्छा]द्वेषप्रयत्नधर्माधर्मभावनासंख्यापरिमाणसंयोगविभागातिरिक्तगुणाधिकरणं द्रव्यत्वादुदकवत्। न चात्र स्पर्शवत्त्वमुपाधिः, गगने साध्यव्यापकत्वभङ्गात्। अद्रव्यानां गुणिनामपि

मूर्तत्वं तत एव नापि कार्यत्वम्। तत एव परमाणुषु साध्यव्यापकत्वभङ्गाच्च। मनः संख्यापरिमाणसंयोगविभागपरत्वापरत्वसंस्कार·······धिकरणं द्रव्यत्वात्। ··············वत्। न चात्र विशेषगुणवत्त्वमुपाधिः, पक्षेतरत्वात्। विशेषपदस्य व्यावर्त्यविशेषाभावात्। अद्रव्याणां गुणत्वेनैव व्यावृत्तत्वात्, मनसश्च पक्षतुल्यत्वात्। दिक्कालयोश्च पक्षतुल्य[त्वात्··············] साधकानुमाने द्विष्ठत्वविशेषणोपादानेन तेभ्य एव तत्सिद्धेः। आकाशं शब्दसंख्यातिरिक्ताद्विष्ठगुणाधिकरणं द्रव्यत्वात् घटवत्, दिक्कालसंख्यातिरिक्ताद्विष्ठगुणाधिकरणत्वादेः सत्त्वात्।

नन्वस्तु पृथक्त्वम्, द्विपृथक्त्वं तु न सिध्यति प्रमाणाभावात्। द्वौ पृथगिति प्रत्यक्षं प्रमाणमिति चेत्—न, तस्य द्वित्वसहितैकत्वपृथक्त्वाभ्यामेवोपपत्तेः। अन्यथा द्विपरत्वद्विशुक्लत्वद्विमधुरत्वादेरप्यापत्तेः। द्वौ परौ द्वौ शुक्लौ द्वौ मधुरावित्यादेः प्रत्यक्षस्य दुर्वारत्वात्। न च द्विपरत्वाङ्गीकारः तत्रैवैष परत्वापरत्वादिजातिसमावेशापत्तेः एकस्येषत्परत्वादितरस्य परतरपरत्वादिति वाच्यम्। ईषत्परत्वपरतरत्वयोरेकैकतन्निष्ठपरत्वाश्रितयोर्द्विपरत्वयोर्द्विपरत्वनिष्ठत्वाङ्गीकारात्। तत्रैवेषत्परत्वापरत्वादिजातिसमावेशापत्तेः। एकस्येषत्परत्वादितरस्य परतरपरत्वादिति वाच्यम्, ईषत्परत्वपरतरत्वयोरेकैकतन्निष्ठपरत्वाश्रितयोः द्विपरत्वयोर्द्विपरत्वनिष्ठत्वाङ्गीकारात्, जातिसंकरस्य चादूषणत्वात्।

न च माभूत् द्विपृथक्त्वादिकमिति वाच्यम्। एकपृथक्त्वस्यानेकद्रव्यसमानधर्मत्वानुपपत्तेः। **सूत्रकारेण** च पृथक्त्वस्यानेकद्रव्यानेकद्रव्यधर्मत्वप्रतिपादनादिति। तदयुक्तम्, अनुमानादनेकपृथक्त्वादिसिद्धेः। तथा च अयं घटः संयोगत्वविभागत्वसंख्यात्वरहितानेतन्निष्ठगुणाधिकरणं द्रव्यत्वात् पटवत्। अयं घटः अनेतन्निष्ठपृथक्त्वाधिकरणं द्रव्यत्वात् कालवदिति। न चात्र कालत्वमुपाधिः। कालः कालनिष्ठः द्रव्यत्वात् पटवदिति सिद्धेः। कालपृथक्त्ववत्यकाले साध्यव्यापकत्वभङ्गात्। न चात्र कालत्वमुपाधिः, पक्षेतरत्वादिति। संख्यात्वं कालमात्रनिष्ठकालाकालनिष्ठगुणत्वावान्तरजात्यन्यत्, मेयत्वात् पटवदित्येकानेकपृथक्त्वसिद्धेश्च। न चैवं द्विपृथक्त्वाद्यसिद्धिः। उक्तसाध्येष्वेव बहुवृत्तित्वरहितविशेषणोपादानेन तत्सिद्धेः। अयं घट एतन्निष्ठसंयोगत्वविभागत्वसंख्यात्वरहितद्विमात्रनिष्ठगुणाधिकरणं द्रव्यत्वात् घटवदित्यादिना त्रिपृथक्त्वाधिकपृथक्त्वसिद्धेः।

न चैवं पृथक्त्वाद्यसिद्धिः, उक्तसाध्येष्वेव बहुवृत्तित्वरहितविशेषणोपादानेन तत्सिद्धेः। अयं घट एतन्निष्ठसंख्यात्वरहितत्रिमात्रवृत्तिगुणाधिकरणं द्रव्यत्वात् पटवदित्यादिना··············पृथक्त्वासिद्धेः। न च दृष्टान्तस्य साध्यविकलत्वम्। एतद्घटनिष्ठत्वरहितस्य स्तम्भकुडचपरवृत्तित्वादेः पटेऽपि सत्त्वात्। न च द्विपरत्वादि प्रतिबन्दी, तत्र मानाभावात्। द्वौ पराविति प्रत्यक्षस्य द्वित्वसमानाधिकरण्यैकपरत्वाभ्यामन्यथासिद्धत्वात्। अयं घटोऽनेतन्निष्ठपरत्वाधिकरणं परत्वाधिकरणत्वात्



पटवदित्यादेः **भूषणादीनाम**प्रसिद्धविशेषणत्वात् स्वरूपासिद्धत्वाच्च। परत्वासिद्धावनेतन्निष्ठपरत्वाधिकरणत्वादेरसिद्धेः। **वैशेषिकाणां** च व्याप्यत्वासिद्धत्वात्। पटेऽनेतन्निष्ठपरत्वाभावादीनां परत्वाधिकरणत्वस्यानेतन्निष्ठपरत्वाधिकरणेन व्याप्त्यभावात्, भावे वा पटेऽनेतन्निष्ठपरत्वस्य दुर्वारत्वात्। तत्साधने चापसिद्धान्तात्, बाधाच्च। व्याप्त्यभावमभ्युपगच्छता तत्साधकप्रमाणाभ्युपगमात्। घटेऽनेतन्निष्ठपरत्वसाधनेऽप्यपसिद्धान्तबाधयोस्तदवस्थत्वात्। वृत्तिपरत्वाव्यावृत्तत्वात् सत्तावत् इत्यादेः **भूषणादीनाम्** आश्रयासिद्धत्वात्। ··············व्याप्त्यभावात्। अनेकवृत्तिपरत्वाभाववदसत्त्वे परत्वाव्यावृत्तत्वस्यानेतन्निष्ठवृत्तित्वेन व्याप्तेरभावात्। भावे वा अनेकपरत्वस्य दुर्वारत्वात्। तत्साधने बा·········न्ताच्चेति।

न च पृथक्त्वे कारणानुपपत्तिर्बाधिका घटादिनिष्ठैकपृथक्त्वे घटादीनां समवायिकारणत्वात्। घटपटैकपृथक्त्वगोचरबुद्धेश्च निमित्तकारणत्वात्। घटपटस्तम्भत्रिपृथक्त्वादिषु च घटपटस्तम्भ·········पृथक्त्वगोचरबुद्धीनां समवाय्यसमवायिनिमित्तकारणत्वात् **ईश्वरादृष्टादीनां** च सर्वत्र निमित्तकारणत्वात्। न चात्र प्रमाणाभावः, संख्यासमानन्यायसिद्धत्वादिति चेत्—न, संयोगे प्रमाणाभावात्। संयुक्ताविति प्रत्यक्ष·········त्वात्। न चेदमविरलदेशोत्पादनान्यथासिद्धम्, संयोगातिरिक्तस्याविरलदेशोत्पादस्य निर्वक्तुमशक्यत्वात्।

न च विभागाभाव एवं संयुक्तप्रत्ययविषय इति युक्तम्। घटपटसंयोगौ घटपटविभागाभावः संयोगत्वसंयोगवत्। विभागाभावो न संयोगः, अभावत्वात् घटाभाववदित्यादिना प्रतिषेधात्। रूपरसादौ सत्यपि विभागाभावे संयुक्तप्रत्ययानुदयाच्च। विभागध्वंसः संयुक्तप्रत्ययालम्बनमिति चेत्—न, सत्यपि प्राचीनविभागप्रध्वंसेऽपि भागान्तरवति संयुक्तप्रत्ययानुदयात् यावदुपपन्नविभागध्वंसाः संयुक्तप्रत्ययालम्बनमिति चेत्—न, यावदुत्पन्नघटपटविभागानुभवरहितानामपि घटपटौ संयुक्ताविति प्रत्ययोदयात्। असत्यपि विभागध्वंसे उत्पन्नमात्रपट इत्यादौ संयोगप्रत्ययाच्च। तत्रेदं हेत्वभावेन संयोगात् पूर्वं विभागानुत्पत्तेः। अनुत्पन्नस्य ध्वंसासंभवात्। भेर्याकाशभेरीदण्डसंयोगयोरसमवायिकारणनिमित्तकारणयोरसंभवात् भेरीशब्दादेरनुदयप्रसङ्गाच्चेति।

ननु विभागे किं प्रमाणम्? विभक्ताविति प्रत्यक्षमिति चेत्—न, तस्य संयोगाभावालम्बनत्वात्। न चैवं तन्तुप्रतीतावपि विभक्तप्रत्ययप्रसङ्गः, तत्र संयोगाभावस्याप्रतीतेः। प्रतीतौ वा विभक्तप्रत्ययस्याप्यङ्गीकारात्। संयोगध्वंसस्य पटविभागप्रत्ययानालम्बनत्वात्। न चैवं घटविनाशात् घटपटसंयोगविनाशे घटपटौ विभक्ताविति प्रत्ययप्रसङ्गः। तदालम्बनस्य घटस्याभावात्। अन्यथा घटपटौ ध्वंससंयोगाविति प्रत्ययप्रसङ्गात्। घटपटप्रतीतावपि संयोगध्वंशः प्रतीयत इति चेत्—तर्हि विभागोऽपि प्रतीयत एवेति सन्तोष्टव्यम्, विभागस्योभयनिष्ठत्वात्। घटाभावोऽप्रतीतिरिति

चेत् ? न, संयोगध्वंसस्यापि उभयनिष्ठत्वात् । ध्वंसस्य प्रतियोगिसमानदेशत्वात् प्रतियोगिनश्च संयोगस्योभयनिष्ठत्वादिति । विभक्ताविति प्रत्ययश्चास्य सिद्धेश्च विभ·········शब्दप्रयोगात् तत्सिद्धेरिति चेत्—न, तस्य संयोगध्वंसप्रतीतेरेवोपपत्तेः । एवं सति पृथक्त्वप्रतीतिरपि विधीयेत, पृथगिति व्यवहारस्यान्योन्याभावप्रतीतेरेवोपपत्तेरिति चेत् ? ततः किं पृथक्त्वविल··················नुमानात् तत्सिद्धेः । विभागेऽप्यनुमानं प्रमाणमिति चेत्—न, तस्यानिरूपणात् । वंशदलपाटनानन्तरं जायमानः शब्दोऽसमवायिकारणजन्यः भावकार्यत्वात्, कार्यगुणत्वात् शब्द·········· वंशदलाकाशसंयोगेनार्थान्तरग्रस्तत्वात् । अयं शब्दो न संयोगासमवायिकारणकः संयोगजन्यत्वात् शब्दजशब्दवदिति चेत् ? श्रूयमाणशब्दस्य धर्मित्वे सिद्धसाधनात् । तस्य·······धर्मित्वमिति चेत्—न, वंशदलविभागाभिधाने अस्मान् प्रत्याश्रया (?) न भेरीदण्डसंयोगजादिशब्दस्यापि धर्मित्वे बाधात् । शब्दसंयोगजन्यशब्दस्यापि धर्मित्वे आश्रयासिद्धेः । शब्दसंयोगाजन्यशब्दस्य **अस्माभिः**··········णात् । वंशदलपाटनजन्यशब्दस्य धर्मित्वमिति चेत्—न, वंशदलपाटनशब्देन वंशदलविभागाभिधाने अस्मान् प्रत्याश्रयासिद्धत्वात् । वंशदलविभागशब्दानङ्गीकारात् । वंशदलकर्माभिधाने चोभयैरप्याश्रयासिद्धेः······ ·······जन्यशब्दानङ्गीकारात् । वंशदलसंयोगध्वंसाभिधाने च वाश्रयासिद्धेः । विभागजं शब्दमिच्छता त्वया वंशदलसंयोगध्वंसस्य शब्दहेतुत्वानङ्गीकारात् । वंशदलपाटनानन्तरं श्रूयमाणशब्दसन्तानाद्यशब्दस्य धर्मित्वमिति चेत्—न, संयोगजशब्दसन्तानान्त्यशब्दस्यापि वंशदलपाटनानन्तरं श्रवणसंभवात् । तत्सन्तानाद्यशब्दस्य च धर्मित्वे बाधात् । संयोगाजन्यत्वं वंशदलपाटनानन्तरं श्रूयमाणशब्दसन्तानाद्यशब्दस्य च धर्मित्वे अस्मान् प्रत्याश्रयासिद्धेः संयोगजन्यत्वस्यास्मान् प्रति अपक्षधर्मत्वाच्च । तस्यास्माभिः वंशदलाकाशसंयोगजन्यत्वस्वीकारात् । निमित्तसंयोगाजन्यत्वं हेतुरिति चेत्—न, तस्याप्यसिद्धेः । प्रयत्नवदात्मवंशदलसंयोगादृष्टवदात्मवंशदलसंयोगादेरपि शब्दकारणत्वस्वीकारात् । मूर्तमात्रनिष्ठसंयोगाजन्यत्वं हेतुरिति चेत्—तस्याप्यसिद्धेः । वंशदलशब्दसञ्जातनिमित्तकारणपवनसंयोगस्याप्याद्यसन्ताननिमित्तपवनानभ्युपगमे शब्दसन्तानानुपरमप्रसङ्गात् । तदभ्युपगमे च वेगक्षयात् । पवनविरतौ शब्दान्तरानारम्भे शब्दसन्तानोपरमसंभवादिति शब्दजन्यशब्दत्वाभावेन सोपाधित्वाच्च ।

एतेनायं शब्दो न वंशदलाकाशसंयोगजन्यः शब्दत्वात् अन्यशब्दवदित्यादयः प्रयोगा निरस्ताः ।

वंशदलाभिघातजन्यवंशदलाकाशसंयोगजन्यशब्दव्यभिचाराच्च अयं वंशदलाकाशसंयोगो नैतच्छब्दजनकः संयोगत्वादन्यसंयोगवदिति चेत्—न, एतच्छब्दशब्देन श्रूयमाणशब्दविवक्षाया·········धनात् । शब्दाजन्यशब्दविवक्षायामपि सिद्धसाधनात् भेरीदण्डसंयोगजादीनामप्येतद्वंशदलाकाशसंयोगाजन्यत्वात् । शब्दसंयोगाजन्यशब्द-



विवक्षायां चाप्रसिद्धविशेषणत्वात् । शब्द··········जन्यशब्दाप्रसिद्धौ तज्जनकत्वाभावस्याप्रसिद्धेः वंशदलपाटनानन्तरं श्रूयमाणशब्दसन्तानाद्यशब्दविवक्षायां च सिद्धसाधनात् । वंशदलपाटनानन्तरं श्रूयमाणभेरीदण्डसंयोगशब्द·······शब्द·······वंशदलाकाशसंयोगस्याकारणत्वात् । वंशदण्डपाटनानन्तरं श्रूयमाणशब्दसन्तानाद्यशब्दसंयोगाजन्यशब्दविवक्षायां चाप्रसिद्धविशेषणत्वात् । एवंविधशब्दा··········त्वस्याप्यसिद्धेः । तस्मात् नास्ति विभाग इति ।

तदयुक्तम् । विभागसाधकानुमानसत्त्वात् । तथा हि द्रव्य[व]त्वरहिता पृथिवी, रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वसंस्कारसंयोगत्वरहितगुणाधिकरणं पृथिवीत्वात् द्रव्यत्वाच्च । द्रव्यत्वाधारपृथिवीवत् । न चात्र स्नेहशब्दबुद्ध्यादिभिरर्थान्तरता पृथिवीनिष्ठत्वेनैवास्य स्नेहशब्दबुद्ध्यादिव्यतिरेकसिद्धेः । न चानेकरूपत्वादिरहितगुणसिद्धावपि विभागासिद्धिः । रूपत्वादित्रयोविंशतिरहितगुणत्वस्यैव विभागलक्षणत्वात् । नाप्यनेन स्नेहशब्दत्वादिरहितत्वादिसिद्धेः विभागासिद्धिः । अनेन स्नेहत्वादिर्रहितासिद्धावपि यत्र स्नेहादिरहितत्वात् तत्र सिद्धेः तस्यैव विभागशब्दार्थत्वात् । स्नेहत्वादिरहितस्य च तल्लक्षणत्वात् । तस्य च मानान्तरादपि सिद्धाविष्टाभावात् स्नेहत्वादिबाधकरहितात् प्रकृतानुमानादेव रूपत्वादित्रयोविंशतिजातिरहितगुणासिद्धेः । न चात्र द्रव्यत्वमुपाधिः, आत्मनि साध्याव्यापकत्वात् । नाप्यात्मत्वमुपाधिः, गगने साध्याव्यापकत्वात् । नापि सर्वगतत्वमुपाधिः, उदके साध्याव्यापकत्वात् । नाप्यपृथिवीत्वमुपाधिः द्रव्यत्ववत्यां पृथिव्यां साध्याव्यापकत्वात् । नापि द्रव्यत्वपृथिवीव्यतिरिक्तत्वमुपाधिः, व्यावर्त्यविवक्षाभावेन पक्षेतरत्वात् ।

न चास्य सत्प्रतिपक्षत्वम्, अपेक्षेतरोपाधिविरहाणामुपाधिसाध्याव्यापकत्वस्थले व्यभिचारात् पक्षेतरोपाधिविरहस्य चासाधारणत्वात् । प्रतिपक्षान्तराणां वा द्रव्यत्वेन सोपाधित्वादिति [सां] सिद्धिकद्रवत्वरहितमुदकं रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वस्नेहसंस्कारसंयोगत्वरहितगुणाधिकरणमुदकत्वात् संप्रतिपन्नवत् द्रव्यत्वात् घटवत् । न च सांसिद्धिकद्रवत्वरहितोदकसिद्धिकराणां प्रत्यक्षसिद्धत्वात् । च चात्रानुदकत्वमुपाधिः । सांसिद्धिकद्रवत्ववति साध्याव्यापकत्वात् । उपाध्यन्तराणां च पूर्वोक्तन्यायेन निराकरणात् । तेजो रूपस्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वद्रवत्वसंस्कारसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वादात्मवत् । वायुः स्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वसंस्कारसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वादात्मवत् । आकाशं शब्दसंख्यापरिमाणपृथक्त्वसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वादात्मवत् ।

न चैवमादीनां दिक्कालयोः व्यभिचारः, तयोरप्युदकरूपोपपन्नविभागवत्तया समूह्यमानयोः पक्षतुल्यत्वादिति । दिक्काल[ौ] संख्यापरिमाणपृथक्त्वसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वादात्मवत् । आत्मा बुद्धिसुखदुःखेच्छा(द्वेष)प्रयत्नधर्माधर्मभावना-

संख्यापरिमाणपृथक्त्वसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वात् घटवत् । मनः परत्वापरत्ववेगसंख्यापरिमाणपृथक्त्वसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वाद् घटवत् । अयं घट एतन्निष्ठसंयोगत्वरहितकर्मजन्यद्विष्ठगुणाधिकरणं द्रव्यत्वाद् घटवत् । आकाशमाकाशनिष्ठसंयोगत्वरहितकर्मजन्यगुणाधिकरणं द्रव्यत्वाद् घटवत् ।

न चात्रोपाधिसंभवः । पूर्वोक्तादेव न्यायात् । इदं कर्मैतज्जन्यसंयोगत्वरहितद्विष्ठगुणजनकं कर्मत्वादन्यकर्मवत् । न चास्य..........द्रव्यकर्मणि व्यभिचारः । ..........पगमात् । संयोगत्वरहितकर्मजन्यद्विष्ठगुणान्यः एतदन्यः संयोगत्वरहितैतत्कर्मजन्यद्विष्ठगुणान्यो वा संयोगत्वात् ।

न चात्रोपाधिप्रतिपक्षसंभवः, केवला..........। यद् वा कालो रूपस्पर्शगन्धस्नेहद्रवत्वगुरुत्वपरत्वापरत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारसंख्यापरिमाणपृथक्त्वकालनिष्ठसंयोगत्वरहितगुणाधिकरणं द्रव्यत्वात् घटवदिति प्रयोक्तव्यम् ।

न चात्रार्थान्तरम् । गन्धो विंशतिजातिरहितगुणस्य घटादावप्रसिद्धत्वात् अप्रसिद्धविशेषणत्वम् । दृष्टान्तस्य च साध्यविकलत्वमिति वाच्यम् । रूपादिद्वाविंशतिकालनिष्ठसंयोगत्वरहितत्वविशष्टगुणस्य घटादिनिष्ठसंयोगत्वाभावेनैव सिद्धेः कालनिष्ठत्वभावव्याहतत्वात् ।

न च रूपत्वादित्रयोविंशतिजातिरहितगुणस्य घटादावप्रसिद्धत्वात् अप्रसिद्धविशेषणत्वं, दृष्टान्तस्य च साध्यविकलत्वमिति वाच्यम् । रूपत्वादिद्वाविंशतिकालनिष्ठसंयोगत्वरहितत्वविशिष्टगुणस्य घटादिनिष्ठसंयोगस्यैव घटादौ प्रसिद्धत्वादिति ।

न चैवं द्रवत्वरहिता पृथिवी रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वसंस्कारत्वसंयोगत्वविभागत्वरहितगुणाधिकरणं द्रव्यत्वादात्मवदित्यादिना रूपादिविभागान्तव्यतिरिक्तगुणसिद्धिप्रसङ्गः, अनुकूलकर्मविरहात् । तदसिद्धौ विभागादेरप्यप्रसिद्धिरिति न वाच्यम्, व्याघातस्योद्भूटत्वात् । रूपत्वादिरहितस्य विभागत्वरहितत्वानुपपत्तेः । विभागत्वरहितस्य च रूपत्वादिरहितत्वानुपपत्तेः । रूपत्वादिरहितगुणत्वस्य विभागलक्षणत्वात् विभागत्वजातिव्यवस्थापकत्वाच्चेति ।

नन्वेवं तर्हि विभागोऽपि न सिध्येत् । तत्साधकानां पृथक्त्वेनान्यथासिद्धत्वात् । रूपत्वादिरहितगुणत्वस्य पृथक्त्वलक्षणत्वोपपत्तेः, पृथक्त्वजातिव्यवस्थापकत्वाच्चेति । तन्न, रूपत्वादिरहितस्य गुणत्वस्य पृथक्त्वलक्षणत्वे विभागस्य पृथक्त्व एवान्तर्भावात् । बाह्यैकेन्द्रियग्राह्यत्वरहितगुणत्वस्य संख्यालक्षणत्वे परिमाणादीनामपि संख्यायामन्तर्भावात् । स्पर्शवदिन्द्रियग्राह्यत्वरहितगुणत्वस्य च शब्दलक्षणत्वे बुद्ध्यादीनामपि शब्देऽन्तर्भावात् । रूपत्वरहितगुणत्वस्य रसलक्षणत्वे च गन्धादीनामपि रस एवान्तर्भावात् । गुणत्वस्य च रूपलक्षणत्वे रसादीनामपि रूप एवान्तर्भावादिति ।



तर्हि गुणानां चतुर्विंशतित्वानुपपत्तिरिति चेत् -न, एवंविधपृथक्त्वादिलक्षणपक्षे गुणानाश्रयो विंशतित्वादिना चतुर्विंशतित्वानभ्युपगमात् । विभागादिव्यावृत्तपृथक्त्वादिलक्षणपक्षे चतुर्विंशतित्वस्य दुर्वारत्वादिति ॥ २४ ॥

ननु कर्माण्यनेकेषां समवायिकारणानां कार्यसामान्यं पटकर्मणः पटावयवतदवयवादिसमवेतत्वात् । अन्यथा चलति तेषामुत्तरदेशासंयोगानुत्पत्तेः तत्रापि कर्मकल्पनायामनन्तकल्पनापत्तेरित्याशङ्कापरिहारार्थं सूत्रम्—

## असमवायात् कार्यं कर्म न विद्यते ॥ १.१.२५ ॥

असमवायादित्यत्रानेकेष्विति शेषः । न तावत्पटकर्मणोऽनेकाश्रितत्वे प्रत्यक्षं प्रमाणम्, अननुभवात् । नाप्यनुमानम्, पटकर्म पटव्यतिरिक्तसमवेतं कर्मत्वात् घटकर्मवदित्यादीनां प्रत्यक्षबाधितत्वात् । पटश्चलतीति प्रत्यक्षेण पटकर्मणः पटमात्रनिष्ठत्वप्रतीतेः । अन्यथा पटरूपं पटव्यतिरिक्तसमवेतं रूपत्वात् घटरूपवदित्यादेरपि प्रसङ्गात् । नापि पटावयवादेरुत्तरदेशसंयोगानुपपत्तिः पटावयवादिकर्मणैवोपपत्तेः । न चानन्तकर्मकल्पनापत्तिः, प्रत्यक्षसिद्धत्वात् । अन्यथासिद्धोत्तरदेशसंयोगबलेन कल्पनायां चादोषत्वात् । कर्म नानेकसमवायिकारणजन्यम्, अनेकासमवेतत्वादिति साध्याविशिष्टतेति चेत्—न, साध्याविशिष्टत्वं किं साध्याभिन्नत्वं,..........तद्रहितत्वेऽपि जात्यादौ विद्यमानत्वात् । न द्वितीयः अनेकाश्रितत्वाभावस्य प्रत्यक्षसिद्धत्वात् । समवायत्वे सत्यनेकाश्रितस्य प्रत्यक्षसिद्धत्वात् । समवायवत्त्वे सत्यनेकाश्रितत्वस्यानेकसमवेतत्वशब्दार्थत्वात् । न चास्मिन् सूत्रे अनेकसमवेतत्वाभावेनानेकसमवायिकारणजन्यत्वा[नु]भावोऽनुमीयते । किं त्वनेकसमवायिकारणजन्यत्वमनेकसमवेतत्वगर्भम् । तच्च निष्प्रमाणकं प्रत्यक्षबाधितं चेति प्रतिपाद्यते । तेन साध्याविशिष्टत्वदोषा[ना]वकाश इति ।

एकद्रव्यमिति कर्मलक्षणसूत्रेणेदं गतार्थमिति चेत्—न, तस्यैव सूत्रसिद्धैकद्रव्यत्वादिविशिष्टलक्षणपरत्वात् । अत्र चैकद्रव्यत्वसमर्थनात् गतार्थत्वेन सूत्रभङ्गेऽप्यविरोधादिति ॥ २५ ॥

## संयोगानां द्रव्यम् ॥ १.१.२६ ॥

संयोगौ च संयोगाश्च संयोगाः । तेषां द्रव्यं कार्यं सामान्यम् । तथा च किञ्चिद्द्रव्यं द्वयोः संयोगयोः कार्यं यथा त्रितन्तुकं किञ्चित् बहूनां यथा पटः इति । द्वितन्तुकादिकं पुनरनेकेनैव संयोगेन जन्यत इति न संयोगयोः नापि संयोगानां समानं कार्यमिति ।

**आत्रेयाचार्यास्तु** पुनरेवमाहुः । तन्तुभ्यां द्वितन्तुकमारभ्यते । द्वितन्तुकतन्त्व[न्त]राभ्यां च त्रितन्तुकमिति त्रितन्तु[कमे]केनैव संयोगेन जन्यते । तथा प्रसारितेषु तन्तुष्वन्तरालप्रविष्टेन तन्तुना प्रथमं खण्डपट आरभ्यते । तदनन्तरं तेन तन्त्वन्तरेण खण्डपटान्तरमित्यनेन क्रमेण पटस्योत्पादात् पटोऽप्येकेनैव संयोगेनारभ्यत इति न

बहूनां संयोगानां द्रव्यमिति सूत्रं यथाश्रुतमनुपपन्नमेवेति पटावयवतदवयवनिष्ठाखण्डपटारम्भकसंयोगानां कारणकारणादीनामपि पूर्वभावित्वमात्रेण कारणत्वोपचारात् उपचारप्रवृत्त्या व्याख्येयमिति ।

तदनुपपन्नम् । त्र्यणुकस्य द्व्यणुकनिष्ठानेकसंयोगजन्यत्वात् । द्वाभ्यां त्र्यणुकाभ्यामेकद्रव्यमारभ्यते । न द्व्यणुकान्तरेण च त्र्यणुकमिति । त्र्यणुकमप्येकेनैव संयोगेन जन्यत इति चेत्—न, द्वाभ्यां आरब्धे त्र्यणुके महत्त्वाभावप्रसङ्गात् । कारणबहुत्वमहत्त्वप्रचयानामसंभवात् । पटे च खण्डपटानां समवायिकारणत्वाभावात् । तथा च खण्डपटो न पटसमवायिकारणम्, अतन्तुत्वात्, घटवदिति । न चास्य प्रत्यक्षबाधः, खण्डपटारब्धः पट इत्यननुभवात् । नापि पटारम्भकखण्डपटाभ्यां व्यभिचारः । तयोरपि पक्षतुल्यत्वात् । न च खण्डपटाभ्यामारब्धः पट इति प्रत्यक्षादेव खण्डपटयोः पटारम्भकत्वमिति वाच्यम्, तथाविधानुभवाभावात् । भावेऽपि वा तस्याप्रमाणत्वात् । पटस्य च तन्तुभ्य एवोपपत्तेः ।

न चात्र खण्डपटाभाव उपाधिः, व्यावर्त्यविवक्षाभावेन पक्षेतरत्वात् । तस्यापि खण्डपटस्य पटारम्भकत्वाभावात् । नापि खण्डपटत्वान्यतरत्वाभाव उपाधिः, पक्षे………खण्डपटान्यतमत्वस्य तन्तुखण्डपटव्यतिक्तत्वाभावात् । तदभावस्य च तन्तुखण्डपटव्यतिरिक्तत्वरूपत्वात् । खण्डपटव्यतिरिक्तस्य च पक्षमात्रव्यावृत्तस्य विपक्षादव्यावृत्तत्वात् । विपक्षादव्यावृत्तवत् [विपक्षा………वि]शेषणवतोऽपि पक्षेतरत्वात् । अन्यथा धूमादग्न्यनुमानवि………वहृदपर्वतान्यतरत्वाभावेन सोपाधित्वात् ।

न चास्य तन्तुपटान्यतरत्वादिना सत्प्रतिपक्षत्वं तन्तुत्वेन सोपाधित्वात् । अयं खण्डपटो नैतत्पटसमवायिकारणं खण्डपटत्वात् । अन्यखण्डपटः समवायिकारणकः पटत्वादन्यपटवदित्यनुमानाच्च । तस्मात् तन्तव एव संयोगसहिताः पटमारभन्त इति संयोगानां पटकार्यं सामान्यमिति । यत्र च युगपत् संयुक्तास्तन्तवस्तत्र त्रितन्तुकं चत्वारः पञ्च वा चतुस्तन्तुकादिकं द्रव्यमारभन्ते, उदयकर्मणीव संयोगम् । तत्रापि द्वयोः संयोगयोः संयोगसंयोगानां वा संयोगानां द्रव्यारम्भकत्वं विशेषाग्रहणात् । अन्यथा संयोगस्याप्युभयकर्मजत्वभङ्गात् । युगपत्संयोगो न जायत इति चेत्—न, कर्मणोरपि तुल्यत्वात् । तत्र युगपच्चलिताविति प्रत्यक्षं प्रमाणमिति चेत्—न, युगपत् तन्तवः संयुक्ता इति प्रत्यक्षस्य तुल्यत्वात् । बाधाभावस्योभयसमानत्वात् ।

तस्मात् संयोगौ संयोगाश्च द्रव्यमारभन्त इत्युपपन्नं सूत्रं—

संयोगानां द्रव्यम् ॥१.१.२६॥

इति । आद्यादितन्तवः खण्डपटानारभ्य पटमारभन्ते अनारभ्यैव वा ? नाद्यः, मूर्तानां समानदेशत्वप्रसङ्गात् । न द्वितीयः, खण्डपटप्रत्यक्षकारणत्वाच्च । समानजातीयसंयोगस्य द्रव्यारम्भकत्वनियमाच्चेति चेत्—न, मूर्तानां समानमूर्तदेशत्वस्य



क्वचित् द्रव्यप्रसिद्धस्यापादयितुमशक्यत्वात् । आपादकनिवृत्तेश्च आपाद्यप्रसिद्धौ तेन सहापादकस्य प्राप्तिग्रहणसंभवेन मूलशैथिल्याच्च अस्माभिः खण्डपटादीनां मूर्तानां समानदेशस्य इष्टत्वाच्च । तर्हि घटपटादीनामपि समानदेशत्वप्रसङ्ग इति चेत्—न, खण्ड[पट]पटादीनां समानदेशत्वस्य घटपटादीनां समानदेशत्वेनाव्याप्तत्वात् । खण्डपटादिसमानदेशत्वस्य भवतोऽप्रसिद्धत्वाच्च । अस्माभिश्च घटपटादिनां समानदेशस्येष्टत्वात् । एतस्मिन्नेव भूतले घटपटादीनां समावेशात् । घटावच्छिन्ने भूतले पटादिप्रध्वंस इति चेत्—न, इष्टत्वादेव घटवद्भिन्नभूतलात् पटादिमतो भूतलस्य भेदाभावात् । जगति भूतलस्यैकत्वात् यावति भूतले घटस्तावत्येव पटादिध्वंस इति चेत् – न, इष्टत्वादेव । घटावच्छिन्नं यावद्भूतलं तावत्पटादिमदिति संभवति भूतलस्याभावत्वादेव । यस्मिन् भूतलावयवे घटः, तत्रैव पटादिप्रसङ्ग इति चेत्—न, इष्टत्वादेव । यस्मिन् भूतलावयवे गृहादौ पटस्तत्रैव पटादिसमावेशात् घटमात्रसमावेशेऽपि तत्परिमाणवति पटादिप्रसङ्ग इति चेत्—न, तत्र घटादिमति पटादीनाम समावेशेऽपि भूतलादौ घट…………पटादीनां समावेशेन मूर्तत्वसमानदेशत्वयोः विरोधभङ्गस्य तदवस्थत्वात् । घटमात्रसमावेशोचितपरिमाणवति पटावयवतदवयवादीनां समावेशाच्च ।

मूर्तानां संयोगं प्रत्येकाश्रितत्वेऽप्येकसमवेतत्वं विरुद्धमिति चेत् – न, एकसमवेतत्वं किमेकेन समवायः ? समवायपक्षे सत्येकाश्रितत्वं वा ? नाद्यः, अनेकेषामप्यवयवानामेकावयविना समवायात् । न द्वितीयः, समवायवतां घटपटादीनामेकस्मिन् भूतले आश्रितत्वात् । घटादीनां भूसमवायो नास्तीति चेत् न, समवायैकत्वेन तस्यापि सत्त्वात् । वृक्षे शाखानां पटे तन्तूनां गवि विषाणयोः समवेतत्वात् । वृक्षादौ शाखादयो न समवेता इति चेत् – न, तत्समवायत्वे सति तदाश्रितत्वस्य तत्समवेतत्वस्य सत्त्वात् । वृक्षादयः शाखादिष्वाश्रिताः, न तु शाखादयो वृक्षादिष्विति चेत्—न, वृक्षे शाखाः पटे तन्तवो गवि विषाणे इति प्रत्यक्षस्य सत्त्वात् । शाखासु वृक्षो वृक्षे च शाखा इति परस्पराश्रय इति चेत् – न, उत्पत्तिज्ञप्तिप्रतिबन्धकत्वाभावे परस्पराश्रयस्यादूषणत्वात् ।

अस्तु वा तन्तूनां खण्डपटारम्भकत्वम् । तथापि न मूर्तानां समानदेशत्वप्रसङ्गः प्रेमा(?)भिघातसमुत्पन्नकर्मजविभागादारम्भकसंयोगविनाशात् पूर्वत्र निवृत्तौ पुनरुत्पन्नकर्मजन्यतन्तुसंयोगो पटारम्भात् । न चैवंविधकल्पनायां मानाभावः । मूर्तानां समानदेशत्वानुपपत्तेरेव तत्र प्रमाणाभावात् । अस्तु वा पूर्वं खण्डपटानुत्पत्तेरेव पटारम्भकत्वम् । अन्यथा भवन्मतेऽपि पटारम्भकखण्डपटान्यतन्तुसंयोगस्य द्रव्यान्तरारम्भकत्वप्रसङ्गात् । तेन मूर्तानां समानदेशत्वप्रसङ्गः । न चात्र प्रमाणाभावः, मूर्तानां समानदेशत्वानुपपत्तेरेव तत्र प्रमाणत्वात् । अन्त्यतन्तुव्यतिरिक्तैतत्पटजनकतन्तव एतदव्यवहितपूर्वक्षणे न कार्यद्रव्यवन्तः एतत्पटसमवायिकारणत्वात् अन्त्यतन्तुवदिति अनुमानाच्चेति ।

न चैवं खण्डपटप्रत्यक्षविरोधः, तस्य भावस्तत्त्वात्। नापि संयोगस्य द्रव्यानारम्भेऽनपेक्षकारणत्वम्। अन्त्यतन्तुसंयोगव्यतिरिक्तद्रव्यारम्भकसंयोगानां सापेक्षत्वात्।

तथा भवतीति सापेक्षेभ्योऽनपेक्षेभ्यश्च इति **सूत्रेण**। द्रव्यारम्भे वा संयोगस्य सापेक्षत्वानपेक्षत्वव्युत्पादनात् पूर्वं खण्डपटानुत्पत्तावन्त्यतन्त्वपेक्षणे च पटस्य विनाशात् न किञ्चिदुपलभ्येतेति चेत्—न, अवस्थिततन्तुसंयोगैः पटान्तरारम्भात्।

**अन्ये** तु यदि तन्तवः खण्डपटानारभ्य पटमारभन्ते तदाद्यतन्त्वपकर्षणात् तदारब्धकार्यपरम्परायाः पटयुक्ताया विनष्टत्वात् न किञ्चिदुपलभ्येत [इति] आरभ्यारम्भकवादे दूषणमाहुः। तदुक्तम्। आद्यतन्त्वारब्धकार्यपरम्पराया विनाशेऽपि द्वितीयादितन्त्वारब्धकार्यपरम्पराया अविनाशादवस्थितसंयोगेभ्यः पटान्तरोदयाच्च।

**अन्ये** तु कुसूला[दा]वारभ्यारम्भकभावस्य प्रत्यक्षसिद्धत्वात् पटादावपि तथैवाङ्गीकर्तव्यमित्याहुः। तदपि न युक्तम्। कुसूलादावारभ्यारम्भकभावस्य प्रत्यक्षेणानुपहासात् पूर्वोक्तन्यायविरोधाच्चेति। तस्मात् परस्परसंयुक्तास्तन्तव एव पटमारभन्त इति सिद्धं संयोगानां द्रव्यकार्यसामान्यमिति।

नन्वनुपपन्नमिदम् **तन्तुव्यतिरिक्तानां पटादीनाम् अवयवविनाम्** [अ]भावादिति **सौगताः**। तदयुक्तम्। पटाद्यवयविनां पटोऽयमिति [प्रत्यक्षसिद्धत्वात्।] न चात्र तन्त्वादय एव आलम्बनमिति युक्तम्। परस्परायुक्तेषु तन्त्वादिषु पट इति प्रत्यक्ष-[प्रसङ्गात्।‥‥‥परस्परासंयुक्तास्तन्तवः पट इत्यादिप्रत्यक्षालम्बनमिति चेत्—न, तन्तुवायवेमादिव्यापाराभावेन [यथाकथञ्चित्] संयुक्तादिषु तन्त्वादिषु पटोऽयमित्यादि प्रत्ययप्रसङ्गात्। तन्तुवायवेमादिव्यापाररहिताः परस्परसंयुक्ताः तन्त्वादयः पट इत्यादिप्रत्ययालम्बनमिति चेत्—न, तन्तुवायवेमादिव्यापाराभावेऽपि पट इत्यादिप्रत्ययोदयात् संस्थानविशेषवन्तः तन्तव (एव पट) इत्यादिप्रत्ययालम्बनमिति चेत्—न, संस्थानविशेषशब्देनावयवविविवक्षायामवयविसिद्धेः तन्त्वादिसंयोगविवक्षायां च पूर्वोक्तदोषात्। तथाभूतसंयोगसहिताः तन्त्वादयः पटादीनारभन्ते, तथाभूतसंयोगसहितास्तन्त्वादयः पट इत्यादिप्रत्ययालम्बनमिति चेत्—न, पटादिजनकत्वातिरिक्तस्य निर्वक्तुमशक्यत्वात्। पटादिजनकत्वस्य च पटोऽयमिति प्रत्ययालम्बनत्वे पटाद्यवयविसिद्धेः। अनुपलक्षितरेखोपरेखाद्यवयवसंस्थानविशेषनिस्तलसुवर्णगोलकोऽयमित्यवयविप्रत्ययाच्च। तन्त्वादीनामप्यवयवविशेषाणां **सौगतैरनङ्गीकाराच्च**।

तन्त्वादिशब्देन परमाणुसमूहो विवक्षित इति चेत् न, परमाणुशब्देन द्व्यणुकोपादानाभिधाने तेषामसिद्धौ तैः पटादिप्रत्ययान्यथासिद्धेर्वक्तुमशक्यत्वात्। द्व्यणुकादेव तत्सिद्धौ द्व्यणुकस्यैवावयविनः सिद्धेः द्व्यणुकासिद्धौ च तदवयविनोऽप्यसिद्धेः। त्रसरेणोर्द्व्यणुकसिद्धौ च त्रसरेणाववयवाभिधाने च तदसिद्धौ तैः पटादिप्रत्ययाद्यसिद्धेर्वक्तुमशक्यत्वात्। त्रसरेणोरेव तत्सिद्धौ तस्यैवावयविनां सिद्धेः द्व्यणुकतदवयवयोश्चास्मदाद्यतीन्द्रियत्वेनास्मदाद्यतीन्द्रियघटादिप्रत्ययविषयत्वानुपपत्तेश्च अस्मदाद्य-



तीन्द्रियग्रहणयोग्यतयोत्पन्नाः परमाणवोऽस्मदाद्यैन्द्रियकपटादिप्रत्ययविषया भविष्यतीति चेत्—न, उत्पत्तिमता[म]स्मदादीन्द्रियग्रहणयोग्यानां परमाणूनामसिद्धत्वेन तैः पटादिप्रत्ययान्यथासिद्धेः कर्तुमशक्यत्वात्।

त्रसरेण्वभिधाने च तेषामेवावयविनां सिद्धेः त एव निरवयवाः परमाणव इति चेत्—न, निराकरिष्यमाणत्वात्। समूहस्य समूहिव्यतिरिक्तस्यानङ्गीकारात्। अङ्गीकारे वा तस्यावयविनः सिद्ध[द्धेः।]सेनावनादौ कः समूहशब्दार्थ इति चेत्? आरोपितोऽवयव्येव। स एवास्माकमपि समूहशब्दार्थ इति चेत्—न, अवयविनः क्वचिदप्यनभ्युपगमे तदारोपस्यैवानुपपत्तेरसंख्यातैर्निराकरणात्। एकदेशावच्छिन्नं समूह इति चेत्—न, अवयव्यनभ्युपगमे एकस्य देशस्यासम्भवात्। केवलपरमाणूनां च परमाणुषु पट इत्यादिप्रत्ययप्रसङ्गात्। परस्परसंयुक्तानां पटादिप्रत्ययालम्बनमिति चेत्? परमाणुसंयोगस्यार्थसिद्धौ तेन पटादिप्रत्ययान्यथासिद्धेरशक्यत्वात्। द्व्यणुकासमवायिकारणतथा च तत्सिद्धौ द्व्यणुकस्यावयविनः सिद्धेः भवद्भिः संयोगिव्यतिरिक्तस्य संयोगस्यानभ्युपगमाच्च। विशिष्ट उत्पादः स इति चेत्—न, तस्य निर्वक्तुमशक्यत्वात्। परमाणूनामुत्पादासंभवाच्च।

एते परमाणवो नैतत्पटप्रत्ययालम्बनम्, परमाणुत्वात्, अन्यपरमाणुवत्। अयं पट इति प्रत्ययो नैतत्परमाणुविषयः अस्मन्निष्ठापरोक्षप्रत्ययत्वात् अस्मन्निष्ठापरोक्षप्रत्ययान्तरवत्। एते परमाणवो न पटः परमाणुत्वात् अन्यपरमाणुवत्। अयं नैतत्परमाणुसमूहः पटत्वात् अन्यपटवदित्यादिना प्रतिषेधाच्च। पटादिसिद्धेराश्रयासिद्धिरिति चेत्—न, पटस्योभयवादिसिद्धत्वात्। तस्य परमाणुत्वव्यतिरिक्तत्वयोरेव विवादात् स्थूलत्वैकत्वाभ्यां च पटस्य सूक्ष्मानेकपरमाणुव्यतिरिक्तत्वसिद्धेः। स्थूलत्वैकत्वे पटस्यासिद्धे इति चेत्—न, स्थूलः पट एकः पट इत्यादिप्रत्यक्षसिद्धत्वात्। न चेदं [दम] प्रमाणम्, बाधकाभावात्। न स्थूलो नैकः पट इत्यादिप्रत्यक्षाभावात्। अनुमानासंभवाच्च। यदनेकवृत्ति तदनेकम्, यथा भिन्नभाजनगतान्याम्रफलानि।

अनेकवृत्तित्वावयवित्वे बाधकमिति चेत्—न, जातिसमवायाभावेषु व्यभिचारात्। ते विपक्षतुल्या इति चेत् —न, अयं परमाणुरेकनिष्ठाधिकरणम्, मेयत्वात् अन्यवदित्यादिना सिद्धेऽस्य धर्मित्वे धर्मिग्राहकप्रमाणाभावात्। अन्यधर्मित्वे तत्रैवानेकवृत्तित्वस्य व्यभिचारात्, अवयवसिद्धावाश्रयासिद्धेः। सिद्धौ वा धर्मिग्राहकप्रमाणबाधाच्च। धर्मिग्राहकप्रमाणेन चावयविन एकत्वेनैव सिद्धेः। अनेकवृत्तित्वस्य तवासिद्धेश्च। अवयविनमभ्युपगच्छता तस्यानेकवृत्तित्वस्याभ्युपगन्तुमशक्यत्वात्। यद् विरुद्धधर्माध्यस्तं तदनेकं यथा दहनतुहिनौ। विरुद्धधर्माध्यस्तं चावयवीत्येकत्वे बाधकमिति चेत्—न, पूर्वोक्तदोषात्। विरुद्धधर्माध्यासस्यासिद्धत्वाच्च।

कम्पाकम्पौ विरुद्धधर्माविति चेत्—न, कम्पाकम्पयोर्युगपदेकत्राभावात्। क्षणभङ्गवादिनश्च क्रमेणाप्येकत्र कम्पाकम्पयोरसंभवात्। स्थिरवादिनां च क्रमेण

कम्पाकम्पयोरविरुद्धत्वात् । एकस्मिन्नवयवे चलति अन्यस्मिश्चावयवे निश्चल इति कम्पाकम्पौ युगपत्प्रसिद्धाविति चेत्—न, अवयवे चलत्यवयविनोऽवश्यं चलनाभ्युपगमात् हस्तचलने शरीरचलनानुपलम्भात्, हस्तचलनहेतोर्मन्दप्रयत्नादेः शरीरचलनजनकत्वाच्च । रागारागौ विरुद्धधर्माविति चेत्—न, रागारागौ किं रक्तभावतदभावौ विवक्षितौ रागद्रव्यसंयोगतदभावौ वा, नाद्यः रक्तरूपतदभावयोरेकत्रावयविन्यसिद्धत्वात् । न द्वितीयः संयोगस्य व्याप्यवृत्तित्वे रागद्रव्यसंयोगतदभावयोर्युगपदेकत्रासिद्धत्वात् । न, संयोगादयो व्याप्यवृत्तयः, गुणत्वात् रूपवदित्यादिना संयोगादेः व्याप्यवृत्तित्वसिद्धेः ।

कथं तर्हि अर्धरक्ते पटे रक्तोऽरक्तश्चेति व्यवहार इति चेत् ? अवयववर्तिना रागद्रव्यसंयोगाभावेनेति ग्रहणात् रागद्रव्यसंयोगस्य व्याप्य[वृत्तित्वात्…………… वयवावरणेऽपि रक्तः पट इति प्रत्ययप्रसङ्ग इति चेत्—न, आवृतत्वेन रागद्रव्यानुपलम्भे तन्निष्ठसंयोगस्याप्यप्रतीतेः । संयोगप्रतीतौ संयोगिद्वयप्रतीतिकारणत्वात् । ……………अन्वयव्यतिरेकाभ्यां तथैव कार्यकारणभावावधारणात् । अव्यावृत्तित्वे च रागद्रव्यसंयोगतदभावयोरेकत्र प्रमितत्वेन विरुद्धधर्मस्यासिद्धेः । तथा चायमेतद्रागसंयोगात्यन्ता……………मेयत्वादन्यवदिति । न चैतद्रागसंयोगग्राहकप्रत्यक्षबाधकम्, एतद्रागसंयोगस्य पूर्वानुमानसाध्ये तद्रागद्रव्यसंयोगात्यन्ताभावविरहत्वाभावात् । अभावाभावस्य भावव्यतिरिक्तत्वात् । पूर्वोक्तसाध्याभावाग्राहकत्वेऽपि तद्विरुद्धैतद्रागद्रव्यसंयोगाग्राहकत्वात् । तस्येदं बाधकं वह्निरुष्णो द्रव्यत्वादित्यत्रैवौष्ण्यग्राहकं प्रत्यक्षमिति चेत् न, तद्रागद्रव्यसंयोगस्य तदत्यन्ताभावविरुद्धत्वस्यासिद्धेः, वह्निरुष्ण इत्यादावौष्णग्राहकप्रत्यक्षस्य बाधकत्वात् । तर्हि वह्निरुष्ण इत्यादिकमनुमानबाधितं स्यादिति चेत्—नायमनुष्णो वह्निरित्यादिप्रत्यक्षेण बाधात् । तर्हि प्रकृतमप्यनुमानं नायमेतद्रागद्रव्यसंयोगात्यन्ताभावादिति प्रत्यक्षबाधितमस्त्विति चेत्—न, पटे रागद्रव्यसंयोगतदत्यन्ताभावावभ्युपगच्छता एवंविधप्रत्यक्षादिनानङ्गीकारात् । प्रत्युत पटो रक्तोऽरक्तश्चेत्यनुभवाभ्युपगमात् एतद्रागद्रव्यसंयोगेन तदत्यन्ताभावानुमानमिति चेत्—न, अप्रसिद्धविशेषणत्वात् ।

संयोगाव्याप्यवृत्तित्वपक्षे एतद्रागद्रव्यसंयोगात्यन्ताभावस्य सर्वत्र विद्यमानत्वेन तदत्यन्ताभावस्य सर्वत्र विद्यमानत्वेन तदत्यन्ताभावस्य क्वचिदप्यप्रसिद्धेः । एतद्रागद्रव्यसंयोगात्यन्ताभावेनाप्रतियोगी ? समानाधिकरणोऽत्यन्ताभाववत्वात् रूपात्यन्ताभाववदिति चेत्—न, बाधात् ।

एतद्रागद्रव्यसंयोगात्यन्ताभावस्याप्यत्यन्ताभावस्य प्रतियोगिसमानाधिकरणत्वात् दृष्टान्तस्य साध्यविकलत्वाच्च । रूपात्यन्ताभावप्रतियोगिकं ज्ञानादिसमानाधिकरणत्वात् । न च प्रतियोगिसमानाधिकरणत्वाभावात् साध्यत इति न, स्वशब्देनैतद्रागद्रव्यसंयोगस्यात्यन्ताभावाभिधाने तत्प्रतियोग्येतद्रागद्रव्यसंयोगस्या-



त्यन्ताभावाभिधानैतत्प्रतियोग्येतद्रागद्रव्यसंयोगसमानाधिकरणरूपात्यन्ताभावनिष्ठव्यभिचारात् । रूपात्यन्ताभावाभिधाने च पूर्वोक्तदोषात् । अन्यस्य च स्वशब्दार्थस्यानिरूपणात् । सन्दिग्धस्यापि घटात्यन्ताभावादौ व्यभिचारात् । एकदैव भूतले घटतदत्यन्ताभावयोः स्वीकारात् । अयमिह भूतले घटो नास्तीति भूतलनिष्ठघटस्यैव भूतलेऽत्यन्ताभावानुभवात् । एतद्रागद्रव्यसंयोगसमानाधिकरणत्वाभावे चैतदभावत्वविरहस्यैवोपाधित्वात् ।

न चास्य पक्षेतरता एतदन्योन्याभावादेः विपक्षत्वाद् व्यावृत्तत्वात् । एतद्रागद्रव्यसंयोगाभावत्वेन सत्प्रतिपक्षत्वाच्च । एतद्रागद्रव्यसंयोगत्वादेतद्रागद्रव्यसंयोगाभाववानिति व्याहतम् । स्वप्रतियोगिसमानाधिकरणत्वरहिताभावत्वस्यात्यन्ताभावलक्षणवानिति चेत्—न, प्रतियोगिनिरपेक्षं स्वप्रतियोगिनिष्ठाभावत्वस्यात्यन्ताभावलक्षणत्वात् । तथाविधसाधने च व्याघाताभावात् । तथाप्यभावस्य प्रतियोगिसमानाधिकरणत्वे व्याहतम् । प्रतियोगिसमानाधिकरणत्वरहितविशेषस्यैव नाभावत्वादिति चेत्—न, प्रतियोगिनिरपेक्षलक्षणरहितत्वस्याभावलक्षणत्वात् । अन्यथाऽन्योन्याभावादेरप्यभावत्वालाभात् । आवृतत्वानावृतत्वे विरुद्धधर्माध्यास इति चेत्—न, अर्धावरणेऽप्यवयविनो वृतत्वात्, अनावृतत्वाभावात् । एतेन ग्रहणाग्रहणे विरुद्धधर्माध्यास इत्यपि निरस्तम् । ग्रहणाग्रहणयोरात्मधर्मत्वेनावयविधर्मत्व[ा]संभवाच्च ।

यद्यवयविचलनावरणादावप्यवयविनो न चलनावरणादि, तदा अयुतसिद्धिप्रसङ्ग इति चेत्—न, अयुतसिद्धिः किं पृथक्त्वं, विभागो वा, तं चलत्यवयवायुनिष्ठ(?)-संबन्धो वा, पृथगाश्रयसिद्धत्वं वा, पृथग्गतिमत्त्वं वा ? तदनाश्रितत्वं वा ? नाद्यः, इष्टत्वात् । न द्वितीयः, मूलशैथिल्यात् । अवयवचलनेऽप्यचलनत्वेऽवयवरूपादेरवयवविभागाभावात् । न तृतीयः इष्टत्वात् । आपाद्यापादकयोर्भेदाभावाच्च । न चतुर्थः, पूर्ववन्मूलशैथिल्यात् । न पञ्चमः, इष्टत्वादेव । वाग्भटादीनां तन्त्वाश्रयाशुव्यतिरिक्तत्वाद्याश्रितत्वात् । न षष्ठः, इष्टापादनात् । तन्तुपटयोः परस्परं पृथग्भूतत्वं गतिमत्त्वात् । पूर्ववन्मूलशैथिल्याच्च । न सप्तमः, मूलशैथिल्यादेव । अवयवचलनेऽप्यचलनावयवरूपादेरवयवाश्रितत्वात् । यद्यवयवचलनेऽप्यवयवी न चलति, तर्हि तस्य पूर्वदेशविभागो न स्यात् कारणाभावादिति चेत्—न, अवयवकर्मजन्यावय[व]पूर्वदेशविभागादेव तदुपपत्तेः ।

अवयव्यवयवेषु कार्त्स्न्येन वर्तते, एकदेशेन वा ? नाद्यः, द्वितीयावयवादाववयविनो विरहप्रसङ्गात्, प्रथमावयविनो विरहप्रसङ्गात् । प्रथमावयव एव सर्वस्यावयविनः परिसमाप्तत्वात् । न द्वितीयः, अवयवेषु प्रत्येकमवयविनोऽवयवान्तरानङ्गीकारात् । अङ्गीकारे वा सर्वताविवृत्त्यर्थमवयवान्तरानुसरणादनवस्थानादिति चेत्—न, अवयविनोऽवयवेषु कार्त्स्न्येन वृत्तिस्वीकारात् ।

न चैवमवयविनोऽ(वय)वान्तरेषु अनुपलम्भप्रसङ्गः। तत्रापि कृत्स्नस्यावयविनो विद्यमानत्वात्। यदेकत्र कात्स्र्नेन वर्तते तदन्यत्र [न] वर्तते यथा रूपमिति चेत्—न, कात्स्न्र्यग्रहणवैयर्थ्यात्। एकदेशेनानेकस्थूणासु वर्तमानवंशादिव्यावृत्त्यर्थं कात्स्न्र्यग्रहणमिति चेत्–न, प्रतिस्थूणं कृत्स्नस्यैव वंशस्य वर्तमानत्वात्। तथास्ति[सति] स्थूणान्तरे वंशो न स्यादिति चेत्—न, तत्रापि कृत्स्नस्यैव वर्तमानत्वात्। यदेकत्र कात्स्न्र्येन वर्तते, न तदन्यत्र वर्तत इत्येतदेवात्र बाधकमिति चेत् न, अत्रापि कृत्स्नग्रहणस्य प्रयोजनाभावात्। संयोगादिनिवृत्त्यर्थं कृत्स्नग्रहणमिति चेत्—न, संयोगादेरपि प्रत्य[क्षा]श्रयं कृत्स्नस्यैव वृत्तेः। स्वरूपातिरिक्तकात्स्न्र्यस्य निर्वक्तुमशक्यत्वात्। एकदेशेन वर्तत इत्यस्यापि निर्वक्तुमशक्यत्वाच्च।

वंश[:]स्थूणास्वेकदेशेन वर्तत इति किं यत्र वंशो वर्तते, तत्र तदवयवेऽपि वर्तत इति विवक्षितम्? किं वा तदवयवे न वर्तते इति? नाद्यः, अवयव्यनङ्गीकारो[रे] वंशतदवयवादीनामसंभवात्। न द्वितीयः, तत एव वंशः स्थूणासु वर्तत इति प्रत्यक्षबाधाच्च। वंशतदवयवादिशब्देन परमाणवो विवक्षित[ा] इति चेत्–न, तेषामेकदेशाभावेनैकदेशेन वृत्त्यसंभवात्। यदेकत्र वर्तते, तदन्यत्र न वर्तत इति एतावदेवास्तु बाधकमिति चेत्– न, अवयवी अवयवान्तरे न वर्तते, एतदवयववृत्तित्वात् एतन्मात्रनिष्ठवदित्यादेरवयवस्य प्रसिद्धावाश्रयासिद्धत्वात्। सिद्धौ वा धर्मिग्राहकप्रमाणबाधात्। अयमेतन्निष्ठवान् मेयत्वादन्यवदिति सिद्धे अनेकवृत्तित्वस्य·········धर्मित्वे धर्मिग्राहकप्रमाणबाधात्। एतेन यत् सत् तत् निरवयवम्, यथा रूपम् अस्यावयविनि···············सावयवित्वापरपर्यायावयवित्वाभावस्य निरवयवस्याप्रसिद्धत्वात्। यत् सत् तन्न कार्यद्रव्याश्रयः, यथा रूपम्। सन्तश्च परमाणव इत्यवयवीति बाधकमिति चेत्—न, कार्यद्रव्याश्रयासिद्धौ तदाश्रयनिषेधस्याप्रसिद्धत्वात्। प्रसिद्धौ वा तत्रैव सत्त्वहेतोर्व्यभिचारात्।

परमाणवो न द्रव्याश्रया इति साध्यत इति चेत्? पूर्वोक्तदोषादपसिद्धान्ताच्च न द्रव्याश्रयस्य क्वचिदप्रसिद्धावप्रसिद्धविशेषणत्वासिद्धौ वा तत्रैव हेतोर्व्यभिचारात्। परमाण्वसिद्धावाश्रयासिद्धेः। द्व्यणुकाश्रयत्वेन तत्सिद्धौ च धर्मिग्राहकप्रमाणबाधात्, परमाणवो न द्रव्यारम्भका इति साध्यत इति चेत्—न, पूर्वोक्तदोषादपसिद्धान्ताच्च। त्वया पूर्वपरमाणूनामुत्तरोत्तरपरमाणुजनकत्वस्वीकारात् कार्यद्रव्यानारम्भकत्वसाधनेऽप्यपसिद्धान्तात्। उत्तरोत्तरपरमाणूनामपि भवन्मते कार्यत्वात्। यदिन्द्रियं तन्न द्रव्यग्राहकम्, यथा घ्राणरसने इन्द्रिये च चक्षुःस्पर्शने इत्यवयविनि बाधकमिति चेत्—न, दृष्टान्तस्य साध्यविकलत्वात्। घ्राणरसनयोरपि गन्धरसाधिकरणं[ण] चन्दनगुणादिग्राहकत्वात्। मनो दृष्टान्त इति चेत्? तस्याप्यात्मग्राहकत्वेन साध्यविकलत्वात्। श्रोत्रं दृष्टान्त इति चेत्—न, दृष्टान्तस्य साध्यविकलत्वात्। श्रोत्रं प्रयत्नवदधिष्ठितं द्रव्यत्वात् घटवदित्यात्मगोचरानुमितिजनकत्वेन श्रोत्रस्यापि



द्रव्यग्राहकत्वात्। धर्मिणोऽपि हेतुवदनुमितिजनकत्वात् श्रोत्रं दृष्टान्त इति चेत्? द्रव्यसाक्षात्कारजनकत्वं द्रव्यग्राहकत्वम्। तच्च श्रोत्रे नास्त्येवेति चेत्—न, दिक्कालवदाकाशस्यापि सत्त्वकार्यजनकत्वपक्षे श्रोत्रस्यापि घटादिद्रव्यसाक्षात्कारजनकत्वेन द्रव्यग्राहकत्वात्। सर्वकार्यजनकत्वपक्षेऽपि श्रोत्रस्य दिक्कालसाक्षात्कारजनकत्वेन द्रव्यग्राहकत्वात्। दिक्कालयोः सर्वेन्द्रियग्राहकत्वात्। दिक्कालयोरप्रत्यक्षत्वेऽपि प्रकृतसाध्यसाधने बाधात्। चक्षुःस्पर्शनयोरस्मन्मते घटाद्यवयविग्राहकत्वात्। त्वन्मते च परमाणुसमूहग्राहकत्वात्। रूपरसगन्धस्पर्शव्यतिरिक्ताः परमाणवः सौगतैर्नाङ्गीक्रियन्त इति चेत्—न, द्रव्यग्राहकत्वस्य क्वचिदप्रमितौ तदभावसाधनस्याप्रसिद्धविशेषणत्वात् क्वचिदिन्द्रिये प्रमितौ तत्रैव हेतोर्व्यभिचारात्। अन्यत्र तत्प्रमितौ किमवयवग्राहकत्वेन द्रव्यग्राहकत्वसिद्धिः। आकाशादिद्रव्यग्राहकत्वेन वा? नाद्यः, अवयव्विसिद्धेः। न द्वितीयः, अवयविविरहे तद्दृष्टान्तबलप्रवृत्तावाकाशाद्यनुमानसंभवात्। कार्यत्वं न द्रव्यवृत्तिकार्यवृत्तित्वात्। कार्यरूपवदिति चेत्– न, द्रव्यवृत्तित्वस्य क्वचिदसिद्धावप्रसिद्धविशेषणत्वात्। सिद्धौ वा अवयविवृत्तित्वेन तत्सिद्धिः। आकाशवृत्तित्वेन वा (? नाद्यः,) अवयविसिद्धेः। न द्वितीयः अवयव्यसिद्धौ न दृष्टान्तबलप्रवृत्तानुमानासंभवो नाकाशादेरप्रसिद्धेः। तस्माद् बाधकाभावात् घटोऽयमिति प्रत्यक्षमवयविनि प्रमाणमिति सिद्धम् ॥ २६ ॥

## रूपाणां रूपम् ॥ १.१.२७ ॥

रूपे च रूपाणि च[रूपाणि।]तेषामवयवगतानामवयविगतं रूपं समानं कार्यम्। उपलक्षणं चेदं रसादीनाम्। तस्मादवयवगतानां रूपरसगन्धस्पर्शगतैकत्वैकपृथक्त्वमहत्त्वदीर्घत्वगुरुत्वद्रवत्वस्नेहानामवयविगता रूपरसगन्धस्पर्शत्वैकत्वैकपृथक्त्वमहत्त्वदीर्घ[त्व]गुरुत्वद्रवत्वस्नेहाः समानं कार्यमिति सूत्रार्थः।

इदमपि सूत्रं मन्दप्रयोजनम्।

गुणाश्च गुणान्तरमारभन्ते [१.१.२]

इत्यनेनैव गतार्थत्वादिति ॥२७॥

## गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥१.१.२८॥

यथा देवदत्तः प्रयत्नेन करादिना गुरुत्ववन्तं पाषाणादिकमुत्क्षिपति, तदोत्क्षेपणे पाषाणादिगतं गुरुत्वं कारणम्। गुरुत्वरहितानां पवनादीनामुत्क्षेपणासंभवात्। तथा देवदत्तप्रयत्नः, तदभावे उत्क्षेपणासंभवात्। तथा गुरुत्वाधारादिपाषाणादिदेवदत्तहस्तसंयोगः, तदभावेऽप्युत्क्षेपणानुदयात्। तस्मात् गुरुत्वप्रयत्नसंयोगानामाद्यमुत्क्षेपणादिकमुत्क्षिप्य तदोत्क्षेपणे समानं कार्यम्। द्वितीयादिकमुत्क्षेपणं तु प्रथमोत्क्षेपणजन्यत्वेनापि जन्यते इति गुरुत्वप्रयत्नसंयोगवेगानां सामान्यं कार्यमिति ॥२८॥

## संयोगविभागाः कर्मणामिति ॥१.१.२९॥

कार्यं सामान्यमित्यनुवर्तते । इदं तु सूत्रं यथाश्रुते अनुपपन्नमेव । बहूनां कर्मणां संयोगविभागजनकत्वाभावात् । अन्यतरकर्मणा वा संयोगविभागौ जन्येते । यथा श्येनकर्मणा स्थाणोस्तेन संयोगविभागौ । उभयकर्मभ्यां वा संयोगविभागौ जन्येते । यथा मल्लकर्मभ्यां मल्लसंयोगविभागौ । यथा च मेषकर्मभ्यां मेषसंयोगविभागौ भवत इत्यत्र प्रमाणं नास्ति । प्रत्यक्षानुमानागमासंभवात् । प्रमाणान्तरस्य चानङ्गीकारात् । यत्र युगपदेव बहवः परस्परं संयुज्यन्ते वियुज्यन्ते च तत्र बहूनां कर्मणां संयोगविभाग[ा]: समानं कार्यमिति प्रत्यक्षमिति चेत्—न, तत्राबहुनिष्ठसंयोसविभागसंभवात् । संयोगविभागयोर्द्विमात्रनिष्ठत्वाच्च । द्विमात्रनिष्ठसंयोगविभागानां चोभयकर्मजन्यत्वेन बहुकर्मजन्यत्वासंभवात् । बहूनां संयोगजनकानां विभागजनकत्वासंभवात् । विभागजनकानां संयोगजनकत्वासंभवाच्च । तस्मादुभयकर्मजः संयोगः कर्मणां समानं कार्यम् । उभयकर्मजश्च विभागः कर्मणोः समानं कार्यम् ॥२९॥

ननु कश्चन संयोगो विभागो वा बहूनां कर्मणां समानं कार्यमिति । न तु संयोगविभाग[ा:] कर्मणां कार्यं सामान्यमिति वाच्यम् । द्वितीयादिकर्मणां प्रथमादिकर्मजन्यत्वादिति शङ्कापरिहारार्थं सूत्रम् ।

**कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तमिति ॥१.१.३०॥**

कारणसामान्यं प्रतिपाद्यते यस्मिन् प्रकरणे तत् कारणसामान्यम् । तत्र कर्म [न] कर्म जनयतीत्युक्तम्—

गुणवैधर्म्यान्न कर्मणाम् [१।१।२१]

इति सूत्रेणेति । इदमपि सूत्रमनारम्भणीयमेव ।

कर्म कर्मसाध्यं न विद्यते [१।१।१०]

गुणवैधर्म्यान्न कर्मणाम् [१।२।२१]

इत्येताभ्यां गतार्थत्वात् । स एवार्थः शङ्कापरिहारार्थः स्मर्यत इति चेत्—न, ताभ्यामेव शङ्कापरिहारसिद्धेः । अन्यसकलसूत्रार्थस्मारणार्थं सूत्रार्थप्रणयनप्रसङ्गात् । शङ्कान्तरपरिहारार्थमेवमस्त्विति चेत्—न, एवंविधशङ्कानां सर्वत्र सुलभत्वात् । पुनः पुनरुक्तार्थस्मारणे सूत्रव्याघाताच्चेति ॥३०॥

॥ इति श्रीहरकिङ्करपरमपण्डितन्यायाचार्यभट्टवादीन्द्रकृतौ
कणादसूत्रवार्तिके प्रथमाध्याये
द्वितीयाह्निकम् ॥

# तृतीयमाह्निकम्

..................इत्यादिना कार्यसामान्यप्रकरणपर्यन्तेन परमाण्वादीनां द्व्यणुकादौ कारणत्वं प्रतिपादितम् । तद[नुपप]न्नम्, परमाण्वादीनां द्व्यणुका[द्या]रम्भकत्वे युगपदेव सर्वद्व्यणुकाद्युदयप्रसङ्गात् । समर्थस्य क्षेपायोगात् । असमर्थके वा सर्वदा द्व्यणुकानुदयप्रसङ्गात् । अर्थक्रियाविरहात् । अर्थक्रियाकारित्वं सत्त्वलक्षणं स्यादित्याशङ्कापरिहारार्थं सूत्रद्वयम्—

**कारणाभावात् कार्याभावः ॥१.२.१॥**

**न तु कार्याभावात् कारणाभाव इति ॥१.२.२॥**

परमाण्वादयो द्व्यणुकादीनारभमाणा अपि न युगपदेवारभन्ते, अपेक्षणीयस्य संयोगादेः कारणस्याभावात् । न चैवमपेक्षणीयात् संयोगादेरेव द्व्यणुकाद्युत्पत्तेः परमाण्वादीनां [न] कारणत्वं धर्मिग्राहकप्रमाणेन द्व्यणुकादिकारणत्वेनैव परमाण्वादिसिद्धेः । जनयन्तु परमाण्वादयो युगपदेव सर्वकार्याणि । न चैवं द्वितीयक्षणे अर्थक्रियाविरहात् परमाण्वादीनामसत्त्वप्राप्तौ क्षणभङ्गसिद्धिः । अर्थक्रियाकारित्वस्य सत्त्वशब्दार्थानङ्गीकारात् । सत्ताजातेः प्रमेयत्वस्य वा सत्त्वशब्दार्थत्वात् । तदिदमुक्तम् [न तु] कार्याभावात् कारणाभावः [१.२.२]
इति । यदा पूर्वमुक्तं

कार्याविरोधि द्रव्यं कारणाविरोधि च [१.१.११]

उभयथा गुणः [१.१.१२]

इति कथं कार्यकारणाविरोधीनां द्रव्यगुणादीनां विनाश इत्यपेक्षायामुक्तम्

कारणाभावात् कार्याभावः [१.२.१]

इति ।

ननु कार्यविनाश एव द्रव्यादिविनाशहेतुः किं न स्यादित्यत उक्तम्

न तु कार्याभावात् कारणाभावः [१।१।२]

इति ।

यद्वा, प्रथमाह्निके द्रव्यगुणकर्माणि आपाद्यन्ते । द्वितीयाह्निके क्रियासामान्यविशेषाः प्रतिपाद्यन्ते ।

सामान्यविशेषाभावादिति

सूत्रेण । तयोरेव बुद्धिः तत्त्वात् । तत्र सामान्यविशेषौ न स्तः, कारणाभावात् । कार्याभावाच्च । न हि कारणमन्तरेण किञ्चिदात्मानं लभते, कारणाधीनत्वात् सर्ववस्तूनाम् । न च कार्यमन्तरेण कस्यचित् सत्त्वं संभवति, कार्यजनकत्वस्यैव सत्त्व-

लक्षणत्वात् । कारणकार्ययोरभावेन सामान्यविशेषयोरनुमानासंभवाच्च । लिङ्गान्तरस्याप्यभावात् । प्रत्यक्षस्य च सामान्याद्यसाधकत्वात् । गौर्गौरित्यादिस[वि]कल्पकस्याप्रमाणत्वात् प्रमाणत्वात् (?) सामान्यगोचरनिर्विकल्पकस्य च परं प्रत्यसिद्धेरिति सौगताः । तन्निराकरणार्थं सूत्रद्वयम्--

कारणाभावात् कार्याभावः [१।२।१]

न तु कार्याभावात् कारणाभावः [१।२।१]

इति । कारणं हि व्यावर्तमानं कार्यं व्यावर्तयति । न च सामान्यविशेषौ कार्यौ, तत् कथं कारणानिवृत्तौ सामान्यविशेषनिवृत्तिसिद्धिरिति ? किं च यत् कारणरहितं तन्नास्ति यथा गगनकमलम् । कारणरहितौ च सामान्यविशेषाविति विवक्षितम् । किं वा यत् कारणरहितं तन्न जायते इति यथा गगनं कारणरहितौ च सामान्यविशेषाविति । नाद्यः, सामान्यविशेषसिद्धौ धर्मिग्राहकप्रमाणाबाधात् असिद्धावाश्रयासिद्धेः । नास्तीति च किमन्योन्याभावप्रतियोगित्वं साध्यते, प्रध्वंसप्रतियोगित्वं वा, अर्थक्रियाकारित्वाभावो वा, जनकत्वाभावो वा, प्रमेयत्वाभावो वा, अभावत्वं वा ?

नाद्यः, सिद्धसाधनात् । सामान्यविशेषयोरप्यन्योन्याभावप्रतियोगित्वात् । घटः सामान्यविशेषौ न भवतीति स्वीकारात् । न द्वितीयः, अर्थान्तरग्रस्तत्वात् । सामान्यविशेषयोः प्रध्वंससिद्धावपि स्वरूपानवलाभा[पा]त् गगनादौ व्यभिचाराच्च । न तृतीयः, सिद्धसाधनादेव घटे गोत्वे विशेषौ न स्त इति स्वीकारात् । न चतुर्थः, अर्थक्रियाविशेषणवैयर्थ्यात् । जनकत्वापरपर्यायकारित्वाभावसिद्ध्या चरितार्थत्वात् । न पञ्चमः, अर्थान्तरात् सामान्यविशेषयोरजनकत्वेन स्वरूपानपलापात् । न षष्ठः, अप्रसिद्धविशेषणत्वात् । प्रमेयत्वस्य केवलान्वयित्वात् । सामान्यविशेषाप्रमितावाश्रयासिद्धेश्च, प्रमितौ च व्याघातात् । नापि सप्तमः, अभावाभावस्य भावत्वपक्षे सिद्धसाधनात् । सामान्यविशेषयोरपि स्वात्यन्ताभावाद्यभावत्वात् । व्यतिरिक्तत्वपक्षे चाभावत्वं किं द्रव्यादिषट्[ड्]लक्षणरहितं[तत्वं] विवक्षितं, निषेधत्वं वा ? नाद्यः, सामान्यविशेषयोः सामान्यविशेषलक्षणरहितत्वसाधने बाधव्याघातयोर्दुर्वारत्वात् । न द्वितीयः, सामान्यविशेषयोः भावत्वेनैव सिद्धे धर्मिग्राहकप्रमाणविरोधात् ।

किं च, सामान्यशब्देन किमन्यव्यावृत्तिर्विवक्षिता, तद्व्यतिरिक्तत्वं वा ? नाद्यः, भावाश्रयासिद्धेः । विशेषशब्देन च किमेकैकनिष्ठो विवक्षितः, गुणकर्मव्यतिरिक्त एकैकनिष्ठो वा, गुणकर्माभावव्यतिरिक्त एकैकनिष्ठो वा ? नाद्यः, रूपादीनामपि धर्मित्वे बाधात् । न द्वितीयः, प्रागभावादीनामपि धर्मित्वे सिद्धसाधनात् । न तृतीयः, बाधव्याघातापत्तेरिति ॥

न द्वितीयः, सिद्धसाधनात् । सामान्यविशेषयोरजन्यत्वस्वीकारात् । नापि कार्यव्यावृत्तौ कारणं व्यावर्तते । धूमव्यावृत्तावपि वह्नेरव्यावृत्तेः । किं च यत् कार्यरहितं नास्ति, यथा गगनकमलमिति विवक्षितम्, किं वा यत् कार्यरहितं



तदस्तीति व्याघातः, कार्यजनकस्यैव सत्त्वशब्दार्थत्वादिति ? नाद्यः पूर्वोक्तदोषात्, अन्त्यमुक्तौ व्यभिचारात् । दृष्टान्तस्य साध्यविकलत्वाच्च । गगनकमलस्यापि सत्त्वात् संयोगादिजनकत्वाच्च । तटाकवर्तिन एव कमलस्य गगनसंसृष्टतया प्रतीयमानस्य गगनकमलशब्दार्थत्वात् । असत्ख्यातेर्निराकरिष्यमाणत्वात् । न द्वितीयः, कार्यजनकत्वस्य सत्त्वशब्दार्थत्वानङ्गीकारात् । सत्ताजातेरजातिरूपस्य वा सत्त्वस्य वा प्रमेयत्वस्य वा सत्त्वशब्दार्थत्वात् । तत्र च व्याघाताभावात् ।

एतच्च सूत्रद्वयं सामान्यविशेषविषयसंबाधको भावोपलक्षणार्थम् । तेनान्यो न विशेषबाधकादिपूर्ववन्निराकार्याणि । तद् यथा—गोत्वादिसामान्यं किं सर्वगतम्, पिण्डसर्वगतं वा ? आद्ये स्तम्भादावपि गोत्वादावपि गोत्वाद्युपलब्धिप्रसङ्गः । द्वितीये सर्वत्रोत्पन्नशाबलेयादीनां गोत्वस्य संबन्धाभावप्रसङ्गः । पूर्वं तत्राविद्यमानस्य तत्रोत्पन्नेन गोपिण्डेन संबन्धाभावात् । गोपिण्डान्तरादागत्य तत्रोत्पन्नेन गोपिण्डेन संबध्यते इति चेत्—न, जातेर्निष्क्रियत्वात् । यत्र यत्र गोपि·········ते तत्र गोत्वमस्ति न सर्वत्रेति चेत्--न, सर्वत्र गोपिण्डादर्थसंभवादिति । तस्मात् सर्वसर्वगतपिण्डसर्वगतत्वयोरसंभवात् नास्ति सामान्यमिति तदयुक्तं सर्वगतत्वम् । यदि सर्वमूर्त्तैः संयोगः तत्रेष्यत एव·········निर्गुणत्वेन संयोगासंभवात् । सर्वाश्रितत्वं चेत् ? तदा सर्वगोपिण्डाश्रितत्वं गोत्वजात्यभ्युपगमः । न तु पिण्डाश्रितमिति स्तम्भादौ तदभावस्य प्रत्यक्षसिद्धत्वात् । साधकप्रमाणाभावाच्च । पूर्वं तत्रापि·········श्रितमिति चेत् – न, पूर्वं तत्राविद्यमानानामपि रूपादीनामिव तत्रोत्पन्नपिण्डाश्रितत्वसंभवात् । पश्चादनुत्पन्नस्य पूर्वं तत्राविद्यमानस्य कथं तत्रोत्पन्नपिण्डाश्रितत्वमिति न तौ सहोत्पन्नौ तत्राश्रितद्रव्यवदुपपत्तेः, तत्सह पश्चाच्चानुत्पन्नस्य तदा विद्यमानस्य च कथं तत्रोत्पन्नपिण्डाश्रितत्वमिति चेत्--कथमिति । किं तत्राश्रित्वे प्रमाणप्रश्नः कारणप्रश्नो वा ? नाद्यः, पक्षस्यैव प्रमाणत्वात् । न द्वितीयः, तत्राश्रितत्वस्य जन्यत्वेन कारणेऽनपेक्षत्वात् ।

एतेन तत्राविद्यमानस्य कथं तत्रोत्पन्नपिण्डसंबन्ध इति निरस्तम् । समवायस्य प्रत्यक्षानुमानाद्यन्यतरप्रमाणसिद्धत्वात् । अजन्यत्वेन कारणानपेक्षत्वाच्चेति । यत्संभवत्वाच्चानुत्पन्नं तत्राविद्यमानं तन्न तत्रोत्पन्नपिण्डाश्रितम्, इति व्याप्तिसिद्धिरिति चेत्--न, किं गोत्वं सास्नादिमत्पिण्डाश्रितम् तेन सह पश्चाच्चानुत्पन्नत्वे सति तदुत्पत्तेः पूर्वं तत्राविद्यमानत्वादित्यनुमानं विवक्षितम्, किं वा यदि गोत्वं तेन संभवत्वाच्चानुत्पन्नत्वे सति तदुत्पत्तेः पूर्वं तत्राविद्यमानादेः कर्मविपर्ययः स्यात् । विद्यमानत्वपर्यवसायित्वे प्रत्यक्षबाधात् । पश्चात्सहोत्पत्तिपर्यवसायित्वे जातेरनादित्वग्राहकप्रमाणबाधात् । एतद्वचक्तेः पूर्वं गोत्वं कुत्राश्रितमिति चेत्--प्राचीनगोव्यक्त्यन्तर इति ब्रूमः । पूर्वं क्वाश्रितमिति चेत्--न, तत्पूर्वोत्पन्नगोपिण्डान्तर इत्यनादिः पन्थाः । प्रलये सर्वत्र गोपिण्डोच्छेदे कुत्राश्रितमिति चेत्--एकब्रह्माण्ड-

प्रलये ब्रह्माण्डान्तरवर्तिगोपिण्डेष्विति ब्रूमः । सर्वब्रह्माण्डप्रलये कुत्राश्रितमिति चेत्—न क्वचिदिति । ग्रहणं [एवं] तर्हि तदानीं नित्यमनेकसमवेतमिति लक्षणाभावात् जातित्वानुपपत्तिरिति चेत्--न, तदानीं नित्यत्वे सत्यनेकसमवेतत्वस्य जातिलक्षणत्वानङ्गीकारात् । नित्यत्वे सत्यनेकसमवेतत्वस्य च पूर्वमप्यनेकसमवेतत्वेनोपपत्तेरिति मा भूत् ॥ १-२ ॥

सामान्यविशेषयोर्बाधकं किमित्यपेक्षायां सूत्रम्—

**सामान्यं विशेष इति बुद्ध्यपेचे[क्षमि]ति ॥१.२.३.॥**

बुद्धि प्रमाणतया अपेक्षत इति बुद्ध्यपेक्षम् इति । सामान्यं विशेष इत्येवमपि संबुद्ध्यपेक्षमित्यर्थः । तथा चायं गौरित्यादिका अनुवृत्ताकारा साक्षात्कारिणी बुद्धिः सामान्ये प्रमाणम् । अयं परमाणुर्गुणकर्मव्यतिरिक्तैतन्मात्रनिष्ठभाववान् इति साक्षात्कारिणी बुद्धिः परमेश्वरादिनिष्ठा विशेषे प्रमाणमिति । साक्षात्कारिणी बुद्धिः प्रमितिर्न तु प्रमाणमिति चेत्--न, प्रमितेरेवात्र प्रमाणत्वेन विवक्षितत्वात् । समान्यं विशेष इति व्यवहारमात्रम् । न त्वेवं बुद्धिरस्ति इत्यत्रापीदमेवोत्तरं सामान्यं विशेष इति तु बुद्ध्यपेक्षमिति । सामान्यं विशेष इति व्यवहरणं बुद्ध्यपेक्षं बुद्धिजन्यम् अन्वयव्यतिरेकाभ्यां व्यवहारबुद्धिजन्यत्वावधारणात् । अन्यथा कुम्भादिव्यवहारात् कुम्भादिज्ञानमपि न सिध्येदिति ।

ननु सामान्यविशेषविषया निर्विकाल्पिका बुद्धिरसिद्धा सविकल्पिका ते प्रमाणमित्यत्रापीदमेवोत्तरं

सामान्यं विशेष इति बुद्ध्यपेक्षमिति [ १.२.३. ]

अस्ति तावत् सामान्यादिगोचरं सविकल्पकं गौरित्यादि तच्च निर्विकल्पकमपेक्षते, तज्जन्यत्वात् । न हि विशेषणादिगोचरं निर्विकल्पकमन्तरेण विशिष्टविषयं सविकल्पकमुदेति विशेषणादिज्ञानजन्यत्वात् विशिष्टज्ञानस्य । तस्मात् सामान्यविशेषयोः प्रत्यक्षं प्रमाणमिति सूत्रार्थः । यदा

सामान्यं विशेष [ १.२.३. ] इति

सूत्रेण सामान्यविशेषसद्भावो[वे]ऽनुमानं व्युत्पाद्यते, तथा च सामान्यं विशेष इति ज्ञानं लिङ्गगोचरबुद्ध्यपेक्षमिति सूत्रार्थमाहुः । न तावत् सामान्येऽयं गौरिति प्रत्यक्षं प्रमाणम् । प्रोरोवर्तिव्यक्तिगोचरत्वात् । तर्हीदं गौरिति ज्ञानं व्यक्त्यन्तरे न स्यादिति चेत्—न, सत्यमिदं व्यक्त्यन्तरे न जायते एव । तत्र गौरिति ज्ञानस्यान्यत्वात् व्यक्त्यन्तरे जायमानं गौरिति ज्ञानं गोत्वे प्रमाणमिति चेत्—न, तस्य व्यक्त्यन्तरालम्बनत्वोपपत्तेः । गौर्गौरित्यनुवृत्तं ज्ञानं गोत्वे प्रमाणमिति चेत्—न, ज्ञानव्यक्तीनां परस्परव्यावृत्तत्वेनानुवृत्तत्वाभावात् । अनुभूतस्य च गोज्ञानत्वस्य प्रमाणाभावात् । न चानुवृत्तं गोज्ञानत्वे प्रमाणमिति अनुवृत्तप्रत्ययस्य पूर्वोक्तन्यायेन निषेधात् । अस्तु वा गौर्गौरिति अनुवृत्तप्रत्ययात् । अन्यथापि न गोत्वसिद्धिः । गोत्वव्यवहारस्थापक-



सास्नात्वादेतदुपपत्तेः । न च व्यवस्थापकमुपादाय जातिनिराकरणे सर्वजात्युच्छेदापत्तिः, इष्टत्वात् । अस्तु वा गौर्गौरित्यनुवृत्तप्रत्ययस्यागोव्यावृत्तिरनुवृत्तालम्बनत्वमिति । नाप्यनुमानम्, गोत्वादिव्याप्तलिङ्गानवगमात् । सास्नादिमत्त्वं लिङ्गमिति चेत्—न, तस्य गोत्व(ा)सिद्धौ तद्व्याप्तत्वानवगमात् । एतेन गोव्यवहारो लिङ्गमिति निरस्तम् । गोव्यवहारो व्यवहर्तव्यज्ञाननिबन्धन इति साध्यत इति चेत्—न, तद्धर्मगोत्वादिसिद्धेरर्थान्न गोव्यक्तिज्ञानेन सिद्धसाधनात् । गोव्यक्तिव्यतिरिक्तज्ञाननिबन्धन इति साध्यत इति चेत्—न, गोव्यक्तिज्ञानस्यापि गोव्यक्तिव्यतिरिक्ततद्गतरूपादिगोचरत्वेन सिद्धसाधनस्य तदवस्थत्वात् ! गोव्यक्तितद्धर्मव्यतिरिक्तज्ञाननिबन्धन इति साध्यत इति चेत्--न, तद्धर्मगोत्वादिसिद्धेरर्थान्तरत्वात् गोव्यक्तिज्ञानस्य गोव्यक्तितद्धर्मव्यतिरिक्तेन्द्रियसन्निकृष्टगोत्वव्यक्त्यवयवभूतलादिविषयत्वेन सिद्धसाधनस्य तदवस्थत्वाच्चेति ।

तदयुक्तम् । अयं गौरित्यादिसाक्षात्कारस्य गोत्वादिजातिसाधकत्वात् । तथा हि यथायं शुक्ल इत्यादिसाक्षात्कारः पुरोवर्तिविशेषणत्वेन शुक्लादीन् विषयीकरोति, तथायं गौरित्यादिसाक्षात्कारः पुरोवर्तिविशेषणत्वेन गोत्वादीनपि, व्यक्तिमात्रालम्बनत्वे अयमित्येव स्यात् । न त्वयं गौरिति । अन्यथा व्यक्तिविशेषणत्वेन शुक्लत्वादिरपि न सिध्येत् । पुरोवर्तिव्यतिरिक्तशुक्लादिरपि नेष्यत एव । अशुक्लादिव्यावृत्तिरेवायं शुक्ल इत्यादौ विशेषणमिति चेत्--न, शुक्लादि…… ……नुमानयो………… तथा विशेषणत्वेन गोत्वसिद्धेरगोव्यावृत्तिरेवात्र विशेषणमिति चेत्—न, व्यावृत्तेरनिरुक्तेः । अन्योन्याभावो व्यावृत्तिरिति चेत्—अभावस्य अनिरुक्तेः । द्रव्यादिपल्लक्षणरहिते………… भावरूपजात्यभावे तल्लक्षणस्यासंभवे तद्रहितत्वस्यासंभवित्वात् । अभावरूपजाति………… वृत्तौ सुतरां संभवात् । भावरूपजातिस्वीकारे च जातिसिद्धेः । [भावनिषेधोऽभा]व इति चेत्—न, निषेधत्वस्यानिरुक्तेः । प्रतियोगिनोऽगोरज्ञानेऽपि तन्निरूपकस्य गोत्वस्याबाधित्वेन प्रतिभासाच्च । अन्यथा गोपिण्डादेरपि निषेधत्वापत्तेः । परमाण्वतिरिक्तो गोपिण्डो………इति चेत्--न, परमाण्वादेरपि निषेधत्वापत्तेः । किं च किमेकैकागोव्यावृत्तिः गोत्वं सर्वागोव्यावृत्तिर्वा ? नाद्यः, एकैकागोव्यावृत्तेरगोऽन्तरेऽपि विद्यमानत्वेऽपि तत्रापि गौरिति प्रत्ययप्रसङ्गात् । न द्वितीयः, सर्वव्यक्त्यन्यस्यागोचराप्रसिद्धत्वेन तद्व्यावृत्तेरप्यप्रसिद्धत्वात् । न तृतीयः, यत्किञ्चिद्गोव्याक्त्यन्यत्वेन शाबलेयादेरप्यगोत्वेन तद्व्यावृत्तिरहितत्वेन गोत्वाभावप्रसङ्गात् । न चतुर्थः, सर्वगोप्रतीतिमन्तरेणागोप्रतीत्यनुपपत्तावगोव्यावृत्तेरपि प्रत्येतुमशक्यत्वात्, गोत्वानङ्गीकारे च गोपिण्डस्य निर्वक्तुम् अशक्यत्वात् । अनङ्गीकारे च किं गोत्वजातिः, अगोव्यावृत्तिर्वा ? नाद्यः, जातिसिद्धेः । न द्वितीयः, परस्पराश्रयात् । अगोव्यावृत्तिविशिष्टगोसिद्धिरिति । न च सास्नादिकमेव गौरित्यत्र विशेषणम्, असास्नादावपि गौरिति प्रत्ययात् । सास्नादिमत्त्वात् । गवये गौरित्यप्रत्ययाच्च । सास्नादिमत्त्वं च किमेतत् सास्नावत्त्वं

सास्नादिजातिमत्त्वं वा ? नाद्यः, एकसास्नाविरहिणि गोपिण्डान्तरे गौरिति प्रत्ययानुदयप्रसङ्गात्। न द्वितीयः, सास्नावत्त्वजातेरेव सिद्धेः। अस्तु सास्नावत्त्वमियं सास्नेति प्रत्ययस्यानन्यथासिद्धत्वात्। गोत्वं तु न सिध्यति। गौरिति प्रत्ययस्य च सास्नावत्त्वेनान्यथासिद्धेरिति चेत्—न, सौगतस्यापसिद्धान्तात्। तेन सास्नावत्त्वजातेरप्यनङ्गीकारात्। अन्यं प्रति लूनस्नानेऽपि गौरिति प्रत्ययदर्शनेन सास्नावत्यपि गवये गौरिति प्रत्ययादर्शनेन च सास्नावत् तदतिरिक्तगोत्वसिद्धेः। वक्ष्यमाणरीत्या सास्नावन्मात्रनिष्ठजात्यनुमानात्। नाप्यवयवसंस्थानविशेष एव गौरित्यत्र विशेषणम्। गवयादिव्यावृत्तस्य सकलगोपिण्डानुगतस्य गोत्वातिरिक्तस्याप्यवयवसंस्थानविशेषस्यानिरुक्तेः। अवयवसंस्थानविशेषस्यावयवसंयोगविशेषत्वेनावयवनिष्ठस्य पिण्डविशेषणत्वासंभवाच्च। अवयवसंस्थानविशेषस्य चैतद्गोपिण्डनिष्ठस्य गोपिण्डान्तरेऽसंभवेन तत्र गौरिति प्रत्ययाभावप्रसङ्गात्। अनुगतस्य चावयवसंस्थानविशेषत्वस्य जातेः सौगतैरनङ्गीकारात्। तद्व्यावृत्तेश्च पूर्ववन्निषेधात्। गौर्गौरित्यनुवृत्तप्रत्ययाच्च गोत्वसिद्धेः। अन्यथा व्यावृत्तवस्तुनि च प्रत्ययस्यानुवृत्तत्वासंभवः। अनुवृत्तवस्तुविषयत्वस्यानुवृत्तत्वस्य संभवात्। न चानुवृत्तवस्तुप्रत्ययोऽसिद्धः। अयं गौरयं गौरित्याद्यनुवृत्तवस्तुव्यवहारेण तत्सिद्धेः। अन्यथा व्यावृत्तवस्तुव्यवहारेण व्यावृत्तवस्तुप्रत्ययसिद्धौ व्यावृत्तस्यापि वस्तुना विलयात्।

न चानुवृत्तवस्तुसिद्धावात्माश्रयः, अनुवृत्तवस्तुप्रत्ययस्य जातिविशेषणत्वानङ्गीकारात्। अनुवृत्तवस्तुप्रत्ययाद् वानुवृत्तवस्तुसिद्धिरित्यत्रात्माश्रयत्वासंभवाच्च। अगोव्यावृत्तिगौर्गौरित्यनुवृत्तिप्रत्ययालम्बनमिति चेत्—न, गोत्वाभावेनोपगृहीतगोपिण्डाप्रतीतौ तद्व्यावृत्त्युपगृहीतौ गोपिण्डाप्रतीतौ गोव्यावृत्तेः प्रत्येतुमशक्यत्वादिति, अनुमानाच्च जातिसिद्धेः। तथा चायं गोपिण्ड एतन्निष्ठाभावत्वरहितैतन्निष्ठो नित्यत्वरहितानेतन्निष्ठत्वात् मेयत्वात् घटवदिति। न चात्र समवाये सिद्धसाधनमर्थान्तरं वा, तस्यानाश्रितत्वात्। आश्रितत्वे वा संबन्धरहितत्वेन समवायरहितत्वेन वा सादृश्यविशेषणात्। न चात्रोपाधिप्रतिरोधसंभवः, केवलान्वयित्वादिति। यद् वायं गौः समवायिकारणरहितानेतन्निष्ठनित्यभाववान्, मेयत्वाद् द्रव्यत्वाच्च गग[न]वत्। न चास्य जात्यादौ व्यभिचारः, सर्वत्राङ्गीकारात्। न चानयोर्नित्यत्वमुपाधिः, पक्षेतरत्वात्। गगनाद्यनित्यरहितोक्तसाध्यवदन्यत्, मेयत्वादिति सिद्धे प्रकृतसाध्यवत्यनित्ये साध्यव्यापकत्वभङ्गाच्च, उपाधेरदूषणत्वाच्च। यद् वा इदानीमुत्पन्नो गौः समवायत्वरहितचिरविनष्टगोनिष्ठाभाववान् भावाश्रयत्वादित्यादि ॥

ननु भावत्वद्रव्यादिषल्लक्षणान्यमेयत्वं तत्त्वजातिसिद्धेः पूर्वमसिद्धमित्यप्रसिद्धविशेषणतेति चेत्–अत्र[ा]भावोऽयं भावोऽयमिति प्रतीतिसिद्धभावत्ववतो भावशब्दार्थत्वात्। न चात्र घटादौ व्यभिचारः, तत्रापि द्रव्यत्वादेः सत्त्वात्। सिध्यतु जातिमात्रम्; गोत्वासिद्धिः कथमिति चेत् ? अयं गौरयं गौरिति प्रत्यक्षादेवेति गृहाण ॥



**विष्णुमिश्रास्तु** पुनरयं सास्नावान् एतन्निष्ठाभावत्वरहितैतन्निष्ठसास्नावान् व्यावृत्तत्वरहितैतन्निष्ठासास्नावद्वृत्तित्वरहित एतन्निष्ठानित्यत्वरहितवान् मेयत्वात् घटवदिति गोत्वसाधनमाहुः। तन्न, सास्नावद्गोवयवसाधारणजातिसिद्धस्य चरितार्थत्वेन गोत्वासाधकत्वात्। अयं गवयसास्नाविलक्षणसास्नावान् एतन्निष्ठाभावत्वरहितैतन्निष्ठगवयसास्नाविलक्षणसास्नावद्व्यावृत्तरहितैतन्निष्ठगवयसास्नाविलक्षण - सास्नावत्त्वानाक्रान्तवृत्तित्वरहितैतन्निष्ठानित्यत्वरहितवान् भावत्वाद् घटवदिति गोत्वसिद्धिरिति चेत्—न, अस्य लूनसास्नागोपिण्डव्यावृत्तजातिसाधकत्वेन गोत्वासाधकत्वात्। गवयसास्नाविलक्षणसास्नावन्मात्रनिष्ठं लूनसास्नावत् गोपिण्डं व्यावृत्तं सामान्यं गोत्वं, तच्चानेन सिध्यति चेत् ? लूनसास्नागोपिण्डेऽपि गोत्वस्य बाधितानुभवसिद्धत्वात्। तत्र गोत्वानुभव एव नास्तीति चेन्न। गौरिति व्यवहारेण तत्सिद्धेः। गोसादृश्यात् लाङ्गूलादिमयात् गौणोऽयं गोव्यवहारोऽग्निसादृश्यात् पैङ्गल्यादिवाग्निव्यवहारो माणवक इति चेत्—न, मुख्ये साधकाभावात्। भावे वास्तु गोत्वसिद्धिरस्मादेवानुमानादिति। एवं महिषीत्वाश्वत्वघटत्वादिजातयः सत्त्वान्नेया इति।

ननु सिध्यतु जातिः, विशेषास्तु न सिध्यन्ति प्रमाणाभावात्। नित्यद्रव्याणि व्यावर्तकधर्मवन्ति द्रव्यत्वाद् घटवदिति चेत्—न, द्रव्यत्वादिना सिद्धसाधनात्। न द्रव्यव्यावर्तकधर्मवन्ति इति·········[पृथि]वीत्वादीना सिद्धसाधनात्। न पृथिव्यादिपरमाणवः पृथिव्यादिव्यावर्तकधर्मवन्त इति साध्यत इति········पाकजरूपादिः सिद्धसाधनात् कार्यपृथिव्यां तेषामभावात्। अपार्थिवपरमाणु·······वर्तकधर्मवानिति साध्यत इति चेत्—न, शुक्लपार्थिवपरमाणुपक्षीकरणे शुक्ल·······तर्कत्वात् शुक्लपार्थिवपरमाणुः शुक्लपार्थिवपरमाणु·········साध्यत इति चेत्—न, शुक्लतरशुक्लतमरूपरहितशुक्लपार्थिवपरमाणुपक्षीकरणे शुक्लत्वरहितशुक्लरूपेण सिद्धसाधनात्। शुक्लतरशुक्लतमत्वरहितशुक्लरूपवान् पार्थिवपरमाणुः शुक्लतरशुक्लतमत्व·········वतर्कधर्मवानिति साध्यत इति चेत्—न, कालान्तरोत्पन्नैतन्निकृष्टकृष्णरूपादिभिः सिद्धसाधनात्। एकस्मिन्नेव परमाणौ कालभेदेन पाकजकृष्णरूपादिस्वीकारात्। इदानीं शुक्लतरशुक्लतमत्वरहितत्वशुक्लरूपपार्थिवपरमाणुरिदानीं शुक्लतरशुक्लतमत्वरहितशुक्लरूपवान् पार्थिवपरमाणुव्यावर्तकधर्मवानिति साध्यत इति चेत्—न, रसगन्धस्पर्शादिविशेषैः सिद्धसाधनात्। अयं पार्थिवपरमाणुरेतत्समानगुणपार्थिवपरमाणुव्यावर्तकधर्मवानिति साध्य इति चेत्—न, गुणानां समानत्वं किं सजातीयसत्त्वं विजातीयत्वाभावो वा ? नाद्यः, एतन्निष्ठशुक्लरूपादिभिः सिद्धसाधनात्। तेषामपि शुक्लरूपादिजातीयकृष्णरूपादिमत्पार्थिवपरमाणुव्यावर्तकत्वात्। न द्वितीयः, एवंविधपार्थिवपरमाणोः तत्क्षेपणवतो धर्मित्वे एवंविधपार्थिवपरमाणोरनुत्क्षेपणादिमतश्च व्यावर्तकधर्मसाधन उत्क्षेपणादिनैव सिद्धसाधनात्। उत्क्षेपणादिमत्त्वेनान्वितैवंविधपार्थिवपरमाणुरनुत्क्षेपणादिमत्त्वेनानिश्चितैवंविधपार्थिवपरमाणोर्व्यावर्तकधर्मवत्त्वसाधने चोत्क्षेपणादिनार्थान्तरप्रसङ्गात्। उत्क्षेपणवत एवंविधपार्थिवपरमाणोरनुत्क्षेपण-

वत एवंविधपार्थिवपरमाणोर्व्यावर्तकधर्मवत्त्वसाधने च यदि द्व्यणुकवतो धर्मित्वं द्व्यणुकरहिताच्च व्यावर्तकधर्मवत्त्वं साध्यते तदा द्व्यणुकेन सिद्धसाधनम् ।

अथ द्व्यणुकवत्त्वेनानिश्चितस्यैवंविधपार्थिवपरमाणोर्धर्मित्वं द्व्यणुकवत्त्वेनानिश्चितैवंविधपार्थिवपरमाणोश्च व्यावर्तकधर्मवत्त्वं साध्यते । तदा द्व्यणुकेनार्थान्तरम्, द्व्यणुकवत एवंविधपार्थिवपरमाणोर्धर्मित्वं द्व्यणुकवतैवंविधपार्थिवपरमाणोश्च व्यावर्तकधर्मवत्त्वं साध्यते । तदापि यद्विक्षेपणव[द्]द्व्यणुकवत एवंविधपार्थिवपरमाणोर्धर्मित्वमनुत्क्षेपणादिवदेवंविधद्व्यणुकवतः पार्थिवपरमाणोश्च व्यावर्तकधर्म(वत्)त्वं साध्यते, तदोत्क्षेपणवता द्व्यणुकेन सिद्धसाधनम्, एवंविधत्वेनानिश्चितस्यैवंविधत्वेनानिश्चितात् व्यावर्तकधर्मवत्त्वसाधने चोत्क्षेपणवता द्व्यणुकेनार्थान्तरम् । अथोत्क्षेपणवत् द्व्यणुकैवंविधपार्थिवपरमाणोर्धर्मित्वं उत्क्षेपणवत् द्व्यणुकवतश्चैवंविधपार्थिवपरमाणोर्व्यावर्तकधर्मवत्त्वं साध्यते, तदापि यथारब्धत्र्यणुकद्व्यणुकवत एवंविधपार्थिवपरमाणोर्धर्मित्वमनारब्धत्र्यणुकद्व्यणुकवतश्चैवंविधपार्थिवपरमाणोर्व्यावर्तक-धर्मवत्त्वं साध्यते, तदारब्धत्र्यणुकद्व्यणुकेन सिद्धसाधनम् । अनिश्चितैवंविधस्य पार्थिवपरमाणोरनिश्चितैवंविधपार्थिवपरमाणुव्यावर्तकधर्मवत्त्वसाधने च………………विध पार्थिवपरमाणोरेतद्व्यणुकवतैवंविधपार्थिवपरमाणोर्व्यावर्तकधर्मवत्त्वं साध्यते । तर्हि अतीतानागतैवंविधपार्थिवपरमाण्वन्तरैतन्निष्ठद्व्यणुकेन सिद्धसाधनम् । अथायं परमाणुरेतन्निष्ठजातिरहित ……………त्वानधिकरणेदानीन्तनैतन्निष्ठगुणकर्मावृत्तिजातिमत्त्वरहितेदानीन्तनगुणकर्माश्रयेदानीन्तनैतत्प्रतिद्व्यणुकाधिकरणेदानीन्तनव्यावर्तकाभावाश्रय इति साध्यते, तदपि न, एवंविधव्यावर्तकत्वम् किमेवंविधव्यावर्तकत्वमेवंविधव्यावृत्त्युत्पादकत्वं वा एवंविधव्यावृत्तिज्ञापकत्वं वा, एवंविधव्यावृत्तिसाक्षात्कारजनकत्वं वा ?

नाद्यः एतत्परमाणुनिष्ठरूपादिभिः सिद्धसाधनात् ।

द्वितीयेऽप्रसिद्धविशेषणत्वात् । व्यावृत्तेरजन्यत्वेन तदुत्पादकस्याप्रसिद्धेः ।

न तृतीयः, प्रमेयत्वादिभिः सिद्धसाधनात् । अयं परमाणुरेवंविधव्यावृत्तिमान् प्रमेयत्वादित्यादिभिः एवंविधव्यावृत्तेरनुमानात् । एतत्परमाणुनिष्ठरूपादिभिश्च सिद्धसाधनात् । अयं परमाणुरितरेभ्यो भिद्यते एतस्माद्रूपादेः । न यदेवं न तदेवम्, यथा घट इत्यनुमानाच्च ।

न चतुर्थः, एतन्निष्ठरूपादिभिः सिद्धसाधनात् । तेषामपि योगिनिष्ठस्वविशिष्टपरमाणुसाक्षात्कारजनकत्वात्, विशिष्टसाक्षात्कारे विशेषणात्यन्ताभाववतो व्यावृत्तेः स्फुरणात् । एतत्परमाणुरूपादयो नैवंविधपरमाणुव्यावर्तकाः एवंविधरूपादित्वात् । एवंविधपरमाण्वन्तररूपादिवदिति चेत्—न, दृष्टान्तस्य साध्यविकलत्वात् । एवंविधपरमाणुरूपादेरप्येवंविधपरमाण्वन्तरव्यावर्तकत्वस्वीकारात् । एतत्परमाणुरूपादयो नैवंविधरूपादि ततो व्यावर्तकाः, एवंविधरूपादित्वात्, एवंविधरूपादिवत् इति चेत्—



न, एवंविधरूपादिमत एतद्व्यावर्तकस्य अप्रसिद्ध्यैतदभावस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात् । विशेषणादव्याप्यसिद्धेः । रूपादीनां भवता व्यावर्तकत्वानिषेधात् ।

अयं परमाणुरेतन्निष्ठद्रव्यगुणकर्मत्वरहितैवंविधपरमाणुव्यावर्तकधर्मवानिति साध्यत इति चेत्—न, एतन्मात्रनिष्ठैतद्गुणकर्मप्रागभावप्रध्वंसादिभिः सिद्धसाधनार्थान्तरयोर्दुर्वारत्वात् ।

अयं परमाणुरेतन्निष्ठद्रव्यगुणकर्मत्वरहितैवंविधपरमाणुव्यावर्तकभाववानिति साध्यते इति चेन्न, एतत्परमाणुनिष्ठरूपादिसमवायेन सिद्धसाधनार्थान्तरयोरन्यतरस्य दुर्वारत्वात् । समवायस्यैकत्वेन सर्वत्र सत्त्वात् । नैवंविधपरमाणुव्यावर्तकत्वमिति चेत्—न, एतत्परमाणुरूपादिसमवायस्यैवंविधपरमाण्वन्तरव्यावर्तकत्वसिद्ध्यास्य चरितार्थत्वेनार्थान्तरस्य तदवस्थत्वात् । एवंविधपरमाण्वान्तराव्यावृत्तत्वेऽपि समवायस्यैवंविधपरमाण्वन्तरव्यावृत्तिसाक्षात्कारजनकत्वासम्भवाच्च । समवायव्यतिरिक्तत्वेन साध्यं विशेषणीयमिति चेत्—न, समवायव्यतिरिक्तत्वेन तद्रूपादिमत्त्वेनार्थान्तरप्रसङ्गात् । एतद्रूपाद्याश्रयत्वमप्यभाव एवेति भावग्रहणेन निरस्तमिति चेत्—न, भावत्वं किं विधित्वं, द्रव्यादिषल्लक्षणान्यतमत्वं वा ? आद्य एतद्रूपादिमत्त्वस्यापि भावत्वमेवेति दुर्वारमर्थान्तरत्वम्, प्रतियोगिज्ञानमन्तरेणापि एतद्रूपादिमानित्येतद्रूपादिमत्त्वस्य विधित्वेन प्रत्ययात् । द्वितीये पुनरप्रसिद्धविशेषणत्वम्, विशेषणासिद्धौ तल्लक्षणस्याप्यप्रसिद्धत्वेन द्रव्यादिषल्लक्षणान्यतमत्वस्याप्यसिद्धेः ।

**मीमांसकादीन्** प्रति शक्तिज्ञानादिभिरर्थान्तरप्रसङ्गाच्च व्यावर्तकग्रहणयोर्वैयर्थ्यात् । एतेन समानजातिगुणकार्याः परमाणवो मुक्तात्मानत्व[श्च]मिथो व्यावर्तकधर्मसमवायिनो द्रव्यत्वात् । घटवदित्यादयः प्रयोगा निरस्ताः ।

व्याघाताच्च । एकैकनिष्ठानां परस्परव्यावर्तकत्वासम्भवात् । परस्परं व्यावर्तकानां चैकैकपरमाण्वादिनिष्ठत्वानुपपत्तेः । मिथःशब्दस्य च परस्पराभिधायकत्वात् । मिथःशब्दार्थस्य च परमाणुघटपटाद्यनुगतस्य निर्वक्तुमशक्यत्वात् । व्यावृत्तस्य व्यावर्तकत्वानुपपत्तेः पक्षीकृतपरमाणुरूपादिभिः सिद्धसाधनात् । तेषामपि मिथो घटपरमाणुव्यावर्तकत्वात् । घटादिनिष्ठरूपादिभिः सिद्धसाधनाच्च ।

परमाणूनामपि घटादिनिष्ठरूपादिसमवायाश्रयत्वेन तत्समवायित्वात् । समवायस्यैकत्वात् व्यावर्तकधर्माश्रयत्वं साध्यते । न च घटादिरूपादयः परमाण्वाश्रया इति न सिद्धसाधनमिति चेत्—न, परस्परव्यावर्तकाभावसिद्ध्या[ध्या]स्य चरितार्थत्वेनार्थान्तरप्रसङ्गात् ।

यदप्यनुमानम्—मनो मनोऽन्तरव्यावृत्तं निःसामान्यं समवायिद्रव्यत्वात् । घटवदिति, तदपि न युक्तम् । मनोऽन्तरव्यावृत्तमनस्त्वावान्तरजातिसिद्ध्या[ध्या]र्थान्तरत्वात् । मनोऽन्तरव्यावृत्तपदेन पक्षीकृतमनोव्यतिरिक्तसकलमनोव्यावृत्तत्वं विवक्षितमिति

चेत्—न, तथा सति पक्षीकृतमनोव्यतिरिक्तमनःसु द्रव्यत्वस्य व्यभिचारात्। पक्षीकृतमनोव्यतिरिक्तत्वं हेतोर्विशेषणमादेयमिति चेन्न, अमनस्त्वेन सोपाधित्वात्।

न चास्य पक्षेतरता। मनोऽन्तरव्यावृत्तपदेन पक्षीकृतमनोव्यतिरिक्तसकलमनोव्याप्याद्विपक्षादपि व्यावृत्तत्वात्। मनस्त्वेन प्रतिपक्षत्वाच्च। मनोऽनेकमनोवृत्तित्वरहित[म्]निःसामान्यसमवायिद्रव्यत्वात् घटवदित्यपि न युक्तम्। घटत्वेन ...... सिद्धसाधनात्। तस्यापि मनोऽमनोवृत्तिरहितत्वात् अनेकमनोवृत्तिरहितत्वाच्च सामान्यरहितत्वाच्च पक्षीकृतमनःसमवायित्वाच्च समवायस्यैकत्वात् मनोऽमनोवृत्तित्व ...... ......सामान्याश्रय इति साध्यत इति चेन्न, मनोनिष्ठकर्मवेगपरत्वापरत्वप्रागभावसिद्धसाधनात्। ...... ......न दत्तोत्तरत्वाच्च। तस्य भावत्वसिद्ध्याप्यस्य चरितार्थत्वेनार्थान्तरस्य तदवस्थत्वाच्चेति।

यदप्यनुमानं, विमतं ...... तिरिक्तसमवायिद्रव्यत्वाद् घटवदिति ...... ......त्व द्व्यणुकैरेव सिद्धसाधनात्। आकाशकालदिगात्मनां च धर्मित्वे कर्मव्यतिरिक्तविशेषणवैयर्थ्यात्। तेषु कर्माभावेन व्यावर्त्याभावात्। मनसश्च धर्मित्वे द्व्यणुकत्वसमवायिकारणसिद्ध्या अस्य चरितार्थत्वेनार्थान्तरग्रस्तत्वात्। मनसोऽपि गुणकर्मसामान्यातिरिक्तघटसमवायित्वेन सिद्धसाधनाच्च।

समवायस्यैकत्वात् गुणकर्मसामान्यातिरिक्तघटनिष्ठसमवायाश्रयत्वात्। गुणकर्मसामान्यातिरिक्तभावाश्रयत्वं साध्यत इति चेत्—न, अर्थान्तरस्य तदवस्थत्वात्। दृष्टान्तस्य साध्यविकलत्वाच्च। घटे गुणकर्मसामान्यातिरिक्तभावाभवात् घटावयवानां घटानाश्रितत्वात्। उदकादयो घटाश्रिताः सन्तीति घटो दृष्टान्त इति चेत्—तर्हि गगनादिष्वपि परमाण्वादयः सन्तीति सिद्धसाधनं दुर्वारम्।

गगनादिसंयुक्ताः परमाण्वादयो न तदाश्रिता इति चेत्—न, गगनं द्रव्याश्रयो द्रव्यत्वादिति द्रव्याश्रयत्वसिद्धेः। मूर्तानां गगनाश्रितत्वासिद्ध्याप्यस्य चरितार्थत्वेनार्थान्तरस्य दुर्वारत्वाच्च। द्रव्यगुणकर्मसामान्यातिरिक्ताश्रय इति साध्यत इति चेत्—न, समवायेन सिद्धसाधनात्। समवायोऽनाश्रित इति चेत्—न, तस्य समवायनिष्ठतयैव सिद्धेः नित्यद्रव्याभावसंबन्धत्वादिनाश्रितत्वानुमानाच्च समवायस्याश्रितत्वसिद्ध्याप्यस्य चरितार्थत्वेनार्थान्तरस्य दुर्वारत्वाच्च। द्रव्यगुणकर्मसामान्यसमवायातिरिक्ताश्रयः साध्यत इति चेत्—न, अभावेन सिद्धसाधनात् द्रव्यगुणकर्मसामान्यसमवायातिरिक्तभावाश्रयस्याश्रय इति साध्यत इति चेत्—न, **भाट्टं** प्रति शक्तिज्ञातताभ्याम् **प्राभाकरं** इति शक्तिसंख्यासादृश्यक्रमैः सिद्धसाधनात्। तद्व्यतिरिक्तविशेषणोपादाने चाप्रसिद्धविशेषणत्वात् तदसिद्धौ तद्व्यतिरिक्तत्वस्याप्यप्रसिद्धेः, **भाट्टादीन्** प्रत्यसिद्धविशेषणत्वाच्च। तेषामपि द्रव्यगुणकर्मसामान्यसमवायशक्त्यादिव्यतिरिक्तभावप्रसिद्धेः। **भाट्टानां** समवायासिद्धौ तद्व्यतिरिक्तत्वासिद्धेश्च। आकाशं द्रव्यगुणजातिव्यतिरिक्तभावाश्रय इति साध्यते। तथा च नाप्रसिद्धविशेषणत्वं दृष्टान्तस्य साध्य-



विकलत्वं वा। घटे कर्मण एव तथाविधस्य प्रसिद्धत्वादिति चेत्—न, अनुत्पन्नकर्मविनष्टघटादौ व्यभिचारात्। अनुत्पन्नकर्मव्यतिरिक्तत्वेन हेतुर्विशेषणीय इति चेत्—न, कर्मत्वेन सोपाधित्वात्। न चास्य पक्षेतरत्वम्। अनुत्पन्नकर्मविनष्टघटादेर्विपक्षादपि व्यावृत्तेः पूर्वोक्तसिद्धसाधनादेस्तदवस्थत्वाच्च।

यदप्यनुमानम्—परममहत्त्वं गुणत्वव्यतिरिक्तावृत्तिभावसमानाधिकरणं महत्त्वात् घटमहत्त्ववदिति। तदप्ययुक्तम्। शक्तिज्ञाततादिभिः **भाट्टादीन्** प्रति सिद्धसाधनात्। अव्यावृत्ताकाशनिष्ठद्रव्यत्वावान्तरजातिसिद्ध्यास्य चरितार्थत्वेनार्थान्तरग्रस्तत्वा[त्] सामान्यवत्। सामान्यातिरिक्तसमवायिसमवायित्वात्।...... दायांशसमवायांशव्यावृत्तत्वसिद्ध्याप्यस्य चरितार्थत्वेनार्थान्तरग्रस्तत्वाच्च। नित्यपरिमाणत्वाभावेन सोपाधित्वाच्च।

न चास्य पक्षेतरता, परमाणुपरिमाणात् विपक्षादपि व्यावृत्तेः। उपाधिविरहेण सत्प्रतिपक्षत्वाच्चेति पूर्वोक्तसाध्यशतभावविशेषणस्य दोषग्रस्तत्वाच्चेति।

यदप्यनुमानम्, अयं परमाणुरेतन्निष्ठसामान्यवत्सामान्यातिरिक्तसमवायी समवायित्वात् द्रव्यत्वाच्च घटवदित्यादि, तदपि न। गगनादिना सिद्धसाधनात् तस्यैतन्निष्ठसामान्यवत् सामान्यातिरिक्तत्वात्। अस्य च परमाणोस्तन्निष्ठसमवायाश्रयत्वात्, समवायस्यैकत्वात् एतन्निष्ठसामान्यवत् सामान्यातिरिक्ताश्रयत्वं साध्यत इति चेत्—न, गगनादिनैव सिद्धसाधनात्। **प्राभाकरैः** सामान्यरहितत्वसर्वमूर्ताश्रयत्वस्वीकारात्। सर्वमूर्तसमानदेशत्वादिति **प्रशस्तपाद**वचनात्। गगनादयो द्रव्याश्रिताः प्रमेयत्वादित्यादिप्रमाणत्वाच्च। आकाशकालदिगात्मव्यतिरिक्तत्वेन साध्यं विशेष्यत इति चेत्—न, एतन्निष्ठाभावेन सिद्धसाधनात्। भावत्वमपि साध्यविशेषणमिति चेत्—न, **प्राभाकरं** प्रति रूपादिना सिद्धसाधनात्। तन्मते **गगनरूपादीनां** निःसामान्यत्वात्। [एतत्] एतत्परमाणुनिष्ठसामान्यत्ववदसिद्धौ तद्व्यतिरिक्तत्वसाध्यप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वाच्च भावविशेषणवैयर्थ्याच्च। **प्रभाकरेणाभावाङ्गी**कारात् तं प्रति भावविशेषणं नोपादीयते इति चेत्—न, भावाभावेन सिद्धसाधनाद्यापत्तेः। एतत्परमाणुनिष्ठसामान्यप्रसिद्धेरेतत्परमाणुनिष्ठसामान्यवत् व्यतिरिक्तत्वस्य **प्राभाकरं** प्रति असिद्धत्वाच्च। **भाट्टं** प्रत्यसिद्धविशेषणत्वाच्च। तेन धर्मधर्मिणोरभेदमभ्युपगच्छता कस्यचिदपि परमाणुनिष्ठत्वानङ्गीकारे तद्विरहस्याप्यनङ्गीकारात्। सामान्यरूपादीनामप्यभेदमभ्युपगच्छन्तं प्रति तद्वत्तस्याप्यप्रसिद्धत्वात्। व्यर्थविशेषणत्वाच्च। सम्यग्धर्मधर्मिणोरभेदमिच्छता एतन्निष्ठसामान्यवतो व्यावर्त्यस्यानङ्गीकारादिति।

यद्य[द]प्यनुमानं सत्तासामान्यसमवायातिरिक्ताभावव्यावृत्ताजातित्वात् गोत्ववदिति। तदपि न, पूर्वोक्तभावनिरूक्तिप्रयुक्तदोषात् सव्यावृत्तित्वेन सोपाधित्वाच्च।

न च प्रमेयत्वादिविपक्षाणां व्यावृत्तत्वेनैवाव्यावृत्तत्वात् विशेषणस्य व्यावर्त्यविपक्षाभावादस्य पक्षेतरत्वमिति वाच्यम्। भावत्वादेः विपक्षस्य व्यावर्त्यस्य सत्त्वात्।

किं च सत्ये[न्ते]ति किं व्यावृत्तत्वरहिता जातिर्विवक्षिताद्र व्यगुणकर्ममात्रवर्तिनी वा ? नाद्यः, व्याघातात् । न द्वितीयः, व्यावृत्तत्वरहितजातौ व्यभिचारात् । व्यावृत्ता जातित्वादिति चेन्न, भावत्वे व्यभिचारात् ।

भावत्वं न जातिरिति चेत् ? न, गोत्वतुल्यन्यायेन तस्य जातित्वसिद्धेः । घटो घटवृत्तिभावव्यावृत्तत्वरहितजातिमान् भावत्वात् घटादिवदिति भावमात्रनिष्ठजातिसिद्धेश्च द्रव्यगुणकर्ममात्रजातित्वादिति चेत् – न, दृष्टान्तस्य साधनविकलत्वापत्तेः । गोत्वस्य द्रव्यगुणकर्मवृत्तित्वाभावात् द्रव्यगुणकर्मातिरिक्तावृत्तिजातित्ववदिति चेत् – न,.........वृत्तत्वेन सोपाधित्वात् । न चास्य पक्षेतरत्वम्, भावत्वादेः विपक्षाद्व्यावृत्तत्वात् । अर्थाव्यावृत्तत्वेन सत्प्रतिपक्षत्वाच्चेति द्रव्यगुणकर्मसामान्यसमवायातिरिक्तभावाश्रयः..........तस्मात् साधकाभावात् बाधकसद्भावाच्च न विशेषसिद्धिरिति । तदयुक्तम् । कालः संख्यापरिमाणपृथक्त्वसंयोगत्वविभागत्वरहितसमवायाश्रयः द्रव्यत्वाद् घटवत् । कालः कालनिष्ठसामान्यवत्त्वरहितजातित्वरहितसमवायाश्रयः द्रव्यत्वाद् घटवत् । कालः कालनिष्ठगुणत्वरहितजातित्वरहितसमवायाश्रयः द्रव्यत्वाद् घटवत् इत्यादेः सत्त्वात् । न चात्र समवायाभावाभ्यां सिद्धसाधनमर्थान्तरं वा समवायाधारपदेन तयोर्व्यावृत्तेः । नापि कार्यत्वादिकमुपाधिः । परमाण्वादौ साध्याव्यापकत्वादिति ।

इदमस्मान्निरादर्शि विशेषाणां समर्थनम् ।
पूर्ववैशेषिकाचार्यमर्यादातिक्रमं विना ॥

यदा तु समवायाभावयोरपि समवायाधारत्वमित्यस्मन्मतस्वीकारस्तदा पूर्वानुमानानां समवायाभ्यां सिद्धसाधनार्थान्तरग्रस्तत्वात् । अन्यथा प्रयुज्यते कालः संख्यापरिमाणपृथक्त्वसंयोगविभागत्वरहितजातित्वसमवायित्वरहितजातित्वसमवायित्वरहितभावाश्रयः द्रव्यत्वाद् घटवत् । न च घटादिना सिद्धसाधनमर्थान्तरं वा, घटादेः कालाश्रयत्वनिषेधात् । अनिषेधे वा द्रव्यत्वरहितत्वेन साध्यविशेषणात् । नापि संख्याश्रयत्वपरिमाणाश्रयत्वादिना सिद्धसाधनमर्थान्तरं वा तस्याभावत्वेन भावत्वविशेषणेन निरस्तत्वात् भावाश्रयत्वरहितत्वेन साध्याविशेषणात् । न च संख्याश्रयत्वेष्वाश्रयत्वाभावं पृथक्त्वेषु पृथक्त्ववत् परत्वेषु परत्ववत् अपरत्वेषु अपरत्ववत् संख्याद्याश्रयेषु आश्रयत्वस्यानुभवसिद्धत्वात् ।

नापि शक्तिज्ञाततादिभिः सिद्धसाधनम् । तेषामपि सिद्धत्वात् । **भाट्टादीनां** तानि सिद्धानीति चेत्—न, विना प्रमाणं तेषामप्यसिद्धेः । अर्थापत्त्यादिभिः तानि तेषां सिद्धानीति चेत् न, अन्यथोपपत्त्यादिभिस्तेषां दृष्टत्वात् । नापि शक्त्यादिभिरर्थान्तरतापि, [ता, वि] कल्पासहत्वात् । तथा हि किं विशेषलक्षणरहितप्रमाणान्तरसिद्धशक्त्यादिनेदं चरितार्थमित्यर्थान्तरत्वम् । किं वा विशेषलक्षणरहितप्रमाणान्तरप्रसिद्धशक्त्यादिनेदं चरितार्थत्वं, किं वा यदनेन सिध्यति तस्य शक्त्यादिसंज्ञेत्यर्थान्तरत्वम् ? नाद्यः शक्त्या-



दिगोचरप्रमाणनिषेधात् । न द्वितीयः, विशेषलक्षणरहितस्यास्मादसिद्धेः । न तृतीयः, अविवादात् । पुरुषेच्छया यस्य कस्यापि पदस्य यत्र क्वचन संकेतसंभवात् । **भाट्टादीन्** प्रति शक्त्यादिना सिद्धसाधनार्थान्तरनिरासार्थत्वं वा साध्ये प्रत्यक्षविशेषणोपादानात् । **भाट्टादिभिः** शक्तेरप्रत्यक्षत्वाभ्युपगमात् । कालनिष्ठसंख्यासादृश्यक्रमाणामपि **प्राभाकरेणा**प्रत्यक्षत्वाभ्युपगमात् । **भाट्टेनापि** ज्ञानफलसंवेदनमात्मनिष्ठमभ्युपगम्यतया ज्ञाततानङ्गीकारात् तयोः सिद्धसाधनार्थान्तरयोर्वक्तुमशक्यत्वात् । ज्ञाततावादिनापि **भाट्टेन** कालादीन्द्रियत्ववादिना तन्निष्ठज्ञाततायाः प्रत्यक्षत्वानभ्युपगमात् कालप्रत्यक्षवादिनापि तन्निष्ठज्ञातता...............**भाट्टं** प्रति सिद्धसाधनार्थान्तरपरिहारार्थं साध्ये ज्ञानाजन्यविशेषणोपादानात् ज्ञानाजन्यविशिष्टोक्तसाध्यस्य घटादावभावात् द्रव्यत्वव्यभिचारात् साध्यविकलश्च । घटो ज्ञान[त]इति चेत्–न, नित्यत्वेन हेतुविशेषणात् परमाण्वादेश्च दृष्टान्तत्वेनोपादानात् कालनिष्ठज्ञानजन्यत्वरहितत्वेन वा साध्यविशेषणात् । एवंविधसाध्यस्य वा घटादावपि सत्त्वात् । **भाट्टं** प्रति सिद्धसाधनानिवारकत्वाच्च मनसो वा धर्मित्वेनोपादानात् । तस्य च **भाट्टमते**ऽपि अप्रत्यक्षत्वेन तन्निष्ठज्ञाततायां अप्रत्यक्षाया अप्रत्यक्षविशेषणत्वेन निरासात् । ज्ञाततालक्षणरहितत्वेन वा साध्यविशेषणात् । न च ज्ञातता[ऽ]सिद्धौ तल्लक्षणस्यासिद्धत्वेन तद्रहितस्याप्यप्रसिद्धेरप्रसिद्धविशेषणतेति वाच्यम् । ज्ञातोऽयमित्यनुभवबलेन ज्ञाततायाः उभयवादिसिद्धत्वात् ।

तस्मात् ज्ञानविषयत्वतदतिरिक्तयोरेव विवादात् संख्यायाश्च संख्यात्वरहितत्वेन निरासात् । सादृश्यस्य च जातित्वे जातित्वरहितत्वेन निराकरणात् । भूयोऽवयवसामान्ययोगत्वे च तस्य समवायलक्षणरहितत्वेन निराकरणात् । काले संभवाच्च तदर्थान्तरत्वे च भावविशेषणत्वेन निवर्तनात् । भावत्वे वा तस्य सर्वत्रैकत्वे सादृश्यव्यतिरिक्तत्वेन साध्यविशेषणात् । भिन्नत्वे च सादृश्यलक्षणरहितत्वेन साध्यविशेषणात् । क्रमस्य च देशकृतस्यासर्वगतनियमस्य सर्वगते काले असंभवात् । कालकृतस्य कार्यनियतस्याकार्येऽकालेऽसंभवात् । संभवे वा तन्निवृत्त्यर्थं क्रमलक्षणरहितत्वेन साध्यविशेषणात् सादृश्यक्रमयोः पदार्थान्तरयोः सिद्धौ तल्लक्षणस्याप्रसिद्धत्वेन तद्द्वित्वरहितस्यासिद्धप्रसिद्धविशेषणतेति चेत्—न, तयोः पदार्थान्तरतासिद्धावपि सदृशोऽयं क्रमवानयम् इत्यनुभवसिद्धत्वेन तल्लक्षणसिद्धौ तद्रहितत्वस्यापि सिद्धेः । एवमेव स्वमतकल्पितपदार्थान्तरावष्टम्भप्रवृत्ततीर्थिकान्तरव्युत्पादितसिद्धसाधनार्थान्तरयोर्निरासात् ।

यद् वा कालः कालनिष्ठैकत्वैकपृथक्त्व[तत्त्व]ातिरिक्तानेकनिष्ठरहितकालैकगोचरज्ञानजन्यत्वरहिताश्रयत्वरहितप्रत्यक्षाभावाश्रयः द्रव्यत्वाद् घटवदिति । न चात्र **मीमांसकम्** प्रति शक्त्यादित्वसिद्धसाधनमर्थान्तरं वा । एकत्वसंख्यया सिद्धसाधनादेरेकत्वव्यतिरिक्तत्वेन निरासात् अनेकसंख्यासादृश्यक्रमानेकनिष्ठज्ञाततादिभिः

सिद्धसाधनार्थान्तरयोश्च कालैकगोचरज्ञानाजन्यत्वेन निरासात्। शक्यासिद्धसाधनयोः प्रत्यक्षत्वेन निरासात् **मीमांसकानां** शक्तेरप्रत्यक्षत्वं विशेषणमयुक्तम्।

**वैशेषिकमते** सर्वपदार्थानां प्रत्यक्षत्वेनाप्रत्यक्षव्यावर्त्य[ा]भावेन विफलत्वादिति चेत्—न, **मीमांसकं** प्रति सिद्धसाधनतानिवृत्त्यैव फलवत्त्वात्। नापि कालगतैकत्वाश्रयकालगतैकपृथक्त्वाश्रयत्वकालगतमहत्त्वाश्रयैरसिद्धसाधनमर्थान्तरत्वं वा तेषामभावत्वेन भावविशेषणेन निरासात् कालगतैकत्वात्यन्ताभावात्यन्ताभावस्यैव कालगतैकत्वाश्रयत्वात्। कालगतैकपृथक्त्वात्यन्ताभावात्यन्ताभावस्य च कालगतमहत्त्वात्यन्ताभावात्यन्ताभावस्य च कालगतमहत्त्वाश्रयत्वात्। कालगतैकत्वैकपृथक्त्वमहत्त्वाश्रयत्वातिरिक्त·········समवायित्वरहितभावाश्रयः द्रव्यत्वात्, घटवदिति। न चात्र कर्मणा सिद्धसाधनमर्थान्तरं वा, तस्य मूर्तमात्राश्रयस्य कालेऽसंभवात्। नापि शक्त्यादिभिरर्थान्तरं तेषामसिद्धौ कृतेरर्थान्तरस्याप्यसिद्धत्वात्। सिद्धौ वा तेषां द्रव्यादावन्तर्भावेन द्रव्यत्वरहितत्वादिना निरासादिति।

यद्वा कालः कालनिष्ठार्थत्वरहिताभावाश्रयः द्रव्यत्वाद् घटवदिति। यद् वा कालः कालनिष्ठार्थत्वरहितानेकनिष्ठत्वरहिताभावाश्रयः द्रव्यत्वात् घटवदिति। न चात्रार्थत्वासिद्धौ तद्राहितत्वासिद्धेरप्रसिद्धविशेषणतेति वाच्यम्। द्रव्यगुणकर्ममात्रनिष्ठजातेरुभयवादिसिद्धत्वात्। तस्य एवार्थसिद्धशब्दप्रवृत्तिनिमित्तत्वादिति। न चामीषां द्रव्यत्वावान्तरजातिमत्त्वरहितदिग्गकाशव्यतिरिक्ताभावत्वादिरुपाधिः पक्षेतरत्वात् साध्याव्यापकत्वाच्च। भवन्मते शक्तिज्ञाततादीनां गुणादिष्वपि संभवात्। उपाधेरदूषणत्वाच्चेति। नापि द्रव्यत्वावान्तरजातिमत्त्वरहितादिगाकाशरहितदिगाकाशव्यतिरिक्तत्वेन सत्प्रतिपक्षत्वम्। अद्रव्यत्वेन सोपाधित्वादिति। एवं दिगादिसर्वनित्यद्रव्यपक्षीकरणे तत्तन्निष्ठगुणत्वद्रव्यत्वजातित्वद्रव्यपक्षीकरणे तत्तन्निष्ठगुणत्वद्रव[्य]त्वजातित्वसमवायित्वरहिताभावाश्रयतादिकं द्रव्यत्वमेव साधनीयमिति।

न च समवायस्यैकत्वेन समवायत्वजाते[र][रिति] सिद्धौ तद्रहितस्याप्यसिद्धेरप्रसिद्धविशेषणतेति वाच्यम्। समवायलक्षणस्यैव समवायत्वस्योभयवादिसिद्धत्वात्। तस्मादन्वयव्यतिरेकिणा नित्यद्रव्येषु विशेषसिद्धिरिति केवलान्वयिना च। तथा हि कालो गुणत्वजातित्वद्रव्यत्वसमवायत्वरहितकालनिष्ठाभावत्वरहिताश्रयो मेयत्वात् घटवदिति। काल एकत्वैकपृथक्त्वमहत्त्वातिरिक्तानेकनिष्ठत्वरहितकालनिष्ठाभावत्वरहिताश्रयो मेयत्वात् घटवदिति। न च रूपादिष्वनेकनिष्ठत्वरहितैवं धर्माभाववान् केवलान्वयित्वानुपपत्तिः। तत्तद्रूपाद्यन्यत्वात्यन्ताभावादेः संभवात्। कालसंख्यापरिमाणपृथक्त्वसंयोगविभागत्वरहितजातित्वसमवायत्वद्रव्यत्वरहितकालनिष्ठाभावत्वरहिताश्रयो मेयत्वात् घटवत्। कालः संख्यापरिमाणपृथक्त्वसंयोग-



विभागत्वरहितजातित्वसमवायत्वद्रव्यत्वरहितकालनिष्ठाभावरहिताश्रयो मेयत्वात्, घटवदिति।

**न च संख्यादिपञ्चगुणमात्राश्रयायदिश्येवं[?]विधसाध्याभावात् न पक्षत्वासम्भवः। कालान्योन्याभावादिमादाय सपक्षत्वोपपत्तेः। विशेषमादाय पक्षतुल्योपपत्तेश्च।**

न चात्र शक्त्यादिभिः सिद्धसाधनम्, अर्थान्तरं वा पूर्वोक्तादेव न्यायात्। न चात्रोपाधिप्रतिपक्षसंभवः, केवलान्वयित्वादिति, न चायं घटः एतदन्यादि·········त्वनिष्ठत्वरहितनित्यनिष्ठगुणक्रमत्वरहितकिंचिन्निष्ठाद्विष्ठभावात्यन्ताभाववान् मेयत्वाद् घटवदिति।

यद् वा कालनिष्ठामहत्त्वमकालनिष्ठैकत्वैकपृथक्त्वान्यकालैकनिष्ठभाववान् मेयत्वात् घटवदित्यादिकेवलव्यतिरेकिणा च। तथा हि कालः कार्यत्वरहितगुणत्वरहितसमवायत्वरहितभाववान् नित्यद्रव्यत्वात्, न यदेवं न तदेवं यथा घटः अनित्यद्रव्यत्वात् तस्मात् तथेति। न चात्र परमाणुभिः सिद्धसाधनमर्थान्तरं वा, तेषां नित्यद्रव्यत्वेनानाश्रितत्वात्। यद् वा कालो मूर्तत्वरहितगुणत्वकर्मत्वजातित्वसमवायत्वरहितभावभाववान् विभुत्वात्। न यदेवं न तदेवं यथा घटो विभुश्चायं तस्मात् तथेति।

न चैवंविधभावप्रसिद्धेऽप्रसिद्धविशेषणतेति वाच्यम्। गगनादेरेव तथाविधस्य प्रसिद्धत्वात्। न चैवंविधभावत्वस्याप्यप्रसिद्धेरप्रसिद्धविशेषणत्वमित्यपि साधीयः। तस्य साध्यपक्षसंसर्गरूपस्य सर्वानुमानेष्वप्रसिद्धस्यैव सिद्धेः। न चैवं विद्यमाने[न]सपक्षत्वेन केवलव्यतिरेकिभङ्गः। एवंविधभावसिद्धावपि तस्यानाश्रितत्वेन तद्वतः सपक्षस्यासंभवात्। न चैवंविधानातीतस्य पक्षे[ऽ]भावनिश्चयाद् बाधः। अनाश्रितत्वविशिष्टैवंविधात्। साधनात्·········एवंविधमात्रसाधने च बाधाभावात्। तस्याश्रितस्यापि संभवात्। न च काल एवंविधभाववान् मेयत्वादिति सत्प्रतिपक्षत्वम्। एवंविधभावात्यन्ताभावसाधने गगनात्यन्ताभावेन सिद्धसाधनार्थान्तरयोरन्यतरत्वापत्तेः। एवंविधसर्वभावात्यन्ताभावप्रसाधने च सर्वशब्देनान्याश्रितैवंविधसर्वभावविवक्षायां सिद्धसाधनादेस्तदवस्थात्। आश्रितानाश्रितैवंविधसर्वभावविवक्षया प्रसिद्धविशेषणत्वात्।

आश्रितैवंविधभावासिद्धौ तदभावस्याप्रसिद्धत्वात्। एवंविधसर्वभावप्रतीतौ तदभावस्यावगन्तुमशक्यत्वाच्च। एवंविधभावत्वात्यन्ताभावसाधनेऽप्यप्रसिद्धविशेष[ण]त्वात्। विशेषसिद्धेः पूर्वमेवंविधभावत्वस्याप्रसिद्धत्वेन तदत्यन्ताभावस्याप्रसिद्धत्वात्। अयं घट भूतलनिर्गुणादय(?)इत्यादौ च घटवत्त्वगुणवत्त्वादिनिषेधौ सर्वघटसर्वगुणनिषेधोपपत्तेः प्रतिबन्ध[ा]नवकाशात्। एकस्मिन्नपि घटे गुणे च घटवत्त्वगुणवत्त्वादेरत्यन्ताभावासंभवात्। न च भावत्वं साध्यं एवंविधभावत्वाश्रयो व्यक्तिर्वा?

नाद्यः, कालादौ नैवंविधभावत्वासिद्धावविशेषासिद्धेः। न द्वितीयः, यावत्प्रमितत्वाकांक्षाद्यन्यतमाश्रितव्यक्तिसाधने बाधात्। तदतिरिक्तव्यक्तिसाधने चाप्रसिद्धविशेषणत्वादिति। तदयुक्तम्। आश्रितत्वानाश्रितत्वविशेषणानवच्छिन्नैवंविधभावत्वाश्रयव्यक्तिसाधनात्। तस्याश्चाप्रसिद्धत्वात्। तथापि दैवगत्या किमसावाश्रिता उता[ना]श्रिता उभयथापि पूर्वदोष[पत्तिः]……………दिसाधकप्रमाणात्। प्रमाणान्तराद्[द्वि]विनाद्यः गगनादिसाधकप्रमाणेन गगनादिव्यतिरिक्ततथाविधव्यक्त्यसिद्धेः। न द्वितीयः तस्याभावादिति।……ग्राहकप्रत्यक्षेण तद्विशेषणत्वप्रत्यासत्त्या: सर्वतद्व्यक्तिग्राहकेण तदग्रहणात्। तथाविधभावत्वं नित्यद्रव्यव्यतिरिक्तवृत्तित्वातिरिक्तनिष्ठत्वरहितवत् मेयत्वाद् घटवदित्यादिनानुमानेन च तत्सिद्धेः। विशेषणसाधनेनैव विशेष[ा]सिद्धेः मूलानुमानवैयर्थ्यमिति चेत्—न, तस्यैवंविधेनाश्रितानित्यद्रव्यैवंविधानामाश्रितामूलानुमानवैयर्थ्यमिति भावान्तरसिद्धया वा चरितार्थस्य विशेषसाधकत्वान्मूलानुमानस्य च तथाविधनित्यद्रव्याश्रितसाधकत्वेन विशेषसाधकत्वात्।

अस्तु वा विशेषणसाधकादेव विशेषसिद्धेः तथापि सिद्धं नः समीहितम्॥

किंचित् सामान्यविशेषः। किंचिद् विशेष एवेत्युक्तम्। तत् किं सामान्यमेवेत्यपेक्षायां सूत्रम्,

## भाव इति ॥ १.२.४. ॥

इह स[भू] सत्तायामित्यस्य धातोर्भावोत्पन्नं यत् तस्य रूपं तेन भावो भवनं सत्तेति यावत्। यथा द्रव्यगुणकर्मस्वनुवृत्तित्वात् सत्ता सामान्यं तथा सामान्यविशेषसमवायेभ्यो व्यावृत्तत्वात् विशेषोऽपि। तस्मात् सामान्यविशेषः सत्ता, न तु सामान्यमेवेति। तन्न, सत्तायाः सामान्येभ्यो व्यावृत्तत्वा[द]नङ्गीकारात्। धर्मिग्राहकप्रत्य[क्षा]नुमानाभ्यां सामान्यादिव्यावृत्तत्वरहितायाश्च सत्तायाश्च सिद्धेः। व्यावृत्तौ वा सामान्यादिभ्यः सत्ता, तथापि नासौ सामान्यविशेषः। न द्रव्यगुणकर्मान्यतमव्यावृत्तत्वस्य जातिमद्व्यावृत्तत्वस्य वा विशेषत्वस्य सत्ताया असंभवात्। व्यावृत्तत्वमात्रस्य चात्र विशेषत्वेनाविवक्षितत्वात्। तस्मात् सामान्यमेव सत्ता। न मूर्तित्वे सति द्रव्यगुणकर्मान्यतमव्यावृत्तत्वरहितत्वस्यानुवृत्तत्वे सति जातिजातिमद्व्यावृत्तत्वरहितत्वस्य वा केवलसामान्यलक्षणत्वादिति।

एवं सति प्रमेयत्वादिकमपि केवलसामान्यं स्यात्। बाधः [भावः?]। अस्तु वा सत्यपि सामान्यविशेष एवानुवृत्तत्वे सति व्यावृत्तत्वस्य सामान्यविशेषलक्षणत्वात्। कथं तर्हि सामान्यमेवेति प्रवादः? न कथञ्चित् सूत्रकारेण सत्ता सामान्यमेवेत्यनभिधानात्। भाव इति सूत्रेण सत्तासामान्यमेवेत्यनभिधीयते इति चेत्—न, अभाव इति सत्ताभिधायिनोऽर्थस्य केवलसामान्यरूपतानभिधानात्। किं सामान्यमेवेत्याकांक्षायामवतरतो भाव इति सूत्रस्य भावः सामान्यमेवेति तात्पर्यमिति चेत्? किं सामान्यविशेष



इत्याकांक्षायामेव सूत्रावतारात्। किं सामान्यमेवेत्याकांक्षाया उत्तरमिति चेत्—न, किंचित् सामान्यमेवेत्याकांक्षाया एवाभावात्। भावे वा प्रमेयत्वादिकमेवेत्युत्तर(म्) सूत्रकारस्याभिप्रेतमिति वर्णनीयमिति ॥ ४ ॥

यदा तु सत्ता सामान्यमेव तदा कः सामान्यविशेष इत्याकांक्षायां सूत्रम्—

## द्रव्यत्वं गुणत्वं कर्मत्वं च सामान्यानि विशेषाश्चेति ॥१.२.५॥

नन्वनुपपन्नमेतत् नित्यत्वे सत्यनेकसमवेतत्वस्य सामान्यलक्षणत्वात्। अनेकनिष्ठत्वरहितसत्तानाश्रयाभावत्वस्य च विशेषलक्षणत्वात्, तयोश्चैकत्रासमावेशा[त्]।……… समावेशो[शे]वाऽतिव्यापकत्वप्रसङ्गादिति। तदयुक्तम्। द्रव्यत्वादौ सामान्यलक्षणत्वेऽपि विशेषलक्षणाभावात् विशेषपदप्रयोगस्य च विशेषसादृश्यव्यावृत्त्यर्थत्वनिश्चयत्वेन गौणत्वात्।

यद् वा सामान्यप्रतियोगी…… निमित्तं विशेषपदप्रयोगे च व्यावृत्तत्वं तदुभयं द्रव्यत्वाभाव इति द्रव्यादीनां सामान्यविशेषत्वं मुख्यमेवेति। एवं तर्हि कार्यद्रव्यसंयोगविभागानेकसंख्यानेकपृथक्त्वान्यपि सामान्यादीनि स्वरूपानु………… शेषाः स्युः, व्यावृत्तत्वादिति चेत्? सत्यमेतत्। अत एव सूत्रकारेण कार्यसामान्यप्रकरणे कारणद्रव्यादीनां सामान्यरूपता व्युदपादि। चकारोऽनुक्तसत्तारहितसमवायवत् पृथिवीत्वादिरूपत्वाद्युत्क्षेपणत्वादिसंग्रहार्थः। सत्तारहितसमवाय[स्य?]एवास्मिन्नाह्निके प्रतिपाद्यत्वादिति ॥ ५ ॥

यदि सत्तारहितसमवायवत् सर्वं सामान्यविशेषापत्तिः, [……विशेषः] तर्हि अन्त्यविशेषा अपि सामान्यविशेषाः स्युरित्याशंकापरिहारार्थं सूत्रम्—

## अन्यत्रान्त्येभ्यो विशेषेभ्य इति ॥ १.२.६ ॥

अन्यत्रेति परिवर्त[ज]नेनान्त्यविशेषव्यतिरिक्तसत्तारहितसमवायवत् सर्वं सामान्यविशेषः प्रतिपाद्यत इति। किं पुनरन्त्यत्वं विशेषाणाम्? अन्ते भवत्वम्। उत्पत्तिविनाशयोरन्ते वर्तत इत्यन्तशब्देन नित्यद्रव्याण्युच्यन्ते। तेषु भवन्तीत्यन्त्यशब्देन विशेषा उच्यन्ते इति आत्रेयाचार्याः।

**यद् वा अन्येषां विशेषणामन्तेऽवसाने भवन्तीत्यन्त्या उच्यन्ते**। तथा हि सत्तापेक्षया द्रव्यत्वं विशेषः। तदपेक्षया पृथिवीत्वादि। तदपेक्षयैकद्रव्यनिष्ठो विशेषः। न चान्त्यविशेषातिरिक्तव्यावर्तकमस्ति, तत्रानुवृत्तत्वानुपपत्तेः। तस्मात् स एव विशेषणामन्ते भवतीत्यन्त्य उच्यते इति।

यद् वा अन्ते सर्वमुक्तिकाले भवन्तीत्यन्ता उच्यन्ते। तर्हि[न हि]तदानीमात्माकाशस्य चान्त्यविशेषातिरिक्तव्यावर्तकमस्ति, सामान्यगुणानामव्यावर्तकत्वात्। विशेषगुणानां च सर्वेषामसत्त्वादिति।

यद् वान्तशब्देन काल उच्यते। तत्र भवतीत्यन्त्य उच्यते। न हि कालमात्रवृत्तिरन्यो व्यावर्तकः संभवति। संख्यापरिमाणपृथक्त्वसंयोगविभागानामव्यावर्तकत्वात्। अन्यथा तदनुसन्धानकालादावात्मसंदेहविपर्ययानुदयप्रसङ्गादिति ॥६॥

**सत्ताद्रव्यत्वगुणत्वकर्मत्वादौ प्रमाणव्युत्पादनार्थं सूत्रम्—**

**स[दि]ति यतो द्रव्यगुणकर्मसु सा सत्तेति ॥१.२.७॥**

**अस्ति** द्रव्यमस्ति गुणोऽस्ति कर्मेति प्रत्ययप्रयोगौ यतो विशेषणादुत्पद्येते सा सत्ता। उपलक्षणम् चैतत्। तेन द्रव्यमिति यतः पृथिव्यादिषु नवसु तद् द्रव्यत्वम्। गुण इति यतो रूपादिषु चतुर्विंशतिषु तद्गुणत्वम्, कर्मेति यत उत्क्षेपणादिषु तत्कर्मत्वम्। एवं सर्वासु जातिषु द्रष्टव्यम्। एवं यावदाह्निकसमाप्ति सर्वोऽपि सत्तागोचरोऽपि द्रव्यत्वादिष्वपि द्रष्टव्य इति।

नन्वेतदप्यनुपपन्नम्। सदिति प्रतीतिप्रयोगयोर्व्यक्तिस्वरूपसमवायप्रमेयत्वादिभ्यो व्युत्पत्तेरन्यथा सामान्यादौ सदिति प्रयोगाभावप्रसङ्गात्। तत्र भवदभिमतसत्ताविरहात्। सत्तारोपात् तत्रास्तीति चेत्—न, प्रमेयत्वेनाबाधितसत्यव्यवहारोपपत्तौ तत्·········· निष्प्रमाणत्वात्। न च सत्तायामनुमानं प्रमाणम्। [द्रव्यगुण] कर्माण्येकसामान्यवन्ति सामान्यवदिति चेत्—न, द्रव्येषु द्रव्यत्वेन गुणेषु गुणत्वेन कर्मसु कर्मत्वेन सिद्धसाधनात्। द्रव्यगुणकर्मस्वेकमभिन्नं सामान्यं साध्यते। न चैवं द्रव्यत्वगुणत्वकर्मत्वानि, तेषां भिन्नत्वादिति चेत्—न, द्रव्यगुणकर्मनिष्ठैकसामान्यवत्त्वसाधने प्रसिद्धिविशेषणत्वात्। सत्तासिद्धेः पूर्वं द्रव्यगुणकर्मनिष्ठैकसामान्याप्रसिद्धेः द्रव्यगुणकर्मसु सामान्यं सिद्धम्। पक्षधर्मताबलादेकमेव सिध्यतीति चेत्—न, पक्षधर्मतायाः साध्यपक्षसंसक्तातिरिक्तासाधकत्वात्। द्रव्यगुणकर्मसु सामान्यं सिध्यत् कल्पनालाघवादेकमेव सिध्यति।

क्षित्यादिषु ईश्वरवदिति चेत्—न, कल्पनालाघवस्यानुमानसहकारित्वानङ्गीकारात्। अन्यथा पार्थिव[त्व]ादिद्व्यणुकत्र्यणुकादि समवायिकारणासमवायिकारणजन्यानि कार्यत्वाद् घटवदित्यादिना कल्पनालाघवसहितेन पृथिव्यादिद्व्यणुकेषु सवायिकारणासमवायिकारणैकत्वसिद्धिप्रसङ्गात्। आकाशादयः संख्यापरिमाणपृथक्त्वसंयोगविभागवन्तो द्रव्यत्वादित्यादिनाकाशकालादिषु संख्यापरिमाणाद्येकत्वसिद्धिप्रसङ्गाच्चेति।

आकाशं द्रव्यत्वातिरिक्तजातिमत् जातिमत्त्वात्। द्रव्यत्वाच्च, गोत्ववदित्यपि न। सत्तासाधकद्रव्यत्वावान्तरविभुत्वादिसिद्ध्यास्य चरितार्थत्वे वार्थान्तरप्रसक्तत्वात्। द्रव्यत्वावान्तररहितत्वेन साध्यं विशेष्यत इति चेत्—न, गोदृष्टान्तस्य साध्यविकला[त्वा]पत्तेः। रूपादयो दृष्टान्ता गवादयश्च पक्षतुल्या इति चेत्—न, तेषां द्रव्यत्वे साधनविकलत्वात् साधनान्तरपक्षेऽपि प्रमां प्रति साध्यविकलत्वाच्च। तेन कार्यद्रव्य-



व्यतिरिक्ते जात्यनङ्गीकारात् तिमिराणां ज्ञानत्वस्वीकारात् ज्ञानदृष्टान्त इति चेत्—न, **शालिकमिश्रादीन्** प्रति साध्यविकलत्वस्य तदवस्थात्। तैर्ज्ञानत्वानङ्गीकारात्। रूपादयो जातिमन्तः सामान्यविशेषसमवायातिरेकिभावत्वात् गोवदिति चेत्—न, द्रव्यत्वेन सोपाधित्वात्।

**प्राभाकरेण** द्रव्यत्वं नाश्रीयत इति चेत्—न, तेन गुणवत्त्वादेरेव द्रव्यत्वेनाङ्गीकारात्। **वैशेषिकादिभिश्च** द्रव्यत्वजातेरौपाधिकत्वेन वक्तुं शक्यत्वाच्च। कार्यत्वेन सोपाधित्वाच्च। न चास्य साधनव्यापकता। सामान्याव्यतिरेकभावत्वसाधनवतो नित्यरूपादेर्व्यावृत्तत्वात्। न चानयोः पक्षेतरत्वम्, जातिमत्त्वरहितात् सामान्यादेर्विपक्षादपि व्यावृत्तत्वात्। द्रव्यत्वं जातिव्यावृत्तम् अद्रव्यावृत्तित्वात्, पटवदित्यपि जातिमत्त्वसिद्धेः। द्रव्यत्वस्य साध्याव्यापकतेति चेत्—न, जातिमद्व्यावृत्तत्वे द्रव्यव्यावृत्तत्वस्योपाधित्वात्।

न चास्य पक्षेतरता। जातिमद्व्यावृत्तत्वरहितात् प्रमेयत्वादेर्व्यावृत्तत्वात्। प्रमेयत्वादीनामव्यावृत्तत्वेनैव व्यावृत्तत्वात्। द्रव्यत्वविशेषणस्य व्यावर्त्यत्वपक्षाभावात् पक्षेतरत्वम् इति चेत्—न, द्रव्यत्वविशेषणव्यावर्त्यस्य भावलक्षणादेः सत्त्वात् तस्याभावात् व्यावृत्तत्वेन व्यावृत्तत्वविशेषणेनाव्याप्यवृत्तेः द्रव्याव्यावृत्तत्वेन सत्प्रतिपक्षत्वाच्चेति। कर्म गोनिष्ठजातिमत्कार्यभावत्वाद् गोवदित्यपि न, सत्तासाधकद्रव्यत्वादिना सोपाधित्वात्।

नापि कार्यमात्रनिष्ठजात्यार्थान्तर·········त्ता··········अनित्यगुणसमवेतकर्मण द्रव्यनिष्ठजातिमती अनित्यसमवेतत्वात् गोवदित्यपि न युक्तम्। अनित्यसमवेतमात्रनिष्ठजात्यार्थान्तरत्वाच्च। द्रव्यत्वादिना सोपाधित्वाच्चेति। द्व्यणुकादिषु **प्राभाकरेण** स्वीकारात्। द्रव्यत्वस्य सामान्यव्याप्यत्वभङ्गादनुपाधित्वमिति चेत्—न, साध्यव्यापकत्वस्य उपाधिलक्षणानन्तर्गतत्वात्। घटोघटनिष्ठजात्रिमत्समवायिकारणम्, समवायिकारणत्वात् घटावयवत्ववदित्य [··············]कार्याभावमात्रनिष्ठजात्या अर्थान्तरत्वात्। तस्या अपि पटतत्समवेतकार्यसमवेतत्वात् स्पर्शवत्त्वेन सोपाधित्वाच्च। न चास्य साधनवतोऽपि गगनादेर्व्यावृत्तत्वादिति।

[ द्रव्यव्यक्तिस्वरूपसमवायप्रमेयत्वादिभ्यो व्यतिरिक्तायाः सत्ताया न प्रमाणमिति चेत् ? ] तदयुक्तम्। अयं घटः सन्निति प्रत्यक्षात् घटनिष्ठसत्तासिद्धिः। न चेयमेतद्घटस्वरूपमेव एतन्निष्ठत्वात् रूपवत्, एतद्घटविरहिणि घटान्तरेऽपि सत्त्वाच्च।

न चेयं द्रव्यं गुणः कर्म वेति गुणवृत्तित्वात्। न चेयं विशेषः कार्यवृत्तित्वात्, योगीश्वरेतरप्रत्यक्षवेद्यत्वाच्च। न चेयं समवायः, न चेयमभावः रूपादाविव सत्ताया निषेधत्वाभावस्य प्रत्यक्षत्वात्। ततः परिशेषाद् जातिरेव सत्तेति।

अनुमानाच्च। घटो घटनिष्ठव्यावृत्तत्वरहितजातिमान् जातिमत्त्वात्, घटवत्, अयं घट एतन्निष्ठव्यावृत्तत्वरहितजातिमान् जातिमत्त्वात् घटवदिति व्यावृत्तत्वरहित-

जातिसिद्धेः । न चात्र द्रव्यत्वं कार्यत्वं चोपाधिः, केवलान्वयित्वात्, रूपादयो जातिमन्तो मेयत्वात् घटवदिति रूपादौ साध्यव्यापकत्वभङ्गाच्च । न चात्राप्युपाधिसंभवः । केवलान्वयित्वादेव । न च सत्प्रतिपक्षत्वम् । केवलान्वयिसाध्याभावस्याप्रसिद्धत्वात् । यदा तु द्रव्यगुणकर्मानुवृत्त्या[त्ता] जातिः सत्तेति पक्षः, तदा घटो घटनिष्ठद्रव्यगुणकर्मव्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमत्[मान्] । अयमेतन्निष्ठगुणकर्मव्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमान् जातिमत्त्वात् । घटो घटनिष्ठजातिमद्व्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमान् जातिमत्त्वात् । घटो घटनिष्ठजातिमद्व्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमान् जातिमत्त्वात् । अयमेतन्निष्ठजातिमद्व्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमान् जातिमत्त्वात् घटवदिति प्रयोक्तव्यम् । न चात्र द्रव्यत्वकार्यत्वे उपाधिः । रूपत्वादिजातिमति रूपादौ साध्यव्यापकत्वात् । रूपं रूपनिष्ठजातित्वरहिताश्रयो मेयत्वादिति रूपादौ जातिमत्त्वसिद्धेरिति ।

नन्वस्तु सत्ता, द्रव्यत्वं तु न सिध्यति मानाभावात् । न तावदत्र प्रत्यक्षं मानम्, इदं द्रव्यमित्यनुभवाभावात् । स्वातन्त्र्यानुभव एव द्रव्यत्वानुभव इति चेत्—न, स्वातन्त्र्यानुभवो ह्यनाश्रितत्वानुभवः सद्[नदा]वटादावसिद्धः । सिद्धौ वा तस्य भ्रान्तित्वात् । घटादीनामाश्रितत्वात् । अभ्रान्तित्वे वा अनाश्रितत्वेनैव तस्य चरितार्थस्य द्रव्यत्वात् । तथाश्रितत्वानालम्बनोऽनुभवः तदपि तस्याश्रितत्वासाधकत्वात् व्यवस्थापकत्वात् ज्ञानादीनां सामान्यं ज्ञानं व्यवस्थापकं च लक्षणम् । गुणवत्त्वज्ञानानन्तरं द्रव्यत्वं प्रत्यक्षेणानुभूयते एव । गोलक्षणसास्नावत्त्वज्ञानानन्तरमित्यगोत्वमिति चेत्—न, गुणवत्त्वानुसन्धानानन्तरमपि द्रव्यत्वादनुभवद्रव्यत्वद्रव्यमितीत्यनुगतव्यवहारस्य च गुणवत्त्वानुसन्धाने च उपपत्तेः ।

न चैवं सास्नावत्त्वानुसन्धानादेव गोत्वव्यवहारोपपत्तेः गो.........इति वाच्यम् । लूनसास्नेऽपि शावलेयादौ गोत्वानुभवव्यवहारयोरनुभवसिद्धत्वात् । संयोगविभागादिसमवायिकारणस्यैतद्व्यक्तिनिष्ठत्वे व्यक्त्यन्तरे तदभावप्रसङ्गात् । कतिपयव्यक्तिनिष्ठत्वे तत्तद्धर्मिग्राहकतया द्रव्यत्वसिद्धिरिति चेत्—न, गुणत्वेन तदुपसंग्रहोपपत्तेः । उपसंग्राहकान्तरेणापि द्रव्यत्वस्यैव समवायिकारणत्वस्य कतिपयव्यक्तिनिष्ठत्वोपपत्तेः । द्रव्यत्ववदुपसंग्राहकान्तरापेक्षायामनवस्थानात् ।

अपि च किमनेन द्रव्यत्वे प्रत्यक्षमुपन्यस्तमनुमानं वा ? तदुपपादकस्तर्को वा ? नाद्यः, उक्तोत्तरत्वात् । न द्वितीयः, प्रयोगानिरूपणात् । न तृतीयः, आपाद्यापादक[ा]निरूपणात् संयोगादिजातीये पृथिव्यादीनां समवायिकारणातिरेकार्थमवधारणीयम् । न च तदेकैकपृथिव्यादिव्यक्तीनां तदभावेऽपि संयोगादिजातित्वस्य संभवेन व्यतिरेकाभावात् । नापि समुच्चितानां पृथिव्यादिव्यक्तीनां समुच्चितपृथिव्यादिव्यक्त्यन्तरे कस्यचिदपि संयोगजातीयस्य संभवेनान्वयासंभवात् । तस्मात् संयोगादिजातीये पृथिव्यादीनामन्वयव्यतिरेकसिद्धये द्रव्यत्वमङ्गीकर्तव्यम् इति चेत्—न, गुणत्वेनैव



तदुत्पत्तेः । संयोगविशेष एव द्रव्यविशेषस्यैव समवायिकारणत्वाच्च । तस्य च जातिविशेषमन्तरेणैवान्वयव्यतिरेकसंभवात् । अनयापि भङ्ग्या द्रव्यत्वे प्रत्यक्षानुमानतर्काव्युत्पादनाच्च नानुमानमनिरूपणात् ।

आकाशमगुणवृत्तिजातिमत् जातिमत्त्वात् घटवदिति चेत्—न, विभुत्वगगनत्वादिजातिसिद्धौ अर्थान्त[रा]नुस्पर्शवत् वृत्तित्वेन साध्यविशेषणे चेन्द्रियत्वादिजातिसिद्धावर्थान्तरात् स्पर्शवत्त्वेन सोपाधित्वाच्च । गुणवद्व्यावृत्तत्वाच्च । गुणवद्व्यावृत्तिरहितगुणावृत्तिजातिसाधने च सिद्धविशेषणत्वात् । गुणवृत्तिगुणवद्व्यावृत्तित्वरहितगुणावृत्तिजातिसाधने च दृष्टान्तस्य साध्यविकलत्वात् । कर्म दृष्टान्त इति चेत्—न, तस्यापि साध्यसाधनविकलत्वात् । **प्राभाकरेण** कर्मणोऽङ्गीकारात् ।

इदं कर्मेति प्रतीतिप्रयोगयोः संयोगविभागासमवायिकारणत्वेनोपपत्तेः । कार्यत्वेन सोपाधित्वाच्च । स कथं गुणवृत्तिकर्मवृत्तिगुणावृत्तिजातिसिद्धावर्थान्तराच्चेति । कर्मावृत्तित्वेनापि साध्यविशेषणे दृष्टान्तस्य साध्यविकलत्वात् । गुणकर्मावृत्तिजातिनिष्ठावर्थान्तराच्च । गुणवद्व्यावृत्तत्वरहितनिर्गुणावृत्तिजातिमत्त्वं साध्यं[ध्य]त इति चेत्—न, अस्पर्शवत्कार्यपक्वा[वत्त्वा]भ्यां सोपाधित्वाभ्यां तद्विरहेण सत्प्रतिपक्षत्वाच्चेति । एतेनाकाशं सत्ताव्यतिरिक्तजातिमत्, सत्तान्तरजातित्वात्, गुणवत्त्वात् घटवदित्यादिप्रयुक्तमिति चेत् ? एवं गुणत्वादिजातयो निरसनीया इति ।

तदयुक्तम् । द्रव्यत्वादिव्यवस्थापकगुणवत्त्वादिमति गगनादौ तद्वृत्तितद्व्यावृत्तत्वरहिततद्रहितावृत्तिद्रव्यत्वादिजातीनाम् अनुमानात् सिद्धेः ।

तथा हि आकाशं गुणवद्व्यावृत्तत्वरहितगुणकारणवृत्तिजातिमत् जातिमत्त्वात् कर्मवदिति । न चात्र स्पर्शवत्त्वमुपाधिः । कर्मत्वादिमति कर्मादौ साध्याव्यापकत्वात् । नापि रूपत्वादिमति रूपादौ साध्यव्यापकत्वात् । अस्मन्मते च केवलान्वयित्वेन निरूपितत्वात् । जातावपि जातित्वस्वीकारात् । न चात्रोपाधिविरहेण सत्प्रतिपक्षत्वमुपाधिः साध्यव्यापकभङ्गस्थले व्यभिचारात् । केवलान्वयित्वाच्च ।

न च गुणवद्व्यावृत्तत्वरहितनिर्गुणावृत्तिजातिमानित्येतावता आत्मावृत्तिजातेरद्रव्यत्वसिद्धेः । प्रथमविशेषणान्तर्गतगुणवद्वृत्तित्वद्वितीयविशेषणान्तर्गतगुणवद्गुणत्वयोर्वैयर्थ्यमिति वाच्यम् । विशेषणप्रसिद्धत्वात् गुणवद्व्यावृत्तित्वरहितनिर्गुणत्वादेव गुणवद्वृत्तिगुणवद्व्यावृत्तत्वरहितत्वजातेर्गुणवृत्तित्वरहितत्वाद् वा ? नाद्यः, गुणवद्वृत्तित्वरहितजातेर्निर्गुणावृत्तित्वासंभवात् । न द्वितीयः, गुणव्यावृत्तत्वरहितनिर्गुणावृत्तिजातेर्द्रव्यत्वातिरिक्ताया असंभवात् । तस्मादपि द्वितीयविशेषणान्तर्गतगुणवत्त्वमपि साध्यप्रसिध्यर्थमुपादेयमेव न चैव[म]संभवात् । मे.........पि साध्याप्रसिद्धिः गुणवद्वृत्तिगुणवद्व्यावृत्तत्वरहितगुणवन्निर्गुणावृत्तिकर्मत्वादिमति साध्यप्रसिद्धेः । गुणवद्व्यावृत्तत्वेऽपि कर्मत्वावृत्तित्वरहितनिर्गुणावृत्तिजात्यन्यन्या मेयत्वात् घटवदिति तत्सिद्धिरिति चेत्—न, द्रव्यत्वसिद्धेः पूर्वमाश्रयासिद्धेरेवंविधसाध्यसिद्धेर-

संभवात् । द्रव्यत्वसिद्ध्युत्तरकालीनैवंविधसाध्यविधे[सिद्धे]श्च द्रव्यत्वानुमित्यप्रतिबन्धकत्वेनादूषणत्वात् । न च गुणवद्व्यावृत्तत्वरहितत्वनिर्गुणावृत्तिजातिसिद्धावपि द्रव्यत्वासिद्धेरर्थान्तरता । गुणवद्द्व्यावृत्तत्वरहितनिर्गुणवृत्तिजातित्वस्य द्रव्यलक्षणत्वेन तत्सिद्धेरेव द्रव्यत्वसिद्धत्वात् ।

ननु नेदं द्रव्यत्वलक्षणम् । द्रव्यत्वं गुणवद्व्यावृत्तत्वरहितनिर्गुणावृत्तिजात्यन्यत्वं मेयत्वात् घटवदिति सिद्धायामतिरिक्तजातावतद्व्यावर्त्तकत्वादिति । न द्रव्यत्वासिद्धौ द्वितीयानुमानस्याश्रयासिद्ध·········गुणवद्व्यावृत्तत्वरहितनिर्गुणावृत्तिजातिसिद्धिस्तु दुर्वारा । तेन पूर्वानुमानसिद्धा गुणत्वव्यावृत्तत्वरहिता निर्गुणावृत्तिजात्यन्ता मेयत्वाद् घटवदिति सिद्धायां द्वितीयजातावपि गुणवद्व्यावृत्तत्वरहितनिर्गुणावृत्तिजातिर्द्रव्यत्वम् । तर्हि द्वितयानुमानसिद्धायां जातौ प्रकृतद्रव्यत्वलक्षणस्यातिव्याप्तत्वम् ।

अथ द्वितीयानुमानसिद्धजातिद्रव्यत्वं तर्हि प्रथमानुमानसिद्धायां जातौ प्रकृतद्रव्यत्वलक्षणस्यातिव्यापकत्वमिति नेदं द्रव्यत्वलक्षणम् । तेनैतत्सिद्धावपि न द्रव्यत्वसिद्धिरिति, तन्न, प्रथमद्वितीयानुमानसिद्धजात्योरुक्तद्रव्यत्वलक्षणत्वात् । द्रव्यत्वं च पदवाच्यत्वात् द्रव्यप्रवृत्तिनिमित्तत्वात् यदेतद्द्रव्यगतत्वेऽपि अर्थगतत्वाभावेनातिव्यापकमन्यथैकपृथिव्यादिवृत्तित्वेन पृथिव्यादिलक्षणानामतिव्यापकत्वापत्तेः । तस्मादेतल्लक्षणवत् सिद्धावपि यद्द्रव्यत्वसिद्धिरिति गतत्वाभावेनातिव्यापकत्वमन्यथैकपृथिव्यन्यसाधकस्यैतन्निष्ठद्रव्यान्तरत्वाबाधकत्वदोषा[पा]यान्न तन्निष्ठद्रव्यत्वसाधकत्वाविरोधितत्वात् ।

अन्यथैतत्पर्वतनिष्ठवह्निसाधकस्यैतत्पर्वतनिष्ठवह्न्यन्तरासाधकत्वेन दुष्टत्वप्रसङ्गात् । द्वितीयतृतीययोस्तु साधनस्यैवोत्तरम् । न चात्र तुल्यवृत्तित्वं दोषः, तस्य दोषत्वे प्रमाणाभावात् । न च द्वितीयद्रव्यत्वं न जातिः । न चैतत्पर्वतनिष्ठवह्न्यन्तरासम्भवः । एतत्पर्वतनिष्ठो वह्निरेतत्पर्वतनिष्ठवह्न्यन्यो मेयत्वात् घटवदिति सिद्धः । तत् किं द्रव्यमनेकम् अनेकत्वात् । किमनेकसंस्या·········एकत्वाभावात् । द्रव्यत्वान्योन्याभावो वा ? प्रथमे ने·········जातौ संख्यानङ्गीकारात् । द्वितीयतृतीययोस्तु बाध इत्येवोत्तरम् । न चात्र तुल्यव्यक्तिकत्वं दोषः । तस्य दोषत्वे प्रमाणाभावात् । न च द्वितीयं द्रव्यत्वं न जातिः । प्रथमवृत्तिद्रव्यत्वव्यतिरिक्तत्वे सतितत्तुल्यव्यक्तित्वात् । गुणवत्त्ववदिति वाच्यम् । धर्म·········प्रमाणबाधात् । न चानतिरिक्तजातिद्वये मानाभावः । अनुमानस्योक्तत्वात् । न चोक्तेनैव द्वयेन द्वितीयगोत्वापत्तिः । असति बाधके तस्यापीष्टत्वात् । सति तु तत एवानापत्तेः गुणवद्द्व्यावृत्तत्वरहितनिर्गुणावृत्तिजात्यन्यत्वरहिता, ततत्त्वात्(?) । न यदेवं न तदेवम्, यथा घट इति । द्वितीयद्रव्यसाधकस्य सत्प्रतिपक्षत्वाच्च । न चास्याप्रसिद्धविशेषणत्वम् । गुणवद्द्व्यावृत्तत्वरहितनिर्गुणावृत्तिजात्यन्तत्वम् । अन्योन्याभावव्यतिरिक्ताभावप्रतियोगि प्रमेयत्वात् । घटवदिति विशेषणसिद्धेरियं गुणवद्द्व्यावृत्तत्वरहित-



निर्गुणावृत्तिजाति (गुणवद्द्व्यावृत्तत्वरहितनिर्गुणावृत्तिजाति) गुणवद्द्व्यावृत्तत्वरहितनिर्गुणावृत्तिजात्यन्यनिष्ठत्वरहिताश्रयः मेयत्वात् । घटवदिति केवलान्वयिना सत्प्रतिपक्षत्वाच्च । एवंविधयेत्येवंविधजात्यन्यनिष्टत्वरहिततये[ए]वंविधजातिनिष्ठत्वरहितो वा स्यात्, एवंविधजात्यन्यनिष्ठत्वरहितो वा ? प्रथमः पक्षो व्याघातबाधाभ्यां निरुद्धः । द्वितीयस्तु पक्षे[क्षः] तर्ह्येव स्याद् यदि पक्षस्यैवंविधजात्यन्यत्वं न भवेत् । अन्यथा पक्षनिष्ठस्यैवंविधजात्यन्यत्वं न भवेत् । अन्यथा पक्षनिष्ठस्यैवंविधजात्यन्यानिष्ठत्वेन तद्रहितत्वं व्याघातादिति पक्षे एवंविधजात्यन्यत्वासिद्धिरिति ततोऽर्थान्तरतेति । एतेन द्वितीयगोत्वादिसाधकानि निरस्तानि ।

ननु मा भूद्गुणवद्द्व्यावृत्तत्वरहितनिर्गुणावृत्तिजातित्वस्य द्रव्यलक्षणस्याव्याप्तिरतिव्यावृत्तित्वात्, स्वरूपासिद्धिस्तु भविष्यति तत्साधकाभावात् । तस्याप्रसिद्धस्य प्रकृतहेतोरस्मादसिद्धेः । प्रकृतहेतुव्यापकस्य ततोऽन्यत्वात्, तदव्यापकत्वाच्च । न चास्य पक्षधर्मताबलात् सिद्धिः । हेतुपक्षधर्मत्वस्य साध्यपक्षधर्मत्वातिरिक्तासाधकत्वात् कर्मादौ जातिमत्त्वस्य तद्व्याप्यत्वभङ्गाच्चापर्यवसानात् तत्सिद्धिरिति नाव्याप्तिः । पक्षधर्मतातिरिक्तस्यापर्यवसानस्यानुमानाङ्गत्वे प्रमाणाभावादिति ।

न च प्रकृतानुमानसिद्धगुणवद्वृत्तिगुणवद्द्व्यावृत्तत्वरहितगुणं गुणवद्वृत्तित्वात् गुणवद्द्व्यावृत्तत्वाभावसिद्धिः । गुणवन्निर्गुणवृत्तित्वरहितगुणवद्वृत्तित्वाच्च निर्गुणावृत्तित्वसिद्धेः । जातित्वसिद्धिश्च प्रकृतानुमानादेवेति द्रव्यत्वलक्षणसिद्धिरिति वाच्यम् । प्रथमानुमानात् द्रव्यत्वलक्षणसिद्धौ तस्मात् द्रव्यत्वासाधकत्वव्यवस्थितिरिति ।

तद्युक्तम् । गुणवद्गुणवृत्तिगुणवद्द्व्यावृत्तत्वरहितगुणवन्निर्गुणावृत्तिजातिमत्त्वस्य द्रव्यत्वलक्षणात् । तस्य च प्रकृतानुमानसिद्धत्वात् । न च व्यर्थविशेषणत्वम्, असिद्धिपरिहारार्थत्वात् तदसिद्धेस्त्वयैवोक्तत्वात् । असिद्धिरनुमानस्य दूषणम् । न लक्षणस्येति चेत् न, लक्षणस्यापि केवलव्यतिरेक्यनुमानत्वात् । न चात्र व्यर्थविशेषणत्वमपि, गुणवद्वृत्तिगुणवद्द्व्यावृत्तित्वरहितस्य घटादिनिवृत्त्यर्थत्वात् । गुणवन्निर्गुणावृत्तित्वस्य सत्त्वानिवृत्त्यर्थत्वात् । जातित्वस्य गुणवत्त्वादिनिवृत्त्यर्थत्वात् । गुणवद्वृत्तिगुणव्यावृत्तत्वरहितेत्यत्र गुणवद्वृत्तित्वं व्यर्थम् । गुणवन्निर्गुणवृत्तित्वरहितेत्यत्रापि गुणवद्वृत्तित्वं व्यर्थमिति चेत्—न, तस्य हेतुविशेषणत्वाभावात्, गुणवद्वृत्तिगुणवद्द्व्यावृत्तत्वाभावात्, भावविशेषणत्वाच्च । गुणवद्द्व्यावृत्तत्वाभावे च गुणवद्वृत्तित्वस्याविशेषणत्वात् । तस्य हेतुविशेषणत्वेनानुपादानात् । प्रतियोगिनोऽप्यभावविशेषणत्वासंभवाच्च । गुणवद्वृत्तिगुणवद्द्व्यावृत्तित्वयोः हेतुविशेषणीभावात् । विशेषादेव हेतुविशेषणताहेतुविशेषणा·········विशेषणवैयर्थ्यं दोष इति चेत्—न, गुणवत्त्वस्य हेतुविशेषणाभावविशेषणवद्द्व्या-

वृत्तत्वविशेषणं गुणवद्द्याावृत्तित्वं व्यर्थमिति चेत्—न, गुणवद्व्यावृत्तत्वस्य हेतुविशेषणगुणगुणवद्वृत्तिगुणवद्द्याावृत्तत्वात् गुणवद्वृत्तिग्रहणमात्रात् गुणवद्द्याावृत्तत्वग्रहणमात्रत्वासंभव इति।

तस्मान्न किञ्चिद् व्यर्थमिति गुणव्यावृत्तत्वरहितत्वनिर्गुणावृत्तित्वयोरपर्यवसानादेव सिद्धेश्च। न चापर्यवसानस्यानुमानाङ्गत्वम्, धूमत्वेन पर्वतनिष्ठवह्निविशेषणासिद्धिप्रसङ्गात्। न च पक्षधर्मताबलात् सिद्धिः हेतुपक्षधर्मत्वस्य साध्यपक्षधर्मत्वातिरिक्तासाधकत्वस्य त्वयैवोक्तत्वात्। अन्यथा पक्षधर्मताबलादेव गुणवद्द्याावृत्तत्वरहितत्वनिर्गुणावृत्तित्वजातित्वानां द्रव्यत्वयोरपि सिद्धिप्रसङ्गाद्दिति। मा भूद् वा प्रथमानुमानेन द्रव्यत्वलक्षणद्रव्यशब्दवाच्यत्वादिति सिद्धिः। द्रव्यत्वसिद्धिस्तु दुर्वारैव।

एवं तदनुमानसिद्धजातावेव द्रव्यत्वलक्षणद्रव्यत्वशब्दवाच्यत्वादेरनुमानात्। तथा इयं जातिः गुणवद्द्याावृत्तत्वरहिता गुणवद्वृत्तिगुणवद्द्याावृत्तित्वरहिते सति गुणवद्वृत्तित्वासत्त्वाच्च। इयं जातिर्गुणवद्वृत्तित्वरहिता, गुणवन्निर्गुणावृत्तित्वे सति गुणवद्वृत्तित्वाद् गोवदिति। जातित्वस्य च धर्मिग्राहकादेव सिद्धेः। न च गुणव्यावृत्तत्वरहितत्वादेरेकैकस्यालक्षणत्वात् विशिष्टस्य केनाप्यसिद्धेर्लक्षणासिद्धिरिति वाच्यम्। भिन्नप्रमाणव्यावृत्तत्वरहितत्वनिर्गुणावृत्तित्वाजातित्वानां द्रव्यत्वलक्षणत्वात्। विशिष्टस्यापि प्रत्यक्षत्वाच्चेति।

अस्तु द्रव्यत्वम्, गुणत्वं तु नेष्यते। रूपरसादौ गुणोऽयं गुणोऽयमिति प्रत्यक्षाभावात्। गुणलक्षणादिव्यवस्थापकानुसन्धानानन्तरभाविनत्वा[श्चा]नुगतप्रत्ययस्य तेनैवान्यथासिद्धत्वात्। उपदेशापेक्षेण चाक्ष[चक्षु]रादिना गुणत्वादिसिद्धिरित्यपि न युक्तम्। उपदेशः किं गुणलक्षणवतो गुणशब्दवाच्य इति किं वा गुणलक्षणवन्तो गुणवन्त इति किं वा गुणलक्षणवन्तो गुणलक्षणवद्वृत्तिगुणवद्व्यावृत्तत्वरहितगुणलक्षणतद्रहितावृत्तिजातिमन्त इति। नाद्यः, एवंविधोपदेशान्तरमपि गुणशब्दवाच्यत्वातिरिक्ताप्रतीतेः गुणलक्षणवन्तो गुणशब्दवाच्या इति उपदेशापेक्षेण चक्षुषा गुणत्वाभावसिद्धौ वक्तुमशक्यत्वाच्च। न द्वितीयः, गुणत्वादिसिद्धौ गुणत्वशब्दस्य निरर्थकत्वात्। अन्यथा गुणलक्षणवन्तो गुणत्वाभाववन्त इत्युपदेशसापेक्षे चक्षुरादीनां गुणत्वाभावसिद्धि······देशान्तरमपि चक्षुरादिना गुणात्वाप्रतीतेः। अन्यथा गुणलक्षणवन्तो नैवंविधत्वादिमन्त इत्युपदेशासापेक्षेण चक्षुषा तथाविधजात्यभावसिद्धेरतिप्रसङ्गात्।·········त एव गुणत्वसिद्धेश्च चक्षुरादिवैधर्म्यम्। अथ नाप्तवाच्यं तर्हि न तत्सहकृतादपि चक्षुरादेः गुणत्वादिसिद्धिरिति अनुमानासंभवाच्च। रूपं रूपत्वतदवान्तरसत्तातिरिक्तजातिमत् जातिमत्त्वात् गोवदिति चेत्—न, गुणकर्ममात्रवृत्तिजातिसिद्धावर्थान्तरात् गुणकर्मावृत्तित्वेन साध्यं विशेष्यत इति चेत्—न, सत्तातिरिक्तवद्विशेषणवैयर्थ्यापातात् गुणद्रव्यमात्रवृत्तिजातिसिद्धावर्थान्तराच्च। गुणद्रव्यावृत्तित्वेनापि साध्यं विशेष्यत्



इति चेत्—न, रूपरसमात्रवृत्तिसिद्धावर्थान्तरत्वात्। रूपरसमात्रवृत्तित्वरहितत्वेनापि साध्यं विशेष्यत इति चेत्—न, रूपरसगन्धमात्रवृत्तिजातिसिद्धावर्थान्तरात्। रूपरसगन्धमात्रावृत्तित्वेनापि साध्यं विशेष्यत इति चेत्—न, रूपरसगन्धस्पर्शमात्रवृत्तिजातिसिद्धावर्थान्तरात्। एवं रूपादित्रयोविंशतिगुणपर्यन्तं रूपरसगन्धस्पर्शमात्रावृत्तिमा-(?इत्यत्रा)दिनापि साध्यविशेषणेऽपि रूपशब्दमात्रवृत्तिरूपरसशब्दमात्रादिवृत्तिजातिसिद्धावर्थान्तरस्य तदवस्थत्वात्, रूपशब्दमात्रावृत्तित्वादिना साध्यविशेषणेऽपि रूपसामान्यमात्रवृत्तिरूपविशेषमात्रवृत्तिरूपसमवायमात्रवृत्तिरूपाभावमात्रवृत्तिजातिसिद्धावर्थान्तरस्य तदवस्थत्वात्। रूपसामान्यवृत्तित्वादिनापि साध्यविशेषणे सत्तान्यभावसिद्धावर्थान्तरात्। बाधादेवंविधजात्यसिद्धौ नार्थान्तरतेति चेत्—न, तदभावात्। अन्यथा गुणत्वस्याप्यसिद्धिप्रसङ्गात्। एतेन रूपं रूपमात्रनिष्ठत्वरहितसत्तावान्तरजातिमत् जातिमत्वाद् गोवदिति निरस्तम्।

रसो गुणलक्षणरहितावृत्तिरूपवृत्तिजातिमान्, गुणलक्षणरहितावृत्तिरूपवृत्तिजातिमान् गुणलक्षणवत्त्वात् रूपवदिति चेत्—न, रूपरसमात्रवृत्तिजातिसिद्धावर्थान्तरात्। रूपरसमात्रवृत्तित्वादिना साध्यविशेषणेऽपि पूर्वोक्तन्यायेनार्थान्तरस्य तदवस्थत्वात्। रूपत्वेन सोपाधित्वाच्चेति। आकाशं रूपरसनिष्ठजात्यन्तरभाववत् गुणविलक्षणरहितत्वात् सामान्यवदिति चेत्—न, रूपरसमात्रनिष्ठजात्यन्ताभावसिद्धावर्थान्तरात्। रूपरसमात्रनिष्ठत्वरहितत्वेन साध्यविशेषणत्वे रूपरसगन्धमात्रनिष्ठजात्यन्ताभावादिना अर्थान्तरात्। गुणलक्षणवद्द्याावृत्तत्वरहितजात्यन्ताभावसाधने च गुणकर्ममात्रनिष्ठजात्यन्ताभावसिद्धावर्थान्तरात्।

गुणकर्ममात्रवृत्तित्वेनापि साध्यविशेषणे च गुणमूर्तमात्रनिष्ठजात्यन्ताभावसिद्धावर्थान्तरात् गुणकर्ममूर्तमात्रावृत्तित्वेनापि साध्यविशेषणे गुणकर्ममूर्तमात्रनिष्ठजात्यन्ताभावादिनाऽर्थान्तरात्। गुणकर्ममूर्तमात्रावृत्तित्वेनापि साध्यविशेषणे सत्तात्यन्ताभावेनार्थान्तरात्। आकाशं सदिति प्रत्यक्षबाधात्। नाकाशे सत्तात्यन्ताभावसिद्धिरिति चेत्—न, आकाशस्य परोक्षत्वेनाकाशं सदिति प्रत्ययाभावात्। भावे वा सामान्यं सदिति भ्रान्तत्वेनाप्युपपत्तेः। जातिमत्वाभावेन सोपाधित्वात्। न चास्य पक्षेतरता, रूपरसादेः विपक्षादपि व्यावृत्तेः। उपाधिविरहेण सत्प्रतिपक्षत्वाच्चेति। सत्ता गुणलक्षणवद्द्याावृत्तत्वरहितजात्यन्या मेयत्वात् घटवदित्यपि न युक्तम्। गुणकर्ममात्रजात्यादिसिद्धावर्थान्तरात्। सत्तान्योन्यगुणवृत्तित्वरहितगुणलक्षणवद्वृत्तत्वरहितजात्यन्या, मेयत्वात् घटवदित्यपि न युक्तम्। सत्तान्यागुणवृत्तित्वरहितत्वसिद्धावप्यगुणवृत्तित्वरहितत्वासिद्धेरर्थान्तरत्वात्। सत्तान्यागुणवृत्तित्वरहितत्वस्यागुणवृत्तित्वरहितत्वान्यत्वात् तद्व्याप्यत्वाच्च। तस्य तेन विनापि सत्तायाः सत्त्वादिति। एवमनुमानान्यपि गुणत्वसाधकानि निराकरणीयानि। तस्मान्नास्ति गुणत्वमिति।

तदयुक्तम्। रूपं गुणलक्षणवृत्तिगुणलक्षणवत् गुणलक्षणरहितावृत्तिजातिमत्। जातिमत्त्वात् गोवदिति गुणत्वसिद्धेः। न चात्रापि अर्थान्तरताव[अनव?]काशः। पूर्वमेव

निरासात्। एवं कर्मा······वपि कर्मादिलक्षणवद्वृत्तिव्यावृत्तत्वरहितकर्मादिलक्षणवत्तद्रहितवृत्तिजातिमत्त्वसाधनेन सर्वजातिसिद्धिः द्रष्टव्येति।

ननु समवायिकारणेषु गुणकर्मसु संयोगविभागकारणेषु द्रव्यगुणकर्मसु अचलनात्मकजातिमत् सद्रव्यगुणेषु कार्यानाश्रयजातिमत् स्वगुणेषु कर्मसु मूर्तेषु विशेषगुणवदस्पर्शवत् स्वरूपवत् सुरसवत्सु विशेषगुणेषु सामान्यगुणेषु च पूर्वन्यायेन जातिः प्रसिद्धेति न। असति बाधे तस्या अपीष्टत्वात्। सति बाधे तत एव तदसिद्धेरिति।

ननु तथापि न ब्राह्मणत्वसिद्धिः क्षत्रियादिव्यावृत्तत्वदेवदत्तादिनिष्ठब्राह्मणत्वस्य प्रत्यक्षेणाननुभवात्। आकारत एवायं मया ब्राह्मण इति ज्ञात इति ब्राह्मणत्वज्ञानमनुव्यवसितमिति चेत् - न, तस्याप्यसिद्धेः। क्षत्रियादिव्यावृत्त[ा]कारस्याप्यसिद्धाया आकारत इत्यस्याप्यप्रसिद्धेः। ब्राह्मणलक्षणावगमसहितेन चक्षुरादिना तदनुभव इति चेत् – न, तदभावात्। अतएव पूर्वोक्तन्यायेनापि तदसिद्धेः। ब्राह्मणमा[तापितृजन्यत्वं तत्] लक्षणमिति चेत् — न, ब्राह्मणमातापितृजन्यत्वस्य तत्संयोगविभागानामतिव्यापकत्वात्। ब्राह्मणमातापितृजन्यशरीरत्वं तस्य लक्षणमिति चेत्-न, विकृतसूकरादिष्वतिव्यापकत्वात्। ब्राह्मणमातापितृजन्यमनुष्यत्वं तल्लक्षणमिति चेत्–न, सर्गादिजातब्राह्मणेष्वव्यापकत्वात्। कलशसंभूतागस्त्यादौ क्षत्रियसंभूतविश्वामित्रादावव्यापकत्वाच्च। तेषां तथाभूतत्वब्राह्मणत्वयोः पुराणसिद्धत्वाच्च। प्र······रभेदवादिवैशेषिकादिमते द्वितीयादिदिवसोत्पन्नब्राह्मणेष्वव्यापकत्वाच्च। एकैकावयवावगमविनष्टपूर्वब्राह्मणानन्तरोत्पन्नब्राह्मणेष्वव्यापकत्वाच्च। ब्राह्मणत्वसिद्धौ ब्राह्मणमातापितृजन्यत्वसिद्धिः। तत्सिद्धौ च ब्राह्मणत्वसिद्धिरिति इतरेतराश्रयाच्च।

एतेन ब्राह्मणशब्दवाच्यमातापितृजन्यमनुष्यत्वं ब्राह्मणलक्षणमिति निरस्तम्। अदृष्टविशेषजन्यतल्लक्षणम् इति चेत्—न, तस्याप्रसिद्धेः। ब्राह्मणशरीरेण कार्येण तदनुमानमिति चेत्-न, सिद्धे ब्राह्मणत्वे अदृष्टविशेषजन्यत्वसिद्धिः, तद[त्?]सिद्धौ च ब्राह्मण[त्व]स्य सिद्धेरितीतरेतराश्रयत्वादिति। ब्राह्मण[ा]ः अब्राह्मणमनुष्यावृत्तिजातिमन्तः, ब्राह्मणमनुष्यातिरिक्तत्वे सति अन्यावयवत्वादिति ब्राह्मणत्वसिद्धिरिति वादिवागीश्वरः।

तदपि न, ब्राह्मणत्वे ब्राह्मणत्वस्यासिद्धत्वेऽन्यब्राह्मणमनुष्यावृत्तिजातेरप्यसिद्धत्वात्। ब्राह्मणमातापितृजन्यत्वं ब्राह्मणत्वम[त्वा]नुमानाङ्गमिति चेत्—न, तथा सति ब्राह्मणमातापितृजन्यमातृ[त्र]निष्ठजातिसिद्धावर्थान्तरात्। ब्राह्मणत्वस्य सर्गादिभवकलशोद्भवादिसाधारणत्वात् ब्राह्मणत्वावान्तरजातिसिद्धावर्थान्तराच्चेति। तदयुक्तम्, ब्राह्मणोऽयमिति प्रत्यक्षादेव तत्सिद्धेः।

न चैवंविधप्रत्यक्षासिद्धिः। ब्राह्मणोऽयमिति व्यवहारात् सिद्धेः। न च तस्यापि (अ)सिद्धिः। सर्वलोकानुभवसिद्धत्वात्। अन्यथा गोत्वादेरपि विलयात्। न च ब्राह्मणलक्षणेनास्यान्यथासिद्धिः। तदभावस्य त्वयैवोपपादितत्वादिति। एवं क्षत्रियत्वादयः समर्थनीया इति।



पृथिवीत्वे प्रमाणम्। घटो गन्धवद्वृत्तिगन्धवद्व्यावृत्तत्वरहितगन्धवन्निर्गुणवृत्तित्वरहितजातिमान्, जातिमत्त्वात्। घटो घटवद्वृत्तिगन्धवद्व्यावृत्तित्वरहितगन्धवन्निर्गन्धवृत्तित्वरहितजातिमान् जातिमत्त्वात्। अयं घट एतद्वृत्तिगन्धवद्व्यावृत्तत्वगन्धवन्निर्गन्धवृत्तित्वरहितजातिमान्, जातिमत्त्वात्। अयं घट एतद्वृत्तिगन्धद्व्यावृत्वत्वरहितगन्धवन्निगन्धवृत्तित्वरहितजातिमान् जातिमत्त्वात् कर्मवदित्यादि।

उदकत्वेऽपि तत्प्रमाणम्। सरिच्छीतवृत्तिशीतव्यावृत्तत्वरहितत्वगन्धवन्निर्गन्धवृत्तित्वरहितशीतावृत्तित्वरहितजातिमान् जातिमत्त्वात्। सरिद्वृत्तिशीतव्यावृत्तत्वरहितशीताशीतवृत्तिजातिजातिमती जातिमत्त्वात्। इयं सरित् एतद्वृत्तिशीतव्यावृत्तित्वरहितशीताशीतवृत्तिजातिमती जातिमत्त्वात् गोवदित्यादि।

तेजस्त्वेऽपि प्रमाणम्। दीपः उष्णप्रत्युष्णव्यावृत्तत्वरहितउष्णानुष्णावृत्तिजातिमान् जातिमत्त्वात्। दीपः दीपवृत्त्युष्णव्यावृत्तत्वरहित उष्णानुष्णजातिमान् जातिमत्त्वात्। अयं दीप एतद्वृत्त्युष्णव्यावृत्तत्वरहितोष्णावृत्तिजातिमान् जातिमत्त्वात् गो[त्व]वदित्यादि।

वायुत्वे प्रमाणम्। वायुः नीरूपस्पर्शवद्वृत्तिवन्नीरूपस्पर्शवद्व्यावृत्तत्वानधिकरणनीरूपस्पर्शरहितावृत्तिजातिमान्, जातिमत्त्वाद् घटादिवदित्यादि॥

आत्मत्वे प्रमाणम्। आत्मा बुद्धिमद्वृत्तिबुद्धिमद्व्यावृत्तत्वरहितबुद्धिमदबुद्धिमद्वृत्तिजातिमान् जातिमत्त्वात्। सुखी सुखिवृत्तिबुद्धिमद्व्यावृत्तत्वरहितबुद्धिमदबुद्धिमद्वृत्तिजातिमान् जातिमत्त्वात्। अयमात्मा एतद्वृत्तिबुद्धिमद्व्यावृत्तत्वरहितनीरूपस्पर्शवन्नीरूपस्पर्शरहितावृत्तिजातिमान् जातिमत्त्वाद् घटवदित्यादि।

मनस्त्वे प्रमाणम्। मनोऽस्पर्शाणुवृत्तिस्पर्शाणुव्यावृत्तत्वरहितस्पर्शाण्वस्पर्शाणुरहितावृत्तिजातिमान् जातिमत्वात्। मनोवृत्त्यवृत्तिस्पर्शाणुव्यावृत्तत्वरहितास्पर्शाणुस्पर्शाणुरहितावृत्तिजातिमान् जातिमत्त्वात् घटवदित्यादि।

रूपत्वे प्रमाणम्। रूपं चक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणवृत्तित्वव्यावृत्तत्वरहितचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणत्ववृत्तितद्व्यावृत्तत्वरहितचक्षुष्ट्वरहिततद्बाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणत्वावृत्तिरहितवृत्तिजातिमान् जातिमत्त्वात्। नीलं नीलवृत्तिचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणव्यावृत्तत्वरहितचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणतदन्यवृत्तित्वरहितजातिमत् जातिमत्त्वात्। इदं रूपम् एतद्वृत्तिचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यगुणव्यावृत्तत्वरहितचक्षुष्ट्वरहितबाह्येन्द्रियाग्राह्यचक्षुर्ग्राह्यरहितावृत्तिजातिमत् जातिमत्त्वात् घटवदित्यादि॥

एवं रसत्वादिनिरपेक्षरसादिलक्षणवत्सु रसादिगुणेषु उत्क्षेपणादिकर्मसु च तल्लक्षणव्यावृत्तत्वरहिततल्लक्षणवद्रहितावृत्तिजातिमत्त्वानुमानेन रसत्वादिजातयः समर्थनीयाः।

जातिनिरपेक्षलक्षणरहितशुक्लादिषु शुक्लोऽयं शुक्लोऽयमित्याद्यनुगतप्रत्यक्षादेव शुक्लत्वादिजातयः समर्थनीयाः ।

जातिनिरपेक्षलक्षणरहितेषु अनुगतप्रत्ययविस्मरेषु [? विरहितेषु] च वेगभावनास्थितिस्थापकनिष्ठं कथं संस्कारसिद्धिरिति चेत्–न, अनुमानादेव वेगावेगवृत्तिवेगव्यावृत्तत्वरतिवेगवृत्तिभावनाव्यावृत्तत्वरहितवेगवृत्तिस्थितिस्थापकव्यावृत्तत्वरहितवेगवृत्तिवेगत्वभावनात्वस्थितिस्थापकत्वरहितजातिमत्त्वाद् घटवदित्यादेः ।

धर्माधर्मयोरदृष्टत्वेनैकगुणत्वे गुणचतुर्विंशतित्वानुपपत्तिरिति चेत्–न, धर्माधर्मत्व ।]भेदविवक्षया गुणचतुर्विंशतित्वोपपत्तेः । गुणत्वावान्तरजात्यपेक्षया गुणचतुर्विंशतित्वानुपपत्तिरिति चेत्–न, धर्माधर्मयोरपि गुणत्वावान्तरजातिमत्त्वात् साक्षाद्गुणत्वावान्तरजात्यपेक्षया चतुर्विंशतित्वं विवक्षितम् । अदृष्टत्वाङ्गीकारे च न धर्माधर्मयोः साक्षाद्गुणत्वावान्तरजातिमत्त्वमिति चेत्—न, विशेषगुणत्वसामान्यगुणत्वयोः साक्षाद्गुणत्वावान्तरयोः संभवेनादृष्टत्वेन रूपत्वादेरपि साक्षद्गुणत्वावान्तरजातिमत्त्वानुपपत्तेः । साक्षाद्गुणत्वावान्तरजात्यपेक्षया गुणचतुर्विंशतित्वं सूत्रकारैर्विवक्षितम् ॥७॥

अस्त्वत्र माना[न्तरम्····· ···········

## द्रव्यगुणकर्मभ्योऽर्थान्तरं स]त्ता ॥१.२.८॥

इति । तदनुपपन्नम् । विकल्पासहत्वात् । तथा हि किमिदं प्रतिज्ञापरं हेतुपरं वा ? प्रथमेऽपि किं सत्ता द्रव्यव्यतिरिक्ता सत्ता गुणव्यरिरिक्ता सत्ता कर्मव्यतिरिक्तेति प्रतिज्ञात्रयम् ? किं वा सत्ता व्यभिचारात् गुणवृत्तित्वकर्मवृत्तित्वयोश्च दृष्टान्ताभावग्रस्तत्वात् गुणकर्मत्वादेश्च पक्षतुल्यत्वेन दृष्टान्तानुपपत्तेः ।

नापि द्वितीयः, साध्यातिदेशात् ।

आत्रेयाचार्यस्तु सत्ताया अनेकसमवेतत्वादिना नित्यत्वमाशङ्क्य सत्ता नित्येति प्रतिज्ञामनुसन्धाय द्रव्यगुणकर्मभ्योऽर्थान्तरत्वं हेतुरनेन सूत्रेण प्रतिपाद्यत इत्याह । तदप्ययुक्तम् । दृष्टान्ताभावात्, विशेषसमवायाभावानामपि नित्यत्वासिद्धेः । अतएव तत्सिद्धौ दृष्टान्ताभावस्य तदवस्थत्वात्, प्रध्वंसे व्यभिचाराच्च । अनित्यत्वे द्रव्यगुणकर्मान्यतमत्वं जातिमत्त्वं चोपाधिभिरभिनीयत इति चेत्—न, प्रध्वंसे साध्यव्यापकत्वभङ्गात् । तस्मादनुपपन्नं सूत्रमिति । तन्न, अस्य प्रतिज्ञासूत्रत्वात् । तथा च सत्ता द्रव्यगुणकर्मव्यतिरिक्तेति प्रतिज्ञा । न चात्र हेत्वभावः । गुणवृत्तित्वकर्मवृत्तित्वयोर्वक्ष्यमाणत्वात् । न गुणो न कर्मेति प्रतिज्ञयोरेव तयोर्हेतुत्वमिति चेत्–न, अत्रापि तस्य हेतुत्वसंभवात् । न च दृष्टान्ताभावः । गुणकर्मवृत्त्यभावनामदृष्टान्तोपपत्तेः । विशेषसमवाययोरपि दृष्टान्तत्वासंभवात् । द्रव्यगुणकर्मव्यतिरिक्तत्वेनैव तयोर्धर्मिग्राहकप्रमाणसिद्धत्वादिति ॥८॥



## एकद्रव्य [वृत्तित्वात्] सत्ता न द्रव्यम् ॥१.२.९॥

एकद्रव्याश्रितत्वात्, रूपवदिति । तदयुक्तम् । सत्ताया घटपटाद्यनेकद्रव्याश्रितत्वेनैकद्रव्याश्रितत्व[ा]सिद्धेः । एकद्रव्येन्द्रियसन्निकर्षेणोपलभ्यमानत्वमेकद्रव्याश्रितत्व मिति आत्रेआचार्याः तन्न, पटादौ व्यभिचारात् । भूयोऽवयवेन्द्रियसन्निकर्षैः पटादय उपलभ्यन्त इति चेत्—न, सत्तायामपि भूयोऽवयवसन्निकर्षैरुपलभमानत्वात् । एकद्रव्यसन्निकर्षेणापि सत्तोपलभ्यते । न तु घटादय इति चेत्—न, भूयोऽवयवसन्निकर्षनिरपेक्षद्रव्यसन्निकर्षजन्यसत्त्वोपलम्भस्य निष्प्रमाणत्वात् पटसत्तादीनां तुल्योपलम्भसामग्रचेकत्वात् । आत्मा सन् इत्यत्रैकद्रव्यसन्निकर्षेण सत्त्व उपलभ्यते इति चेत्—न, आत्मनोऽप्यत्रैकद्रव्यसन्निकर्षेणोपलभ्यमानत्वेन व्यभिचारस्य तदवस्थत्वात् । एकशब्दसन्निकर्षेणोपलभ्यते सत्ता । तेन एकाश्रयसन्निकर्षेणोपलभ्यमानत्वमद्रव्यत्वे हेतुरिति चेत्–न, आत्मनि व्यभिचारात् तस्यापि सत्ताश्रयत्वादेकत्वाच्च । आत्मा स्वसन्निकर्षेणैव सुखादिसन्निकर्षेणाप्युपलभ्यते, सुखादिसहितस्यैवोपलम्भात् इति चेत्—न, सुखदुःखादिविशिष्टस्याप्यात्मन उपलम्भात् । द्रव्यग्रहणे वैयर्थ्याच्चेति । तस्मादनुपपन्नं सूत्रम् ।

तन्न, सूत्रस्यार्थान्तरसंभवात् । तथा हि द्विविधं द्रव्यम् एकद्रव्यम्, अनेकद्रव्यं च । तत्रैकद्रव्यं द्रव्यत्वावान्तरजातिरहितम् । आकाशादि एकैकत्वात् । अनेकद्रव्यं द्रव्यत्वावान्तरजातियुक्तम् पृथिव्यादि । तद्व्यक्तीनामनेकत्वात् । तेनैकद्रव्यवत्त्वादित्याकाशाश्रितत्वात्, कालाश्रितत्वात्, दिगाश्रितत्वात्, द्रव्यत्वावान्तरजातिरहिताश्रितत्वात्, आकाशादिगणवदिति सूत्रार्थः ॥ ९ ॥

न चात्र अनेकसमवेतत्वाभाव उपाधिः । संयोग········। न च गुणत्वरहितत्वे सत्यनेकसमवेतत्वात् भाव उपाधिः व्यावर्त्यविपक्षाभावेन पक्षेतरत्वात् । कार्यद्रव्याणामनेकसमवेतत्वाभावेनैव व्यावृत्तत्वात् । न च सत्ता द्रव्यं गुणत्वरहितत्वे सत्य······· पटवदिति सत्प्रतिपक्षत्वम् । आकाशाश्रितत्वादि न सोपाधित्वादिति । किं[तु]

## गुणकर्मसु भावान्न कर्म न गुणश्च ॥१.२.१०॥

[च]कारात् द्रव्यं किमिति । तेन सत्ता न द्रव्यम्, सत्ता न गुणः, सत्ता न कर्म, गुणवृत्तित्वात्, कर्मवृत्तित्वात् तद्गताभाववत् ।

न च गुणत्वादौ व्यभिचारः, पक्षतुल्यत्वादिति । न च गुणत्वे द्रव्यत्वरहितानेकसमवेतत्वाभाव उपाधिः, व्यावर्त्यविपक्षरहितविशेषणत्वेनास्य पक्षेतरत्वात् । अनेकसमवेतगुणानामनेकसमवेतत्वभावेनैव व्यावृत्तत्वात् ।

न च सत्ता गुणः । द्रव्यत्वरहितानेकसमवेतत्वात् । संभोग(?)वदिति सत्प्रतिपक्षत्वम् । गुणवृत्तित्वाभावेन सोपाधित्वादिति । न चाकर्मत्वे गुणत्वरहितघटसमवेता-

भाव उपाधिः। पूर्ववत् पक्षेतरत्वात्। न च सत्ता कर्मगुणत्वरहितपटत्वसमवेतत्वात्। घटकर्मवदिति सत्प्रतिपक्षत्वम्। कर्मवृत्तित्वाभावेन सोपाधित्वात्। अश्रावणत्वेन सोपाधित्वाच्च। कर्मत्वाभावग्राहकप्रत्यक्षबाधाच्चेति।

## सामान्यविशेषाभावेन चेति ॥ १.२.११ ॥

सामान्यविशेषा द्रव्येषु पृथिवीत्वादयः कर्मसु चोत्क्षेपणत्वादयः। तेषां भावेन द्रव्यत्वगुणत्वकर्मत्वाभावः सत्तायामनुमीयते। द्रव्यत्वनिषेधहेतौ च दिक्कालाकाशव्यतिरिक्तत्वं विशेषणमुपादेयम्।

प्रयोगास्तु सत्ता न द्रव्यम्, दिक्कालाकाशव्यतिरिक्तत्वे सति पृथिवीत्वात्। तेजस्त्ववायुत्वात्मत्वरहितत्वात् रूपवत्। सत्ता न गुणो रूपत्वरसत्वादिचतुर्विंशतिसामान्यरहितत्वात्, घटवदिति। सत्ता न कर्म उत्क्षेपण[त्वावक्षेपण]त्वाकुञ्चनत्वप्रसारणत्वगमनत्वरहितत्वात्, घटवदिति।

यद् वा सामान्यशब्देन जातिर्विशेषशब्देन जातिविशेषः सत्ता। तदभावेन सत्ताया द्रव्यत्वगुण[त्व]कर्मत्वनिषेधोऽनुमीयत इति सूत्रार्थः।

तथा च सत्ता न द्रव्यम्, न गुणो, न कर्म जातिरहितत्वाच्चाभाववदिति। एतच्च पूर्वाचार्याभिप्रायेण, अस्माभिः सत्तायामभावे वा सत्ताङ्गीकारात् हेतोरसिद्धत्वात् न दृष्टान्तस्य च साध्यविकलत्वादिति।

अन्ये तु सामान्यविशेषो द्रव्यत्वगुणत्वकर्मत्वादि[:]। तद्रहितत्वात् सत्ता न द्रव्यम्, न गुणो, न कर्मेति सूत्रार्थं वर्णयन्ति। तदयुक्तम्। सत्ता न द्रव्यम्, द्रव्यत्वरहितत्वादीनामसिद्धत्वादिति। सूत्रे आचार्यास्तु सामान्यविशेषौ अपरसामान्यम्, तदभावेन सत्ता द्रव्यगुणकर्मणोऽर्थान्तरमिति सूत्रार्थं वर्णयन्ति। तदपि न, सामान्याभावस्य व्यभिचाराभावेन वैयर्थ्यात् सामान्यविशेषरहितत्वस्य परं प्रत्यसिद्धत्वाच्चेति ॥११॥

इदानीं द्रव्यत्वगुणत्वकर्मत्वादीनां द्रव्यगुणकर्मभ्योऽर्थान्तरत्वप्रतिपादनार्थं षट्सूत्री—

**एकद्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥१.२.१२॥**

**सामान्यविशेषभावेन [च] ॥१.२.१३॥**

**गुणेषु भावाद् गुणत्वमुक्तम् ॥१.२.१४॥**

**सामान्यविशेषभावेन [च] ॥१.२.१५॥**

**कर्मसु भावात् कर्मत्वमुक्तम् ॥१.२.१६॥**

**सामान्यविशेषभावेन चेति ॥१.२.१७॥**



द्रव्यत्वमुक्तं [ गुणत्वमुक्तं ] कर्मत्वमुक्तमित्यत्र द्रव्यगुणकर्मभ्योऽर्थान्तरमिति शेषः। शेषं पूर्ववत् ॥१२-१७॥

नेदमनुपपन्नम्।..........उदाहरणभेदमात्रेण च च सूत्रभेदप्रणयने पृथिवीत्वादिजातिषु प्रत्येकं सूत्रप्रणयनप्रसङ्गात्। एकत्र न्यायव्युत्पादनेऽन्यत्रापि जायत इति सर्वत्रसूत्रप्रणयनमिति चेत्—न, द्रव्यत्वादिष्वपि तुल्यत्वादिति।

## लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भाव इति ॥१.२.१८॥

किं पुनरनेन प्रतिपाद्यते ? सर्वदेशेषु सर्वकालेषु वर्तमानासु च व्यक्तिषु सत्तैकत्वमिति ब्रूमः। तथापि, अथैतद्घटगता सत्ता स्वस्मान्न भिद्यते एतद्घटसत्ताग्राहकप्रमाणेन स्वतो भेदानवगाहनात्। भेदसाधकप्रमाणान्तराभावाच्च। इयमेतदन्यत्वरहितेत्यभेदग्राहकप्रमाणसत्त्वाच्च। तथा पटगतसत्तापि न घटसत्तातो भिद्यते। पटगतसत्ताग्राहकप्रमाणोक्तं स्यात्, घटगततत्सत्ताभेदानवगाहनात् प्रमाणान्तरेणापि पटगते[त]सत्ताया घटगतसत्ताभिन्नत्वानवधारणाच्च। पटगतसत्ता पटगतसत्तान्यत्वरहितेति प्रत्यक्षेण निर्णयाच्च। घटसत्तान्यत्वाभावस्य प्रत्यक्षप्रतियोगित्वेन प्रत्यक्षत्वात्। तदिदमुक्तम्।

**सल्लिङ्गाविशेषाद्विशेषलिङ्गाभावाच्चैको भावः इति [१.२.१८]**

सदिति भावप्रधानो निर्देशः, लिङ्गमिति प्रमाणम्,

हेतुरपदेशो लिङ्गं निमित्तं कारणं प्रमाणमित्यनर्थान्तरम्

इत्यग्रे सूत्रणात्। प्रमाणं चात्र प्रत्यक्षमेव विशेषाभेदः। स च व्यावृत्तिः, व्यावृत्तिज्ञापको वा सत्ताग्राहकप्रमाणेनापि विशेषात् भेदाग्रहणात्। अभेदग्रहणाच्च भेदकप्रमाणाभावाच्चैका सत्तेति सूत्रार्थः ॥

यदा तु सत्ता न प्रत्यक्षा, किंत्वनुमानगम्या, तदा घटो घटनिष्ठव्यावृत्तत्वरहितजातिमान् मेयत्वात् घटवदित्यादिना सत्तानुमीयते। तदा धर्मिग्राहकानुमानेन सत्तैकत्वसिद्धेः भेदग्राहकप्रमाणानां च धर्मिग्राहकप्रमाणबाधेनाप्रमाणत्वादेकैकसत्तेति तदिदमुक्तम्।

**सल्लिङ्गाविशेषाद् विशेषलिङ्गाभावाच्चैको भावः [१.२.१८]**

इति। यद्वा पटगतसत्ता घटगतसत्तातो न भिद्यते, सत्तालक्षणात् घटगतसत्तावत् न च पटसत्तातो भिन्ना पटवृत्तित्वात् पटरूपवदिति सत्प्रतिपक्षत्वम्, घटसत्तायां व्यभिचारात्। पटः प[घ]टसत्तावान् मेयत्वात् घटवदिति घटसत्तायाः पटवृत्तित्वसिद्धेः। सत्तालक्षणाभावेन सोपाधित्वाच्च। न चास्य पक्षेतरत्वम्। घटसत्तादौ विपक्षाद्व्यावृत्तत्वादिति। तदिदमुक्तम् सल्लिङ्गाविशेषादिति। घटसत्तासाधकलिङ्गस्य सर्वत्राविशेषात् सर्वत्र घटसत्तासिद्धेरिति। तदनेन सत्तायाः सर्वगतत्वं व्युत्पादितम्।

सर्वव्यक्तिनिष्ठत्वस्यैव सर्वगतशब्दार्थत्वात्……[सर्व]क्षणवृत्तित्वस्यैव नित्यशब्दार्थत्वात् । यदाहुः

नित्यत्वं सर्वदा सत्तेति ।

न चैवं गगनादीनामसर्वगतत्वापत्तिः, तेषामपि सर्वत्राश्रितत्वाभावस्य असर्वगतस्येष्टत्वात् । न चैवं गगनादीनामनित्यत्वापत्तिः सर्वक्षणाश्रितत्वाभावस्यानि……सर्वत्वस्यापीष्टत्वात् । यदा तु सर्वमूर्तद्रव्यसंयोगित्वं सर्वगतत्वं गगनादीनां विवक्षितम्। तदा सत्ताया सर्वगतत्वं नेष्यत एव । यदा अविनाशित्वमेव नित्यत्वं विवक्षितं तदा तु गगनादिसत्तादीनां तदीष्यत एव ।

न चैव द्रव्यादीनां सर्वगतत्वापत्तेरिष्टत्वात् तेषां सास्नादिमात्रानिष्ठत्वात् । न च सत्ताविनाशित्वे प्रमाणाभावः अनागतसकलव्यक्तिनिष्ठत्वग्राहकप्रमाणादेव तत्सिद्धेः विनाशित्वे विनाशान्तरोत्पन्नव्यक्तिनिष्ठत्वानुपपत्तेः । घटो घटनिष्ठसत्तावदिति ……क्तिरहितघटनिष्ठविनाशित्वरहितवान् मेयत्वादित्यनुमानाच्च । न च सत्ता विनाशिनी घटनिष्ठत्वात् । न च सत्तादिविनाशित्वे तद्गतरूपवदिति सत्प्रतिपक्षत्वम्, प्रथमहेतुव्यापकाभावा[दि]ति ॥

॥ इति श्रीहरकिङ्करपरमपण्डितन्यायाचार्यभट्टवादीन्द्रविरचिते वैशेषिकसूत्रवार्तिके प्रथमोऽध्यायः ॥

## द्वितीयाध्याये

# प्रथमाह्निकम्

**प्रथमेऽध्याये क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम्** [ १.१.१८ ] कृतम् । द्रव्याश्रय्यगुणवान् संयोगविभागेष्टवकारणमनपेक्ष इति गुणलक्षणम् [१.१.१५] चोक्तम् ॥ तदुभयमनुपपन्नम् । पृथिव्यादौ गुणविशेषसाधकप्रमाणाभावेन गुणवत्त्वस्य स्वरूपासिद्धत्वात् । रूपादीनां पृथिव्याद्याश्रितत्वस्यापक्षधर्मत्वात् । पृथिव्यादयो गुणवन्तः प्रमेयत्वात् रूपवदित्यनुमानाच्च । तथा प्रथमेऽध्याये द्रव्यगुणविभागः प्रतिपादितः, सोऽनुपपन्नः ।

द्रव्यलिङ्गाविशेषाद् विशेषलिङ्गाभावाच्च ।

द्रव्यैकत्वसिद्धेः । तथा च पृथिवी न जलादिभिन्ना द्रव्यत्वात्, गुणत्वाच्च जलादिरूपादयो न रसादिभिन्नाः गुणत्वाद् रसादिवदिति । (न) चैवमादीनां प्रत्यक्षविरोधः तस्य भ्रान्तत्वात् । पृथिव्यादिभेदज्ञानं [मिथ्या] भेदज्ञानत्वाच्चन्द्रादिभेदज्ञानवत् । पृथिव्यादिभेदो मिथ्या भेदत्वाच्चन्द्रभेदवदिति । आकाशादिनक्षत्रप्रमाणाभावे न [?] द्रव्यविभागस्य न्यूनता[सत्वा]च्च । स्नेहादिसाधकप्रमाणाभावेन गुणादिविभागस्यापि न्यूनत्वाच्चेति । तदेतत्सर्वं समाधातुं द्वितीयाध्याय आरभ्यते ।

**रूपरसगन्धस्पर्शवती पृथिवी ॥२.१.१॥**

रूपरसस्पर्शावृत्यरूपरसगन्धस्पर्शाश्रय इति सिध्यति । कथं पुनः सप्तम्यर्थे मतुप् ? षष्ठयर्थ इति न्यायबलात् । षष्ठयर्थविवक्षायां हि रूपरसगन्धस्पर्शसंबन्धादित्यर्थः स्यात् । तथा च पृथिवी इतरेभ्यो भिद्यते गन्धत्वादित्यादीनां गन्धत्वादौ गतत्वेन विरुद्धत्वप्रसङ्गात् । सप्तम्यर्थविवक्षातो न विरुद्धत्वम् । गन्धोऽपि गन्धाश्रयत्वादेर्गन्धत्वादावसंभवात् ।

**त आकाशस्य न विद्यन्ते** [ २.१.५ ]

इति सूत्रं प्रमाणयेदिति । तदेनेन गुणवत्त्वादित्यस्य स्वरूपासिद्धत्वं परिहर्तव्यम् ।

रूपादिगुणानां पृथिव्यां प्रत्यक्षसिद्धत्वात् । न च द्रव्याश्रितत्वस्य अपक्षधर्मत्वमतएव । न च रूपादिमती पृथिवीत्यादिप्रत्यक्षस्य भ्रान्तत्वम्, बाधकाभावात् । अन्यथा सर्वप्रत्यक्षाणां भ्रान्तत्वप्रसङ्गात् । इष्टं तूक्तम् । पृथिव्यादयो न गुणवन्तः प्रमेयत्वादिति । तदयुक्तम्, गुणवत्त्वासिद्धौ तदभावस्यापि अप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात् । गुणवत्त्वसिद्धौ तु किं पृथिव्यादिभावे तत्सिद्धः[द्धिः?], अन्यत्र वा ?

नाद्यः, पृथिव्यादिगुणवत्त्वसाधकप्रमाणबाधात् । न द्वितीयः, तेन प्रमेयत्वस्य व्यभिचारात् । न च विभागानुपपत्तिः पृथिव्यादिभेदस्य प्रत्यक्षसिद्धत्वात् । गगनादिव्यावृत्तपृथिव्यादिनिष्ठरूपधर्माणामेव गोत्वात् । विरुद्धधर्माध्यासस्यैव भेदकस्वीकारात् । अन्योन्याभावभेदपक्षोऽपि प्रत्यक्षयोग्यान्योन्याभावस्य पृथिव्यादौ प्रत्यक्षसिद्धत्वात् । अप्रत्यक्षप्रतियोगिकान्योन्याभावस्य च पृथिव्यादिगन्धवत्त्वादिभिरनुमानात् । तद्वस्तु गन्धवत्त्वं पृथिव्य[व्या]न्यतरभेदानुमानम् ।

रसवत्त्वादिभिस्तु तन्न संभवति । एषामितरजलादिगतत्वेन विरुद्धत्वादिति चेत्—न, गन्धवत्त्वेन जलादिभ्यो रसवत्त्वेनाबादिभ्यो रूपवत्त्वेनानिलादिभ्यः स्पर्शवत्त्वेनाकाशादिभ्यः पृथिव्या भेदानुमानात् । तथा च पृथिवी जलादिभ्यो भिद्यते, गन्धवत्त्वात् । पृथिवी अबादिभ्यो भिद्यते रसवत्त्वात् । पृथिवी अनिलादिभ्यो भिद्यते रूपवत्त्वात् । पृथिवी आकाशादिभ्यो भिद्यते स्पर्शवत्त्वात् । सर्वत्र न यदेवम् न तदेवम् । यथा जलादीति ।

यत्तूक्तम्, अभेदसाधकं प्रत्यक्षं भ्रान्तमिति तन्न, बाधकाभावात् । यत्तूक्तम्, पृथिव्यादिभेदज्ञानं भ्रान्तं भेदज्ञानत्वादिति, तन्न । भ्रान्तत्वं किं विपर्ययत्वम्, संशयत्वं वा, अनध्यवसायत्वं वा, स्वप्नत्वं वा, प्रमाणत्वाभावो वा ? नाद्यः, भेदसंदेहानध्यवसायाच्च स्वप्नेषु व्यभिचारात् । न द्वितीयतृतीयचतुर्थाः, जाग्रत्पृथिव्यादिनिश्चयेषु संशयत्वानध्यवसायत्वस्वप्नत्वाभावानां प्रत्यक्षसिद्धत्वात् । न च तत्र भेदसंवेदनत्वस्य व्यभिचारात् अद्वितीयात्मसंवेदनत्वे प्रमात्वं प्रसिद्धम् । न च तत्र भेदसंवेदनत्वमिति न व्यभिचार इति चेत्—न, सकलधर्मात्मविनिर्मुक्तात्मप्रमाया एव निष्प्रमाणकत्वात् । आत्मत्वादिधर्मविशिष्टात्मवत्प्रमायाश्च भेदालम्बनत्वात् । आकाशात्मनि व्यावृत्तात्मत्वादीनामेवात्मनिष्ठानामाकाशादिभेदत्वात् । विरुद्धधर्माध्यासस्यैव भेद[क]त्वात् । अन्योन्याभावसंवेदनत्वं भेदसंवेदनत्वम् । तच्च तत्रानुगतमिति न व्यभिचार इति चेत्—न, व्यावर्तकधर्मविशिष्टपृथिव्यादिसंवेदनस्य अन्योन्याभावालम्बनस्य धर्मित्वे अन्योन्याभावलम्बनसंवेदनत्वस्य हेतोरसिद्धत्वात् । अन्योन्याभावालम्बनभेदसंवेदनस्य च धर्मित्त्वे अर्थान्तरत्वात् । अन्योन्याभावालम्बनविरुद्धधर्माध्यासानालम्बनत्वस्यैव भेदसाधकत्वेनोपन्यासात् । सकलधर्मविनिर्मुक्तात्मसंवेदनत्वस्य प्रमेयत्वम् यद्यनवधृतं तर्हि तस्यापि प्रसिद्धत्वादप्रसिद्धविशेषणत्वम् । अथ बाधकाभावेनावधृतम्, तर्हि तेनैव पृथिव्यादिनिष्ठभेदज्ञानस्यापि प्रमात्वावधारणात् बाधितविषय(त्व)मनुमानस्येति । अथ कतिपयपुरुषनिष्ठबाधकाभावस्य च व्यभिचारत्वात् सर्वपुरुषनिष्ठसर्वकालबाधकाभावस्य च निर्धारयितुमशक्यत्वेन सिद्धत्वात् न पृथिव्यादितो भेदज्ञानस्य प्रमात्वावधारणमिति मन्यसे तर्हि तत एव सकलधर्मविमुक्तात्मसंवेदनस्य प्रमात्वावधारणात् । तदभावस्याप्रसिद्धविशेषणत्वमेवेति बाधाभावेन प्रमात्वावधारणात् ।



कथं भेदज्ञानस्य प्रमात्वावधारणमिति चेत् ? मानसप्रत्यक्षमि[क्षादि]ति ब्रूमः । प्रमात्वजातेर्ज्ञानित्ववन्मानसप्रत्यक्षत्वात् । तस्यापि कथं प्रमात्वावधारणमिति चेत् ? मानसप्रत्यक्षादेव ।

न च तत्र प्रमात्वावधारणोपायाभिधानेऽनवस्था, तत्र प्रमात्वावधारणो वा…… ब्र……विरामे तद्विरामोपपत्तेः । अन्यथा न च ……ण परम्परानवस्थाया दुष्परिहरत्वाच्च…… विरुद्धधर्मवत्त्वम् । भेदस्य प्रतियोगिनिरूप्यत्वात् । पृथिव्यादिनिष्ठरूपादीनां च प्रतियोग्यनिरूप्यत्वादिति । तन्न, आकाशादिव्यावृत्तरूपा धर्माणां भेदत्वादाकाशादिव्यावृत्तत्वस्य चाकाशादिव्यावृत्त…… शादिनिरूप्यत्वादिति ।

यत् तूक्तम्, पृथिव्यादिभेदो मिथ्या, भेदत्वाच्चन्द्रादिभेदवदिति । तन्न पृथिव्यादिभेदस्य प्रमाणासिद्धत्वे तेनैव बाधात् । प्रमाणसिद्धत्वे त्वाश्रयासिद्धेः । अन्यथा गगन…… मलत्वात् संप्रतिपन्नवदित्यादेर्दुर्वारत्वात् । भेदग्राहकप्रमाणेन भेदो गृहीतो न तु तस्य सत्त्वमिति चेत्—न, स्वरूपातिरिक्तसर्वत्वानङ्गीकारात् । मिथ्यात्वाभावः सत्यत्वमिति चेत्—न, मिथ्यात्वस्यानिर्वचनात् ।

किं च मिथ्यात्व[ं किं भ्रा]न्तिविषयत्वं बाधविषयत्वं वाऽप्रमाविषयत्वं वा प्रमाविषयत्वाभावो वा असत्यं [त्यत्वं] वा ज्ञानव्यतिरिक्तविषयत्वाभावो वा ? नाद्यः, सर्वस्य भ्रान्तिविषयत्वाङ्गीकारात् । न द्वितीयः, तत एव सर्वभ्रान्तीनां बाधकाङ्गीकारात् । न तृतीयः, प्रमाविषयाभावत्वस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणत्वात् । न चतुर्थः, तस्याप्यनिरुक्तेरनिर्वाच्यं किं वक्तुमशक्यम् ? सदसदन्यतरं वा, सदसद्व्यावृत्तधर्मत्वं वा सत्तासत्तासत्त्वासत्त्वात्यन्ताभाववत्वं वा ? नाद्यः, भेदादिशब्दैरेव वक्तुमशक्यत्वात् । न द्वितीयोऽपि, सदसदन्यत्वं यदि भावाभावान्यत्वं तदा सिद्धसाधनत्वम्, भेदस्य घटादिभावप्रध्वंसान्यभावान्यत्वस्वीकारात् । अथ सकलभावाभावान्यत्वं विवक्षितम्, तदाप्रसिद्धविशेषणत्वं विवक्षितम्, सकलभावाभावाप्रसिद्धौ तदन्यत्वस्याप्यप्रसिद्धत्वात् । व्याघाताच्च । सकलभावान्यत्वस्याभावलक्षणत्वात् । सकलाभावान्यत्वस्य च भावलक्षणत्वात् । अथ सदसदन्यत्वं सत्तानाश्रयानाश्रयान्यत्वं तदापि पूर्ववत् सिद्धसाधनम् । सकलविशेषणोपादानेन च पूर्ववदप्रसिद्धविशेषणत्वव्याघातौ । सदसदन्यत्वं प्रमेयाप्रमेयान्यत्वं तदाप्रसिद्धविशेषणम् । अप्रमेयत्वस्यासिद्धौ तद……न्यत्वस्याप्यसिद्धेः । कतिपयप्रमेयाप्रमेयान्यत्वसिद्धौ सिद्धसाधनाच्च सकलविशेषणोपादाने पूर्वदोषात् । अथ सदन्यत्वं ब्रह्मणि तदि[त]रान्यत्वं तद[ा]पि सिद्धसाधनम् । पृथिव्यादिभेदस्य ब्रह्मतदितरघटान्यत्वस्वीकारात् । ब्रह्मेतरसकलविवक्षायाः पूर्वोक्तदोषात् । न तृतीयः, किञ्चित् सदसद्व्यावृत्तधर्मवत्त्वे सिद्धसाधनात् । सकलविशेषणोपादाने चाप्रसिद्धविशेषणत्वात् । नापि चतुर्थः, व्याघातात् । सत्त्वासत्त्वात्यन्ताभावयोः परस्परपरिहारनियमात् । सत्त्वासत्त्वात्यन्ताभाववत्त्वस्यापकर्षादन्यत्वाप्रसिद्धत्वेनाप्रसिद्धविशेषण-

स्वाच्च। शुक्तिरजतादौ विशेषणप्रसिद्धिरिति चेत्—न, शुक्तौ प्रतीयता न रजतस्यापि सत्त्वादेव भार्यादिप्रसिद्धरजतस्यैव तत्र प्रतिभासाङ्गीकारात्। शुक्तिमस्तकोत्पन्नरजतादौ विशेषणप्रसिद्धिरिति चेत्—न, तत्र रजतसत्त्वे प्रमाणाभावात्।

इदं रजतमिति ज्ञानं प्रमाणमिति चेत्—न, त''''भ्रान्तित्वात्। भ्रान्तिरपि रजतं साधयति ''''''गोचरदूरत्वात् सर्वज्ञानानामिति चेत्—न, भ्रान्तेरपि साधकत्वे रजतत्वापत्तेः सद्रजतमित्येव''''''''भ्रान्त्युदयात् भ्रान्तिः साधिका चेति व्याघाताच्च। प्रमात्वस्यैव साधक''''''''नार्थत्वात्। तस्य च भ्रान्तिसहानवस्थायित्वात् भ्रान्तिकाले पुरोवर्तिरजतभावस्य पुरुषान्तरेणावगमाच्च।

अथ भ[ह]ट्टादिगतरजताभावः पुरोवर्तिनि पुरुषान्तरेणावगम्यते, न तु भ्रमाद्य-रजताभावः ग्रामावगतरजतस्य प्रतिनियतपुरुषान्यत्वेन पुरुषान्तरप्रत्यक्षायोग्यतया तदभावस्य''''''''''पुरुषान्तरेणावधारणमिति मन्यसे, तन्न, तस्य प्रतिनियतपुरुषवेधत्वे नानाभावात्। भ्रमगोचरो रजतं न प्रतिनियतपुरुषवेधम्, रजतत्वात् संप्रतिपन्नवत् इत्यनुमानाच्च। न चात्राश्रयासिद्धता'''''' रजतस्य उभयवादिसिद्धत्वात्। यन्मया रजततयाधिगतं तेनैव[तन्नेद]मिति प्रत्यभिज्ञानेन भ्रान्तेः शुक्तिशकलमात्रगोचरग्रहणाच्च भ्रमगोचररजतस्यानिर्वाच्यत्वे प्रमाणाभावाच्च प्रत्यक्षेण तदनुल्लेखात् अर्थापत्त्यनुमानयोश्च धर्मिग्राहकप्रमाणबाधात् सदिति रजतमिति धामग्राहिणा तस्य सत्त्वग्रहणात्।

अन्यथा इदं न रजतं मेयत्वादित्यादेर्दुर्वारत्वात्। न च भ्रमगोचररजतस्यानिर्वाच्यत्वेऽनुमानमस्ति। इदमनिर्वाच्यमित्यादेरप्रसिद्धविशेषणत्वात्। नाप्यर्थापत्तिः। अनुपपद्यमानाभावात्, सत्त्वे भ्रान्तिबाधात्। सत्त्वे च ख्यातिबाधादनुपपद्यमानानिर्वाच्यत्वं कल्प्यत इति चेत्—न, अन्यथाप्युपपत्तेः।

तथा हि भ्रान्तिः किं कारणं विना अनुपपन्ना? विषयं विना वा? नाद्यः, दुष्टेन्द्रियादेरेव कारणत्वात्। न द्वितीयः, रजतादेरेव विषयत्वात्। सत्त्वे रजतादेर्भ्रान्तिविषयत्वं न स्यादिति चेत्-न, बाधकाभावात्। यत् सन्न तद्भ्रान्तिविषयो यथा ब्रह्मेति चेत्—न, ब्रह्मणो भ्रान्तिविषयत्वाभावे प्रमाणाभात्। ब्रह्म भ्रान्तिविषयो ज्ञेयत्वात्, घटवदित्यनुमानाच्च।

कि च यत् सत् (तत्) न भ्रान्तिविषयम् [यः]। स च शुक्तिरजतम् तस्मान्न भ्रान्तिविषय इत्यनुमानं विवक्षितम्। किं वा यदीदं रजतं सत् तर्हि भ्रान्तिविषयो न स्यादिति तर्को विवक्षितः? नाद्यः, तयो[:]''''सिद्धः बाधाच्च। न द्वितीयः, विपर्ययापर्यवसानम्। नेदं सत् भ्रान्तिविपयत्वात् इत्यादेर्वाच्यत्वासिद्धत्वात्। भ्रान्तिविषयत्वस्य सत्ताभावेन क्वचिदपि व्याप्त्यनुगमात् सर्वस्यापि भ्रान्तिविषयस्य



सत्ताभ्युपगमात्, ब्रह्मणि व्यभिचाराच्च। तद्विषयत्वे भ्रान्तित्वं न स्यादिति तर्को विवक्षित इति चेत्—न, विपर्ययापर्यवसानात्। नेयं सद्विषयिणी भ्रान्तित्वादित्यादेरन्वयव्याप्त्यनवगमात्। सा (? या) सद्विषयिणी नासौ भ्रान्तिः। यथा सत्यरजतप्रमेति व्यतिरेकीति चेत्—न, सद्विषयत्वाभाववतो घटादेः सपक्षादपि व्यावृत्तत्वेन (अ)साधारणत्वात्। घटादिज्ञानानामपि सद्विषयत्वप्रमात्वयोरनङ्गीकारेण व्यतिरेकदृष्टान्तत्वानुपपत्तेः। या सद्विषयिणी नासौ भ्रान्तिः यथा ब्रह्म प्रमेति चेत्—न, ब्रह्म भ्रान्तिगोचरो ज्ञेयत्वात् संप्रतिपन्नवदिति सिद्धायां भ्रान्तौ व्यतिरेकिव्याप्तिभङ्गात्। तद्विषयत्वं च यदि ब्रह्मविषयत्वम्, तदा ब्रह्मविषयत्वे भ्रान्तित्वं न स्यादिति तर्कः। तथा च विपर्ययापर्यवसानम्। नेयं ब्रह्मविषयिणी भ्रान्तित्वादित्यादेः सत्ताश्रयविषयभ्रान्तिपक्षीकरणे बाधात्। सत्तानाश्रयविषयभ्रान्तिपक्षीकरणेन च सिद्धसाधनात्।

एवं बाधोऽपि, किं कारणं विनानुपपत्तेः, विषयं विना वा? नाद्यः, इन्द्रियादेरेव कारणत्वात्। न द्वितीयः, रजताभावादेरेव नेदं रजतमित्यादिबाधविषयत्वात्। सतो बाधविषयत्वं न स्यादिति चेत्-न, सच्छब्देन ब्रह्माभिधाने विपर्ययापर्यवसानात्। इदं रजतं न ब्रह्म''''''त्वादित्यादेः सिद्धसाधनात्। शरीरं न ब्रह्मेत्यादिबाधगोचरे ब्रह्मणि व्यभिचाराच्च। सच्छब्देन भावाभिधानेऽपि विपर्ययापर्यवसानात्। इदं रजतं न भावो बाध्यत्वादित्यादेर्भावपक्षीकरणे''''''पक्षीकरणे च सिद्धसाधनात् ब्रह्मणि व्यभिचाराच्च। सच्छब्देन सत्ताश्रयाभिधानेऽपि विपर्ययापर्यवसानात्। इदं रजतं न सत् बाध्यत्वादित्यादेः सत्ताश्रयपक्षीकरणे बाधात्। सत्तानाश्रयपक्षीकरणे सिद्धसाधनत्वात् ब्रह्मणि व्यभिचाराच्च। ब्रह्म न सत्ताश्रय इति चेत्-न, ब्रह्म सदित्यादिप्रत्यक्षेण ब्रह्म सदिति ज्ञेयत्वादद्रव्यत्वादित्यनुमानेन च ब्रह्मणि सत्तासिद्धेः।

सच्छब्देन प्रमेयाभिधाने विपर्ययापर्यवसानमेव। इदं रजतं न प्रमेयं बाध्यत्वादित्यादेरप्रसिद्धविशेषणत्वात्। सद्विषयत्वे बाध्यत्वं न स्यादिति तत इति तर्क इति चेत्—न, पूर्वोक्तन्यायनिरस्तत्वात्। मूलशिथिलत्वाच्च। सद्विषयत्वस्य बाधत्वाभावेन व्याप्तिविरहात्। सद्विषय इत्यस्य ब्रह्मबोधस्य बोधत्वस्वीकारात्। आद्ये ख्यातित्वानुपपत्तिरित्यपि न युक्तम्।

किं तौ कारणं विनानुपपन्नौ? विषयं विना वा? नाद्यः, इन्द्रियादेरेव तत्कारणत्वात्। द्वितीयरजततद्भावादेरेव विषयत्वात् असत्त्वे रजतं न प्रतीयेतेति। असत्त्वं ब्रह्मेतरत्वं भावत्वरहितत्वं वा, सत्तारहितत्वं वा, कारणत्वरहितत्वं वा, प्रमेयत्वरहितत्वं वा? नाद्यः मूलशिथिलत्वात् ब्रह्मेतरस्यापि घटादेः प्रतीयमानत्वात् विपर्ययापर्यवसानाच्च। इदं रजतं ब्रह्म प्रतीयमानत्वात् इत्यादेर्बाधात्, घटादौ

व्यभिचाराच्च। न द्वितीयः, मूलशिथिलत्वात्। भावत्वरहितस्यापि घटाभावादेः प्रतिभासाद् विपर्ययापर्यवसानाच्च। इदं रजतं न भावत्वरहितं प्रतीयमानत्वादित्यादेर्बाधात्। घटादौ व्यभिचाराच्च।

न तृतीयः, मूलशिथिलत्वात्। सत्तारहितस्यापि सामान्यविशेषादेः प्रतिभासात् विपर्यय पर्यवसानाच्च। इदं रजतं सत् प्रयीयमानत्वात् इत्यादेः सिद्धसाधनत्वात् सामान्यादौ व्यभिचाराच्च। सत्ताकेवलान्वयित्वपक्षे च सत्तारहितत्वस्याप्रसिद्धत्वेनापादकासिद्धेः, आपाद्याप्रसिद्धेश्च।

न चतुर्थः, मूलशैथिल्यात्, कारणत्वरहितस्याप्यन्त्यमुक्त्यादेः प्रतिभासात्। विपर्ययपर्यवसानाच्च। इदं रजतं कारणं प्रतीयमानत्वादित्यादेः सिद्धसाधनात्। अन्त्यमुक्तौ व्यभिचाराच्च। तस्या अपि कारणत्वे कारणत्वस्य केवलान्वयित्वेन कारणत्वरहितस्यासिद्धावापादकाप्रसिद्धेश्च।

नापि पञ्चमः, प्रमेयत्वरहितस्याप्रसिद्धत्वेनापादकाप्रसिद्धेर्विपर्ययापर्यवसानाच्च। इदं रजतं प्रमेयं प्रतीयमानत्वादेः सिद्धसाधनत्वात्। मूलशैथिल्याच्च। यत्प्रमेयत्वरहितं तन्न प्रमीयते इत्यत्र दृष्टान्ताभावात्। शशशृङ्गं दृष्टान्त इति चेत् ? तस्याप्रतीतौ दृष्टान्तसिद्धेः प्रतीतौ वा साध्यविकलत्वात्। यदसद् असाक्षात् प्रतीयत इति विवक्षितमिति चेत्—न, शशशृङ्गस्यापि स्वसाक्षात्कारगोचरत्वात् शृङ्गव…… विवक्षितमिति चेत्—न, दूरस्थेन शृङ्गाद् व्यावर्तकधर्मानुपलम्भे शृङ्गवानयमिति चक्षुषोपलम्भात्……गमिति शशशृङ्गवत् तत्संसर्गो वात्र व्यतिरिक्तं वा ? नाद्यद्वितीयौ, तयोः सत्त्वात् प्रतीयमानत्वाच्च। न तृतीयः, तयोः संसर्गस्यापि समवायलक्षणस्य विशेषणविशेष्यभावस्य च सत्त्वात् प्रतीयमानत्वाच्च। शशशृङ्गयोः……त्तया नास्तीति चेत्—न, पञ्चपदावृत्तेः समवायस्य तत्र वज्रलेपायमानत्वात्। शशशृङ्गयोः विशेषणविशेष्यभावो नास्तीति चेत्—न, सत्तादीनां विशेषणविशेष्यभावसंभवात्। शृङ्गविशेषत्वं शशे, शशविशेषणत्वं शृङ्गे नास्तीति चेत् ? किमतः शृङ्गविशेष्यत्वस्य शशविशेष[ण]त्वयोः महिषादौ शशगुणादौ च विद्यमानत्वेन सत्ताप्रतीयमानत्वाच्च।

नापि चतुर्थः। तदन्यत्वस्यापि घटादेः सत्त्वात् प्रतीयमानत्वाच्च। एतेन यदसत् तन्न बाध्यम् इत्यपि…… युक्तम्।

किं च, किं भ्रान्तिबाधान्यथानुपपत्तिः सदसद्विलक्षणत्वे प्रमाणं ख्यातिबाधान्यथानुपपत्तिर्वा, भ्रान्तिबाधानुपपत्तिख्यातिर्वा, बाधान्यथानुपपत्तिर्वा ?

नाद्यः, भ्रान्तिबाधयोः तदभावेनैवोपपत्तेः।

न द्वितीयः, ख्यातिबाधयोः सत्त्वेनैवोपपत्तेः।



नापि तृतीयः, सदसत्ताभ्यामेवोपपत्तेः। एकस्य सत्त्वाभावसत्त्वे व्याहते इति चेत्—न, एकस्य सत्ताऽभावसत्ताभावयोरपि व्याहतत्वात्। सत्त्वाभावस्यैवासत्त्वपदार्थत्वात्। असत्त्वाभावस्य च सत्त्वपदार्थत्वात्, तन्नियतत्वाच्च॥

किं च, भ्रान्तिबाधानुपपत्ती तुल्यबले न्यूनाधिकबले वा ? नाद्यः, सत्प्रतिपक्षत्वेनोभयोरप्रामाण्यात्। न द्वितीयः, अधिकबले बाधेन न्यूनबलाया अप्रमाणत्वात्। सदसद्विलक्षणत्वमेव सत्प्रतिपक्षत्वबाधयोः परिहारात्। बाधान्यथानुपपत्तिमात्रेणापि निर्वाच्यत्वसिद्धौ भ्रान्तित्वस्याप्यनुपपन्नत्वस्य व्यर्थत्वाच्च।

अस्तु बाधानुपपत्तिरेवानिर्वाच्यत्वे प्रमाणमिति चेत्—न, तस्य स्वपरपक्षसाधारणत्वेन प्रकरणसमत्वात्। एतेन इदं रजतं न सद् बाध्यत्वात्। यत्तु सत्, न तद् बाध्यम्, यथा ब्रह्म। नाप्यसत् प्रतीयमानत्वात् ब्रह्मवदित्यनुमानद्वयबलादनिर्वाच्यत्वसिद्धिरित्यपि निरस्तम् प्रथमानुमानस्याप्रसिद्धविशेषणत्वात्, प्रमाविषयत्वाभावस्यासत्त्वस्याप्रसिद्धत्वात्। अतएव द्वितीयानुमानस्याप्यप्रसिद्धविशेषणत्वम्। असत्त्वासिद्धौ तदभावस्याप्यप्रसिद्धेरिति। सत्त्वे तु प्रमाणम् इदं रजतं सत् प्रतीयमानत्वादात्मवदिति।

न च शशशृङ्गादौ व्यभिचारः। शशशृङ्गगतसंसर्गतद्व्यतिरिक्तानां सत्त्वादेव। न चैवं बाधानुपपत्तिः। पुरोवर्तिनि रजतत्वारोपपक्षे पुरोवर्तिनि रजतत्वात्यन्ताभावग्राहकत्वेन पुरोवर्तिनि रजततादात्म्यारोपपक्षे पुरोवर्तिनि रजततादात्म्याभावग्राहकत्वेन नेदं रजतमित्यस्य बाधत्वोपपत्तेः। इयं शुक्तिरित्यस्यापि रजतत्वसंसर्गरजततादात्म्यविरोधिशुक्तित्वग्राहकत्वेन बाधत्वोपपत्तेः।

नापि पञ्चमः। असत्त्वा…………सत्त्वं किं भावत्वं, भावप्रतियोगिकत्वं वा, सत्तारहितत्वं वा, अकारणत्वं वा, अप्रमाविषयत्वं वा, बाधविषयत्वं वा, प्रमाविषयात्यन्ताभावो वा, सर्वनिष्ठात्यन्ताभावप्रतियोगिकत्वं वा, कालत्रयं वा, प्रतियोगित्वं वा, कालाश्रितत्वं वा, अलौकिकत्वं वा, ज्ञानातिरिक्तभावो न वा ?

नाद्यः, अभावप्रपञ्चधर्मित्वे प्रपञ्चसाधनात् भावप्रपञ्चधर्मित्वेऽबाधात्। अभावाभावभावत्वे सिद्धसाधनाश्च।

न द्वितीयः, अविवादात्।

नापि तृतीयः, सामान्यादिधर्मित्वे सिद्धसाधनात्। द्रव्यादिधर्मित्वे सत्तायाः क्वचिदसिद्धौ तदभावस्याप्रसिद्धत्वात्। द्रव्याभावे तत्सिद्धौ बाधात्।

न चतुर्थः। अन्त्ये[न्त्य]मुक्तिव्यक्तिप्रपञ्चधर्मित्वे बाधात्। अत्यन्तमुक्तिधर्मित्वे सिद्धसाधनात्।

नापि पञ्चमः। सर्वस्यापि भ्रमविषयत्वाङ्गीकारात्।

नापि षष्ठः। सर्वस्यापि बाधविषयत्वाङ्गीकारात्।

नापि सप्तमः। तस्याप्रमितावप्रसिद्धविशेषणत्वात्। पक्षादन्यत्राप्रमेये वा तत्सिद्धौ वा व्याघातात्। पक्ष एव तत्सिद्धौ साधनवैयर्थ्यात्। पक्षस्य चाप्रमितावाश्रयासिद्धौ प्रमितौ च व्याघातात्। पक्षनिष्ठप्रमितत्वाभावानुमितेश्च प्रमात्वे व्याघातात्। अप्रमात्वे च तदसिद्धेः दृष्टान्तस्य साध्यविकलत्वाच्च। प्रत्यक्षेण शुक्तिरजतस्य प्रमाविषयत्वाभावाननुभवात्। नेदं रजतमिति बाधकप्रत्यक्षस्य पुरोवर्तिनि रजततादर्थ्याभावं वा साधयतो रजतस्य प्रमाविषयत्वासाधकत्वात्। शुक्तिरिति प्रत्यक्षस्य शुक्तिमुल्लिखत् (?) सत्ता रजतस्य प्रमाविषयत्वात्यन्ताभावासाधकत्वात्। प्रत्यक्षान्तरस्य चाभावात्। विप्रतिपन्नं रजतज्ञा..मेतद्विषयसद्व्यतिरिक्तविषयम्, ज्ञानत्वात् पटज्ञानवदित्यसत्ख्यातौ प्रमाणमिति चेत्--न, अस्यापि प्रमाविषयात्यन्ताभाववद्गोचरप्रमाजनकत्वे व्याघातात्। अजनकत्वे च तदसाधकत्वात्। रजतसत्त्वे तु प्रमाणम्। इदं रजतं प्रमेयं ज्ञेयत्वाद् घटवदिति।

नन्विदं रजतं प्रमितं न वा ? आद्ये साधनवैयर्थ्यम्। द्वितीये त्वाश्रयासिद्धिरिति चेत्--न, प्रमितत्वाङ्गीकारात्। न च साधनवैयर्थ्यम्, परं प्रति तत्साधनात्। परेणापि तथाभ्युपगमे परं प्रति साधनानभिधानात्। ननु इदं रजतमिति प्रतीतिसिद्धस्य धर्मिग्राहकत्व आश्रयासिद्धिः। अस्या भ्रान्तित्वेना.........मात्, वृत्यन्तरस्य वैतद्रजतसाधकस्याभावादिति चेत् –न, एतद्रजतगोचरप्रमित्यन्तरस्याङ्गीकारात्। भ[ट्ट]ट्टादिप्रमितरजतस्यैवात्रावभासस्वीकारात्।

नाप्यष्टमः। कतिपय.......सिध्यन्तरत्वात्।

नापि नवमः। कालतोऽव्यतिरिक्ताश्रयत्वासिद्धयार्थान्तरत्वात्।

नापि दशमः। कालश्रयातिरिक्तमात्राश्रितत्वे सिद्धयार्थान्तरत्वात्, पक्षत्रयेऽप्यनाश्रितत्वसिद्धयार्थान्तरत्वाच्च। अनाश्रितत्वेऽपि कालवत्सत्त्वोपप.......नाश्रितप्रमेयत्वात् कालगुणवदिति चेत्--न, पृथिव्यादिरूपादौ व्यभिचारात्। तान्यपि कालाश्रितानीति चेत्--न, कालस्य प्रत्यक्षत्वापत्तेः। रूपादिसमवायः काले नास्तीति चेत्--न, तत्रैव व्यभिचारस्य..........पृथिव्यादिलक्षणानां च कालाश्रितत्वेऽतिव्यापकत्वात्। अनाश्रितत्वेऽपि तत्रैव हेतोर्व्यभिचाराच्च।

नाप्येकादशः। अलौकिकत्वानिरुक्तेः। अलौकिकत्वं प्रमाविषयत्वात्यन्ताभावः कार्याजनकत्वं वा ? नाद्यः, दूषितत्त्वात्। न द्वितीयः, बाधात्। शुक्तिरजतदृष्टान्तस्य साध्यविकलत्वाच्च। अस्य रजतकार्यजनकत्वे प्रत्यक्षानुमानयोरभावात्। इदं रजतं रजतकार्यजनकं रजतत्वात् अन्यरजतवदित्यनुमानाच्च। न चात्रैतत्प्रतीतिविषयत्वाभाव उपाधिः। एतत्प्रतीतिविषयस्यापि भूतलादेः रजतकार्यसयोगत्वेन साध्यव्यापकत्वात्। न चास्य रजतकार्यजनकत्वे शुक्तिरजतादिकावि(?)निर्माणापत्तिरिष्टत्वात्। भट्टादिप्रसिद्धरजतस्यैव शुक्तौ प्रतिभासाङ्गीकारात्। तेन मुद्रिकादिनिष्पत्तेः। शुक्तिमस्तकोत्पन्नरजताङ्गीकारेऽपि न तेन मुद्रिकानिर्माणापत्तिः। तन्निर्माणात् पूर्वमेव बाधपूर्वक्षणे तद्विनाशात्। अन्यथा तत्रापि बाधादिकाले रजताभावापत्तेः।



नापि द्वादशः। अप्रसिद्धविशेषणत्वात्। ज्ञानत्वं साध्यत इति चेत्—न, घटजातादिप्रपञ्चधर्मित्वे सिद्धसाधनात्, अज्ञानरूपघटादिप्रपञ्चधर्मित्वे बाधात्। ज्ञानत्वाज्ञानत्वाभ्यां विप्रतिपन्नप्रपञ्चधर्मित्वे चेदं ज्ञानम् एतद्व्यतिरिक्तज्ञानत्वरहितान्यं ज्ञेयत्वात् ज्ञानान्तरवदिति सिद्धस्याज्ञानस्य पक्षान्तरस्या....बाधात्। पक्षान्तर्भावे तत्रैव ज्ञेयत्वस्य व्यभिचारात्।

किं च अहंज्ञानमेतद्विषयज्ञानव्यतिरिक्तविषयं ज्ञानत्वात् अन्यज्ञानवदिति सिद्धस्याज्ञानस्य पक्षान्तर्भावो न वा ? नाद्यः, बाधात्। न द्वितीयः, तत्रैव व्यभिचारात्।

किं च ज्ञानत्वं किमज्ञानव्यावृत्तिनिमित्तं(?)वा ? नाद्यः, भवतामज्ञानसिद्धावज्ञानव्यावृत्तत्वात्। न द्वितीयः। भवतां ज्ञानत्वजातिर्वा(?)प्रसिद्धत्वात्। ज्ञानत्वजातिश्च किं ज्ञानव्यावृत्तत्वरहितजातिः, किं वा ज्ञानव्यावृत्तरहितत्वे सत्यज्ञानव्यावृत्तिः सत्ते(?)श्चार्थान्तिरत्वात्। न तृतीयः। अप्रसिद्धविशेषणत्वात्।

न तृतीयः। सत्ताप्रमेयत्वादिना सिद्धसाधनात्।

न चतुर्थः। अज्ञानासिद्धौ तन्निमित्तेतरप्रसिद्धत्वात्।

न पञ्चमः, सकलज्ञानव्यक्तेरभेदसाधने बाधात्। किञ्चिदेकज्ञानव्यक्त्यभेदसाधने तद्व्यतिरिक्तज्ञानव्यक्तिषु व्यभिचारात्। अगृहीतविशेषज्ञानव्यक्त्यभेदः साध्यत इति चेत्—न, सर्वदा गृहीतविशेषत्वस्य क्वचिदप्यसिद्धेः। कदाचिदगृहीतविशेषत्वस्य सर्वज्ञानव्यक्तिषु विद्यमानत्वेन पूर्वोक्तदोषानवस्था[ना]त्। ज्ञानव्यक्तित्वस्य च ज्ञानत्वाश्रयत्वस्य ज्ञानत्वादेर्निरुक्तौ निर्वक्तुमशक्यत्वात्। तन्निरुक्तौ च पूर्वोक्तदोषात्।

न षष्ठः। ज्ञायत इति ज्ञानमिति कर्मव्युत्पन्नज्ञानशब्द[:] वाच्यत्वसाधने सिद्धसाधनात्। ज्ञप्तिर्ज्ञानमिति भावव्युत्पन्नज्ञानशब्दप्रवृत्तिनिमित्तवाच्यत्वसाधने ज्ञप्तित्वानिरुक्तौ पूर्वोक्तदोषात्। अगृहीतविशेषज्ञानशब्दवाच्यत्वसाधने कर्मव्युत्पन्नज्ञानशब्दवाच्यत्वसिद्धावर्थान्तिरत्वात्।

न सप्तमः, ज्ञानशब्दप्रवृत्तिनिमित्तशब्देनाज्ञानव्यावृत्त्यादिविवक्षायां पूर्वोक्तदोषादिति। एतेन

सहोपलम्भनियमादभेदो नीलतद्धियोः

इति प्रत्युक्तम्। किं च, नीलो नीलज्ञान.......न्नः, तेन सहोपलभ्यमानत्वात् नीलज्ञानवदिति विवक्षितम्, किं वा नीलज्ञानं नीलादभिन्नम्, तेन सहैवोपलभ्यमानत्वात् नीलवदिति वा ? नाद्यः, असिद्धेः। नीलज्ञानाप्रतीतावपि नीलप्रतिभासाङ्गीकारात्। नील......चाकाशासिद्धेः। न द्वितीयः, असिद्धेरेव नीलानवभासेऽपि मनसा नीलज्ञानावभासात्। नीलविषयं ज्ञानं नीलावच्छिन्नमेव स्वीक्रियते इति चेत्---न, बाह्य-

विषयमगृह्णता नीलावच्छिन्नग्रहणानुपप·······ज्ञानमात्रानवभासो नीलविशिष्टज्ञानानव-भासानुपपत्तेश्च विशेषणज्ञानजन्यत्वाद् विशिष्टज्ञानस्य ।

नापि षष्ठः । पूर्वोक्तदोषादिति ।

तत्र रूपं द्विविधं भास्वरमभास्वरं च । आद्यं तेजसः । द्वितीयं द्विविधं स्वच्छम-स्वच्छं च । आद्यमुदकस्य द्वितीयं पृथिव्याः । तेन भास्वरस्वच्छत्वरहितरूपवती पृथिवीति लक्षणम् । तदपि सप्तविधम् । कृष्णं शुक्लं नीलं हरितं पीतं लोहितं चित्रं चेति । शुक्लत्वादयश्च रूपत्वावान्तरजातयः । भास्वरत्वस्वच्छत्वे च शुक्लत्वावान्त-रजाती । न च रूपत्वे प्रमाणाभावः । रूपं रूपमित्यनुभवजनकचक्षुरादेस्तत्प्रामाण्यात् । न च रूपं रूपमित्यनुभव एवासिद्ध इति वाच्यम् । रूपं रूपमिति व्यवहारात् तत्सिद्धेः । व्यवहारस्य तज्जन्यत्वांश·······था जगत्यनुभवविलयात् । न चात्र चक्षुर्मात्रग्राह्य-मालम्बनं चक्षुरगृह्णता चक्षुषा चक्षुर्मात्रग्राह्यत्वाग्रहणात् । न चायमचाक्षुषोऽनुभव इति वाच्यम्, अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् ।

अन्यथा घटाद्यनुभवस्याप्यचाक्षुषत्वापत्तेः । चक्षुर्मात्रग्राह्यरूपाभावेऽपि रूप-प्रमितिप्रत्ययानुपपत्तेश्च । न चाभावो नास्तीति वाच्यम् । व्याघाताद्, वक्ष्यमाण-त्वात् । न च भावत्वे सति चक्षुर्मात्रग्राह्यत्वं रूपं रूपमिति व्यवहारनिबन्धनः शुक्ल-कृष्णत्वादिजातिषु तदापत्तेः । न च शुक्लत्वादिजातिविरहः, शुक्लानां गुणानामे-कैकत्वादिति वाच्यम् । अयं शुक्लः शुक्ल[ा]द्भिन्नः मेयत्वात्, नीलवत् । शुक्लः पटः शुक्लान्यरूपवान् पटत्वात् कृष्णपटवदिति शुक्लादिभेदसिद्धौ शुक्लः शुक्ल इत्याद्यनु-भवबलेन शुक्लत्वादिजातिसिद्धेः, ईषच्छुक्लः शुक्लतरः शुक्लतम इत्यादिप्रत्ययात् । शुक्लः शुक्लावृत्तिजा[·······द्रव्यसंसर्गात् ईषच्छुक्लप्रत्ययोऽल्पकृष्णद्रव्यसंसर्गात् शुक्लतरः प्रत्ययः शुक्लद्रव्यासंसर्गात् शुक्लतमप्रत्यय इति वाच्यम् । कृष्णद्रव्यसंसर्गा-नुपलम्भेऽपि एकत्र शुक्लः शुक्ल इति प्रत्ययात् ।

शुक्लः शुक्लावृत्तिजातिमान् जातिमत्त्वात् घटवत् इत्यशुक्लादीनां जातिविरह-सामान्यात् गुण इत्यादि गुणलक्षणाभावे गुणत्वानुपपत्तेः, प्रभाकरेण सत्तागुणत्वयोर-प्यङ्गीकारात् । कार्यानाश्रयात् कर्मसामान्यसमवायसंख्यासादृश्यकर्म·······क्तिव्यति-रिक्तो गुण इत्यादेर्विशेषाभावे तयोरतिव्यापकत्वात् । शक्त्यसिद्धौ तद्व्यतिरिक्तत्व-स्याप्यसिद्धेः । सादृश्यादीनां द्रव्यादिष्वेवान्तर्भूतत्वेन सादृश्यादिव्यतिरिक्तत्वविशेषण-वैयर्थ्यात् । अनेकसमवेतत्वेन जातित्वापत्तेश्च ।

न च सामान्यवत्त्वे चक्षुर्मात्रग्राह्यं चक्षुर्मात्रग्राह्यगुणत्वं वा रूपव्यवहारनिमित्तं सामान्यवत्त्वगुणत्वजात्योर्भेदतामसिद्धेः । गुणलक्षणमेव गुणत्वमित्यपि न युक्तम् । सामान्यवत्त्वासिद्धौ तस्याप्यसिद्धेः । सामान्यव्यतिरिक्तत्वे चक्षु······ग्राह्यभावत्वं रूपव्यवहारे निदानमित्यपि न युक्तम् ।



भवन्मते जातिव्यतिरिक्तत्वभावत्वविशेषणयोर्व्यावृत्त्याभावादिति''' शुक्लवृत्ति-कृष्णव्यावृत्तत्वरहितशुक्लवृत्तिनीलव्यावृत्तित्वरहितशुक्लवृत्तिहरितशुक्लवृत्तिपीतव्या-वृत्तित्वरहितशुक्लवृत्तिरहितव्यावृत्तित्वरहित इति······· वृत्तिशुक्लकृष्णनीलहरित-पीतरक्तचित्रव्यतिरिक्तवृत्तित्वरहितजातिमान् जातिमत्त्वात् गोवदित्यादिना रूपत्वा-नुमानाच्चेति ।

न च जातित्वमसिद्धम् । अयं घट एतद्घटशुक्लान्यत्वरहितजातिमदन्यो मेय-त्वात् घटवदिति तत्सिद्धेः । न चात्र······· '''द्रव्यत्वसावयवत्वे उपाधिः । शुक्लादौ साध्यव्यापकत्वात् । एवं सत्त्वादयः समर्थनीयाः ।

न च चित्ररूपे प्रमाणाभावः । चित्रः पट इति प्रत्यक्षस्य सत्त्वात् । न च तन्तु-गतैर्नीलादिरूपैः पटे चित्रप्रत्ययो·······न पटे चित्रं रूपमिति वाच्यम् । पटनिष्ठतया चित्ररूपप्रत्ययात् । तन्तुरूपाणां च पटादिनि[ष्ठ]ष्ठत्वात् । अन्यथा शुक्लः पट इत्यादि प्रत्ययानामपि तन्तुरूपैरेवोपपत्तौ सर्वपटादीनां नी[ल]रूपत्वापत्तेः । तन्तुरूपप्रत्ययाना-मपि पटगतव्याप्यवृत्तिरूपैरेवोपपत्तौ पटे व्या(प्य)वृत्तिरूपाभावप्रसङ्गात् । विप्रतिपन्नः पटो व्याप्यवृत्तिचित्ररूपप्रत्ययात् अन्यथा शुक्लः पट इत्यादिप्रत्ययानामपि पटगताव्या-प्यवृत्तिरूपैरेवोपपत्तौ पटे व्या(प्य)वृत्तिरूपाभावप्रसङ्गात् । विप्रतिपन्नः पटो व्या(प्य) वृत्तिरूपवान् पटत्वात् संप्रतिपन्नवदित्यनुमानाच्च । अयं पटो न नीलपीतादिरूपवान् पटत्वात् संप्रतिपन्नवदित्यनुमानाच्च ।

न च नीलपीतादिरूपवत्त्वस्य क्वचिदप्यप्रसिद्धेरप्रसिद्धविशेषणत्वम् । पार्थि-वपरमाणौ तत्सिद्धेः । तत्र क्रमेण पाकजनीलपीतादिरूपोत्पत्तेः । न चायं पटो नीलरूपवान् पीतावयवत्वात् पीतपटवदित्यादिना सत्प्रतिपक्षत्वं नीलाद्येकैकरूप-साधकेन नीलपीतरूपवत्तासाधनात् समुदितानां चैकज्ञानाजनकत्वात् । नीलरूपवत्त्व-पीतरूपवत्त्वसाधकयोस्तुल्यबलत्वे परस्परप्रतिपक्षत्वेन न्यूनाधिकबलत्वे वान्यतरस्य बाधितत्वेनाप्रमाणत्वात् । नीलरूपवत्त्वे पीतरूपाभासस्य पीतादिरूपत्वे च नील-रूपवत्त्वाभावस्य चोपाधित्वाच्च । पार्थिवपरमाणौ साध्याव्यापकत्वेऽपि साध्यसाधन-संबन्धव्यापकत्वात्, तस्यापि साधनेऽपसिद्धान्तात् ।

नीलरूपवत्त्वे पीतावयवत्वाभावस्य पीतादिरूपवत्त्वे च नीलावयवत्वाभाव-स्योपाधित्वाच्च । तस्यापि साधने बाधात् । अयं पटो न नीलः पीतावयवत्वात्, पीतपटवदित्यादिना सत्प्रतिपक्षत्वाच्च । न चैतत्पटरूपमेतत्पटरूपान्यत् रूपवत्त्वात् पटरूपवदिति सत्प्रतिपक्षत्वम् । अनेकरूपवत्त्वसिद्धावपि नीलपीतादिरूपवत्त्वसिद्धेः । पटगतनीलपीतादिधर्मित्वे ममाश्रयासिद्धेः । तदतिरिक्तरूपधर्मित्वे तवाश्रयासिद्धेः ।

एतेनायं पट एतत्पटरूपान्यरूपवान् पटत्वात् अन्यपटवदित्यादि निरस्तम् । सजातीयानेकरूपसिद्ध्याप्यस्य चरितार्थत्वेन नीलपीतादिमत्त्वासाधकत्वात् । नापि

नीलपीतत्वादिजातिमता रूपेण चित्रप्रत्यय इति युक्तः। नायं नीलः पटो नायं पीतः पट इति प्रत्यक्षबाधात्। नायं नीलः पीतवान् पटत्वात् शुक्लपटवदित्यनुमानबाधाच्च। न च नीलत्वपीतत्ववतो रूपस्यासिद्धेः नीलपीतत्वासिद्धौ तन्निषेधस्याप्रसिद्धत्वेनाप्रसिद्धविशेषणता। एकस्य नीलपीतरूपयोः प्रसिद्धत्वेन पार्थिवपरमाणोर्नीलपीतत्वसिद्धौ तन्निषेधस्यापि शुक्लपटादौ प्रसिद्धत्वात्।

न च नीलपीतत्वनिषेधेऽपि नीलत्वपीतत्वाश्रयरूपवत्वानिषेधादर्थान्तरता। नीलत्वपीतत्वाश्रयरूप[ा]निषेधमन्तरेण नीलपीतवत्त्वनिषेधस्यापर्यवसानात्। सति तस्मिन्नस्य नीलत्वेन पटस्य नीलत्वात् पीतत्वेन च पीतत्वात् नीलपीतवत्त्वस्य दुर्वारत्वात्। न च नीलपीतरूपवत्त्वाभावे नीलपीतावयवत्वाभाव उपाधिः पक्षेतरत्वात्। नापि नीलावयवत्वाभावादिरुपाधिः। नीलपटादौ साध्याव्यापकत्वात्। नापि नीलपीतावय [व] त्वेन सत्प्रतिपक्षता, असाधारणत्वात्। नापि नीलावयवत्वेन नीलादौ व्यभिचारः। अयं पटो नीलः नीलावय[व]त्वात्। तथा पीतः पीतावय [व]त्वात् संप्रतिपन्नवदिति सत्प्रतिपक्षत्वमिति चेत्? एकैकस्य नीलपीतवत्त्वासाधकत्वात्। समुदि[ता]नां च तुल्यबलत्वेऽन्योन्यप्रतिपक्षत्वेन न्यूनाधिकबलवत्वे च न्यूनबलस्य बाधितत्वेनासाधकत्वात्।

नीलवत्त्वे पीतावयवत्वाभावस्य पीतवत्त्वादौ च नीलावयवत्वाभावस्यैवोपधित्वात्। नीलवत्त्वे पीतवत्त्वाभावस्य पीतवत्वादौ च नीलवत्त्वाभावस्योपाधित्वाच्च। तस्यापि साधनेऽपसिद्धान्तात्। पटे नीलत्वपीतत्वाश्रयरूपवत्त्वमभ्युपगच्छता नीलवत्त्वपीतवत्त्वयोरप्यङ्गीकारात्। पटरूपं नीलं नीलासमवायिकारणत्वात्। तथा पीतं पीतासमवायिकारणत्वात् संप्रतिपन्नवदित सत्प्रतिपक्षत्वमिति चेत्—न, नीलवत्त्वपीतवत्त्वासाधकत्वात्।

पटरूपेऽप्येकैकस्य नीलत्वपीतत्वासाधकत्वात्। समुदितानां चोक्तप्रकारेणासाधकत्वात्। नीलत्वे पीताजन्यत्वस्य पीतत्वादौ च नीलाजन्यत्वस्योपाधित्वाच्च। तस्यापि साधने बाधात् पीतजन्येत्यादिना सत्प्रतिपक्षत्वाच्च। नीलत्वे पीतत्वाभावस्य पीतत्वादौ च नीलत्वाभावस्योपाधित्वाच्च। तस्यापि साधने(ऽप)सिद्धान्तात्।

न चायं पटो नीलपीतवान् पार्थिवपरमाणुत्वात्, संयोगाधिकरणत्वात् पार्थिवपरमाणुवदिति सत्प्रतिपक्षत्वम्। अणुत्वनीलावयवत्वात्। पटत्वादिना सोपाधित्वात्। न च नीलपीतरूपवत्त्वाभावे पार्थिवपरमाण्वैतत्संयोगाभाव उपाधिः। अयं संयोगो नीलपीतरहितवृत्तिः, एतत्पटवृत्तित्वात् पटवदिति सिद्धेः। नीलपीतवत्त्वरहितैतत्संयोगाश्रये साध्यव्यापकत्वात्। तत्रैव तत्संयोगाश्रये साध्याव्यपकत्वात्। तत्रैव तत्संयोगवत्त्वस्य प्रतिपक्षस्य व्यभिचाराच्च। नीलपीतत्वादेः परस्परपरिहारेणोपस्थितेः। इदं नील ············घटवदित्यपि न युक्तम्। नीलत्वपीतत्व ·················



तदन्यत्वसिद्ध्याप्यस्य चरितार्थत्वेनाप्यर्थान्तरस्य दुर्वारत्वात्। अन्यथायं शीतस्पर्शोऽनेतदुष्णत्वरहितशीतस्पर्शान्यो मेयत्वात् घटवदित्यादिना शीतोष्णत्वादेः समावेशापत्तेरिति। तस्माच्चित्रपट इति प्रत्यक्षेण नीलपीतादिव्यतिरिक्तनीलत्वपीतत्वादिरहितपटनिष्ठरूपसिद्धिरिति।

अनुमानाच्च। तथा हि अयं नीलपीताद्यपि तन्तुमान् पट इति प्रत्यय एतद्विषयनीलपीतादिरूपातिरिक्तरूपविषयः नीलपीतादितन्तुमत्पटप्रत्ययत्वात्। यद् वा अहमनुष्णनीलपीतादिविषयत्वरहितरूपज्ञानवान् आत्मत्वात्, अन्यात्मवत्, अयं पार्थिवपरमाणुरेतन्निष्ठनीलपीतादिव्यतिरिक्तरूपवान् पार्थिवत्वात् रूप[व]त्त्वाच्च पटवदिति। न चान्यस्य नीलपीतादितन्तुमान् पट इति जानामीति ज्ञानविषयत्वाभाव उपाधिः। व्यावर्त्यविपक्षाभावेनास्य पक्षेतरत्वात्। न चात्मानः एवमपि धर्मविषयत्वाभावेन विपक्षत्वम्, प्रत्ययवत्। प्रत्यये तु····रप्येवंविधरूपविषयत्वात्। अस्य प्रत्यय इति पदस्य प्रत्येते(? त्यनुभवात्। साधनव्यापकत्वाच्च। एवंविधज्ञानविषयान्योन्याभावस्य सर्वत्र साधनवति संभवात्। एवंविधज्ञानविषयत्वात्यन्ताभाव उपाधिरिति चेत्—अत्यन्तविशेषणस्य साधनव्याप्तिपरिहारमात्रे प्रयोजनत्वेनास्य पक्षेतरत्वात्।

नापि द्वितीयानुमानसाध्ये पटवन्निष्ठसंयोगाभाव उपाधिः। एवंविधसंयोगप्रागभावान्योन्याभावादेः सर्वत्र साधनपरिसंभवेन साधनव्यापकत्वात्। न चैवंविधः संयोगात्यन्ताभाव उपाधिः साधनव्यापकत्वाच्च। मय्यपि मन्निष्ठसंयोगात्यन्ताभावसत्त्वात् संयोगात्यन्ताभावसमानाधिकरणत्वात् अत्यन्तविशेषणस्य साधनव्याप्तिपरिहारमात्रप्रयोजनत्वेन पक्षेतरत्वाच्च। अयं संयोगो मन्निष्ठनीलपीतादिज्ञानव्यतिरिक्तरूपज्ञानवन्निष्ठत्वव्यतिरिक्तैतन्निष्ठत्वरहितवत् मेयत्वात् घटवदिति सिद्धेः। संयोगाश्रये साध्याव्यापकत्वाच्च।

एतेन घटम(?)न्निष्ठद्वित्वाभावस्योपाधित्वं निरस्तम्। न चोपाधिविरहेण सत्प्रतिपक्षत्वम् उपाधिः साध्यव्यापकभङ्गस्थले व्यभिचारात्। एतेन तृतीयानुमाने आकाशे तत्परमाणुसंयोगद्वित्वाभावादिना सोपाधित्वम्। तदभावेन च सत्प्रतिपक्षत्वं निरस्तम्।

अपि च कृष्णमेतदन्यकृष्णनीलत्वरहितपीतत्वरक्तत्वशुक्लत्वरहितरूपान्यत् रूपत्वात् पीतरूपवत्। न चानेन रूपासिद्धिमन्नीलत्वादिरहितरूपत्वस्य चित्रलक्षणत्वात्। न च चित्रत्वजात्यसिद्धिर्दोषाय। इदं रूपत्वावान्तरजातिमत् रूपत्वादिति तत्सिद्धेश्च। रूपत्वावान्तरजातिमदिति साध्यविशेषणप्रकृतानुमानेऽपि तत्सिद्धेश्चेति।

किं चैतच्चलरूपं नीलत्वादिरहितम् एतत्पटनिष्ठत्वात् रसवदिति। न चात्रारूपवत्त्वमुपाधिः। पूर्वानुमानसिद्धनीलत्वादिरहितरूपे साध्यव्यापकत्वात्। न

चैवं तत एव नीलत्वादिरहितरूपसिद्धेरन्यवैयर्थ्यात्। तेनैतत्पटनिष्ठनीलत्वादिरहित-रूपासिद्धेः रूपत्वं नीलपीतकृष्णहरितशुक्लावृत्ति रूपाव्यावृत्तित्वात् सत्तावत्। न चारूपवृत्तित्वमुपाधिः। पूर्वानुमानसिद्धनीलादिपीतादिव्यतिरिक्तत्वे रूपमात्रवृत्तिषु साध्याव्यापकत्वात्। अयं पटो नीलत्वपीतत्वकृष्णत्वहरितत्वरक्तत्वरहितरूपवान् समवेतद्रव्यत्वात्, न यदेवं न तदेवम् यथा शुक्लः पट इति व्यतिरेकप्रवृत्तेश्च। न चात्राप्रसिद्धविशेषणत्वम्, नीलत्वादिरहितारूपसाधकपूर्वानुमानेन विशेषणप्रसिद्धेः। न च तेन नीलादिव्यतिरिक्तरूपवत्त्वासिद्धेरप्रसिद्धविशेषणत्वम्। नीलत्वादि-रहितरूपत्वैतत्साध्यत्वात्। किंचिन्निष्ठसाधनविशेषणवता पूर्वानुमानेन तथाविधरूप-वत्त्वस्यापि सिद्धेश्च। नीलादिव्यतिरिक्तरूपवतः पार्थिवपरमाणो.........पक्षादपि व्यावृत्तत्वेनायमसाधारणमिति चेत्—न, तस्यापि सन्दिग्धसाध्यभेदात्। केनचिद-नुमानेन क्वचित् साध्यप्रसिद्धेः कर्तुं शक्यत्वाच्च। एतत्पटरूपं नीलत्वादिरहितरूपम् एतत्पटरूपत्वात् न यदेवं न तदेवम्, यथा शुक्लं रूपमिति।

रसः सप्तविधः। मधुरोऽम्लो लवणस्तीक्ष्णस्तिक्तः कषायश्चित्रश्चेति। मधुरो द्विविधः, अव्यक्तो व्यक्तश्चेति। आद्य उदकस्य। अव्यक्तत्वं च जातिविशेषः। उदकरस उदकरसवृत्त्युदकरसव्यावृत्तत्वरहितोदकानुदकरसावृत्तिजातिमान् जाति-मत्त्वाद् घटवदिति। द्वितीयः पृथिव्याः। तेन व्यक्तरसवती पृथिवीति लक्षणम्। व्यक्तरसः सप्तविधः मधुरोऽम्लो लवणस्तीक्ष्णः कटुः कषायश्चित्रश्चेति। चित्ररूपवत् चित्रो रसो हरीतक्यादौ समर्थनीय इति।

गन्धो द्विविधः स्पर्शान्तरव्यञ्जकोऽव्यञ्जकश्चेति। आद्यो वायोः। द्वितीयः पृथिव्याः॥

इति पृथिवी॥

## रूप[रस]स्पर्शवत्यो आपो द्रवा स्निग्धाश्च ॥२.१.२॥

इति रूपरसस्पर्शा व्याख्याताः पूर्वमेव॥ आपो द्रवाः स्निग्धाश्चेति न युक्तम्। द्रवत्वस्नेहयोः पृथिव्यपृथिवीनिष्ठत्वेन सामान्यगुणत्वात्। विशेषगुणप्रस्तावे च सामान्यगुणव्युत्पादनस्यानुचितत्वात्। सांसिद्धिकं द्रवत्वं विशेषगुण इति चेत्—न, संसिद्धिकस्य निर्वक्तुमशक्यत्वात्। नित्यं तदिति चेत्-न, कार्यजलद्रवत्वे तदभावात्। तेजःसंयोगाजन्यं तदिति चेत्—न, तेजसा विलीनकरकादिद्रवत्व[स्य] तेजःसंयोग-जन्यत्वात्। कार्यपृथिव्यादिद्रवत्वस्यापि तेजःसंयोगजन्यत्वात्। कार्याकार्यैकद्रवत्व-गतजातेः सांसिद्धिकद्रवत्वमिति चेत्—न, प्रमाणाभावात्। तैलादिष्वपि सत्त्वाच्च। करकादौ द्रवत्वाभावाच्च। उदके स्नेहत्वस्यानुपपत्तिबाधितत्वात् पार्थिवघृततैलवसासु प्रत्यक्षसिद्धत्वाच्च। द्रवत्वस्य चोदकपृथिवीतेजोविशेषतन्निष्ठजातित्वाच्चेति। तन्न,



तेजःसंयोगाजन्यत्वस्य तन्मात्रजातेर्वा सांसिद्धिकत्वात् उदकपरमाणुद्रवत्वस्या-जन्यत्वेन तेजःसंयोगाजन्यत्वात्।

न च विलीनकरकादिद्रवत्वस्य तेजःसंयोगजन्यत्वम् तेजःसंयोगेन करकावयव-कर्मण एव जननात्। तदनन्तरमवयवविभागादिना करकादिवृत्तावदृष्टवदन्योदक-परमाणुसंयोजककर्मजसंयोगादि.........तदोदकारोत्पत्तौ [?] कारणगुणेभ्य एव तत्तद्रूपोत्पत्तेः। कार्यपृथिवीद्रवत्वस्य प्रत्यक्षेणैव तेजःसंयोगजन्यत्वावगमात्। पिठ[र]पाकाभ्युपगमात् कार्यपृथिवीद्रवत्वं द्रवत्वजन्यं कार्यनिष्ठद्रवत्वात् करकादि-द्रवत्ववदिति चेत्—न, असति बाधे तस्यापीष्टत्वात्। सति बाधे तत एतन्निवृत्तिः। उदकद्रवत्वं तेजःसंयोगाजन्य......तेजःसंयोगाजन्यद्रवत्वं तदितरकालवृत्तिजातिमत् जातिमत्त्वादिति सांसिद्धिकजातिसिद्धेश्च। तैलद्रवत्वस्य च चक्रसंघर्षसमुत्पन्न[त्वात्] ...... तेजःसंयोगजन्यं [जन्यत्वं] पृथिवीद्रवत्वात् घृतद्रवत्ववदित्यनुमानात्।

**लीलावतीकारादयस्तु** तैलसंयुक्तोदकद्रवत्वं तिले प्रतिभास[ते.........तै]ले जातनिष्ठाजातेरभिधाने बाधात्। तैलेऽपि द्रवत्वस्य प्रत्यक्षत्वात् बाधकाभावाच्च। तैलसंयुक्तोदकप्रत्यक्षानुमानयोरभावाच्च। अयं स्नेहः उदकाश्रितः स्नेहत्वात् संप्रतिपन्नवदिति चेत्—न, स्नेहशब्देन तै]ले जातनिष्ठजातेरभिधाने बाधात्। तैलनिष्ठविशेषगुणाभिधाने चाश्रयासिद्धेः तत्र स्नेहगुणाभावात्। भावे वा तस्योदक-निष्ठत्वसाधने बाधात्। तैलनिष्ठतया प्रतीयमानस्नेहगुणाभिधाने चाश्रयासिद्धेः घृततैलवसामात्रनिष्ठजातिव्यतिरिक्तस्नेहगुणाप्रतीतेः। स्नेहव्यवहारस्य तत एवोपपत्तेः।

तैलादिसंयुक्तोदकाङ्गीकारे तैलप्रक्षेपवह्निविनाशापत्तेः, उदकस्य भौमानल-विनाशहेतुत्वात् तैलादिप्रतिबन्धत्वात्......तन्न भौमानलं विनाशयतीति चेत्–न, तैलादेः सत्प्रतिबन्धकत्वे मानाभावात्। वह्निविनाशस्य च तैलसंयुक्तोदकाभावेनो-पपत्तेः। करकादौ निश्चलकूपोदकद्रवत्वस्य प्रत्यक्षत्वात् मन्दानां स्यन्दनाभावेन द्रवत्वाभा......भिमानात् विप्रतिपन्नं प्रति करकादयो द्रवत्ववन्तः उदकत्वात् संप्रतिपन्नवत् इत्यनुमानात्। चलत्वविरुद्धकाठिन्य.........प्रत्यक्षत्वात्। विशिष्ट-करणादीनां धर्मित्वात् धर्मिग्राहकप्रत्यक्षबाधितमिति **आत्रेयाचार्याः**। तन्न, काठिन्यं किं द्रवत्वाभावः, अवयवनिष्ठो निविडः संयोगो वा, निविडावयवसंयोगारब्धत्वं वा, तनिष्ठजातिर्वा, स्पर्श[वि]शेषो वा ?

नाद्यः, द्रवत्वाभावस्य करकाभावसिद्धेः।

न द्वितीयः, अवयवनिष्ठनिविडसंयोगस्यापि करकाभावसिद्धेः।

न तृतीयः, परस्परविविक्तकरकावयवाप्रतीतौ तन्निष्ठनिविडसंयोगानवगमे तदारब्धप्रतीतेः।

म चतुर्थः, तस्याः पृथिवीत्वावान्तरत्वे करकादावसंभवात् उदकत्वावान्तरत्वे च मैष्ठा(?)दावसंभवात्। पृथिवीत्वोदकत्वयोश्च कठिनत्वावान्तरे सर्वपृथिव्युदकेषु कठिनत्वापत्तेः। पृथिवीत्वाबिना प[रा]परभावे च जातिसङ्करापत्तेः।

न पञ्चमः, मृदुभिरप्यवयवैर्निबिडसंयोगैरेवारब्धकाठिन्योत्पत्तेः। स्पर्शवत्वे तदवयवेषु मृदुष्वपि काठिन्यापत्तेः। कार्यगतस्य स्पर्शस्य कारणगुणपूर्वकत्वात्। एतेन मृदुत्वस्यापि स्पर्शत्वं प्रत्युक्तम्। विरोधासिद्धेश्च द्रव्येष्वपि समुद्रादितरङ्गेषु काठिन्यस्य प्रत्यक्षसिद्धत्वात्। अभिधानुमेयत्वाच्च। एतेन द्रवत्वे कठिनत्वाभाव उपाधिः, कठिनत्वेन च सत्प्रतिपक्षत्वं निरस्तम्।

अपि चास्मन्मते द्रवत्वाभावः काठिन्यम् तदभावश्च द्रव······मेव। न च तदेव तत्रैवोपाधिः, साधनव्यापकत्वात्। न च द्रव्यत्वाभावं(?) प्रतिपक्षः। असिद्ध-द्रवत्वाभावस्य कठिनत्वे मृदुवस्त्रादौ कठिनत्वापत्तिरिति चेत्–न, उदकापेक्षया काठिन्यस्य तत्रापीष्टत्वादिति। न चोदकस्नेहानुपलब्धिलोष्टादिव्यावृत्तसकलोदक-साधारणस्निग्धप्रत्ययस्य सर्वलोकसिद्धत्वात्। न च स्नेहजातिरेव उक्तावान्तर-·········दकसाधारणत्वानुपपत्तेः। उदकमात्रवृत्तित्वेन चोदकत्वेन तुल्यव्यक्तिकत्वा-न्नेरेकत्वपरत्वे च पृथिवीत्वेन जातिसंकरापत्तेः। उत्कर्षवान् स्नेहो गुण उत्कर्षत्वात् रूपवत्।

तथा च·······रूपवदित्यनुमानाच्च लवणोदकात् तत्तारे कूपोदकस्निग्धतमं कपिलसारोदकानि स्निग्धमित्यनुभवात्। उत्कर्षादेः द्रव्यादित्वे गुणेष्वसंभवात्। जातित्वे च स्नेहत्वादिना संकरादसिद्धिरिति चेत्—न, उत्कर्षात् द्रव्याविलक्षणरहि-तत्वेन असंभवात्। न च मन्दं गच्छत्यतिशयेन गच्छतीत्यनुभवात् उत्कर्षादेः कर्मणि व्यभिचारः। तत्र वेगतदभावातिरिक्तौ उत्कर्षनिकर्षप्रतीतेः। प्रतीतौ वा कर्मान्यत्वेन हेतुविशेषणान्यपि च उदकद्रवत्वरूपरसशीतस्पर्शातिरिक्तविशेषगुणवत् विशेषगुणव-त्त्वात् पृथिवीवत्। इदमुदकमेतन्निष्ठरूपरसस्पर्शद्रवत्वातिरिक्तविशेषगुणवत् विशेष-गुणवत्त्वात् संप्रतिपन्नवत्। उदकं रूपरसशीतस्पर्शसंख्यापरिमाणपृथक्त्वसंयोग-विभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारातिरिक्तगुणवत् स्पर्शवत्त्वाद् घटवत्। उदक-मुदकरूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्काराति-रिक्तगुणवद् घटवत्। एतदुदकद्रवत्वम् एतन्निष्ठरूपस्पर्शातिरिक्तविशेषगुणान्यत् मेय-त्वाद् घटवदिति तत्सिद्धेः।

उदके अव्यक्तमाधुर्यवदव्यक्तस्नेहाभ्युपगमेऽपि पार्थिवे घृतादौ व्यक्तमाधुर्यवद-व्यक्तस्नेहोऽपि स्यादनुभवबलादिति चेत् – न, घृतादयः स्निग्धा इत्यनुभवाद् व्यवहार-सिद्धिरिति चेत्– न, घृतादयः स्निग्धा इति व्यवहाराभावात्। घृततैलवसाः स्नेहा इति लोकवेदयोर्व्यवहारात् घृतादयः स्निग्धा इत्यनुभवस्य घृतसंयुक्तोदकसमवेतेनापि



स्नेहेनोपपत्तेः। उष्णं जलमित्यादि··········ख्ये किं बाधकमिति चेत्? घृतादयो न [स्वाभाविक]स्नेहवन्तः पार्थिवत्वात् घटवत्। विमतस्नेहो न घृताश्रितः स्नेहत्वादन्य-स्नेहवदित्यादिकम् अनुमानम्। अस्तु तर्हि स्नेहव्यवहारात् घृतादौ स्नेहस्य सिद्धिरिति चेत्—न, गुणत्वावान्तरस्नेहत्वस्य घृतादावसंभवात्। कथं तर्हि घृतादौ स्नेहव्यवहार इति चेत्? पृथिवीत्वावान्तरघृततैलवसामात्रनिष्ठजातेरिति ब्रूमः। तर्हि उदकगुण-स्नेहव्यवहारो न (?) न स्यात्, तदभावादिति चेत्–न, तत्र गुणत्वावान्तर-स्नेहत्वस्य जातेरेव तदुपपत्तेः। अनेकार्थस्तर्हि स्नेहव्यवहारः। सत्यम्, एतन्निष्ठनि-मित्तासंभवात्, अक्षादिव्यवहारवत्। तस्माद् उदक एव स्नेहगुण इति।

न चैवं साध्ये स्नेहातिरिक्तविशेषणोपादानानुदय·······णान्तरासिद्धिः, तद-तिरिक्तविशेषणोपादानाच्च। उदके गुणान्तरासिद्धिस्तदतिरिक्तविशेषणोपादानाच्च। गुणान्तरसिद्धिरित्युदकेनान्तरगुणोत्पत्तिरिति वाच्यम्। तत्र स्नेहासिद्धौ स्नेहातिरिक्त-विशेषणस्याप्रसिद्धत्वात्। मम च सिद्ध·······। न च स्नेहगुणद्रव्यकर्मसामान्यविशेष-समवायव्यतिरिक्तभावत्वात्, रूपवत्। न चायमसिद्धः। द्रव्यकर्मविशेषसमवाय-व्यतिरिक्तस्य **भूषणकारेण** अप्यङ्गीकारात्। सामान्यव्यतिरिक्तस्य चानुमानात्। स्नेहो न जातिः······ ····तेजस्त्ववायुत्वमनस्त्वव्यतिरिक्तत्वे सति परमाणुनिष्ठत्वात् परमाणुरूपवत्। न चास्य परमाणुनिष्ठत्वमसिद्धम्। परमाणवः स्निग्धाः स्निग्धाव-यव······ संप्रतिपन्नवत् इत्यनुमानात्॥ २॥

॥ इत्युदकम् ॥

## तेजो रूपस्पर्श[वत्] ॥ २.१.३. ॥

तेजसो[रूपं भास्वरमेवेत्याचार्याः। तन्न,]अग्न्यादेररुणकपिलरूपोपलम्भात्। बाधकाभावाच्च। अन्यथा······ राच्च। विलयात्। विमतम् अरुणकपिलादि रूपत्वात् पार्थिवारुणकपिलादिरूपवदिति चेत्– न, धर्मिग्राहकप्रमाणबाधकत्वात्। अन्यथा विमतं शुक्ल······ नालोकस्य शुक्लत्वात् पृथिवीशुक्लरूपवत् इत्यादेर्दुर्वारत्वात्।

न चापसिद्धान्तः। **सूत्रकारेणाग्नेः** कपिलादिरूपविरहाव्युत्पादनात्।

स्पर्शोऽप्युष्ण एव तेजसः। कथं तर्हि चान्द्रे महसि तदनुपलम्भः? अभिभूत-त्वात्। शैत्यप्रतीतिः कथमिति चेत्–न, अभिभावकोदकस्पर्शस्य संयुक्तसमवायेन स्फटिके लोहितत्ववत् प्रतीतेरिति। रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपर-त्वापरत्वद्रवत्वसंस्कारवत्। तेजः केषांचिन्मते गुरुत्ववदपि॥ ३॥

वायु[ः]स्पर्श[वान्] ॥२।१।४॥

स्पर्शान्तरव्यञ्जकस्पर्शो वायोः। पृथिव्यादीनां स्पर्शो न स्पर्शान्तरं व्यनक्ति। वायोस्तु स्पर्शः स्पर्शान्तरं व्यनक्ति। तथा च स्नातस्य शीतस्पर्शोऽभिव्यनक्ति वायुस्पर्शात्। त्वगिन्द्रियस्पर्शाच्च सर्वस्पर्शाभिव्यक्तिः।

न च वायुरेव शीतस्पर्शाभिव्यञ्जको न तु स्पर्श इति वाच्यम्, उद्भूतस्पर्शस्य बाह्यावयवस्य शीतस्पर्शव्यञ्जकत्वात्। अन्यथा स्तिमितवायोरपि शीतस्पर्शव्यञ्जकत्वापत्तेः॥ ४॥

ननु आकाशादयो रूपादिमन्तः द्रव्यत्वात् संप्रतिपन्नवदिति चेत्—न, अनुपलब्धिर्भाविका। अनुद्भूत""न तदुपपत्तेः। धवलनीलादिरूपोपलब्धिश्च। तथा च रूपादिनिष्ठजातीनां पृथिवीवृत्तिवृत्तित्वसत्त्वपृथिवीवृत्तिवृत्तित्वरहितपरिमाणगुणवृत्तिजातिमत्त्वस्य विशेषगुणलक्षणस्यानुपपत्तेः। विशेषगुणत्वाभा[""" तत्प्रतिपादनार्थं मध्याचारभेदयुक्त इति शङ्कापरिहारार्थं सूत्रम्—

त आकाशे न विद्यन्ते ॥२।१।५॥

ते इति पूर्वोक्ता रूपादयः परामृश्यन्ते। आकाशादौ द्रव्यत्वेन साधने जलादौ रससाधने तेजोवाय्वो रूपसाधने वायोः स्नेहसांसिद्धिकद्रवत्वसाधने च व्यभिचारः। स्पर्शसाधने च धर्मिग्राहकप्रमाणबाधः शब्दस्य स्पर्शवद्गुणत्वनिषेधमुखेनैवाकाशसिद्धेः।

परमाण्वादीनां च विशेषगुणवत् संयोगिसमवायिकारणत्वनिषेधमुखेनैव कालादिसिद्धेश्चेति। अयं घट एतदन्यरूपादन्यद्रव्यत्वात् घटवदिति सिद्धे रूपादिरहिते द्रव्ये द्रव्यत्वस्य व्यभिचाराच्च। तथापि धर्मित्वे धर्मिग्राहकप्रमाणबाधात्। आकाशादयो न स्पर्शादिमन्तः पृथिव्यप्तेजोवायुव्यतिरिक्तत्वात्। यत् स्पर्शादिमत् न तत्पृथिव्युदकतेजोवायुव्यतिरिक्तम् यथा घट इति व्यतिरेकिनां गगनादीनां रूपादिरहितत्वसिद्धेश्चेति। धवलनीलादिप्रतीतिव्यापकालोकमण्डलपार्थिवाग्रपटलादौ गगनस्वरूपादिमत्त्वे पृथिव्यादिव्यतिरेकसिद्धेरिति।

एतेन पृथिव्यप्तेजोवायुव्यतिरिक्ता रूपादिमन्तः प्रमेयत्वादित्यादि निरस्तम्॥ ५॥

ननु द्रवत्वस्योदकविशेषणत्वं द्रवत्वजातेः पृथिवीवृत्तित्वे सति अपृथिवीवृत्तिवृत्तित्वात्। पृथिव्यामिति घृतादौ द्रवत्वसत्त्वादिति चेत्—न, यतः

स[र्पिर्ज]तुमधूच्छिष्टानां पार्थिवानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् ॥२.१.६॥

सत्त्व"""""लाक्षासिक्थकादौ च द्रवत्वम्। भवति च द्रवत्वजातिः पृथिवीवृत्तित्वे सत्यपृथिवीवृत्तिवृत्तिः। तथाप्युदकद्रवत्वं विशेषगुण एव तेजः-



संयोगादन्यत्वात्। तेजःसंयोगादन्यद्रवत्वजातेश्च पृथिवीवृत्तित्वात्।"""""" पृथिवीवृत्तिवृत्तित्वाभावात्। नित्यद्रवत्वस्यैव सांसिद्धिकत्वात्। कारणानपेक्षं हि स्वाभाविकम्।"""""" पार्थिवपरमाणुद्रवत्वस्य च नैमित्तिकत्वाच्च। कारणाधीनं हि नैमित्तिकमुच्यते। [नैमित्तिकं] द्रवत्वं च तेजःसंयोगकारणाधीनं, सति तस्मिन् परमाणुद्रवत्वोत्पत्तेः। न चैवंकारणाधीनत्वात् कार्योदकद्रवत्वस्य नैमित्तिकत्वापत्तिः। इष्टत्वात्। अन्यथा कार्यपृथिवीद्रवत्वस्यापि नैमित्तिकत्वाभावप्रसङ्गात्, तेजःसंयोगजन्यत्वात्। यदा तु कार्यपृथिवीत्वस्यापि तेजःसंयोगजन्यत्वम्, तदेव च नैमित्तिकत्वमिति मतम्। तदा कार्योदकद्रवत्वस्य न सांसिद्धिकत्वम्। नापि नैमित्तिकत्वम्। किं तु प्राकारमेवेति(?)। कार्यपृथिवीद्रवत्वं द्रवत्वं न तेजःसंयोगजं कार्यत्वम्। पृथिवीद्रवत्वं कार्योदकद्रवत्ववदिति चेत्—न, पृथिवीद्रवत्वाभावेन सोपाधित्वात्, सत्प्रतिपक्षत्वाच्च। घृतादिद्रवत्वस्य प्रत्यक्षेणैव तेजःसंयोगजत्वावगमाच्च। पार्थिवपरमाणुद्रवत्वं नित्यं तेजःसंयोग(ा)जन्यं वा परमाणुद्रवत्वात् उदकपरमाणुद्रवत्ववदिति चेत्—', पृथिवीद्रवत्वाभावेन सोपाधित्वात्। पृथिवीद्रवत्वेन सत्प्रतिपक्षत्वाच्च। पार्थिवपरमाणुद्रवत्वं तेजःसंयोगजं तदन्वयव्यतिरेकानुविधायित्वात् कार्यपृथिवीद्रवत्ववदिति तस्य तेजःसंयोगजन्यत्वनिर्णयात्।

न चात्र परमाणुद्रवत्वाभाव उपाधिः। इदमेतदन्यं कार्यत्वरहिततेजःसंयोगजद्रवत्ववत् पार्थिवान्यद्रवत्वात् घटवदिति साध्याव्यापकत्वात्। अनेनैव पार्थिवपरमाणुद्रवत्वस्य तेजःसंयोगजत्वसिद्धेश्च। न चोपाधिविरहेण सत्प्रतिपक्षत्वम्। उपाधिसाध्यव्यापकभङ्गस्थले व्यभिचारात्।

सर्पिर्जतुमधूच्छिष्टानामित्युपलक्षणम्। तैलटंकादिद्रवत्वस्यापि तेजःसंयोगजन्यत्वात्। [अग्निसंयोग] ग्रहणमप्युद्भूतोष्णस्पर्शतेजस उपलक्षणम्। सौरतेजःसंयोगादपि घृतादिद्रवत्वोपपत्तेः। अद्भिः सामान्यमिति पृथिव्युदकयोर्द्रवत्वाधिकरणसाधर्म्यप्रतिपादनार्थम्। नायं साधर्म्यप्रस्ताव इति चेत्—सत्यम्, तथापि पूर्वानुक्तं प्रसङ्गादत्रोच्यत इति न दोषः।

ननु यथा सांसिद्धिकं द्रवत्वं [जलस्य] विशेषगुणः, तथा नैमित्तिकं द्रवत्वं पृथिवीविशेषगुणो भविष्यति, नैमित्तिकद्रवत्वजातेः पृथिवीवृत्तिवृत्तित्वेऽपि अपृथिवीवृत्तित्वविरहादित्याशङ्कापरिहारार्थं सूत्रम्—

त्रपुसीसलोहरजतसुवर्णादीनां च द्रवत्वमद्भिः सामान्यम् ॥२.१.७॥

यथा नैमित्तिकद्रवत्वं घृतादौ पृथिव्याम्, तथैव त्रपु[सीस]लोहादौ तेजसोऽपि। तेन नैमित्तिकद्रवत्वजातेः पृथिवीवृत्तिवृत्तित्वे सति अपृथिवीवृत्तिविरहादित्याशङ्कापरिहारार्थं वृत्तित्वेन तद्रहितत्वासंभवात्। न नैमित्तिकद्रवत्वस्य विशेषगुणत्वमिति

अग्निसंयोगादित्यनुवर्तमाने पुनरग्निसंयोगादिति नियमार्थम्। तेन सुवर्णादीनामग्निसंयोगादेव द्रवत्वम्। घृतादीनां तु [खरतरतपना] लोकादिसंयोगादपि द्रवत्वमुत्पद्यते इति। कथं सुवर्णादयस्तैजसा इति चेत्—इमे तैजसाः सुवर्णादयः भास्वररूपाधिकरणत्वात् आलोकवदिति। न चायमसिद्धः। अङ्गारसारितमलसुवर्णरूपादीनामन्धकारेऽपि भास्वररूपो[पलब्धेः]। गुरुत्वाश्रयस्य धर्मित्वे बाधः, तदतिरिक्तस्य धर्मित्वे आश्रयासिद्धिरिति चेत्? भास्वररूपाधिकरणस्य धर्मित्वात्। न चा······यत्वात् कथं सुवर्णत्वमिति चेत्—न कथंचित्। कथं तर्हि तत्र सुवर्णपदप्रयोग इति चेत्? सुवर्णसंब······ गङ्गासंबन्धिनि तीरे गङ्गाशब्दप्रयोगवत्। मुख्ये किं बाधकमिति चेत्—न, पार्थिवे तेजस्त्वावान्तरसुवर्णत्वासंभ[वादिति] ब्रूमः। पीतं गुरुत्वाश्रयनिष्ठपृथिवीत्वावान्तरजातिरपि सुवर्णपदप्रवृत्तिनिमित्तमाश्रितमिति चेत्—न, तेजस्त्व······सुवर्णत्वाच्चाश्रयसंबन्धेन सुवर्णपदप्रयोगोपपत्तौ निमित्तान्तरकल्पनानवकाशात्। अन्यथा गङ्गादिपदस्य गङ्गादितीरे प्रयुज्यमानस्य गङ्गातीरत्वनिमित्तान्तरकल्पनया लक्षणोच्छेदप्रसङ्गात्।

तदुक्तं जैमिनिना—

··········यश्चानेकार्थम्

इति। गुरुत्वपीतिमाश्रयनिष्ठपृथिवीत्वावान्तरजातिनिमित्त एवायं सुवर्णपदप्रयोगः। तदाश्रयसंबन्धिनि तेजोविशेषे··········लक्षणया प्रयुज्यत इति किं न स्यात्? गुरुत्वपीतिमाश्रयविषयसुवर्णप्रसिद्धेर्लोकमूलत्वात्। ते[जोवि]शेषविषयसुवर्णप्रसिद्धेश्च शास्त्रमूलत्वात्। शास्त्रमूलप्रसिद्धेश्च बलवत्तरत्वात्। तदुक्तं जैमिनिना

शास्त्रस्यापातनिमित्तत्वात्।

अस्तु वा पीतिमगुरुत्वसंबन्धिनि भास्वररूपवति लक्षणया सुवर्णवत् पदप्रयोगः, तत्रापि न कश्चित् दोषः। तस्यैव तैजसत्वसाधनात्। अस्तु वा पीतिमगुरुत्वाश्रयभाव उपाधिः। तस्यापि साधनात्। न च तत्साध·······प्रत्यक्षसुवर्णानुभवव्यवहारयोरविशेषात्। न च सुवर्णत्वस्य पृथिवीत्वतेजस्त्वाभ्यां सङ्करः। तस्यादूषणत्वात्। दूषणत्वे वा सुवर्णत्वस्य शरीरवत् उपाधित्वेनाजातित्वात्। तैजसत्वं तु भास्वररूपाधिकरणस्यैव। न च गुरुत्वाभाव उपाधिः। तस्यापि साधनात्। न च तत्साधने प्रत्यक्षबाधः। गुरुत्वस्य प्रत्यक्षत्वात्।

न च पतनलिङ्गानुमानबाधः। इन्धनसंयुक्तदहनपतने व्यभिचारात्। तेजसोऽधोगमन·········मिति चेत्—तर्हि प्रकृतमपि तत एव, न पतनमिति न ततः सुवर्णे गुरुत्वसिद्धिः। नापि द्रवत्वाभाव उपाधिः, अयसीव एतदन्यद्रवत्वरहितत्वरहिततेजोऽन्यः तेजस्त्वादालोकवदिति सिद्धे द्रवत्ववति तैजससिद्धेश्च व्यापकत्वात्। न च··········गुरुत्वाभ्यां सत्प्रतिपक्षत्वम्। उक्तन्यायेनासिद्धेनापि द्रव्यत्वेन सत्प्रतिपक्षत्वम्। उक्तन्यायप्रसिद्धद्रवत्वाश्रये तेजसि व्यभिचारात्।



यत् पुनरनुमानम्, सुवर्णं पार्थिवम् नैमित्तिकद्रवत्वाधिकरणत्वात् घृतवदिति तत् न।··········गुरुत्वाश्रयस्य सुवर्णस्य धर्मित्वे सिद्धसाधनात्। भास्वररूपाधिकरणे स्वर्णस्य धर्मित्वे बाधात्। भास्वररूपाधिकरणत्वाभावेन सोपाधित्वाच्च।

किं च पार्थिवत्वं किं पृथिवीसंबन्धित्वं, पृथिवीसंयुक्तत्वं वा, पृथिवीसमवायित्वं वा, पृथिवीसमवेतत्वं वा, पृथिव्याश्रितत्वं वा, पृथिवीकार्यत्वं वा, पृथिवीसमवायिकारणत्वं वा?

नाद्यद्वितीयौ, उपष्टम्भकपृथिवीसंयुक्तत्वेन सिद्धसाधनात्।

न तृतीयः, सिद्धसाधनात्, समवायस्यैकत्वात् समवायस्य रूपादिसमवायवति सुवर्णे सत्त्वात्।

न चतुर्थः, पार्थिवपरमाणुषु व्यभिचारात्। तेषां नैमित्तिकद्रवत्वाधिकरणत्वेऽपि पृथिव्यसमवेतत्वात्। पृथिवीसमवेतत्वं किं समवायवत्त्वे सति··········नाद्यद्वितीयौ, सिद्धसाधनात्। सुवर्णस्य भूतलाश्रितत्वात्। भूतलसमवायत्वाच्च। समवाय·········त्वेन रूपादिसमवायस्यापि भूतलसमवायत्वात्।

न पञ्चमः, तत एव।

न षष्ठः, उपष्टम्भकपृथिवी··········पार्थिवपरमाणुव्यभिचारात्।

न सप्तमः, अग्नौ वैयर्थ्यात्। पृथिवीत्वे तावतैव चरितार्थत्वात्। न पृथिवीत्वं नैमित्तिकद्रवत्वाधिकरणे व्यभिचाराच्चेति।

एतेन पृथिवीत्वं सुवर्णवृत्तिपृथिव्यव्यावृत्तत्वात् सत्ता··········पीतिमगुरुत्वाश्रयसुवर्णवृत्तित्वसाधने सिद्धसाधनात्, भास्वररूपाधिकरणस्य सुवर्णवृत्तित्वसाधने बाधात्। भास्वररूपस्य प्रत्यक्षसिद्धत्वात्। सामान्यं सुवर्णवृत्तित्वसाधनेऽपि पूर्वोक्तसिद्धसाधनात्। अबवृत्ति पृथिवीवृत्ति·········सोपाधित्वाच्च।

तेजस्त्वं सुवर्णवृत्ति तेजोव्यावृत्तत्वात् रक्तादिवदिति सिद्धेः, सुवर्णवृत्तित्वसाधने बाधात्। सुवर्णान्तरवृत्तित्वसाधने सिद्धसाधनाच्च। सुवर्णत्वं पृथिवीवृत्ति सुवर्णवृत्तित्वात् सत्तावदि··········युक्तं पीतिमगुरुत्वाश्रयसुवर्णवृत्तित्वेन सिद्धसाधनात्। सुवर्णं पृथिवी सुवर्णपृथिवीसंयोगाधिकरणत्वात् तेजस्त्वपृथिवीवदित्यपि न युक्तम्। पीतिमगुरुत्वाश्रयस्य धर्मित्वे सिद्धसाधनात्। भास्वररूपाधिकरण····त्वे बाधादित्यादिदूषणग्रस्तत्वात्। सुवर्णं न पृथिवी सुवर्णपृथिवीसंयोगाधिकरणत्वात्,

अपृथिवीवदिति सत्प्रतिपक्षत्वाच्च। पृथिवीत्वं सुवर्णव्यतिरिक्तपृथिवीव्यतिरिक्तवृत्ति-पृथिवीवृत्तिव्यावृत्ति..........त्वे बाधादित्यादिदूषणग्रस्तत्वात्। अपृथिवीवदिति सत्प्रतिपक्षत्वाच्च। पृथिवीत्वं सुवर्णव्यतिरिक्तवृत्तिपृथिवीवृत्तिव्यावृत्ति........द्रवत्ववदित्यपि न युक्तम्। सुवर्णशब्देन गुरुत्वपीतिमाश्रयाभिधाने सिद्धसाधनात् भास्वररूपाधिकरणे बाधात्। भास्वररूपवतस्तेजस्त्वस्य प्रत्यक्षसिद्धत्वात्। पृथिवीत्वं न सुवर्णव्यतिरिक्तपृथिव्यतिरिक्त........पृथिवीव्यावृत्तत्वात् घटवदिति सत्प्रतिपक्षत्वाच्च।

सुवर्णदीपसंयोगः पृथिवीवृत्तिसुवर्णत्वात् सत्तावदित्यपि न युक्तम्। सुवर्ण-शब्देन पीतिमगुरुत्वाधिकरणविवक्षायां बाधात्। विप्रतिपन्न..........भास्वररूपाधि-करणत्वात् आलोकवदिति सत्प्रतिपक्षत्वाच्च।

ननु यथेन्दनीलो नीलिमगुरुत्वाधिकरणं पार्थिवमेव भास्वररूपं प्राभाकर-मते यथा च पद्मरागादिस्तत्र रूपरसगुरुत्वाधिकरणं पार्थिवं नीलभास्वर... रूपं प्राभाकरमते, तथा सुवर्णमपि पीतिमगुरुत्वाधिकरणं पार्थिवमेव भास्वररूपं प्राभाकरमते... च यथेन्द्रनीलादिना तेजस्त्वसाधने बाधनं भास्वररूपाधि-करणत्वे चासिद्धम्, तथा पीतिमगुरुत्वाधिकरणं पार्थिवसुवर्णस्यापि तेजस्त्व-साधने बाधः। भास्वररूपाधिकरणत्वं चासिद्धमेव। तथा च नीलिमगुरुत्वाद्य-धिक[रण.......न्द्रनीलादितज्जन्यप्रमातिरिक्तेन्द्रनीलादितेजस्त्वसाधने आश्रयासिद्धिः। तथा पीतिमगुरुत्वाधिकरणसुवर्णतज्जन्यप्रभातिरिक्तैजसत्वसाधनेप्याश्रयासिद्धिरेव। तत् कथं सुवर्णादीनां तैजसत्वमिति.......सुव]र्णे नीलादिप्रभाणां निषिद्धावयव-भास्वररूपाधिकरणतेजोजन्यत्वात्।

तथा च विप्रतिपन्नाः भास्वररूपाधिकरण..................लादीनां पार्थिव-त्वादित्यवेहि। तत् किं नीलिमगुरुत्वाधिकरणपार्थिवनिविडावयवतेजसोरिन्द्रनील-शब्दो मुख्य एव। एवमस्तु विशेषाग्रहात्। विशेषाग्रहणे त्वेकत्र मुख्योऽन्यत्र लाक्षणिक इति कथं विसरणस्वभावैः ते[ज.........वैर्निविडावयवस्थिरसुवर्णाद्यारम्भ इति चेत्—न, पार्थिवावयवोपष्टम्भादिति ब्रूमः। कोऽयमवष्टम्भ इति चेत्—गति-प्रतिबन्ध इति ब्रूमः। तेन यथा विसरणस्वभावा अपि तेजोऽवयवाः पार्थिवावयव-प्रतिबद्धगतय एकत्र स्थिरीभूताः संभूय प्रदीपमारभन्ते। तथा सुवर्णादिकमपि।

कथं तर्हि सुवर्णादीनां भास्वररूपानुपलम्भ इति चेत्—न, कथञ्चिदुप-लभ्यत एव सुवर्णादीनां भास्वररूपत्वम्। कथं तर्हि शुक्लत्वग्रहः? न कथञ्चिन्मन्दा-लोकजलादिसारणाव्यक्तशुक्लत्वस्योपलम्भात्। सातिशयशुक्लत्वस्यानङ्गीकारात्।

कथं तर्हि पीतं गुरु सुवर्णमित्यनुभवव्यवहारौ? पीतिमगुरुत्वाश्रयस्यापि सुवर्णत्वादित्यवेहि। तस्यासुवर्णत्वपक्षे पीतं गुरु सुवर्णमित्यनुभवस्य का गतिरिति



चेत्? भ्रान्तित्वमिति ब्रूमः। धर्मिग्राहकप्रमाणे पीतिमगुरुत्वरहिततेजस्त्वेनैव तस्या सिद्धेः। सुवर्णं न पीतिमगुरुत्वाश्रयम्, तेजस्त्वात् आलोकवदिति। विप्रतिपन्नं पीतं गुरुत्वं च न सुवर्णाश्रितं पीतत्वात् गुरुत्वात् संप्रतिपन्नवदित्यादेः सुलभत्वाच्च॥

अस्तु वा पीतिमगुरुत्वाश्रय एव सुवर्णम्, तथापि तेजस्त्वसाधनस्य न काचित् [क्षतिः]। विप्रतिपन्नं तेजः भास्वररूपाधिकरणत्वात् आलोकवदिति। न चायम-सिद्धः पीतभास्वररूपवतः सुवर्णस्य प्रत्यक्षसिद्धत्वात्। न च सुवर्णं न भास्वर-रूपाधिकरणं पीतत्वात् पीतान्तरवत्। सुवर्णरूपं न भास्वरं पीतत्वात् पीतान्तरवत् इत्यादेः सुवचत्वात्। न च सुवर्णं तेज इत्यत्र पीतत्वाभावः उपाधिः चन्द्रादौ साध्यव्यापकत्वात्।

न च पीतत्वेन सत्प्रतिपक्षत्वम्, चन्द्रादौ व्यभिचारात्। नापि गुरुत्वा-भाव उपाधिः। अयं दीप एतदन्यगुरुत्वरहितवान् आक्रान्ततेजोऽन्य[:] दीपत्वादन्य-दीपवत् इति सिद्धे गुरुत्ववति तेजसि साध्याव्यापकत्वात्। न च गुरुत्वेन सत्प्रति-पक्षत्वम्। उपाधिसाध्याव्यापकत्वभङ्गस्थले व्यभिचारात्। न चेदं पीतं रूपं तेजोनिष्ठं पीतत्वादन्यपीतवदिति वाच्यम्। अभास्वरत्वेन सोपाधित्वात्। न चेदं गुरुत्वं तेजो-निष्ठं गुरुत्वादन्यगुरुत्ववदिति युक्तम्। पूर्वानुमाने सिद्धतेजोगुरुत्वे व्यभिचारात्। न चेदं पीतं सुवर्णाश्रितं पीतत्वादन्यपीतवदिति युक्तम्। पीतं सुवर्णमित्यनुभवबाधात्। न चेयं भ्रान्तिः, बाधकाभावात्। अन्यथा धर्मधर्म्यभावविलयात्। न चेद गुरुत्वं न सुवर्णाश्रितं गुरुत्वादन्यगुरुत्ववदिति युक्तम्। गुरु सुवर्णमिति सर्वलोकानुभव-बाधात्। अयं घट एतदन्यासुवर्णत्वरहितगुर्वन्यः घटत्वात् अन्यघटवदिति सिद्धेः। सुवर्णगुरुत्वे व्यभिचारात्।

किं च पीतिमगुरुत्वाश्रय सुवर्ण..........योगः तेजोवृत्तिः सुवर्णवृत्तित्वात् सत्तावदिति सर्वं सुस्थम्। पार्थिवतेजसः सुवर्णपक्षे सुवर्णत्वं तेजोवृत्ति सुवर्ण-वृत्तित्वात् सत्तावदित्यनुमानाच्च। न चात्रास्य सुवर्णान्तरसिद्ध्यास्य चरितार्थ-त्वेनार्थान्तर.........विशेषणस्य साधनव्याप्तिपरिहारमात्रफलत्वेनास्य पक्षेतरत्वात्। न च पृथिवीत्वं सुवर्णवृत्ति पृथिवीव्या['] वृत्तत्वात्, सत्तावदिति सत्प्रतिपक्षत्वम्। पार्थिवसुवर्णान्तरसिद्ध्यास्य चरितार्थत्वेनार्थान्तरग्रस्तत्वात्। तेजस्त्वं सुवर्णव्यति-रिक्ततेजोव्यतिरिक्तवृत्ति तेजस्त्वात् न परजातित्वात् सत्तावदित्यनुमानाच्च। न पृथिवीत्वं सुवर्णव्यतिरिक्तपृथिवीव्यतिरिक्तवृत्तिपृथिवी‌व्या['] वृत्तत्वात् सत्तावदिति सत्प्रतिपक्षत्वम्। पार्थिवसुवर्णान्तरसिद्धयास्य चरितार्थत्वेनार्थान्तरग्रस्तत्वादिति, इदं सुवर्णमेतदन्यरहितासुवर्णान्यत् सुवर्णत्वादन्यसुवर्णवदित्यनुमानाच्च।

अपि च तेजः परमाणवः सुवर्णद्व्यणुकसमवायिकारणम्, तेजःपरमाणु-त्वात्। न यदेवं न तदेवम्, यथा घट इति। न चात्राप्रसिद्धविशेषणत्वम्। सुवर्ण-

त्वेन समवायिकारणत्वस्य सुवर्णस्य द्व्यणुकारम्भकपरमाणुषु प्रसिद्धत्वात् । न चालोकाद्यारम्भकपरमाणुषु प्रसिद्धत्वात् ।

न चालोकाद्यारम्भकपरमाणुनां धर्मित्वे बाधः, सुवर्णद्व्यणुकारम्भकपरमाणुनां च धर्मित्वे हेतोरसिद्धिः । तेषां तेजस्त्वसिद्धिरिति वाच्यम्, आलोकाद्यारम्भकपरमाणूनामेव धर्मित्वात् । तेषामिदानीं सुवर्णद्व्यणुकारम्भकत्वबाधेऽपि कालान्तरे सुवर्णद्व्यणुकान्तरारम्भकत्वे बाधाभावात् न चास्य विद्यमानसपक्षत्वात् तत्र हेतोर्वृत्तावन्वयित्वम् । व्यावृत्तौ वा साधारणत्वमिति वाच्यम् । सपक्षे हेतोर्व्याप्तिनियतत्वेनान्वयित्वस्यासंभवात् । व्यावृत्तनिश्चयेन चासाधारणत्वानुपपत्तेः । न चात्र तेजस्त्वमुपाधिः । सुवर्णद्व्यणुकसमवायिकारणस्यातेजस्त्वानिश्चयेन साध्याव्यापकत्वानिश्चयात् ।

न च तेजस्त्वेन सत्प्रतिपक्षत्वम् । यत् सुवर्णद्व्यणुकसमवायिकारणं न तत्तेज इति व्यतिरेकानिश्चयेनान्वयव्यतिरेकित्वभङ्गात् । इदं तेज एतदसुवर्णद्व्यणुकारम्भकत्वरहिततेजोऽन्यत् तेजस्त्वादन्यतेजोवदिति सिद्धे सुवर्णद्व्यणुकारम्भकत्तेजसि व्यभिचाराच्च ।

अपि च सुवर्णद्व्यणुकपरमाणवः तेजःपरमाणवः सुवर्णद्व्यणुकपरमाणुत्वात्, न यदेवं न तदेवं यथा घटः इति । न चात्राप्रसिद्धविशेषणत्वम् । आलोकाद्यारम्भकत्वात् । सुवर्णपरमाणुषु सुवर्णत्वाभावात् । भावे वा तेजःपरमाणुष्वपि सुवर्णत्वसंभवेन ये तेजःपरमाणवः न ते सुवर्णमिति साध्याव्यापकत्वानिश्चयात् ।

न च सुवर्णसमवायिकारणत्वाभाव उपाधिः । तत एव । न च सुवर्णसमवायिकारणत्वेन सत्प्रतिपक्षत्वम् । ये तेजःपरमाणवः, ते सुवर्णसमवायिकारणमिति व्यतिरेकनिश्चयाभावात् अन्वयव्यतिरेकभङ्गात् । इदं सुवर्ण समवायिकारणमेतदन्याः तेजःपरमाणवः.........सुवर्णसमवायिकारणान्यत् द्रव्यत्वात् घटवदिति सिद्धे सुवर्णसमवायिकारणे तेजःपरमाणौ व्यभिचाराच्च । विमतं सुवर्णं द्रुतसुवर्णत्वात्, न यदेवं न तदेवम्, यथा घट इति । न चात्राप्रसिद्धविशेषणता......त्वद्रवत्वव्यतिरिक्तद्रवत्वसमानाधिकरणसाक्षाद्द्रव्यत्वावान्तरजात्यन्यत् जातिमत्त्वात् गोत्ववत् । इदं तेज एतदन्यत्वरहिततेजोऽन्यत् तेजस्त्वादन्यज्ञानवदिति साध्यप्रसिद्धेः ।

न चात्र सुवर्णत्वमुपाधिः । यद् द्रुततेजस्तत् सुवर्णमिति साध्याव्यापकत्वनिश्चयात् । न चासुवर्णत्वेन सत्प्रतिपक्षत्वम् । व्यतिरेकिनिश्चयाभावेन अन्वयव्यतिरेकित्वानुमानानुपपत्तेरिति ॥ ७ ॥

**विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम् ॥ १.८ ॥**

इति वायौ सामान्यतोदृष्टं प्रमापयितुमिच्छता तत्प्रामाण्यसिद्ध्यर्थं दृष्टं सूत्रकृतोच्यते । तथा हि द्विविधमनुमानं दृष्टमदृष्टं च, अर्थस्य द्वैविध्यात् । कश्चिदर्थोऽस्मदादिप्रत्यक्षः स दृष्ट इत्युच्यते । तत्साधकमनुमानं दृष्टमित्युच्यते । यथा घटान्तरितपिण्डदर्शनादयं गौविषाणीत्वादित्यादि । न चात्र पिण्डदर्शने आश्रयासिद्धिः । पिण्डदर्शने गोत्वस्यापि दर्शनात् साधनमवैयर्थ्यमिति वाच्यम् । दूरत्वादिदोषेण गोत्वानुपलम्भेऽपि पिण्डस्योपलम्भात् । कश्चिदर्थोऽस्मदाद्यप्रत्यक्षः । सोऽदृष्टः । तत्साधकमनुमानमदृष्टम् । अदृष्टार्थविषयत्वात् । यथा दृष्टाऽर्थविषयस्य प्रत्यक्षस्य प्रामाण्यम्. वाहनादेः वहनादिसमर्थलोभा[का?]त्(?) । तथानुमानस्यापि तुल्ययोगक्षेमत्वात् । सति च प्रामाण्ये किं तत्र कारणमिति चिन्तायां व्याप्तिपक्षधर्मते एवेति स्थितम् । तथा च व्याप्तिपक्षधर्मतावद्दृष्टानुमानमिति प्रमाणमेवेति प्रतिपादयितुं दृष्टानुमानं **सूत्रकारेण** प्रतिपादितम् ॥



विषाणमस्यास्तीति विषाणी । विषाणशब्देनात्र विषाणविशेषो विवक्षितः । विषाणमात्रस्य महिष्यादिगतत्वेन [गोत्व]व्यभिचारात् ।

**भाष्यकारस्तु** विषाणेऽस्य [णे अस्य] स्त इति विषाणीति विगृह्णाति । तदयुक्तम् । विषाणविशेषस्य गोत्वव्यभिचाराभावेन द्वित्वविशेषणस्य वैयर्थ्यात् । तदस्यास्तीति क्रमात् ।

वाला धीयन्तेऽस्मिन् वालधिः पुच्छम् । प्रान्ते वालधिर्यस्य स प्रान्तेवालधिपिण्डः । अलुक् समासः ।

**भाष्यकारास्तु** वाला धीयन्तेऽस्मिन्निति वालधिः पुच्छैकदेशः । प्रान्तेवालधिः पुच्छावयवीति प्रसाध्य प्रान्ते वालधिर्यस्यास्ति असौ वालधिमान् पिण्ड इति मतुपं विधाय तस्य लोपं वर्णयन्ति । तन्न, अस्याः कल्पनाया गरीयस्त्वात् । मतुब्लोपस्य चिन्तनीयत्वाच्चेति ।

सास्नास्यास्तीति सास्नावान् ।

इतिशब्देन नखरविशेषादेः परिग्रहः । सर्वे चैते भावप्रधाना निर्देशाः । तेनायं गौर्विषाणविशेषवत्त्वात् ककुद्मत्त्वात् प्रान्तेवालधित्वात् सास्नावत्त्वात् नखरविशेष[वत्]त्वात् संप्रतिपन्नगोवदिति प्रयोक्तव्यम् । वालधिसास्नाशब्दाभ्यां वालधिसास्नाविशेषौ विवक्षितौ । तेन [न] सपक्षादौ व्यभिचार इति ।

इदानीं वायावदृष्टानुमानमाह—

**स्पर्शश्च ॥ २. १. ९. ॥**

**न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः ॥ २. १. १०. ॥**

इति । इदं च सूत्र**मात्रेयाचार्यप्रशस्तपादाभ्यां** तच्छिष्यैश्च **व्योमशिवश्रीधराचार्योदयनादिभिरेवं** व्याख्यातम् । वायोश्च किं ? स्पर्शः । चकारात् शब्दधृतिकम्पाः । तेन स्पर्शशब्दधृतिकम्पलिङ्गः । वायुस्पर्शः क्वचिदाश्रितः स्पर्शत्वात् इत्यादौ स्पर्शा-

देर्धर्मित्वम्। तस्याप्यसिद्धेः। न च वायुव्यतिरिक्तस्य धर्मित्वम्। तस्यैतत्स्पर्शाना-श्रयत्वेन हेतोरपक्षधर्मत्वात्। न च स्पर्शस्यैव धर्मित्वम्। तस्यैतद्धर्मानुपपत्तौ तत्पक्ष-धर्मत्वात्। एतेन शब्दधृतिकम्पानां वायुलिङ्गत्वम्, धर्म्यन्तराभावात्, शब्दस्या-काशलिङ्गत्वम्, सुखादीनामात्मलिङ्गत्वम्, सुखसाक्षात्कारादीनां च मनोलिङ्गत्वं निरस्तम्।

तस्मादन्यथा सूत्रं व्याख्यायते। [स्पर्श] इति भावप्रधानो निर्देशः। तेन स्पर्शत्वम्। चकारस्त्वनुक्तगुणत्वगिन्द्रिय[ग्रा]ग्राह्यत्वबाह्येन्द्रियग्राह्यत्वादिसमुच्चयार्थः।

किमिदं भावप्रधानत्वमिति चेत्? जातिव्यक्तिवादिनः·······स्पर्शशब्दस्य जाति-परत्वमिति ब्रूमः। एवमन्यत्रापि भावप्रधानत्वं वर्णनीयमिति। तथा च विप्रतिपन्नः स्पर्शः क्वचिदाश्रितः, स्पर्शत्वात्, गुणत्वात्, त्वगिन्द्रियग्राह्यत्वात्, बहिरिन्द्रियग्राह्य-त्वात् घटस्पर्शवदिति। नेयमनुद्भूतरूपपृथिवी उद्भूतस्पर्शवत्त्वात् घटवदिति। न चोदकतेजोभ्यां सिद्धसाधनम्। अयं स्पर्शो नोदकस्य अशीतत्वात्। नापि तेजसः, अनुष्णत्वात् संप्रतिपन्नवदिति।

न चाकाशदिभिः सिद्धसाधनम्। तेषामस्पर्शस्य सर्ववादिसिद्धत्वात्। न चेयं पृथिवी अनुष्णाशीतस्पर्शवत्त्वात् घटवत् इति वाच्यम्, रूपधर्मत्वेन सोपाधित्वात्। न चास्य साधनव्यापकत्वम्। उद्भूतरूपवत्त्वस्य योग्यानुपलम्भबाधितत्वात्। अनुद्भूतरूपवत्त्वस्य च एवमनुद्भूतरूपा पृथिवीत्यादि·······न्यनिषिद्धत्वाच्च स्पर्शवत्त्वस्य रूपवत्त्वस्य च व्यभिचाराभावेनानुष्णाशीतत्वविशेषणस्य व्यर्थत्वाच्च।

वायौ प्रत्यक्षाभावयोग्यपृथिवीत्वाभावस्य प्रत्यक्षसिद्धत्वादन्यथोदकतेजसोरपि पृथिवीत्वाभावासिद्धावनुष्णाशीतविशेषणत्वस्य व्यर्थत्वात्। वायुर्न पृथिवी वायुत्वात्, न यदेवं न तदेवं यथा घट इति व्यतिरेकिबाधाच्च। न च पृथिवीत्वाभाववतो रूपादेः सपक्षादस्य व्यावृत्तं च (?) नासाधारणत्वमिति वाच्यम्। तेषामपि पक्षतुल्यत्वात्। तत्पृथिवीत्वाभावयोरिदानीमेव साधनात्। न चैवमप्रसिद्धविशेषणत्वम्। पृथिवीत्व-स्यान्योन्यव्यतिरिक्ताभावप्रतियोगी मेयत्वात् घटवदिति तत्सिद्धेः। अभाव-रूपव्यतिरेकिसाध्ये अप्रसिद्धत्वस्यादूषणाच्च। न व्यतिरेकस्य भावत्वेन व्याप्ति-ग्रहणोपपत्तेः।

एतेन इयमनुद्भूतरूपा पृथिवी, उद्भूतरहितत्वे सत्यनुष्णाशीतस्पर्शवत्त्वात् घ्राणवत्, अयं स्पर्शः अनुद्भूतरूपपृथिव्याश्रितः उद्भूतरूपासमानाधिकरणानुष्णा-शीतस्पर्शवत्त्वात् घ्राणस्पर्शवदिति प्रयोगौ निरस्तौ। प्रथमस्योद्भूतस्पर्शवत्त्वाभावेन द्वितीयस्य चोद्भूतस्पर्शवत्त्वाभावेन सोपाधित्वात्। किं च, अयं स्पर्शो न पृथिवीस्पर्शः (?) शीतस्पर्शः साक्षात्कारजनकत्वात्, आत्मवत्। न चात्र अनुष्णाशीत-स्पर्शत्वाभाव उपाधिः घटस्पर्श एतदन्यपृथिवीसमवेत·······नुष्णाशीतस्पर्शान्यः



स्पर्शवत्त्वादन्यस्पर्शवदिति सिद्धे पृथिवीसमवेतत्वरहितानुष्णाशीतत्वशीतस्पर्शौ। साध्याव्यापकत्वात्। न चायं स्पर्शः पृथिवीसमवेतः, अनुष्णाशीतस्पर्शत्वात् घटस्पर्शवदिति सत्प्रतिपक्ष··············धिसाध्यव्यापकत्वभङ्गस्थले व्यभिचारात्। उद्भूतानुद्भूतरूपपृथिवीसमवेतत्वे बाधस्योक्तत्वाच्च। न चायमुदकादिसमवेत इत्युक्तमिति वायुसिद्धिः॥

तदुक्तं **सूत्रकृता**

न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुरिति॥ [२।१।१०]

## अद्रव्यवत्त्वाद्द्रव्यम्॥ २.१.११॥

द्रव्यशब्देन कार्यद्रव्यमभिप्रेतम्, तस्यैव प्रकृतत्वात्। तथा च न कार्यद्रव्यम् अद्रव्यम्, सदृशं कार्यगुणकर्मादि। अब्राह्मणवत् नञः पर्युदासवृत्तित्वात्। कार्यगुण-कर्मविवक्षायामपि कार्यत्वमेव विवक्षितम्। न गुणकर्मत्वादिकं द्रव्यं तस्मिन् नास्ती-त्यद्रव्यवान् कार्याश्रय इत्यर्थः। तथाचायं वायुर्द्रव्यम्, कार्याश्रयत्वात् घटवदिति।

यद् वा न द्रव्यमद्रव्यम्, द्रव्यसदृशं जातिमत् गुणकर्मादि तस्मिन्नास्ति इत्य-द्रव्यवान्, तस्याभावो द्रव्यवत्त्वम्, तस्माद्द्रव्यं वायुरिति। वायुप्रयोगस्तु वायुर्द्रव्यम्, जातिम दाश्रयत्वात्, घटवदिति।

**आत्रेयादयस्तु** परमाणुलक्षणस्य वायोर्द्रव्यत्वमनेन साध्यत इत्याह-द्रव्यमाश्रीय-स्यातीति द्रव्यवान्। द्रव्यानाश्रितस्य भावो[ऽ]द्रव्यवत्त्वम्। तस्मात् द्रव्यं वायुरिति। प्रयोगस्तु वायुपरमाणवो द्रव्यं द्रव्यानाश्रितत्वात् घटपरमाणुवदिति। तन्न, द्रव्यग्रहण-वैयर्थ्यात्। अनाश्रितत्वस्य व्यभिचाराभावात्। समवायादौ व्यभिचार इति चेत्— न, तस्य द्रव्यविशेषणेनाव्यभिचारात्। समवायस्यानाश्रितत्वेन द्रव्येऽप्यनाश्रि-तत्वात्। पञ्चपदार्थवृत्तिधनं(?)वायोर्द्रव्यत्वेऽप्याश्रित इति द्रव्यग्रहणेन निवर्त्यंत इति चेत्—समवायस्य संयोगसमवायवृत्तित्वरहितत्वेन द्रव्यवृत्तित्वानुपपत्तेः परमाणुषु द्रव्यानाश्रितत्वस्यासिद्धत्वाच्च।

संयोगवृत्त्या परमाणूनां भूतलाद्याश्रितत्वात् समवायवृत्त्या परमाणूनां द्व्यणुका-श्रितत्वाच्च अवयवा नावयविन्याश्रिता इति चेत्—न,

विषाणी ककुद्मान् [२.१.८]

इति सूत्रेण विषाणाद्यवयवानां गोपिण्डाद्यवयव्याश्रितत्वस्य भवद्भिरेव व्युपा-दनादिति गुणत्वादौ व्यभिचाराच्च॥

यदा तु परमाणूनामनाश्रितत्वं समवायानां द्रव्याश्रितत्वं सामान्यवत्त्वं च हेतोर्विशेषणमुपादीयते, तदा अस्तु नामायमपि सूत्रार्थ इति॥

**क्रियावत्त्वाद् गुणवत्त्वाच्च ॥ २.१.१२ ॥**

वायुर्द्रव्यम्, क्रियावत्त्वाद् गुणवत्त्वात्, घटवदिति ॥१२॥

अस्य वायोरनित्यत्वसिद्ध्यर्थं सूत्रम्—

**अद्रव्यवत्त्वेन नित्यत्वमुक्तम् ॥२.१.१३॥**

अद्रव्यवत्त्वमाश्रयद्रव्यरहितत्वमद्रव्यत्वम् गगनादीनां नित्यत्वसाधकम्। तच्चात्र नास्तीति नास्य नित्यत्वम्।

यद् वा, नित्यद्रव्यत्वमनाश्रितत्वेन व्याप्तम् इतो व्यावर्तमानं नित्यद्रव्यत्वं व्यावर्तयति। तथा चायमपि वायुर्न नित्यद्रव्यम्, आश्रितत्वाद् घटवदिति। यद् वायं वायुरनित्यः, आश्रितद्रव्यत्वात्, घटवदिति। यद् वा द्रव्यत्वेन द्रव्यानाश्रितत्वेन परमाणुलक्षणस्य वायोर्नित्यत्वमिति सूत्रार्थः। अनाश्रितत्वेनैव नित्यत्वम् तच्च द्रव्यानाश्रितत्वम्"""उक्तमिति। भगवता उलूकवेषधारिणा महादेवेनेत्यर्थः ॥१३॥

**वायो[र्वायु]सम्मूर्च्छनं नानात्वे लिङ्गम् ॥२.१.१४॥**

एकस्य वायोर्वाय्वन्तरेण संयोगो वायुनानात्वं साधयति। अयं वायुर्वायुतदितरत्वरहितसंयोगवान् संयोगित्वाद् घटवत्। यद् वा अयं वायुर्वायोर्भिद्यते, संयोगित्वाद् घटवदिति।

**भाष्यकारास्तु** समाने वायौ भिन्नदिक्क्रिययोर्वाय्वोः संमूर्च्छनमिच्छन्ति। तदयुक्तम्, तस्याप्यसिद्धेः। वाय्वोरुपगमनात् तदनुमीयते इति चेत्—न, तस्याप्यसिद्धेः। तृणादीनामूर्ध्वगमनेन तदनुमीयते इति चेत्—न, विशेषणोपादानात् ऊर्ध्वगमनासिद्धेः। कदाचित् ऊर्ध्वगतिमत्त्वोपपत्तेरिदानीमूर्ध्वगतिमदिति साध्यविशेषोपादाने चातीतानागततृणोर्ध्वगमनाभ्यां व्यभिचारः। विमतं तृणोर्ध्वगमनं न वायुसंयोगजन्यं तृणोर्ध्वगमनत्वात् इति सत्प्रतिपक्षत्वाच्च। तेजोविशेषस्याग्नेरिव वायुविशेषादृष्टवदात्मसंयोगादूर्ध्वगमनोपपत्तेश्च। इदं वायोरूर्ध्वगमनं स्पर्शवद्वेगवद्द्रव्याभिघातजन्यम् ऊर्ध्वगमनशीलस्य प्रयत्नाद्यसंभवे सत्यूर्ध्वगमनत्वात्. मुसलोर्ध्वगमनवदिति चेत् न, वात्यादीनामूर्ध्वगमनशीलत्वेन हेतोरसिद्धत्वात्, प्रयत्नाद्यसंभवात्।"""स्याप्यसिद्धत्वाच्च। अदृष्टवं नात्मसंयोगप्रयत्नवदीश्वरसंयोगादेः सुलभत्वात्। तस्मादनुपपन्नमेवेदं व्याख्यानम् ॥

ननु सिध्यतु स्पर्शविशेषाश्रयो द्रव्यान्तरम्, वायुत्वं तत्र न सिध्यति, प्रमाणाभावात्। न तावद् वायुत्वे प्रत्यक्षं प्रमाणम्, सत्यपीन्द्रियार्थसन्निकर्षे वायुरिति साक्षात्कारानुदयात्। नापि दृष्टं लिङ्गत एव। नापि सामान्यतोदृष्टम्, विप्रतिपन्नस्पर्शाश्रयो द्रव्यत्वावान्तरजातिमान् स्पर्शवत्त्वात् घटवदित्यादेर्वायुत्वावान्तरजातिसिद्ध्या अस्य चरितार्थत्वेन वायुत्वापरपर्यायजातिविशेष[स्य] साधितत्वात्। अयं



स्पर्शवान् साक्षात् द्रव्यत्वावान्तरजातिमान् स्पर्शवत्त्वात् पृथिवीवत् इत्यादेश्च स्पर्शवन्मात्रनिष्ठानुष्णाशीतस्पर्शवन्मात्रजातिसिद्ध्या चरितार्थत्वेन वायुत्वासाधकत्वात् ॥ १८ ॥

तस्मान्नास्ति वायुत्वमिति पूर्वपक्षं सूत्रद्वयेन रचयति—

**वायुरिति सति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥२.१.१५॥**

**सामान्यतोदृष्टाच्चाविशेषः ॥२.१.१६॥**

इति।

समाधत्ते—

**तस्मादागमिकम् ॥२.१.१७॥**

तस्मादिति सामान्यतोदृष्टा वायुत्वरहितसिद्धिरिति विशेषात्। तथा चायं स्पर्शवान् स्पर्शविशेषवद्वृत्तिस्पर्शविशेष[ष]वद्वृत्तित्वरहितस्पर्शविशेषरहितवृत्तित्वानाक्रान्तजातिमान् स्पर्शवत्त्वात् घटवदिति स्पर्शविशेष[ण]त्वं च रूपासहचरस्पर्शत्वसजातीयविशेषो वा। अयं स्पर्शः रूपासहचरस्पर्शवृत्तित्वव्यावृत्तत्वरहितरूपासहचरस्पर्शतदितरावृत्तिजातिमान्, जातिमत्त्वात्, घटवदित्यनुमानसिद्धेः।

यद् वा आगमसिद्धमेव वायुत्वम्, स्पर्शविशेषमात्रनिष्ठं वा। अयमस्तीति **कणादादि**वचनस्यैवागमत्वात्। [न] तत्र मूलप्रमाणाभावः ईश्वरप्रसादासादितकणादसाक्षात्कारस्य तत्र मूलत्वात् ईश्वरवाक्यस्य वा तत्र मूलत्वात्। तत्रापि ईश्वरसाक्षात्कारस्य मूल[रहितत्वेऽ]पि नित्यत्वेन मूलान्तरानपेक्षत्वात् अनित्यत्वेनेन्द्रियाणां मूलत्वादिति।

आगमिकमिति आगमात् जातमित्यर्थः। आगमिकमित्यत्र वायुत्व[ं] ज्ञानमिति शेषः। १७॥

नन्वस्तु द्रव्यान्तरं स्पर्शविशेषवन्मात्रनिष्ठं च सामान्य"""योस्तु वायुत्वशब्दवाच्यं कथमवगन्तव्यम्? वृद्धव्यवहारपरम्परयेति चेत्—न, सृष्ट्यादौ वृद्धव्यवहाराभावेन वाय्वादीनां वाय्वादिशब्दवाच्यत्वानवगमात्। अयं वायुरिदं वायुत्वमिति सृष्ट्यादावीश्वरेण संकेतः क्रियत इति चेत्—न, सर्वथा अव्युत्पन्नानामयं वायुरिदं वायुत्वमिति वाक्येन बोधम[भ?]यात्। अतीन्द्रियेण न वाय्वादीनामिदमिति निर्देष्टुमशक्यत्वात्। एवं पृथिव्यादिशब्देष्वपि संकेतानुपपत्तिरिति केचित्। तत्रोक्तम्—

**संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ॥ २. १. १८. ॥**

इति। संज्ञा कर्म विषयोऽस्येति संज्ञाकर्म, इयमस्य संज्ञेति ज्ञानम्। तदस्मद्विलक्षणानां पुरुषाणां गमकमिति। इदमस्य वाचकमिति ज्ञानं वृद्धव्यवहारात्

शृङ्गग्राहिकया संकेताद् वा आद्यः सृष्ट्यादौ न भवति वृद्धान्तराणामभावात्। ततः संकेतादेवेति निश्चीयते। न च सर्वथा अव्युत्पन्नानां इयमस्य संज्ञेति वाक्याद् बोधानुत्पत्तिरिति वाच्यम्। वाक्यं विनापि महादेवप्रसादादेव बालादीनाम् इयमस्य संज्ञेति बोधोत्पत्तेः।

न चैवमस्मदादीनामपि। महादेवसंकल्पादेवेयमस्य संज्ञेति बोधः स्यात् तथास्मदादीनामपीति वाच्यम्। महादेवप्रसादासादितधर्मविशेषाणामतीन्द्रियत्वात् संकेतग्रहानुपपत्तौ वृद्धव्यवहारपरम्परासंभवे नेदानीमपि वाच्यवाचकभावनावगमे शब्दादर्थावगमाभावप्रसङ्गादिति।

ननु अनुमानावगतेषु वाय्वादिषु संकेतग्रहणोपपत्तेः **मन्वादी**नामतीन्द्रियार्थदर्शित्वेनेति शङ्कापरिहारार्थं सूत्रम्--

**प्रत्यक्षपूर्वकत्वात् संज्ञाकर्मणः। २. १. १९.॥**

इति। संज्ञाकर्म नाम। अस्येयं संज्ञा[इति]महादेवाभिप्रायनिष्क्रान्तम्। तच्च[न्न] योगजधर्मनिरपेक्षेन्द्रियजन्यम्, पराभिप्रायस्य योगजधर्मनिरपेक्षेन्द्रियवेद्यत्वानभ्युपगमात्। नापि लिङ्गजन्यम्। सृष्ट्यादौ **मन्वा**दिभिः परमेश्वराभिप्रायव्याप्तलिङ्गानवगमात्। तस्मात् महादेवप्रसादासादितयोगजधर्मसध्रीचीनमनसा वाय्वादयो महादेवा[भिमत]विषयं तद्व्यतिरिक्ते न वाय्वादयो वाय्वादिपदैः प्रतिपादनीया इति स्वाभिप्रायस्य सृष्ट्यादौ **मन्वादीन्** प्रति बोधयितुं शक्यत्वात्। अव्युत्पन्नवाक्येन तथाविधबोधानुदयात्। तस्मात् महादेव एव **सनकादी**ननुगृह्य वाय्वादयो वाय्वादिपदैः प्रतिपादनीया इति स्वाभिप्रायगोचरं साक्षात्कारं तेषामुत्पादयतीत्यभ्युगन्तव्यम्।

अन्यथा सृष्ट्यादौ संकेतानवगमे वृद्धव्यवहारपरम्परासंभवादिति। तन्न शाब्दव्यवहारविलयात्। ईश्वरस्यैकत्वात् अस्मद्विशिष्टानामिति बहुवचनं कथमिति चेत्? गुरुषु बहुवचनस्मरणात्। अन्यथा तस्य गुरव इति व्यवहारविलयात्। **ईश्वरस्य च** सर्वसम्प्रदाय[प्रवर्तकत्वेन बाहुरूप्यस्वीकारात्। अ]स्मद्विशिष्टानामिति **ईश्वरसनकादीना**मित्यभिप्रेतम्। असति हि सर्वगोचरसाक्षात्कारप्रभ[स]वितरि महादेवे, असत्सु च महादेवाभिप्रायादिगोचरसाक्षात्कारवत्[सु] **सनकादि**[षु] सर्वसंज्ञाकर्मानुपपत्तिः। विवृतं] चैतत् पुरस्तादित्यलमतिविस्तरेणेति।

नन्वनुपपन्नमेतत्, वायोरस्मदादीन्द्रियग्राह्यत्वात्। तथा च विमतं वायुज्ञानमिन्द्रियजं वा अनन्यथासिद्धतदन्वयव्यतिरेक[लभ्यं] घटज्ञानवदिति। तन्न, अनन्यथासिद्धविशेषणासिद्धेः। स्पर्शग्रहणेन इन्द्रियस्यान्यथासिद्धत्वात्। वायुज्ञानत्वाभावेन सोपाधित्वात् च। विमतं वायुज्ञानं नेन्द्रियजं न त्वगिन्द्रियजं, वायुज्ञानं नेन्द्रियजं वायुज्ञानत्वात् संप्रतिपन्नवदिति सत्प्रतिपक्षत्वाच्चेति। उष्णो वायुः



शीतो वा वायुरिति ज्ञानस्य धर्मित्वेनान्यथासिद्धविशेषस्य सिद्धत्वम्, वायुलिङ्गामुष्णाशीतस्पर्शग्रहणेनान्यथासिद्धेरभावादिति चेत्—न, उष्णो वायुः शीतो वायुरिति **ज्ञानस्य धर्मित्वे** सिद्धसाधनात्। **स्मर्यमाण**रजतत्वविशिष्टपुरोवर्तिनि भ्रमवत् **स्मर्यमाण**वायुत्वविशिष्टशीतोष्णद्रव्यविभ्रमस्यापीन्द्रियजन्यत्वस्वीकारात्। शीतोष्णस्पर्शानुमिति[त?]द्रव्यविषयत्वात् नास्य विभ्रमस्येन्द्रियजन्यत्वमिति चेत्—न, तथा सति शीतोष्णस्पर्शग्रहणेनान्यथासिद्धत्वेन हेतुसिद्धेस्तदवस्थत्वात्। शीतोष्णस्पर्शविशिष्टवायुज्ञानं धर्मीति चेत्—न, तस्यासिद्धेः। शीतो वायुरुष्णो वायुरिति व्यवहारस्य वायुत्वविशिष्टशीतोष्णद्रव्यज्ञानेनाप्युपपत्तेः। सिद्धौ वा सिद्धसाधनात्।

नीलं गगनमिति विभ्रमवतः [तु] शीतो वायुरुष्णो वायुरिति विभ्रमस्यापि इन्द्रियजन्यत्वात्। शीतो वायुरुष्णो वायुरिति ज्ञानजनकविशेष्यवायुजनकविशेष्यवायुज्ञानं धर्मीति चेत्—न, तस्य त्वगिन्द्रियावगतशीतोष्णस्पर्शानुमितिजन्यज्वलनोत्पन्नाः यत्नानुमितत्वेनान्यथासिद्धेन्द्रियान्वयव्यतिरेकानुविधायित्वासिद्धेः।

अयं वायुरस्मत्प्रत्यक्षोऽस्मत्प्रत्यक्षस्त्वाश्रयत्वात्। अयं वायुरस्मत्त्वगिन्द्रियग्राह्यः स्पर्शाश्रयत्वाद् घटवदिति चेत्—न, वायुत्वाभावेन सोपाधित्वात्। वायुत्वेन सत्प्रतिपक्षत्वाच्च। अस्मत्त्वगिन्द्रियग्राह्यत्वे वा रूपद्रवत्वाभावे तस्योपाधित्वात्। **अरूपिद्रव्यस्य प्रतिपक्षत्वाच्च।**

अन्ये पुनरुष्णं ज्वलनं शीतलं शिलातलमित्यादावुष्णशीतस्पर्शाश्रये व्यभिचारमाहुः। तन्न, तस्यापि प्रत्यक्षत्वात्। न चैवमुष्णं जलं शीतलं शिलातलमिति **विभ्रमाभावप्रसङ्गः।** उष्णा(?)शीतस्पर्शयोराश्रयान्तरावगमे जलशिलातलाभ्यामसंसर्गग्रहाभावानुपपत्तेरिति वाच्यम्। उष्णशीतस्पर्शाश्रयावगमेऽपि तस्य जलशिलातलव्यावर्तकधर्माग्रहात् जलशिलातलाभेदविभ्रमोपपत्तेः। न च ग्रीष्मोष्मशिशिरशीताभ्यां व्यभिचारः। तयोरपि पक्षतुल्यत्वात्। अनुद्भूतरूपरहितत्वेन हेतुविशेषणे च न व्यभिचार इति।

एतेनायं वायुरस्मत्प्रत्यक्षानम[···क्षो म]हत्वे सत्यनुद्भूतरूपरहितत्वे सति समुद्भूतस्पर्शवत्त्वात् घटवदित्यादि निरस्तम्। अस्मत्प्रत्यक्षत्वे अस्मत्प्रत्यक्षसामग्रीसद्भाव उपाधिरिति **वादिवागीश्वराः।** तन्न, साधनव्यापकत्वात्। उद्भूतरूपस्पर्शमहत्वात्मप्रत्यक्षसामग्रीतत्साधने बाध इति चेत्—न, तदभावेऽपि रूपादीनां प्रत्यक्षत्वात्। द्रव्यप्रत्यक्ष इयं सामग्रीति चेत्—न, तदभावेऽप्यात्मनः प्रत्यक्षत्वात्।

द्रव्यबाह्येन्द्रियप्रत्यक्षत्वे इयं सामग्रीति चेत्—न, द्रव्यबाह्येन्द्रियप्रत्यक्षस्य असाध्यत्वात्। साध्ये चोपाधेर्वक्तव्यत्वादिति। एकैकं त्वगिन्द्रियग्राह्यं स्पर्शवत्त्वात्। वायुरेकं त्वगिन्द्रियजन्यनिर्विकल्पकविषयः, एकं त्वगिन्द्रियग्राह्यस्पर्शवत्वात् घटवदिति निरस्तम्। वायुत्वेन सोपाधित्वात्। वायुत्वेन सत्प्रतिपक्षत्वाच्च।

त्वगिन्द्रियं रूपद्रव्यग्राहकम्, रूपेन्द्रियत्वात् मनोवदिति केचित् । तन्न, व्योम्नि व्यभिचारात् । तद्वर्था रिक्तत्वे सतीति चेत्--न, भट्टमते दिक्कालाभ्यां सिद्धसाधनात् । प्राभाकरमते चात्मना सिद्धसाधनात् । तस्य सर्वविषयवृत्तिविषयत्वात् । अरूपग्राहकद्रव्यत्वं च यद्यरूपसाक्षात्करणत्वं तदा मूर्तत्वे सत्यस्पर्शवत्त्वमनस्त्वाभ्यां सोपाधित्वात् ।

न च रूपद्रव्यशब्दग्राहकश्रोत्रे साध्यव्यापकत्वभङ्ग इति वक्तव्यम् । शब्दद्रव्यत्वभङ्गनिषेधात् । अन्यथा रूपद्रव्यसाक्षात्कारजनकत्वं तदा वायुत्वाभावेन सोपाधित्वम्, उपाधिविरहे च सत्प्रतिपक्षत्वमिति विपक्षसाधनं च ते त्वगिन्द्रियग्राह्यस्पर्शवान् वायुर्नैतत्त्वगिन्द्रियजन्यनिर्विकल्पकविषयः वायुत्वात् । अरूपिद्रव्यत्वाच्च वायुपरमाणुवदिति । न चात्र एतत्त्वगिन्द्रियग्राह्यस्पर्शवत्त्वाभाव उपाधिः । एतत्त्वगिन्द्रियग्राह्यवत्त्वाभावेन एतत्त्वगिन्द्रियजन्यनिर्विकल्पकविषयाणां विपक्षाणां व्यावृत्तत्वेन स्पर्शविशेषणस्य विपक्षरूपव्यावर्त्याभावेन पक्षेतरत्वात् । न चैतत्त्वगिन्द्रियग्राह्यस्पर्शवत्त्वेन सत्प्रतिपक्षत्वम् । अत्रावचोपाधिग्रस्तत्वेनास्य दुर्बलत्वादिति । स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारवद्वायुः ॥१९॥

॥ इति वायुः ॥

इदानीमाकाशे सामान्यतोदृष्टं व्युत्पादयितुं **परमतेन** तावदाकाशे प्रमाणमाह--

**निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ॥२.१.२०॥**

यदि द्वारदेशे गगनं न स्यात्, कुड्यादिदेश इव द्वारदेशेऽपि, देवदत्तादेर्निष्क्रमणं प्रवेशनं च न स्यात् । अस्ति च । तस्मादाकाशोऽनुमीयत इति ।

तद् दूषयति--

**तदलिङ्गमेकद्रव्यत्वात् कर्मणः ॥२.१.२१॥**

**कारणान्तरानुक्लृप्तिवैधर्म्याच्च ॥२.१.२२॥**

**संयोगादभावः कर्मणः ॥२.१.२३॥**

इति [1]सूत्रयोर्निष्क्रमणप्रवेशने किमसमवायिकारणतया गगनमनुमन्यते [मापयत]। समवायिकारणतया गगनमनुमीयते, असमवायिकारणतया, निमित्तकारणतया वा ? नाद्यः, देवदत्तनिष्क्रमणप्रवेशने समवायिकारणजन्ये इत्यादेर्देवदत्तादिनैव सिद्धसाधनग्रस्तत्वात् । देवदत्तव्यतिरिक्तसमवायिकारणजन्ये इत्यादेश्च बाधितत्वात् । कर्मण एतद्द्रव्यवृत्तित्वस्य प्रत्यक्षसिद्धत्वात् । उभयवादिसंप्रतिपन्नत्वाच्च । मा भूत् तर्हि देवदत्ताश्रितत्वम्, देवदत्तान्निष्क्रमणप्रवेशनयोरिति

१. सूत्रयोरित्यनेन सूत्रत्रितयत्वं न स्वीकृतं वादीन्द्रेणेति ज्ञायते ।



चेत्--न, धर्मिग्राहकप्रत्यक्षबाधात् । देवदत्तनिष्क्रमणप्रवेशने समवायिकारणजन्ये एकद्रव्ये कर्मत्वात् संप्रतिपन्नवदिति अनुमानाविरोधाच्च । हेतुग्राहकप्रमाणविरोधाच्च । कर्मत्वं हि हेतुत एकाग्राहकप्रमाणेन कस्यैकद्रव्यवृत्तित्वं निर्णीतम् । एकद्रव्यमगुणं संयोगविभागयोरनपेक्षकारणं कर्मेति कर्मलक्षणाश्रयात् ।

न द्वितीयः, असमवायिकारणानुमितिवैयर्थ्यात् । असमवायिकारणेऽपि अनुमानं समवायिकारणप्रत्यासन्नमनुमीयते । समवायिकारणप्रत्यासत्तिसमवायिकारणसमवेतत्वं वा । न चैतद्द्वयमपि संभवतीति न तस्यासमवायिकारणतयानुमानमिति । तदिदमुक्तं कारणान्तरानुक्लृप्तिवैधर्म्यादिति । समवायिकारणादन्यदसमवायिकारणम् । कारणान्तरं तु तस्यानुक्लृप्तिरनुमितिक्लृप्तेरिति··········देरसमवायिकारणतया गुण एवानुमीयते । तन्निष्क्रमणप्रवेशने गुणा[समवायम]समवायिकारणके कर्मत्वात् संप्रतिपन्नकर्मवदिति । ततश्च कथमाकाशस्यासमवायिकारणत्वम् ? असमवायिकारणवैधर्म्याच्च ।

असमवायिकारणत्वमवधृतसामर्थ्यमद्रव्यं गुणः कर्म वा । न चैवम् आकाशमिति कथं तस्यासमवायिकारणयोरनुमानमिति । तदिदमुक्तम्—

कारणानुक्लृप्तिवैधर्म्यादिति ।

कारणान्तरस्यासमवायिकारणान्तरस्य गुणस्यानुक्लृप्तिमनुमितिवैधर्म्यसामर्थ्यानवधारणं द्रव्यत्वादिकारणान्तानुपूर्वपक्षनिवृत्त्यर्थः(?) ।

नापि तृतीयः, देवदत्तनिष्क्रमणप्रवेशने ईश्वरादिव्यतिरिक्तसमवायिकारण[ा]समवायिकारणव्यतिरिक्तकारणजन्ये इत्यादेर्निष्क्रमणप्रवेशनप्रतिबन्धककुड्यादिक्लृप्तिश्च । वैधर्म्यं च कारणान्तरानुक्लृप्तिवैधर्म्यम् । तस्मात् चकारो मूर्तद्रव्यसंयोगाभावेन सिद्धसाधनग्रस्तत्वात् ।

तदिदमुक्तम्—

**संयोगादभावः कर्मणः ॥२.१.२३॥**

इति । मूर्तकुड्यादिसंयोगादभावोनुत्पत्तिः कर्मणः । तस्मात् मूर्तद्रव्यसंयोगस्य कर्मप्रतिबन्धकत्वम् । तदभावस्य च कर्मकारणत्वमिति तात्पर्यम् ॥२३॥

अर्थान्तरनिराकरणपूर्वकं गगनगोचरं सामान्यतोदृष्टं व्युत्पादयति भगवान् **सूत्रकारः** कारणगुणपूर्वक इत्यादिना लिङ्गमाकाशस्येत्यनेन तत्र शब्दः स्पर्शवतामगुणः । इति शब्दः ।

शब्दो लिङ्गमाकाशस्य ॥२.२.२६॥

इत्यनेनान्वीयते । शब्दश्च गुणत्वादिलिङ्गाश्रयत्वात् लिङ्गमित्युक्तम् । प्रमाणं तु शब्दः क्वचिदाश्रितो गुणत्वात् कार्यत्वाच्च, [रूपवद्] घटवत् । न चानयोरसिद्धता, गुणत्वकार्यत्वयोर्वक्ष्यमाणत्वात् ॥२३॥

न चात्र कार्यद्रव्यैरर्थान्तरतेति व्युत्पादनार्थं सूत्रम्—

**कारणगुणपूर्वकः कार्ये गुणो दृष्टः ॥ २.१.२४ ॥**

कार्ये शंखादौ जायमाना रूपादयो विशेषगुणाः तदवयवगुणैरारभ्यन्ते । न चैवं शंखादिशब्द इति । तथा च प्रयोगः । शंखादिशब्दो न शंखाद्याश्रितः, विशेषगुणत्वे सति तदवयवगुणाजन्यत्वात् घटरूपवत् । तथा शंखादिशब्दो न शंखादिविशेषगुणः, तदवयवगुणजन्यत्वात्, घटरूपवदिति । न चायमसिद्धः । शंखादिशब्दो न शंखाद्यवयवगुणजन्यः शब्दत्वात् श्रोत्रग्राह्यत्वात् भेरीशब्दवदिति ।

यद् वा, शंखादयो न शंखादिशब्दवन्तः कार्यत्वात् घटरूपवदिति । यद् वा अयं शंखो नैतच्छंखशब्दाश्रयः शंखत्वादन्यशंखवदिति । यद् वा, शंखादयो न शब्दवन्तः कार्यत्वात् घटरूपवत् ॥ २४ ॥

तदाह—

**कार्यान्तराप्रादुर्भावात् ॥ २.१.२५ ॥**

इति । कार्यान्तरे रूपादी शब्दस्यानुत्पत्तेः । शंखादपि शब्दो न जायते इत्यर्थः । न चायं शब्दः कार्याश्रितोऽस्मद्बाह्यप्रत्यक्षत्वात्, घटवदिति सत्प्रतिपक्षत्वम् । पूर्वोक्तव्यापकाभावाव्याप्यत्वात् कार्याश्रितत्वेनाप्युपपत्तौ अर्थान्तरग्रस्तत्वाच्च । न चैतदनुमानमसिद्धम् । शब्दवत्कार्ये कार्यत्वस्य व्यभिचारः । शब्दो न कार्याश्रितः स्पर्शवदनाश्रितगुणवत्त्वात् सुखवदिति सत्प्रतिपक्षत्वाच्च । न चायमसिद्धः । शब्दो न स्पर्शवद्गुणः गुणाश्रयत्वात् शब्दत्ववदिति तत्सिद्धेः । यद् वा, नायं पृथिव्यादिकार्यगुणः कार्यान्तरगुणस्तु भविष्यति । न चैतदपि न शब्दाश्रयः कार्यत्वात् घटरूपवदिति वाच्यम् । द्रव्यान्तरस्य भवतामसिद्धत्वेन आश्रयासिद्धेः । अद्रव्यकार्यपक्षीकरणे च सिद्धसाधनादिति ।

ननु मा भूत् शंकापरिहारार्थं सूत्रम्,

**कार्यान्तरप्रादुर्भावात् [ २।१।२५ ]**

इति । न हि कार्यद्रव्यान्तरं प्रत्यक्षसिद्धम्, अननुभवात् । नाप्यनुमानसिद्धम्, लिङ्गाभावात् । न चावगतकार्यद्रव्यगुणत्वं शङ्कितुमपि शक्यम् । नाप्यद्रव्यकारणे च सिद्धसाधनादिति ॥ २५ ॥

ननु मा भूत् कार्यद्रव्यगुणत्वं शब्दस्य परमाणुगुणत्वं तु भविष्यति इति शंकापरिहारार्थं सूत्रम्—

**शब्दः स्पर्शवतामगुणः ॥ २.१.२६ ॥**

इति । स्पर्शवतामिति हेतुविशेषणम् । तथा च स्पर्शवन्तः परमाणवो न शब्दवन्तः स्पर्शत्वाद् घटवदिति । यद् वा सर्वेषां स्पर्शवतां शब्दगुणत्वनिषेधोऽयम् । तथा



हि अस्मत्प्रत्यक्षास्पर्शवन्तो न शब्दवन्त इति प्रतिज्ञा । अत्र हेतुमाह--प्रत्यक्षत्वात् । प्रयोगस्तु, अस्मत्प्रत्यक्षास्पर्शवन्तो न शब्दवन्त अस्मत्प्रत्यक्षत्वात् रूपवदिति । अस्मात् प्रत्यक्षास्पर्शवन्तो न शब्दवन्तः स्पर्शवत्त्वात् गुण इति प्रतिज्ञा ॥ २६ ॥

तत्र तर्कहेतुप्रदर्शनार्थं सूत्रद्वयम्—

**परत्र समवायात् ॥ २.१.२७ ॥**

**प्रत्यक्षत्वाच्च ॥ २.१.२८ ॥**

इति । प्रत्यक्षत्वं चात्र श्रौत्रप्रत्यक्षत्वं विवक्षितम् । अन्यथा रूपादौ व्यभिचारात् । प्रयोगस्तु, शब्दो न स्पर्शवद्गुणः श्रोत्रग्राह्यत्वात् शब्दत्ववदिति । अत्र तर्कः

**परत्र समवायात् [ २।१।२७ ]**

इति । परत्रेति कर्णशष्कुलीदूरदेशे शंखादौ समवायादित्यर्थः । परत्र समवायादित्यत्र श्रोत्रग्राह्यत्वाभावप्रसङ्गादिति शेषः । स्पर्शवद्गुणत्वे शब्दस्य कर्णशष्कुल्येव श्रोत्रम् । न च तस्याः शंखादिशब्देन समवायः संभवति, तस्य शंखादिसमवेतत्वात् । नापि संयुक्तसमवायः, व्यवहितेन शंखादिना कर्णशष्कुल्याः संयोग[ा]संभवात् । न च संबन्धान्तरमस्ति । न चासंबद्धस्य ग्रहणं संभवति । तस्माद् यद्ययं श्रोत्रेण न संबद्धस्तर्हि तेन न गृह्येतेति तर्कः ।

**प्रत्यक्षत्वाच्च [ २।१।२८ ]**

शब्दस्य दिक्कालात्ममनोगुणत्वनिषेधार्थं सूत्रम्—

**न[दिक्काला]त्मगुणो न मनोगुणः ॥ २.१.२९ ॥**

इति । तथा च शब्दो न दिक्कालात्मनोगुणः श्रोत्रग्राह्यत्वात् शब्दत्ववत् । यद् वा शब्दो न दिक्कालमनोगुणः, श्रोत्रग्राह्यत्वात् । आत्मा न शब्दवान्, अस्मत्प्रत्यक्षत्वात्, विशेषगुणत्वाच्च रूपवत् । यद् वा मनो न शब्दवत् अणुत्वात् मूर्तत्वाच्च पार्थिवपरमाणुवत् । यद् व। शब्दः पृथिव्युदकतेजोवायुदिक्कालात्ममनोगुणो न भवति, श्रोत्रग्राह्यत्वात् शब्दत्ववदिति । यद् वा पृथिव्युदकतेजोवायुदिक्कालात्ममनांसि न शब्दवन्ति अश्रौत्रत्वात् शंखवदिति । न चायमसिद्धः, कायपृथिव्यादयो न श्रौत्र[ाः]कार्यत्वाद् घटवत् । नित्यपृथिव्यादयो न श्रौत्राः स्पर्शवत्वाद् घटवत् । दिक्कालमनांसि न श्रौत्र[त्रः]विशेषगुणरहितत्वात् रूपवदिति । आत्मा न श्रौत्रम्[त्रः],अस्मनुमानसप्रत्यक्षत्वात् सुखवदिति । न चाकाशासिद्धौ श्रोत्रसिद्धिः । आकाशस्यैव श्रोत्रासिद्धौ न वा श्रोत्रत्वासिद्धिः तदभावत्वादिति वाच्यम् । अयं शब्दसाक्षात्कारो नेन्द्रियजः कार्यसाक्षात्कारत्वात् रूपसाक्षात्कारवदिति श्रोत्रसिद्धिः शब्दसाक्षात्कारजनकेन्द्रियस्यैव श्रोत्रत्वाच्च तद्वत्त्वस्यापि सिद्धेः । तदेवं पृथिव्यादीनामर्थान्तरनिराकरणात्, शब्दः क्वचिदाश्रितो

गुणत्वाद् रूपवदित्याकाशसिद्धिः। न चानेनाश्रयमात्रसिद्धेर्नाकाशसिद्धिरिति वाच्यम्। शब्दाश्रसिद्धेस्त्व[स्त]स्यैवाकाशत्वात् शब्दाश्रयः आकाश इत्याकाशलक्षणाङ्गीकारात्। न चानेन पृथिव्यादिव्यतिरिक्तसिद्धेर्नाकाशसिद्धिरिति वाच्यम्। पृथिव्यादिव्यतिरिक्तस्यानाकाशत्वादिति। न च तस्याप्यसिद्धिः। शब्दाश्रय इतरेभ्यो भिद्यते, शब्दाश्रयत्वात्, न यदेवं न तदेवं यथा घट इति सिद्धेः। न चात्राप्रसिद्धविशेषणत्वं दोषाय, अभावसाध्यतानङ्गीकाराद् इत्याचार्याः।

वयं ब्रूमः, शब्दः क्वचिदाश्रित इत्यनेनैव शब्दाश्रयस्य पृथिव्या अभेदः सिद्धः, व्यावर्तकधर्मस्य भेदत्वात् शब्दाश्रयत्वस्य च पृथिव्यादिसकलधर्मव्यावर्तकधर्मत्वात् यदा[ह] धर्मकीर्तिः—

अयमेव च [न] भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदो वेति। यद्वा शब्दो द्रष्टव्याष्टद्रव्यव्यतिरिक्ताश्रितः, तदनाश्रितत्वे सत्याश्रितत्वात् रूपवत् इति। न चायमसिद्धः।

**कारणगुणपूर्वकः कार्ये गुणो दृष्टः [ २.१.२४]**

इत्यादि सूत्रे तदनाश्रितत्वस्य सिद्धत्वात्। न चात्र गुणत्वाभाव उपाधिः, रूपत्वस्या(?)तिरिक्तागुणत्वरहिताष्टद्रव्यातिरिक्ताश्रिताद् भिन्नं मेयत्वाद् घटवदिति सिद्धे अष्टद्रव्यातिरिक्ताश्रिताद् भिन्नं मेयत्वाद् घटवदिति सिद्धेः, अष्टद्रव्यातिरिक्ताश्रितगुणे साध्याव्यापकत्वात्।

न च शब्दोऽष्टद्रव्यातिरिक्ताश्रितो गुणत्वाद् रूपवदिति सत्प्रतिपक्षत्वम्। साध्याव्यापकत्वभङ्गस्थले व्यभिचारात्। अश्रावणत्वे सोपाधित्वाच्च। अष्टद्रव्यातिरिक्तानाश्रित इत्यस्य किमनाश्रितत्वे पर्यवसानम्, अष्टद्रव्याश्रितत्वे वा? नाद्यः, शब्दः क्वचिदाश्रितो गुणत्वाद् रूपवदित्यादिना बाधात्। न द्वितीयः, शब्दो न कार्यगुण इत्यादिना बाधात्। न चोभयविशेषणबाधे सामान्यसिद्धिः संभवति। पर्वतापर्वतवह्नित्वे बाधेऽपि वह्निमत्त्वसिद्धिप्रसङ्गात्। न चाष्टद्रव्यातिरिक्तसिद्धावप्यष्टद्रव्यातिरिक्तद्रव्यासिद्धेः आकाश(ा)सिद्धिरिति वाच्यम्, दत्तोत्तरत्वादिति।

यद् वा शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः, तदनाश्रितगुणत्वात्, न यदेवं न तदेवं यथा रूपमिति। न चात्राप्रसिद्धविशेषणत्वम्, अष्टद्रव्यातिरिक्ताश्रितत्वयोः मिलितयोः साध्यत्वात्। तयोश्च प्रसिद्धावयवतश्चाविद्यमानत्वेनाविद्यमानसपक्षत्वात्। द्रव्याश्रितत्वाष्टद्रव्यातिरिक्ताश्रितत्वसाधकपूर्वानुमानाभ्यामेवअष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसिद्धेश्च पूर्वानुमानाभ्यामष्टद्रव्यातिरिक्ताश्रितत्वद्रव्याश्रितत्वयोः सामानाधिकरण्यं नाम किमेकशब्दाधिकरणत्वमन्यद् वा? नाद्यः, एकधर्मिनिष्ठधर्मद्वयसाधकाभ्यां समानाधिकरणत्वस्य ग्रहणात्। अन्यथा घटादौ रूपस्पर्शत्वादि-



सिद्धेरसंभवात्। न द्वितीयः, असंभवात्। अथवा न शब्दे द्रव्य......विशिष्टनष्टद्रव्यातिरिक्ताश्रितत्वसाधकादेवाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसिद्धिः। पुरोवर्तिनि पर्वतत्वविशिष्टवह्निमत्त्वसाधकात् पर्वते वह्निमत्त्वसिद्धिः।......पुरोवर्तिनि पर्वतो वह्निमान् इत्यनुदयप्रसङ्गादिति।

यद् वा, घटरूपमनेकद्रव्याश्रितत्वानधिकरणं, द्रव्याश्रितत्वात्, मेयत्वादिति सामान्यतो विशेषणं प्रसाध्य शब्दोऽष्टद्रव्यातिरिक्ताश्रितत्वे सति द्रव्याश्रितः शब्दत्वात् न यदेवं न तदेवं यथा रूपमिति व्यतिरेकिप्रवृत्तिरिति।

यद् वा, अदृष्टमूलकालात्मातिरिक्तद्रव्यत्वात्, मेयत्वात् घटवदित्यष्टद्रव्यातिरिक्तं प्रसाध्य द्रव्यत्वेनैव तत्र गुणवत्त्वं प्रसाध्य शब्दोऽष्टद्रव्यातिरिक्तद्रव्यगुणः शब्दत्वात्। न यदेवं न तदेवं यथा रूपमिति व्यतिरेकी प्रवर्तनीयः।

न चैवं सपक्षवृत्त्यवृत्तिनिश्चयाभ्यामन्वयित्वासाधारणत्व इति वाच्यम्। सपक्षसत्त्वेऽपि तत्र हेतोर्वृत्त्यनिश्चयात्।

यद् वा उक्तन्यायेनाष्टद्रव्यातिरिक्तद्रव्यगुणे सिद्धे शब्दोऽष्टद्रव्यातिरिक्तद्रव्यगुणः अदृष्टद्रव्यानाश्रितगुणत्वात् संप्रतिपन्नवदित्यन्वयव्यतिरेकी प्रवर्तनीयः।

**तदिदमुक्तम्** –

**शब्दो लिङ्गमाकाशस्य ॥ २.१.३० ॥**

इति। **आत्रेयाचार्यादयस्तु** शब्दः कस्यचिद् विशेषगुणः, सामान्यविशेषवत्त्वे सति नियमेनास्मदादिग्राह्यैकेन्द्रियग्राह्यत्वात् रूपवदित्याकाशे प्रमाणमाहुः। तदयुक्तम्, विशेषगुणवैयर्थ्यात्, दृष्टान्तस्य साधनविकलत्वाच्च। रूपस्य देवदत्ताद्यनेकचक्षुर्वेद्यत्वेनैकेन्द्रियग्राह्यत्वविरहात्। अनेकेन्द्रियग्राह्यत्वमपि एकेन्द्रियग्राह्यत्वेन तत्र हेतोर्व्यभिचारात्। त्वक्चक्षुषोरपि द्रव्यत्वादिनैकजातीयत्वात्। द्रव्यत्वावान्तरजात्यैकजातीयेन्द्रियग्राह्यत्वं विवक्षितमिति चेत्—न, तथा सति महान् एकजातीयेन्द्रियग्राह्यत्वम्। तच्च रूपादावस्तीति साधनविकलो दृष्टान्त इति चेत् न, तथा सति घटादेरप्येकजातीयेन्द्रियग्राह्यत्वेन तत्र हेतोर्व्यभिचारात्। त्वक्चक्षुषोरपि द्रव्यत्वादिनैकजातीयत्वात्। द्रव्यत्वावान्तरजात्यैकजातीयेन्द्रियग्राह्यत्वं विवक्षितमिति चेत्—न, तथा सति हेतोरप्रसिद्धत्वात् श्रोत्रे द्रव्यत्वावान्तरजातिविरहात् तस्याकाशत्वेनैकत्वात् नियमग्रहणवैयर्थ्याच्च। त्वगिन्द्रियजन्यज्ञानात् पूर्वमेव विनष्टे चक्षुषी गृहीते घटादौ व्यभिचारपरिहारार्थं नियमग्रहणमिति चेत्—न, नियमग्रहणेन तस्याव्याप्तेः। तस्यापि नियमेन बाह्यैकेन्द्रियग्राह्यत्वात् तत्र कदाचिदपि त्वगिन्द्रियाप्रवृत्तेरिति श्रावणत्वाभावेन सोपाधित्वाच्च। शब्दो न कस्यचिद् विशेषगुणः श्रावणत्वात् शब्दत्ववदिति सत्प्रतिपक्षत्वाच्चेति आकाशस्य प्रत्यक्षत्वात् किमनुमानव्युत्पादनेनेति चेत्–न,

प्रत्यक्षत्वे प्रमाणाभावात्। आकाशं प्रत्यक्षं महद्द्रव्यत्वात् घटवदिति चेत्--न, सिद्धसाधनात्। अस्माभिराकाशत्वेश्वरयोगिप्रत्यक्षस्याभ्युपगमात्। अस्मत्प्रत्यक्षत्वं साध्यत इति चेत्- न, मीमांसकस्य व्यावर्त्याभावेनास्मद्विशेषणवैयर्थ्यात् गुणवदिति सर्वोपसंहारवृत्तिव्याप्तिग्राहकास्मत्प्रत्यक्षाकाशज्ञानमित्याकाशविशिष्टज्ञानगोचरासु मानसप्रत्यक्षगोचरत्वसिद्धयार्थान्तरग्रस्तत्वाच्च न व्यावर्तकविशेष.......... मनसि व्यभिचाराच्च। मनोव्यतिरिक्तत्वेन विशेषणे परं प्रति वैयर्थ्यत्वाच्च।

अस्मन्मते दिक्कालयोर्व्यभिचाराच्च। दिक्कालव्यतिरिक्तत्वेन हेतुर्विशेषणीय इति चेत्--न, मीमांसकस्य व्यावर्त्याभावेन विशेषणवैयर्थ्यात्। दिक्कालौ पक्षतुल्याविति चेत्—न, तयोः प्रत्यक्षसाधनेऽतीन्द्रियत्वस्योपाधित्वात्। तस्यापि साधने व्योम्नि व्यभिचारात्। चक्षुरादौ व्यभिचाराच्च। अस्मत्प्रत्यक्षगुणत्वं हेतुरिति चेत्—न, भाट्टानाम् आसिद्धेः। आत्मरहितारूपिद्रव्यत्वाभावानिन्द्रियत्वाभ्यां सोपाधित्वाच्च। आत्मरहितारूपिद्रव्यत्वेनेन्द्रियत्वाभ्यां सत्प्रतिपक्षत्वाच्चेति।

आकाशज्ञानमिन्द्रियजम्, तदन्वयव्यतिरेकानुविधायित्वात् घटज्ञानवदिति चेत्—न, परोक्षाकाशज्ञानधर्मित्वे बाधात्। अपरोक्षाकाशज्ञानधर्मित्वे चाश्रयासिद्धेः। अनिर्धारितपरोक्षत्वापरोक्षत्वम् इहाकाशे शकुनिरिति ज्ञानस्य विततालोकमण्डलमूर्तद्रव्याभावान्यतरानिष्टशकुनिग्राहकस्येन्द्रियजत्वसिद्धावप्याकाशस्येन्द्रियजज्ञानविषयत्वासिद्धेः। आकाशशब्दस्य चाकाशसंबन्धिनि विततालोकादौ लक्षणयापि प्रयोगोपपत्तेः। मुख्ये किं बाधकमिति चेत्—न, इदं ज्ञानं नाकाशविषयम् इन्द्रियजत्वात् घटज्ञानवत्। आकाशं नैतज्ज्ञानविषयो रूपद्रव्यत्वात् मनोवदित्यादि। आकाशज्ञानत्वाभावेन सोपाधित्वाच्च आकाशज्ञानत्वाभावेन सत्प्रतिपक्षत्वाच्च। स्वपक्षसाधनं च आकाशं न वा निर्विकल्पकविषयानिरूप्यद्रव्यत्वात् इन्द्रियत्वाच्च मनोवदिति।

न चात्रास्मत्प्रत्यक्षगुणत्वाभाव उपाधिः। वाय्वादौ साध्याव्यापकत्वात्। न चास्मत्प्रत्यक्षगुणत्वाभावेन सत्प्रतिपक्षत्वम्, पवनादौ व्यभिचारादिति।

यद् वायं शब्दसाक्षात्कार इन्द्रियजः साक्षात्कारत्वात् रूपसाक्षात्कारवदित्याकाशसिद्धिः। न चेश्वरनिष्ठानित्यसाक्षात्कारे व्यभिचारः, तदनभ्युपगमात्। अभ्युपगमे त्वजन्यत्वे हेतुविशेषणात्। न चात्रासाक्षात्कारत्वाभाव उपाधिः। चक्षुर्जन्यसाक्षात्कारादौ साध्याव्यापकत्वात्। नापि शब्दसाक्षात्कारत्वाभाव उपाधिः। मनोजन्यशब्दगोचरसाक्षात्कारे साध्याव्यापकत्वात्।

न च तत्र मानाभावः। शब्दो मनोजन्यसाक्षात्कारविषयः मेयत्वात् सुखवदित्यादेः साक्षाद्व्यावर्त्यविपक्षाभावेन पक्षेतरत्वाच्च। नित्य ईश्वरसाक्षात्कारो व्यावर्त्य इति चेत्– न, तदभ्युपगमात् (?)। तदभ्युपगमेऽपि शब्दविशेषणस्य व्यावर्त्य-



विपक्षाभावेनास्य पक्षेतरत्वात्। नित्यसाक्षात्कारस्य साक्षात्कारत्वाभावेनैव व्यावृत्तत्वात्। न च शब्दसाक्षात्कारत्वेन सत्प्रतिपक्षत्वम्। मनोजन्यसाक्षात्कारे व्यभिचारात्।

न च तद्व्यतिरिक्तत्वेन हेतुर्विशेषणीयः दृष्टान्ताभावात्। ईश्वरशब्दे साक्षात्कारो दृष्टान्त इति चेत्—न, तस्यापीन्द्रियजन्यत्वात्। न चानेनेन्द्रियसिद्धावपि नाकाशसिद्धिरिति वाच्यम्। एतत्साक्षात्कारजनकस्येन्द्रियस्याकाशत्वात्। एतत्साक्षात्कारजनकेन्द्रियत्वस्याकाशलक्षणत्वादिति।

यद्येवमाकाशसिद्धिः, शब्दः कस्यचिद् विशेषगुणः सामान्यवत्त्वे सति त्वगिन्द्रियाग्राह्यत्वे सति बाह्येन्द्रियग्राह्यत्वात्..........वत्।..........षत्वे सत्यचाक्षुषत्वे सति बाह्येन्द्रियग्राह्यत्वाच्च रूपस्पर्शवत्। न च परमाण्वादिषु व्यभिचारः। तेषां योगिमनोमात्रविषयाणां बाह्येन्द्रियाविषयाणां च परमाण्वादीनां त्वगिन्द्रियविषय...... ....र्मादीनां च पक्षतुल्यत्वात्। बाह्येन्द्रियग्राह्यत्वाच्च। न चात्राग्राह्यत्वाभाव उपाधिः। श्रोत्रार्थ इति चेत्—न, सूर्यगतीनां सूर्यनिष्ठत्वात् यौगपद्यादीनां देवदत्तादिनिष्ठत्वात् परत्वापरत्ववत्।

अन्यथा व्यवहितसूर्यगत्यवच्छिन्नमानरहितमव्यवहितसूर्यगत्यवच्छिन्नताधा परत्वमिति परत्वापरत्वयोरप्युच्छेदात्। परत्वापरत्वविशिष्टदेवदत्तादिप्रत्ययपूर्वक्षणेन नु स(?)हि देवदत्तादिसंयोगसमवायरहिताश्च सूर्यगतयः कथं देवदत्तादिविषया इति चेत्–तुल्यम्, यौगपद्याविशिष्टप्रत्ययेष्वपि। यथा नीलो देवदत्त इत्यादौ देवदत्तसंयुक्तनीलनीलिमा तद्गतत्वनीलत्वसामान्यं संयोगसमवायरहितमपि देवदत्तं विशिनष्टि, तथा सूर्यगतयोऽपि देवदत्तादीन्। विशेषणीय इति चेत्—न, नीलत्वस्य नीलगुणविशेषणत्वात्, नीलगुणस्य विशेषणत्वात् नीलगुणस्य नीलिद्रव्यविशेषणत्वात्। कथं तर्हि देवदत्तो नील इति चेत्—नीलनीलिमसमारोपादिति ब्रूमः। यथा जपाकुसुमलौहित्यं स्फटिके समारोप्यते, तथा नीलनोलिमा देवदत्ते। न चैवं प्रकृतेऽपि यौगपद्यप्रत्ययानां बाधाभावेनाभ्रान्तत्वात्।

अन्यथा परत्वापरत्वप्रत्यययोरपि भ्रान्तित्वापत्तेः। यौगपद्यादिप्रत्ययपूर्वक्षणे सूर्यगतयोऽनुसन्धीयन्ते इति चेत् न, गृहादिमध्यवर्तिनां इन्द्रियसन्निकर्षाभावेन तत्र प्रत्यक्षत्वानुदयात् लिङ्गानुसन्धानाभावेनानुमितेरनुत्पत्तेः। अनुभवाभावेन स्मरणस्याप्यसंभवात्। अन्यथा परत्वापरत्वमिति पर्युदासात्। तेन परत्वसदृशानामेव ग्रहणात् कालपिण्डसंयोगाद्यसमवायिकारणजन्यत्वेन परत्वसदृशत्वात् कथमेतैः कालानुमानमिति चेत्—परत्वापरत्वयोरप्युच्छेदात्। तस्माद् यौगपद्या-

दयो गुणाः द्रव्यकर्मसामान्यविशेषसमवायाद्यभावात् द्रव्यकर्मान्यत्वे सति सामान्यवत्त्वात् रसवत् ।

न चैवं चतुर्विंशतिरेव गुणाः इत्यस्यानुपपत्तिः । यौगपद्यादीनामपरत्वेऽन्तर्भावात् । न परत्वमपरत्वमपि पर्युदासात् न परत्वसदृशानां ग्रहणात् कालपिण्डसंयोगाद्यसमवायिकारणजन्यत्वेन परत्वसदृशत्वात् कथमेतैः कालानुमानमिति चेत् ? शृणु । यौगपद्यादयोऽसमवायिकारणजन्याः कार्यगुणत्वादिति स्थिते रूपादीनां च व्यभिचारादिना समवायिकारणसंयोग·········समवायिकारणता इति निश्चीयते । तथा च यौगपद्यादयः संयोगसमवायिकारणजन्याः तद्व्यतिरिक्तासमवायिकारणजन्यत्वे सति भावकार्यत्वात् घटवत् ।

न चात्र यौगपद्याश्रयतद्व्यतिरिक्तमूर्तसंयोगसमवायिकारणं·············घटनिष्ठत्वात् सत्तावत् । एतदनवगम्याद्याश्रयसंयुक्ते घटः नैतद्यौगपद्यासमवायिकारणाश्रयः घटत्वात् नष्टघटवदित्यादिना निषेधात् । नापि यौगपद्य·········योगौ नासमवायिकारणं आत्माश्रितत्वादाकाशाश्रितत्वात् सत्तावत् । आत्मा नैतद्यौपगद्यासमवायिकारणाश्रयः ज्ञानासमवायिकारणाश्रयत्वात् । मनोऽप्य आकाशं नैतद्यौगपद्यासमवायिकारणाश्रयः शब्दसमवायिकारणाश्रयत्वात् । भेरीवत् । दिक् नैतदनवगम्यासमवायिकारणाश्रयः घटदिक्संयोगाश्रयत्वात् घटवदित्यादिना निषेधात् । नाप्येतद् देवदत्तयज्ञदत्तसंयोगासमवायिकारणं, असंयुक्तयोरपि यौगपद्योदयात् । अयं देवदत्तयज्ञदत्तसंयोगो नैतद्यौगपद्यासमवायिकारणम्, देवदत्तयज्ञदत्ताश्रितत्वात् सत्तावदित्यादिना निषेधात् । न चानेन प्रकारेण देवदत्तकालसंयोगस्य देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणत्वनिषेधः कालस्य च देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणाश्रयत्वनिषेधश्चेति वाच्यम् । देवदत्तकालसंयोगकालयोरसिद्धावाश्रयासिद्धेः ।

अस्मदुक्तप्रमाणबलेन तत्सिद्धौ धर्मिग्राहकप्रमाणबाधात् प्रमाणान्तरेण तत्सिद्धिरिति चेत्—न, भवद्भिस्तदनङ्गीकारात् । अस्माभिस्तदनङ्गीकारेऽपि देवदत्तकालसंयोगस्य देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणत्वनिषेधे कालस्य च देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणत्वनिषेधे कालस्य च देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणाश्रयत्वनिषेधे बाधापसिद्धान्तयोर्व्युत्पादनात् ।

तस्माद् देवदत्तयज्ञदत्तयौगपद्यासमवायिकारणसंयोगाश्रयतया द्रव्यान्तरसिद्धिः । तथा च प्रयोगः, अयं देवदत्तो यज्ञदत्तव्यरिक्ततद्यौगपद्यासमवायिकारणाश्रयभिन्नः मेयत्वात्, घटवत् । एतद्यौगपद्यासमवायिकारणं देवदत्तसंयोगो



देवदत्तव्यतिरिक्ताश्रयः संयोगत्वात् घटसंयोगवदिति । एवं यौगपद्यचिरक्षिप्रत्वैरपि कालोऽनुमेय इति ॥३०॥

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥२.१.३१॥**

**तत्त्वं भावेन ॥२.१.३२॥**

इति सूत्रद्वयं गतार्थम् ॥

[ इत्याकाशः ][1]

१. अत्र सुदीर्घो ग्रन्थपातः । तत्र द्वितीयस्य प्रथमाह्निकसमाप्तिः, द्वितीयाह्निकस्य च आदितः कतिचन सूत्राणि व्याख्यासहितानि नष्टानि ।

## द्वितीयाध्याये

# द्वितीयाह्निकम्

यद्येकः कालः, कथं तर्हि युगपत्कालः चिरकालः क्षिप्रकाल इति काल [।] स्तत्र व्यवहार इति शङ्कापरिहारार्थं सूत्रम्

**कार्यविशेषेण नानात्वम् ॥२.२.९॥**

यौगपद्यादिकार्यभेदजनकतया काले नानात्वव्यवहारस्त्वौपचारिको न वास्तवः। यथा देवदत्ते पाक[पाठा]दिकार्यभेदजनकतया पाचकः पाठ [क] इति भेदव्यवहार इति न यौगपद्यादिप्र…………र्न विशेषगुणसिद्धिः।

पदार्थान्तरैरन्यथासिद्धत्वादिति शंकां परिहरति—

अपरस्मिन् [परं] युगपदयुगपच्चिरं क्षिप्रमिति [२.२.६]

**नित्येष्वभावादनित्येषु भावात् ॥२.२.१०॥**

अर्थान्तरं हि नित्यं गगनादि। अनित्यं घ[टादि। न च तस्मिन्] विषये परापरयौगपद्यादिप्रत्यया जायन्ते। सत्यपि गगने घटादिष्वनुदयात् तत्प्रत्ययविलक्षणत्वाच्च।

यदा तु नित्येषु भावादिति पाठः, तदा नित्येष्वनुदयादिति……यौगपद्यादिदूषणां परत्वापरत्वयौगपद्यादिषु गुणसिद्धिरिति वाच्येयम्। न चात्रानित्याः सूर्यगतयो विषय इत्युक्तं प्राक्। नापि घटादयः, तेषु सत्स्वप्यनुदयात्। असत्स्वपि चोत्पत्तेरिति।

न चायौगपद्य……द्यविरोधिनः क्रमस्याविवक्षितत्वादिति।

ननु सिध्यतु नाम देवदत्तादिव्यतिरिक्तदेवदत्तयौगपद्याद्यसमवायिकारणसंयोगसमवायिकारणतया द्रव्यान्तरम्। कालसिद्धिस्तु कथमित्यत आह—

**कारणे कालाख्या ॥२.२.११॥**

देवदत्तव्यतिरिक्तदेवदत्तयज्ञदत्तयौगपद्याद्यसमवायिकारणसंयोगसमवायिकारणे कालसंज्ञाश्रयस्य काललक्षणत्वात्। तस्मादेकैकपरत्वाद्यसमवायिकारणाश्रयः काल इति सूत्रसंदर्भतात्पर्यम्॥



यद् वा

युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि [२.२.६] लिङ्गशब्दोऽत्र प्रमाणमाह—

हेतुरपदेशो लिङ्गं निमित्तं प्रमाणं कारणमित्यनर्थान्तरम् [९.२०] इति सूत्रकारवचनात्। काललिङ्गानि कालप्रमाणानि। अपरस्मिन् परमिति भावप्रधानो निर्देशः। तेन परत्वस्य लिङ्गम्, न तु परप्रत्ययस्य परत्वेनान्यथासिद्धत्वात्। परस्य च लिङ्गत्वमुक्तप्रकारेण युगपदादिप्रत्ययानां तु विशिष्टप्रत्ययत्वेन। तेन परत्वं युगपत्प्रत्ययः अयुगपत्प्रत्ययः चिरप्रत्ययश्च काललिङ्गानीति सूत्रार्थ इति सूत्रकारेण अतीतानागतवर्तमानादिप्रत्यया गृह्यन्ते।

प्रयोगस्तु, एते यौगपद्यादिप्रत्यया द्रव्यविशेषणजन्याः, तदन्यत्वे सति विशिष्टप्रत्ययत्वात् दण्डी देवदत्त इति प्रत्ययवत्। न च विशिष्टप्रत्ययात् पूर्वं कालस्याप्रतीतेर्न विशेषणत्वमिति वाच्यम्, स्मर्यमाणविशेषणत्वात्, पूर्वमनुभवाभावात् न स्मरणमति चेत्—न, यौगपद्यादिप्रत्ययलिङ्गेनानुभवात्। तत्रापि स्मर्यमाणस्यैव विशेषणत्वात्।

एवं पूर्वमपि यावत्सर्गादि समर्थनीयम्। सर्गादौ प्रलयेन संस्कारविनाशात् परत्वापरत्वे तु लिङ्गतया काले प्रमाणम्, प्रमासाधकत्वात्। सकृत् प्रयुक्तः प्रमाणशब्दकथं प्रमाणं तत्साधनत्वे बोधयतीति चेत्—न, उभयपरत्वादिति ब्रूमः।

ननु युगपदादिप्रत्यया नापरोक्षाः, इन्द्रियाजन्यत्वात् नीरूपद्रव्ये बाह्येन्द्रियाणां [अ]प्रवृत्तेः। मनसश्च बहिरस्वातन्त्र्यात्। नाप्यनुमितयः लिङ्गाजन्यत्वादिति कथमेषां प्रमाणत्वमिति चेत्—न, आर्षत्वात्। तस्य च प्रमान्तरत्वात्। श्वो मे भ्राता आगन्तेति हृदयं मे कथयतीत्यादिवत्। न चैषामप्रमाणत्वम्, बाधकाभावात्। देवदत्तयज्ञदत्तौ न युगपदागताविति प्रत्यक्षाभावात्। युगपदर्थादवगतौ तदभावस्याप्यर्थसिद्धत्वेनानुमातुमशक्यत्वाच्च।

न चात्र साधनाभावः, युगपदादिप्रमासाधनवति प्रमात्वात् संप्रतिपन्नवदित्यनुमानात्। न चेश्वरप्रमायां व्यभिचारः, पक्षतुल्यत्वात्। तदन्यत्वेन वा विशेषणात्, किं तत्साधनमिति चेत्—न, विशेषणसाधारणस्यापि……यात्। तेनायं वायुरिदं गुर्वित्यादिप्रत्ययाः व्याख्याताः। तस्माद् युगपदादिप्रत्ययाः काले प्रमाणमिति सिद्धम्।

न च कालस्यैकत्वात् कथं विलक्षणयुगपदादिप्रत्ययविषयत्वमिति वाच्यम्। युगपदादिकाल…………युगपदिति प्रत्ययस्य विषयः अन्यश्चायुगपदिति प्रत्ययस्य अन्यश्चिर इति प्रत्ययस्य अन्यः क्षिप्र इति प्रत्ययस्य विलक्षणप्रत्ययबलेन कालभेदसिद्धेः। सन्तु वा युगपदादिप्रयोगाः साक्षात्कारा एव। न चात्र साधनाभावः। चक्षु-

रादेः सत्त्वात् । न चात्र मानाभावः । विप्रतिपन्नयुगपदादिचक्षुरादिजन्याः अनन्यथासिद्धतदन्वयव्यतिरेकानुविधायित्वात् । घटप्रत्ययवदित्यादेः सत्त्वात् । न च तज्जनकलिङ्गग्रहणेनान्यथासिद्धत्वम् । युगपदादिकालव्याप्तलिङ्गाभावात् । न च परत्वादेः लिङ्गाभावः तस्य समवायिकारणसंयोगाश्रयमात्रयुगपदादिकालप्रत्ययाजनकत्वात् नियमेन युगपदादिप्रत्ययपूर्वक्षणे परत्वादेरसत्त्वात् । अनुपलम्भाच्च । चक्षुराद्यजन्यत्वे युगपदादिप्रत्ययाभावप्रसङ्गात् । लिङ्गादेरसंभवात् ।

न चात्र कालविषयत्वाभाव उपाधिः । चक्षुरादिजन्यकालविषयतया साक्षात्कारे साध्याव्यापकत्वात् । न च कालविषयत्वेन सत्प्रतिपक्षत्वम् । तत्रैव व्यभिचारात् । न च युगपदादिकालो न बाह्येन्द्रियग्राह्यो निरूप्य[नीरूप]द्रव्यत्वात् मनोवदिति सत्प्रतिपक्षत्वम् । युगपदादिकालासिद्धावाश्रयासिद्धेः । बाह्येन्द्रियजन्ययुगपदादिप्रत्ययबलेन सिद्धौ बाधात् । अपसिद्धान्ताच्च । युगपदादिकालसाधकप्रमाणान्तराभावाच्च । यौगपद्यादयो गुणास्तत्र प्रमाणमिति चेत्—न, तेषु मानाभावात् । युगपदादिप्रत्यया एव तत्र मानमिति चेत्-न, अवकल्पनीयकालेनैवोपपत्तौ तेषां गुणविशेषासाधकत्वात् ।

यौगपद्यादयो गुणाः द्रव्यकर्मान्यत्वे सति भावकार्यत्वात् रूपवदिति चेत्—न, द्रव्यान्यत्वस्यासिद्धेः । युगपत्त्वस्य च सर्वत्रैकत्वेन सत्तावत् कार्यत्वस्यासिद्धेश्च । एतेन द्रव्यकर्मान्यत्वे सति सामान्यवत्त्वात् द्रव्याव्यतिरिक्तभावत्वाच्चेति हेतुद्वयं निरस्तम् । देवदत्तयज्ञदत्तौ युगपदागताविति प्रत्ययविषयत्वाभावेन सोपाधित्वाच्च । अनुकूलतर्कवत्त्वेन पूर्वस्य बलीयस्त्वाच्चेति ॥ १२(?) ॥

## द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥ २.२.१३ ॥

गतार्थमेतत् ॥

## तत्त्वं भावेन ॥ २.२.१४ ॥

च(?)एव युगपत्काले देवदत्तयज्ञदत्तविशेषणं । स एव तद्व्यतिरिक्तातीतानागतवर्तमानानां युगपत्प्रत्ययस्य भेदासाधकत्वात् । भेदसाधकप्रमाणान्तराभावाच्च । अभेदे किं प्रमाणमिति चेत्—स एवायमिति प्रत्यभिज्ञानम् । अनुमानं च विवादाध्यासितो युगपत्काल एतद्युगपत्कालात् न भिद्यते, युगपत्कालत्वात् । एतद्युगपत्कालवत् ; विवादाध्यासिता युगपत्प्रत्यया एतद्युगपत्प्रत्ययविषयकालालम्बनाः युगपत्प्रत्ययत्वात् एतद्युगपत्प्रत्ययवत् । भावेनेति सत्ताप्रतिपत्तिं दर्शयति—व्याख्यातमिति शेषः ।

एतेन युगपत्प्रत्ययविषयस्य गुणत्वं निरस्तम् । कार्यगुणस्य नित्यत्वसर्वगतत्वयोरसंभवात् । आश्रयविनाशविनाश्यत्वाच्चेति न युगपदादिकालभेदोऽनुपपन्नः । विवादाध्यासितः कालो युगपत्कालात् न भिद्यते कालत्वात्, युगपत्कालवत् ।



विवादाध्यासिताः कालप्रत्ययाः एतद्वि·········विषयकालालम्बनाः कालप्रत्ययत्वात् युगपत्कालप्रत्ययवत् इति कालैकत्वसिद्धिः ।

अत्रोत्तरम्—

## कार्यविशेषेण नानात्वम् ॥ २.२.१९ ॥

युगपदादिप्रत्ययकार्यविशेष·········नानात्वं कालस्येतिशेषः । युगपदादिप्रत्ययकार्यविशेषेण कालस्य नानात्वं सिध्यति । विलक्षणप्रत्ययानां भिन्नवस्तुसाधकत्वात् । अन्यथा घटपटादिभेदानुपपत्तेः । कालैकत्वसाधनस्य किं बाधकमिति चेत् ? धर्मिग्राहकप्र·········प्रत्ययविशेषेणेति वक्तव्ये कार्यविशेषे[णे]ति किमर्थमिति चेत् ? व्यवहारविशेषस्यापि लाभार्थमिति ब्रूमः । यथा प्रत्ययविशेषो भेदं साधयति, तथा व्यवहारविशेषोऽपि । न चासौ ग्रहणेन लभ्यते । कार्यग्रहणेन तु प्रत्य·········व्यवहारोऽपि लभ्यत एव । कालविषयप्रत्ययवत् । कालविषयव्यवहारस्यापि कालकार्यत्वात् विषयस्यापि कारणत्वादिति ।

ननु युगपदादिप्रत्ययानां नित्यविषयत्वे गगनादिभिरर्थान्तरत्वम् अनित्यविषयत्वे तु घटादिभिरर्थान्तरत्वमित्याशङ्कापरिहारसूत्रम्—

अपर[स्मिन्]परं युगपदयुगपच्चिरं क्षिप्रमिति ।
नित्ये[ष्व]भावादनित्येषु भावात् ॥ २.२.१० ॥

नित्येष्वनित्येष्विति विषयसप्तम्यौ । नित्येष्वित्यत्र कालव्यतिरिक्ते विशेषः । न ह्यत्र कालव्यतिरिक्ता गगनादयो·······नाप्यनित्या घटादयः तत्प्रत्ययविलक्षणत्वात् । तेषु सत्स्वप्यभावात्, असत्सु च भावात् ।

अपरस्मिन् परमित्यत्र दिक्कृतापरत्वं यथा स्थविर इति व्याख्यातम् । तदनुपपन्नम् । प्रत्यहं शरीरभेदाङ्गीकारे स्थविरस्य·······त्पन्नत्वेन बहुतरतपनपरिस्पन्दान्तरितत्वाभावेन परत्वासंभवात् । तस्माद् यत्र विरुद्धधर्माध्यासविरहिणो कार्यद्रव्ये बहुतरतपनपरिस्पन्दान्तरिते दिक्कृतापरत्ववति परत्वमुत्पद्यते । तदेव घटादि·······हरणोयमिति सिध्यतु नाम युगपदादिप्रत्ययविषयतया पदार्थान्तरम् । तथापि न कालसिद्धिरिति शङ्कां निराचष्टे—

कारणे कालाख्या ॥ २.२.११ ॥

युगपदादिप्रत्ययानां विशेषणतया च कारणे कालसंज्ञे[ति··· कालसिद्धिः]

॥ इति कालः ॥

## [ इत इदमिति यतस्तद्दिश्यं लिङ्गम् ॥ २.२.१२ ॥ ]

इत इदमिति अस्मादिदमिति । अस्मादिदं परमपरं पूर्वेण दक्षिणेन पश्चिमेनोत्तरेणोत्तरपूर्वेण पूर्वदक्षिणेन दक्षिणपश्च[िमेन पश्चि]मोत्तरेणाद्धर्वमधस्तादिति विशिष्ट-

प्रत्यय[यतो]विशेषणात् परत्वापरत्वपूर्वत्वदक्षिणत्वादेः तत् दिशो लिङ्गम्। यथा हि परत्वापरत्वे गुणौ प्रत्यक्षसिद्धौ तथा पूर्वत्वदक्षिणत्वादयो [ऽपि] तुल्ययोगक्षेमत्वात्।

न च पूर्वादिप्रत्ययेषु मेरुं प्रदक्षिणयतः सूर्यस्य प्रथमचरमादिमेरुसंयोगा एव विशेषणमिति वाच्यम्। सूर्यमेरुप्रथमसंयोगसमये सूर्यमेरुचरमसंयोगादेरभावेन पूर्वप्रत्ययसमये दक्षिणादिप्रत्ययानुदयप्रसङ्गात्। सूर्यमेरुचरम·······समवाये च सूर्यमेरुप्रथमसंयोगाभावेन पूर्वप्रत्ययाप्रसङ्गाच्च। पूर्वादिप्रत्ययक्षणे सूर्यमेरुसंयोगानामननुसंयोगाधानाच्च। मेरोरप्रत्यक्षत्वेन तत्संयोग·······नाच्च। अनुभवाभावेनास्मरणाच्च।

एतेन प्रथमचरमादिसूर्यमेरुसंयोगानामविद्यमानत्वे विशेषणत्वानुपपत्तावप्युपलक्षणत्वं भविष्यतीति निरस्तम्। अप्रतीतं च न विशेष··· तेनोदयनादिसूर्यसंयोगाः पूर्वप्रत्यये विशेषणत्वम्। लङ्कागिरिसूर्यसंयोगाः पश्चिमप्रत्यये विशेषणत्वम्। हिमवत्सूर्यसंयोगा उत्तरप्रत्यये विशेषणत्वमित्युक्तम्। तस्मात् पूर्वादयोऽपि·······गुणा एव दिशो लिङ्गवदिति।

यद् वा परत्वापरत्वे असमवायिकारणसंयोगाश्रयतया दिशमनुमापयतः, पूर्वादिप्रत्ययास्तु विशिष्टप्रत्ययत्वात् विशेषणतया दिशमनुमापयन्ति। तथा हि विमते घटपरत्वापरत्वे·······विभुद्रव्यसंयोगासमवायिकारणजन्ये घटपरत्वापरत्वात् संप्रतिपन्नवदिति।

यद् वा, न चात्राकाशघटसंयोगाभ्यामर्थान्तरता एतद्घटात्मसंयोगेन एतत्परत्वापरत्वजनकः आत्मसंयोगात् एतद्घटाकाशसंयोगो नैतत्परत्वापरत्वजनकः आकाशसंयोगत्वात् घटाकाशसंयोगवत्। तथा एवमते (?) परत्वापरत्वेन एतद्घटाकाशसंयोगजन्ये परत्वापरत्व········ ····वान् कालसंयोगजन्यपरत्वापरत्ववत्। आत्माकाशौ नैतत्परत्वापरत्वजनकघटाकाशसंयोग··········तथा हि विमते परत्वापरत्वे नैतद्घटाकाशसंयोगजन्ये संयोगवत्त्वात्। तौ ज्ञानासमवायिकारणाश्रयत्वात् शब्दासमवायिकारणाश्रयत्वाच्च। मनोवाग्भेरीवच्च आत्माकाशौ नै··········टपरत्वजनकसंयोगवन्तौ एतद्घटव्यतिरिक्तविशेषगुणवत्त्वात् घटवदित्यादिना निषेधात्।

नन्वेतद्घटव्यतिरिक्तगुणवत्त्वादित्येवास्तु। न च दिशि व्यभिचारः। तस्या अव्याप्यसिद्धेः। सिद्धे वा·········वैयर्थ्यादिति। तन्न, काले व्यभिचारपरिहारार्थं विशेषगुणेति विशेषणोपादानात्।

यद् वा, विमते एतद्घटपरत्वापरत्वे विशेषगुणरहितविभुसंयोगासमवायिकारणजन्ये परत्वादपरत्वाच्च काल संयोगजन्यपरत्वापरत्ववत्। न च कालसंयोगेनार्थान्तरता एतद्घटकालसंयोगजन्ये एतद्घटपरत्वात् संप्रतिपन्नवदिति सत्प्रतिपक्षत्वमिति वाच्यम्। भ्रमणकारादीनामाश्रयासिद्धेः। अप्रसिद्धविशेषण-



त्वाच्च।··········परत्वापरत्वकालसंयोगादेरनङ्गीकारात्। नैयायिकवैशेषिकादीनामपसिद्धान्तग्रस्तत्वात्।

अपि चात्मैतद्घटसंयोगः आत्मानाश्रितगुणजनको न भवति एतद्घटव्यतिरिक्तानाश्रितगुणजनको वा···········वति आत्मसंयोगत्वात्, सुखजनकसंयोगवत्, विप्रतिपन्ने परत्वापरत्वे नान्यसंयोगजन्ये एतद्घटव्यतिरिक्ता श्रितत्वात्। मूर्तमात्रगुणत्वाच्च। रूपवत्। एतद्घटाकाशसंयोगजनको नाकाशाश्रितगु············जनकः नैतद्घट···········जनकः। आत्माकाशसंयोगत्वात् शब्दजनकाश्रयसंयोगवत्। विमते परत्वापरत्वे संयोगजन्ये एतद्घटव्यतिरिक्तानाश्रितत्वात् मूर्ताश्रितत्वाच्च।············कालप्रकरणेऽपि वाच्यम्। न चैवं द्रव्यान्तरसिद्धावपि दिगसिद्धिरिति वाच्यम्। विप्रतिपन्नपरत्वापरत्वजनकसंयोगाश्रयस्य विभुनो दिक्शब्दवाच्यत्वात्। एतत्परत्वजनकसंयोगाश्रयत्वे स[ति··········स्य एतदपरत्वजनकसंयोगाश्रयत्वे सति विभुत्वस्यावादिलक्षणत्वादिलक्षणत्वादिति। इदमस्मात्पूर्व[म्] इत्यादिविशिष्टप्रत्यया विशेषणजन्याः विशिष्टप्रत्ययत्वात् दण्डीति प्रत्ययवदिति।

न चात्र सूर्यतेजःसंयोगादयो··········पूर्वोक्तन्यायात्। नापि पूर्वत्वादयो गुणाः तन्निषेधादिति।

यद् वा इयमित इदं पूर्वेणेत्यादिव्यवहारो यतः इदं पूर्वेणेत्यादिज्ञानात् तादृशां लिङ्गं प्रमाण प्रमेति यावत्। इदं त इदं पूर्वेणेत्यादयः प्रमाविशेषा········ व्यवस्थापकाः। न चात्र साधनाबाधः। पूर्वादिप्रमा साधनवतो, प्रमात्वात् घटप्रमावदिति साधनानुमानात्। किं तदिति चेत्—न, विशेषनिर्धारणस्यानुपयोगात्। आर्षं चक्षुर्वेति विशेषाभिधानाच्च। तथा हि इदमस्मात् पूर्वेणेत्यादिज्ञानं चक्षुरादिजन्यम्, अनन्यथासिद्धितदन्वयव्यतिरेकानुविधायित्वात् घटज्ञानवत्।

न च लिङ्गग्राहकतयान्यथासिद्धत्वं चक्षुरादेः पूर्वादिदिग्व्याप्तलिङ्गाभावात् पूर्वादिप्रत्ययात् पूर्वमप्रतीते··· ·········रन्यथापि पूर्वादिप्रत्ययाभावप्रसङ्गात्। न चात्र पूर्वादिप्रत्ययत्वाभाव उपाधिः। योगजधर्मसहितचक्षुरादिजन्यपूर्वादिदिक्साक्षात्कारे साध्याव्यापकत्वात्। न चादिपूर्वादिप्रत्ययानां प्रथमचरमादिमेरुसूर्य··········योगैरन्यथासिद्धत्वम्, पूर्वोक्तन्यायात्। नापि रूपवत्त्वादिगुणैः तेषु मानाभावात्।

न च पूर्वादिप्रत्यय एव मानम्। पूर्वादिगुणजनकसंयोगाश्रयतया अवश्यकल्पनीयपूर्वादिदिग्विषय··········नोत्पन्नानां गुणविशेषासाधकत्वात्। लोके पूर्वादिप्रत्ययव्यवहारयोः दिग्विषयत्वेन निरूढत्वाच्चेति॥

## द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥२.२.१३॥

गतार्थमेतत् ।

प्रतिप्रत्ययं पूर्वादयो भिद्यन्ते न वेति सन्देहं निराचष्टेतत्त्वंभावत् ॥२.२.१४॥

## तत्त्वं भावात् ॥२.२.१४॥

यथा प्रतिप्रत्ययं सत्ता न भिद्यते तथा पूर्वादयोऽपि पूर्वादिप्रत्ययानां भेदासाधकत्वाच्च । भेदसाधकमानान्तराभावाच्च । अन्यथा प्रतिप्रत्ययं सत्ताभेदप्रसङ्गाच्च ।

ननु यथा·········· त्र प्राचीप्रतीच्यादीनामेकत्वं तथा दिशोऽप्येकत्वं स्यात् । दिग्लिङ्गाविशेषात्, विशेषलिङ्गाभावाच्च । तेन प्राच्यादिदिग्भेद इत्यत आह—

## कार्यविशेषेण नानात्वम् ॥२.२.१५॥

कार्यं प्रत्ययो व्यवहारश्च । तयोर्विशेषो वैलक्षण्यं ते[न ना]नात्वं भेदो दिशामिति शेषः । तेन दिग्लिङ्गाविशेषात् विशेषलिङ्गाभावाच्चेति हेतोरसिद्धत्वमुक्तमिति । ननु प्राच्यादिविलक्षणप्रत्ययव्यवहारयोरुपाधिभेदेनोपपत्तेः न निर्ग्रहे (?) भेदसाधक·······अन्यथैकस्य देवदत्तादेः पाकपाठाद्युपाधिभेदेन पाचकपा[ठ]केठक्प्रत्ययव्यवहारवैलक्षण्येन भेदप्रसङ्गात् । न चोपाधिभेदासंभवः, आदित्यसंयोगविशेषादेः संभवात् । तथा हि[यया] **दिशोदयक[ाले] सूर्यः संयुज्यते, सा प्राची पूर्वादि[क]** । **प्रागस्या अञ्चतीति व्याख्यानात्** । **यया मध्याह्न**काले सूर्यं संयुज्यते सा आवाची, अवागस्यामञ्चतीति अवाचीति व्याख्यान[ात्]·······संयोगविशेषादेः संभवात् । तथा हि, यया दिशोदयकाले सूर्यः संयुज्यते सा प्राची । [यया अस्तमये] सा प्रतीची पश्चिमा दिक् प्रत्यगस्यामञ्चतीति प्रतीचीति व्याख्यानात् । [यया रात्रौ सा उदी]चीति व्याख्यानात् । अञ्चतीति गत्या तत्कार्यसंयोगलाभात् । न चोदयकालीनदिक्सूर्यसंयोगाभावात् मध्याह्नादौ प्राचीव्यवहारानुपपत्तिरिति वाच्यम्, अतीतस्याप्युपलक्षणत्वेन प्राचीव्यवहारसंभवात् । अन्यथातीतैः कुरुभिः कुरुक्षेत्रमितीदानीन्तनव्यवहाराभावप्रसङ्गात् ॥१५॥

तदिदमुक्तम् ।

[भूत]पूर्वात् ॥ [२.२.१६]

भूतो वर्तमानः । तस्मात् पूर्वोऽतीतः । तस्मात् प्राचीव्यवहारः इति ॥

न चोदयकालीनसूर्यसंयोगाभावात् सूर्योदयात् पूर्वं··· ·········व्यवहारानुपपत्तेरिति वाच्यम् । अन्वागतादपि सूर्योदयाकालीनदिवसूर्यसंयोगादुपलक्षणात् प्राचीव्यवहारोपपत्तेः ।



तदिदमुक्तम्—भविष्यतः ॥२.२.१६॥

तदेतद्दूषयति —

## आदित्यसंयोगात् भूतपूर्वाद् भविष्यतो भूताच्च ॥२.२.१६॥

चकारो निषेधार्थः । न च प्राचीत्यर्थः । भूतो वर्तमानः तस्मात् पूर्वोऽतीतः । तस्माद् भूतपूर्वात् । भविष्यत इत्यनागतात् । भूताद् वर्तमानात् न प्राचीप्रत्ययव्यवहाराविति शेषः । अस्तु तावदयमस्मात् पूर्वेणेत्यादि प्राच्य[ादि]विशिष्टे घटादिप्रत्ययः । न चायमानुमानिकः लिङ्गाभावात् । नापि स्मृतिरननुभवात् । तस्मादिन्द्रियज एवायम् । न चात्र दिङ्मात्रं विषयः, अयमस्मात् पूर्वेण, अयमस्माद् दक्षिणेन इत्यादेरविशेषप्रसङ्गात् ।

न चा[त्र सूर्य]दिक्संयोगविशेषो विषयः । मेघादिपिहितसूर्यसंयोगाप्रतीतावप्ययमस्मात् पूर्वेणेति चक्षुषा प्रतिभासात् । तदभावेऽपि मध्याह्नादावयमस्मात् पूर्वेणेति प्रतिभासाच्च । न चात्रातीतान[ाग]तोऽपि सूर्यदिक्संयोगविशेषो विषय इति साहसमुचितम् । अस्मदादिचक्षुरादिनामतीतानागताग्राहकत्वात् । न चेदं कुरुक्षेत्रमित्यादिवदतीतानागतस्यापि चाक्षुषप्रत्ययविषयत्वम् । इदं कुरुक्षेत्रमिति कुरुविषयचाक्षुषप्रत्ययाभावात् शब्दप्रत्ययोऽस्तीति चेत् ? ततः किं पूर्वप्रत्ययोऽपि शाब्दो भविष्यतीति चेत्—न, शब्दाश्रयेण ? श्रवणे व्युत्पत्तेः । यथा स्मर्यमाणाः कुरवः क्षेत्रमुपलक्षयन्ति, तथा संयोगविशेषावपि दि·········चेत्—न, संयोगविशेषानुभवाभावेन तत्स्मरणानुपपत्तेः । उपलक्षणत्वं च यदि बुद्धिजनकत्वं तदा दिगेव पूर्वप्रत्यये विषय इति पश्चिमदिक्प्रत्ययैः पूर्वप्रत्ययस्याविशेषप्रसङ्गः । अतीतानागतयोरव्यवहित[पूर्व]·······क्षणवृत्तित्वाभावेन जनकत्वानुपपत्तेश्चेति । अन्यथान्यदुपलक्षणत्वम् । तन्न निर्वर्तुमशक्यत्वात् ॥

## तथा दक्षिणा प्रतीची उदीची च ॥ १.२.१७ ॥

यथोदयकालीनसूर्यसंयोगात् न प्रतीची । तथा मध्याह्नकालीनसूर्यसंयोग·······मप्यस्तमयकालीनसूर्यसंयोगात् प्रतीचीनामपि । रात्रिकालीनसूर्यसंयोगादुदीची । अत्रापि चकारो निषेधार्थकः ॥ १७ ॥

## एतेन दिगन्तराणि व्याख्यातानि ॥ २.२.१८ ॥

पूर्वदक्षिण-दक्षिणपश्चिम-पश्चिमोत्तरोत्तरपूर्वोऽर्ध्वाधोलक्षणानि दिगन्तराणि दिग्विशेषा व्याख्यातानि । तान्यपि न सूर्यसंयोगविशेषादित्यर्थः ।

**आत्रेयादय**स्तु दिगन्तराणि दिशामन्तराणि पूर्वदक्षिण-[दक्षिण]पश्चिम-पश्चिमोत्तरोत्तरपूर्वाणि व्याख्यातानीति सूत्रार्थं वर्णयन्ति । तत्र, ऊर्ध्वा[धयोदि]शोरसंग्रहात् । तयोरध्याहार इति चेत्—न, तल्लाभस्याहारस्यानुपपन्नत्वात् । तस्मात्

परस्परविलक्षणपूर्वादिप्रत्ययबलेन विलक्षणा: पूर्वादिदिशः सिद्धाः। अन्यथादिशा-मित्युपक्रम्य।

**कार्यविशेषेण नानात्वमिति नोपसंहर······॥**

**ननु पूर्वादिदिशः किमवधिनिरूप्या न वा?** नाद्यः, द्रव्यत्वाभावात् अवधिनिरूप्यत्वस्य द्रव्यत्वाभावेन व्याप्तेः। अवधिनिरूप्यत्वे च किमेकैकद्रव्यावधिनिरूप्याः सर्वद्रव्यावधिनिरूप्या वा? नाद्यः, घटेनेव पटादिनापि पूर्वादिदिशां निरू[पणात्], नहि भवति आकाशादिदं पूर्वगत्यादिप्रत्ययः। तथा घटादेरिदं पूर्वेणेत्यादिप्रत्ययः।

न चाकाशादिनापि तन्निरूपणप्रसङ्गः अकाशादेरमूर्त्तत्वात्। न चाव[धिनि]रूप्यत्वेऽप्यद्यत्वाभावप्रसङ्गः। विपर्यया पर्यवसायित्वेनास्य तर्काभासत्वात्। द्रव्यत्वेनावधिनिरूप्यत्वेनाद्रव्यत्वं साध्यत इति चेत्—न, धर्मिग्राहकप्रमाणबाधत् गुणवत्त्वाभावेन सोपाधित्वाच्च। न चास्य साधन[······कत्वम्, परत्वाद्यसमवायिकारणसंयोगाश्रयत्वेन तत्साधकप्रमाणबाधादिति।

ननु पूर्वादिदिशां सर्वगतत्वे घटादिविशेषणत्वेनैव गगनादिविशेषणत्वेनापि प्रत्ययः स्यात्। अविशेषादिति न संबन्धाभावात्, न तावद् गगनादिना दिशां संयोगः।·········विहानेदं संयोगनिषेधात्। नापि समवायः, अनाश्रितत्वात्। नापि संयुक्तसमवायादि, तत एव। न वा संबद्धस्य विशेषणत्वम्। विशिष्टप्रत्ययैर्विशेषणविशेष्यसंबन्धस्य कारणत्वावधारणात्॥

न च संयुक्तसंयोगादिना विशेषणत्वम्, देवदत्तसंयुक्तभूतलसंयुक्तस्यापि दण्डादेर्देवदत्तविशेषणत्वप्रसङ्गात्। तस्मात् मूर्तद्रव्येष्वेव पूर्वादिदि[ग् वि]शिष्टप्रत्ययाः। नामूर्तेषु गगनादिष्विति स्थितिः।

ननु पूर्वादिदिशां सर्वगतत्वे यत्र मच्छरीरापेक्षया पूर्वं[र्व]प्रत्ययः तत्र दक्षिणादिप्रत्ययः स्यात्। सर्वासां तत्र विद्यमानत्वादिति। सत्यं भवत्येव। देशान्तरावस्थितपुरुषान्तराणां तत्र दक्षिणादिप्रत्यया यस्य तत्र पूर्वप्रत्ययः, तस्यैव तत्र दक्षिणादिप्रत्ययः स्यादिति चेत्? सत्यं भवत्येव तस्यैव देशान्तरं गतस्य तत्र दक्षिणादिप्रत्ययः। यत्रावस्थितस्य तत्र पूर्वप्रत्ययः, तत्रैवावस्थितस्य तत्र दक्षिणा[दि प्र]त्ययः किं न स्यादिति चेत्? कारणाभावादिति ब्रूमः। चक्षुरादीनां सत्त्वात् कस्य कारणस्याभाव इति चेत्? दक्षिणादिसाक्षात्कारजनकदक्षिणादीन्द्रियसन्निकर्षेऽपि विशेषणस्येति ब्रूमः। विशेषनिर्धारणस्यानुपयोगाच्च कार्याभावेन कारणाभावस्य सिद्धत्वात् दिशां सर्वगतत्वस्य वर्धितत्वाच्च। तस्मात् दशदिशः प्रत्यक्षाः सर्वगता नित्याश्चेति प्रसिद्धाः॥



यद्यनेका दिक् पश्चिमा दिगिति अनुगतव्यवहारः [कुत] इति चेत्? कालत्ववत् दिक्त्वजातेरिति ब्रूमः।

यथा युगपदादि[प्रत्यय]भेदसिद्ध··········वत् कालोऽयमयुगपत्काल इति प्रत्ययव्यवहाराभ्यां कालत्वसिद्धिः, तथा पूर्वादिदिग्भेदसिद्धावियं पूर्वा दिगियं पश्चिमा दिगित्यनुगतप्रत्ययव्यवहाराभ्यां दिक्त्वसिद्धिरिति सर्वमवदातम्।

न······ साक्षात्कार[ा] इन्द्रियजा[ः] साक्षात्कारत्वात् रूपसाक्षात्कारवदिति। न चेश्वरनित्यसाक्षात्कारे व्यभिचारः, तन्नित्यत्वानभ्युगमात्। अभ्युपगमे वा कार्यत्वेन हेतुविशेषणात्। न चात्र साक्षात्का·········साक्षात्कारविषयो मेयत्वात् सुख[व]दित्यादेः सत्त्वात्। व्यावर्त्यविपक्षाभावे उपाधिः। न, पक्षेतरत्वाच्च। नित्य ईश्वरसाक्षात्कार[?]व्यावर्त्य इति चेत्—न, तदनभ्युपगमात्। तदभ्युपगमेऽपि शब्दविशेषणस्य व्यावर्त्यविवक्षा·········नास्य पक्षेतरत्वात्। नित्यसाक्षात्कारस्य साक्षात्कारत्वाभावेनैव व्यावृत्तत्वात्। न च शब्दसाक्षात्कारत्वाभावेन सत्प्रतिपक्षत्वम्, मनोजन्यसाक्षात्कारे व्यभिचारात्।

न च तद्व्यतिरिक्तत्वेन हेतुर्विशेषणीयः, दृष्ट[न्ताभा]······ वात्। ईश्वरशब्दसाक्षात्कारो दृष्टान्त इति चेत्—न, तस्यापीन्द्रियजन्यत्वात्। न चात्र चक्षुरादिनार्थान्तरता। मनो न श्रोत्रम् अणुत्वात् मूर्तत्वाच्चेति निषेधात्। तस्य योगजधर्मनिरपेक्षस्य बाह्यार्थसाक्षात्काराजनक······श्चक्षुरादिव्यतिरिक्तश्रोत्रसिद्धिः।

न च तदाकाशम्, इन्द्रियत्वात् चक्षुर्वत्। आकाशं वा न श्रोत्रम् विशेषगुणवत्त्वात् घटवत्। न च गुणवत्त्वस्य व्यभिचाराभावात् विशेषणवैयर्थ्यम्। श्रोत्र एव गुणवत्त्व······व्य]भिचारात्। न च विशेषगुणवत्त्वस्यापि श्रोत्रे व्यभिचारः, अविशेषगुणसिद्धेः। न च श्रोत्रं विशेषगुणवत् बाह्येन्द्रियत्वात् चक्षुर्वत् इति वाच्यम्। नित्येन्द्रियत्वाभावेन सोपाधित्वात् नित्येन्द्रिय·······सत्प्रतिपक्षत्वाच्च।

श्रोत्रं न वा शब्दवत्, इन्द्रियत्वात् चक्षुर्वत्। चक्षुर्वा शब्दो वा न श्रोत्रवृत्तिः, विशेषगुणवत्त्वात् रूपवत् श्रोत्रं न स्वगुणग्राहकम्, इन्द्रियत्वात् चक्षुर्वत्। क्व स्वग्रहणयोग्यगु·········त्वाभाव उपाधिः, साधनव्यापकत्वात्। शब्दो वा न श्रोत्रगुणः, तद्ग्राह्यत्वात् शब्दवत्। श्रोत्रं शब्दवत् श्रोत्रत्वात्, न यदेवं न तदेवम्, यथा······· ·······इति सत्प्रतिपक्षत्वमिति चेत्—न, धर्मिग्राहकप्रमाणबाधात्,·········दिङ् न श्रोत्रम्। दिक्संयोगाश्रयत्वात् घटवदिति वाच्यम्। दिगसिद्धावाश्रयासिद्धेः। श्रोत्रत्वेनैव तत्सिद्धौ धर्मिग्राहकप्रमाणबाधात्। पूर्वा प्रत्य सिद्धा दिशो धर्मित्वे सिद्धसाधनात्, तासां श्रोत्रत्वा·········ङ्गीकारात्। दिगेकत्वस्य प्रागेव प्रतिषेधात्।

न च पृथिव्यादिव्यतिरिक्तश्रोत्रसिद्धावपि न दिक्सिद्धिरिति वाच्यम्। पृथिव्यादिव्यतिरिक्तद्रव्यत्वस्य दिग्लक्षणत्वात्। तथा दिक् श्रोत्रमित्यत्र किं

**प्रमाण**मिति चेत्—न, श्रोत्रस्य दिक्सा·········मनुमानमेव। श्रोत्रं दिक् पृथिव्यति-रिक्तद्रव्यत्वात्, प्राचीवत् आगमश्च।

दिशः श्रोत्रं भूत्वा कर्णौ प्रविशन्ति

इति **ऋग्वेदश्रुतेः**।

सूर्यं चक्षुर्गमयित्वा आप्राणमन्वसृजना दिशः श्रोत्रमिति

**यजुर्वेदश्रुतेश्च**॥

ननु दिशः श्रोत्र·········शब्दोपलम्भो न स्यात् संबन्धाभावात्। शब्दस्या-काशसमवेतत्वेन दिशा समवायाभावात्। **वैशेषिकादिमते** गुणत्वेन **भट्टमते** च विभुत्वेन संयोगानुपपत्तौ संयुक्तसमवायादेरसंभवात्। आकाशश्रो·········क्षेत्रसमवायेन शब्दोपलम्भे उपपत्तिरिति तन्न, दिक्शब्दयोः समवायसंभवात्, समवायस्यैकत्वात्। न चैवं चक्षुरादेः देशान्तरस्थितघटादिज्ञानासमवायसंभवात्, चक्षुरादिना तदुपलम्भापत्ति[रिति] वाच्यम्। चक्षुरादिना घटाद्युपलं [भ]कारणत्वात् व्यवहितेन च तदसंभवात्।

न च दिशः श्रोत्रत्वे सर्वशब्दोपलम्भापत्तिः, समवायसंभवादिति।·········
·········वतामेवोपलम्भात्। अन्यथा गगनश्रोत्रत्वेऽपि सर्वशब्दोपलम्भापत्तेर्दुर्वारत्वात्। न चैवं पुरुषान्तरैरपि शब्दान्तरानुपलम्भप्रसङ्गः। तत्र [तत्स्वभावा ?] भापन्न-दिशस्तदुपलम्भकारणत्वात्। न चैवं प्रतिपुरुषं श्रोत्र·········चेत्—न, दिशो भेदेन दिगानन्त्योपपत्तिरिति वाच्यम्। इष्टत्वात्। अत एव

दिशः श्रोत्रं भूत्वा कर्णौ प्रविशन्ति

इति वेदे बहुत्वापादनात्।

न च दिशः श्रोत्रत्वेन गगनस्य चाश्रोत्रत्वेऽपसिद्धान्तः। सूत्रकारेण दिशः श्रोत्रत्वाप्रतिषेधात् गगन[स्य च] श्रोत्रत्वाप्रतिपादनात्।

**आत्रेयादीनां** चास्माभिरनङ्गीकारात्। दिशः श्रोत्रत्वं सूत्रकारेण न प्रति-पादितमिति चेत्—न, सूत्रकारगुरुणा भगवता महादेवेनादिसूत्रकारेण चेदं प्रया (Sie) दिशः श्रोत्र[त्व]प्रतिपादनात्। तस्मा[त्·········वश्रोत्रमनन्ता चेति परमरहस्यम्॥

यद् वा एक एव कालः कालप्रकरणे

कार्यविशेषेणनानात्वम् इति सूत्रमौपाधिककालभेदाभिप्रायेण, तथा दिगप्येकैव दिक्प्रकरणे।

इत इदमिति यतस्तद्दिशां लिङ्गम्। [ २. २. १२ ]

कार्यविशेषेण नानात्वमिति॥ [ २. २. १५ ]

सूत्रद्वयमौपाधिकदिग्भेदाभिप्रायेणेति प्रकरणद्वयतात्पर्यम्॥



तदेवं दिक्कालौ समर्थनीयौ। घटपटसंयोगौ विशेषगुणरहितद्रव्याभ्यां जन्येते, संयोगत्वात् कार्यत्वात् चम·········यसंयोगवत्। न चात्र मनोनिष्ठत्वमुपाधिः। मनोद्वयविशिष्टसंयोगादिप्रत्यये साध्याव्यापकत्वात्। तन्निष्ठमात्रेण साध्याव्याप-कत्वसिद्धौ मनोविशेषणस्य साधनव्याप्तिपरिहारमात्रफलकत्वेनास्य पक्षेतरत्वाच्च। नापि द्वयगुणत्वमुपाधिः, मनोद्वयजन्यमनोद्वयविशिष्टप्रत्यये साध्याव्यापकत्वात्। नापि मनोजन्यत्वमुपाधिः। जन्यत्वेन जन्यव्यावृत्तौ मनोविशेषणस्य व्यापा·········क्षा-भावेनास्य पक्षेतरत्वात्।

नापि मनोजन्यत्वाभावादिना सत्प्रतिपक्षत्वम्, जन्यत्वेन सोपाधित्वात्। नापि मनोद्वयेनार्थान्तरता। मनो नैतद्घटपटजनकसंयोगं(?) अणुत्वात् भवि·········णुक-वदिति प्रतिषेधात्। संप्रतिपन्नत्वाच्च। मनस्त्वं विशेषगुणरहितद्रव्यद्वयव्यावृत्त-द्रव्यत्वावान्तरजातित्वात् पृथिवीत्ववत्। न चात्र मनोव्यावृत्तत्वमुपाधिः, व्यावृत्त-त्वमात्रेण साध्याव्यापकत्वसिद्धौ मनोविशेषण·········व्याप्तिपरिहारमात्रफलत्वेन पक्षेतरत्वात्।

किं च महत्त्वजातिविशेषगुणत्वरहितानेकाधिकरणवृत्तिर्महत्त्वजातित्वात् सत्तावत्। न चात्र गुणवृत्तित्वमुपाधिः। विशेषगुणवत्त्वरहितानेकरूपादिनिष्ठरूपत्वादि·········दौ साध्याव्यापकत्वात्।

किं च आकाशमाकाशमूर्तवृत्तित्वरहिताकाशात्मवृत्तित्वरहितद्रव्यमात्रवृत्तित्वा-धिकरणं द्रव्यत्वात्। घटवत्। न चात्र द्रव्यत्वावान्तरजातिमत्त्वमुपाधिः। जाति-मत्त्वमात्रेण साध्याव्यापक·········विशेषणस्य साधनव्याप्तिपरिहारमात्रफलत्वेन पक्षेतरत्वात्।

किं च महत्त्वजातिविशेषगुणपरत्वरहितानेकाधिकरणवृत्तिमहत्त्वजातित्वात् सत्तावत्। न चात्र गुणवृत्तित्वमुपाधिः, विशेषगुणवत्त्वरहितानेकरूपादिनिष्ठरूप-त्वादि·········दौ साध्याव्यापकत्वात्। किं च आकाशमाकाशमूर्तवृत्तित्वरहिताकाशा-त्मवृत्तित्वरहितद्रव्यमात्रवृत्तित्वाधिकरणं द्रव्यत्वात् घटवत्। न चात्र द्रव्यत्वावान्त-रजातिमत्त्वमुपाधिः जातिमत्त्वमात्रेण साध्याव्यापक·········विशेषणस्य साधनव्याप्ति-परिहारमात्रफलत्वेन पक्षेतरत्वात्।

किं च, अयं घटः एतज्जन्यविशेषगुणवत्त्वरहितबहुतरतपनपरिस्पन्दान्तरित-त्वसूचकपरत्वजनकसंयोग·········परत्वजनकसंयोगाधारमहदन्यो मेयत्वात् घटवदिति दिशः प्रमाणम्।

यद् वा, अयं घटः एतदन्यविशेषणगुणवत्त्वरहितमहदन्यो मेयत्वात्·········
परिस्पन्दान्तरितत्वसूचकपरत्वजनकसंयोगाधिकरणं महतो भिद्यते मेयत्वात्

घटवदिति द्वितीयविशेषगुणरहिमहत्प्रसाधनीयम्, तयोश्चैकः कालो द्वितीयो दिगिति व्यवस्था। तयोः कः काल इति चेत्? ······ द्वितीय[ा]दिगिति ब्रूमः। अस्माभिस्तथैव संज्ञाविशेषवशात् विपरीतं किं तु स्यादिति चेत्? किमतद्रव्यसिद्धेर्दुर्वारत्वात्। नाम्नि विप्रतिपत्तेर्विफलत्वादिति।

अथ प्रथमं पक्षीकृत्य द्वितीयव्यतिरिक्तविशेषगुणरहितमहदन्यत्वसा········तृतीयविशेषगुणरहितमहद्द्रव्यसिद्धिः स्यादिति चेत्—न, भूषणकारादीनामेवंविधप्रथमद्रव्यानङ्गीकारात्। नाश्रयासिद्धेर्दुर्निवारत्वादेवंविधद्रव्यानङ्गीकारेण तद्व्यतिरिक्तविशेषणस्याप्रसिद्धत्वाच्च। वैशेषिका[नां··········सिद्धान्तविरोधात्।

एतेन मनस्त्वं विशेषगुणरहितद्रव्यत्रयव्यावृत्तं द्रव्यत्वावान्तरजातित्वादित्यादिना विशेषगुणरहिततृतीयद्रव्यसिद्धिर्निरस्ता।

॥ इति दिक् ॥

अथात्मा। तन्निर्णयार्थं संदेहं निर्धारयितुं षोढा [विभक्तसंदे]हप्रकरणमारभते। संदेहः साधारणधर्मदर्शनात् साधारणधर्मिदर्शनात् विप्रतिपत्तेरुपलब्धेरसाधारणधर्मदर्शनाच्चेति। तत्र प्रथमं तावदाह—

**सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः ॥ २.२.१९ ॥**

सामान्यप्र[त्यक्षात् स्थाणुपुरुषसाधारणेर्ध्वत्वादिधर्मदर्शनात्। विशेषाप्रत्यक्षत्वादिति स्थाणुपुरुषव्यावर्तकशिरःपाण्यादिवक्रकोटराद्यनुपलम्भात्। विशेषस्मृतेरिति स्थाणुपुरुषस्मरणात् संशय इति। जायत इति शेषः। चकारोऽनुक्तसमुच्चयार्थः, साधारणधर्मानुमिति विशेषानुमित्यादीन् समुच्चिनोति। विशेषौ च विशेषाश्च विशेषाः। तेषां स्मृतेः संदेहो जायते। [वि]शेषयोः स्मृतेः संदेहो यथा, स्थाणुर्वा पुरुषो वेति। विशेषाणां स्मृतेः सन्देहो यथा शब्दो द्रव्यं गुणः कर्म वेति। संदेहे च यदा स्थाणुपुरुषौ विषयः यदा विशेषशब्देन स्थाणुपुरुषौ विव[क्षितौ]·······यदा संदेहे स्थाणुत्वपुरुषत्वे विषयः, तदा विशेषशब्दौ स्थाणुत्व पुरुषत्वे विवक्षिते इति विवेकः। संदेहे च धर्मिदर्शनमपि कारणम्। स्थाणुर्वा पुरुषो वेत्यादेः विशिष्टज्ञानस्य विशेष्यज्ञानजन्यत्वात्। तच्चा··········नोक्तमिति नाशङ्कनीयम्। अनुक्तसमुच्चयार्थेन चकारेण समुच्चितत्वादिति ॥ १९ ॥

प्रत्यक्षाप्रत्यक्षविषयत्वेन साधारणधर्मदर्शनस्य संदेहस्य द्वैविध्यमाह—

**दृष्टमदृष्टं च ॥ २.२.२० ॥**

दृष्टं प्रत्यक्षावगतम्, अदृष्टमनुमानाद्यवगतम्, संशयं प्रत्य[क्षानुमानजातं वेति ज्ञेयमि]ति शेषः। तदनेन प्रत्यक्षाप्रत्यक्षविषय[त्वेन साधारणधर्मसन्देहस्य]द्वैविध्यं प्रत्यक्षानुमानजनितं च धर्मिज्ञानं सन्देहकारणमि[ति] दर्शितम्।



**दृष्टं दृष्टवत् ॥ २.२.२१ ॥**

**अदृष्टमदृष्टवत् ॥ २.२.२२ ॥**

प्रत्यक्षावगतं दृष्टवदिति दृष्टाभ्यां दृष्टैर्वा तुल्यतया दृष्ट[वत्]अदृष्टाभ्यां दृष्टाद्व[ष्टाभ्या च तुल्यत]या दृष्टं सन्देहं प्रसूत इत्यवगन्तव्यम्[1]। अत्रान्यत्र च धर्मिज्ञानव्यावर्तकधर्मादर्शनं विशेषस्मरणात् सन्देहकारणं साधारणधर्म·········णद्वारेणैव कारणत्वं द्रष्टव्यम्।

साधारणधर्मि[र्मि]दर्शनात् संदेहमाह—

**यथादृष्टमयथादृष्टम् ॥ २.२.२३ ॥**

येन जटिलत्वादिना विशिष्टं दृष्टम्, मुण्डत्वादिना विशिष्टं दृष्टम्, संदेहं प्रसूते इति शेषः। तथाहि कदाचिद् देवदत्तं जटिल[मुपलभ्य कदाचिच्च तं मुण्डमुपलभ्येदानीं प्रावृतशिरसं देवदत्तमुपलभमानस्य अयं जटिलो मुण्डो वेत्ति सन्देहो जायते। तत्र जटिलत्वमुण्डत्वसाधारणदेवदत्तधर्मिदर्शनादेव सन्देहः, कारणान्तरस्याभावात्। अत्रैव धर्मिदर्शनं सन्देह·············कारणं साधारणत्वदर्शनं च विशेषस्मरण एव कारणमिति विवेकः।

विप्रतिपत्तेः सन्देहं दर्शयति—

**उभयथा दृष्टत्वाच्च ॥ २.२.२४ ॥**

संशय इति शेषः। यदनुमानद्वयेन वचनद्वयेन वा परस्परविरुद्धधर्मवत्तयोपलभ्यते,·············तत्र सन्देहो जायते। यथा शब्दो नित्यः श्रावणत्वात्। शब्दोऽनित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्राह्यत्वात् घटवदिति। तथा च केचित् आहुः शब्दो नित्य इति। अन्ये पुनराहुः [शब्दोऽनि] त्य इति। अत्र च यदि विरुद्धाभ्यां हेतुभ्यां विरुद्धे प्रतिपत्ती जन्येते, तर्हि ताभ्यां सन्देहो जायते। अथ विरुद्धाभ्यां हेतुभ्यां परस्परप्रतिबन्धात् विरुद्धे प्रतिपत्ती जन्येते, तदा परस्परविरुद्धप्रतिपत्ती एव। [विरुद्धे] प्रतिपत्ती संदेहं जनयत इति प्रतिपत्तेरयं सन्देह इति। एवं परस्परविरुद्धात् न द्वयेऽपि गणनीयम् ॥ २४ ॥

उपलब्धिरनुपलब्धिश्च सन्देहं जनयतः,

**विद्योपलब्धिरविद्यानुपलब्धिः ॥ २.२.२५ ॥**

ताभ्यां संशयो जायते।·······तत्रोपलब्धेर्यथा दूराद् देशविशेषे जलमुपलभ्य प्रवृत्तस्य जललाभात् अयं प्रदेशो जलवानिति निर्णयः। इदानीं देशविशेषे जलोपलब्धेः [परत्र] सन्देहो जायते, किमयं जलवान् न वेति। न चेयमुपलब्धिः जलवान्

१. अत्र पाठो भ्रष्टः। न च व्याख्यया आक्षरिकः संवादः सूत्रयोस्तद्व्याख्याने च।

जलवत्साधारणत्वात् उपलब्धेः सत्तयैव कारणत्वोपपत्तौ उपलब्धेरुपलभ्यमानस्य साधारणधर्म एवेति वा……… उपलब्धेरात्मनिष्ठत्वेन जलवदजलवद्देशसाधारण-धर्मत्वानुपपत्तेः जलवत्तयोपलभमानत्वजलवदजलवत्साधारणो धर्म इति चेत् सत्यम्। किन्तु नासौ सन्देहहेतुः। उपलब्धेरेव सन्देहोपपत्तेः। तद्विषयस्याकारण……… उपलब्धे सत्तयैव कारणत्वोपपत्तौ उपलब्धेरुपलभ्यमानत्वस्य चोपलम्भानपेक्षणात् साधारणधर्मस्य चोपलभ्यमानस्यैव सन्देहहेतुत्वादिति।

अनुपलब्धेर्यथा दूरादनुपलब्धोदकोऽपि क्वचिद्विद्यमानइति दृष्टम्। इदानीं दूरात्तटाकाद्यवुदकानुपलब्धेः सन्देहो जायते किमयमुदकवान् न वेति। न चानुपलब्धि-रु[पलब्धिश्]च देशसाधारणो धर्म इति वाच्यम्। अनुपलब्धेरात्मधर्मत्वेन देशधर्मत्वा-संभवात्। अनुपलभ्यमान………नुदकवत् साधारणो धर्म इति चेत्? अनुपलब्धेरेव सन्देहोपपत्तौ तद्विषयस्य कारणत्वात्। अनुपलब्धेः सत्तयैव कारणत्वोपपत्तौ अनुपलब्धेरनुपलभ्यमानस्य च ज्ञानान……ज्ञातस्यैव सन्देहजनकत्वादिति। २५॥

असाधारणधर्मात् सन्देहं दर्शयन् असाधारणधर्मलक्षणं दर्शयति—

**श्रोत्रग्रहणो योऽर्थः स शब्दः ॥२.२.२६॥**

इति। श्रोत्रं ग्रहणं ग्राहकं यस्यासौ श्रोत्रग्रहण।…… अर्थत्वं च सत्तैव सामान्यवत्त्वं वा। तेन सत्त्वे सति श्रोत्रग्राह्यत्वं सामान्यवत्त्वे सति श्रोत्रग्राह्यत्वं शब्दलक्षणमसाधारणो धर्मः शब्दे सन्देहं जनयति, किमयं द्रव्यं गुणः कर्म वेति। एवं नयति। न च……मध्यमशब्दादव्याप्तिः, तेषामपीश्वरयोगिश्रोत्रग्राह्यत्वात्। आद्यादिशब्दाः कस्यचित् श्रोत्रग्राह्याः शब्दत्वात् संप्रतिपन्नवत् इत्यनुमानात्। न च रसादिलक्षणानां परमाणुरसादावव्याप्तिः, तेषामपीश्वरयोगिरसादि………त्वात्। परमाणुरसादयः कस्यचित् रसनादिग्राह्याः रसादित्वात् संप्रतिपन्नवदित्यनु-मानात्॥ २६॥

ननु युक्तं साधारणधर्मस्य सन्देहजनकत्वम्, उभयविशेषसहचरिततयोप-लब्धस्योभयविशेषस्मृतिजनकत्वसंभवात् युक्त…………परस्परविरुद्धधर्मद्वयस्य सन्देहजनकत्वम्, किंचिद्द्रव्यत्वाद्यसारणधर्मवत् द्रव्यदृष्टौ किञ्चिद्गुणत्वाद्यसाधारण-धर्मवद्गुणाकृष्टौ किञ्चित्कर्मत्वाद्यसाधारणधर्मवत्कर्म दृष्टं त्रयम्। शब्दोऽपि श्रोत्रग्राह्यत्वे सत्यर्थ……शब्दत्वाद्यसाधारणधर्मवान् द्रव्यं गुणः कर्म वेति सन्देह इति वाच्यम्।[1] असाधारणधर्मत्वस्य द्रव्यगुणादिसाधारणत्वेन साधारणधर्मत्वादेव सन्देहजनककत्वादित्यत आह—

१. अत्र 'तस्मिन् द्रव्यं गुणः कर्म इति संशयः' इति चन्द्रानन्दधृतं सूत्रान्तरम्।



**तुल्यजातीयेष्वर्थान्तरभूतेषु [विशे]षस्योभयथा दृष्टत्वात् ॥२.२.२७॥**

इति। तुल्यजातीयेषु गुणेषु द्रव्यकर्मसु विशेषस्य श्रोत्रग्राह्यत्वे सत्यर्थवादेरु-भयथा प्रत्यक्षानुमानाभ्यां दृष्टत्वादिति प्रत्यक्षानुमानाभ्यां दृष्टत्वेन श्रोत्रग्राह्यत्वे सत्यर्थ…………स्य गुणादावभावं निर्धारयति। तथा न यो गुणः, नासौ श्रोत्रग्राह्यत्वे सत्यर्थः यथा द्रव्यकर्मणी। तथा च न द्रव्यम्, नासौ श्रोत्रग्राह्यत्वे सत्यर्थः, यथा गुणकर्मणी तथायं न कर्म, नासौ श्रोत्रग्राह्यत्वे सत्यर्थः, यथा द्रव्यगुणाविति व्यतिरेकव्याप्तित्रयं सिध्यति। तथा च व्यतिरेकव्याप्तित्रयबलादन्वयव्याप्तित्रयं सिध्यति। श्रोत्रग्राह्यत्वे? सत्यर्थः सगुणः यः श्रोत्रग्राह्यत्वे सत्यर्थः स द्रव्यः वा श्रोत्रग्राह्यत्वे सत्यर्थः स कर्म[ति………ति व्यतिरेकव्याप्तेरन्वयव्याप्तिनियतत्वस्य व्यतिरेकिसमर्थनावसरे दर्शितत्वात्, अन्यथा केवलव्यतिरेकिभङ्गात्। तथा च यथा साधारणो धर्मः परस्परविरुद्धौ धर्मौ परस्परविरुद्धविशेषव्याप्ततया परस्परविरुद्धौ विशेषौ स्मारयन्तौ सन्देहं जनयतः, तथा साधारणधर्मोऽपि परस्परविरुद्धविशेष-व्याप्ततया परस्परविरुद्ध[ा]न् द्रव्यत्वगुणत्वादिविशेषान् स्मारयन् सन्देहं जनयति।

कथमसाधारणधर्मस्य द्रव्यगुणत्वादिव्याप्ततेति चेत्—शृणु यद् द्रव्यं न तत्[च्छो?] श्रोत्रग्राह्योऽर्थ इति व्यतिरेकव्याप्तौ सिद्धायां यः श्रोत्रग्राह्योऽर्थः स द्रव्यमित्यन्वय………व्यतिरेकव्याप्तेरन्वयव्याप्तिलिङ्गत्वस्य……चेत्—न, गुणः, न तत् श्रोत्रग्राह्यत्वे सत्यर्थः। व्यतिरेकव्याप्तौ सिद्धायां यः श्रोत्रग्राह्यत्वे सत्यर्थः… ……न्वयव्याप्तिलिङ्गत्वात्। तथा च न कर्म न तच्छ्रोत्रग्राह्यत्वे सत्यर्थः।…… व्यतिरेकव्याप्तौ सिद्धायां………वर्तमानस्य श्रोत्रग्राह्यत्वे सत्यर्थत्वस्य परस्परविरुद्धे द्रव्यत्वादिभिर्व्याप्तिरिति चेत्? यथा शब्देन वर्तमानयोः सामान्यश्रावणत्वे वस्त्व-सत्य……थ तथापि न व्याप्तिः किं तु विशेषग्रहणात् व्याप्तिपरिहार इति चेत्? प्रकृतेऽपि।

अथ व्याप्तत्वासंभवेऽपि सहभावदर्शनमात्रेण द्वयोर्नित्यत्वानित्यत्व-स्मारकत्वमिति ब्रूषे, तुल्यं प्रकृतेऽपि। अथ……नित्यत्वानित्यत्वसन्देहः स्यादिति चेत्—न, अनित्यत्वव्याप्तत्वस्यानित्यव्यावर्तकधर्मत्वेन व्यावर्तकधर्माग्रहणासंभवात्। अनित्यत्वव्याप्तादनित्यत्वनिश्चये सन्देहानवकाशात्। अन्यतरानिश्चस्यापि संशय-कारण…………था वह्निरनुष्णः कृतकत्वादित्यादेरनुष्णत्वग्राहकप्रत्यक्षबाधेऽपि वह्निरुष्णोऽनुष्णो वेति सन्देहापत्तेः।

अथ व्याप्तेरनङ्गत्वे व्यभिचारिभ्यामपि शब्दनित्यत्वानित्यत्वसन्देहः स्यादिति चेत्? सत्यम्, भवत्येव व्यावर्तकधर्माग्रहणे व्यावर्तकधर्मग्रहणात् तु न भवत्येव। व्यावर्तधर्माग्रहणस्य कारणस्याभावात्। तस्मादसाधारणोऽपि धर्मः सन्देहकारणमिति स्थितम्।

ननु उपलब्ध्यनुपलब्ध्योः कथं सन्देहजनकत्वम्। तयोरात्मनिष्ठ...... ...... रात्मनिष्ठयोः उदकसदसद्भावसहचरितत्वानुपलब्ध्यावुदकसदसद्भावस्मारकत्वानुपपत्तिरिति चेत्—न, उपलब्ध्यनुपलब्धिसूत्रेऽप्यसंस्कारेणै विशेषस्मरणोपपत्तेः। तथा चान्वयव्यतिरेकाभ्यां...... कार्यकारणभावावधारणादिति सर्वं समञ्जसम्॥

**एकद्रव्यत्वान्न द्रव्यम्॥ २.२.२८॥**

एकद्रव्येति सामान्यवत्त्वसूचनार्थं सूत्रम्। व्यर्थानि पदानि कस्यचित् सूचकानि भवन्तीति न्यायात्। तथा च शब्दो न द्रव्यम् सामान्यवत्त्वे [सति एकाश्रि]तत्त्वात् रूपवत्। आश्रितत्त्वादित्युक्ते घटादौ व्यभिचारः। तन्निवृत्त्यर्थमेकग्रहणम्। एकाश्रितत्वादित्युक्ते गगनाद्येकैकनिष्ठशब्दप्रागभावप्रध्वंसादिव्यभिचारः। तन्निवृत्त्यर्थं सामान्यवत्त्वे सतीति॥ २८॥

**अचाक्षुषत्वाच्च प्रत्यक्षस्य शब्दो न कर्म॥२.२.२९॥**

प्रत्यक्षत्वे सत्यचाक्षुषत्वात् रसवत्। शब्दो गुणः सत्त्वे सति द्रव्यकर्मान्यत्वात्, रूपवदिति। यद् वा, प्रत्यक्षत्वे सति बाह्येन्द्रियप्रत्यक्षत्वं विवक्षितम्। चकारोऽनुक्तसामान्यवत्त्वसमुच्चयार्थः। तथा शब्दोगुणः सामान्य[वत्त्वे] सति अचाक्षुषत्वे सति बाह्येन्द्रियग्राह्यत्वात् रसवत्। शब्दो गुणः आत्मव्यतिरिक्तत्वे सति, अनिन्द्रियग्राह्येन्द्रियाग्राह्यजातिमत्त्वात् सुखवत्। तथा शब्दो न द्रव्यम्, श्रोत्रग्राह्यत्वात् शब्दत्ववदिति वाच्यम्। श्रोत्रं गुणग्राहकम्, इन्द्रियत्वात्......... सिद्धे श्रोत्रग्राह्ये गुणव्यभिचारात्। भट्टमते शब्दसंख्यायां व्यभिचाराच्च।

न चात्र ग्राह्यत्वाभाव उपाधिः। प्रतिपत्तिव्यभिचारस्थले साध्याव्यापकत्वात्। शब्दो न द्रव्यम्, साक्षादिन्द्रियप्रत्यक्षवेद्यत्वात्। इन्द्रियसंबन्ध ......... समवायत्वमनङ्गीकुर्वता संयोगसमवायान्यतरत्वस्याप्यनङ्गीकारात्।.......... समवायत्वमनङ्गीकुर्वता संयोगसमवायासाधारणस्य साक्षात्संबन्धस्यानङ्गीकारात् .. ...... क्षसंयोगो गुणः, त्वत्पक्षे समवायः साक्षात्संबन्धो घटत इति नासिद्धो हेतुरिति व्युत्पादयता भाट्टेन साक्षात्संबन्धवेद्यत्वं गुणवत्पक्षे व्युत्पाद्यत इति वदता त्वयैव साक्षात्संबन्धवेद्य.........त्वात्।

यदाहुः, योग्यताक्षणो वान्यसंबन्धः कार्यलक्षित इति संबन्धत्वस्य व्यभिचाराभावेन साक्षादिन्द्रियवेद्यत्वविशेषणानां वैयर्थ्यप्रसङ्गाच्च। श्रोत्रग्राह्यत्वाभावेन सोपाधित्वाच्च। शब्दो द्रव्यं मूर्तप्रत्यक्षज्ञानाश्रितत्वे सति प्रत्यक्षत्वात् आत्मवत् इति चेत् —न, श्रोत्रग्राह्यत्वाभावेन सोपाधित्वाच्च। श्रोत्रग्राह्यत्वेन सत्प्रतिपक्ष...... प्रत्यक्षानाश्रितत्वस्यास्मान् प्रत्यसिद्धेश्च। आकाशस्य योगिप्रत्यक्षत्वात्, अस्मदादिविशेषणोपादाने च भाट्टस्य वैयर्थ्यात् शब्दद्रव्यत्वे प्रत्यक्षत्वानुपपत्तेश्च श्रोत्र-



संबन्धाभावात्.......... नोः संयोगनिषेधात् श्रोत्रदिक्कालव्यतिरिक्तद्रव्यग्राहकं घ्राणव्यतिरिक्तेन्द्रियत्वात् नित्येन्द्रियत्वात् मनोवदिति चेत्—न, द्रव्यग्राहकत्वं किं द्रव्यसाक्षात्साधनम्, द्रव्यसाक्षात्कारजनकत्वं वा? नाद्यः, संस्कारवत्त्ववेगवत्त्वाभ्यां सोपाधित्वात्, तद्विरहेण सत्प्रतिपक्षत्वाच्च। न द्वितीयः, सिद्धसाधनात्। घटादिद्रव्यसाक्षात्कारे दिशो जनकत्वात् सर्वोत्पत्तिमतां दिग्जन्यत्वात्......... स्या एवास्मन्मते श्रोत्रत्वात्॥२९॥

अस्तु नाम शब्दो गुणः, तथापि सामान्यवत्त्वात् किमयं कर्मवदनित्यः, किं वा गगनवन्नित्य इति सन्देहं निराकरोति—

**गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम्॥२.२.३०॥**

इति वर्णयन्ति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नपरत्वापरत्वदिक्त्वादिषु व्यभिचारात्। तस्माद् धर्मि[र्मी] शब्दोऽनित्य इति सूत्रार्थः॥

अन्ये तु यदि गुणसाधर्म्यात् [शब्दो गुणस्तर्हि] कर्मसाधर्म्यादाशुतरविनाशित्वात् कर्म स्यादित्याशङ्कायां साधर्म्यसमा जातिरियमिति प्रतिपादनार्थं सूत्रम्—

गुणस्य सतोपवर्गः कर्मभिः साधर्म्यम्॥

इति..........त्पन्नत्वादिवत् इति सत्प्रतिपक्षनिराकरणार्थं

गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् [२.२.३०]

इति वर्णयन्ति बुद्धिसुखदुःखेच्छाद्वेष........ ...... साधननिराकरणपूर्वकस्य पक्षसाधनसमर्थनावधित्वाद् वादस्य। अन्यथा तत्त्वनिर्णयानुपपत्तेः॥३०॥

तत्राचार्यः परपक्षसाधनं निराचष्टे—

**सतो लिङ्गाभावात्॥२.२.३१॥**

न ह्युच्चारणप्रयत्नानन्तरमुपलब्धस्य गकारादेरुपलब्धेः प्रागूर्ध्वं च सत्त्वे प्रमाणमस्मत्प्रत्यक्षस्वरूपासिद्धत्वात्। नित्यत्वं सर्वदा सत्त्वमविनाशित्वं वा? न चैतदुभयं गकारादौ प्रत्यक्षम्। नाप्यानुमानिकम् तदनिरूपणात्॥३१॥

नित्यत्वे बाधकमाह—

**नित्यवैधर्म्यात्॥२.२.३२॥**

अस्ति हि शब्दे नित्यवैधर्म्यम्। सामान्यवत्त्वे सति अस्मद्बाह्यप्रत्यक्षत्वादिति। तस्मादनित्य इत्यर्थः[1]॥३२॥

किं च

**कारणतो विकारात्॥२.२.३३॥**

---

१. तस्मादनित्य इत्यर्थः। इत्यत्र आकाशमचाक्षुषम्, अरूपिद्रव्यत्वात् सर्वगतत्वात् सर्वदास्पर्शवद्द्रव्यत्वात्, आत्मवत् इति व्याख्यापाठः॥

कारणतो विकारादिति उत्कृष्टापकृष्टप्रयत्नादिकारणवतो विकारात् उत्कर्षनिकर्षादेः। तथा हि केचिच्छब्दाः कुतश्चित् [अप] कृष्यन्ते, सुखादिवत् तेषु चोत्कर्ष·········च्च नित्यमुत्कर्षनिकर्षवदिष्टम्। उत्कर्षनिकर्षौ जातौ परस्परपरिहारेण वर्तमानौ कथमेकत्र संभवत इति चेत्—न, उत्कर्षनिकर्षयोरजातित्वात्। जातिसंकरस्यादूषणत्वाच्च। उत्कर्षनिकर्ष-·········द्वा यथा ह्युत्कर्षनिकर्षत्वं नित्यवैधर्म्यम्। न खल्वनित्यमुत्कर्षवदिष्टम् उत्कर्षनिकर्षौ जातीपरस्परपरिहारेण कथमेकत्र संभवत इति चेत्—न, उत्कर्षनिकर्षयो·········दूषणाच्च उत्कर्षनिकर्षस्यापि जातिविशेषणत्वाद् वा। यथा ह्युत्कर्षनिकर्षौ जातौ तथोत्कर्षनिकर्षावपि। एतेन सुखादावप्युत्कर्षनिकर्षौ परस्परविरुद्धावेकत्र न·········कारणवत्त्वमुत्कर्षनिकर्षवत्त्वं च नित्यवैधर्म्यम्। नित्यस्तद्बाधक इति ॥३३॥

## कार्यत्वात् ॥२.२.३४॥

कार्यत्वं प्रागभावप्रतियोगित्वमुत्पत्तिमत्त्वं वा नित्यवैधर्म्यम्। तस्माच्छब्दोऽनित्य इति। न चास्य·········भावात् प्राक् घटादेर्भावस्याभावात्। न च घटादेर्भावस्यैव प्रागभावत्वम्। भावत्वात् प्रध्वंसस्य ततः प्रतियोगित्वाच्च। तस्यैव प्रध्वंसप्रतियोगित्वात्। प्रध्वंसस्यापि मह·········विनाशि उत्पत्तिमत्त्वात् घटवदित्यनुमानात्। न च शब्दे कार्यत्वसिद्धिः। घटादावपि प्रत्यक्षसिद्धत्वात्। यथा घटोऽभिजायत इति प्रत्यक्षात् घटस्य कार्यत्वं तथा शब्दो जात·········[शब्दः कार्यः सामान्यवत्त्वे सत्यस्मद्] बाह्यप्रत्यक्षत्वात् निकर्षवत्त्वाच्च ॥३४॥

नित्यत्वसाधनस्य प्रतिकूलतर्कापराहतिं दर्शयति—

## दोषात् ॥२.२.३५॥

इति। सर्वदोपलब्धिप्रसङ्गदोषात्। य[दि शब्दो नित्यः स्यात् सदोपलभ्येत। न च सदोप]लभ्यते। तस्मान्नास्ति इति प्रत्यक्षयोग्यस्य गकारादेः प्रत्यक्षेणैव भावावधारणात्। अन्यथा घटादेरप्यभावानवधारणात्।·········योगत्वे सति तदानीमनुपलभ्यमानघटादिवत् इत्यनुमानाच्च। नायमसिद्धः शब्दस्यानावृतत्वात् न चावहितः श्रोत्रावसानेऽप्यनुपलम्भात्।········· प्रत्यक्षानुमानबाधितं चेति सूत्रतात्पर्यम् ॥३५॥

कारणत्वस्यासिद्धिं परिहरति—

## संयोगाद् विभागाच्छब्दाच्च शब्दनिष्पत्तिः ॥२.२.३६॥



न केवलं प्रयत्नात्, संयोगाद् विभागाच्च शब्दाच्च। गकरादि·········आद्यगकारानां] प्रयत्नताल्वोष्ठपुटसंयोगविभागजन्यत्वस्य प्रत्यक्षासिद्धत्वात् श्रूयमाणशब्दजन्यत्वस्य प्रागेव व्युत्पादितत्वात् ॥३६॥

इदानीं शब्दनित्यत्ववादी स्वपक्षसाधनमाह—

## लिङ्गाच्चानित्यः ॥२.२.३७॥

[न केवलं प्रत्यक्षात् लिङ्गाच्चानित्यः। शब्द इति शेषः।·········नामावरणाभावावसान अभिभवात्। भावोद्भूतत्वादीनां सत्त्वात् अभावज्ञानकारणान्तराणां प्रतियोगिज्ञानादीनां सत्त्वाच्च। आवरणं हि गुणानामाश्रया·········वः। गकारोपलब्ध्यनन्तरक्षणे शब्दाभिभावकगुणान्तरानुपलब्धेः। नाप्यनुद्भूतत्वम्, प्रागप्यनुपब्धिप्रसङ्गात्। नापि प्रत्यक्षयोग्यप्रतियोगिज्ञानाभावः गकारस्य प्रत्यक्ष·········पलब्धेश्च। नात्यधिकरणज्ञानाभावः। अधिकरणज्ञानस्य शब्दोपलम्भाजनकत्वात्। नापीन्द्रियसंबन्धाभावः, तस्य नित्यस्य वारयितुमशक्यत्वात्। प्रतियोगिसंबन्धस्य चाभावप्रतिपत्ति·········प्रतिपत्त्यनुदयप्रसङ्गात्। तस्मात् प्रत्यक्षयोग्यकारणानुपलब्धिसहितं प्रत्यक्षमेव गकारोपलब्ध्यनन्तरक्षणे गकारप्रध्वंसं साधयति। अन्यथा घटादेरपि ध्वंसं न साधयो।·········प्रत्यक्षमेवातिरिक्तगकारव्यञ्जकानिरूपणात् देवदत्तोच्चारणप्रयत्नताल्वोष्ठपुटसंयोगविभागव्यञ्जक इति चेत्—न, तेषु विनष्ट·········मानत्वात् संप्रतिपन्नवदि·········उत्कर्षनिकर्षवत्त्वात् तादृशसुखवत्। न चात्र श्रोत्रग्राह्यत्वाभाव उपाधिः।·········च भाट्टानां साध्याव्यापकत्वात् ध्वनिगकारद्वित्वादयो नित्या एवेति चेत्—न, सिद्धान्तविरोधात्। श्रोत्रमनित्यग्राहकं·········धिसाध्याव्यापकत्वभङ्गस्थले व्यभिचारात्। श्रोत्रं शब्दव्यतिरिक्तश्रावणत्वरहितानित्यग्राहकम् इन्द्रियत्वात् चक्षुर्वत् शब्द·········त्वासिद्धौ च शब्दविशेषणस्य साधनव्याप्तिपरिहारमात्रफलवद् विशेषणवतश्च पक्षेतरत्वात्। शब्द·········वृत्तित्वानित्यवृत्तित्वयो सत्तायामेकत्र दृष्टत्वेन विरोधाभावात् विरुद्धसाध्यासाधकत्वेन अप्रतिपक्षत्वात् शब्दव्यक्त्यन्तरमादायापि चरितार्थत्वेन हेत्वन्तरत्वाभावेनाप्रतिपक्षत्वाच्च साध्यविरुद्धसाधकहेत्वन्तरस्य प्रतिपक्षत्वात्। अन्यथा विरुद्धस्यापि प्रतिपक्षत्वप्रसङ्गात्।

अस्तु तर्ह्यस्य दूषणान्तरत्वमिति चेत्—न, पू·········त्मना दूषणत्वस्थितौ दूषणान्तरस्यापि असंभवात्। अस्तु तर्हि विप्रतिपन्नः शब्दो नित्यः शब्दत्वात् शब्दत्ववन्नित्यवृत्त्यनुमानात् सिद्धानित्यशब्दव्यतिरिक्तशब्दत्वात् शब्दत्वनित्यवृत्ता·········शब्दवदिति प्रयुज्यत इति चेत्—न, पूर्वानुमानद्वय-

सिद्धनित्यानित्यशब्दव्यतिरिक्तत्वस्य शब्दत्वनिवृत्तीत्यनुमानसिद्धानित्यशब्दव्यतिरिक्तत्वस्य च निर्धारयितुमशक्यत्वेन धर्म्यसिद्धिपक्षधर्मत्वा……………………॥३७॥

[ **मीमांसकः** ] प्रत्यवतिष्ठते —

## द्वयोस्तु प्रवृत्त्योरभावात् ॥२.२.३८॥

तुशब्दः पक्षं व्यावर्तयति । द्वयोरुत्तममध्यमवृद्धयोर्द्वे[प्र]वृत्ती दृश्येते । द्वयोरभावादनुपपत्तेः शब्दस्यास्थायित्वमिति शेषः । अस्ति[तावद्उत्तमवृद्धस्य मध्यमवृद्धं प्रति शब्दप्रयोगः] शब्दोच्चारणप्रवृत्तिः । सा च शब्दस्य स्थायित्वमन्तरेणानुपपन्ना बाल्ये वृद्धव्यवहारा[वगत]सामर्थ्यात् गोशब्दा[दिदानीमुच्चार्यमाणगोशब्दस्यान्यत्वे बोधकत्वानुपपत्तौ मध्यमवृद्धप्रतिपत्तहेतुत्वा]संभवात् । अगृहीतसङ्केताद् गोशब्दात् प्रतिपत्त्यनुपपत्तेः ।……गोशब्दस्थायित्वेऽर्थापत्तिः । प्रमाण……भेदेऽनुपपद्यमाना तयोरेकत्वं स्थापयति गोशब्दस्य स्थायित्वं…… शब्दस्य प्रमाणमिति……ययोरभावात् । नाशुतरविनाशी शब्द इति व्याख्यातवन्तः, त एव बुध्यन्ते किं पुनरन्य इत्युपेक्षणीयम् । प्रवृत्तिशब्दस्य मुख्यार्थत्यागेन प्रत्ययपर……॥३८॥

**अपि च—**

## संख्याभावात् ॥२.२.३९॥[१]

संख्यां भावयतीति संख्याभावः संख्याप्रतिपादकं वेदवाक्यम्, तस्मादपि स्थायित्वं शब्दस्य गम्यत् इति । तथा हि पञ्चदश सामिधेनीरन्वाहेति श्रूयते । वेदे चैकादशैव [सामिधे]न्यः पठ्यन्ते । तासां सामिधेनीनां पञ्चदशसंख्यापूर्णनार्थं त्रिः प्रथमासामिधेन्युच्चारणीया त्रिरुत्तमा सामिधेन्युच्चारणीया अन्यथा सामिधेनीनां पञ्चदशसंख्याभावात् प्रथमोत्तमयोश्च त्रिरुच्चारणमाक्षिपता वेदेन प्रथमोत्तमसामिधेन्योरुच्च्यारणं त्रिकालीय- माक्षिपति । पञ्चदशसामिधेनीप्रतिपादकवाक्यादेव प्रथमसामिधेन्योः स्थायित्वसिद्धिरिति ॥ ३९ ॥

अपि च [त्रिःप्रथमा]मन्वाह, त्रिरुत्तमामिति वाक्यात् प्रथमोत्तमसामिधेन्योः त्रिरुच्चारणकालं यावत् प्रथमोत्तमसामिधेन्योः स्थायित्वे वेद एव प्रमाणमिति ।

## संप्रतिपत्तिभावाच्च ॥ २.२.४० ॥

…………स नेदानीं पठ्यते । स एव मया पूर्वं गोशब्दो गृहीतसङ्केतः । स एवायं य एव पूर्वं गकारो मया श्रुतः, स एवायमित्यादिप्रत्यभिज्ञासंप्रतिपत्ति[तः शब्दस्था]यित्वं संभवतीति । न चेयं न प्रत्यभिज्ञा न प्रमाणं प्रत्यभिज्ञात्वात्, सैवेयंज्वालेति प्रत्यभिज्ञावदिति वाच्यम् । स एवायं घट इति……विलयात् । ओमिति

१. इतः परं प्रथमाशब्दादिति सूत्रं चन्द्रानन्दस्वीकृतम् ।



**वदतश्च सुगत**प्रवेशविडम्बनेनैव दूषणमिति । संप्रतिपत्तेरित्येतावतैव सिद्धे भावग्रहणं प्रकरण ॥४०॥

**अथ सिद्धान्तसूत्रम्—**

## सन्दिग्धाः सति बहुत्वे ॥ २।२।४१ ॥

उपपन्नत्वादिति शेषः ।

**[द्वयोस्तु प्रवृ]त्त्योरभावात्** [ २।२।३८ ]

इत्यादयो हेतवः शब्दस्थायित्वसाधकत्वेन **मीमांसकैः** उक्तः ते स्थायित्वसाधकत्वासाधकत्वाभ्यां [सन्दिग्धाः न स्थायित्वसाधकतयोद्भावनीयाः ।……त्वमिव वह्निमत्त्वसाधकतया । न चैवं **मीमांसकः**[१]……॥४१॥

[ इति श्रीहरकिङ्करपरमपण्डितन्यायाचार्यभट्टवादीन्द्रविरचिते ]

वैशेषिकसूत्रवार्तिके

द्वितीयाध्याये द्वितीयाह्निकम् ॥

१. **अत्रैव मातृकाविश्रान्तिः** । चन्द्रानन्दमतेन संख्याभावः सामान्यतः इत्याह्निकान्तिमं **सूत्रम्** ।

परिशिष्टम्--१

श्रीः

# ॥ वैशेषिकदर्शनम् ॥

## ॥ निबन्धसारः ॥

## प्रथमाध्यायस्य प्रथमाह्निकम्

### अथातो धर्मं व्याख्यास्यामः ॥१॥

अथशब्द आनन्तर्ये। आनन्तर्यमात्रवचनेनाप्यनेन यत्किंचित् पूर्ववृत्तं [न] समर्पणीयम्, तस्य धर्मव्याख्यानानुपयोगात्। किं त्वीश्वरप्रणामः पूर्ववृत्ततया समर्पणीयः, ईश्वरप्रणामादेव चिकीर्षितकार्यपरिपूरणोपपत्तेः। न तदानन्तर्यं वचनीयमिति चेत्? शिष्यशिक्षार्थत्वात्। इष्टदेवतानमस्कारानन्तरमेव ग्रन्थाद्यारम्भः कर्तव्य इति। कृतमङ्गलेनारब्धं कर्म समाप्यते प्रचीयते च। आगममूलत्वाच्चास्यार्थस्य व्यभिचारो न दोषाय। तस्य कर्मकर्तृसाधनवैगुण्यहेतुकत्वात्। साद्गुण्येऽपि विघ्नहेतूनां बलीयस्त्वात्। न चैवं सति किमनेनेति वाच्यम्। प्रचितस्यास्यैव बलवत्तरविघ्नवारणेऽपि कारणत्वात्। न हि घनमुक्तमुदकमेकस्तृणकदम्बो वारयितुं न समर्थ इति तदर्थं नोपादीयते। सजातीयप्रचयसंवलितस्य तस्य शक्तत्वात्। न च विघ्नहेतुसद्भावनिश्चयाभावाद् वारणकारणमनुपादेयम्। तत्संदेहेपि तदुपादानस्य न्याय्यत्वात्। अन्यथानुपस्थितपरिपन्थिभिः पार्थिवैर्द्विरदयूथपतयो नाद्रियेरन्।

अत इति हेतौ। यतोऽधीतसाङ्गवेदावगतस्वर्गापवर्गार्थिनः तत्साधनजिज्ञासवो ग्रहणधारणादसमर्थाः वेदाच्च तत्साधनमधिगच्छन्तः पृच्छन्ति अत इत्यर्थः।

न च त्रिदिवाभिलाषी यजताम् इत्यादेस्त्रिदिवसाधनं धर्मोऽवगम्येत इति युक्तम्। प्रकृत्यर्थस्य यागादेः प्रत्ययार्थस्य च भावनायाः क्षणिकत्वेन कालान्तरीयफलसाधनत्वयोग्यतारहितस्य तद्बोधनासिद्धेः। अव्यवहितपूर्वापरभावनियमो हि साध्यसाधनभावो योग्यता। क्व तर्हि त्रिदिवेति वाक्यस्य प्रामाण्यम्? धर्मसाध्ये त्रिदिवे तत्साधने यागे च। त्रिदिवेत्यस्यार्थः त्रिदिवाभिलाषी यागं कुर्यादिति। यागस्य त्रिदिवासाधनत्वेऽपि स्वर्गसाधनधर्मसाधनत्वात् स्वर्गकामानुष्ठेयत्वम्। धर्मः पुनः वैशेषिकशास्त्रप्रतिपादितानुमानगम्य एव।

यतो न वेदाद् धर्मावगतिरतो धर्मं व्याख्यास्यामः। विशब्दो विशेषे। विशेषश्च प्राधान्यम्। तेन विशेषतः प्राधान्येन धर्मं व्याख्यास्यामः। द्रव्यादि-



पदार्थास्तु तदङ्गतयेति सिध्यन्ति। यद्वा विशब्दो विविधत्वे। प्रवर्तकनिवर्तकादिभेदेन अनेकप्रकारमित्यर्थः। आङ् अभिविधौ। न मर्यादायाम्। परिवर्जनीयाभावात्। व्याख्यास्याम इति ख्या प्रकथने [पाणिनीयधातुपाठे १०६०] इत्यस्य धातो रूपम्। प्रकृष्टनिर्दुष्टधर्मप्रमाणत्वप्रतिपादकत्वम्। तच्च न शास्त्रान्तरे। तत्प्रतिपादितधर्माणां यथास्थानं दोषाभिधानात्।

अत्राकारप्रश्लेषेणाधर्मव्याख्याप्रतिज्ञापि द्रष्टव्या। यतो वेदाद्यवगतनरकादिजिहासवस्तत्साधनजिज्ञासवः पृच्छन्ति, अतोऽधर्मं व्याख्यास्याम इत्यर्थः॥

### यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ॥२॥

अभ्युदयः स्वर्गादिसुखम्। निःश्रेयसं मुक्तिः। तयोः सिद्धिः उत्पत्तिर्यतः। उत्पत्तिमतः कारणसंबन्धाव्यभिचाराद् यत इत्युक्तम्। स्वर्गापवर्गाविस्मत्प्रत्यक्षनिष्ठगुणत्वावान्तरजातिरहितगुणजन्यौ जनिमत्त्वात्। यदित्थं तत्तथा। यथा पतनम्। तथा चेमौ। ततस्तथा॥

### तद्वचनादाम्नायस्य प्रामाण्यम् ॥३॥

तयोः स्वर्गापवर्गयोः वचनात् प्रतिपादनात् प्रमितिजननात् आम्नायस्य श्रुतिस्मृतीतिहासादेः प्रामाण्यम् प्रमितिकारणत्वम्॥

### पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि ॥४॥

इह द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाख्यं प्रमेयं प्रतिपादनीयम्। अपरथा व्याप्त्याद्यसिद्धावनुमानाप्रवृत्तेस्तदधीनधर्मनिर्णयायोगादिति प्राप्ते तद्विभागार्थमिदं सूत्रम्। भावाभावभेदाद् द्वेधा प्रमेयविभागः प्रथमं सूत्रकृतोऽभिप्रेतः। ततो द्रव्यं गुणः कर्म सामान्यं विशेषः समवाय इति भावविभागः सूत्रकृतोऽभिमतः, अग्रे द्रव्यादिभावषट्कप्रतिपादनात्। इदं तु सूत्रं द्रव्यविभागपरम्। द्रव्यमित्युक्ते पृथिव्यादिविशेषानवगमात्। विशेषावगमो हि विभागफलम्।

उदयनादयस्तु न्यूनाधिकसंख्याव्यवच्छेदार्थं विभागवचनमित्याहुः।

ननु पृथिव्यादिशब्दैः पृथिवीत्वादिजात्याश्रयव्यक्तयोऽभिधीयन्ते पृथिवीत्वादिजातयो वा। आद्येऽप्येकैकतद्व्यक्तिरुच्यते, समस्ततद्व्यक्तयो वा? प्रथमे विभागन्यूनत्वम्, एकैकपृथिवीत्वाद्याश्रयव्यक्तिव्यतिरिक्तपृथिवीत्वाद्याश्रयव्यक्तीनामविभजनात्। न द्वितीयः, पृथिवी तेज इत्याद्येकवचनानुपपत्तेः। पृथिव्यादिप्रतिपादितानामनन्तव्यक्तिरूपत्वात्। नापि द्वितीयः, विभागन्यूनत्वाधिकत्वापत्तेः। पृथिव्यादिपदानां पृथिवीत्वादिजातिपरत्वे तद्व्यक्तीनामप्रतिपादनाद् विभागन्यूनत्वम्। अद्रव्याणामपि पृथिवीत्वादीनां विभजनाद् विभागाधिक्यमिति। तत्र—पृथिव्यादिपदानां सकल-

तज्जात्याश्रयव्यक्तिपरत्वेऽपि पृथिवीत्वादिजात्यैकत्वप्रतिपादकत्वेनैकवचनोपपत्तेः। जातेरपि व्यक्तिवत् प्रातिपदिकार्थत्वात्। अप्रातिपदिकार्थत्वे वोपलक्षणभूतया जात्या प्रत्ययार्थस्यैकत्वस्यान्वयो भविष्यति। अयं घट इत्यादौ देशकालयोरुपलक्षणयोरन्वयदर्शनात्। इतिशब्दः समाप्तौ। समाप्तानि द्रव्याणि। इतोऽतिरिक्तानि न सन्तीत्यर्थः। द्रव्यत्वमत्यन्ताभावप्रतियोगि जातित्वात्, गोत्ववत्। अत्र समुदायप्रसिद्ध्या नाप्रसिद्धविशेषणता ॥

**रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नश्च गुणाः ॥५॥**

रूपरसगन्धस्पर्शा इति समासस्यैकपद्यम्। एकैकेन्द्रियार्थकत्वमेकविभक्तिकत्वं च प्रयोजनम्। **आत्रेयाचार्यास्तु** रूपरसगन्धस्पर्शानां नित्यत्वानित्यत्वपाकजत्वादिसाधर्म्यप्रतिपादनं प्रयोजनमित्याहुः। संख्या इति बहुवचनं संख्यात्वावान्तरैकत्वद्वित्वत्रित्वादिपरिग्रहार्थम्। एकत्वसमुच्चयविशेषा एव द्वित्वादय इति चेत्, न। द्वित्वादिजातिव्यतिरेकेण तत्समुच्चयविशेषानिरूपणात्। परिमाणानीति बहुवचनं परिमाणतावान्तराणुत्वमहत्त्वह्रस्वत्वदीर्घत्वख्यापनार्थम्। पृथक्त्वमित्येकवचनं पृथक्त्वावान्तरद्विपृथक्त्वादिजातिनिरासार्थम्। द्विपृथगित्यादिव्यवहारस्य द्वित्वाद्यवच्छिन्नपृथक्त्वादेवोपपत्तेरिति केचित्-तन्न, एकैकनिष्ठपृथक्त्वव्यावृत्तानां द्वित्रिनिष्ठपृथक्त्वादिजातीनां जात्यन्तरसमानन्यायेन सिद्धत्वात्। तस्मादेकवचनं पृथक्त्वत्वजातेरेकत्वख्यापनार्थम्। क्वचिदेकत्वख्यापने समानन्यायतया रूपत्वाद्येकत्वस्यापि शक्यावगमत्वान्न सर्वत्रैकवचनप्रसङ्गः। ज्ञानत्वव्यतिरिक्ता ज्ञाननिष्ठप्रमात्वसाक्षात्त्वानुमितित्वसंशयत्वविपर्ययत्वजातयो न सन्तीति गुरुमतनिरसनार्थं बुद्धय इति बहुवचनम्। प्रयत्नश्चेति चकारोऽनुक्तगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दसमुच्चयार्थः। तस्मात् कण्ठोक्ताः सप्तदश चशब्दसमुच्चिता गुरुत्वादयः सप्तेति चतुर्विंशतिर्गुणाः ॥

**उत्क्षेपणमवक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ॥६॥**

उत्क्षेपणत्वं जातिविशेषः। तदाश्रय उत्क्षेपणम्। एवमवक्षेपणादयो निर्वाच्याः। भ्रमणरेचनोर्ध्वज्वलनादीनां गमनान्तर्भावान्न विभागन्यूनत्वम्। भ्रमणादयो गमनत्ववन्तः उत्क्षेपणत्वादिरहितकर्मत्वात् संप्रतिपन्नवत् ॥

**सदनित्यं द्रव्यवत् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः ॥७॥**

सदिति भावप्रधानो निर्देशः। सत्त्वमित्यर्थः। एवमनित्यमित्यादौ। सामान्यविशेषवदिति सामान्यवत् विशेषवदिति विवेचनीयम्। अविशेषः साधर्म्यम्। सत्त्वानित्यत्वद्रव्यवत्त्वकार्यत्वकारणत्वसामान्यवत्त्वविशेषवत्त्वानि द्रव्यगुणकर्मणां साधर्म्याणीत्यर्थः। इतिशब्द एवंविधाभिधेयत्वप्रमेयत्वादिपरिग्रहार्थः। सत्त्वमस्तित्वं विधिप्रत्ययविषयत्वं प्रतियोग्यनपेक्षनिरूपणीयत्वमिति यावत्। अभिधेयत्वमभिधानयोग्यता, शब्देन संगतिलक्षणः संबन्धः। ज्ञेयत्वं ज्ञानयोग्यता ज्ञाप्यज्ञापकसंबन्धः। अस्तित्वं जातिः सत्तारूपा सामान्यादावप्यस्ति। सामान्ये सामान्यस्वीकारे नानवस्थादोषः, दृष्टपरंपरात्वेन मूलक्षयाभावात्। अनित्यत्वं नाशप्रतियोगित्वं कार्यद्रव्यगुणकर्मणामविशेषः। द्रव्यवत्त्वं द्रव्याश्रितत्वम्। कार्यत्वं प्रागभावप्रतियोगित्वम्। कारणत्वं जनकत्वं सकलपदार्थनिष्ठो धर्मः। ज्ञानेतरकार्यं प्रति कारणत्वं तु द्रव्यादीनां त्रयाणामेव। सामान्यवत्त्वमनुवृत्ताश्रयत्वम्। विशेषवत्त्वं व्यावृत्ताश्रयत्वम्। सामान्यविशेषवत्त्वमनुवृत्तव्यावृत्ताश्रयत्वम् ॥



**द्रव्याणि द्रव्यान्तरमारभन्ते ॥८॥**

अन्त्यावयवित्वरहितानि स्पर्शवन्ति द्रव्याणि द्रव्यान्तरमारभन्ते। स्वात्मनि कार्यद्रव्यमारभन्ते। आरभ्यारम्भकद्रव्ययोर्भेदप्रतिपत्त्यर्थमन्तरपदम्। **सांख्या** हि कार्यकारणयोरभेदमिच्छन्ति। प्रमाणयन्ति च तन्तवः पटान्न भिद्यन्ते पटकारणत्वात्। यत् पटाद् भिद्यते न तत् पटकारणम्। यथा घट इति। तन्न। पटाद् भिन्नत्वेन निश्चिते कुविन्दादौ व्यभिचारात्। न च पटोपादानत्वं हेतुः। तत्समवायित्वस्य तन्तौ परस्यासिद्धेः, तदाकारपरिणामित्वस्यास्माकमसिद्धेः, तदुभयानुगतसाधारणरूपानिरूपणाच्च। आरभ्यारम्भकयोर्भेदः प्रत्यक्षानुमानविषयः। अयं तन्तुः एतस्मात् पटात् भिद्यते तन्तुत्वात् तन्त्वन्तरवत्। अयं पटः एतस्मात् तन्तोर्भिद्यते पटत्वात् पटान्तरवदिति ॥

**गुणाश्च ॥९॥**

गुणान्तरमारभन्त इत्यनुषङ्गः। चकारस्य द्वौ विलासविषयौ। तत्रैकः--न केवलं द्रव्याणि द्रव्यान्तरमारभन्ते, किंतु गुणा अपि, द्रव्यारम्भकसंयोगेश्वरज्ञानादीनां पटादिद्रव्यजनकत्वाद् इति। अन्यस्तु गुणः गुणान्तरं चेति ॥

**कर्म कर्मसाध्यं न विद्यते ॥१०॥**

कर्म साध्यं कार्यं यस्य तत् कर्मसाध्यम्। कर्मजन्यं कर्म नेति कर्मणः कर्मजनकत्वनिषेधः। विद्यते तत्र प्रमाणमस्तीत्यर्थः। कर्म न कर्मजनकं, कर्मत्वादन्त्यकर्मवदिति ॥

**कार्याविरोधि द्रव्यं कारणाविरोधि च ॥११॥**

कार्यमविरोधि अनाशकं यस्य तत् कार्याविरोधि। कारणमविरोधि अनाशकं यस्य तत् कारणाविरोधि। तदनेन कार्यकारणाविनाश्यत्वं द्रव्याणां साधर्म्यमुक्तम्।

आश्रयनाशादसमवायिनाशाद् वा द्रव्यनाश इति नियमात्। कारणपदेन समवाय्यसमवायिनी विवक्षिते ॥

## उभयथा गुणः ॥१२॥

कार्यविरोधी कारणविरोधी च। न तु कार्याविरोधी कारणाविरोधी चेति। कार्याविरोधित्वस्य प्रथमादिशब्दे ज्ञानादिजनकज्ञानादौ च बाधात्। कारणाविरोधित्वस्य चोपान्त्यशब्दविनाश्यान्त्यशब्दे बाधात् ॥

## कारणाभावात् कार्याभावः ॥१३॥

समवाय्यसमवायिकारणनाशात् कार्यद्रव्यनाशः। समवायिनाशोऽसमवायिनाशो निमित्तनाशो गुणान्तरं च गुणविनाशहेतुः। समवायिनाशः संयोगश्च कर्मविनाशहेतुरिति विवेकः।

ननु समवायिनाशोऽसमवायिनाशो निमित्तनाशो वा द्रव्यनाशायेत्युक्तम्। [तत्र समवायिनाशो न द्रव्यनाशकारणम्, किंतु असमवायिनाश एव, प्रमाणं च तत्रानुमानं तच्च,-] विमतो द्रव्यविनाशोऽवयवसंयोगनाशजन्यः द्रव्यनाशत्वात्, तन्तुसंयोगनाशजन्यपटनाशवत् इति चेत्—न, तन्तुविनाशात् पटविनाश इति प्रत्यक्षविरोधात्। अविरोधे वा सर्वत्रावयवसंयोगविनाशस्यैव द्रव्यविनाशहेतुत्वमस्तु ॥

## न तु कार्याभावात् कारणाभावः ॥१४॥

इतरत्र शङ्का व्यावर्तकशङ्का च, यथा कारणनाशे द्रव्यनाशः, तथा कार्यनाशे कारणद्रव्यनाशोऽस्तु विशेषाभावादिति। कार्यद्रव्यनाशो न कारणद्रव्यनाशहेतुः, पटनाशेऽपि तन्तूनामुपलम्भादिति भावः ॥

## क्रियावद् गुणवत् समवायिकारणमिति द्रव्यलक्षणम् ॥१५॥

क्रियावदित्यादिनिर्देशो भावप्रधानः। क्रियावत्त्वं गुणवत्त्वं समवायिकारणत्वमित्यर्थः। क्रियावत्त्वं न द्रव्यलक्षणम्, गगनादावव्यापकत्वादिति चेत्—न, मूर्तद्रव्यलक्षणत्वात्। क्रियावत्त्वेन मूर्तानां द्रव्यत्वमापाद्य तन्निदर्शनेनाकाशादीनामपि तदनुमानात्। यद्वा, क्रियाशब्देनात्र न कर्माभिमतम्। किं तूत्पत्तिविनाशौ धात्वर्थत्वात्। धात्वर्थो हि क्रिया। धात्वर्थत्वं च उत्पद्यते विनश्यतीति प्रयोगदर्शनात्। उत्पत्तिश्च प्रागभाव एव। क्रिया विद्यतेऽस्मिन्निति सप्तम्यर्थे प्रत्ययः। तेन क्रियावदिति प्रागभावाधिकरणं प्रध्वंसाधिकरणं चेत्यर्थः स्यात्। तथा च प्रागभावाधिकरणं प्रध्वंसाधिकरणं च द्रव्यमिति लक्षणद्वयं सिध्यति। न चानयोरव्यापकत्वम्। सर्वद्रव्याणां संयोगादिप्रागभावप्रध्वंसाधिकरणत्वात्। नातिव्यापकत्वम्, प्रागभावप्रध्वंसयोः समवायिकारणमात्रनिष्ठत्वात्। संबन्धमात्रस्य वत्यर्थत्वात्।



गुणवत्त्वं गुणत्वेऽतिव्यापकमिति चेत्—न। न हि शुक्लो घट इतिवत् शुक्लं गुणत्वमित्यनुभवः। कार्याश्रयत्वं समवायिकारणत्वम्। इतिशब्द एवंविधलक्षणान्तरपरिग्रहार्थः। तद्यथा—संख्याश्रयो द्रव्यम्। परिमाणाश्रयो द्रव्यम्। संयोगाश्रयो द्रव्यम्। विभागाश्रयो द्रव्यमिति।

ननु लक्षणप्रयोजनं किं द्रव्यत्वज्ञानं द्रव्यशब्दवाच्यत्वज्ञानं वा [द्रव्यार्थप्रवृत्तिप्रयोजकद्रव्यशब्दप्रयोगतज्जन्यज्ञानं वा इतरभेदज्ञानं वा,] गुणत्वादिरहितत्वविशिष्टद्रव्यज्ञानं वा ? नाद्यः, द्रव्यत्वसाक्षात्कारस्येन्द्रियादेवोपपत्तेः। द्रव्यत्वानुमितेश्च लिङ्गादेवोपपत्तेः। द्रव्यलक्षणमेव द्रव्यत्वलिङ्गमिति चेत्—न। द्रव्यत्वासिद्धावप्रसिद्धविशेषणत्वात्। सिद्धौ वा साधनवैयर्थ्यात्। [नापि द्वितीयः, द्रव्यत्वज्ञानाभावे तज्ज्ञानासंभवात्,] द्रव्यशब्दवाच्यात् द्रव्यत्वात् व्यावृत्तत्वेनासाधारणत्वाच्च। द्रव्यत्वमपि पक्ष एवेति चेत्—न, तत्र गुणवत्त्वस्यासिद्धत्वात्। वृद्धव्यवहारादेव द्रव्यशब्दवाच्यत्वसिद्धेश्च। न तृतीयः, द्रव्यत्वज्ञानादेव द्रव्यार्थिनः प्रवृत्तिसिद्धेः। द्रव्यशब्दवाच्यत्वज्ञानादेव द्रव्यशब्दप्रयोगतज्जन्यज्ञानोपपत्तेः। न चतुर्थः, इतरशब्देन द्रव्यलक्षणवतामपि उपादाने व्याघाताद् बाधाच्च। द्रव्यलक्षणरहितोपादाने च द्रव्यलक्षणरहितरसादिव्यावृत्तिमतो रूपादेः सपक्षादपि व्यावृत्तत्वेन द्रव्यलक्षणस्यासाधारण[त्व]प्रसङ्गात्। द्रव्यलक्षणरहितपदेन सर्वद्रव्यलक्षणरहितं विवक्षितमिति चेत्—न, सर्वशब्देन त्वदधिगतद्रव्यलक्षणरहितव्यावृत्तिमतोऽस्मदाद्यधिगतद्रव्यलक्षणरहितात् सपक्षादपि व्यावृत्तत्वेन द्रव्यलक्षणस्यासाधारणत्वप्रसङ्गात्। त्वदधिगतविशेषणत्वाच्च द्रव्यलक्षणरहितं सर्वं मयावगम्यते इति चेत्—न, असन्निकृष्टे त्वदिन्द्रियाप्रवृत्तेः। अननुसंहितलिङ्गे च तवानुमित्यनुदयात्। न च पञ्चमः, गुणत्वकर्मत्वजातित्वविशेषत्वसमवायत्वाभावत्वविरहाभावानां गुणत्वादीनामेकत्राभावेन साध्याभावस्य साधनाभावेन व्याप्त्यसंभवात्। गुणत्वकर्मत्वजातित्वविशेषत्वसमवायत्वाभावत्वप्रतियोगिकषडत्यन्ताभाववत्त्वविरहस्य च गुणत्वादिव्यतिरेकिणः अभावस्य प्रसिद्धिमन्तरेण ग्रहीतुमशक्यत्वेन साधनाभावे व्याप्तिग्रहणासंभवादिति। मैवम्, केवलव्यतिरेकिणो द्रव्यलक्षणत्वात् द्रव्यसिद्धेः। न चाप्रसिद्धविशेषणत्वम्, साध्याप्रसिद्धेरनुमानाङ्गवैकल्यरूपत्वाभावात्, अनुमानाङ्गवैकल्यानापादकत्वाच्च। साध्याप्रसिद्धिः साध्यसंदेहं विघटयन्ती पक्षधर्मताभङ्गे पर्यवस्यति संदिग्धसाध्यस्य पक्षत्वादिति चेत्—न, साध्यसंदेहस्यानुमानानङ्गत्वात् साध्यानिर्णयादेवानुमानोपपत्तेः, अनिर्णीतसाध्यस्यैव पक्षत्वात्। अन्यथा व्युत्पन्नविपर्यस्तयोरनुमित्यनुदयप्रसङ्गात्। साध्याप्रसिद्धौ साध्याभावस्य साधनाभावेन व्याप्त्यनभ्युपगमात् व्यतिरेकाप्रवृत्तिरिति चेत्—न, साध्याभावनिष्ठसाधनाभावव्याप्तेः साधनानिष्ठत्वेन साध्यानुमित्यजनकत्वात्। साधननिष्ठसाध्यव्याप्तेरेव साध्यानुमितिजनकत्वात्।

व्यतिरेकव्याप्त्यनवगतावुपायाभावात्, गुणत्रत्वस्य द्रव्यत्वेन व्याप्तिग्रहणासंभव इति चेत्—न, प्रत्यक्षस्यैवोपायत्वात् ।

यद्वा द्रव्यशब्दवाच्यत्वस्य सिद्धेर्विशेषणत्वं द्रव्यपदं वाच्यवत् पदत्वात् गोपदवत् इति विशेषणप्रसिद्धेः । न चैवं विद्यमानसपक्षत्वात् द्रव्यलक्षणस्यासाधारणता, सपक्षाद् व्यावृत्त्यनिश्चयात् । नाप्यन्वयसंभवेन केवलव्यतिरेकित्वभङ्गः । सपक्षे हेतोर्वृत्त्यनिश्चयात् । नापि व्यतिरेकिवैयर्थ्यम्, पक्षे द्रव्यशब्दवाच्यत्वस्य विशेषणसाधकानुमानेनानिश्चयात् । नापि वृद्धव्यवहारादेव द्रव्यशब्दवाच्यत्वसिद्धे-[रनुमानस्य वैयर्थ्यम्, एकसाधनेनान्यसाधनस्य वैयर्थ्याभावात्, अन्यथा अनुमानेन द्रव्यशब्दवाच्यत्वप्रसिद्धे]र्वृद्धव्यवहारवैयर्थ्यस्य दुर्वारत्वात् ।

ननु पृथिव्याद्यष्टद्रव्यगुणादिव्यावृत्तात्मसाक्षात्कारो मुक्तिहेतुः, स च पृथिव्याद्यष्टद्रव्यगुणादिव्यावृत्तात्मनिदिध्यासनजन्यः । तच्च पृथिव्याद्यष्टद्रव्यगुणादिव्यतिरिक्तात्ममननजन्यम्, तच्चात्मलक्षणादेवेति व्यर्थं द्रव्यलक्षणमिति चेत्—न, गुणादिव्यतिरिक्तात्मस्वरूपनिदिध्यासनस्योपपत्तेर्द्रव्यलक्षणस्यार्थवत्त्वादिति ॥

## द्रव्याश्रयी न गुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम् ॥१६॥

द्रव्यमाश्रयो यस्यासौ द्रव्याश्रयः । द्रव्यगुणकर्मवृत्तिसामान्यादिव्यावृत्तार्थत्वापरपर्यायः सामान्यपदार्थः, य उदयनादिभिः सत्तेत्युच्यते । द्रव्याश्रयोऽस्मिन्नस्तीति द्रव्याश्रयी अर्थत्ववानित्यर्थः । न गुणवानिति गुणशब्देन गुणविशेषाः संख्यापरिमाणपृथक्त्वसंयोगविभागा गृह्यन्ते । संयोगविभागेष्वकारणमनपेक्ष इति संयोगविभागानपेक्षकारणत्वरहितत्वं विवक्षितम्, कारणपदस्यानपेक्षपदेनान्वयात् । असमवायिकारणमनपेक्षकारणं सामग्रीतुल्यरूपत्वात् ।

विभागानपेक्षकारणत्वरहितत्वेनैव कर्मण्यतिव्याप्तेरीश्वरेच्छाज्ञानप्रयत्नादृष्टेष्वव्याप्तेश्च परिहाराद् व्यर्थं संयोगकारणत्वग्रहणमिति चेत्—न, शरीरकुड्यभागजनकहस्तकुड्यविभागाव्याप्तिपरिहारार्थत्वात् । तस्मादर्थत्वाश्रयः संख्याद्यनाश्रयः संयोगकारणत्वे सति विभागानपेक्षकारणत्वरहितो गुण इति लक्षणं सिध्यति । इतिशब्दः सूत्रे उत्क्षेपणावृत्तिसंयोगासमानाधिकरणसत्तासाक्षाद्व्याप्यजातिमान् गुण इत्येवं लक्षणान्तरपरिग्रहार्थः ॥

## एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षं कारणमिति कर्मलक्षणम् ॥१७॥

एकद्रव्यं एकद्रव्यमात्रवृत्ति । अगुणं गुणत्वरहितम् । कारणपदं च संयोगविभागाभ्यां संबध्यते । अनपेक्षं कारणमित्यनेन । कर्मपदं च त्रयेणैव संबध्यते । एकद्रव्यमात्रं विभागानपेक्षकारणं कर्म । गुणत्वरहितविभागानपेक्षकारणं कर्म । संयोग-



कारणत्वे सति विभागानपेक्षकारणं कर्मेति लक्षणत्रयं सूत्रार्थः । घटे चलति रूपादयश्चलन्तीति प्रत्ययात् कर्मणोऽद्रव्याश्रितत्वनिषेधार्थं द्रव्यग्रहणम् । तथा च रूपादयो न कर्मवन्तः, अद्रव्यत्वात् कर्मवत् । सूत्रे इतिशब्दः संख्यादिवृत्तिरहितसंयोगसमानाधिकरणसत्तासाक्षाद्व्याप्यजातिमत् कर्मेति लक्षणपरिग्रहार्थः ॥

## द्रव्यं द्रव्यगुणकर्मणां सामान्यं कारणम् ॥१८॥

सामान्यकारणप्रकरणमिदमारब्धम् । तन्त्वादिकं द्रव्यं पटादेर्द्रव्यस्य रूपादेर्गुणस्य उत्क्षेपणादेः कर्मणश्च सामान्यं कारणम् ।

द्रव्याणि द्रव्यान्तरमारभन्ते [ १. १. ८ ]

इति बहूनां द्रव्याणां द्रव्यकारणत्वमुक्तम् । अत्र त्वेकैकद्रव्यस्य द्रव्यगुणकर्मापेक्षया सामान्यकारणत्वं प्रतिपाद्यम् । अतो न पूर्वपरप्रकरणयोः पुनरुक्तत्वं परिशङ्कनीयम् ॥

## तथा गुणः ॥ १९ ॥

यथा द्रव्यं द्रव्यगुणकर्मणां कारणं तथा गुणोऽपि । ईश्वरज्ञानेच्छाप्रयत्नधर्माधर्मादिर्द्रव्यगुणकर्मजननात् ॥

## संयोगविभागानां कर्म कारणम् ॥ २० ॥

सामान्यमित्यनुवर्तते । उपलक्षणं चैतत् । वेगेऽपि कर्मणः कारणत्वात् । तेन यावन्तः संयोगविभा[गवे]गाः येन कर्मणा जायन्ते, तेषां तत्कारणं तज्जन्यत्वं च साधर्म्यमिति सूत्रार्थः ॥

## न द्रव्याणां कर्म व्यतिरेकात् ॥ २१ ॥

द्रव्यगुणभावव्यतिरिक्तत्वादित्यर्थः । कर्म न द्रव्यजनकम्, द्रव्यत्वगुणत्वरहितभावत्वात् सामान्यवत् । न चात्र सामान्यसत्त्वाभाव उपाधिः, गगनादौ साध्याव्यापकत्वात् ॥

## गुणवैधर्म्यान्न कर्मणाम् ॥२२॥

कर्मणो गुणवैधर्म्यं गुणत्वाभावः । कर्म न कर्मासमवायिकारणम्, गुणत्वरहितत्वात् घटवत् ।

कर्म कर्मसाध्यं न विद्यते [ १. १. १० ]

इत्यनेन कर्मत्वेन कर्मणः कर्मकारणत्वं निषिद्धम् । अत्र तु गुणवैधर्म्येणेति विभागः ॥

## द्रव्याणां द्रव्यं कार्यं सामान्यम् ॥२३॥

इदं कार्यसामान्यप्रकरणम् । सामान्यविशिष्टमेकमिति यावत् । तथा हि यद् द्रव्यं यैर्द्रव्यैर्जन्यते तत् तेषामेकं कार्यम् । यथा द्व्यणुकं परमाणुद्वयदिक्कालेश्वराणाम् । त्र्यणुकं च द्व्यणुकत्रयदिक्कालेश्वराणामित्यादि ॥

**तथा गुणाः ॥२४॥**

यथा द्वचणुकादिद्रव्यं परमाणुद्वयदिक्कालेश्वरादीनां द्रव्याणां समानकार्यम्, तथा द्वचणुकादिरूपादयोऽपि द्वचणुकादिदिक्कालेश्वरादिद्रव्याणां समानं कार्यमित्यर्थः ॥

**द्वित्वप्रभृतयश्च संख्याः पृथक्त्वसंयोगविभागाश्च ॥२५॥**

कार्यं सामान्यमित्यनुवर्तते । द्वित्वादयः संख्या द्विपृथक्त्वानि संयोगविभागाश्च द्रव्याणामनेकेषां समवायिनां समानं कार्यमित्यर्थः । तथा हि—घटपटद्वित्वं घटपटयोः कार्यम् । घटपटस्तम्भत्रित्वं घटपटस्तम्भानां कार्यम् । घटपटपृथक्त्वं घटपटयोः कार्यम् । घटपटस्तम्भपृथक्त्वं घटपटस्तम्भानां कार्यम् । संयोगविभागौ च द्वयोर्द्वयोरेव कार्यमिति ।

घटादिव्यतिरिक्तसंख्या नास्तीति चेत्—एकत्वस्याग्रे प्रतिपादनात्, द्वित्वादीनां च द्वे त्रीणीत्यादिप्रत्ययसिद्धत्वात् । द्वौ घटावित्यादिप्रत्यक्षेण घटादिनिष्ठद्वित्वादेरनुभवात्, इदं द्वित्वमेतद्घटाद्भिन्नम्, एतद्विशेषणत्वात्, रूपवत् इत्यनुमानाच्च । न चायमसिद्धः, शुक्लो घट इतिवत् द्वौ घटावित्यादिप्रत्यक्षस्य सर्वलोकसिद्धत्वात् । द्वित्वादयो जातयः द्रव्यगुणादिव्यतिरिक्तत्वात्, गोत्ववदिति चेत्—न, असिद्धो गुणव्यतिरिक्तत्वसाधकप्रमाणाभावात् । द्वित्वादयो जातयः नित्यत्वे सत्यनेकसमवेतत्वात्, गोत्ववदिति चेत्—न, असिद्धेरेव, द्वित्वादीनां नित्यत्वे प्रमाणाभावात् । संख्या न गुणसंप्रतिपन्ना गुणातिरिक्तत्वात् पटवदिति चेत्—न, [न] गुण इति किं [१] गुणत्वाभावः साध्यते, [२] गुणलक्षणाभावो वा, [३] द्रव्यत्वकर्मत्वरहितजातिमत्त्वाभावो वा, [४] गुणशब्दप्रवृत्तिनिमित्तत्वाभावो वा । ([५] कर्मत्वरहितासमवायिकारणत्वाभावो वा, [६] असमवायिकारणत्वाभावो वा ? ) न प्रथमः, अप्रसिद्धविशेषणत्वात् । **प्राभाकरन्यायभूषणकारादीनां** गुणत्वासिद्धेस्तदभावस्याप्रसिद्धत्वात् । न द्वितीयः, संख्याव्यावृत्तगुणलक्षणाभावसाधने सिद्धसाधनात्, संख्याव्यावृत्तत्वरहितगुणलक्षणाभावसाधने बाधात्, अर्थान्तरत्वाच्च, गुणलक्षणाभावस्य गुणत्वाभावत्वविरहात्, गुणत्वानङ्गीकारवादिनां गुणलक्षणाभावस्य गुणत्वाभावव्याप्यत्वानङ्गीकाराच्च । न तृतीयः, अर्थान्तरत्वात्, द्रव्यत्वकर्मत्वरहितजातिमत्त्वस्य प्रत्यक्षसंख्यायां प्रत्यक्षसिद्धत्वाच्च । न चतुर्थः, पूर्वोपपादितार्थान्तरग्रस्तत्वात्, सिद्धसाधनाच्च । न पञ्चमः, पूर्ववदर्थान्तरग्रस्तत्वात् गुणत्वाभावेन सोपाधित्वाच्च । न षष्ठः, पूर्ववदर्थान्तरत्वात् ॥

**असमवायात् कार्यं कर्म न विद्यते ॥२६॥**

असमवायादित्यत्रानेकेष्विति शेषः । न तावत् पटकर्मणोऽनेकाश्रितत्वे प्रत्यक्षं प्रमाणम्, अननुभवात् । नाप्यनुमानम्, पटकर्म पटव्यतिरिक्तसमवेतम्, कर्मत्वात्,



घटकर्मवदित्यादीनां प्रत्यक्षबाधितत्वात् । पटकर्मणः संख्यात्वरहितजातिमत्त्वाभावो वा, गुणशब्दवाच्यत्वाभावो वा, गुणशब्दप्रवृत्तिनिमित्तत्वाभावो वा ? न प्रथमः, पटश्चलतीति प्रत्यक्षेण पटकर्मणः पटमात्रनिष्ठत्वप्रतीतेः[१] ॥

**संयोगानां द्रव्यम् ॥२७॥**

संयोगी च संयोगाश्च संयोगाः । तेषां द्रव्यं कार्यं सामान्यम् । तथा हि—किं[चिद्] द्रव्यं द्वयोः संयोगयोः कार्यम् । यथा त्रितन्तुकं किंचित् । बहूनां यथा पटः । द्वितन्तुकादिकं पुनरेकेनैव संयोगेन जन्यते ।

नन्वनुपपन्नमिदम्—तन्त्वादिव्यतिरिक्तानां पटादीनामवयविनामभावादिति **सौगताः** । तदयुक्तम्, पटाद्यवयविनां पटोऽयमिति प्रत्यक्षसिद्धत्वात् । न चात्र तन्त्वादय एवालम्बनमिति युक्तम्, परस्परासंयुक्तेषु तन्त्वादिषु पट इत्यादिप्रत्ययप्रसङ्गात् ।

परस्परसंयुक्तास्तन्त्वादयः पटादिप्रत्ययालम्बनमिति चेत्—न, तन्तुवायवेमादिव्यापाराभावे यथाकथंचित् संयुक्तेषु तन्त्वादिषु पटोऽयमित्यादिप्रत्ययप्रसङ्गात् ।

तन्तुवायवेमादिव्यापारसहिताः संस्थानविशेषवन्तः तन्त्वादयः पटादिप्रत्ययालम्बनमिति चेत्—न, संस्थानविशेषशब्देनावयविविवक्षायामवयविसिद्धेः । तन्त्वादिसंयोगविवक्षायां च पूर्वोक्तदोषात् ।

अवयवी अवयवेषु कात्स्न्र्येन वर्तते, एकदेशेन वा ? नाद्यः, द्वितीयावयवादावयविनो विरहप्रसङ्गात्, प्रथमावयव एव सर्वस्यावयविनः परिसमाप्तत्वात् । न द्वितीयः, अवयवेषु वृत्त्यर्थमवयविनोऽवयवान्तरानङ्गीकारात् । अङ्गीकारे वा तत्रापि वृत्त्यर्थमवयवान्तरानुसरणादनवस्थानादिति चेत्—न, अवयविनोऽवयवेषु कात्स्न्र्येन वृत्तिस्वीकारात् । न चैवमवयविनः [कात्स्न्र्येनैकत्रैव वृत्तेरवयवान्तरे तदभावः स्यादिति वाच्यम्,] तत्रापि कृत्स्नस्यावयविनो विद्यमानत्वात् ।

यदेकत्र कात्स्न्र्येन वर्तते तदन्यत्र न वर्तते यथा रूपमिति चेत्—न, कात्स्न्र्यग्रहणवैयर्थ्यात् ।

एकदेशेनानेकस्थूणासु वर्तमानत्वात् वंशादिव्यावृत्त्यर्थं तदिति चेत्—न, प्रतिस्थूणं कृत्स्नस्यैव वंशस्य वर्तमानत्वात् ।

यदेकत्र कात्स्न्र्येन वर्तते न तदन्यत्र वर्तते इत्येतदेवात्र बाधकमिति चेत्—न, अत्रापि कृत्स्नग्रहणस्य वैयर्थ्यात् ।

१. अत्र किंचित् त्रुटितमिति भाति ।

संयोगादिनिवृत्त्यर्थमिति चेत्—न, संयोगादेरपि प्रत्याश्रयं कृत्स्नस्यैव वृत्तेः। तस्माद् बाधकाभावात् पटोऽयमित्यादिप्रत्यक्षमवयविनि प्रमाणमिति सिद्धम् ॥

**रूपाणां रूपम् ॥२८॥**

रूपे रूपाणि च रूपाणि। तेषामवयवगतानामवयविगतं रूपं समानं कार्यम्। उपलक्षणं चैतत् रसादीनाम्। तस्मादवयवगतानां रूपरसगन्धस्पर्शैकत्वैकपृथक्त्वमहत्त्वदीर्घत्वगुरुत्वद्रवत्वस्नेहानामवयविगतरूपरसगन्धस्पर्शैकत्वैकपृथक्त्वमहत्त्वदीर्घत्वगुरुत्वद्रवत्वस्नेहाः समानं कार्यमित्यर्थः ॥

**गुरुत्वप्रयत्नसंयोगानामुत्क्षेपणम् ॥२९॥**

यदा हि देवदत्तः प्रयत्नेन करादिना गुरुत्ववन्तं पाषाणादिकमुत्क्षिपति तदोत्क्षेपणे पाषाणादिगतं गुरुत्वं कारणम्। गुरुत्वरहितानां पवनादीनामुत्क्षेपणासंभवात्। तथा देवदत्तप्रयत्नः, तदभावे उत्क्षेपणासंभवात्। तथा गुरुत्वाधारपाषाणादिदेवदत्तहस्तसंयोगः। द्वितीयादिकमुत्क्षेपणं तु प्रथमोत्क्षेपणजन्यवेगेनापि जन्यते ॥

**संयोगविभागाः कर्मणाम् ॥३०॥**

**कारणसामान्ये द्रव्यकर्मणां कर्माकारणमुक्तम् ॥३१॥**

कारणसामान्यं प्रतिपाद्यते यस्मिन् प्रकरणे तत् कारणसामान्यम्। तत्र कर्म न कर्म जनयतीत्युक्तम्

गुणवैधर्म्यान्न कर्मणाम् [ १. १. २२ ]

इति ॥

॥ इति श्रीमद्वैशेषिके दर्शने प्रथमाध्यायस्य प्रथमाह्निकम् ॥

—०—

# प्रथमाध्यायस्य द्वितीयाह्निकम्

**कारणाभावात् कार्याभावः ॥१॥**

**न तु कार्याभावात् कारणाभावः ॥२॥**

**सामान्यं विशेष इति बुद्ध्यपेक्षम् ॥३॥**

बुद्धिं प्रमाणतया अपेक्षत इति बुद्ध्यपेक्षं सामान्यं विशेष इत्येवंविधबुद्ध्यपेक्षमित्यर्थः। अयं गौरित्याद्यनुवृत्ताकारसाक्षात्कारिणी बुद्धिः सामान्ये प्रमाणम्। अयं परमाणुः गुणकर्मव्यतिरिक्ततन्मात्रनिष्ठभाववानिति साक्षात्कारिणो बुद्धिः परमेश्वरादिनिष्ठविशेषे प्रमाणम्। किंचित् सामान्यमेव, किंचित् सामान्यविशेषः, किंचिद् विशेष एवेत्युक्तम् ॥

तत्र किं सामान्यमेवेत्यपेक्षायां सूत्रम्—

**भावः ॥४॥**

भावो भवनं सत्तेति यावत्। यथा द्रव्यगुणकर्मस्वनुवृत्तत्वात् सत्ता सामान्यम्, तथा सामान्यविशेषसमवायेभ्यो व्यावृत्तत्वात् विशेषोऽपि। तस्मात् सामान्यविशेषः सत्ता। न तु सामान्यमेवेति। तन्न, द्रव्यगुणकर्मान्यतमव्यावृत्तत्वस्य जातिमद्व्यावृत्तत्वस्य वा विशेषत्वस्य सत्ताया[म्]असंभवात्। व्यावृत्तत्वमात्रस्य चात्र विशेषत्वेनाविवक्षितत्वात् ॥

**द्रव्यत्वं गुणत्वं कर्मत्वं सामान्यानि विशेषाश्च ॥५॥**

नन्वनुपपन्नमेतत्— नित्यत्वे सत्यनेकसमवेतत्वस्य सामान्यलक्षणत्वात्, अनेकनिष्ठत्वरहितसत्तावदन्यसमवेत[त्व]स्य विशेषलक्षणत्वात्, तयोश्चैकत्रासमावेशात्। समावेशे वा अतिव्यापकत्वप्रसङ्गादिति। मैवम्, द्रव्यत्वादौ सामान्यलक्षणसत्त्वे विशेषलक्षणाभावात् विशेषपदप्रयोगस्य विशेषसादृश्यव्यावृत्त्यर्थत्वानिबन्धनत्वेन गौणत्वात्। चकारोऽनुक्तसत्तारहितसमवायवत् पृथिवीत्वादिरूपत्वाद्युत्क्षेपणत्वादिसंग्रहार्थः ॥

यदि सत्तारहितसमवायवत् सर्वं सामान्यविशेषस्तर्हि अन्त्यविशेषा अपि सामान्यविशेषाः स्युरित्याशङ्कायां परिहारार्थं सूत्रम्—

**अन्यत्रान्त्येभ्यो विशेषेभ्यः ॥६॥**

अन्त्यविशेषव्यतिरिक्तसत्तारहितसमवायवत् सामान्यविशेष इत्यर्थः। किं पुनरन्त्यत्वं विशेषाणाम् ? अन्ते भवत्वम्। उत्पत्तिविनाशयोरन्ते वर्तन्ते इत्यन्तशब्देन नित्यद्रव्याण्युच्यन्ते। तेषु भवन्तीत्यन्त्यशब्देन विशेषा उच्यन्ते इत्यात्रेयाचार्याः।

यद्वा अन्येषां विशेषाणामन्ते भवन्तीत्यन्त्याः। तथा हि— सत्तापेक्षया द्रव्यत्वं विशेषः। तदपेक्षया पृथिवीत्वादि। तदपेक्षयैकद्रव्यनिष्ठो विशेषः। तदपेक्षया विशेषान्तरं नास्ति। तत्रानुवृत्तत्वानुपपत्तेः ॥

**सन् यतो द्रव्यगुणकर्मसु सा सत्ता ॥७॥**

अस्ति द्रव्यम्, अस्ति गुणः, अस्ति कर्मेति प्रत्ययप्रयोगौ यतो विशेषणादुत्पद्येते सा सत्ता। उपलक्षणमेतत्। तेन द्रव्यमिति यतः पृथिव्यादौ तद् द्रव्यत्वम्। गुण इति यतो रूपादौ तद् गुणत्वम्। कर्मेति यदुत्क्षेपणादौ तत् कर्मत्वम्। एवं सर्वासु जातिषु।

द्रव्यव्यक्तिस्वरूपसमवायप्रमेयत्वादिभ्यो व्यतिरिक्तायाः सत्ताया न प्रमाणमिति चेत्—न, अयं घटः सन्निति प्रत्यक्षाद् घटनिष्ठसत्तासिद्धेः। न चेयमेतद्घटस्वरूपमेव, एतन्निष्ठत्वात्, घटान्तरेऽपि सत्ताभावाच्च। न चेयं द्रव्यं गुणः कर्म वा, गुणवृत्तित्वात्। नापि विशेषः, कार्यवृत्तित्वात्। न समवायः, असम्बन्धत्वात्। नाभावः, रूपादाविव सत्ताया निषेधत्वाभावस्य प्रत्यक्षत्वात्। ततः परिशेषाज्जातिरेव।

ननु तथापि न ब्राह्मणत्वसिद्धिः, क्षत्रियादिव्यावृत्तदेवदत्तादिनिष्ठब्राह्मणत्वस्य प्रत्यक्षेणाननुभवात्। आकारत एवायं मया ब्राह्मण इति ज्ञात इति ब्राह्मणत्वज्ञानमनुव्यवस्यत इति चेत्—न, तस्याप्यसिद्धेः। क्षत्रियादिव्यावृत्ताकारस्यासिद्धावाकारत इत्यस्यासिद्धेः। ब्राह्मणलक्षणावगमसहितेन चक्षुरादिना तदवगम इति चेत्—न, तदभावात्। ब्राह्मणमातापितृजन्यत्वस्य तत्संयोगविभागादावपि व्यापकत्वात्। ब्राह्मणमातापितृजन्यशरीरत्वस्यापि कृतसूकरादावतिव्यापकत्वात्। तज्जन्यमनुष्यत्वस्य सर्गादिजातब्राह्मणेष्वव्यापकत्वात्। कलशसंभूतागस्त्यादौ क्षत्रियसंभूतविश्वामित्रे चाव्यापकत्वात्। ब्राह्मणत्वसिद्धौ ब्राह्मणमातापितृजन्यत्वसिद्धिः। तत्सिद्धौ च ब्राह्मणत्वसिद्धिरितीतरेतराश्रयाच्च। ततो न ब्राह्मणत्वं जातिरिति।

तन्न, ब्राह्मणोऽयं ब्राह्मणोऽयमिति प्रत्यक्षादेव तत्सिद्धेः। अन्यथा गोत्वादेरपि विलयात्। एवं क्षत्रियत्वादयः समर्थनीयाः ॥

**द्रव्यगुणकर्मभ्योऽर्थान्तरं सत्ता ॥८॥**

गुणवृत्तित्वात् कर्मवृत्तित्वाच्च। एकद्रव्यवृत्तित्वान्न द्रव्यम्। द्विविधं द्रव्यमेकद्रव्यमनेकद्रव्यं च। तत्रैकद्रव्यं द्रव्यत्वावान्तरजातिरहितमाकाशादि, एकैकत्वात्। अनेकद्रव्यं द्रव्यत्वावान्तरजातियुक्तम् पृथिव्यादि, तद्व्यक्तीनामनेकत्वात्। तेनैकद्रव्यवृत्तित्वादाकाशकालदिगाश्रितत्वादित्यर्थः ॥



**गुणकर्मसु च भावान्न कर्म न गुणश्च ॥९॥**

द्रव्यत्वगुणत्वकर्मत्वानां द्रव्यगुणकर्मभ्योऽर्थान्तर[त्व]प्रतिपादनार्थं षट्सूत्री–

**[अनेक]द्रव्यवत्त्वेन द्रव्यत्वमुक्तम् ॥१०॥**

**सामान्यविशेषाभावेन च ॥११॥**

**[तथा गुणेषु भावाद् गुणत्वमुक्तम् ॥१२॥**

**सामान्यविशेषाभावेन च ॥१३॥]**[1]

**कर्मणि भावात् कर्मत्वमुक्तम् ॥१४॥**

**सामान्यविशेषाभावेन च ॥१५॥**

द्रव्यत्वमुक्तं गुणत्वमुक्तं कर्मत्वमुक्तमित्यत्र द्रव्यगुणकर्मभ्योऽर्थान्तरमिति शेषः। शेषं पूर्ववत् ॥

**लिङ्गाविशेषात् विशेषलिङ्गाभावाच्चैको भावः ॥१६॥**

लिङ्गं प्रमाणं सदित्यनुवृत्तप्रत्यक्षम्। तस्य सर्वत्राविशेषात् एकैव सर्वत्र सत्ता। विशेषो भेदः। प्रतिव्यक्ति सत्ताभेदग्राहिप्रमाणाभावाच्च। तदनेन सर्वव्यक्तिसमवेतत्वं व्यक्तिसर्वगतत्वं सर्वकालनिष्ठत्वं नित्यत्वं चोक्तमिति ॥

॥ इति श्रीमद्वैशेषिके दर्शने प्रथमाध्यायस्य द्वितीयाह्निकम्

प्रथमोऽध्यायश्च ॥

—०—

१. बन्धनीस्थितं सूत्रद्वयं मातृकायामनुल्लिखितमपि व्याख्यया अपेक्षितम्।

# द्वितीयाध्यायस्य प्रथमाह्निकम्

**रूपरसगन्धस्पर्शवती पृथिवी ॥१॥**

**रूपरसस्पर्शवत्य आपो द्रवाः स्निग्धाः ॥२॥**

**तेजो रूपस्पर्शवत् ॥३॥**

**वायुः स्पर्शवान् ॥४॥**

सप्तम्यर्थे मतुप् न षष्ठ्यर्थे। गन्धवती गन्धाश्रय इति यावत्। पृथिवी गन्धवत्त्वेन जलादिभ्यो भिद्यते रसवत्त्वेनानलादिभ्यो रूपवत्त्वेनाकाशादिभ्यः।

तत्र रूपं द्विविधम्–भास्वरमभास्वरं च। आद्यं तेजसः। द्वितीयं द्विविधम्–स्वच्छमस्वच्छं च। आद्यमुदकस्य। द्वितीयं पृथिव्याः। तेन भास्वरत्वस्वच्छत्वरहितरूपवती पृथिवीति लक्षणम्। तदपि सप्तविधम् शुक्लं कृष्णं नीलं हरितं पीतं लोहितं [ चित्रं ] चेति। शुक्लत्वादयो रूपत्वावान्तरजातयः। भास्वरत्वस्वच्छत्वे शुक्लत्वावान्तरजाती। न च रूपत्वे मानाभावः, रूपं रूपमित्यनुगतबुद्धेः।

रसः सप्तविधः-मधुरोऽम्लो लवणस्तिक्तः कटुः कषायश्चित्रश्चेति। मधुरो द्विविधः-अव्यक्तो व्यक्तश्चेति। आद्य उदकस्य। अव्यक्तत्वं जातिविशेषः। द्वितीयः पृथिव्याः। तेन व्यक्तरसवती पृथिवीति लक्षणम्। व्यक्तो मधुरादिभेदेन सप्तधा। चित्ररूपवत् चित्ररसो हरीतक्यादौ समर्थनीयः।

गन्धो द्विविधः सुरभिरसुरभिरिति। सुरभित्वासुरभित्वे गन्धत्वावान्तरजाती।

प्रत्यक्षस्पर्शस्त्रिविधः उष्णः शीतोऽनुष्णाशीत इति। आद्यस्तेजसः। द्वितीय उदकस्य। अनुष्णाशीतो द्विविधः-स्पर्शान्तरव्यञ्जकोऽव्यञ्जक[श्च]इति। आद्यो वायोः द्वितीयः पृथिव्या इति।

आपो द्रवाः स्निग्धा इति न युक्तम्, द्रवत्वस्नेहयोः पृथिव्यपृथिवीनिष्ठत्वेन सामान्यगुणत्वात्। सांसिद्धिकं द्रवत्वं विशेषगुण इति चेत्–न, सांसिद्धिकस्य निर्वक्तुमशक्यत्वात्। नित्यं तदिति चेत्–न, कार्यजलद्रवत्वे तदभावात्। तेजःसंयोगाजन्यत्वं तदिति चेत् न, तेजसा विलीनकरकादिद्रवत्वस्य तेजःसंयोगजन्यत्वात्। घृतादयो न स्वाभाविकस्नेहवन्तः, पार्थिवत्वात्। कथं तर्हि घृतादौ स्नेहव्यवहार इति चेत्-पृथिवीत्वावान्तरघृततैलवसामात्रनिष्ठजातेरिति ब्रूमः।

तेजो रूपस्पर्शवत्। तेजसो रूपं भास्वरमेवेत्याचार्याः। तन्न, अग्न्यादेररुणकपिलरूपोपलम्भात्, बाधकाभावाच्च। स्पर्शोऽप्युष्ण एव। कथं तर्हि चान्द्रे महसि



तदमुपलम्भः ? अभिभूतत्वात्। शैत्यप्रतीतिः कथमिति चेत् ? अभिभावके [शीत]-स्पर्शस्य संयुक्तसमवायेन स्फटिके लौहित्यवत् प्रतीतेरिति।

तेजः केषाञ्चिन्मते गुरुत्ववदपि।

वायुः स्पर्शवान्। स्पर्शान्तरव्यञ्जकस्पर्शो वायोः। स्नातस्य वातस्पर्शात् शीतप्रतीतेः। त्वगिन्द्रियस्पर्शात् स्पर्शप्रतीतेः ॥

**त आकाशे न विद्यते ॥५॥**

ते रूपादयः ॥

**सर्पिर्जतुमधूच्छिष्टानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् ॥६॥**

सर्पिर्जतुमधूच्छिष्टानामित्युपलक्षणम्; तैलादिद्रवत्वस्यापि तेजःसंयोगजन्यत्वात्। अग्निसंयोगग्रहणमप्युद्भूतोष्णस्पर्शतेजस उपलक्षणम्। एवं तु [सूर्य]-तेजःसंयोगादपि घृतादिद्रवत्वोपपत्तेः ॥

**त्रपुसीसलोहरजतसुवर्णादीनां च तैजसानामग्निसंयोगाद् द्रवत्वमद्भिः सामान्यम् ॥७॥**

अग्निसंयोगादिति वर्तमाने पुनस्तद्ग्रहणं नियमार्थम्। तेन सुवर्णादीनामग्निसंयोगादेव द्रवत्वम्। घृतादीनां तु खरतरतपनालोकादिसंयोगादपि। सुवर्णादयस्तैजसाः भास्वररूपत्वात्। आलोकवत्। नासिद्धः, अपसारितमलसुवर्णकृपाणादीनामन्धकारेऽपि भास्वररूपोपलब्धेः।

सुवर्णादि पार्थिवम्, नैमित्तिकद्रवत्वाधिकरणत्वात् घृतवदिति चेत्—न, भास्वररूपवत्त्वाभावेन सोपाधित्वात्।

नन्वेवमिन्द्रनीलादीनां भास्वररूपवत्प्रभारम्भकाणां तैजसत्वं प्राप्तम्। बाढम्। कथं तर्हीन्द्रनीलपद्मरागादीनां पार्थिवविशेषेषु भाष्यकारादिभिर्गणनमिति चेत्—नीलिमगुरुत्वाद्यधिकरणेन्द्रनीलादीनां पार्थिवत्वादित्यवेहि ॥

**विषाणी ककुद्मान् प्रान्तेवालधिः सास्नावानिति गोत्वे दृष्टं लिङ्गम् ॥८॥**

वायोः सामान्यतोदृष्टं प्रमापयितुमिच्छता तत्प्रामाण्यसिद्ध्यर्थं दृष्टं सूत्रकृतोच्यते। विष[ा]णमस्यास्तीति विषाणी। विषाणशब्देन विषाणविशेषो विवक्षितः। विषाणमात्रस्य महिष्यादिगतत्वेन गोत्वव्यभिचारात्। वालधिः पुच्छम्। प्रान्तेवालधिरित्यलुक्समासः। इतिशब्देन नखरविशेषादेः परिग्रहः। सर्वे चैते भावप्रधाना निर्देशाः। तेनायं गौर्विषाणविशेषवत्त्वात् ककुद्मत्त्वादित्यादि ॥

**वायोः स्पर्शश्च ।।९।।**

**न चान्येषां स्पर्श इत्यदृष्टलिङ्गो वायुः ।।१०।।**

स्पर्शश्चेति चकारोऽनुक्तगुणत्वबाह्येन्द्रियग्राह्यत्वत्वगिन्द्रियग्राह्यत्वसमुच्चयार्थः। तथा हि प्रतिपन्नस्पर्शः क्वचिदाश्रितः स्पर्शत्वात्, गुणत्वात्, त्वगिन्द्रियग्राह्यत्वात्, बहिरिन्द्रियग्राह्यत्वात्, घटस्पर्शवदिति ॥

**अद्रव्यवत्त्वाद् द्रव्यम् ।।११।।**

द्रव्यशब्देन कार्यद्रव्यमभिमतम्, प्रकृतत्वात्। न कार्यद्रव्यमद्रव्यम्, [द्रव्य] सदृशम् कार्यगुणकर्मादि। अब्राह्मणवन्नञः पर्युदासवृत्तित्वात्। तदस्मिन्नस्तीत्य-द्रव्यवान्। कार्याश्रय इत्यर्थः। वायुर्द्रव्यम् कार्याश्रयत्वात् घटवत् ॥

**अद्रव्यत्वेनानित्यत्वमुक्तम् ।।१२।।**

आश्रयद्रव्यरहितत्वमद्रव्यत्वम्। गङ्गानदी[व यत्स्थिरमाश्रयद्रव्यं] तदत्र नास्तीति। नापि नित्यत्वम्। अयं वायुर्न नित्यद्रव्यम् आश्रितत्वात् घटवत्। उक्तमिति भगवतोलूकवेषधारिणा महादेवेनेत्यर्थः ॥

**वायोर्वायुसंमूर्च्छनं नानात्वलिङ्गम् ।।१३।।**

एकस्य वायोर्वाय्वन्तरेण संयोगो वायुनानात्वं साधयति। अयं वायुर्वायु-तदितरत्वरहितसंयोगवान् संयोगित्वात्, घटवत्।

भाष्यकारास्तु समाने वायौ भिन्नदिक्क्रिययोर्वाय्वोः संमूर्च्छनमित्यामनन्ति ॥

नास्ति वायुत्वमिति पूर्वपक्षं सूत्रद्वयेन रचयति—

**वायुरिति सति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ।।१४।।**

**सामान्यतो दृष्टाच्चाविशेषः ।।१५।।**

सत्यपीन्द्रियार्थसन्निकर्षे वायुरिति साक्षात्कारानुदयात् नापि दृष्टं लिङ्गम्। अतएव नापि सामान्यतोदृष्टमिति सूत्रद्वयार्थः ॥

अथ सिद्धान्तसूत्रम्—

**तस्मादागमिकम् ।।१६।।**

आगमप्रसिद्धमेव वायुत्वम्। स्पर्शविशेषमात्रनिष्ठं वायुत्वमस्तीति कणादादि-वचनस्यैवागमत्वात्। न च तत्र मूलाभावः। ईश्वरप्रसादासादितकणादसाक्षात्कारस्य मूलत्वात्। ईश्वरवाक्यस्य वा तत्र मूलत्वात्। तस्य नित्यत्वेन मूलान्तरानपेक्षणात् ॥



**संज्ञाकर्म त्वस्मद्विशिष्टानां लिङ्गम् ।।१७।।**

संज्ञा कर्म विषयोऽस्येति संज्ञाकर्म, इयमस्य संज्ञेति ज्ञानम्। तदस्मद्विलक्षणानां पुरुषाणां गमकम्। इदमस्य वाचकमिति ज्ञानं वृद्धव्यवहारात् शृङ्गग्राहिकया संकेताद् वा आद्यः सृष्ट्यादौ न संभवति, वृद्धान्तराणामभावात्। ततः संकेतादेव निश्चीयते। न च सर्वथाऽव्युत्पन्नानामियमस्य संज्ञेति बोधोत्पत्तेः।

वाय्वप्रत्यक्षेऽपि संकेतग्रहणोपपत्तेर्मन्वादीनां किमतीन्द्रियार्थदर्शित्वेनेति शङ्कायां सूत्रम्—

**प्रत्यक्षपूर्वकत्वात् संज्ञाकर्मणः ।।१८।।**

अस्येयं संज्ञेश्वरस्याभिप्रेतेति ज्ञानं संज्ञाकर्म। तच्च नास्मदादीनां योगजधर्म-निरपेक्षेन्द्रियवेद्यत्वासंभवात्। नापि लिङ्गजन्यम्। सृष्ट्यादौ मन्वादिभिः परमेश्वराभि-प्रायव्याप्तलिङ्गानवगमात्। तस्मान्महादेवप्रसादासादितयोगजधर्मसध्रीचीनमनसा वाय्वादयो वाय्वादिपदैर्बोद्धव्या इतीश्वराभिमतमिति मन्वादिभिर्निश्चीयत इति मन्वादीनां सर्वज्ञत्वसिद्धिः। अतएवास्मद्विशिष्टानामिति बहुवचनम् ॥

इदानीमाकाशे सामान्यतोदृष्टं व्युत्पादयितुं परमतं तावदाह—

**निष्क्रमणं प्रवेशनमित्याकाशस्य लिङ्गम् ।।१९।।**

यदि द्वारदेशे गगनं न स्यात् कुड्यादिदेश इव द्वारदेशेऽपि देवदत्तादेर्निष्क्रमणं प्रवेशनं च न स्यात्। अस्ति च तत्। तस्मादाकाशमनुमीयते इति ॥

तद्दूषयति—

**तदलिङ्गमेकद्रव्यत्वात् कर्मणः ।।२०।।**

न तावद्देवदत्तनिष्क्रमणप्रवेशने गगनं समवायितयानुमापयतः। विमतं सम-वायिकारणजन्यम् भावकार्यत्वादित्यस्य देवदत्तेन सिद्धसाधनत्वात्। तदतिरिक्त-समवायिजन्यत्वसाधने बाधात्। बाधनेऽपि विमतम् एकद्रव्याश्रितं कर्मत्वात् सम्मत-वदित्यनुमानाच्च ॥

असमवायितया तर्हि गगनमनुमापयत इत्यत आह—

**कारणान्तरानुक्लृप्तिवैधर्म्याच्च ।।२१।।**

कारणान्तरस्य प्रस्तावादसमवायिकारणस्यानुक्लृप्तिवैधर्म्यादनुमितिवैधर्म्यम्। विमतं गुणासमवायिकारणकं कर्मत्वात् संमतवदित्यनुमानात्। गगनस्यासमवायि-तया नानुमानम् ॥

अस्तु तर्हि निमित्ततया गगनानुमानम्। अत आह—

**संयोगादभावः कर्मणः ।।२२।।**

मूर्तकुड्यादिसंयोगादभावोऽनुत्पत्तिः कर्मणः। तस्मान्मूर्तद्रव्यसंयोगस्य कर्मप्रतिबन्धकत्वं तदभावस्य कर्मकारणत्वमिति तात्पर्यम् ॥

गगनगोचरं सामान्यतोदृष्टं व्युत्पादयितुमुपक्रमते—

**शब्दः स्पर्शवतामगुण इति ॥२३॥**

तत्र शब्दशब्दो लिङ्गमित्यनेनान्वीयते। शब्दश्च गुणत्वादिलिङ्गाश्रयत्वाल्लिङ्गम्। शब्दः क्वचिदाश्रितः गुणत्वात् कार्यत्वाच्च रूपवत् घटवत्। गुणत्वकार्यत्वे वक्ष्येते ॥

**कारणगुणपूर्वकः कार्यगुणो दृष्टः ॥२४॥**

कार्ये शङ्खादौ जायमाना रूपादयो विशेषगुणाः तदवयवगुणैरारभ्यन्ते। नैवं शङ्खादिशब्दः ॥

**कार्यान्तराप्रादुर्भावात् ॥२५॥**

कार्यान्तरे रूपादौ शब्दस्यानुत्पत्तेः, शङ्खादावपि शब्दो न जायत इत्यर्थः। शङ्खादयो न शब्दवन्तः कार्यत्वाद् घटवत् ॥

**शब्दः स्पर्शवतामगुणः ॥२६॥**

स्पर्शवन्तो न शब्दवन्तः स्पर्शवत्त्वात् घटवत्। यद् वा शब्दो न स्पर्शवद्गुण इति प्रतिज्ञा ॥

तत्र तर्कहेतुप्रदर्शनार्थं सूत्रद्वयम्—

**परत्र समवायात् ॥२७॥**

**प्रत्यक्षत्वाच्च ॥२८॥**

प्रत्यक्षत्वं श्रोत्रग्राह्यत्वम्, अन्यथा रूपादौ व्यभिचारात्। शब्दो न स्पर्शवद्गुणः श्रोत्रग्राह्यत्वात् शब्दत्ववत्। अत्र तर्कः परत्र समवायादिति। परत्रेति कर्णशष्कुलीदूरस्थे शङ्खादौ समवायादित्यर्थः। परत्र समवायादित्यत्र श्रोत्रग्राह्यत्वाभावप्रसङ्गादिति शेषः। स्पर्शवद्गुणत्वे शब्दस्य कर्णशष्कुल्यवच्छिन्नाकाशेन समवायो न स्यात्, तस्य शङ्खादिसमवेतत्वात्। नापि संयुक्तसमवायः, व्यवहितशङ्खादिना कर्णशष्कुल्याः संयोगायोगात्। न च [संबन्धान्तरमस्ति। न चासंबद्धस्य ग्रहणं संभवति। तस्माद् यद्ययं श्रोत्रेण न संबद्धस्तर्हि तेन न गृह्येतेति तर्कः। प्रत्यक्षत्वाच्च ॥

**न [दिक्]कालात्मगुणो न मनसो गुणः ॥२९॥**

शब्दो न दिक्कालात्ममनोगुणः, श्रोत्रग्राह्यत्वात् शब्दत्ववत्। आत्मा न शब्दवान् अस्मत्प्रत्यक्षत्वात्, रूपवत्। पृथिव्युदकतेजोवायुदिक्कालमनांसि न शब्दवन्ति



अश्रोत्रत्वात् शङ्खवत्। नायमसिद्धः। न श्रोत्रं कार्यत्वात् घटवत्। नित्यपृथिव्यादयो न श्रोत्रम्, स्पर्शवत्त्वाद्, घटवत्। दिक्कालमनांसि न श्रोत्रम् विशेषगुणरहितत्वात्, रूपवत्। आत्मा न श्रोत्रम्, अस्मन्मानसप्रत्यक्षत्वात् सुखवदिति तत्सिद्धेः। अयं शब्दसाक्षात्कार इन्द्रियजन्यः, कार्यसाक्षात्कारत्वात् रूपसाक्षात्कारवत् इति श्रोत्रसिद्धिः। शब्दसाक्षात्कारजनकेन्द्रियस्य श्रोत्रत्वात्। शब्दः क्वचिदाश्रितो गुणत्वात् रूपवदित्याकाशसिद्धिः ॥

तदिदमुक्तम्—

**शब्दो लिङ्गमाकाशस्य इति ॥३०॥**

आकाशस्य प्रत्यक्षत्वात् किमनुमानव्युत्पादनेनेति चेत्—न, मानाभावात्। आकाशं प्रत्यक्षम्, अस्मत्प्रत्यक्षगुणवत्त्वात्, घटवदिति चेत्—न, सिद्धसाधनात्। योगीश्वरप्रत्यक्ष[व्यतिरिक्तास्मत्प्रत्य]क्षत्वं साध्यमिति चेत्—न, मीमांसकस्य व्यावर्त्याभावेनास्मद्विशेषणवैयर्थ्यात्, भट्टानां हेत्वसिद्धेश्च ॥

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥३१॥**

आकाशं द्रव्यं गुणवत्त्वात्, घटवत्। आकाशं नित्यमनाश्रितत्वात्, आत्मवदिति। यथा धर्मिग्राहकप्रमाणाद् वायुपरमाणूनां नित्यत्वं तथा आकाशस्यापि। एवमन्येषामपि दिक्कालादीनां द्रव्यत्वनित्यत्वे द्रष्टव्ये इति ॥

**तत्त्वं भावेन ॥३२॥**

तस्य भावस्तत्त्वम्। ततो भेदाभावः। भावेनेति सत्तयेत्यर्थः। व्याख्यातमित्यनुषङ्गः। अनेन सूत्रेणाकाशस्यैकत्वं प्रतिपादयता अर्थान्नित्यत्वं सर्वगतत्वं च प्रतिपादितम् ॥

॥ इति श्रीमद्वैशेषिके दर्शने द्वितीयाध्यायस्य प्रथमाह्निकम् ॥

——•——

# द्वितीयाध्यायस्य द्वितीयाह्निकम्

**पुष्पवस्त्रयोः सति सन्निकर्षे गन्धान्तराप्रादुर्भावो वस्त्रे गन्धाभावलिङ्गम् ॥१॥**

पुष्पवस्त्रसन्निकर्षाद् वस्त्रे पुष्पगन्धविलक्षणं गन्धान्तरमुत्पद्यते, पुष्पगन्धसजातीयं वा ? नाद्यः, तस्यानुपलम्भात् । न द्वितीयः, पुष्पगन्धव्यतिरिक्तस्य तत्सजातीयस्यानुपलम्भात् । पुष्पगन्धस्यैव पुष्पादिसंयुक्तवस्त्रविशेषणतया अवभासात् । पुष्पगन्ध एवायमित्यनुभवात् । अयं पुष्पादिगन्धः एवंजातीयत्वात् संप्रतिपन्नवत् । वस्त्रं नैवंविधगन्धवत् वस्त्रत्वात् वस्त्रान्तरवत् । न चापनीतेष्वपि पुष्पादिषु वस्त्रे तथाविधगन्धोपलम्भात् नायं पुष्पादिगन्ध इति वाच्यम्, पुष्पाद्यपनयेऽपि तदवयवानपनयात् । तदेवं निर्गन्धत्वं वस्त्रादीनामिति स्थितम् ॥

**एतेनाप्स्वनुष्णता व्याख्याता ॥२॥**

यथा न पुष्पसंयोगाद् वस्त्रे गन्धादयः, तथा न वह्निसंयोगादुदके उष्णस्पर्शः, किंतु वह्निगत एवोष्णस्पर्शस्तत्संयुक्ते जलादाववभासत इति ॥

**व्यवस्थितः पृथिव्यां गन्धः ॥३॥**

व्यवस्थितः विविधप्रकारेणावस्थितः । क्वचिदुद्भूतः, [यथा पुष्पादौ, क्वचिदनुद्भूतः], यथा घ्राणे । क्वचिदभिभूतः, यथा हिङ्गुसम्बन्धेन व्यञ्जन इति ॥

**तेजःसूष्णता ॥४॥**

व्यवस्थितेति शेषः । कचिदुद्भूता, यथा वह्नेः । क्वचिदनुद्भूता, यथा चक्षुषः । क्वचिदभिभूता यथा सुवर्णे ॥

**अप्सु शीतता ॥५॥**

**अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि ॥६॥**

अपरस्मिन् परमित्यत्र परस्मिन्नपरमिति पूरणीयम् । भावप्रधानो निर्देशः । तेन परत्वापरत्वयौगपद्यायौगपद्यचिरत्वक्षिप्रत्वानि काललिङ्गानीत्यर्थः । यथा परत्वापरत्वे गुणौ प्रत्यक्षौ, तथा यौगपद्यादयोऽपि गुणाः प्रत्यक्षाः । न तावद् यौगपद्यादयो द्रव्याणि, नवातिरिक्तत्वात् । नापि कर्माणि, प्रत्यक्षेणैव तेषां कर्मत्वनिषेधात् । संयोगविभागाजनकत्वाच्च । न सामान्यविशेषसमवायाः, कार्यत्वात् । नाभावः, परत्वादिवद् भावत्वानुभवात् । यौगपद्यमेककालता, अयौगपद्यं भिन्नकालता इत्यादि कालविशेषा एव यौगपद्यायौगपद्यादय इति चेत्-न, कालस्यैक्यात्, तेषां चानेकत्वात् ।



ननु कालशब्देन कालोपाधयः सूर्यगत्यादय उच्यन्ते । अतो यौगपद्यमेककालतेत्येकसूर्यगत्यवच्छिन्नता, भिन्नसूर्यगत्यवच्छिन्नत्वमयौगपद्यमित्यादीति चेत्—न, सूर्यगतीनां सूर्यनिष्ठत्वात् यौगपद्यादीनां देवदत्तनिष्ठत्वात् । तस्माद् यौगपद्यादयो गुणाः, एतेषामपरत्वेऽन्तर्भावः । एतैः कालोऽनुमीयते ॥

यद्येकः कालः, कथं तर्हि युगपत्कालोऽयुगपत्कालः क्षिप्रकाल इति ? तत्राह—

**कार्यविशेषेण नानात्वम् ॥७॥**

यौगपद्यादिकार्यभेदजनकतया काले नानात्वव्यवहार इत्यर्थः । अपरस्मिन् परं युगपदयुगपच्चिरं क्षिप्रमिति ॥

**नित्येष्वभावादनित्येषु भावात् ॥८॥**

अर्थान्तरं हि नित्यं गगनादि । अनित्यं घटादि । न च तस्मिन् विषये परत्वादिप्रत्ययो जायते ॥

**कारणे कालाख्येति ॥९॥**

देवदत्तव्यतिरिक्तदेवदत्तयज्ञदत्तयौगपद्याद्यसमवायिकारणसंयोगसमवायिकारणे कालसंज्ञा । मूर्तान्यत्वे सति यौगपद्याद्यसमवायिकारणाश्रयः काल इति ॥

**इत इदमिति यतस्तद् दिशां लिङ्गम् ॥१०॥**

अस्मादिदं परम्, अपरम्, पूर्वेण, दक्षिणेनाधस्तादूर्ध्वमित्यादिप्रत्यया यतो विशेषणात् परत्वापरत्वपूर्वत्वदक्षिणत्वादेस्तद् दिशां लिङ्गम् । यथा परत्वापरत्वे गुणौ प्रत्यक्षौ तथा पूर्वत्वदक्षिणत्वादयोऽपि, तुल्ययोगक्षेमत्वात् । न च पूर्वादिप्रत्ययेषु मेरुं प्रदक्षिणयतः सूर्यस्य प्रथमचरमादिसंयोगा एव विशेषणमिति युक्तम् । मेरुसूर्यौ प्रथमसंयोगाश्रयतया दिशमनुमापयतः ॥

विमते घटपरत्वापरत्वे अन्यघटविभुद्रव्यसंयोगासमवायिकारणके घटपरत्वापरत्वात् संप्रतिपन्नवत् ॥

प्रतिप्रत्ययं पूर्वादयो भिद्यन्ते नवेति सन्देहं निराचष्टे—

**तत्त्व[ं] भावात् ॥११॥**

यथा प्रतिप्रत्ययं सत्ता न भिद्यते तथा पूर्वादयोऽपीत्यर्थः ॥

**कार्यविशेषेण नानात्वम् ॥१२॥**

कार्यं प्रत्ययो व्यवहारश्च, तयोर्विशेषेण वैलक्षण्येन नानात्वं भेदो दिशामितिशेषः ।

ननु यया दिशोदयकाले सूर्यः संयुज्यते सा प्राची पूर्वा दिक्, प्रागञ्चतीति व्याख्यानात् । यया मध्याह्ने[सा]ऽवाची दक्षिणा । यया अस्तमये सा प्रतीची पश्चिमा । यया रात्रौ सोदीची । अञ्चतीति गत्या तत्कार्यसंयोगलाभात् । न चोदयकालीनदिक्-

सूर्यसंयोगाभावान्मध्याह्नादौ प्राच्यादिव्यवहारानुपपत्तिः। तस्याप्युपलक्षणत्वेन तद्व्यवहारसंभवात्। अन्यथातीतैः कुरुभिः कुरुक्षेत्रमितीदानीन्तनव्यवहाराभावप्रसङ्गात्॥

तदिदमुक्तम्—

**भूतपूर्वात् ॥१३॥**

भूतो वर्तमानः। तस्मात्पूर्वोऽतीतः। तस्मात् प्राचीव्यवहार इत्युपलक्षणात् प्राचीव्यवहारोपपत्तेः॥

तदिदमुक्तम्—

**भविष्यतः ॥१४॥**

तदेतद् दूषयति—

**आदित्यसंयोगाद् भूतपूर्वाद् भविष्यतो भूताच्च ॥१५॥**

न प्राचीप्रत्ययव्यवहाराविति शेषः। अस्ति तावदयमस्मात् पूर्वेणेत्यादिविशिष्टे घटादिप्रत्ययः। न चायमानुमानिकः, लिङ्गाभावात्। नापि स्मृतिः, अननुभवात्। तस्मादिन्द्रियजः। न चात्र दिङ्मात्रं विषयः। अयमस्मात् पूर्वेण, अयमस्माद् दक्षिणेनेत्यादेरविशेषप्रसङ्गात्। न चात्र सूर्यदिक्संयोगविशेषो विषयः, मेघादिव्यवहितसूर्यसंयोगाप्रतीतावपि अयमस्मात् पूर्वेणेति चाक्षुषप्रतिभासात्॥

**एतेन दिगन्तराणि व्याख्यातानि ॥१६॥**

पूर्वदक्षिण-दक्षिणपश्चिम-पश्चिमोत्तरोत्तरपूर्वोर्ध्वाधोलक्षणानि दिगन्तराणि दिग्विशेषाः व्याख्याताः॥

सन्देहः साधारणधर्मदर्शनात्, साधारणधर्मादर्शनात् विप्रतिपत्तेरुपलब्धेरनुपलब्धेरसाधारणधर्मदर्शनाच्च। तत्र प्रथमं तावदाह—

**सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च संशयः ॥१७॥**

सामान्यप्रत्यक्षात् स्थाणुपुरुषसाधारणोर्ध्वत्वादिधर्मदर्शनात्, विशेषाप्रत्यक्षात् स्थाणुपुरुषव्यावर्तकशिरःपाण्यादिवक्रकोटराद्यनुपलम्भात्, विशेषस्मृतेः स्थाणुपुरुषस्मरणात् संशयः। जायत इति शेषः। चकारोऽनुक्तसमुच्चयार्थः साधारणधर्मानुमितिविशेषानुमित्यादीन् समुच्चिनोति। विशेषौ च विशेषाश्च विशेषाः। तेषां स्मृतेः संदेहो जायते। विशेषयोः स्मृतेर्यथा—स्थाणुर्वा पुरुषो वेति। विशेषाणां स्मृतेर्यथा—शब्दो द्रव्यं गुणः कर्म वेति॥

**दृष्टमदृष्टं च ॥१८॥**

प्रत्यक्षाप्रत्यक्षविषयत्वेन साधारणधर्मदर्शनसंदेहस्य द्वैविध्यमित्यर्थः॥



साधारणधर्मादर्शनात् संदेहमाह—

**यथादृष्टमयथादृष्टम् ॥१९॥**

यथादृष्टम् येन विशेषणेन विशिष्टं दृष्टम्। अयथादृष्टम् अन्यविशेषणविशिष्टं दृष्टम्। संदेहं प्रसूत इति शेषः। यथा कदाचिद्देवदत्तं जटिलमुपलभ्य कदाचिच्च तं मुण्डमुपलभ्य इदानीं प्रावृतशिरसं देवदत्तमुपलभमानस्य अयं जटिलो मुण्डो वेति संदेहः स्यात्॥

**उभयथादृष्टत्वाच्च ॥२०॥**

विप्रतिपत्तिमूलसंशयोऽयमनुमानद्वयेन वचनद्वयेन वा परस्परविरुद्धधर्मवत्तया जायते। यथा शब्दो नित्यः, शब्दोऽनित्यः॥

उपलब्ध्यनुपलब्धिभ्यां संन्देहमाह—

**विद्योपलब्धिरविद्यानुपलब्धिः ॥२१॥**

आभ्यां संशयो जायते। यथा दूराद् देशविशेषे जलमुपलभ्य प्रवृत्तस्य जललाभात् अयं प्रदेशो जलवानिति निर्णयः। इदानीं देशविशेषे जलोपलब्धेः [परत्र] संदेहः किमयं जलवान् नवेति। अनुपलब्धेर्यथा—दूरानुपलब्धोदकेऽपि क्वचिदुदकाभावः क्वचित् तद्भाव इति दृष्टम्। इदानीं दूरात् तटाकादावुदकानुपलब्धेः सन्देहः किमयमुदकवान् न वेति॥

असाधारणधर्मात् सन्देहं दर्शयितुमसाधारणधर्ममुपलक्षणमाह—

**श्रोत्रग्रहणो योऽर्थः स शब्दः ॥२२॥**

श्रोत्रं ग्रहणं ग्राहकं यस्य स श्रोत्रग्रहणः। अर्थः अर्थत्वसामान्यवान्। श्रोत्रग्राह्यं शब्दलक्षणमसाधारणो धर्मः शब्दे संदेहं जनयति—किमयं द्रव्यं गुणः कर्म वेति॥

**एकद्रव्यत्वान्न द्रव्यम् ॥२३॥**

एकद्रव्येति सामान्यवत्त्वसूचनार्थम्, सूत्रपदानि कस्यचित् सूचकानि भवन्तीति न्यायात्। शब्दो न द्रव्यम् सामान्यवत्त्वे सति एकाश्रितत्वात्, रूपवत्॥

**अचाक्षुषत्वाच्च प्रत्यक्षस्य शब्दो न कर्म ॥२४॥**

प्रत्यक्षत्वे तस्याचाक्षुषत्वात् रसवत्। चकारोऽनुक्तसामान्यवत्त्वसमुच्चयार्थः। शब्दो गुणः सामान्यवत्त्वे सति, अचाक्षुषत्वे सति बाह्येन्द्रियग्राह्यत्वात्, रसवत्॥

शब्दो नित्योऽनित्यो वेति संदेहं निराकरोति—

**गुणस्य सतोऽपवर्गः कर्मभिः साधर्म्यम् ॥२५॥**

तस्माच्छब्दोऽनित्य इति सूत्रार्थः ।

अन्ये तु यदि गुणसाधर्म्याच्छब्दो गुणस्तर्हि कर्मसाधर्म्यादाशुतरविनाशित्वात् कर्म [शब्दः स्या]दिति शङ्कायां साधर्म्यसमा जातिरियमिति प्रतिपादनार्थमिदं सूत्रं व्याचक्षते ।

शब्दानित्यत्ववादिना शब्दनित्यत्वसाधनं दूषणीयम् । शब्दानित्यत्वसाधनं च समर्थनीयम् । परपक्षसाधननिराकरणपूर्वकस्वपक्षसाधनसमर्थनावधित्वाद् वादस्य । अन्यथा तत्त्वनिर्णयासिद्धेः ॥

तत्राचार्यः परपक्षसाधनं निराचष्टे—

**सतो लिङ्गाभावात् ॥२६॥**

न ह्युच्चारणप्रयत्नानन्तरमुपलब्धस्य गका[रा]देरुपलब्धेः प्रागूर्ध्वं च सत्त्वे प्रमाणमस्ति । नित्यत्वं हि सदा सत्त्वम्, अविनाशित्वं वा । न चैतदुभयं गकारादौ प्रत्यक्षम् । नाप्यानुमानिकम्, तदनिरूपणात् ॥

नित्यत्वे बाधकमाह—

**नित्यवैधर्म्यात् ॥२७॥**

अस्ति हि शब्दे नित्यवैधर्म्यम्, सामान्यवत्त्वे सति अस्मद्बाह्यप्रत्यक्षत्वादिति । आकाशमचाक्षुषम्, अरूपिद्रव्यत्वात्, सर्वगतत्वात्, सर्वदा स्पर्शवद्द्रव्यत्वात् । आत्मवत् ॥

**कारणवतो विकारात् ॥२८॥**

उत्कृष्टापकृष्टप्रयत्नादिकारणवतो विकारादुत्कर्षनिकर्षादेः । तथा हि— केचिच्छब्दाः कुतश्चिदुत्कृष्यन्ते, केचित् कुतश्चिदपकृष्यन्ते सुखादिवत् । न खलु नित्यमुत्कर्षनिकर्षवत् कार्यत्वात् । कार्यत्वं प्रागभावप्रतियोगित्वमुत्पत्तिमत्त्वं वा । तस्माच्छब्दोऽनित्य इति । शब्दः कार्यः सामान्यवत्त्वे सत्यस्मद्बाह्यप्रत्यक्षत्वात्, उत्कर्षनिकर्षवत्त्वाच्च ॥

नित्यत्वसाधनस्य प्रतिकूलतर्कपराहतिमाह—

**दोषात् ॥२९॥**

सर्वदोपलब्धिप्रसङ्गदोषात् । यदि शब्दो नित्यः स्यात् सदोपलभ्येत, योग्यत्वात् ॥



**संयोगाद् विभागाच्छब्दाच्च शब्दनिष्पत्तिः ॥३०॥**

आद्यगकारादीनां प्रयत्नतल्वोष्ठपुटसंयोगविभागजन्यत्वस्य प्रत्यक्षत्वात् । श्रूयमाणशब्दस्य शब्दजन्यत्वस्य साधितत्वात् ॥

**लिङ्गाच्चानित्यः ॥३१॥**

न केवलं प्रत्यक्षात्, लिङ्गाच्चानित्यः । शब्द इति शेषः । योग्यानुपलब्धिसहितं प्रत्यक्षं गकारस्योपलब्ध्यनन्तरक्षणे ध्वंससाधकम् । अन्यथा घटादेरपि तन्न साधयेत् ॥

मीमांसकः प्रत्यवतिष्ठते—

**द्वयोस्तु प्रवृत्त्योरभावात् ॥३२॥**

तुशब्दः पक्षं व्यावर्तयति । द्वयोरुत्तममध्यमवृद्धयोः द्वे प्रवृत्ती । तयोरनुपपत्तेः । शब्दस्यास्थायित्व इति शेषः । अस्ति तावदुत्तमवृद्ध मध्यमवृद्धस्य प्रति शब्दप्रयोगः शब्दोच्चारणप्रवृत्तिः । सा च शब्दस्य स्थायित्वमन्तरेणानुपपन्ना । बाल्ये वृद्धव्यवहारावगतसामर्थ्यात् गोशब्दादिदानीमुच्चार्यमाणगोशब्दस्यान्यत्वे बोधकत्वानुपपत्तौ मध्यमवृद्धप्रतिपत्तिहेतुत्वासम्भवात् । अगृहीतसङ्केताद् गोशब्दात् प्रतिपत्त्यनुपपत्तेः । तथा मध्यमवृद्धस्योत्तमवृद्धोच्चारितगोशब्दश्रवणानन्तरं गवानयने प्रवृत्तिरस्ति । सापि गृहीतसङ्केतगोशब्दादुत्तमवृद्धप्रयुक्तगोशब्दभेदेऽनुपपद्यमाना तयोरेकत्वं स्थापयति ॥

**संख्याभावात् ॥३३॥**

संख्यां भावयतीति संख्याभावः संख्याप्रतिपादक इत्यर्थः । छान्दसमुदाहरणम् ॥

**संप्रतिपत्तिभावाच्च ॥३४॥**

संप्रतिपत्तिः प्रत्यभिज्ञा । स एवायं गकार इत्यादिप्रत्यभिज्ञयापि वर्णात्मकशब्दस्थायित्वसिद्धिरित्यर्थः । भावग्रहणं प्रकरणसमाप्तिसूचनार्थम् ।

अथ सिद्धान्तसूत्रम्—

**सन्दिग्धाः सति बहुत्वे ॥३५॥**

उपपन्नत्वादिति शेषः । द्वयोस्तु प्रवृत्त्योरभावादयो हेतवः शब्दस्थायित्वसाधकतयोक्ताः । स्थायित्वसाधकत्वबाधकत्वाभ्यां सन्दिग्धाः न स्थायित्वसाधकतयोद्भावनीयाः । प्रवृत्तिद्वयस्य गोशब्दस्थायित्व इव गोशब्दाशुतरविनाशित्वेऽप्युपपत्तेः । स्थिरे गवादौ गोशब्दस्य सङ्केतग्रहणमिवास्थिरेऽपि ज्वालादौ ज्वालाशब्दप्रतिपाद्यम् । यथा स्थिरगोशब्दस्य गवि सङ्केतग्रहणं, तथा गोशब्दजातीयकः गोः प्रतिपादकः ॥

**संख्याभावः सामान्यवतः ॥३६॥**

इदमपि छान्दसोदाहरणम् ॥

**संप्रतिपत्तिभावाच्च ॥३७॥**

सामान्यवत इत्यनुवर्तते। प्रत्यभिज्ञापि व्यक्त्यैक्याद् यथा स एवायं गकार इति, तथा जात्यैक्यादपि भवति यथा स एवायं देवदत्त इति, देवदत्तस्य प्रतिदिन-मन्यत्वेऽपि देवदत्तसामान्यात्। तस्मात् प्रत्यभिज्ञा जात्यक्यादप्युपपद्यमाना न व्यक्त्यैक्यं साधयति ॥

॥ इति श्रीमद्वैशेषिके दर्शने द्वितीयाध्यायस्य द्वितीयाह्निकम्

द्वितीयाध्यायश्च ॥

—:०:—

# तृतीयाध्यायस्य प्रथमाह्निकम्

आत्मसिद्धयर्थं सूत्रम्—

**प्रसिद्धा इन्द्रियार्थाः ॥१॥**

इन्द्रियार्थप्रसिद्धिरिति धर्मिणि क्वचिदाश्रितत्वं साध्यम्, कार्यत्वगुणत्वादयश्च हेतव इति तात्पर्यम्। प्रयोगस्तु—प्रतीतिः क्वचिदाश्रिता, कार्यत्वात्, गुणत्वाच्च रूपवदिति। शरीरतदवयवा न प्रतीतेराश्रयाः गन्धवत्त्वाश्रयत्वात्, रूपवत्त्वात्, स्पर्शवत्त्वात्, घटवत्। नेन्द्रियाणि प्रतीतेराश्रयः, करणत्वात् कुठारवत्। प्राणो न प्रतीतेराश्रयः वायुत्वात् बाह्यवायुवत् ॥

**इन्द्रियार्थप्रसिद्धिरिन्द्रियार्थेभ्यः ॥२॥**

जायत इति शेषः। यथा तन्तुभ्यः पटो जायत इत्यनुभवः सिद्ध, तथेन्द्रियार्थ-प्रसिद्धिरपि इद्रियार्थेभ्यो जायत इत्यनुभवः सिद्धः। कथं प्रसिद्धेराश्रयस्य शरीरादिभ्यो भेदसिद्धिरित्यत्रापि इदमेवोत्तरम् ॥

**इन्द्रियार्थप्रसिद्धेरिन्द्रियार्थेभ्योऽर्थान्तरस्य हेतुः ॥३॥**

प्रसिद्धयाश्रयस्येति शेषः ॥

ननु प्रसिद्धिर्भूताश्रिता कार्यत्वाद् गुणत्वाच्च घटवदित्याशङ्क्याह—

**सोऽनपदेशः ॥४॥**

व्यभिचारादिति शेषः ॥

अपि च भूतगुणोऽपि प्रसिद्धिर्भवन्ती परमाणुगुणः आकाशगुणो वा। प्रथमे दूषणमाह—

**कारणाज्ञानात् ॥५॥**

लोष्टमूलकारणपरमाणुवत् शरीरादिमूलकारणपरमाणूनामपि ज्ञानरहितत्व-साधनात्। शरीरादिमूलकारणपरमाणवो न ज्ञानवन्तः परमाणुत्वात् लोष्टमूलकारण-परमाणुवदिति ॥

द्वितीये दूषणमाह—

**कार्याज्ञानात् ॥६॥**

शरीरादि परमाणुकार्यं न ज्ञानवत्, कार्यत्वात् लोष्टवत्।

तृतीये दूषणमाह—

**अज्ञानाच्च ॥७॥**

भूतस्येति शेषः । आकाशं न ज्ञानवत्, भूतत्वात् घटवत् ॥

ननु प्रसिद्धिः किमात्मनोऽनन्या, अन्या वा ? आद्ये नात्मनो लिङ्गमित्याह—

**अन्य एव हेतुरित्यनपदेशः ॥८॥**

लोकेऽन्यदेव लिङ्गं लिङ्गिनो दृष्टम्, यथा धूमोऽग्नेः । अन्यथा लिङ्गग्रहण एव लिङ्गिनो निर्णयादनुमानवैयर्थ्यं स्यात् ॥

द्वितीये दूषणमाह—

**अर्थान्तरमर्थान्तरस्यानपदेशः ॥९॥**

नह्यन्यदन्यस्य लिङ्गमिति सम्भवति, स्तम्भस्यापि कुम्भलिङ्गतापत्तेः । तस्मान्न प्रसिद्धिरात्मनो लिङ्गमिति ॥

समाधत्ते—

**संयोगि समवाय्येकार्थसमवायि विरोधि ॥१०॥**

**कार्यं कार्यान्तरस्य ॥११॥**

**कारणं कारणान्तरस्य ॥१२॥**

**विरोध्यभूतं भूतस्य ॥१३॥**

**भूतमभूतस्य ॥१४॥**

**भूतं भूतस्य ॥१५॥**

**अभूतमभूतस्य ॥१६॥**

अपदेश इति शेषः । संयोगि यथा—धूमोऽग्नेः । समवायि यथा—शब्द आकाशस्य । एकार्थसमवायि यथा—रसो रूपस्य । विरोधि यथा—विस्फूर्जितनकुलवत्त्वं सर्पवत्त्वस्य ॥

कार्यं कार्यान्तरस्य यथा—चन्द्रोदयकार्यं कुमुदविकासकार्यस्य ॥

कारणं कारणान्तरस्य यथा—शरीरकारणं चरणं शरीरकारणकरादेः ॥

विरोध्यभूतं भूतस्य यथा—प्रतिबन्धकपवनसंयोगविरोधि वर्षकर्म अभूतमजातं [ भूतस्य ] जातस्य पवनसंयोगस्य ॥

[अ] भूतमभूतस्य यथा—अजातं वर्षकर्म अजातस्य मेघस्येति ॥

अत्र च संयोगित्वादिना व्याप्यत्वं लक्ष्यते, संयोगित्वेन लिङ्गत्वे वह्नेरपि धूमलिङ्गत्वप्रसङ्गात् । समवायित्वेन लिङ्गत्वे गगनस्यापि शब्दलिङ्गत्वापत्तेः ।

**प्रसिद्धिपूर्वकत्वादपदेशस्य ॥१७॥**



व्याप्तस्य पक्षधर्मतया प्रमितिः प्रसिद्धिः । तत्पूर्वकत्वात् तत्सहकृतत्वादपदेशस्य । तदभावे न ज्ञानजनकत्वमिति शेषः । तदिदमनुमानं द्विविधम्—स्वार्थं परार्थं च । [ तत्र स्वार्थम्- ] पञ्चावयववाक्यनिरपेक्षमवगतव्याप्तिपक्षधर्मताविशिष्टम् । परार्थम्-प्रतिज्ञाहेतुदृष्टान्तोपनयनिगमनान्यवयवाः । अवयवत्वं चैषां वाक्यैकदेशत्वेनोपचारात् । न च प्रतिज्ञा निष्प्रयोजना । पर्वतो वह्निमानित्यस्य पर्वतो न वह्निरहितो बाधादित्येवंपरत्वात् । च च हेतुवचनस्य निष्प्रयोजनत्वं, धूमवत्त्वसाधनत्वव्यापकत्वेन सप्रयोजनत्वात् । नापि दृष्टान्तवचनस्य निष्प्रयोजनत्वम्, व्याप्तिधीजनकत्वेन सप्रयोजनत्वात् । सौगतवादिवागीश्वरादयस्तु यो धूमवानसावग्निमान् यथा महानसः धूमवांश्च पर्वतः इत्यवयवद्वयमेव प्रयोक्तव्यमित्याहुः । तदयुक्तम्, धर्मिसाध्यसाधनाद्यप्रतीतौ व्याप्तिपक्षधर्मत्वयोरवगन्तुमशक्यत्वात् ॥

लिङ्गमभिधाय तदभासानभिधत्ते—

**अप्रसिद्धोऽनपदेशः ॥१८॥**

**असन् सन्दिग्धश्च ॥१९॥**

असन्निति पक्षे स्वरूपतश्चेति । सन्दिग्धश्चेति । चकारात् पक्षे स्वरूपतश्च विपर्यस्ता वेदितव्याः । तदेवं सूत्रद्वयेन सर्वऽप्यसिद्धाः संगृहीताः ॥

अनुमानानन्तरं प्रत्यक्षं निरूपयति—

**आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यन्निष्पद्यते तदन्यत् ॥२०॥**

आत्मा चेन्द्रियं च मनश्चार्थश्च सन्निकर्षश्च आत्मेन्द्रियमनोऽर्थसन्निकर्षम् । तस्माद्यत् जायते तदन्यत् अनुमानाद् व्यतिरिक्तं साक्षात्कारत्वात् । तदन्यदित्यत्र तत्साधनं प्रत्यक्षमिति शेषः । अत्र चात्मा समवायिकारणम् । इन्द्रियमनःसन्निकर्षेन्द्रियार्थसन्निकर्षौ बाह्यार्थसाक्षात्कारे निमित्तकारणम् । इन्द्रियमनसी निमित्तकारणम् ॥

इन्द्रिय इत्युक्ते मन इति पृथग्ग्रहणं मनसः सत्त्वं इन्द्रियत्वे च विप्रतिपत्तिनिरासार्थम् । सन्निकर्षश्च संयोगसमवायादिरूपः ।

तद् द्विविधम्—सविकल्पकं निर्विकल्पकं चेति । विशिष्टविषयः साक्षात्कारः सविकल्पकम् । तच्च [पञ्च] विधम्—किंचिद् द्रव्यविशिष्टविषयम्, यथा दण्डी देवदत्त इत्यादि । किंचिज् गुणविशिष्टविषयम्, यथा शुक्लो घट इत्यादि । किंचित् कर्मविशिष्टविषयम्, यथा देवदत्तश्चलतीति । किंचित् सामान्यविशिष्टविषयम्, यथा गोरित्यादि । किंचिदभावविशिष्टविषयम्, यथा घटशून्यं भूतलमित्यादि ।

विशिष्टविषयत्वरहितः साक्षात्कारो निर्विकल्पकम् । यथा प्रथमं विशिष्टसाक्षात्कारजनकद्रव्यादिज्ञानम् । तत् पुनर्द्विविधम्-अभिज्ञानं प्रत्यभिज्ञानं च । आद्यं

यथा—घट इत्यादि । द्वितीयं यथा—स एवायं घट इत्यादिस्थायित्वग्राहकम् । पुनश्च द्विविधम्—सर्वविषयमसर्वविषयं च । आद्यमपि द्विविधम्—ऐश्वरं योगिज्ञानं च असर्वविषयं पुनरस्मदादीनाम् ॥

स्वात्मनिरूपणानन्तरं परात्मनिरूपणार्थं सूत्रम्—

**प्रवृत्तिनिवृत्ती च प्रत्यगात्मनि दृष्टे परत्र लिङ्गम् ॥२१॥**

प्रवृत्तिनिवृत्ती च शरीरगतौ क्रियाविशेषौ, तदुत्पादकौ वा प्रयत्नविशेषौ । तौ च क्रियात्वावान्तरौ जातिविशेषौ प्रत्यत्नत्वावान्तरौ वा ? तत्र प्रथमपक्षेऽनुमानम्-परशरीरप्रवृत्तिनिवृत्ती कार्यपुंप्रवृत्तिनिवृत्तिजन्ये प्रवृत्तित्वात् निवृत्तित्वाच्च, मच्छरीरप्रवृत्तिनिवृत्तिवत् । द्वितीयेऽनुमानम्—विमते प्रवृत्तिनिवृत्ती कार्यपुंबुद्धिजन्ये प्रवृत्तिनिवृत्तित्वात् मच्छरीरप्रवृत्तिनिवृत्तिवत् । प्रत्यगात्मनि स्वस्मिन् । परत्र परात्मनि ॥

॥ इति श्रीमद्वैशेषिके दर्शने तृतीयाध्यायस्य प्रथमाह्निकम् ॥

# तृतीयाध्यायस्य द्वितीयाह्निकम्

उक्तमात्मनि साक्षात्कारजनकं मन इति । वक्ष्यति चात्मनि मनो लिङ्गमिति । तदुभयसमर्थनार्थमात्मप्रकरणमध्य एव मनःप्रकरणमारभते—

**आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्याभावो भावश्च मनसो लिङ्गम् ॥१॥**

युगपदनेकज्ञानानुत्पत्तिरिति चेत्—न, युगपदनेकज्ञाननासम्भवेऽपि युगपदनेकविषयैकज्ञानासम्भवात् । तस्मान्नायं सूत्रार्थः । अयं तु स्यात् आत्मबाह्येन्द्रियार्थसन्निकर्षे सत्यपि ज्ञानस्य सुखसाक्षात्कारघटादिस्मरणलिङ्गादिजन्यत्वाभावो भावश्च मनसो लिङ्गमिति । प्रयोगस्तु–अयं सुखसाक्षात्कार इन्द्रियजः, साक्षात्कारत्वे सति कार्यत्वात् रूपसाक्षात्कारवत् । न च चक्षुरादिना सिद्धसाधनम्, अन्धादीनामपि सुखसाक्षात्कारदर्शनात् । एतेन मनोवैभवं प्रत्युक्तम् । मनो न विभु मूर्तत्वात् घटवत् । नन्वयमसिद्धो हेतुः, सदा विशेषगुणरहितद्रव्यत्वात् निरवयवेन्द्रियत्वात् द्रव्यानारम्भकनित्यद्रव्यत्वात् ज्ञानासमवायिकारणाधारत्वाद् सदास्पर्शरहितेन्द्रियत्वात् नित्यगुणग्राहकेन्द्रियत्वात् अभूतत्वे सत्यरूपिद्रव्यत्वात् कालवत्, आकाशवत्, आत्मवदिति चेत्—न, धर्मिग्राहकप्रमाणबाधात् मनसो मूर्तत्वेनैव सिद्धेः । असिद्धावाश्रयासिद्धेः । मनः परमाणुः [अ]विभुत्वे सति नित्यद्रव्यत्वात् जलपरमाणुवत् ॥

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥२॥**

यथा वायोर्धर्मिग्राहकप्रमाणादिना द्रव्यत्वम्, परमाणुलक्षणस्य च वायोरनाश्रितत्वेन नित्यत्वम्, तथा मनसोऽपीति ॥

**प्रयत्नायौगपद्याज् ज्ञानायौगपद्याच्चैकं मनः ॥३॥**

यदि प्रतिशरीरमनेकानि मनांसि तर्हि युगपत् सर्वेन्द्रियमनःसंयोगसम्भवात् सर्वविषयेषु युगपदेव ज्ञानं स्यात् । तथा तद्विषयेच्छाप्रयत्नवपि युगपत् स्याताम् । न चैवम् । तस्मात् प्रतिशरीरमेकं मनः ॥

**प्राणापाननिमेषोन्मेषजीवनमनोगतीन्द्रियान्तरविकाराः परात्मनि लिङ्गम् ॥४॥**

सुखादयश्च परात्मनि च स्वात्मनि च लिङ्गमिति भाष्यकाराः । प्रयोगस्तु—विप्रतिपन्नशरीरं किंचिन्निष्ठकार्यप्रयत्नविषयः, आत्मनिष्ठकार्यप्रयत्नविषयो वा । एवमुत्तरत्रापि किंचिन्निष्ठपदस्थान आत्मनिष्ठपदं प्रयोक्तव्यम् । प्राणवत्त्वात्,

अपानवत्वात् मच्छरीरवत् । अक्षिपक्ष्मणोः संयोगहेतुः कर्मोन्मेषः । [तयोः]-विभागहेतुः कर्मोन्मेषः । प्रयोगस्तु–विप्रतिपन्नौ निमेषोन्मेषौ किंचिन्निष्ठकार्यप्रयत्नजन्यौ निमेषत्वात्, उन्मेषत्वात् मदीयनिमेषोन्मेषवत् । जीवनं शरीरावच्छिन्नेनात्मना मनःसंयोगविशेषः । मनोगतिर्मनःक्रिया । इन्द्रियान्तरविकाराः आम्रादिरूपदर्शनानन्तरं रसविशेषानुमानपूर्वको रसविशेषाभिलाषपूर्वको रसनस्य विकारो लालास्रवादिः । सुखादयो द्रव्याश्रिताः गुणत्वाद् रूपवत् इति ॥

**द्रव्यत्वनित्यत्वे वायुना व्याख्याते ॥५॥**

निगदव्याख्यातमेतत् ॥

आत्मनि प्रत्यक्षमनुमानं च न प्रमाणमित्याह—

**अहं यज्ञदत्त इति सन्निकर्षे प्रत्यक्षाभावाद् दृष्टं लिङ्गं न विद्यते ॥६॥**

**सामान्यतोदृष्टाच्चाविशेषः ॥७॥**

सत्यपीन्द्रियार्थसन्निकर्षे शरीरादिव्यतिरिक्तस्यात्मनोऽननुभवात् । न तावदत्र प्रत्यक्षं मानम् । नापि दृष्टमनुमानम् । स्वात्मनोऽप्रत्यक्षत्वेन तद्व्याप्तलिङ्गस्याप्यप्रत्यक्षत्वात् । नापि सामान्यतोदृष्टम्, बुद्ध्यादयः क्वचिताश्रिताः गुणत्वादित्यादेः यत्किंचिदाश्रितत्वेन चरितार्थस्य शरीरादिव्यतिरिक्तासाधकत्वात् ॥

यत एवात्मनि प्रत्यक्षमनुमानं वा न प्रमाणम्, अत एवागमः प्रमाणमिति शङ्कते—

**तस्मादागमिकम् ॥८॥**

अहमिति ज्ञानमिति शेषः ॥

समाधत्ते—

**अहमिति शब्दव्यतिरेकेण नागमिकम् ॥९॥**

शब्दश्रवणमन्तरेणापि जायमानत्वादहमिति ज्ञानं न शब्दजन्यम् ॥

तस्मादहमिति मानसः प्रत्ययो द्रष्टरि स्वात्मनि प्रमाणमित्याक्षिपति—

**यदि च द्रष्टुः प्रत्यक्षोऽहं देवदत्तोऽहं यज्ञदत्तः ॥१०॥**

**[ संदिग्धस्तूपचारः ] ॥११॥**

यद्यहं पश्यामीति दर्शनविशिष्टव्यवहारादहं पश्यामीति द्रष्टरि विषये प्रत्यक्षत्वम्, तर्हि देवदत्तो गच्छामीति व्यवहारो नाहंप्रत्ययस्य क्रियाविशिष्टविषयत्वं साधयति, किमहं गच्छामीति व्यवहारः क्रियाविशिष्टविषयः किं वा क्रियाजनकप्रयत्नविशिष्टविषय इति संदेहात्, धातोः क्रियावाचकत्वात्, प्रत्ययस्य प्रयत्नावाचकत्वात् ॥



संदिग्ध इति च कोमलोक्तिः । वस्तुतः प्रयत्नविशिष्टविषयत्वनिर्णयादाख्यातप्रत्ययस्य प्रयत्नवाचकत्वात् प्रयत्नस्य देहधर्मत्वनिषेधात् । तुशब्दः पक्षं व्यावर्तयति ॥

**अहमिति प्रत्यगात्मनि भावात् परत्राभावादर्थान्तरप्रत्यक्षः ॥१२॥**

अहमिति प्रत्ययः प्रत्यगात्मानं गृह्णाति । प्रत्ययाधारश्च प्रत्यगात्मा न शरीरम् । प्रत्ययाधार इत्युक्तम्, परत्राभावात् शरीरादावभावात् । इदं शरीरं नाहंप्रत्ययविषयः शरीरत्वात्, परशरीरवत् । अन्यथा परशरीरेऽप्यहंप्रत्ययापत्तेः ॥

**नतु शरीरविशेषाद् यज्ञदत्तविष्णुमित्रयोर्ज्ञानविशेषः ॥१३॥**

सर्वथा अहंप्रत्ययगोचर आत्मा इति स्थितम् ॥

आक्षेपपूर्वकमात्मनानात्वसमर्थनार्थं सूत्रम्—

**सुखदुःखज्ञाननिष्पत्त्यविशेषादैकात्म्ये न व्यवस्था ॥१४॥**

स्पष्टोऽर्थः ॥

॥ इति श्रीमद्वैशेषिके दर्शने तृतीयाध्यायस्य द्वितीयाह्निकम्
तृतीयाध्यायश्च ॥

## चतुर्थाध्यायस्य प्रथमाह्निकम्

व्युत्पादितं पृथिव्यादि। तद् द्विविधम्-नित्यमनित्यं च। तत्र नित्यव्युत्पादनार्थं सूत्रम्—

**सदकारणवन्नित्यम् ॥१॥**

द्विविधं पृथिव्यादि-कारणवत् तद्रहितं च। तत्र यदकारणवत् पृथिव्यादि तन्नित्यम्। तथा च प्रयोगः-पृथिव्यादिपरमाणवो नित्याः, सत्त्वे सत्यकारणवत्त्वात्। आत्मवत् ॥

आश्रयासिद्धिपरिहारार्थं सूत्रम्—

**तस्य कार्यं लिङ्गम् ॥२॥**

तस्य नित्यस्य पृथिव्यादेः कार्यं पृथिवीद्व्यणुकादि लिङ्गम् ॥

द्व्यणुकमप्यसिद्धमत आह—

**कारणाभावाद्धि कार्याभावः ॥३॥**

अस्ति हि त्र्यणुकं कार्यम्। तच्च कारणाधीनम्, कारणाभावे कार्यानुपपत्तेः। न च त्र्यणुके प्रमाणाभावः, जालसूर्यमरीचिष्वप्रत्यक्षावयवस्य पृथिव्यादेः प्रत्यक्षसिद्धत्वात् त्रसरेणव एव परमाणवः तदवयवसाधकप्रत्यक्षाभावात्, लिङ्गाभावेन तदवयवसाधकानुमानाभावाच्चेति चेत्—न। त्रसरेणुः सावयवः कार्यद्रव्यत्वात्, महाकार्यत्वाच्च घटवत्। न चायमसिद्धः। त्रसरेणुर्महान् कार्यश्च, मच्चाक्षुषद्रव्यत्वात् घटवत्। त्रसरेणुः कार्यावयवः महाकार्यत्वात् पटवत् घटवच्च।

पार्थिवपरमाणुद्व्यणुकादिसिद्धिस्तु—पार्थिवस्त्रसरेणुः पार्थिवावयवः महापृथिवीत्वात्, घटवत्। पार्थिवत्रसरेणोरवयवः पार्थिवावयवः कार्यपृथिवीत्वात् घटवत्। एवं सलिलत्रसरेण्वादिपक्षीकरणेन सलिलद्व्यणुकादयः साधनीयाः। परमाणवोऽनित्याः स्पर्शवत्त्वात्, संयोगित्वात्, घटवदित्यादेरप्रयोजकत्वम्। परमाणूनां सावयवत्वेनाधिकावयवपरम्परायामनवस्था। केषांचिदवयवानां निरवयवत्वे त एव परमाणवः। तथा मेरुसर्षपयोस्तुल्यपरिमाणत्वापात इत्यादिप्रतिकूलतर्कपराहतत्वात् ॥

न च परमाण्वादयो योग्यानुपलब्धिबाधिता इत्याह—

**अविद्या चास्मदादीनाम् ॥४॥**

अस्मदाद्ययोग्यत्वादिति शेषः ॥



का पुनः पृथिव्यादीनां प्रत्यक्षग्रहणयोग्यतेत्यत आह—

**महत्यनेकद्रव्यवत्त्वाद्रूपाच्चोपलब्धिः ॥५॥**

चक्षुःस्पर्शनाभ्यामिति शेषः। अनेकद्रव्यमाश्रयो यस्य तदनेकद्रव्यम्। तद्वत्त्वात् तदारब्धत्वात्। रूपादित्यत्रोद्भूतादिति शेषः। चकार उद्भूतस्पर्शसमुच्चयार्थः। तेनानेकद्रव्यारब्धत्वादुद्भूतरूपाच्च चक्षुषा घटादिद्रव्योपलब्धिः। अनेकद्रव्यारब्धत्वादुद्भूतरूपादुद्भूतस्पर्शाच्च त्वगिन्द्रियेण घटादिद्रव्योपलब्धिः। महतीति पदं महत्त्वस्य कारणत्वख्यापनार्थम् ॥

**[अद्रव्यत्वात् परमाणावनुपलब्धिः] ॥६॥**

तत्र परमाणौ द्रव्यारब्धत्वाभावाच्चक्षुरादिनानुपलब्धिः। द्व्यणुके चानेकद्रव्यारब्धत्वाभावात् ॥

**रूपसंस्काराभावाद् वायोरनुपलब्धिः ॥७॥**

रूपस्य संस्कारोऽतिशयः उद्भूतत्वम् ॥

**एतेन रसगन्धस्पर्शेषु ज्ञानं व्याख्यातम् ॥८॥**

कथमनेकद्रव्यवत्त्वादेः प्रत्यक्षकारणत्वमत आह—

**तदभावादव्यभिचारः ॥९॥**

तस्य चाक्षुषप्रत्यक्षस्यात्मन्यभावात्-न चाक्षुषप्रत्यक्षमनेकद्रव्यारब्धत्वरूपविशेषौ व्यभिचरति ॥

**संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे कर्म च रूपिद्रव्यसमवायाच्चाक्षुषाणि ॥१०॥**

स्पार्शनानि चेति शेषः। चकारोऽनेकद्रव्यारब्धसमवायसमुच्चयार्थः ॥

**अरूपिष्वचाक्षुषत्वात् ॥११॥**

संख्यादयो न चक्षुषा प्रतिभासन्ते इत्यन्वयव्यतिरेकाभ्यां रूपिद्रव्यसमुदायस्य चाक्षुषप्रत्यक्षकारणत्वम् ॥

**एतेन गुणत्वे भावे च सर्वेन्द्रियं ज्ञानं व्याख्यातम् ॥१२॥**

एतेनेति यदिन्द्रियग्राह्यं यत् तद्धर्मा अपि त[दिन्द्रियग्राह्या इति]व्युत्पादनेनेति ॥

॥ इति श्रीमद्वैशेषिके दर्शने चतुर्थाध्यायस्य प्रथमाह्निकम् ॥

—: ० :—

# चतुर्थाध्यायस्य द्वितीयाह्निकम्

तस्य कार्यं लिङ्ग[४. १. २.]मित्युक्तम्। तच्च त्रिविधम्, शरीरमिन्द्रियं विषय इति। तत्र शरीरं चतुर्विधम्, पार्थिवमाप्यं तैजसं वायवीयं च। पार्थिवमस्मदादीनाम्। आप्यं वरुणलोके। तैजसमग्न्यादिलोके। वायवीयं वायुलोके॥

अस्मदादिशरीरं न पृथिवीमात्रसमवायिकारणकम्, किं तु पञ्चभूतसमवायिकारणकमिति केचित्। तन्निराकरणार्थं सूत्रम्—

**प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वाद् वायुवनस्पतिसंयोगवत् पञ्चात्मकं न विद्यते ॥१॥**

यत् प्रत्यक्षाप्रत्यक्षसमवायिकारणकं पञ्चभूतसमवायिकारणकं वा, न तत् प्रत्यक्षम्। यथा वायुवनस्पतिसंयोगः। शरीरं च प्रत्यक्षम्। तस्मान्न प्रत्यक्षाप्रत्यक्षसमवायिकारणकम्। इदं शरीरं नोदकसमवायिकारण[क]म्, शीतस्पर्शादिरहितद्रव्यत्वात् सर्वत्राकाशवत्। इदं शरीरं नाकाशसमवायिकारण[क]म्, द्रव्यत्वाद् घटवत्॥

**त्र्यात्मकमपि [न] ॥२॥**

अपिशब्दात् चतुरात्मकमपि [न]। यथा पञ्चभूतसमवायिकारणकं न भवति तथा चतुस्त्रिभूतसमवायिकारण[क]मपि न भवति॥

**आत्मसंयोगश्च प्रतिषिद्धो मिथः पञ्चानाम् ॥३॥**

मिथ इत्यत्र संयोग इति शेषः। पञ्चानां परस्परसंयोगश्च शरीर[।]समवायिकारणत्वे प्रतिषिद्धः। प्रयोगस्तु शरीरं न पृथिव्युदकसंयोगासमवायिकारणकम्, नाप्युदकतेजःसंयोगासमवायिकारण[क]म्, नापि तेजोवायुसंयोगासमवायिकारण[क]म्, नापि [पृथि]वीगगनसंयोगाद्यसमवायिकारणकम्, नाप्यात्मपृथिव्यादिसंयोगासमवायिकारणकम्, द्रव्यत्वादाकाशवदिति॥

**अणुसंयोगस्त्वप्रतिषिद्धो मिथः पञ्चानाम् ॥४॥**

अणुसंयोगोऽनारम्भकसंयोगः पञ्चभूतानामनिषिद्ध इति। इदं शरीरं पार्थिवम्, गन्धवत्त्वात्। संप्रतिपन्नवत्। एतेन द्रव्यान्तराणामपि द्वित्रिचतुःपञ्चभूतारब्धत्वं निरस्तम्॥

**तच्च शरीरं द्विविधं योनिजमयोनिजं च ॥५॥**



शुक्रशोणितसंनिपातो योनिः। तस्माज् जातं योनिजम्। तद् द्वेधा—जरायुजमण्डजं च। आद्यं मनुष्यादीनाम्। द्वितीयं पक्ष्यादीनाम्। शुक्रशोणितनिरपेक्षम् अयोनिजं यथा देवर्षीणां मशकादीनां च॥

अयोनिजशरीरं नास्ति कारणाभावादत आह—

**अनेकदेशपूर्वकत्वात् ॥६॥**

**धर्मविशेषात् ॥७॥**

**कार्यविशेषात् ॥८॥**

न विद्यन्ते एकदेशा अवयवा येषां तेऽनेकदेशाः परमाणवः। तत्रानेकदेशपूर्वकत्वादित्यनेन परमाणूनां परम्परया योनिजशरीरसमवायिकारणत्वमुक्तम्॥

धर्मविशेषादिति प्रकृष्टधर्मस्य निमित्तत्वम्। अधर्मविशेषादित्यपि द्रष्टव्यं मशकादिविषयम्॥

कार्यविशेषादित्यवयवसंयोगस्यासमवायिकारणत्वम्। तस्मात् नायोनिजशरीरानुपपत्तिः॥

**समाख्याभावात् ॥९॥**

समाख्या यौगिकं नाम। यथा—अगस्त्यः कुम्भयोनिरिति। तेन समाख्यया कुम्भस्य योनेर्भावात् नायोनिजशरीरानुपपत्तिः। कुम्भस्य योनित्वमुपचारादिति नायोनित्वविरोधः॥

कथमयोनिजस्य शरीरत्वम्, पृथिवीत्वादीनां संकरप्रसङ्गेन शरीरत्वस्य जातित्वाभावे उपाधेरप्यनिरूपणात्, अत आह—

**संज्ञादिमत्त्वात् ॥१०॥**

संज्ञानं संज्ञा आदि कारणसंयोगः तदाश्रयत्वात्। तेन ज्ञानजनकात्मसंयोगाश्रयः कार्यं शरीरमिति लक्षणमेवोपाधिः। सुखजनकात्मसंयोगाश्रयः कार्यं शरीरमित्यादीनि सकलात्मविशेषगुणोपादानेन लक्षणानि द्रष्टव्यानि।

न्यायाचार्याः पुनरिन्द्रियाश्रयः शरीरमिति लक्षयन्ति। तदयुक्तम्, इन्द्रियावयवेष्वतिव्याप्तेः। त्वगिन्द्रियाश्रयः शरीरमित्यपि न, घटादावतिव्याप्तेः। भोगायतनं शरीरमित्यपि न, भोगायतनत्वतज्जनकत्वे तत्साधनत्वे चानुपपत्तेः॥

॥ इति श्रीमद्वैशेषिके दर्शने चतुर्थाध्यायस्य द्वितीयाह्निकम् चतुर्थोऽध्यायश्च॥

# पञ्चमाध्यायस्य प्रथमाह्निकम्

चतुर्थेऽध्याये द्रव्यपरीक्षा वृत्ता। पञ्चमे कर्मपरीक्षा वर्तिष्यते। तत्रोत्क्षेपणा-[वक्षेपणा]कुञ्चनप्रसारणपरीक्षार्थं सूत्रम्—

**आत्मसंयोगप्रयत्नाभ्यां हस्ते कर्म ॥१॥**

उत्क्षेपणादिप्रसारणान्तेषु हस्तस्य समवायिकारणत्वमात्महस्तसंयोगस्यासमवायिकारणत्वम्। हस्तकर्म समवायिकारणजन्यम्, भावकार्यत्वात्, घटवत्। हस्तकर्म संयोगजन्यं हस्तकर्मेति प्रत्यक्षत्वात्।

ननु मुसलाद्यूर्ध्वगमने हस्तसंयोगः कारणम्। तर्हि कण्डनप्रवृत्तमुसलोलूखलाभिघातानन्तरोत्पन्नमुसलोर्ध्वगमनेऽपि हस्तमुसलसंयोगः कारणं स्यान्न वा प्रकृतेऽपीत्यत आह—

**अभिघातजे मुसलकर्मणि व्यतिरेकादकारणं हस्तसंयोगः ॥२॥**

व्यतिरेकः तदभावेऽपि जन्म। स च हस्तयुक्तमुसलोलूखलाभिघातात् मुसलोर्ध्वगमनादवगन्तव्यः। तथात्मसंयोगो हस्तकर्मणि यथा अभिघातजे मुसलकर्मणि व्यतिरेकादकारणं हस्तसंयोगः॥

**तथात्मसंयोगो हस्तकर्मणि ॥३॥**

यथा अभिघातजे मुसलकर्मणि हस्तमुसलसंयोगो न कारणम्, तथा हस्तकर्मण्यपि नात्महस्तसंयोगः कारणम्, प्रमाणाभावात्॥

कथं तर्हि मुसलसंबद्धहस्तस्योर्ध्वगमनम्? अत आह—

**मुसलाभिघाताच्च मुसलसंयोगाद्धस्ते कर्म ॥४॥**

मुसलहस्तसंयोगादसमवायिकारणान्मुसलोलूखलाभिघाताच्च निमित्तकारणात् हस्तस्योर्ध्वगमनम्॥

**तथा आत्मकर्म हस्तसंयोगाच्च ॥५॥**

आत्मनो भोगायतनत्वात् शरीरमात्मेत्युक्तम्। तथा यथा आत्मसंयोगप्रयत्नाभ्यां हस्तकर्म तथा शरीरेऽपि। यथा वाभिघातहस्तमुसलसंयोगाभ्यां हस्तस्योत्पतनं तथा शरीरस्यापि॥

**संयोगाभावे गुरुत्वात् पतनम् ॥६॥**

यदा तूत्पततो मुसलस्य हस्तसंयोगाभावः तदा गुरुत्वात् मुसलस्याधोगमनम्॥

**नोदनविशेषाभावान्नोर्ध्वं न तिर्यग्गमनम् ॥७॥**



नोदनविशेष ऊर्ध्वगमनतिर्यग्गमनयोः कारणम्। तयोरभावान्नोर्ध्वतिर्यग्गमने भवतः॥

नोदनविशेषः किं न स्यादत आह—

**प्रयत्नविशेषान्नोदनविशेषः ॥८॥**

प्रयत्नजन्यक्रियाविशेषो नोदनविशेषमारभते। स चोर्ध्वगमनतिर्यग्गमने॥

**नोदनविशेषादुदसनविशेषः ॥९॥**

नोदनविशेषस्योर्ध्वगमनादिकारणत्वमन्वयव्यतिरेकसहितप्रत्यक्षसिद्धं पाषाणादावुदसनमूर्ध्वगमनादि॥

**हस्तकर्मणा दार[क]कर्म व्याख्यातम् ॥१०॥**

यथा प्रयत्नात्मसंयोगाभ्यां हस्ते कर्म तथा प्रयत्नात्मसंयो[गात्स्तनपानोन्मुखबा]लशरीरेऽपि। इष्टसाधन[ता]ज्ञानाभावादिच्छानुत्पत्तौ प्रयत्नासंभव इति चेत्-न, स्तनपानमिष्टसाधनम्, स्तनपानत्वात्, प्राक्तनवत् इतीष्टसाधनत्वानुमानात्। व्याप्तिस्मरणाभावात् कथमनुमानमिति चेत्-पूर्वजन्मानुभूतव्याप्तिस्मरणसंभवात्। दारकस्य स्तनपानादिप्रवृत्तिरिष्टोपायधीजन्या प्रवृत्तित्वात्, अस्मत्प्रवृत्तिवत् इत्यनुमानात्। प्रथमजन्मनि का वार्तेति चेत्-न, जन्मसन्ततेरनादित्वात्। अत एवात्मनोऽप्यनादित्वम्॥

शरीरकर्मणः प्रयत्नजन्यत्वे सुप्तस्य पतनं च स्यादित्यादौ आह सूत्रत्रयम्—

**प्रयत्नाभावे गुरुत्वात् सुप्तस्य पतनम् ॥११॥**

**तृणे कर्म वायुसंयोगात् ॥१२॥**

**मणिगमनं सूच्यभिसर्पणमित्यदृष्टकारितानि ॥१३॥**

प्रयत्नाभाव इति प्रत्येकमभिसंबध्यते। न ह्यस्माकं प्रयत्न एव कर्मकारणम्, गुरुत्ववेगवद्द्रव्यसंयोगादृष्टवदात्मसंयोगानामपि कारणत्वात्। मणेश्चुम्बकादेर्लोहाद्यभिमुखगमनं मणिगमनम्। सूच्यादेराकर्षकपाषाणाद्यभिमुखगमनं सूच्यभिसर्पणम्। इतिशब्दः एवंविधकर्मान्तरपरिग्रहार्थः॥

**इषावयुगपत्संयोगविशेषाः कर्मान्यत्वे हेतुः ॥१४॥**

कर्मान्यत्वं कर्मभेदः। हेतुः प्रमाणम्। धनुर्मुक्तबाणस्याप[त]नं [यावन्तो गगना]दिसंयोगाः तावन्ति कर्माणीत्युपगमनीयम्। विमतः संयोगः कर्मनाशकः कर्मजसंयोगत्वात् संमतवत्। विशेषग्रहणं तत्तत्कर्मजन्यसंयोगलाभार्थं संयोगविशेषहेतुरिवेदं प्रमाणमिति वदुपपद्यते॥

सन्तु नामानन्तकर्माणि। तानि धनुर्ज्यानोदनादेव भविष्यन्तीति कथं वेगसिद्धिः? क[थं] च द्वितीयादिकर्मणां वेगजन्यत्वम्? अत आह—

**नोदनादाद्यमिषोः कर्म तत्कर्मकारिताच्च संस्कारादुत्तरं तथोत्तरमुत्तरं च ॥१५॥**

द्वितीयादिकर्मणि न नोदनस्य कारणत्वम्। तस्मिन्ननतिवृत्ते द्वितीयादिकर्मोदयादव्यवहितपूर्वक्षणवर्तिनः कारणत्वात्। तस्माद् वेगाख्यः संस्कारो हेतुः। तस्य च कारणान्तराभावादाद्यं कर्म कारणमापतनमेको वेगः। स एवायं वेग इत्यनुभवात्, भेदकप्रमाणाभावाच्च॥

**संस्काराभावे गुरुत्वात् पतनम् ॥१६॥**

आपतनं द्वितीयादिकर्माणि संस्कारजन्यानि। शरस्य पतनं तु संस्काराभावात् गुरुत्वादेवेति॥

॥ इति श्रीमद्वैशेषिके दर्शने पञ्चमाध्यायस्य प्रथमाह्निकम् ॥

# पञ्चमाध्यायस्य द्वितीयाह्निकम्

भूगोलक[कर्म]व्युत्पादनार्थं सूत्रम्—

**नोदनाभिघातात् संयुक्तसंयोगाच्च पृथिव्यां कर्म ॥१॥**

बलवत्पवनाभिघातात् नोदनाद् वा बलवत्पवनसंयुक्तब्रह्माण्डसंयोगाद् वा पृथिव्यां कर्म॥

**अपां संयोगाभावे गुरुत्वात् पतनम् ॥२॥**

यन्मेघोपनीतोदकानां पतनं तत्प्रतिबन्धकपवनसंयोगाभावसन्निहितात् गुरुत्वात्॥

**द्रवत्वात् स्यन्दनम् ॥३॥**

उच्चदेशान्निम्नदेशाभिसर्पणं स्यन्दनम्। तद् द्रवत्वादुत्पद्यते। प्रथमं स्यन्दनं द्रवत्वात्। द्वितीयादिस्यन्दनानि द्रवत्वसंस्काराभ्याम्। यथा प्रथमं पतनं गुरुत्वात्, द्वितीयादिपतनानि गुरुत्वसंस्काराभ्यामिति भाष्यकाराः। तदुक्तम्–संस्कारे प्रमाणाभावात् द्वितीयादिस्यन्दनपतनानां गुरुत्वद्रवत्वाभ्यामेवोप[पत्तिः]..........एतेन पार्थिवघृतादिस्यन्दनमपि द्रवत्वादेवेति द्रष्टव्यम्॥

**नाड्या वायुसंयोगादारोहणम् ॥४॥**

नाड्या कमलना[लेन जलस्योर्ध्वा]रोहणं चूषकपुरुषमुखाभिगमनं तत्प्रयत्नप्रेरितप्रतिनिवर्तमानप्राणादिपवनसंयोगात् नाडीजलसंयोगाच्च॥

**नो[दनापीड]नात् संयुक्तसंयोगाच्च ॥५॥**

अपामारोहणमित्यनुवर्तते। प्रयत्नवद्धस्तादिनोदनात्, प्रयत्नवद्धस्तादिना वस्तिपीडनात् नुन्नाभिहतसंयोगाच्च जलानामूर्ध्वगमनं जायते। चकारोऽभिघातसमुच्चयार्थः। पीडनं च प्रयत्नवत्संयोगविशेषः॥

**वृक्षाभिसर्पणमित्यदृष्टकारितानि ॥६॥**

अस्ति तावन्मूले निषिक्तानामपां सकलवृक्षाधिरोहणम्। न च तन्नोदनादिजन्यम्, नोदनाभिघातादेरभावात्। तस्माददृष्टवदात्मसंयोगजन्यमेव मण्यादिकर्मवदिति निश्चीयते। इतिशब्द एवंविधवनस्पतिगुल्मौषधितृणादिपरिग्रहार्थः। अतएवादृष्टकारितानीति बहुवचनम्॥

तेजसावष्टब्धैराप्यपरमाणुभिर्विद्युदारभ्यते इत्यत्र किं प्रमाणमत आह—

**तत्रापस्फुर्जथुर्लिङ्गम् ॥७॥**

अपस्फुर्जथुर्वज्रनिर्घोषः तटत्तटदितिशब्दः। प्रभाविशेषसहितः प्रथमः शब्दो निविडावयववज्राभिघाताद् वा, तदवयवविभागाद् वा ? उभयथा वज्रे प्रमाणम्। तच्च तेजोऽवयवोपष्टब्धोदकावयवैरारब्धः, अन्यथा प्रभाविशेषानुपपत्तेः, विद्युदाहतमनुष्यादीनां स्फोटानुपपत्तेश्च ॥

**वैदिकं च ॥८॥**

लिङ्गमित्यनुवर्तते। लिङ्गं सामर्थ्यम् ॥

**अपां संयोगा[द्विभागा]च्च स्तनयित्नुः ॥९॥**

स्तनयित्नुपदं मेघवाचकम् मेघशब्दे प्रयुक्तमुपचारात्। तेन करकादिरूपाणामपां संयोगात्, तदवयवविभागाद् वा जायमानः शब्दो मेघ इत्युच्यते ॥

**पृथिवीकर्मणा तेजसः कर्म वायुकर्म च व्याख्यातम् ॥१०॥**

निगदार्थमेतत् ॥

**अग्नेरुर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानि ॥११॥**

परमाणूनां सृष्ट्यादौ द्वचणुकजनकसंयोगारम्भकं संहारे च द्वचणुकारम्भकसंयोगविरोधिविभागारम्भकं च कर्मादृष्टकारितम् ॥

• **[आत्मेन्द्रियमनोऽर्थसन्निकर्षात् सुखदुःखे] ॥१२॥**

तथा सृष्ट्यादौ शरीरेन्द्रियमनोऽर्थानां सन्निकर्षात् संयोगसमवायरूपात् सुखदुःखे भवतः। तत्रात्मनः समवायिकारणत्वम्। आत्ममनःसंयोगस्यासमवायिकारणत्वम्। इन्द्रियार्थयोरिन्द्रियार्थसन्निकर्षस्य च निमित्तकारणत्वम्। आत्मेन्द्रियसयोगजनकमनःकर्मचिन्तायामात्मेन्द्रियमनोऽर्थसन्निकर्षजन्यसुखदुःखकारणनिरूपण - प्रसङ्गोपपत्तिः। सकारणसुखदुःखोच्छेदश्च तन्निरूपणप्रयोजनम् ॥

**तदनारम्भश्चात्मस्थमनसि ॥१३॥**

योगिनां मनसि सकलविषयेभ्यो निवृ[त्तावा]त्मस्थे सति तयोः सुखदुःखयोरनारम्भः। आत्मस्थमनसो बाह्येन्द्रियसंयोगाभावादङ्गनादिविषयस्मृतिसङ्कल्पयोरभावाच्चेति ॥

**सशरीरस्य सुखदुःखाभावः ॥१४॥**

यद्यपी[ष्टशरीराद्युपेतो] योगी अन्नं भुङ्क्ते, पानीयं पिबति, संबध्यते च कण्टकादिभिः, तथापि न तस्य सुखदुःखे भवतः, योगजधर्मेण प्रतिबन्धात् ॥



**संयोगः ॥१५॥**

य[मनियम]प्राणायामप्रत्याहारध्यानधारणासमाधिप्रकर्षजन्य आत्ममनसोर्यः संयोगविशेषः स आत्मसाक्षात्कारजनकधर्मं प्रसूते। [ततश्चात्मश्रवणादावा]दरसंभवः, यथेष्टचारिणः प्राणस्य स्थानविशेषे निरोधासिद्धेः ॥

अत आह—

**कायकर्मणात्मकर्मधर्मयोरनुपपत्तिः ॥१६॥**

पूर्वसंचितधर्माधर्माभ्यां शरीरानु[प्रविष्टस्य म]नसः पूर्वशरीरादवसर्पणमभिनवशरीरोपसर्पणं भुक्तभेदान्नोदकयोश्चाभिनवशरीरसंचारादिसम्भवात् संसारानुवृत्तेर्मोक्षानुपपत्तिः ॥

अत आह—

**अपसर्पणमुपसर्पणमशितपीतसंयोगाः कार्यान्तरसंयोगाश्चेत्यदृष्टकारितानि ॥१७॥**

चकारः कार्यान्तरजन्यसुखदुःखादिसमुच्चयार्थः ॥

**तदभावे संयोगाभावोऽप्रादुर्भावश्च स मोक्षः ॥१८॥**

तमोऽपि दशमद्रव्यं [गुण]क्रियावदस्तीति तत्रापि चिन्तनीयम्। यदाहुः 'तमः खलु चलं नीलम्' इत्यादि [तद्] दूषयति—

**द्रव्यगुणकर्मनिष्पत्तिवैधर्म्याद्भाऽभावस्तमः ॥१९॥**

द्रव्यं च गुणाश्च कर्मनिष्पत्तिश्चेति (?) द्रव्यगुणकर्मनिष्पत्तयः। ताभ्यो वैधर्म्यमालोकनिरपेक्षचक्षुर्वेद्यत्वम्। तस्मा[द्]भासस्तेजसोऽभावस्तमः। निष्पत्तिश्च सामान्य[वि]शेषसमवायतेजोव्यतिरिक्ताभावाः (?)। निष्पत्तिविषयत्वात् निष्पत्तेः प्रमितित्वात्। प्रयोगस्तु—भाभावस्तमः, आलोकनिरपेक्षचक्षुर्वेद्यत्वात् संप्रतिपन्नवत् इति। तमो न भाभावः रूपित्वात् पटवदिति चेत्-न, असिद्धेः। अञ्जनपुञ्जनिभं तमोऽनुभूयत इति चेत् न, आलोकानपेक्षचक्षुषा रूपसाक्षात्काराजननात्। अन्यथा घटकृष्णरूपादेरपि अन्धकारेऽनुभवप्रसङ्गात् ॥

**दिक्कालावाकाशं च क्रियावद्भ्यो वैधर्म्यान्निष्क्रियाणि ॥२०॥**

क्रियावद्भ्यो वैधर्म्यम् अमूर्तत्वम्। मूर्तिरवच्छिन्नपरिमाणम्। अवच्छिन्न[त्वं] च परिमाणत्वावान्तरजातिः ॥

**एतेन कर्माणि गुणाश्च व्याख्याताः ॥२१॥**

अमूर्तत्वेन कर्माणि गुणाश्च गगनवत् क्रियारहिता इति ॥

ननु निष्क्रियत्वं क्रियासम्बन्धविरहः। सोऽनुपपन्नः, आकाशादिसंयुक्तघटादि-समवेतत्वेन संयुक्तसमवायादिसम्भवादत आह—

**निष्क्रियाणां समवायः कर्मभिः प्रतिषिद्धः ॥२२॥**

आकाशादीनां साक्षात्क्रियाऽसमवायो निष्क्रियशब्देनोक्त इत्यर्थः ॥

दिशः सर्वोत्पत्तिमन्निमित्तत्वव्युत्पादनार्थं सूत्रम्—

**गुणैश्च दिग् व्याख्याता ॥२३॥**

यथा गुणानां न क्रियाश्रयत्वं तथा दिशोऽपि ॥

**कारणेन कालः ॥२४॥**

पूर्वापरादिप्रत्ययकारणेन दिशा कालो निष्क्रियो व्याख्यातः ॥

॥ इति श्रीमद्वैशेषिके दर्शने पञ्चमाध्यायस्य द्वितीयाह्निकम्

पञ्चमोऽध्यायश्च ॥

# षष्ठाध्यायस्य प्रथमाह्निकम्

कर्मपरीक्षानन्तरं गुणपरीक्षा करिष्यते। गुणेभ्योऽभ्यर्हितत्वाददृष्टपरीक्षार्थं षष्ठाध्यायारम्भः। तत्र धर्माधर्मसाधनेषु वेदः प्रमाणम्। तत्प्रामाण्यमीश्वरप्रणीतत्वेनेति। तद्व्युत्पादनार्थं सूत्रम्—

**बुद्धिपूर्वा वाक्यकृतिर्वेदे ॥१॥**

वाक्यकृतिर्वाक्यरचनाक्रम इति यावत्। बुद्धिपूर्वा पुरुषबुद्धिजन्या। वेदवाक्य-क्रमः पुरुषबुद्धिजन्यः वाक्यक्रमत्वात्, कालिदासादिवाक्यक्रमवत् ॥

अस्मदादि[भिराकलितोऽयं क्रम इत्याशङ्का]परिहारार्थं सूत्रम्—

**स वा अस्मद्बु[द्ध्यन्यो] लिङ्गमृषेः ॥२॥**

अस्मदादिबुद्धेर्वाक्यजनकत्वस्य बाधितत्वात् तदरिक्तपुरुषबुद्धौ वेदवाक्य-[जनकत्वमिति वेदकर्त्ता] भगवानृषिरीश्वरः ॥

**ब्राह्मणसंज्ञाकर्म सिद्धिलिङ्गम् ॥३॥**

अस्ति तावत् सर्गादावुत्पन्नेषु ब्राह्मणादिषु ब्राह्मणादिपदसंकेतकरोऽस्मदादि-विलक्षणः, यस्य सर्गादौ ब्राह्मणत्वादिज्ञानं, इन्द्रियसन्निपातमात्रेण क्षत्रियादिव्यावृत्त-ब्राह्मणत्वाद्यनुभवात्, व्यञ्जकान्तराभावाच्च। न तावदत्र संस्थानविशेषो व्यञ्ज[को ब्राह्मणत्वादेः, क्षत्रि]यादिव्यावृत्तसंस्थानविशेषस्य योग्यानुपलम्भनिरस्तत्वात्। नापि ब्राह्मणभूतमातापितृजन्यत्वम्, सर्गाद्येषु तदसंभवात्। नाप्यदृष्टविशेषाकृष्टभूतजन्यत्वम्, अदृष्टानवगमे तस्याप्यनवगमात्। तस्मादस्ति कश्चिद् भगवान् अस्मदाद्यतीन्द्रियब्राह्म-णत्वादिसाक्षात्कारभाक् संकेतग्रहीता। सन्ति च केचित् तत्प्रसादासादितास्मदाद्यती-न्द्रियब्राह्मणत्वादिसाक्षात्कारभाजः संकेतग्रहीतार इति ॥

सिद्धे वेदप्रामाण्ये तत्[प्रति]पाद्यधर्मसाधनप्रतिपादनार्थमुपक्रमते—

**बुद्धिपूर्वो ददातिः ॥४॥**

लक्षणया धात्वर्थे दाने ददातिप्रयोगः। बुद्धिरास्तिक्यबुद्धिः। श्रद्धापूर्वकं दानं धर्मसाधनमित्यर्थः। दानं कंचिदुद्दिश्य त्यागः। न च यागहोमयोरतिव्याप्तिः, देवताया अचेतनत्वादिति जैमिनिप्रभृतयः। तदयुक्तम्, देवतायाश्चेतनत्वात् ॥

**तथा प्रतिग्रहः ॥५॥**

श्रद्धापूर्वकप्रतिग्रहोऽपि धर्मसाधनम् ॥

**तयोश्च क्रमो यथानितरेतराङ्गभूतानाम् ॥६॥**

तयोर्दानप्रतिग्रहयोः क्रमः कार्यकरणभावरहितानामपि रासभघटादीनामिव ॥

**आत्मगुणेष्वात्मान्तरगुणानामकारणत्वात् ॥७॥**

आत्मान्तरगुणानामीश्वरव्यतिरिक्तात्मान्तरगुणानाम्, देवदत्तनिष्ठदानधर्मो न यज्ञदत्तनिष्ठप्रतिग्रहधर्मकारणं देवदत्तधर्मत्वात् संप्रतिपन्नवत्। अतो दानप्रतिग्रहयोः कार्यकारणभावे प्रमाणाभावात् बाधकमप्यस्तीत्युक्तम् ॥

कथं तर्हि यज्ञदत्तपुत्रनिष्ठश्राद्धधर्मेण यज्ञदत्तनिष्ठप्रीतिजननम्, अत आह—

**अदुष्टभोजनात् समभिव्याहारतोऽभ्युदयः ॥८॥**

अदुष्टब्राह्मणभोजनात् तृप्तादुष्टब्राह्मणोदीरितात् पितरस्ते सुखिनो भूयासुरित्याशीर्वादात् सुखोदयः ॥

**तद् दुष्टभोजने न विद्यते ॥९॥**

तदभ्युदयकारणं दुष्टभोजने न भवति ॥

**दुष्टं हिंसायाम् ॥१०॥**

प्रवृत्तं विद्धि इति शेषः। हिंसायामित्युपलक्षणं सुवर्णस्तेयादीनाम्। दुष्टभोजने दोष एव नाभ्युदयो जायते ॥

**तददुष्टे न विद्यते ॥११॥**

स्वतोऽधिकगुणवति दानार्थं प्रवृत्तिः कार्या ॥

**तथा विरुद्धानां त्यागः ॥१२॥**

यथा दानादयः, तथा विरुद्धानामाततायिनां च त्यागो वधोऽपि धर्मसाधनम् ॥

**सम आत्मत्यागः परत्यागो वा ॥१३॥**

**विशिष्टे आत्मत्यागः ॥१४॥**

उत्कृष्टाततायिवधो न कर्तव्य एवेति ॥

॥ इति श्रीमद्वैशेषिके दर्शने षष्ठाध्यायस्य प्रथमाह्निकम् ॥

## षष्ठाध्यायस्य द्वितीयाह्निकम्

**दृष्टानां दृष्टप्रयोजनानां दृष्टाभावे प्रयोगोऽभ्युदयाय ॥१॥**

वेदेन बोध्यत इति शेषः। दृष्टप्रयोजनानामित्यत्राभावादिति शेषः। दृष्टाभाव इत्यत्र स्वर्गाद्युत्पत्तेरिति शेषः। [एवं सति] गोब्राह्मणाद्युद्देशेन त्यागः स्वर्गसाधनधर्मसाधनं [वेदप्रमाणे]न बोध्यत इति ॥

**अभिषेचनोपवासब्रह्मचर्यगुरुकुलवासवानप्रस्थयज्ञदानप्रोक्षणदिङ्नक्षत्रमन्त्रकालनियमाश्चादृष्टाय ॥२॥**

[नियम इति] प्रत्येकमभिसंबध्यते। अभिषेचननियमः, उपवासनियमः, ब्रह्मचर्यनियम इत्यादि। प्रातरेव स्नातव्यमित्यभिषेचननियमः। [एकादश्यामु]पोषितव्यमित्युपवासनियम इत्यादि। गुरुरीश्वरः सर्वेषां धर्मोपदेष्टा। वनाद् वनं प्रतिष्ठत इति वानप्रस्थः। स तु तृतीयाश्रमी तस्य कर्म वानप्रस्थम् ॥

**चातुराश्रम्य[म्] ॥३॥**

[अदृष्टा]येत्यनुवर्तते ॥

**उपधाऽनुपधाश्च ॥४॥**

अदृष्टायेत्यनुषङ्गः। उपधा अधर्मसाधनम्। अनुपधा धर्मसाधनम् ॥

**भावदोष उपधा ॥५॥**

भावोऽभिसन्धिः। तेन दुष्टोऽभिसन्धिरुपधेति लक्षणम् ॥

**[यद्]इष्टरूपरसगन्धस्पर्शं प्रोक्षितमभ्युक्षितं च तच्छुचि ॥६॥**

इष्टा रूपरसगन्धस्पर्शा यत्र [त]दिष्टरूप[रसगन्धस्पर्शम्।] प्रोक्षितं समन्त्रोदकसिक्तम्। अभ्युक्षितं च तदिति वृद्धिस्थान्नादेः परामर्शः। तादृशमन्नमपि धर्मसाधनमित्यर्थः ॥

**अशुचि [इति] शुचिप्रतिषेधः ॥७॥**

**अर्थान्तरं च ॥८॥**

चाण्डालादिस्पृष्टमशुचीति द्वितीयसूत्रार्थः ॥

**अयतस्य शुचिभोजनादभ्युदयो न विद्यते ॥९॥**

अयतो यमरहितः ॥

**असति चाभावात् ॥१०॥**

असति शुचिभोजने यमाद् विशिष्टधर्मानुदयादुभयोर्विशिष्टधर्मे कारणत्वम् ॥

**सुखाद् रागः ॥११॥**

अनुभूयमानं सुखं तज्जातीयसुखान्तरे रागं जनयति। सोऽपि तत्साधने। यो यत् कामयते स तत्साधनमपि कामयत इति स्थितेः॥

**न तृप्तेः ॥१२॥**

प्रतिबन्धकत्वादिति शेषः। भोजनसुखानुभवो न पुनर्भोजने प्रवृत्तिं जनयति, प्रतिबन्धाभावविशिष्टस्य तस्य प्रवृत्तिजनकत्वात्। सुखानुभवस्य रागकारणत्वे जातमात्रस्य स्तनपानादौ रागो न स्यात्। तस्य सुखानुभवाभावात्॥

अत आह—

**अदृष्टाच्च ॥१३॥**

जातमात्रस्य जन्तोः पूर्वजन्मानुभूतसुखस्मरणं संस्कारादृष्टाभ्यां जातरागकारणम्॥

**एतेन द्वेषो व्याख्यातः ॥१४॥**

निगदव्याख्यातमेतत्॥

यद्यदृष्टाद् रागद्वेषौ कथं तर्हि मनुष्यस्यान्नादौ रागः अश्वादेश्च तृणादौ रागविशेषः, अत आह—

**जातिविशेषाच्च रागविशेषः ॥१५॥**

चकारात् जातिविशेषाद् द्वेषविशेषः। अन्वयव्यतिरेकाभ्यां जातिविशेषस्यापि तद्धेतुत्वावधारणात्॥

**ततः संयोगः ॥१६॥**

रागविशेषप्रयुक्तधर्माधर्माभ्यामपूर्वशरीरादिबन्धः॥

**विभागश्च ॥१७॥**

धर्माधर्मक्षयादिति शेषः॥

यदि रागादिभ्यो धर्माधर्मौ तर्हि तदुत्पादनानुपरमात् न कदाचिन्मोक्षः स्यादत आह -

**आत्मकर्मसु मोक्षो व्याख्यातः ॥१८॥**

आत्मा प्राणः। तत्कर्मसु निरूप्यमाणेषु मोक्षो व्याख्यातः। तदभावे संयोगाभावोऽप्रादुर्भावश्च स मोक्ष इति [५.२.१८] सूत्रेण सकलात्मविशेषगुणोच्छेदश्च मोक्षः, तत्रेष्टस्याप्यभावादपुमर्थत्वमपीति सम[माय]व्ययफलत्वमिति चेत्—न, सुखापेक्षया दुःखस्य प्राचुर्येण तदभावात् पुमर्थत्वोपपत्तेः॥

॥ इति श्रीमद्वैशेषिके दर्शने षष्ठाध्यायस्य द्वितीयाह्निकम्
षष्ठोऽध्यायश्च ॥

# सप्तमाध्यायस्य प्रथमाह्निकम्

त्रिविधा शास्त्रस्य प्रवृत्तिः, उद्देशो लक्षणं परीक्षा चेति। चतुर्विधा वा, उद्देशो विभागो लक्षणं परीक्षा चेति। तत्र गुणानामुद्देशविभागौ रू[परसगन्धस्प]र्शाः संख्या [१.१.५] इत्यादिसूत्रेण प्रथमाध्याये कृतौ। लक्षणमपि द्रव्याश्रयी न गुणवान् [१.१.१६] इत्यादिसूत्रेण तत्रैव कृतम्। परीक्षा[याम]प्ययं गुणोऽस्मिन्नित्येवंरूपा[यां] रूपरसगन्धस्पर्शवती पृथिवी[२.१.१]त्यादिसूत्रेण द्वितीयाध्याये कृतायां किमर्थः सप्तमोऽध्याय इत्याशङ्कां परिहरन् सप्तम [मध्याय]मारभते॥

**उक्ता गुणाः ॥१॥**

गुणलक्षणं चोक्तमिदमेवंगुणमिदमेवंगुणमिति चोक्तम्। सत्यम्। उद्देशलक्षणविभागान्युक्तानि। परीक्षा न कृतेति तदर्थं सप्तमाध्यायारम्भः। द्वितीये गुणपरीक्षोक्तेति चेत्—न, तस्य द्रव्यलक्षणादिपरत्वात्। पृथिव्यां रूपरसगन्धस्पर्शा अनित्या एव। तत्रानित्यपृथिवीरूपादीनामाश्रयनाशात् नाशः अग्निसंयोगाच्च। घटनाशे तद्रूपादीनां नाशदर्शनात् आपाकनिक्षिप्तघटाग्निसंयोगानन्तरं श्यामादिविनाशदर्शनाच्च। तत्राप्याश्रयनाशादेव नश्यन्तीति चेत्–न, मानाभावात्। विमता रूपादयो घटनाशनाश्याः घटरूपादित्वात्, नष्टघटरूपादिवदिति चेत्—न, घटान्तरनाशनाश्यत्वसिद्ध्याप्यस्य चरितार्थत्वात्। आपाकोद्धारानन्तरं स एवायं घट इति प्रत्यभिज्ञानाच्च। यदि वह्निसंयोगात् प्राचीनश्यामादयो न निवर्तन्ते, न तर्हि रक्तादीनामुद्भवः संभवति॥

**एतेन नित्येष्वप्यनित्यत्वमुक्तम् ॥२॥**

एतेनाग्निसंयोगतो रूपान्तरादिप्रादुर्भावेन पार्थिवपरमाणुरूपादीनामपि अनित्यत्वं समर्थनीयम्॥

**अप्सु तेजसि वायौ च नित्यत्वं द्रव्यनित्यत्वात् ॥३॥**

सलिलपरमाणुरूपरसस्पर्शाः, तेजःपरमाणुरूपस्पर्शौ, वायुपरमाणुस्पर्शश्च एते न नश्यन्ति परमाणूनां नित्यत्वेन रूपादिनाशहेतोराश्रयनाशस्याभावात्। अग्निसंयोगस्तन्नाशहेतुरिति चेत्—न, सहस्रशोऽग्निसंयोगेऽपि पूर्वरूपाद्यपरावृत्तेः॥

**अनित्येष्वनित्या द्रव्यानित्यत्वात् ॥४॥**

अनित्येषु उदकतेजोवायुषु वर्तमानरूपादयोऽप्यनित्याः आश्रयनाशस्य तन्नाशहेतोः सत्त्वात्॥

**कारणगुणपूर्वकाः पृथिव्याम् ॥५॥**

**पाकजाश्च ॥६॥**

**द्विविधा पृथिवी । कार्या नित्या च । तत्र कार्यपृथिव्यां रूपादयः कार्याः** कारणगुणपूर्वकाश्च । तथाहि–पार्थिवपरमाणुरूपरसगन्धस्पर्शेभ्यः पार्थिवद्व्यणुके रूपरसगन्धस्पर्शाः । तेभ्यस्त्र्यणुके तेभ्यश्चतुरणुके । एवमन्त्यावयविपर्यन्तम् ॥ पाकजाश्चापाकनिहितकुम्भादिरूपादीनामन्वयव्यतिरेकाभ्यामग्निसंयोगजत्वावधारणात् पार्थिवाणुरूपादीनामनित्यत्वे सत्यश्रावणत्वे सति नित्याविशेषगुणत्वेन बुद्ध्यादिवत् संयोगजत्वानुमानात् । तस्मात् क्वचित् कार्यपृथिव्यां रूपादयः कारणगुणपूर्वकाः क्वचित् पाकजाः । पार्थिवपरमाणुषु पाकजा एव ॥

आत्रेयप्रशस्तपादादयस्तु कारणगुणपूर्वकाः पृथिव्यामिति सूत्रं कार्यपृथिवीरूपादीनां कारणगुणपूर्वकत्वप्रतिपादकम् । वह्निसंयोग[त्पाक]जाश्चेति सूत्रं तु परमाणुपृथिवीरूपादीनां पाकजत्वप्रतिपादकमिति व्याचक्षते ॥

प्रक्रिया तु प्रथमक्षणे वह्न्यभिघातान्नोदनाद् वा आपाकनिहितकुम्भादिपरमाणुषु द्व्यणुकारम्भक[संयो]गविरोधिविभागारम्भकं कर्म । द्वितीयक्षणे द्व्यणुकारम्भकसंयोगविरोधीविभागः । तृतीयक्षणे द्व्यणुकारम्भकसंयोगनाशः । [चतुर्थक्षणे] द्व्यणुकनाशः । पञ्चमक्षणे परमाणुश्यामादीनामग्निसंयोगान्नाशः, सक्रियस्य परमाणोराकाशादिना विभागजविभागश्च । षष्ठ[क्षणे भोग्यदृष्टापेक्षादात्माणु]संयोगाद् रक्तादीनामुत्पत्तिः परमाणोराकाशादिना पूर्वसंयोगनिवृत्तिश्च । सप्तमक्षणे परमाण्वन्तरेण संयोगः । अष्टमक्षणे [द्व्यणु]कोत्पत्तिः । नवमक्षणे कारणगुणपूर्वकक्रमेण द्व्यणुके रूपाद्युत्पत्तिरिति ।

तदयुक्तम् । प्रमाणाभावात्, प्रत्यभिज्ञाविरोधस्योक्तत्वाच्च ॥

**अप्सु तेजसि वायौ च कारणगुणपूर्वकाः ॥७॥**

कार्योदकादौ रूपादयः कारणगुणपूर्वकाः, उदकाद्यवयवरूपादिभिरुदकाद्यवयविरूपाद्यारम्भस्य प्रत्यक्षसिद्धत्वात् पाकजा न विद्यन्ते । कार्योदकादिरूपादयो नाग्निसंयोगजाः उदकादिरूपादित्वात् उदकपरमाण्वादिरूपादिवत् । उदकपरमाण्वादिरूपादयो न पाकजाः नित्यत्वात् गगनवत् ॥

**कर्मगुणा अगुणाः ॥८॥**

द्रव्यं हि गुणानां समवायिकारणम् । न च गुणकर्मणी गुणवती अद्रव्यत्वात् । यद् गुणवत् तद् द्रव्यम्, यथा घटः । शुक्लः पट इत्यत्र शुक्लप्रत्ययस्तु द्रव्ये शुक्लगुणयोगात्, रूपे शुक्लत्वजातियोगात् । न तु रूपस्य शुक्लगुणवत्त्वात् । शुक्लो गच्छतीति प्रत्ययस्तु द्रव्ये शुक्लगुणकर्मयोगात् । न तु कर्मणः शुक्लगुणवत्त्वात् ॥



**एतेन पाकजा व्याख्याताः ॥९॥**

एतेन द्रव्यस्य गुणारम्भप्रतिपादनेन ॥

**एकद्रव्यत्वाच्च ॥१०॥**

**श्यामरक्तादीनां विरोधो देशभेदेन वा कालभेदेन वा परिहार्यः । न चैषां** देशभेदोऽस्ति, एकद्रव्याश्रितत्वात् । तस्मात् कालभेदेन विरोधपरिहारः । तस्मात् श्यामादिनिवृत्त्यनन्तरं श्यामादिवति समवायेन रक्तादीनामुत्पत्तिः ॥

**अणोर्महतश्चोपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥११॥**

चतुर्थाध्याये इति शेषः । अणोरनुपलब्धिः, महत उपलब्धिः । चतुर्थे हि, महत्यनेकद्रव्यत्वाद् रूपाच्चोपलब्धिः [४.१.५] अद्रव्यत्वात् परमाणावनुपलब्धिः [४.१.६] इति सूत्रद्वयम् ॥

**कारणबहुत्वात् कारणमहत्त्वात् प्रचयविशेषाच्च महत् ॥१२॥**

कारणबहुत्वाद् यथा अप्रचितद्व्यणुकत्रयारब्धत्र्यणुके, तस्य कारणस्य महत्त्वाभावात् प्रचयाभावाच्च । कारणमहत्त्वाद् यथा–अप्रचिततन्तुद्वयारब्धद्वितन्तुकादौ, तत्र कारणबहुत्वप्रचयाभावात् । प्रचयविशेषः कारणप्रचयः । तस्माद् यथा–प्रचितत्र्यणुकद्वयारब्धकार्यद्रव्ये । तत्र कारणबहुत्वाभावात् कारणमहत्त्वस्य सतोऽप्यकारणत्वात् । कारणबहुत्वमहत्त्वाभ्यां महत्त्वं यथा– अप्रचिततुल्यमहत्त्वतन्तुत्रयारब्धत्रितन्तुकादौ । कारणबहुत्वप्रचयाभ्यां महत्त्वं यथा–प्रचितत्र्यणुकारब्धकार्यद्रव्ये कारणबहुत्वमहत्त्वप्रचयजन्याद् विपरीतम् ॥

**अणुमहदिति तस्मिन् विशेषभावाद् विशेषाभावाच्च ॥१३॥**

तस्मिन् प्रसिद्धामलकादौ अणुव्यवहारो महत्त्वप्रचयजन्याद् विपरीतम् अणुमहदिति कार्याभावगुणयोगात् । [गगनमहत्त्वापकृष्टमहत्त्वके तस्मिन्] महदिति व्यवहारोऽपि परमाणुपरिमाणपेक्षया उत्कर्षविशेषगुणयोगात् ॥

मुख्ये बाधकमाह—

**एककालत्वात् ॥१४॥**

अणुत्वमहत्त्वयोः विरोधपरिहारो धर्मिभेदात् कालभेदाद् वा । नात्र धर्मिभेदः, बिल्वामलकद्व्यणुकादेरेकत्वात् । नापि कालभेदः, अणुमहद्व्यवहारयोरेक[कालत्वात्, एकत्र सद्भावे क]थमणुत्वमहत्त्वयोर्विरोधः ॥

अत आह—

**दृष्टान्ताच्च ॥१५॥**

यदणु न तन्महत्, यथाणु । यन्महत् तन्नाणु, यथा आकाशमिति परस्परपरिहारेणैवोपलम्भाद् विरोध[:] शीतोष्णस्पर्शयोरिव ॥

**अणुत्वमहत्त्वयोरणुत्वमहत्त्वाभावः कर्मगुणैर्व्याख्यातः ॥१६॥**

**[अणुत्वमहत्त्वाभ्यां कर्मगुणाश्च व्याख्याताः] ॥१७॥**

अणुत्वमहत्त्वाभ्याम्। कर्मगुणा अगुणाः। गुणकर्मणी नाणुत्वमहत्त्ववती अद्रव्यत्वात्। अणुत्वमहत्त्ववत् ॥

**एतेन दीर्घत्वह्रस्वत्वयोरुपलब्ध्यनुपलब्धी नित्ये व्याख्याते ॥१८॥**

**कर्मभिः कर्माणि ॥१९॥**

**गुणैर्गुणाः ॥२०॥**

व्याख्याता इति शेषः। कर्मभिर्दृष्टान्तैर्गुणैश्च दृष्टान्तैः दीर्घत्वह्रस्वत्वयोः कर्माणि गुणाश्च व्याख्याताः। दीर्घत्वह्रस्वत्वे न कर्मवती, नापि शुक्लादिमती, अद्रव्यत्वात् कर्मवत्, शुक्लादिवच्च ॥

**एतदनित्यम् ॥२१॥**

एतदिति कार्यचतुर्विधपरिमाणाधिकरणं द्रव्यं परामृशति। ततश्चाश्रयनाशात् कार्यचतुर्विधपरिमाणनाश इति सूत्रार्थः ॥

**नित्यं परिमण्डलम् ॥२२॥**

परमाणुपरिमाणं नित्यमविनाशि। कथमित्यत्राप्येतदेवोत्तरम्। नित्यं परिमण्डलम्। परिमण्डलमस्यास्तीति परिमण्डलं परमाणु। तेनाश्रयनाना[त्वा]भावात् परमाणुपरिमाणं नित्यम् ॥

**अविद्या च विद्यालिङ्गम् ॥२३॥**

अविद्या व्याप्तिस्मृतिः, स्मृतेरविद्यात्वात्। विद्या पक्षत्वप्रतीतिः ह्रस्वत्वाणुत्वयोरिति शेषः। द्व्यणुकमणुत्वातिरिक्तपरिमाणवत् द्रव्यत्वात् घटवत् ॥

**विभवान्महानाकाशस्तथा चात्मा ॥२४॥**

**तदभावादणु मनः ॥२५॥**

विभवो युगपत् सर्वमूर्तद्रव्यसंयोगः। चकारोऽनुक्तदीर्घत्वादिसमुच्चयार्थः। मनोऽणु, अविभुत्वे सति नित्यद्रव्यत्वादुदकपरमाणुवत् ॥

**गुणैर्दिग् व्याख्याता ॥२६॥**

सर्वगतपरममहती चेति शेषः ॥

**कारणेन कालः ॥२७॥**

परत्वापरत्वपूर्वादिप्रत्ययकारणेन दिशा कालः सर्वगतः परममहांश्च व्याख्यातः ॥

॥ इति श्रीमद्वैशेषिके दर्शने सप्तमाध्यायस्य प्रथमाह्निकम् ॥

# सप्तमाध्यायस्य द्वितीयाह्निकम्

**रूपरसगन्धस्पर्शव्यतिरेकादर्थान्तरमेकत्वम् ॥१॥**

गन्धाभावेऽप्युदकादौ रसाभावेऽपि वह्न्यादौ रूपाभावेऽपि पवनादौ स्पर्शाभावेऽप्याकाशादौ एकत्वमुपलभ्यते। तस्माद् रूपादिभ्यो भिन्नम्। एवं गुणान्तरादिभ्यः अनेकत्वस्य भेदः साधनीयः ॥

**तथा पृथक्त्वम् ॥२॥**

यथा एकत्वं रूपादिभ्यो भिद्यते तथैकपृथक्त्वमपि। समर्थिते चैकत्वैकपृथक्त्वे अनेकत्वानेकपृथक्त्वे च। तयोर्नित्यत्वानित्यत्वे। तेजसो रूपस्पर्शौ परमाणुषु नित्यौ। अन्यत्राश्रयनाशान्नश्यतः। तथैकत्वैकपृथक्त्वे। यथा च तौ कार्ये कारणगुणपूर्वकौ, तथैकत्वैकपृथक्त्वे च ॥

**एकत्वैकपृथक्त्वयोरेकत्वैकपृथक्त्वाभावोऽणुमहत्त्वाभ्यां व्याख्यातः ॥३॥**

**कर्मभिः कर्माणि ॥४॥**

**गुणैर्गुण[ाः] ॥५॥**

गतार्थानि सूत्राणि, न्यायस्य तुल्यत्वात् ॥

**निःसंख्यत्वात् कर्मगुणानां सर्वैकत्वं न विद्यते ॥६॥**

[गु]णकर्मादिकमेकमेवेति मायावेदान्तिनः। तन्न, सर्वैकत्वस्य व्याहतत्वात्। गुणकर्मादय एकत्वसंख्यारहिताः अद्रव्यत्वात्। यन्नैवं तन्नैवं यथा [घटः] ॥

**एकस्याभावाद् भाक्तं न विद्यते ॥७॥**

भाक्तममुख्यम्। सर्वव्यतिरिक्तस्यैकस्याभावात् कथं तद्गतमेकत्वं सर्वस्मिन्नारोप्येत व्यवह्रियेत वा? अ[न्यदेव] गुणगुणिनोः क्रियातद्वतोरेकत्वपृथक्त्वे मीमांसकक्षपणकादयो वर्णयन्ति, भेदाभेदस्वीकारात् ॥

तद् दूषयति—

**कार्यकारणयोरेकत्वपृथक्त्वाभावादेक[त्वपृथक्त्वं न] विद्यते ॥८॥**

कार्यकारणयोरेकत्वपृथक्त्वे न संभवतः। एकस्यानेककार्यकारणनिष्ठत्वानुपपत्तेः। एतेन जातिव्यक्त्योरपि भेदाभेदौ निरस्तौ ॥

**एतदनित्ययोर्व्याख्यातम् ॥९॥**

अनेकत्वमनेकपृथक्त्वं चानित्ययोर्वर्तमानं व्याख्यातम्। आश्रयनाशान्नश्यतीति ॥

**अन्यतरकर्मज उभयकर्मजः संयोगजश्च संयोगः ॥१०॥**

अन्यतरकर्मजः क्रियावता निष्क्रियस्य, यथा–स्थाणोः श्येनेन, विभूनां च मूर्तैः। उभयकर्मजो विरुद्धक्रिययोः, यथा–मल्लयोर्मेषयोर्वा। अगृह्यमाणविशेषत्वेनोभयकर्मणोः संयोगकारणत्वात्। संयोगश्च [संयोगजो] द्वेधा। क[ा]रणसंयोगजः कारणाक[ा]रणसंयोग[ज]श्च। आद्यो यथा-तन्तुकर्मजन्यतन्त्वन्तरसंयोगात् तन्त्वन्तरसंयुक्ताकाशादिसंयोगः। द्वाभ्यां यथा-तन्त्वाकाशसंयोगाभ्यां द्वितन्तुकाकाशसंयोगः। द्वितीयस्तु हस्तकुड्यसंयोगाच्छरीरकुड्यसंयोगः। त्रिविधश्च संयोगः। चोऽवधारणे। विभूनामजः संयोगश्चतुर्थोऽस्तीति चेत्—न, मानाभावात्। विभू मिथः संयुज्येते द्रव्यत्वात् घटवदिति चेत्—न, तन्तुपटादौ व्यभिचारात। आरम्भारम्भकभावविरहे सतीति विशेषणीयमिति चेत्—न, हिमवद्विन्ध्यादावुत्पन्नसंयोगे नष्टपटादौ व्यभिचारात् ॥

**एतेन विभागो व्याख्यातः ॥११॥**

संयोगवद् विभागोऽप्यन्यतरकर्मज उभयकर्मजो विभागजश्च। आद्यः स्थाणो[ः] श्येनेन। द्वितीयो यथा मल्लयोः। कारणमात्रविभागाद् यथा—वंशदलविभागाद् वंशदलाकाशादिविभागः। क[ा]रणाकारणविभागाद् यथा—अङ्गुलिकुड्यविभागाद् हस्तकुड्यविभागाच्च शरीरकुड्यविभाग इति ॥

**संयोगविभागयोः संयोगविभागाभावोऽणुमहत्त्वाभ्यां व्याख्यातः ॥१२॥**

**कर्मभिः कर्माणि ॥१३॥**

**गुणैर्गुणाः ॥१४॥**

इति सूत्रत्रयं गतार्थम् ॥

**युतसिद्ध्यभावात् कार्यकारणयोः संयोगविभागौ न विद्येते १५॥**

युतौ संयुक्ताविति सिद्धिः युतसिद्धिः संयुक्ताविति प्रतीतिः। तदभावान्न आरभ्यारम्भकयोः संयोगौ स्याताम्। संबन्धप्रत्ययोऽस्तीति चेत्, तर्हि संबन्धः स्यात्। स तु समवायः। अयं पटो नैतत्तन्तुसंयुक्तः, तदारभ्यत्वात् तन्तुरूपवत्। संयोगाभावाच्च तद्विनाशकविभागाभावः। गुणत्वाच्च पटरूपादयो न विभागवन्तः गुणत्वात् संयोगवत् ॥



वाच्यवाचकयोः [संयोगः] संबन्धोऽस्तीत्यत आह—

**गुणे [च भाष्यते] ॥१६॥**

**[निष्क्रि]यत्वात् ॥१७॥**

न केवलं वाचको गुणः। गुणे च भाष्यते। शुक्लादौ संकेत्यते। तेन वाच्यवाचकयोर्गुणत्वान्न संयोगविभागौ स्तः, उभयो[र्गत्याद्यभावात्] ॥

न तावत् हिमवदादिपदं दक्षिण[ा]पथोच्चारितं यावत् हिमवन्तं गच्छति। नापि हिमवदादयो दक्षिणापथोच्चारितहिमवदादि[भिः समं संयुज्य]न्ते। योग्यानुपलम्भबाधान्निष्क्रियः शब्द आकाशादयश्च। तत् कथं तेषां संयोगः ॥

उपसंहरति—

**शब्दार्थावसंबन्धौ ॥१८॥**

तस्मादिति शेषः ॥

**संयो[गिनो दण्डात् सम]वायिनो विषाणाच्च दृष्टत्वादहेतुः ॥१९॥**

दण्डी पुरुषो बलीवर्दो विषाणीत्यादौ विशिष्टप्रत्ययत्वमनैकान्तिकम्। तथा प्रत्ययाभावात् सन्देहः। संबन्धपूर्वकत्व[ं] प्रतिज्ञाय[हेतोर्विशि]ष्टप्रत्ययस्यो[क्तौ] सन्देहः स्यात्, संबन्धपूर्वको नवेति ॥

कथं तर्हि देवदत्तपदात् देवदत्ते धीर्न यज्ञदत्ते इत्यत आह—

**सामयिकः शब्दार्थप्रत्ययः ॥२०॥**

समयेन सिद्धः सामयिकः। समयः संकेतः। यत्पदं यत्र संकेत्यते तत् तस्य प्रयोजकम्, नान्यस्येति संकेतान्नियम इति ॥

**एकदिक्काभ्यां सन्निकृष्टविप्रकृष्टाभ्यां परमपरं च ॥२१॥**

एकस्यां दिशि पूर्वस्यां पश्चिमायां वा स्थिताभ्यां स्वशरीरापेक्षया संयुक्तसंयोगभूय[स्त्वाभू]यस्त्वसंयुक्ताभ्यां परत्वमपरत्वं च जन्यते। परापरशब्दयोर्गुणवचनयोः परः पटोऽपरः पट इति द्रव्ये प्रयोगः परापरगुणयोगात् ॥

**कारणपरत्वात् कारणापरत्वाच्च ॥२२॥**

कारणं परापरत्वयोरपेक्षाबुद्धिः। तस्याः परत्वं संयुक्तसंयोगतपनपरिस्पन्दभूयस्त्वविषयत्वम्। त[स्याः] अपरत्वं तदल्पीयस्त्वविषयत्वम्। परत्वापरत्वे न स्त इति वक्तुं न युक्तम्, परोऽयमपरोऽयमित्यनुभवात्। विप्रकृष्टत्वं परत्वं सन्निकृष्टत्वं चापरत्वम्।

कालेऽपि परः स्थविरः, अपरो युवा इति प्रत्ययः। परत्वापरत्वे गुणौ, द्रव्यकर्मान्यत्वे सति जातिमत्त्वात् रूपवत्। विमते परत्वापरत्वे देवदत्तबुद्धिजे, सत्यपीन्द्रियसन्निकर्षादौ यज्ञदत्ताचाक्षुषत्वे सति देवदत्तचाक्षुषत्वाद् द्वित्ववत्। परत्वापरत्वे मूर्तामूर्तसंयोगजन्ये, एकद्रव्यत्वेऽस्मदादिप्रत्यक्षत्वे वा आवरणाद्यनुपलब्धिकारणाभावे सति पुरुषान्तराप्रत्यक्षयोः पुरुषान्तरप्रत्यक्षत्वात् सुखादिवत् ॥

**परत्वापरत्वयोः परत्वापरत्वाभावोऽणुत्वमहत्त्वाभ्यां व्याख्यातः ॥२३॥**

**कर्मभिः कर्माणि ॥२४॥**

**गुणैर्गुणाः ॥२५॥**

इति सूत्रत्रयं गतार्थम् ॥

**इहेदमिति यतः कार्यकारणयोः स समवायः ॥२६॥**

कार्यकारणग्रहणमुपलक्षणम्। कार्यकारणयोर्गुणगुणिनोः, क्रियातद्वतोः, जातिव्यक्त्योः, विशेषतद्वतो[श्च] इहेदमिति यतः स समवायः। इह तन्तुषु पट इत्यादि ॥

**द्रव्यगुणकर्मत्वप्रतिषेधो भावेन व्याख्यातः ॥२७॥**

भावः सत्ता यथा न द्रव्यं न गुणो न कर्म पूर्वोक्तहेतुभ्यः, तथा [न] समवायोऽपि। न चायं जातिविशेषाभावानामन्यतमः संबन्धत्वात् संयोगवत्। तस्मात् पदार्थान्तरं समवायः ॥

**तत्त्वं भावे[न] ॥२८॥**

तस्य भावस्तत्त्वम्। य एव तन्तुपटयोः समवायः स एव जातिव्यक्त्योः समवा[योऽ]पि। प्रयोगस्तु—जातिव्यक्त्यादिसमवायः तन्तुपटसमवायान्न भिद्यते, समवायत्वात् तन्तुपटसमवायवत्। समवायभेदसाधन[भा]वाच्च। तन्तुपटसमवायो भिद्यते तन्तुपटसंबन्धत्वात् तन्तुपटसंयोगवदिति चेत्—न, समवायलक्षणाभावेन सोपाधित्वा[त्] ॥

॥ इति श्रीमद्वैशेषिके दर्शने सप्तमाध्यायस्य द्वितीयाह्निकम्

सप्तमोध्यायश्च ॥

—०—

# अष्टमाध्यायस्य प्रथमाह्निकम्

अविद्यमानप्रतिपाद्यतया अनन्तराध्यायप्रवृत्तिवैयर्थ्याशङ्कां परिहरन् उक्तमनुवदति—

**द्रव्येषु ज्ञानं [व्याख्यातम्] ॥१॥**

[द्रव्येषु भूम्यादिनवसु द्वितीयाध्यायव्याख्यातेष्वात्मन्यतिरिक्ते ज्ञानं तदाश्रय आ]त्मा च ॥

**ज्ञाननिर्देशे ज्ञाननिष्पत्तिरुक्ता ॥२॥**

वागादिष्वलैङ्गिकं ज्ञानमात्मन्यपरोक्षज्ञानं तृतीयाध्याये व्याख्यातम् ॥

**आत्ममनसी कारणे व्याख्याते ॥३॥**[1]

[कारणे समवायिकारणनिमित्तकारणे व्याख्याते य]त्रेति ज्ञाननिर्देशश्चतुर्थोऽध्यायः। तत्र पृथिव्यादिपरमाणुविषयं लैङ्गिकं स्थूलपृथिव्यादिविषयमपरोक्षज्ञानं सकारणं व्याख्यातम् ॥

संप्रत्य[वान्तरापरोक्षगुणक]र्मादिज्ञानकारणप्रतिपादनार्थमष्टमोऽध्यायः आरभ्यते।

**गुणकर्मसु सन्निकृष्टेषु ज्ञाननिष्पत्तेर्द्रव्यं कारणम् ॥४॥**

घटादिगुणकर्मसामान्यज्ञाने चक्षुरादिसन्निकृष्टघटादेः कारणत्वं चक्षुर्घटसंयोगस्य कारणत्वे चक्षुष इव घटस्यापि कारणत्वात् कारणकारणं च मा भूयात्। घटरूपादिज्ञाने घटस्य कारणत्वम्, संयोगेनान्यथासिद्धेः कारणकारणत्वं तु स्यात्, घटरूपादिज्ञानकारणचाक्षुषघटसंयोगकारणत्वात् ॥

द्विविधं ज्ञानं सविकल्पकं निर्विकल्पकं च। तत्र सविकल्पके कारणमाह—

**सामान्यविशेषापेक्षं द्रव्यगुणकर्मसु ॥५॥**

विशिष्टं ज्ञानमिति शेषः। सामान्यापेक्षं द्रव्ये यथा, इदं सद् द्रव्यं पृथिवीत्यादि। विशेषापेक्षं द्रव्ये यथा, सामान्यजातिगुणक्रियावन्तः परमाणवो व्यावर्तकधर्मवन्त इति योगिनामपरोक्षज्ञानमस्मदादीनामानुमानिकम्। सामान्यापेक्षं गुणे यथा, इदं सद्रूपं शुक्लमिति। सामान्यापेक्षं कर्मणि यथा, इदं सत्कर्मोत्क्षेपणमिति। विशेषापेक्षं ज्ञानं गुणकर्मणोर्नास्ति, तत्रान्त्यविशेषाभावात् ॥

**द्रव्ये द्रव्यगुणकर्मापेक्षम् ॥६॥**

१. एतस्य सूत्रत्वं सन्दिग्धम्।

अपरोक्षमानुमानिकं वा सविकल्पकमुत्पद्यत इति शेषः । द्रव्ये द्रव्यापेक्षं यथा, गौर्विषाणीति । गुणापेक्षं यथा, गौः शुक्ल इति । कर्मजन्यं यथा, गौर्गच्छतीति ।।

**गुणकर्मसु गुणकर्माभावात् गुणकर्मापेक्षं न विद्यते ।।७।।**

स्पष्टार्थम् ।।

**समवायिनः श्वैत्यात् श्वैत्यबुद्धेश्च श्वेते बुद्धिस्ते कार्यकारणभूते ।।८।।**

समवायिन इति शुक्लगुणपटसंबन्धात् । श्वैत्यादिति शुक्लगुणात् । श्वैत्यबुद्धेरिति शुक्लगुणबुद्धे[:] । श्वेते शुक्लगुणविशिष्टे पटे बुद्धिर्जायते । तच्चान्यत्रापि, ते विशेषणविशेष्यबुद्धी विशेषणज्ञानविशिष्टबुद्धी च, कार्यकारणभूते अन्वयव्यतिरेकसहितप्रत्यक्षेणावसिते, विशेषणसंबन्धविशेषज्ञानेषु सत्सु विशिष्टप्रत्ययोदयादसत्सु चानुदयात् ।।

ननु किं व्यतिरेकग्रहणेनान्वयादेव विशेषणज्ञानादीनां विशिष्टज्ञानकारणत्वसिद्धेरत आह--

**द्रव्येष्वनितरेतरकारणाः प्रत्ययाः ।।९।।**

**कारणायौगपद्यात् [कारणक्रमाच्च घटपटादिबुद्धीनां क्रमो न हेतुफलभावात्] ।।१०।।**

[कारणानां प्रत्यया]नामयौगपद्यात् क्रमात् क्रमेण घटपटादिप्रत्यया जायन्ते । न च तेषु पूर्वपूर्वप्रत्ययानां कारणत्वम् । तस्मान्नान्वयम[ात्रेण विशेषणज्ञानादीनां] कारणभावसिद्धिः । तथा द्रव्यगुणकर्मसु कारणविशेषात् द्रव्यगुणकर्मस्वपि द्रव्यवत् क्रमभावि न[युगपद्भावविज्ञानम् । विशिष्टबुद्धयो] विशेषात् क्रमवत्कारणादुत्पद्यन्ते । न तेषामितरेतरकारणत्वमिति नान्वयमात्रात् कारणसिद्धिरिति व्यतिरेको[ऽप्यपेक्षितः] ।।

अर्थज्ञानं सकारणं व्युत्पादयति—

**अयं त्वया भोजयैनमिति बुद्ध्यपेक्षम् ।।१३।।**

**दृष्टेषु भावाददृष्टेष्वभावात् ।।१२।।**

त्वयेत्यत्र[भोजयि]तव्य इति शेषः । अयं त्वया भोजयितव्यो भोजयैनमित्यादिवाक्येभ्यो जायमानं ज्ञानं बुद्ध्यपेक्षं पदपदार्थसंकेतज्ञानापेक्षम् । दृष्टेषु ज्ञातेषु पदपदार्थसंकेतेषु भावात् उदयात् अदृष्टेषु अज्ञातेषु अभावात् अनुदयात् ।।

।। इति श्रीमद्वैशेषिके दर्शने अष्टमाध्यायस्य प्रथमाह्निकम् ।।

•

# अष्टमाध्यायस्य द्वितीयाह्निकम्

अर्थेन्द्रियव्याख्यानार्थमयमाह्निकारम्भः ।

**अर्थ इति द्रव्यगुणकर्मसु ।।१।।**

जात्यादीनामुपलक्षणम् । [अर्थ] इति द्रव्यगुणकर्मसामान्यविशेषसमवायाभावेषु प्रयुज्यते ।।

घ्राणरसनचक्षुस्त्वगिन्द्रियाण्यत्र व्याख्येयानि, श्रोत्रस्य मनोवत् पूर्वं व्याख्यातत्वात् । तत्र घ्रणादीनि किं पञ्चभूतसमवायिकारणानि पृथिव्याद्येकैकसमवायिकारणानि वा ? तत्र प्रथमं दूषयति—

**द्रव्येषु पञ्चकात्मकम् ।।२।।**

द्रव्यनिरूपणे [द्वितीयाध्याये]पञ्चभूतसमवायिकारणानि न [वस्तूनि स्वीकृतानीति शेषः] [त्र्यात्मकानीति] द्वितीयोऽपि पक्षस्तत्रैव निरस्तः । तस्मात् पृथिव्याद्येकैककारणानीति सिद्धम् ।।

**भूयस्त्वाद् गन्धवत्त्वाच्च पृथिवी गन्धज्ञाने ।।३।।**

प्रकृतिरिति शेषः । गन्धज्ञापकघ्राणे प्रकृतिः समवायिकारणं पृथिवी । न च लोष्ठादौ पार्थिवावयवारब्धत्वात् गन्धोपलम्भकत्वप्रसङ्गः, घ्राणत्वजातीयस्य तदुपलम्भकत्वात् । नापि तत्र घ्राणप्रसङ्गः । घ्राणावयवगन्धजन्यघ्राणगन्धे जातिविशेषस्वीकारात्, तज्जातीयगन्धवत्त्वस्य घ्राणत्वव्यञ्जकत्वात् । तदिदमुक्तम् गन्धवत्त्वाच्चेति चकारोऽनुक्तघ्राणजातीयत्वसमुच्चयार्थः । अल्पसलिलाद्यवयवोपष्टब्धबहुतरपार्थिवावयवा[नामुपलम्भो दृश्यते । ] तदिदमुक्तं भूयस्त्वादिति ।।

**तथापस्तेजो वायुश्च ।।४।।**

रसरूप[स्पर्श]ज्ञानेषु समवायिकारणमिति शेषः । यथा घ्राणे पृथिवी [प्रकृतिस्तथा] रसने आप इत्यादि ।।

रसनत्व[ादि] जातिविशेषाणां किं व्यवस्थापकमित्याह--

**रसरूपस्पर्शात् ।।५।।**

रसरूपस्पर्श[ज्ञानाद्रसनत्वादिसिद्धिः । अ]र्थे सत्येव घ्राणादय इति चेत्--न, अनुमानसिद्धत्वात् । चन्दनगन्धकार्यसाक्षात्कारश्चन्दनरूपसाक्षात्कारजनकद्रव्य-

जन्यः, कार्य[त्वात् जलरसकार्यसाक्षात्कार]वत् । तेषां पार्थिवत्वादौ किं प्रमाणम् ? घ्राणं पार्थिवम् रूपादिषु मध्ये गन्धस्यैव व्यञ्जकत्वात् । कुङ्कुमगन्धाभिव्यञ्जकतैलादिवत् । तैलादेः स्वकीयरूपादेरप्यभिव्यञ्जकत्वाद् दृष्टान्तस्य साधनवैकल्यादिति चेत्--न, घ्राणं पार्थिवम्, रूपसाक्षात्काराजनकगन्धसाक्षात्कारजनकद्रव्यत्वात् कुङ्कुमवत् । रसनमाप्यम्, गन्धसाक्षात्काराजनकरससाक्षात्कारजनकद्रव्यत्वादुदकवत् । चक्षुस्तैजसम्, रससाक्षात्काराजनकरूपसाक्षात्कारजनकद्रव्यत्वादालोकवत् । त्वगिन्द्रियं वायवीयम्, रूपसाक्षात्काराजनकस्पर्शसाक्षात्कारजनकद्रव्यत्वात् व्यजनानिलवत् ॥

॥ इति श्रीमद्वैशेषिके दर्शने अष्टमाध्यायस्य द्वितीयाह्निकम्

अष्टमोऽध्यायश्च ॥

# नवमाध्यायस्य प्रथमाह्निकम्

इन्द्रियार्थावष्टमे व्याख्यातौ । इदानीं सन्निकर्षप्रतिपादनार्थमयमध्याय आरभ्यते । अभावे सन्निकर्षप्रतिपादनार्थं प्रथमाह्निकम् । सन्निकर्षप्रतिपादनार्थं चतुर्विधाभावं प्रतिपिपादयिषुः प्रागभावप्रध्वंसौ दर्शयति—

**क्रियागुणव्यपदेशाभावादसत् ॥१॥**

घटादिकार्यं घटादेः प्रागुत्तरकाले चासत् । घटपूर्वक्षणे घटस्य प्रागभावः । घटोत्तरक्षणे तस्य प्रध्वंसः । घटपूर्वापरकालौ घटवन्तौ कालत्वात् घटकालवदिति चेत्—न, क्रियागुणव्यपदेशाभावात् ॥

**असति क्रियागुणव्यपदेशाभावादर्थान्तरम् ॥२॥**

अभावो द्रव्यं क्रियावान् गुणवान् क्रियागुण इति व्यपदेशाभावात् । व्यपदेश उपलम्भः शब्दप्रयोगो वा । तस्माद् द्रव्यगुणकर्मभ्योऽर्थान्तरमभावः ॥

**सच्चासत् ॥३॥**

यद् घटादिकं क्वचिदेकदेशस्थितमन्यत्रासत् तस्यान्यत्राभावः ॥

**यच्चान्यत्सतस्तदसत् ॥४॥**

अन्यदिति भावपरो निर्देशः । यत् सतोऽन्यत्वं तदभावः । चतुर्विधः अभावः प्रत्यक्षो घटादीनाम् । अप्रत्यक्षोऽघटादीनाम् ॥

तत्र प्रत्यक्षे साक्षात्कारप्रकारमाह—

**असदिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाच्च ज्ञानम् ॥५॥**

असदिति ज्ञानं पूर्वमुत्पन्नस्य पटादेः प्रत्यक्षानुपलम्भात् भूतस्य घटादेः प्रतियोगिनः स्मरणाच्च विरोधिनः प्रतियोगिनः प्रत्यक्षयोग्यत्वाच्च जायते । चकारः संबन्धिविशेषणविशेष्यभावसन्निकर्षसमुच्चयार्थः ॥

**तथाभावे भावप्रत्यक्षत्वाच्च ॥६॥**

न केवलमभाव[स्य प्रतियोगि]स्मृतेर्ज्ञानमपि तु भावापरोक्षज्ञानादपि । यथेह भूतले घटो नास्तीति । चकारात् क्वचित् प्रतियोग्यनुमानादभावज्ञानम् । यथा-अन्त्यतन्तुसंयोगेन भविष्यत्पटानुमानादिह त[न्तौ पटो भविष्यतीति] ॥

एतेनाघटोऽगौरधर्मश्च व्याख्यातः ॥७॥

अयमघट इति घटत्वात्यन्ताभावज्ञानं घटान्योन्याभावज्ञानं वा। अगौरित्यत्रापि तथा। त[दिदमपरोक्ष]फलम्। अधर्मोऽयमिति धर्मत्वात्यन्ताभावज्ञानं धर्मान्योन्याभावज्ञानं वा तदिद[मनु]मानफलम् ॥

॥ इति श्रीमद्वैशेषिके दर्शने नवमाध्यायस्य प्रथमाह्निकम्[1] ॥

१. अत्र मातृका खण्डिता।

## परिशिष्ट–२

# ॥ कणादसूत्रवृत्तौ नवमाध्यायः ॥

[1B] ॥ ओं नमो भगवते वासुदेवाय ॥

इदानीं न्यायः प्रतिपादनीयः। तत्र च प्रयोजनानुसन्धानाधा..........स्मदपेक्षितनिदानमित्यननुसन्धाय क्वचित् प्रेक्षावान् प्रवर्तते। न चैतत् [ संभवति ] घटादीनां सर्वदा तादवस्थ्यात्। तदुक्तम्,

नासतो विद्यते भावो नाभावो विद्यते सतः।

[श्रीमद्भगवद्गीता]

इति। यदि चासत् क्रियते तदा असत्त्वाविशेषाद् गगनकुशेशयस्यापि करणापत्तिः। स..........रुपलब्धी, यथावपीडनादिना तिलतैलादिरिति। किं चासन् घटः क्रियत इति किमसत्त्वतादात्म्यो[प]पन्नः, यद् वा असत्त्व..........प्र]थमे नभस्यसत्त्वं कर्तुं शक्यम्। न हि नीलं परमेश्वरेणापि पीतं कर्तुं शक्यम्। द्वितीये तु न धर्मिणमन्तरेण धर्मसंभव इति तदापि तस्य सत्त्वमायातमिति कथं न सत्कार्यवादापत्तिः। किं च, कारणं किं कार्यं संबद्धमुत्पादयति, किं वा असंबद्धम्? आद्ये कथं न सत्कार्यवादाभ्युपग [2a]मः, अविद्यमानेनासंबन्धात्? द्वितीये त्वतिप्रसङ्गः। तदुक्तम्—

असत्त्वान्नास्ति संबन्धः कारणैः सत्त्वसंगतेः।
असंबद्धस्य चोत्पत्तिमिच्छतां न व्यवस्थितिः ॥

[ Attriluted to the Sānpkyācaryas S S p. 323 ]

अथासंबद्धत्वाविशेषेऽपि यत्र शक्तिः तस्य तज्जनयति। अतो नातिप्रसक्तिः। ननु सा शक्तिः कार्यविशेषविषयाश्रया, सर्वत्र वा? उत्तरस्मिन् कथं नातिप्रसङ्गः। [प्र] थमे तु कथं न सत्कार्यवादः, अविद्यमानाश्रयत्व..........त्? अथ तदाश्रयत्वेऽपि प्रतिनियतकार्यनिमित्तत्वं तस्याः? न तथापि कार्यसंबद्धासंबद्धविकल्पानुपपत्तेः। स्वभा..........प्रमाणसिद्धविषयत्वादिति। कारणात् कार्याभेदाच्च सत्कार्यसिद्धिः। तथा हि, पटं(टः) तन्तुभ्यो न भिद्यते तन्तुधर्मत्वात्। यो..........भिद्यते नासौ तस्य धर्मो यथा घटः। न च न तन्तुधर्मः पटः। तस्मान्न तत्..........त इति। एवं भेदे गवाश्वादावुप..........वादर्शनादभेदसि[2b]द्धेः। भेदे चाप्राप्तिर्वा दृष्टा, यथा हिमवद्विन्ध्ययोः। संयोगो वा, यथा [कु]ण्डवदरयोः। तौ चात्र निवर्तमानौ.......... उपादानोपादेययोः। यदि वोपादानातिरिक्तमुपादेयम्, तदा गुरुत्वाद् गुरुत्वान्तरं

गृह्येत। यद् यस्माद् भिन्नपार्थिवं तस्मात् तत्र············क्ष[द्य ?]ते, यथा रुचकात् **स्वस्तिकस्येति**।

**तदेवं सिद्धं** विवादाध्यासितं कारणव्यापारात् प्रागसत्, कार्यत्वात्। यन्नैवं **न तदेवं य[था]**··········त्पादे। **कार्यत्वं च** कृतिव्यक्तिसाधारणम् अक्रियाविषयत्व-**मात्रमपेक्षितम्**। अतो न विरोधः। कारणव्यापारादिति विशेषणान्न·········य कुत्वम्, ग्रेन व्याप्यत्वासिद्धत्वं स्यात्। नापि सन्दिग्धानैकान्तिकत्वम्, विपक्षे बाधकाना-मुक्तत्वात्। अङ्कुरो जायत इति कर्तृत्वानुपपत्तेश्चेति। एतदेवाभिप्रेत्याह—

असदकरणादुपादानग्रहणात् सर्वसंभवाभावात्।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्॥

[ सांख्यकारिका IX ]

इत्यत आह—

## क्रियागु[3a]णव्यपदेशाभावात् प्रागसत् ॥९।१॥

कार्यमिति शेषः। यदि हि कारणव्यापारात् प्रागपि सत् कार्यम्, तदा यथा कारणव्यापारोत्तरकालं तत्र क्रियादिव्यपदेशस्तथा तदापि कुतो न व्यपदेशः, अभि-व्यक्त्यभावादिति चेत्—न, सकलकारणतादवस्थ्ये तदभावस्यैवानुपपत्तेः। उत्तर-कालमपि वा तथा स्यादविशेषात्। कस्यचिदविद्यमान[स्यो]त्तरकालं भावे तु कथं न भवदुदीरितदोषो भवन्तमे[व]········ रलयति। एवमभिव्यक्तिरपि कथमभावः सर्वदा तादवस्थ्यादिति। क्रियागुणयोश्चात्रोपादानमन्यस्य स्वतन्त्रस्य कादाचि····मस्याग्त्या-वयविनि प्रतिक्षेपार्थमिति। एवं च विनाशादिकाले घटादिकमवतिष्ठत एव तद्धर्मत्वात् तेषामित्यप्यपास्त·········भावान्न तत्रार्थक्रियाविशेष इति चेत्—न, भावत्वं नष्टमित्या-दिसामानाधिक[रण्य]बलेन तस्यापि विद्यमानत्वात्। न·········यमानप्रध्वंसप्रति[3b]योगितामाह तस्या एव तत्कर्मतयानिष्टाप्रतिपाद्यत्वादिति। प्रागभूतस्य जननम्, न त्वसन्मात्रस्येति नातिप्र[सङ्गः]·········जन्यते कुतो न पुरुष इति किं न स्यात्। अथ कदाचिदभिव्यक्तिस्तत्रास्त्येव नियतोत्तरकालत्वं तु न क्वापीति चेत्—न, विकारत्व·········दिति। असंबद्धमेव च स्वभावनियमात् किञ्चित् केनचिदभिव्यक्ति-वज्जन्यत इति कानुपपत्तिः ? अन्यथा तु प्रसङ्गानामेवानुपपत्तिः·········दसाधनं तत्र प्रथमानुमाने तन्त्वोः सपक्षस्य संभवादनुपपत्तिः। तन्तुधर्मत्वं तु तन्तुसमवायित्वम्, तन्तुतादात्म्यं वा, तद्ध·········रविषयत्वमात्रं वा ? आद्ये विरोधः। द्वितीये साध्या-विशेषः। तृतीये तन्तुधर्मव्यवहारविषयत्वेन विरोध एव। नहि तन्तावेव तन्तुधर्म-व्यवहारो दृष्टः परिणतिभेदादिति चेत् ? स किं तस्माद् भिन्नोऽभिन्नो वा ? उत्तरस्मिन् कथं तथाव्यवहारः ? प्रथमे तु तेनैव विरोध इति। एवमुपादानोपादे-



[य]भावः[4a] समवायिकार्यकारणभावः, तादात्म्यं वा, तथाव्यवहारविषयत्वं वेति **प्रत्याख्येयम्**। अप्राप्तिसंयोगयोस्तु प्रत्येकसमुदायविकल्पानुपपत्त्या व्यापकत्वं **निवारणीयम्**। **समवायविरहोऽभिमत इति चेत्**—न, समवायप्रमिताप्रमितविकल्पानुप-**पत्त्यास्य निराकरणात्**। **गुरुत्वभेदानुपलम्भे च** कृतः प्रतीकारः। **सर्वं चेदं प्रकृति-**तादात्म्याद् विश्वस्य प्रकृतेश्चाभेदाद् भेदासंभवाद् घटादीनाम्·· हन्त परमता-परिज्ञानाविष्कारमात्रफलमिति यत्किञ्चिदेतदिति। कारणत्वं च यदि कार्यनियत-प्राक्कालसंबन्धित्वम्, तदा कुधः (?)। अथाभिव्यञ्जकत्वम्, तदा सिद्धसाधनम्। अथ तद्व्यवहारविषयत्वमात्रम्, तदा लोकव्यवहारं **पाणिन्यादिस्मृतिं** चाट्ट·········मतिक्रामति। **स्वयंकृतसमयत्वे** त्ववाचकत्वम्। क्रियाशब्देन च किं कृतिरभिमता, अथाभिव्यक्तिः, आहो धात्वर्थमात्रम्, यद्वा·· ···अन्यथा वा ? आद्ये वि[4b]रोधः। द्वितीये तु पुरुषेण विरुद्धता। अथ पुरुषो नाभिव्यक्तिगोचरः ? न, पुरुषपदस्य वाचकत्वे ·······अनुपपत्तेः। तत्प्रतिपादकागमस्य च साधु समर्थितं प्रामाण्यम्। तृतीये केवलस्य धातोरितरसमभिव्याहृतस्य वा ? आद्ये·········वसिद्धिः। द्वितीये तु पुरि शेत इति पुरुषव्युत्पादनात् पुरुषेण व्यभिचारः। अत एव न चतुर्थः। प्रकारान्तरं त्वसंभवि ·······च प्रकृतसाध्यविपर्ययानुमितेः सर्वदा सत्त्वम्। तदास्य प्रमाणत्वानुपपत्तिः। कादाचित्कत्वे तु तत्रैव विरोधः। एवं चाङ्कुरो जायत इत्यङ्कुरकारणेऽङ्कुरत्वोपचाराद् व्यवहार इति। एवं च प्रत्यक्षमेवोत्तरकालसंबन्धि सघटभूतलतुल्यतया तद्व्यवहारा-पत्त्या पुरस्कृतं प्रागभावसाधकमित्युक्तम्। क्षणभेदान्न तथाव्यवहार इति चेत्—न, क्षणभङ्गापाकरणात्। यदि चोत्पादभेदात् तदेकजातीयस्यापि वि[5a]रुद्धव्यवहारो-पार्जकत्वम्, तदा रूपादेव रसादिव्यवहारापत्त्यापत्तौ तद्विजातीयस्य रसादेरसिद्ध्या-पत्तिरिति। अतएवाह,

किं च प्रत्यक्षविज्ञानधारा विच्छिद्यते कथम्।
एकाकिभूतलधिया न चेद् घटविपर्ययः॥

इति। एकाकिभूतलस्वरूपमेवाभावः। न च वाच्यमेकाकित्वं भूतलस्वरूपम् अतिरिक्तं वा तत्त्वम्। आद्ये घटवत्यपि भूतलेऽभावव्यवहारापत्तिः। द्वितीये त्वभावा-भ्युपगम इति; यतो **वैशेषिकैरभावमङ्गीकृत्यापि** तस्यावश्यमङ्गीकर्तव्यत्वात्। तथा ह्यभावः किमभाववति वर्तते प्रतियोगिसं·········ति वा ? आद्ये किं तेनैवाभावेनाभावान्तरेण वा ? आद्ये आत्माश्रयापत्तिः। द्वितीये त्वनवस्थापत्तिः। नापि द्वितीयः,········· व्या]पारविरोधापत्तेः। अथ मतम्, यदि भूतलौदासीन्यं न स्यात् तदा अभावो न संबध्येतेति किमिदमनिष्टप्रसङ्गमात्रमथ वि·········वसनादाश्रय [5b]स्वरूपभेदकसाधकम् ? नाद्यः, केवलस्य तस्य साधनोपालम्भयोरनङ्गत्वात्। द्वितीये तु संबध्यते चाभाव·········स्यैकाकित्वमिति विपर्ययः। तत्र च किमिदमेकाकित्वं नाम ? किं भूतलमात्रम् ? अथ तस्य स्वरूपभेदः ? यद् वा धर्मभेदः ?

आद्ये ......... ले तन्तूत्पत्तिः। द्वितीये तु नास्तिकगन्धितापि न स्यात्। तृतीये तु सामान्यविशेषसमवायात्मकस्तावन्न संभवति। तेषां नित्यत .........तादवस्थ्यात्। द्रव्यगुणकर्मान्यतमत्वे उभयवादिसिद्धान्तभावोऽतिप्रसक्तेरप्रसक्तेर्वा संभवी। अतिरिक्ते तु द्रव्यकर्मलक्षणानुपपत्तेर्गुणत्वे तूत्पन्नमात्रसत्त्वासत्त्वविवेचनासंभवाच्च सप्तमः पदार्थोऽभ्युपेयः। सोऽपि किं भावविरोधाकारोऽविरोधाकारो वा? उत्तरस्मिन् पूर्ववत् तदर्थक्रियापत्तिः। प्रथमे किमनुत्पन्नो न निवर्तते निवर्तते वा? आद्ये घटादिव्यवहारो न स्यादेव। तस्मादनुत्पन्नोऽपि निवर्तते भावनिषेधाकारः [6a]सप्तमः पदार्थ एकाकित्वमिति कथमभावविप्रतिपत्तिः? न चाभावानभ्युपगमे संबध्यते चाभाव इत्यपि संभवति। परसिद्धमाश्रित्येति चेत्? तत् किं साधनदूषणमाश्रित्य, तदनभ्युपगमेन वा? द्वितीये सिद्धान्तविरोधः! कथारम्भासंभवश्च। प्रथमे तु कथं विपर्ययापर्यवसायिनस्तर्कस्य तद्रूपत्वमिति? व्यावृत्त्यर्थश्च किं संबन्धान्तरम्, अथ जन्म? आद्ये धर्मिण एवानभ्युपगमाद् विकल्पासंभवः। द्वितीयेऽपि प्रागसत्त्वोपलक्षितं तत्स्वरूपं वा स्यात्, तदव्यवहितप्राक्कालसंबन्धिता वा, तदन्तरालकालसंबन्धो वा? आद्ये अभाववतीत्युत्तरम्, तेनैवाभावेन तद्वत्त्वात्। द्वितीये भाववति। तृतीयेऽपि किमस्मत्प्रसिद्धिसिद्धमादाय विकल्पोपन्यासः, स्वयं परिकल्पितं वा? उत्तरस्मिन् न विप्रतिपत्तिः। प्रथमे तु विरोधः। एवम्भूतविकल्पेन च घटादीनामपि निराकरणं स्यादिति। तदप्यसमोक्षिता[क्षिप्तम्।] बुद्धिभेदस्यैवैका[6b]किपदेनाभिधानात्। बुद्धेश्च भेदो व्यवहारविशेषोपार्जनोपयुक्तः स्वभावविशेष एव सामग्रीविशेषोत्पन्ने ......... बुद्धिवत्। स्वप्रकाशसिद्धतद्विषयस्वरूपविशेषादेव भूतले हानोपादानादिव्यवहारविशेषाः। तद्बुद्धेश्च विद्यमानतया नास्तीति प्रत्ययः। पूर्वकालतां चानुसन्धाय नासीदिति प्रत्ययः। एवं च यदुक्तम्, बुद्धेर्भेदः स्वरूपभेदो वा स्यात्, विषयभेदो वा? आद्ये सघलबुद्ध्यन्तरस्यापि तथाभूतव्यवहारार्जकत्वापत्तिः। द्वितीयेऽपि सघटभूतलपृथग्भूतविषयत्वं वा स स्यात्, सघटभूतलव्यावृत्तिविषयत्वं वा, तत्त्वान्तरविषयत्वं वा? आद्येऽपि पृथक्त्वं तदाश्रितपृथक्त्वान्यपृथक्त्वं वा स्यात् स्वरूपभेदो वा, धर्मभेदो वा? नाद्यावपसिद्धान्तात्। न तृतीयो निराकृतत्वात्। एवं च द्वितीयोऽप्यपास्तः। तृतीये स्वभावस्वीकार इति तदप्यपास्तम्। एवं च बुद्धिविशेषविशिष्टातिरिक्तमभावबुद्धेरा[7a]लम्बनं न वेति विप्रतिपत्तिः। ततश्चाभावमादाय प्रमिताप्रमितविकल्पानवकाशः। एतदेवाभिप्रेत्याह—

एका संसृष्टविषया तन्मात्रविषया परा।
तत्र तन्मात्रधीर्येयं दृश्ये च प्रतियोगिनि॥
नास्तित्वं सैव भूभागे घटादेः प्रतियोगिनि।

[ प्रकरणपञ्चिका ६। ३७-६ ]



यदि चैवं साभ्युपेयते, तदा घटाभावे घटाद्यभावव्यहारः कथम्? अभावान्तराच्चेदनवस्था। घटाभाव एव तथाभूतं व्यवहारमर्जयति। न चैवं भूतलादावपि तथास्त्विति वाच्यम्, अतिप्रसङ्गादित्यपि न। तथा सति घटार्थक्रियाप्रतिबन्धवत्पटाद्यर्थक्रियाप्रतिबन्धापत्तेः। तद्विरहव्यवहारविषयत्वेऽपि तस्य प्रतिनियतार्थक्रियाप्रतिबन्धत्वमिति चेत्—न, तथा सति तद्विरहव्यवहारविषयत्वस्यैवानुपपत्तेरिति। तदेवाभिप्रेत्य महाव्रतेनापि पूर्वपक्ष उक्तम्,

इदमेवेत्यतः पूर्वमिदं तावदिति ध्रुवम्।
बुद्धिर्भवति सान्यस्य न विधिर्न च वारणम्॥
तामभावधियो हेतुं धियमा[7b]ह प्रभाकरः॥ इति॥

अत्रोच्यते, बाह्यत्वव्यवह्रियमाणविशेषणविशिष्टव्यवहारस्तथाभूतविषयबुद्धिनिबन्धनः। स यदि तथाभावमन्तरेणापि स्यात्, तदा नीलादिकमपि न सिध्येत। तत्र नोलाद्यन्तरेण बुद्धिभेद एव न संभवति, तस्य तज्जन्यत्वादिति चेत्? घटाभावे च पटाद्यभावोऽत्यन्ता[भाव] एव घटाभावे घटस्याप्यभावस्तथा त्रैकालिकसंसर्गाभावत्वात्। घटात्यन्ताभावे तु घटाभावव्यवहारस्तत एव, तत्र बाधकाभावात्, अभ्युपगमेऽनवस्थाप्रसङ्गाच्च। यदि च बुद्धिभेद एवाभावस्तदा वर्षाबहुलनिशोथे निरालोकगेहोदरे घटाद्यभावो न स्यात्। न च तत्र वुद्धिभेदसंभवः, तस्यालोकादिभेदोत्पाद्यत्वात्। अन्यथा तत्सन्देहानुदयापत्तेः। न च नास्त्येव तत्राभाव इति वाच्यम्। तथा सति घटाद्यापत्तौ तत्र मूर्तान्तरसत्त्वासंभवापत्तेः। मोक्षे वा शेषदुःखाभावो न स्यादिति। ननु च[8a]मुद्गरप्रहारानन्तरोपजातकपालादिकमेव प्रध्वंसव्यवहारनिदानमस्तु। एवमपवर्गेऽपि। ज्ञानविशेषोत्तरकालसंबन्ध एवात्मनिष्ठे तथा व्यवहारः। एवं प्रागभावेऽपि सामग्रीमादाय तत्तदुपाधावेव व्यवहारस्तथा। तथा चात्यन्ताभावान्योन्याभावयोरप्युपाधिभेदा द्रष्टव्याः। न च परस्परव्यभिचारितया तेषां कथं तथाभूतव्यवहारप्रवर्तकत्वं तस्मादेकस्तत्राभावोऽभ्युपेय इति वाच्यम्, शक्तिभेदादुपपत्तेः। न चैवं सत्यभावाभ्युपगम इति। तस्याकारणानुग्राहकतया कार्यान्यथानुपपत्त्या अवश्याभ्युपेतव्यत्वात्। यथा वा प्रध्वंसादावभावव्यवहारस्तथा स्यादिति। तदपि न, पूर्वोत्तरानन्तरत्वादेः प्रागभावाद्यसंभवे विवेचयितुमशक्यत्वात्। किं च स्वरूपतस्तेऽभावाः, मुद्गरप्रहारानन्तरत्वविशेषिता वा? आद्येऽतिप्रसङ्गः। द्वितीये तदप्रतिसन्धाने तत्प्रत्ययानुत्पत्त्यापत्तिः। [8b]अन्यथा सामग्रीभेदवादमादाय नीलादिव्युदासोऽपि स्यादित्यलं पल्लवसमुल्लासनेन।

तदेवं सिद्धः प्रागभावः विनाश्यभावत्वं च तस्य लक्षणम्। ननु किमिदमभावत्वं सामान्यविशेषो वा, उपाधिविशेषो वा? नाद्यः, तथा सति सत्तासंबन्धस्य तत्र प्रसक्ताव-

भावत्वव्याघातात् । नापि द्वितीयः । तद्धि भावस्वभावप्रत्यासन्नत्वं वा, भावानात्मकत्वं वा, भावेतरत्वं वा, भावविरोधित्वं वा, परनिरूपणाधीननिरूपणत्वं वा, प्रतियोगिनिरूपणाधीननिरूपणीयत्वं वा, सत्ताविरहो वा, सत्तासंबन्धबोधसामग्रीविधुरस्य सत्ताविरहो वा, प्रतीतिविशेषो वा, अन्यथा वेति । नाद्यः, समवायेनातिव्याप्तेः । न द्वितीयः, नञर्थानिरुक्तेः । नापि तृतीयः । तद्धि तदन्योन्याभावो वा, धर्मभेदो वा, स्वरूपभेदो वा ? नाद्यः, सामान्यानिरुक्तौ तस्य विशिष्टस्य निरूपयितुमशक्यत्वात्, अन्योन्याभावाव्याप्तेश्च । न द्वितीयः, तस्य भाव[9a]रूपत्वेऽभावधर्मत्वाभ्युपगमेऽपसिद्धान्तात् । अभावरूपत्वे तत्प्रतियोगिनिर्वचनापत्तेः, तस्यैव चाभावत्वाभावप्रसङ्गात् तत्राप्यभावान्तराङ्गीकारे तु कुतो नानवस्था ? न चैवमपि लक्षणत्वमव्याप्तेरिति । न तृतीयः, स्वस्य रूपमित्यभ्युपगमे धर्मभेदवादापत्तेः स्वं च तद्रूपं चेत्यभिधाने त्वननुगतत्वादिति । नापि चतुर्थः, विरोधे हि सहानवस्थानं वध्यघातकभावो वा ? नाद्यः, नञर्थानिरुक्तेः । न द्वितीयः, अभावस्यैव वधतया असंभवात् । व्यतिरिक्तवधाभ्युपगमेऽप्यभावनिरूपणमन्तरेण तदनिरूपणात् । किं चेदं भावत्वम् ? न तावत् सामान्यं सामान्याद्यव्याप्तेः । नाप्युपाधिविशेषः, तस्य प्रकृतक्रमेणाविवेचनात् । अभावान्यत्वं तदिति चेत्—न, परस्पराश्रयत्वापत्तेः । नापि पञ्चमः, संयोगाद्यतिव्याप्तेः । नापि षष्ठः, अभावानिरुक्तौ प्रतियोग्यत्वानिरुक्तेः । नापि सप्तमः, सत्ताद्यतिव्याप्तेः । नाप्यष्टमः [9b]अज्ञायमानविशेषणातिव्याप्तेः । पुरुषान्तरापेक्षया ज्ञानमस्तीति चेत्—न, तथा सति विशेष्यवैयर्थ्यात् । न चाभावानिरुक्तौ विरहपदार्थोऽपि संभवति, स्वात्मन्यपि प्रमेयत्ववद् व्यवहारहेतुरिति चेत् ? को दोषो यदि निरुक्तः स्यात् । नापि नवमः, प्रतीतेर्हि विशेषः सामान्यभेदो वा स्यात्, सामग्रीविशेषजन्यत्वं वा, विषयभेदो वा ? नाद्यः, अपरोक्षत्वादिना परापरभावानुपपत्तेः । न द्वितीयः, तथा सति तदप्रतीतावभावव्यवहारो न स्यात् । तत्प्रतीतिश्च न प्रत्यक्षतः, तस्यास्मदादीन्द्रियाविषयत्वात् । नाप्यनुमानतः, तथाभूतलिङ्गानुपलब्धेः । व्यवहारविशेषादेव तदुन्नयनमिति चेत्—न, परस्पराश्रयापत्तेः । नापि तृतीयः, तन्निरूपणस्यैवोपक्रान्तत्वात् । अन्यथा तु यदि द्रव्यादिलक्षणशून्यत्वम्, तदा प्रत्येकसमुदायविकल्पानुपपत्त्या प्रतिक्षिप्तम् । अथ योग्यानुपलम्भगम्यत्वं, तदा नञर्थानिरुक्तिरेव[10a]प्रकारान्तरं त्वसंभावितमेवेति ।

अत्रोच्यते । किमेवं वदतोऽभिप्रेतम् ? यद्यभावो नास्तीति, तदा······धः । अथाभावव्यवहारो नास्तीति मतम् ? तथापि सुव्यक्त एव विरोधः । अथाभावव्यवहारो भावाधीन इति, तदा न विप्रतिपत्तिः । अथ भावमात्राधीन इति, तदा मात्रपदव्यवच्छेद्यनिरुक्तौ तदवस्थो विरोधः । अथ विवादाध्यासितो नाभावविष[य] इति, तदा अभावविषयत्वप्रमिताप्रमितत्वाभ्यामनुपपत्तिः । अथाभावस्य किं लक्षणमिति ? सिद्धस्तर्ह्यभावः । एवमेवेति चेत् ? तथापि लक्षणं यदि स्वरूपसाधकं प्रमाणं तदा धर्मिप्रमितत्वाप्रमितत्वाभ्यामसंगतार्थत्वम् । अथेतरव्यवच्छेदसाधकं प्रमाणम्, तदा प्रतीतिरूपविशेषोऽन्यथाभावव्यवहारानुदयप्रसङ्ग इत्यनिष्टप्रसङ्गसहकारिणा मानसप्रत्यक्षेण सिद्धो व्यवहारविशेषोत्पादकः सामग्रीविशेषजन्य इति निश्चिनुयाः । अन्यथा तु[10b]रूपादिप्रतीतेरप्यवैलक्षण्यापत्तौ तदसिद्ध्यापत्तिरिति । यद् वा सत्तासंसृष्टबुद्धिरहितत्वमेवाभावत्वमिति । विद्यमानप्रतिनियतकालिकसकलार्थक्रियाप्रतिबन्धत्वं च विनाशत्वमिति न चक्रकम् । विवेचितं च कार्यत्वमिति । स चायं प्रागभावोऽनादिः । ननु कथमेतत् ? यावता प्रागभावो जायते विनाशित्वात्, घटवत् । अन्यथा तु न विनश्येदाकाशवत् । न च प्रसज्यपक्षमाश्रित्यालीकधर्मितायां विरोधः । पर्युदासपक्षमाश्रित्य भावभेदधर्मितायां च सिद्धसाधनम् । एवं च तथाभूतव्यवहारविषयमात्रस्य धर्मित्वमपास्तमिति वाच्यम् । प्रसज्यपक्षाश्रयणेनैवाभिमतवस्तुत्वस्य तस्य धर्मित्वात् । न चात्र भावविशेषितं विनाशित्वमुपाधिरिति वाच्यम्, प्रध्वंसाभावाव्यापकत्वात् । सत्तायाः साध्यांशनिवेशान्नैष दोष इति चेत् ? तदेतदलौकिकं यद्दूषणसंबन्धयोग्यमेव परेण साधनीयमिति । न च साधनाभेदिन उपाधित्वं[11a] तल्लक्षणासंबन्धात् । नापि पक्षेतरस्य, सकलानुमानोच्छेदापत्तेः ।

स्यान्मतम् । यदि प्रागभावस्य पूर्वमभावः, तदा····जले घटोन्मज्जनापत्तिः । न चास्येष्टप्रसङ्गत्वम्, विच्छेदप्रत्ययस्य यथार्थत्वायथार्थत्वविवेचनेऽसंभवस्य सत्कार्यवादस्य चापत्तेः । तस्यापि तद्विरोधितया नोन्मज्जनमिति चेत्—न, स हि न तस्यान्योन्याभावः, संसर्गाभावत्वात् । नाप्यत्यन्ताभावः प्रतिनियतकालिकत्वात् । नापि प्रध्वंसः, प्रतियोग्यनुत्तरकालिकत्वात् । नापि प्रागभावः भेदव्यवहितपूर्वकालत्वाभावात् । तथा चाभावान्तरत्वापत्तिः । यदि च तन्निषेधेऽपि न भावसंभवस्तदान्योन्याभावात्मकत्वभङ्गप्रसङ्गः । उभयात्मकता वा न चैकस्योभयप्रागभावत्वं पटादेरुपलब्धमिति तद्विरोधोऽपीति । तदेतद्घटप्रागभावकाले प्रध्वंसोन्मज्जनसमानतया न बाधकम् । विशेषणवैयर्थ्यविशेषविषयत्वप्रतियोगिमद्भावापन्नोभयानि[11b]षेधत्वं च तुल्यम् । तस्मात् परस्परविधौ परस्परनिषेधादुभयात्मकत्वमवगन्तव्यमिति ।

न चैवमनवस्थाप्रसङ्गः, प्रमाणसिद्धेऽस्य बीजाङ्कुरवददोषत्वात् । न च प्रध्वंसप्रागभावस्य घटव्यतिरिक्तस्याभ्युपगमान्न प्रतिबन्दिरिति वाच्यम्, अपसिद्धान्तात् प्रागेव निराकरणाच्चेति । किं चेदमुन्मज्जनम् ? न तावत्तज्जन्म, कारणाभावात् । अतएव न कालविशेषसंबन्धः । नापि तदभिव्यक्तिः, इन्द्रियसन्निकर्षाद्यसंभवात्, घटप्रागभाववदुभयविरोधित्वाच्च तत्प्रागभावस्य । नापि तद्व्यवहारः, अभिव्यक्त्याभावादेव तदनुपपत्तेरिति ।

अत्रोच्यते, कुतः प्रागभावजन्म, किं प्रतियोगिसामग्रीतः, तत्सामग्रीतो वा, तत्पूर्वचतुर्थाद्येककालाद् वा, अनिर्दिष्टविशेषकालविशेषाद् वा, अन्यथा वेति ? नाद्यः, तत्प्रागभावत्वव्याघातात् । नापि द्वितीयः, क्षणिकत्वापत्तेः । न तृतीयः, प्रत्यभिज्ञया एकत्वप्रसाधनात् । भ्रान्तेयमिति चेत्—[12a]न, बाधकाभावात् । अनुमानस्याः प्रतिनियतकालविषयतया अन्योन्याश्रयत्वाद् बाधकत्वानुपपत्तेः । सोसादृश्यनिबन्धने"" ज्वालादिप्रत्यभिज्ञानवदिति चेत्—न, विरुद्धधर्माध्यासानवकाशात् । अन्यथा घटादावप्येकत्वं पूर्वापरकालयोर्न सिध्येत् । एवं च चतुर्थोऽप्यपास्तः, विरुद्धधर्मशून्यैकव्यवहारस्याप्यतथाभावे सामान्याद्यसिद्ध्यापत्तेः । प्रकारान्तरं त्वसंभावितमेव । एवं च भेदासिद्धेरुभयप्रतिक्षेपस्वभावत्वमप्यपास्तम्, प्रमाणसिद्धे तदालम्बनात् । तथा च कथं तदुन्मज्जनम् ? उन्मज्जनं च तत्प्रतिपत्तिरेव । सन्निकर्षाद्यभावोऽपि चापाद्य स इत्यलमतिविस्तरेणेति ॥

ननु प्रागसत्त्वं सतश्च पश्चादसत्त्वं न भविष्यति । ततश्चानिष्टपरिहाररूपस्य मोक्षस्यासंभवात् न्यायनर्थक्यमित्यत आह,

## सदसत् ॥ ९।१२ ॥

यथा पूर्वमसत्त्वं तथोत्तरकालमपि । यथा च तस्यानादित्वं, तथास्यानन्तत्वमपीत्यर्थः । लक्षणं तु कार्याभा-[12b]वत्वम् । एवं च नासत इत्याद्यागमस्यात्मविषयतया प्रामाण्यम्, तत्प्रतिपादनस्यैव प्रक्रान्तत्वात् । अन्यथा त्वस्यैव बाह्यस्य वैयर्थ्यमित्यर्थः ॥

नन्वेवं मध्येऽपि कार्यमसत्, आद्यन्तयोरसत्त्वात्, गगनकुसुमवत् । यद् वा अभावो घटादीनामुत्पत्तिस्थितिकालेऽपि नातिवर्तते, आद्यन्तयोरनुपात्तत्वात्, मृत्त्ववत् अथवा कुम्भाद्याकाराः परमार्थसन्तो न भवन्ति, कदाचिदुपलभ्यमानत्वात्, रज्जुसर्पवदित्यत आह,

## असतः क्रियागुणव्यपदेशाभावादर्थान्तरम् ॥ ९।१३ ॥

कार्यमिति शेषः । प्रकृते तु तद्विपर्ययादिति तात्पर्यम् । प्रथमद्वितीययोर्हेतुविशेषणप्रतिज्ञार्थयोर्विरोधः । तृतीये तु परमार्थसत्त्वं यदि क्वचिन्न प्रमितम्, तदा कथं तन्निषेधः । प्रमितत्त्वे तु तत्तुल्यन्यायतया प्रकृतेऽपि सिद्धेर्बाधः । किं चोपलब्धेरेवासत्त्वापत्तौ कथं ततः साध्यसिद्धिः ? परमार्थसत्त्वविवेचने च विरोध इति ॥

ननु तथापि[13a]विवादाध्यासितमसत् असत्प्रत्ययविषयत्वात् प्रध्वंसवत् न चेदमसिद्धमगौरश्व इत्यादि प्रतिभासनादित्यत आह,



## सच्चासत् ॥ ९।१४ ॥

सदेव सदन्तरात्मना अन्योन्याभाववशात् तथा व्यवह्रियते । न तु तस्यासत्त्वम् । अन्यथा त्वसत्त्वमलीकत्वं भावविरोधिता वा ? आद्ये दृष्टान्ते साध्यवैकल्यम् । धर्मिप्रमितत्वाप्रमितत्वाभ्यानुपपत्तिः साधनत्वादिविरोधश्च । द्वितीये तु भावोऽभ्युपगन्तव्यः । तथा च तत्रैव व्यभिचारः । न च भावानभ्युपगमे क्रियागुणव्यपदेशकादाचित्कत्वं घटते । तथा च कथं प्रध्वंसः ? नाप्यनुमितिस्तत्साधनत्वं वा संभवतीति । नन्वत्यन्ताभाव एवान्योन्याभावः त्रैकालिकत्वाविशेषात् । निषेध्यसमानदेशत्वं विशेष इति चेत्—न, संयोगाद्यभावेऽपि सत्त्वात् । अवच्छेदभेदात् तत्र वैयधिकरण्यमिति चेत्—न, अवच्छेकस्य संबद्धासंबद्धादिविकल्पना संभवात् । तादात्म्याभावत्वं विशेष इति चेत् [13b]न, घटे घटतादात्म्यं नास्तीत्यनेनातिव्याप्तेः । अत्रापि संबन्ध निषेध एव । अन्यथास्तीत्यस्य विफल तेति चेत्—न, एवं सति घटः पटो न भवतीत्यत्रापि भवति, वैयर्थ्यापत्तेः । तद्व्यतिरेकेणापि तत्प्रत्ययो दृष्ट इति चेत् ? तुल्यम् । क्रियाध्याहार[:] तत्रेति चेत् ? एतदपि तादृगेव । सत्यपि संबन्धे तथा प्रयोगः दर्शनं तु समानमेवेति । न चात्र प्रमाणमप्यस्तीति भिन्नबुद्धिर्मानमिति चेत्—न, तस्याः स्वरूपभेदादेवोपपत्तेः । अन्यथाभावादन्योन्याभावो भिन्न इत्यत्राप्यन्योन्याभावान्तरापत्तेः । तथा च कथं नानवस्था ? भावानां परस्परभेदात् कथं स्वरूपनिबन्धिनो भिन्नप्रत्यतः साधारण इति चेत्—न, अन्योन्याभावा[द्] घटादयो भिन्ना इत्यत्रापि तुल्यत्वात् । अ[ा]रोप्यते तत्रान्योन्याभाव इति चेत्—न, तथा सति भावेतरेतराभावयोस्तादात्म्यापत्तेः । अन्यथा भावाभावयोः परस्परपरिहारात्मत्वानुपपत्तेरिति । [14a] अत्रोच्यते । तादात्म्यप्रतियोगिकोऽभाव एवान्योन्याभावः । घटे पटतादात्म्यं नास्तीत्यत्र च संसर्गनिषेध एव सप्तम्यर्थानुपपत्तेः । अधिकरणत्वमेव स इति चेत् न, तस्याप्यभावे निर्वक्तुमशक्यत्वात् । कथं तर्हीह भूतले घटाभाव इति चेत् ? तत्संबन्धत्वप्रतियोगिकत्वमिति गृहाण । घटः पटो न भवतीति प्रतीतिबलाच्च तत्सिद्धिः । न चैवं सत्यन्योन्याभावो भावो न भवतीति प्रतीतिरिति वाच्यम् । तस्य तद्विरहरूपतया तत एव तदुपपत्तेः घटादिस्वरूपस्य च घटादिप्रतियोगित्वासंभवात् । अत एव नान्योभावान्तरपरिकल्पनम् । बीजाङ्कुरवद्व्यवस्थितव्यवस्थापकत्वासंभवात् । भिन्नप्रत्ययश्चान्योन्याभावे यदि स्वरूपवैधर्म्यविशिष्टप्रत्ययस्तदा तथा एव । तथान्योन्याभावविशिष्टप्रत्ययस्तदा तस्यानभ्युपगम एव भवति चेत् तदा भ्रम एव । न चैवमभेदापत्तिः । स्वरूपवैधर्म्यरूपभेदसंभवादिति । स चायं समवायवदभिन्नः [14b] एकस्मादेवावच्छेदकभेदात् प्रत्ययभेदोपपत्तेरिति ॥

ननु तथापि शशश्टृङ्गं नास्तीति निषिध्यते। तत्र किं शशश्टृङ्गमलीकं निषिध्यते, अथ शशश्टृङ्गम्? आद्ये अपसिद्धान्तः। द्वितीयेऽपि किं श्टृङ्गमात्रस्य प्रतियोगित्वम्, अथ शशकसंबन्धविशेषणवतः? उत्तरस्मिन्नप्रतीतत्वे कथं तत्प्रतियोगिको निषेधः? प्रमितत्वे तु कथमत्यन्ताभावः। प्रथमे तु कथं तस्यान्यत्रापि संभव इत्यत आह,

**यच्चान्यदसतस्तदसत् ॥ ९।५ ॥**

तस्मादुक्तरूपादभावत्रयाद् यच्चा[न्य]त्तदभावरूपं तदसदत्यन्ताभाव इत्यर्थः एतेन श्टृङ्गमात्रस्यैव प्रतियोगित्वम्। न चैवं तस्य सर्वथैवासत्त्वोपपत्तिः आधारविशेषेऽस्य तत्प्रतिपक्षत्वात्। यदि तु नैवं, तदा भावमात्रांच्छेद उक्तव्याघातापत्तिः। एवं च त्रैकालिकः संसर्गाभावोऽत्यन्ताभाव इत्युक्तम्। चकारस्तत्र विप्रतिपत्त्यभावप्रदर्शनार्थः। तथाहि न तावदत्यन्ताभावे किं प्रमाणमिति विप्रतिपत्तिः। तस्य प्रमिताप्रमित[15a]त्वाभ्यामनुपपत्तेः। अथ शशश्टृङ्गं नास्तीति प्रत्ययोऽभावनिबन्धन इत्यत्र किं प्रमाणमिति न, अस्याप्यभावप्रमिताप्रमितत्वाभ्यामनुपपत्तिः। अथायमभावस्त्रैकालिक इत्यत्र किं प्रमाणमिति तथापि त्रैकालिकत्वप्रमित्यप्रमितिभ्यामसंशयः। न चात्यन्ताभावे विप्रतिपत्तिः संभवति। तथा सत्ययथार्थत्वसाधनत्वाद्यनिर्वाहादिति। अयमपीतरेतराभाववदेक इति ॥

ननु चायमभावः प्रत्यक्षगम्यः प्रमाणान्तरगम्यो वा? नापरः, अपसिद्धान्तात्। नाद्यः, इन्द्रियेण स हि सम्बद्धो वा स्यादसंबद्धो वा? प्रथमेऽपि संयोगो वा तत्र स्यात्, समवायो वा, विशेषणविशेषभावो [वा]? नाद्यः, तस्य द्रव्यमात्रवृत्तित्वात्। न द्वितीयः, तस्याभावासंस्पर्शात्। तृतीयेऽपि विशेषणविशेष्ययोर्भावो धर्मभेदो वा स्यात् त एव वा? नाद्यः, तस्य हि भावत्वे द्रव्यगुणकर्मान्यत्वे द्रव्यमात्रवृत्तित्वापत्तेः। सामान्यरूपत्वे वा भावानामपि सत्तासंबन्धप्रसङ्गात्। तस्य भावाधिकरणतया तत्सामान्यैः परापरभावानुपपत्तिः, सामान्यानां निःसामान्यत्वव्याघातश्च। नापि विशेषत्वम्, तस्य नि[15b]त्यद्रव्यमात्रवृत्तित्वात्। नापि समवायत्वम्। तथा सति भूतलादिनिवृत्तौ प्रध्वंसविनिवृत्त्यापत्तेः। अन्योन्याभावात्यन्ताभावयोः सामान्यरूपत्वापत्तेश्च। नापि भावान्तरमपसिद्धान्तापत्तेः। रूपादावपि तस्य प्रतीयमानतया समवायोच्छेदापत्तेश्च। नाप्यभावत्वम्, प्रतियोग्यनिरुक्तेः। न चातिरिक्तस्य संभावनापि विरोधात्। नापि द्वितीयः, इन्द्रियाणां प्राप्यकारित्वनियमात्। अन्यथा समवायस्याप्यपलापापत्तेः। एतदेवाभिप्रेत्योक्तम्

**न तावदिन्द्रियणैषा नास्तीत्युत्पाद्यते मतिः।**
**भावांशेनैव सम्बन्धो योग्यत्वादिन्द्रियस्य हि ॥**

[ श्लो० वा० अभाव १८ ]



इति। न वा चा? निर्विकल्पकविषये साक्षात्कारी विकल्पः संभवति। न चाभावे निर्विकल्पकसंभवः। तस्य प्रतियोग्यनवच्छिन्नस्याप्रतिभासनात्। प्रवृत्तौ तु तत्तद्विशेषाप्रतिसन्धानादेव न संशयः। स्मरणे वा कुतो न तदवच्छिन्नाभावप्रत्यय इति। न चास्य प्रत्यक्षत्वे प्रमाणमप्यस्ति, अभावप्रतीतिरिन्द्रियजन्या[16a]अपरोक्षत्वात्। रूपप्रतिपत्तिवदित्यस्तीति चेत्—न, अत्र ह्यपरोक्षत्वमिन्द्रियकरणकत्वं यद्यभिमतम्, तदेन्द्रियजन्यत्वमात्रे साध्ये सिद्धसाधनस्वरूपासिद्धत्वे। अथेन्द्रियकरणजन्यत्वं साध्यम्, तदा साध्याविशेषः। अथानुपहितप्रकाशत्वम्, तथाप्यनुपाहितस्य प्रकाश इत्यभिमतम्। तदा घटस्याप्यभाव इति प्रथनादसिद्धिः। अथानुपहितश्चासौ प्रकाशश्चेति, तथापि सर्वथा तदभिमतत्वे विषयादेः संभवेनासिद्धत्वम्। करणभेदानुल्लेखितया तु स्मृत्या व्यभिचारः। अत्रापीन्द्रियकरणकत्वपरोक्षत्वापत्तिः। अनुभूतित्वेन विशेषणीय[ ि]मति चेत्—न, अनुमानेन व्यभिचारात्। न हि तत्रापि कारणभेदोल्लेखे प्रमाणं पश्यामः। क्वचिल्लिङ्गात् प्रत्येमीति तु चक्षुषा प्रत्येमीति साधारणम्। अवान्तरजातिभेदे तु प्राङ्नास्तितांज्ञाने बाधोऽसिद्धिः, ईश्वरज्ञानेन च विरोधः। अथ विवादाध्यासितमिन्द्रियकरणकम्, कार्यत्वे सति साक्षात्कारित्वादिति मतम्, तथा[16b]प्यसिद्धत्वम्। अथ यदीयं ज्ञानं साक्षात्कारि न स्यात् तथा सति परवाह्यावशतानुपलब्धिजन्यज्ञानाविशेषाज्ज्ञाताज्ञातकरणजत्वरूपं वैलक्षण्यमस्य न स्यादिति तर्कसहकारिणा प्रत्यक्षेणैव साक्षात्कारित्वं सिद्धमिति। तदपि न, तथाह्येतज्ज्ञाताज्ञातकरणजत्वाभ्यां परोक्षत्वापरोक्षत्वयोः साक्षाद्व्याप्त्या वा स्यात्, वैलक्षण्यमन्तरेण तदनुपपत्त्या वा, परोक्षजातीयस्य करणज्ञानजन्यतया वा? नाद्योऽसिद्धेः। न द्वितीयः, अनुमानाननुमानतयैव तदुपपत्तेः। नानुमितिप्रयोजकत्वं तस्य तद्व्यतिरेकेणापि तदुपपत्तेरिति चेत् - न, प्रयोजकत्वं हि तत्कारणत्वम्, समव्याप्तिकत्वे सति तत्त्वं वा? नाद्यः, कार्यमन्तरेणापि तत्सम्भवस्याव्याहतेः। न द्वितीयः, तदसम्भवस्यादूषणत्वात्। न तृतीयः, इन्द्रियव्यतिरिक्तज्ञानकरणादेव तदुपपत्तौ तदसिद्धेः। नन्वेवं स्मृतेः परोक्षत्वं न स्यात्। न च तत्र संस्कारकरण[17a]तया तत्त्वमिति वाच्यम्, तत्र व्यापारासंभवात्। न हि तदाश्रितः कार्यभेदो वा, सदृशदर्शनादिरेव वा? नाद्यः, अपसिद्धान्तात्। द्वितीयः, तस्य संस्काराजन्यतया तद्व्यापारत्वायोगादिति। तदप्यसत्, संस्कारातिरिक्तप्रत्यासत्तिमताऽसाधारणज्ञानकारणनिरपेक्षस्य मनस इन्द्रियत्वादिति। न चानुपलब्धेर्ज्ञाताया ज्ञानकारणत्वमपि। तस्याभावप्रमाणत्वेन ज्ञानापेक्षा, अनुमानत्वेन वा? नाद्योऽपसिद्धान्तादनवस्थाप्रसङ्गाच्च। नापि द्वितीयः, तदसंभवात्। त……हं तदा चैत्राभाववत्। तदातनतया स्मरणार्हा स्मरणे सति स्मर्यमाणत्वात्। यथायं देशः। दृष्टान्ते चाप्तवाक्यात्

साध्यसिद्धिरिति नानवस्थापीति चेत्—न, विशिष्टहेतुतया अस्मरणस्यात्मधर्मतया चापक्षधर्मत्वात्। पित्रोर्ब्राह्मण्यात् पुत्रब्राह्मण्यसाधनवत्स्यादिति चेत्—न, तत्रापि तथाभूतजन्यत्वस्य साधनत्वात्। असि[17b]द्धसाधनत्वे कुतो नातिप्रसङ्गः। किञ्चेदं स्मरणार्हत्वम्-स्मरणानुगुणसामग्री, तदेकदेशो वा? नाद्यः, तथा सत्यस्मरणविरोधात्। द्वितीयेऽप्यनुद्दिष्टविशेष उद्दिष्टविशेषो वा? नाद्यः तस्य चैत्रवत्यपि गतत्वात्। द्वितीयेऽप्यनुभवो वा संस्कारो वा? यावति कारणे सति विषयसत्तामात्रेण सामग्री पूर्यते, तावत्कारणसंभवो वा, सुस्मूर्षा वा, अन्यत्वेति। नाद्यौ, तथा सत्यभावसाधनविरोधात्। न तृतीयः, तस्य दृश्यादृश्यकारकचक्ररूपतया तत्रावधारयितुमशक्यत्वात्। शक्यत्वेऽपि तत्तत्प्रतिनियतसाधकानुसन्धानविलम्बेन झटिति तत्प्रत्ययानुदयापत्तेः। तदुक्तम्—

स्वरूपमात्रदृष्टं हि वेश्मास्माद्यर्थं स्मरन्नपि।
तत्रान्यनास्तितां पृष्टस्तदैव प्रतिपद्यते॥

[द्र० श्लो० वा० अभाव १८]

इति। न चतुर्थः, पूर्वानुभूतश्लोकोत्तरार्धस्मरणे सत्यस्मर्यमाणपूर्वार्धेन व्यभिचारात्। किं च, अभावः साध्यते किमिदानीम्, पूर्वानुभवावस्थायां वा? आद्ये, संप्रत्यागतचैत्रेण भूतले न व्यभिचारः[18a]उत्तरस्मिन्ननुभवकालमिलितचैत्रेण। एवं च ज्ञानार्हाज्ञाने सति ज्ञायमानत्वमप्यपास्तम्। एवं च प्रतियोगिस्मरणासंभवाद् यत्र प्रागनुपजाताभावप्रत्ययोऽसन्निकृष्टदेशः तदुपलम्भेसत्यभावं प्रत्येति, तत्राप्यनुमानमपास्तम्। न च तत्राप्यभावः पूर्वमेव निर्विकल्पेन विषयीकृतः पश्चाद् विशिष्टः स्मर्यत इति वाच्यम्, अभावस्य निर्विकल्पविषयत्वनिराकरणात्। स्मरणस्य चातिरिक्तार्थग्राहितया तत्त्वानुपपत्तेः। एतस्माद्दीर्घमित्यादिप्रत्यये तु वक्ष्यते। एवं च प्राङ्नास्तिताज्ञानेऽप्यनुमानादिकमपास्तम्। अस्माकं त्वनुपलब्धिरेव तत्र प्रमाणम्। सा चापरिज्ञातैव कारणमिति नानवस्थापि। न चैवं सुषुप्त्यवस्थायामप्यभावप्रतीत्यापत्तिः। प्रतियोगियोग्यतायाः सहकारिण्यास्तदाऽसंभवात्। एवं चानुपलब्धिप्रतिपादकशब्दस्यापि योग्यतावगमतात्पर्यमवसेयम्। ननु योग्यता प्रतियोगितदायत्तेतरतदुपलम्भकारकसाकल्यम्, तदाहिता शक्तिर्वा? आद्ये इन्द्रियस्याभा[18b]वप्रतीतिकारणापत्तौ कथमसन्निकृष्टस्य तत्त्वम्? तथाभावे वा कथमभावप्रत्यक्षताप्रतिक्षेप इति? द्वितीये तु कथमभावाधारत्वं भावस्येति? तदपि न, तदाहितशक्तेरेव योग्यतास्वरूपत्वात्। भावत्वं तु नानुमानं दृष्टान्तासिद्धिसिद्धान्ताविरोधाश्रयासिद्धिप्रसङ्गात्। तर्कत्वे तु विपर्ययपर्यवसानात्। न च **गुरुमत**मास्थायैतदिति वाच्यम्। तत्रापि स्वाभिमताभावपक्षीकरणे बाधात्। परमतसिद्धाभावपक्षीकरणे त्वाश्रयासिद्धिरिति। ननु तथापि किं प्रतियोगितदायत्तेतरतदुपलम्भकारकविनिवृत्तौ सा विनि-



वर्तते न वा? उत्तरस्मिन् कथं न सन्तमसादावप्यभावप्रतीतिः? प्रथमे तु कथं प्रकृतेऽप्यभावप्रतीतेः। प्राङ्नास्तितायां चानुपलब्धिरपि नास्ति उपलम्भेन तन्निवर्तनात्। न चोपालम्भान्तरमाश्रित्यायं न दोष इति वाच्यम्। तथा सत्युपलम्भेऽप्यभावप्रतीत्यापत्तेः। तत्कालानुपलम्भस्येदानीन्तनानुपलम्भेनानिवर्तनाददोष इति चेत् न, तत्कालस्यापीदानीं विलयात्। नित्यत्वान्न कालविलय इति चेत्—न तर्हि कालभेदः, उपलक्षणभेदादिति चेत्? नन्वेवं तन्नाशान्नाशोऽपि कथं न स्यात्? यदि नैवं तदा तदनुपलम्भस्तस्य त्रैकालिक[19a]स्यां तर्कफलत्वं न तु तर्कत्वमिति। नाप्यनुमानव्यापारत्वम्, परामर्शस्यैव तत्त्वात्। स्यान्मतम्, न तस्य व्यापारत्वमनागतलिङ्गानिष्पाद्यत्वात्। श्रोत्रेऽप्यवच्छिन्नसमवायमादाय जन्यत्वमुपपादनीयम्। तद्विषयसमानकालत्वव्याप्तेश्च साध्यस्य लिङ्गकालानुविधानम्। कृत्तिकोदयविशेषावगमादनागतरोहिणीविशेषप्रत्यासत्तिश्च लिङ्गादेव। **ज्योतिःशास्त्रस्य** सामान्यविषयत्वादिति। आपाद्यविपर्ययापेक्षया। व्याप्तिप्रभित्यधीनतया च तर्कस्य लिङ्गज्ञानाधीनत्वमिति, तदपि न, परामर्शपश्चाद्भावित्वे तर्कस्य प्रमाणाभावात्। अनुमितेश्चैवमपरोक्षत्वापत्तिः। अनागतलिङ्गेऽपि सामान्यवि[शे]षालिङ्गितया तस्याश्च प्रमितिनिदानतयाऽस्त्येव लिङ्गपरामर्शोत्थापकत्वम्, अन्यथा तर्कस्यापि न व्यापारत्वं स्यादिति। नाप्यविज्ञाततत्त्वेऽ[र्थे का]रणोपपत्तितस्तत्त्वज्ञानार्थत्वम्। उपपत्तिशब्देन सत्त्वाभिधाने विशेषणवैयर्थ्यम्। संशयाभिधानेत्वसिद्धिः। भ्रमविवक्षाया तु साक्षात्तत्त्वज्ञानार्थत्वे……[ ]परम्परयापि यथाकथञ्चिद् विवक्षायामारोपितहेतुजनितप्रतिवादिप्रत्ययेन विप्रतिपत्तिजनितेनातिव्याप्तिः। अतएव न प्रमाणप्रवर्त्तनद्वारापि कि…… विज्ञाततत्त्वेऽर्थे इत्यतिरिच्यते। एवं च साक्षात् स्परोदासीनपक्षोऽप्यपास्तः। नापि व्याप्तिबलमालम्ब्यानिष्टप्रसञ्जकत्वं विपरीतापर्य……प्याद्यतिव्याप्तेः। न च तदन्यत्वे सतीति विशेषणीयम्, साध्यविशेषापत्तेः। नापि व्यापारोपेप्रमाणसहायोऽनिष्टप्रसङ्गस्तर्क इत्यनुकुलाभि[ति ……व्या]प्तेः। तद्विपर्ययस्य सिद्धान्तभिभूततया तथात्वम्। एवं सत्यनिष्टपदवैयर्थ्यम्। प्रसङ्गार्थश्च भवेदित्याकारत्वमनिष्टविषयत्वं ज्ञानमात्रत्वं वा न सम्म……त्येवेति तथाप्यनिष्टपदस्य साध्यानित्यत्वविपरीताभावनिश्चयस्य व्यापारोप्यात् संजायमानस्य व्यवर्तकतया लक्षमनुसन्धानीयमिति। प्रयोजनं चास्य प्रमाणप्रवर्तनमेव। तथा हि, न तावत्तस्य सन्देहविषयमात्रे प्रवृत्तिरतिप्रसङ्गात्। नापि जिज्ञासाविषये तत्रापि स्वजिज्ञासाः साधारण्यात्। अनपेक्षि-[20a]………तदाश्रितधर्मजनकत्वं वा स्पन्दवत्। प्रथमे तज्जन्यत्वं तथाभूत ज्ञानोत्तरकालिकं स्वरूपं वा स्यात्? तथाभूतज्ञानं नियत……… दनिरूपणादसिद्धि। ज्ञानाभावादेव तन्निरूपणे त्वन्योन्याश्रयप्रसङ्गः। द्वितीये त्वात्माश्रयापत्तिः एवं च द्वितीयोऽप्य………:। तस्याप्यसिद्धेः। तदाश्रितधर्माभावादेव तत्सिद्धेरिति

चेत्—न, तस्याप्यधिकरणाभावेनाभावप्रमाणान..........परेलम्भादेव तदनुमाने तु चक्रकापत्तेः। तथाप्यनुपलम्भसिद्धौ तद्विषयधर्माभावसिद्धिः। तत्सिद्धौ च तद्विषयव्यय..........तत्सम्भवे वा नुपलम्भसिद्धेरिति। एवं चार्थापत्तिरपि प्रत्युक्ता। शब्दस्तु निरूढप्रमाणभावो नात्र विद्यते। प्रमाणान्तर.........। नापि तृतीयः, योग्यता हि परस्परसन्निधानम्। तथा चेन्द्रियसामर्थ्यमभ्युपेतमेव। अन्यथा क्वापीन्द्रियकरणत्वं न स्यादिति। [20b]..........प्यशिक्षितोत्त्रासनम्। तथा हि किमत्र साध्यम्? तथा हि किमिन्द्रियकारणत्वम्, अथ साक्षात्कारित्वम्? नाद्यः सिद्धसाधनात् द्वितीयेऽप्य..........। किमन्याजनकत्वं, उत तत्प्रयोजकत्वम्? नद्यो-ऽसिद्धत्वात्'.......करणत्वं तत्कारणत्वं वा? आद्ये साध्याविशेष..........नेन्द्रियाधेयकार्येण च व्यभिचारः। इन्द्रियग्रहणोपक्षी..........ग्राहकेन्द्रिजाधिकरणग्रहणं चाभावपूगा.......प्रसङ्गः। न चैवं सति घटादावपीन्द्रियमधिकरणग्रहणोपयुक्तम्। तत्प्रतीतिस्त्वभावानुपलम्भादिति वाच्यम्। तत्प्रत्यक्षता.......प्रकृते तु संबन्धाभावादेर्बाधकस्य सत्त्वादिति। किं च भावस्थ योऽनुपलम्भविषयत्वेऽभावस्य योग्यता वाच्या। तथा..........योग्यतापेक्षणादन्योन्याश्रयणापत्ति न चाधिकरणग्रहणमन्तरेणाभावप्रतीतिः। तथा च तत्राप्यभावप्रमाणत्वे तु क.......[21a]भावत्वे क्लृप्तशक्तिकतया स एवास्तु सर्वत्राविशेषात्। न च निर्विकल्पस्य तज्जन्यत्वं प्रतियोगीस्मरणसापेक्षत्वात् तस्य। तथा च त..........स्मात् कथं विकल्पविशेषेऽपि कथं तथा न स्यात्? वायुर्न रूपवान्, एकेन्द्रियग्राह्यजातियोगित्वात् रूपवत्। यद्वा क्षितिजलानलेतरत्वात्। तदितरत्वं च धर्मिग्राहकादेवाधिगतमित्यनुमानाच्च वायोर्नीरूपत्वसिद्धिः। यदि चेन्द्रियादभावप्रतीतिस्तदा कथं शुक्तिकायां रजताभावप्रतीतिः, तदधिकरणेन्द्रियसंबन्धसत्त्वात्। अनुपलम्भासंभवादिति चेत्? तर्हि स एव क्लृप्तशक्तिकतया करणमास्तु। अलमिन्द्रियसामर्थ्यपरिकल्पनयेति। स्यान्मतम् विवादाध्यासितमिन्द्रियकरणकं.......मानकरणजत्वात्। यथा रूपसाक्षात्कार इति तदपि न, द्व्यणुकादिव्यभिचारात्। स्थूलत्वेन विशेषणीयमिति चेत्—न, स्मृत्याव्यभिचारात्। तस्यापीन्द्रियकरणत्वे तु साक्षात्कारत्वापत्तिः [21b]अथ यस्येन्द्रियत्वं संभवति तत्करणत्वं साध्यते। तथाप्यतिप्रसङ्गान्मनसः कथं स्मृतिकरणत्वमिति स्मृत्यैव व्यभिचारः। ग्राह्येन्द्रियप्रतातिकरणापेक्षणान्न रूपादिप्रतीतौ तत्करणत्वमिति चेत्? इहापि संस्कारापेक्षणात् कथं तस्य तथाभावः। तस्याव्यापारासंभवादिति चेत्—न, सदृशदर्शनादिजन्यायाः शक्तेरेव तद्व्यापारत्वात्। कथं वात्माश्रितस्य मनोव्यापारता संस्कारस्य? तज्जन्यत्वादिति चेत्? नन्वेवं पूर्वानुभवव्यापारतापि कुतो न स्यात्? तस्य विनष्टतया अकारकत्वादिति चेत्—न, यागस्याकरणापत्तेः। साक्षात्कारिप्रतीतित्वं चात्रोपाधिः।..........त्वं



च कारणत्वमपेक्षितं साधकतमत्वं वा? आद्येऽपि सर्वमेकदेशो वा? उभयसाधारणं वा? आद्येऽधिकरणस्य ज्ञायमा[न..........त्वादसिद्धिः। न द्वितीयतृतीयौ, अनुमानेन व्यभिचारात्। द्वितीयेऽपि तदव्यवहितत्वं वा स्यात्, तदव्यवहितव्यापारत्वं वा, क[22a]र्तृकर्मापेक्षया संनिहितत्वं वा, कर्तृव्यापारगोचरत्वं वा, अन्यथा वा? नाद्यः, अनुमित्याव्यभिचारात्। अतएव न द्वितीयः। न च तत्र लिङ्गस्य करणत्वम्। न तु परामर्शस्य व्यापारासंभवादिति वाच्यम्, तर्कस्य तद्व्यापारत्वात्। अन्यथा त्वनागतलिङ्गज्ञानादनुमित्यनु[प]पत्त्यापत्तेः। न चास्येष्टप्रसङ्गत्वम् तथा सति भविष्यत्कृत्तिकोदयज्ञाने भविष्यद्रोहिण्यासत्तिज्ञानानुदयापत्तेः। न च शब्द एव तत्र प्रमाणम्, तस्य कालविशेषविशेषाविषयत्वात्। अन्यथानुमानस्यैवोच्छेदप्रसङ्गात् कर्तृकर्मसंनिहितात्ममनोयोगजन्यानुमित्या। व्यभिचारादेव न तृतीयः। न चतुर्थः, अनुपलब्धेः कर्तृव्यापार्यतया असिद्धेः। प्रकारान्तरं त्वत्रासंभावितमेव। किं च, अज्ञायमानत्वमेकेन वा सर्वेण वा? एकदा वा सर्वदा वा? प्रथमेऽपि निर्दिष्टविशेषेण वा, अनिर्दिष्टविशेषेण वा? नाद्यो व्यभिचारात्। न द्वितीयः, तस्य निर्धारयितुमशक्यत्वात्। अतएव न तृतीयः, द्वितीय चतुर्थौ[22b]त्वशक्यावधारणावेव। ईश्वराभ्युपगमाच्चाज्ञातत्वं सर्वथा न संभवति। तस्मादादिविशेषणेऽपि योग्याभ्युपगमादसंभवः। न च सार्वज्ञ्यमतीन्द्रियर्थद्रष्टत्वादिकं निर्वक्तुमपि शक्यत इति यत्किञ्चिदेतत्, किं च, अभावाश्रयस्यानुपलब्धिसाहित्ये सत्यभावज्ञानकरणत्वात् तस्य च ज्ञातस्यैव जनकत्वादसिद्धत्वम्। तथा चोक्तम्—

प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।

[श्लो० वा० अभाव १]

इति। अथ मतम्, विवादाध्यासितं भावसव्यपेक्षमनोजन्यम्, अस्मदादिबाह्यानुभवत्वात्। यथा रूपे साक्षात्कार इत्यादिपदे च यदपेक्षस्य यस्य यत्र नियम उपलब्धस्तद्व्यतिरेकोऽपि तस्य संभावनीयस्तदार्द्रेन्धनरहितवह्निजन्यत्वमपि धूमस्य संभाव्यतेति नियमोच्छेदापत्तिः। तदपि न, अत्र हि भावापेक्षत्वमात्रं वा साध्यं, प्रमाणीभूतभावसव्यपेक्षत्वं वा, करणीभूतभावसापेक्षत्वं वा, प्रत्यक्षलिङ्गान्यतरप्रमाणापेक्षत्वं वा अन्यथा वा? आद्येऽपि यथाकथञ्चिज्वा भावापेक्षत्वं, सावधार-[23a]..........दृष्टान्ते साध्यवैकल्यम्। न द्वितीयः, बाह्यविपर्ययेण व्यभिचारात्। न तृतीयः, व्यापकभावलिङ्गकव्याप्याभावानुमा.......न्यधूमाभावपरत्वेच्छदकत्वान्न व्यभिचारः। तर्ह्यस्माकमप्यनुपलब्धिविशिष्टभूतलादेः करणतया.......नेन शरीरपरिमाणविनाशस्य च विरोधः। किं चानुव्यवसायस्य बाह्यविषयत्वाद् व्यभिचारः। अथै.......दादिपदवैयर्थ्यम्। प्रातिभज्ञानेन चात्र व्यभिचारः। नापि चतुर्थः, अभावानुभवमात्रधर्मित्वे सि.......न्यतरशब्दार्थः कः? किमन्यतरत्वसामान्यालिङ्गितम्,

आहो एते एव, अथ प्रत्येकम् ? नाद्यः, अप..................:। न तृतीयः व्यभिचारात्। प्रकारान्तरं त्वसंभावितमेव। एवं च यदुक्तम्—

प्रतिपत्तेरपारोक्ष्यादिन्द्रियस्यानुप[23b]क्षयात्।
अज्ञातकरणत्वाच्च भावावेशाच्च चेतसः॥

[न्यायकुसुमाञ्जल्यै ३]

इति तत्प्रत्याख्यातम्॥

स्यान्मतम्। इन्द्रियमभावग्राहकम्, तत्प्रतियोगिग्राहकप्रमाणत्वात्। यथा शब्दो.......न गृह्णीयात् तदा शङ्खादिकमपि न गृह्णीयात्। न चैतदिष्टप्रसञ्जनम-भाववादे मूकतापत्तेः। निपुणमनु......त्यवगतानुपलब्ध्या चानुमानोच्छेदापत्तेरिति। तदपि न। अभावग्राहकत्वं हि तद्विषयज्ञानजनकत्व.......ानेन धूमवत्त्वादिना च व्यभिचारात्। द्वितीयेऽपि प्रमाणत्वेन वा तज्जातीयत्वं स्यात्। तदवान्तरो.........ेस, सामान्येन वा, अन्यथा वा ? नाद्यौ सिद्धसाधनात्। न चात्र तथेति योगिपद-प्रयोजनमस्तीति व्य.........ा स्यात्, मिलितं वा इन्द्रियापेक्षया दृष्टान्ते साध्य-वैकल्यात्। अनुमानापेक्षया च बाधात्। न द्वितीयः, बाधि[ ]द्यः, तस्यापि तदा परिस्फुरणात्। द्वितीये बाधा तदभावोपलम्भमात्रं वा, यथार्थत्वविशेषितं वा ? प्रथमेऽपि तत्काले, तदनन्तरकाले वा ? कालान्तरे..........द्यावसिद्धेः। न तृतीयः, अतिप्रसक्तेः। किं चैवं जागरितातिव्याप्तिः। स्वप्ने क्वचित् ? तत्त्वोपलम्भात्। अतएव न द्वितीयः, विशेषाभावात्, व्यव.......पत्तेः। नापि बहिरिन्द्रियाजन्य-ज्ञानत्वं ध्यानामिद्धोपप्लुतान्तः करणजज्ञानत्वमिति चेत्—न, मिद्धशब्देन निरिन्द्रिय-प्रदेशावस्थानाभिधाने..........अ]न्यथा सुषुप्त्यसंभवात्। स्वप्नजनकादृष्टाद्यभावा-दिति चेत् ? नन्वेवं जागरिते तथात्वापत्तिः। प्रथमं कथं तदुपत्तिरिति चेत् ?.......... अना]दित्वात् संसारस्य तदनुपपत्तेः। अथ धातुवैषम्यम्, तदोन्मत्तजागरितापत्तिः। अतएव प्रबन्धविसंवादित्वकाकतालीयसंवादित्व..........नापि प्रबन्धबाधकादित्वे बाध्यप्रबन्धान्तत्वं जागरितत्वं तदन्यज्ञानत्वं च स्वप्नमिति। यथार्थविशेषणे तदसिद्धेः तदविशेषणे स्वा.......[ ]पत्तेः। नापि प्रचुरासत्यज्ञानसामग्रीसंबन्धयोग्य-वस्तुत्वं, उन्मादयुक्तजागरिताभिव्याप्तेः। अवस्थार्थच्चातिरिक्तो नास्त्येव। न च तत्रासत्यत्व.........रान्तरत्वं संभावितमेवेति। अत्रोच्यते। स्वप्नजागरितयोः प्रमाणत्वेनाविशेषे तद्भेदग्राहिप्रमाणत्वभेदसिद्धेः। अप्रमाणत्वे..........द्भेदप्रत्यया-प्रमाणत्वे तथाभावसिद्ध्यापत्तेः स्वप्नजागरितत्वान्यतररूपतया चाविशेषेऽनुभव-विरोधात्। मिथ्यायमनुभव इति.........न्मिथ्यात्वग्रहणस्य मिथ्यात्वे भेदसिद्धेः। यथार्थत्वे च तत्तुल्यन्यायेनेति। एवं बाधितत्वेऽपि वाच्यम्। तस्मादनुभवेनाबाधितेन सिद्धस्तावत्.........भासः। तथा च मिद्धोपप्लुतान्तःकरणजं ज्ञानं स्वप्नः। मिद्धोप-



प्लुतत्वं च मनसो बाह्येन्द्रियव्यापारविरहितस्य धातुवैषम्यदुषितात्व..........तथापि विपर्ययात् कथमस्य वैलक्षण्यम् ? अयथार्थज्ञानापेक्षया न कथञ्चित्। अवस्थाविशेष-विशेषणे तु सुव्यक्तमेवेति।

ननु स्वप्नावस्था य[ a ]स्तदा कथं नानुपलब्धिदोषः। किं च व्यक्त्यपेक्षया वैतत् साधनं जात्यभिप्रायेण वा ? नाद्यः दृष्टान्ते साधनवैकल्यात्। वाय्यपूरेण व्यभि-चार.......न्यरूपमभिमतम्, साधारणधर्ममात्रं वा ? आद्येऽसिद्धिः। द्वितीयेऽपि येन केनचिद् वा, प्रमाणान्तरोपाधिना वा ? आद्ये वाय्यपूरे[ण.......द्वि]तीयेत्वसिद्धिः। एवं साध्यमपि व्यक्त्यपेक्षया तदा दृष्टान्ते साध्यवैकल्यम्। अथ यथाकथंचित् सामान्यापेक्षया, तदा सिद्धसाध[नम्].......त्वावान्तरेणोपाधिना, तदा अज्ञातत्वेन सिद्धसाधनम्। अथ प्रमाणत्वावान्तरोपाधिविवक्षया तदा हेतुना विरोध इति य... यदप्यपरमुक्तमभावप्रतीतिरवश्यमिन्द्रियकरणिका वाच्या। यदि तु विशेष्यमात्रो-पक्षीणतया नेन्द्रियमभावविषय.......शेषमात्रनियतेति विशिष्टज्ञानं न स्यादेव। प्रमाणसमाहारजमेतदिति चेत्—न, विषयभेदे तदभावात्। न हि कुलालकुविन्दा-भ्यामे.......[ b ].......पारोक्ष्यापारोक्ष्यशालितया नानुपपत्तिरिति चेत्—न, पर-स्परविरुद्धयोरेकत्रासमावेशात्। समावेशेऽपि तथाभूते कार्ये.......पगमात् कथं नेन्द्रियत्वमिति ? तदप्यशिक्षितोत्त्रासनम्। तथा हि नानुपलब्धेरभावमात्रविषयत्वम-स्माकम्। तथा सति प्रागभाव.......त्वासंभवेनाप्रमात्वापत्तेः। तस्मात् यथाधि-करणज्ञानापेक्षस्यानुमानस्य धर्मिविषयत्वमप्याश्रीयते तथानुपलब्धेर.......ते तदा-नुमानविषयेपीन्द्रियसामर्थ्यप्रसङ्गः। भावे तत्र धर्मांशे इन्द्रियसम्बन्धाभावान्न तस्य तत्र प्रामाण्यं, तदा प्रकृतेऽपि तथा.......प]ण्डितः। यत्तु विषयभेदादसंभवाभिधानं तत्प्रत्यभिज्ञानमभ्युपगच्छतः सवथानवधानविजृम्भितम्। तथा च प्रयोगः, प्रमाणा... देर्भिद्यते। अभावशब्दवाच्यत्वात् प्रमेयाभाववत्। यद्वा, अभावः स्वानुरूपप्रमाण-ग्राह्यः प्रमेयत्वात्, यथाभावः। तदुक्तम्,

अभाव[शब्दवाच्यत्वात् प्रत्यक्षा] [2 a]देश्च भिद्यते।
प्रमाणानामभावोऽयं प्रमेयाणामभाववत्॥
अभावो वा प्रमाणेन स्वानुरूपेण भिद्यते।
प्रमेयत्वाद् यथाभावः तस्माद् भावात्मकात् पृथक्॥

[ श्लोकवार्तिके अभाव० ५८–५ ]

इति। स्यान्मतं, प्रमाणत्वं भावत्वेन व्याप्तम्। तच्चातो निर्वर्तमानं प्रमाणत्वमपि व्यावर्तयतीति। तदपि न, विपर्ययस्यापि प्रसङ्गात्। तत्रान्वयव्यतिरेकाभ्यां तथा सिद्धे न तथेति चेत्—तुल्यम्। अन्यथा, अभावस्य प्रमेयत्वमपि न स्यादिति तदुक्तम्,

भावात्मकस्य मानत्वं न च राजाज्ञयास्थितम् ।
परिच्छेदकफलत्वात् तु प्रामाण्यं स्याद्द्वयोरपि ॥
यदि चास्य प्रमाणत्वमभावत्वेन नेष्यते ।
वस्तुनः कारणत्वं हि दृष्टमित्यभिमानतः ॥
न लिङ्गत्वप्रमेयत्वे भवेतां तद्वदेव हि ।
तथा सति च पूर्वोक्तो व्यवहारो न सिध्यति ॥
[ श्लो० वा० अभाव ४७ ४९ ]

इत्याशङ्क्याह,

**असदिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधिप्रत्यक्षत्वाज्ज्ञानम् ॥९।६॥**

[वि]रोधिप्रत्यक्षादिति प्रध्वंसाभिव्यक्त्यर्थम् । असदिति प्रत्यक्षमित्यर्थः । भूतप्रत्यक्षाभावादिति योग्यानुपलम्भदर्शनार्थम् । स्मृतिग्रहणमपि प्रकृतापेक्ष[27b] सामान्येन तु प्रतियोगिज्ञानमित्यवगन्तव्यम् । तेन योग्यानुपलम्भप्रतियोगिज्ञान-सहितेनेन्द्रियेणाभावो गृह्यते । उक्तविशेषसहितेन तु प्रध्वंस इत्यर्थः । तथाहि, विवादाध्यासितमिन्द्रियकारणकम्, कार्यत्वे सति अपरोक्षत्वात् रूपसाक्षात्कारवत् । अपरोक्षत्वं च जातिभेदः । न चास्यासिद्धत्वम् । यदि ह्यस्य परोक्षत्वं स्यात्, तदा परोक्षजातीयमकारणकं स्यादित्यनिष्टप्रसङ्गसहकारिणा मनसैव तत्सिद्धेः । न चानिन्द्रियकरणत्वमत्र प्रयोजकम् । तथा सतीन्द्रियलिङ्गजन्यस्य भोगसाधकत्वप्रमितेः परोक्षत्वं न स्यात् । सर्वत्र च भावजातीयासाधारणकारणसापेक्षस्यैव भावस्य भाव-जातीयत्वोत्पादकत्वनियमात् कथं तस्मादसाधारणात् तज्जन्मेति । अभावानुमानं च तद्गृहं तदानीं देवदत्ताभाववत् । एकज्ञानसंसर्गयोग्यदेवदत्तवत्तया अगृह्यमाणत्वे सति तदानीं स्वरूपेण गृह्यमाणत्वात्, तथाभूतान्यप्रदेशवत् । एवं च न व्यभिचारः तदानीमिति ग्रहणप्राक्कालनिर्देशात् । ग्रहसमकालाभावस्त्वनुमानान्तरसाध्यः । अन्यथा[82a] तु सन्देह एव । न चात्र विशेषणसिद्धिः । तद्गृहं तदानीं देवदत्तवत्तया नानुभूतम् । एकज्ञानग्रहणयोग्यत्वे तद्वत्तयाऽस्मर्यमाणत्वे स्वरूपेण स्मर्यमाणत्वात्, यथान्यस्तथाभूतः प्रदेशः । विषयतत्सन्निकर्षेतरसमानोपलम्भको[प]लभ्यमानत्वं च तस्य तदेकज्ञानग्रहणयोग्यमिति । न चात्र विलम्बापत्तिः स्वभ्यस्ततया पताकावलने वाद्यनुमितिवदुपपत्तेः । योग्यताप्रतिसन्धानं च समानमिति । न मया तत्र चैत्र उप-लब्ध इत्यादौ तु न योग्यताप्रतिपादने तात्पर्यम् । तथा सत्यन्ययोग्यतायामन्यदीया-नुपलब्धेरभावपरिच्छेदकत्वेऽतिप्रसङ्गात् । अतएव नान्ययोग्यानुपलब्धेरज्ञाततायाऽ-न्यत्राभावमभिनिष्पादकत्वमिति । एवं च प्राङ्नास्तितायामप्यनुमानं समर्थितमिति । यत् त्वसंबद्धत्वान्न प्रत्यक्षत्वमित्यादि जल्पितम्, तत्रासंबद्धत्वमिन्द्रियासंयोगित्वं



यदि तदा रूपादिभिर्व्यभिचारः । अथाभेदवादमुपादाय तत्रापीन्द्रियसंयोगस्तदा प्रकृतेऽप्यसिद्धिः । अथेन्द्रियेणासमवायित्वमतादात्म्ये[प]पन्नत्वं वा तदाघ[28b] टेनैव व्यभिचारः । अथ विभक्तव्यवहारविरोधिधर्मान्तररहितत्वं तत्रासंबद्धत्वम्, तथापि रूपादिभिरेव व्यभिचारः । समवायाभ्युपगमात् तत्र न तथेति चेत्—न, अपसिद्धान्तात् । समवायाभ्युपगमेऽपि तेनैव व्यभिचारः । तदतीन्द्रियत्वं च न संभवति अथासंबद्धव्यवहारविषयत्वं तदा असिद्धिः । तस्माद् यद्ग्रहणे हीन्द्रियेणातिप्रसङ्गस्त-न्नैन्द्रियकम्, इन्द्रियनियामकमात्रं च तत्सन्निकर्षः । अस्ति च तदनुप्रतियोग्याधार-सन्निकर्षादि । समवायसिद्धौ तु कुतः प्रयत्नः ? अनवच्छिन्नस्वभावतयावच्छेदकस्य स्मरणोपस्थिततया च नात्र निर्विकल्पकपूर्वकता । अन्यथा तु प्रमाणान्तरस्यापि सर्वथा निर्विकल्पकविषयेऽप्रवृत्तेः कुतो नायं दोष इति ? एवं च विवादाध्यासित मिन्द्रियकरणकं, अन्यत्रानुपक्षीणव्यापारेन्द्रियाधीनज्ञानत्वात्, यथा घटसाक्षात्कार इति । वायुत्वस्यास्मदादिप्रत्यक्षानभ्युपगमादेकेन्द्रियग्राह्यत्वमसिद्धम् । तेजोवान्तर-जातिभेदमाश्रित्य व्यभिचारश्च । क्षितिजलानलेतरत्वं चकाशादीतरद्रव्यत्वेन सत्प्रति-पक्षम् । अवश्याभ्युपगन्तव्यतया तु कारणत्वं सिद्ध्येत्, न तु करणत्वमिति यत्किञ्चि-देतदिति । न च तत्कारणत्वे प्रमाणमप्य[29a]स्ति । दोषादेव च शुक्तिकायां नाभाव-प्रतीतिः । कथमन्यथा भ्रमोत्पत्तिरेवेति ? एवं च विवादाध्यासितमिन्द्रियकरणकम् । अज्ञातकरणजानुभवत्वात्, रूपसाक्षात्कारवत् । एवं च न साधनव्यापकतया न साक्षात्कारिप्रतीतेरप्युपाधित्वम् । करणत्वं चाव्यवहितव्यापारत्वमेवाभिमतम् । न च परामर्शानन्तरं तर्कापेक्षा संभवतीति न तस्य करणत्वम् । अनागतलिङ्गज्ञानेऽपि ज्ञानस्य व्यापारत्वाददोषः । यत् तु तदजन्यत्वान्न तस्य व्यापारत्वमिति तत्र यदि साक्षाद्विवक्षितं तदा तर्केणैव विरोधः । अथ परम्परयापोत्यभिमतं तदा असिद्धिः । लिङ्गस्य साधारणरूपतया व्याप्तिप्रमितिजननद्वारेण परामर्शनिदानत्वादिति । यद-नीश्वरज्ञानं सद् यन्न जनयति तेन करणेनोत्पादितमज्ञातकरणजन्यमिति । एवं च विवादाध्यासितं भावप्रमाणसापेक्षमनोजन्यम् । अस्मदादिबाह्यमात्रप्रमाणत्वात्, रूपप्रमीतिवत् न चात्र भूतलं प्रमाणमिति सिद्धसाधनता अज्ञातकरणजन्यत्वस्य चासिद्धतेति वाच्यम् । तथा सत्यभावस्य प्रमाणत्वानुपपत्तेः । अभावसहकारितयेति चेत् ? एवं तर्हि सकलप्रमाणानामभावत्वापत्तिः, प्रतिबन्धसंसर्गाभावसहकारित्वा-दिति । यदि चानु[29b]पलब्धिविशिष्टं तत्करणं तदा कथं नाज्ञातकरणजन्यत्वमन्य-थानुपपत्तेः । केवलस्य तु न ज्ञानेऽप्यभावप्रमीतिरिति कथं नाज्ञातकरणत्वं विनाशत्वं च प्रतीतिविशेष एवेति न तत्रापि व्यभिचार इति ।

यद्वा, इन्द्रियं प्रमाणत्वान्तरोपाधिमत्तया अभावप्रमाकरणं प्रमाणत्वात्, शब्द-वत् । न च धूमेन व्यभिचारः । तस्याप्यनुमानत्वेन तत्त्वात् । न चैवं सतीन्द्रियस्याप्य-

ज्ञातत्वमादाय तथाभावासिद्धसाध्यता, अज्ञातस्य प्रमाणत्वमन्तरेणाप्युपलब्धेस्तद्व्याप्यत्वासंभवात् । न च विशिष्टेन्द्रियाज्ञातत्वं तद्व्यतिरेकेणेति वाच्यम् । तथा सति विशिष्टेन्द्रियस्यैव प्रमाणत्वात् । न चैवं सिद्धसाध्यतापीति । समानन्यायतयैव ग्राह्यत्वत्यादिकः प्रसङ्गः । संबन्धासंबन्धलक्षणस्तु विशेषः पूर्वमेवापास्त इति । अथवा इन्द्रियं प्रमाणविशेषोपलक्षकोपाधिमत्तया अभावप्रमाकरणम् । तेन रूपेणाभावविपर्ययकरणत्वात्, यथा शब्दः । न चात्रासिद्धिः यदि हि दोषाणामेव करणत्वमत्र तदा रूपादिसंवित्त्यपि गुणानामेव करणत्वापत्तिः । अथ तत्र प्रमाणन्तरेण तैजसकरणादिव्यवस्थितेर्न तथा, तथा सति प्रकृ[30a]प्यज्ञाताकरणजानुभवत्वादिसंभवात् कथं तथाभावः ? एवं च न प्रत्ययविशेषस्यानु[प]लब्धिदोषत्वम् । अन्यथा पित्तादेरपि विशेषादर्शनदोषत्वप्रसङ्गात् एवं च यदभावप्रतीतिरवश्यमिन्द्रियजन्याङ्गीकरणीयेत्यादिकमभिहितं तत्कारणमात्रसाधनार्थम् । कारणत्वे च सिद्धेऽन्यत्रानुपक्षयादिना करणत्वं रूपसाक्षात्कारादाविव साधनीयम् । अभावशब्दवाच्यत्वं लिङ्गभूतेनाभावेन व्यभिचारि, न च प्रमाणाभावस्य प्रत्यक्षत्वं वैशेषिकाभ्युपेतमिति सिद्धसाधनतापि । सादृश्यं च येन केनापि रूपेण, भावप्रतिद्वन्द्वितया वा ? आद्ये, सिद्धसाधनम् । द्वितीये दृष्टान्ते साध्यवैकल्यमिति । विस्तरस्तुन्यायवृत्तावध्यवसेय इति ॥

इदानीं प्रागभावप्रत्यक्षतामाह,

**तथा अभावे भावप्रत्यक्षत्वाच्च ॥ ९।७ ॥**

भावस्य कार्याव्यभिचारिकारणावस्थाविशेषस्य प्रत्यक्षत्वात् प्रध्वंसाभाववत् प्रागभावे प्रत्यक्षतेत्यर्थः । सामान्यशब्दोऽपि बाह्यान्तरसन्निधानात् तदितरपरः । चकार आत्मादिप्रतिपादनार्थः । व्यतिक्रमाभिधानं भावे परस्परव्याप्यत्वप्रतिपादनार्थमिति ॥

अन्योन्याभावप्रत्यक्षतामाह,

**एतेनाघटोऽगौरधर्मश्च व्याख्यातः ॥ ९।८ ॥**

एतेनेति तर्कप्रतियोगिस्मरणादिना । अयं च [30b]क्वचित् तदितरमात्रेऽवगम्यते, यथाऽघट इति । क्वचित् तत्सदृशे यथा अगौरिति । क्वचिद् विरुद्धे, यथा अधर्म इति । धर्माधर्मयोश्च विरोधो विरुद्धकार्यजनकत्वम् । कार्ययोश्च सहानवस्थानमिति ·········त्र सादृश्यादिना प्रसक्तमितरात्मकत्वं निषिध्यते । तत्राद्योदाहरणाद्वयमचेतनचेतनत्वरूपवैधर्म्यप्रतिपादनार्थम् । तृतीयं तु पयःपानसादृश्यान्मद्यपानादौ प्रसक्तधर्म ? कनिषेधरूपमिति केचित् ॥

अत्यन्ताभावप्रत्यक्षतामाह,



**अभूतं नास्तीत्यनर्थान्तरम् ॥ ९।९ ॥**

एतेन कालविशेषानवच्छेदो दर्शितः । तथा च कालविशेषानवच्छिन्नतया तत्प्रत्यक्षम् । एतेनेत्यनुवृत्तेस्तर्कादिभ्य इति सूत्रार्थः ॥

ननु च त्रैकालिकनिषेधो घटादेर्न संभवत्येव । शशशृङ्गादेस्तु प्रमिताप्रमितविकल्पानुपपत्त्या न प्रतिषेध इत्यत आह,

**नास्ति घटो गेह इति सतो घटस्य गेहसंयोगप्रतिषेधः ॥ ९।१० ॥**

अतएवान्यत्र घटसंयोगस्य भूतलविशेषे त्रैकालिको निषेधः । एवं च शशशृङ्गं नास्तीत्यादावप्यधिगन्तव्यम् । यद्वा विद्यमानस्य घटस्य देशान्तरे निषेधो न तावत्प्रागभावः प्रध्वंसो वा, प्रतियोगिसमानकालिकत्वात् । नाप्यत्यन्ताभावः, प्रतियोगिनः सत्त्वात् । नाप्यन्योन्याभावः, संसर्गाभावरूपत्वादिति पि[32a]वर्तनर्थान् गृह्णात्येव । तथा च यदि चक्षुरादिना परमाण्वदीन् भूक्ता ··········· न दोषः । अस्ति हि तत्रापि रूपवत्वादिकं प्रमाणम् । श्रूयते च विभूतौ दूरश्रवणादिकं योगफलम् । न चैवं सति चक्षुषो रसादिग्रहणापत्तिः । तत्र धर्मिग्राहकप्रमाणविरोधेन प्रमाणाप्रवृत्तेः । न चैवं स्वर्गादीनामप्यतीन्द्रियतयैन्द्रियकत्वसाधने विरोधः । स्वर्गपदेनैन्द्रियकत्वविरोधित्वस्यानभिधानात् । अन्यथा स्वर्गिणामपि तथात्वापत्तौ श्रुतिविरोधात् । प्रकृतेऽपि रूपव्यञ्जकमात्रं धर्मीति चेत्--न, तथा सति मनसा सिद्धसाधनात् । न चास्य विपर्ययपर्यवसानमपि, न चरमविषयं चक्षुः । तस्मान्न प्रत्य··············परमाण्वा···············मनसो बहिरर्थग्राहकत्वे नयनाद्यारम्भवैयर्थ्यापत्तिरित्यपास्तम् । प्रमाणं चात्र प्रमेयत्वम्, कार्यसाक्षात्कारिविषयत्वसाधकम् । न चात्र रूपवत्त्वं महत्त्वविशिष्टमुपाधिः । आत्माव्यापकत्वात् । न च बहिरिन्द्रियप्रत्यक्षत्वेऽस्योपाधित्वमिति वाच्यम्, अर्थान्तरत्वात् । नापि योग्यविशेषगुणवत्वं रूपाव्यापनात् । यत्र विशिष्टरूपत्वमिति चेत्--न, तथापि प्रत्येकसमुदायाभ्यामनुपाधित्वात् । प्रत्यक्षसामग्रीमध्यपातित्वमुपाधिरिति चेत्--न, अस्य······ ·······दोष इति चेत्--न, एतद्व्यावर्त्यप्रमिताप्रमितत्वाभ्यामनुपपत्तेः । [32b]ननु चात्र कार्यसाक्षात्कारविषयत्वमात्रं साध्यते । एतदेव सकलविषय······ प्रत्यक्षतायाः सर्वज्ञसिद्धेः । कल्पनालाघवादेकत्वमिति चेत्--न, अस्य प्रमाणत्वे प्रत्यक्षानुमानान्तर्भावापत्तेः । तर्कत्वे तु व्यति··········तीयः, व्याप्त्यसिद्धेः । वेदनतारतम्यं क्वचिद् विश्रान्तमिति तत्सिद्धिरिति चेत्—न, ईश्वरव्यतिरिक्तासिद्धेरर्थान्तरत्वादस्य । कार्यत्वविशेषणाददोष इति चेत्—न,··············वार्तिककारादिभिः सिद्धसाधनात् । किं चैवमपकर्षतारतम्यादेकज्ञमात्रापत्तिः । करितुरगा-

देरपि चैवं सर्वज्ञत्वापत्तिः। भावनाभ्यासश्च विषयविज्ञानजनन……………ति कथं ततः सर्वविषयज्ञानसंभवः। किं चैवं सशरीरस्यातिशयदर्शनात् कार्ये सर्वकर्तृत्वापत्तिः। न च योगिनोऽसार्वज्ञ्ये कायव्यूहादिजनकत्वं न स्यादिति चेत्………सिद्धेः। ज्ञानाग्नेरेव कर्मविनाशोपपत्तेः। सिद्धावप्यदृष्टादेव तदुपपत्तेः। एवं च प्रयुज्यते-ज्ञानजातीयं कतिपयविषयतानियतम्। तेन……निरुपाधित्वात्, धूमवत्। अत्रोच्यते। अतीन्द्रियविषयस्वतन्त्रकार्यसाक्षात्कारमात्रस्यैव साध्यत्वाददोषः। विप्र[33a]तिपत्तेरपि तावन्मात्रनियतत्वात्। अन्यथा तदनुपपत्तेः। अथ विवादाध्यासितमभिन्नकार्यसाक्षात्कारिविषयमित्यत्र किं प्रमाणमिति विप्रतिपत्तिः। अत्रापि प्रमेयत्वमित्युत्तरम्। न च भिन्नप्रत्यक्षविषयैर्व्यभिचारः, अत्राप्येकप्रत्यक्षाव्यावृत्तेः। तुरगादीनामपि च कायव्यूहाश्रयणात् सार्वज्ञ्यमभ्युपेतमेव। सकलकार्यकर्तृत्वं च शरीरिणः प्रलयानन्तरकार्यासंभवादनुपपन्नम्। कतिपयविषयनियतत्वसाधनं तु ज्ञानजातीयमात्रस्य तद्विशेषस्य वा? आद्ये सिद्धसाधनम्। उत्तरस्मिन्नपि योगिज्ञानं वापेक्षितम्, तदितरकार्यविज्ञानं वा? उत्तरस्मिन् सिद्धसाधनम्। प्रथमे तु प्रमिताप्रमितत्वाभ्यामनुपपत्तिः। एवं च प्राणित्वादिभिरतीन्द्रियविषयसाक्षात्कारनिराकरणमपास्तम्। अन्यथा तु कीर्तितुतातितादीनामपि तत्तच्छास्त्रार्थतत्त्वे परिज्ञाननिराकरणपत्तेरिति ॥

अयोगिप्रत्यक्षमाह,

**आत्मेन्द्रियमनोऽर्थसन्निकर्षाच्च ॥ ९।११ ॥**

घटादिकमुपलभ्यत इति शेषः। चकार आलोकादिसमुच्चयार्थः।

कर्मादिष्वाह,

**तत्समवायात् कर्मगुणेषु ॥ ९।१२ ॥**

तदित्यनन्तरोक्तद्रव्यपरामर्शः। गुणेषु प्रत्यक्षयोग्येषु। अन्यथा गुरुत्वाद्यतिप्रसक्तिः। सामा[ 33b ]न्यसमवायानुपादानत्वाश्रयग्राहकाधीनग्रहणत्वमुपदर्शयति। नन्वेवं कर्मणोऽप्युपादानापत्तिः? मैवम्, तत्प्रत्यक्षतायां विप्रतिपत्तेस्तन्निराकरणार्थम्। तथा हि कर्माप्रत्यक्षम्, संयोगविभागरूपलिङ्गगम्यमिति केचित्। न चात्र प्रमाणाभावः। तथा हि, विवादाध्यासितमप्रत्यक्षम्, आशुतरविनाशित्वात्। परमाणुकर्मवत्। न चात्र सुखेन व्यभिचारः, बहिरिन्द्रियाप्रत्यक्षत्वसाधनात्। आन्तरेन्द्रिय[ा]प्रत्यक्षत्वं तु उभयवादिसिद्धमेव। नापि विभागेन व्यभिचारः, तस्य संयोगाभावातिरिक्तस्यानभ्युपगमात्। नापि द्वित्वादिभिः, तेषामपेक्षाबुद्ध्यभिव्यङ्ग्यत्वादिति। कर्मत्वमेव वा प्रमाणम्। न चैवं परमाणुरूपादिदृष्टान्तेन रूपत्वादिना घटरूपादीनामप्यप्रत्यक्षत्वापत्तिः। तत्र रूपादिप्रतीतेरन्यथानुपपत्तेः। द्रव्यचाक्षुषत्वान्यथानुपपत्त्यापि रूपमात्र-



मागच्छेन्न तु शुक्लादिकमिति। नन्विहापि खद्योतश्चलतीति प्रत्ययो न स्यात्, आकाशादेरतीन्द्रियतया तन्निष्ठसंयोगविभागाप्रतीतेः। पृथिव्यादीनां च महान्धकारेऽप्रतीतेः। नन्वेवं सूर्येऽपि क्रियानुमानं न स्यात्। तदालोकमण्डलेन तत्र संयोगविभागौ प्रतीत्य [ 35a ] तत्कथमन्यत्र भूतलदेहयोः संयोगं जनयेत्। ननु किं संयोगस्य कार्यमात्रेऽयं नियमः, अथासमवायिनः, उत संयोगस्यासमवायिकारणस्य? नाद्यः, इन्द्रियसंयोगेन व्यभिचारात्। न द्वितीयः, एकत्वेन कर्मणा च व्यभिचारात्। न तृतीयः, अन्त्यतन्तुसंयोगे तन्तुसमुदायाश्रितपटाजनकेन व्यभिचारात्। न च खण्डपटान्त्यतन्तुसंयोगाभ्यामेव पट आरभ्यत इति वाच्यम्। विततैस्तन्तुभिरेकदा वेमाभिघातात् परस्परसंयोगैः परजननदर्शनात्। अथ स्वाश्रयत्वं सजातीयसंयोगाश्रयत्वमभिमतम्, तदा प्रकृतेऽप्यात्मदेशसंयोगसंभवान्नानुपपत्तिः। एवं चैकः संयोगः एव बहूनां त[न्तु]संयोगानामनियमः त्र्यणुकादावित्यपास्तम्। प्रकृतेऽप्यात्मशरीरसंयोगस्य च तथात्वाभ्युपगमात्। एतदप्यसत्। तथा हि संयोगः संयोगमर्जयन् युगपत्स्वाश्रयसमवेतमेव जनयतीति नियमः, यथा तन्तुतुरीसंयोगः पटतुरीसंयोगम्। न चैवमात्मदेशसंयोगान्मदेहसंयोगयोः। एवं च स्वाश्रये वा स्वाश्रयसमवेते वा व्याप्तिः परस्पर [35b] व्यभिचारान्न संभवतीत्याद्यपास्तम्। अस्याश्च व्याप्तेर्बाधकमन्तरेण नैकसंयोगगोचरतया संकोचः संभावनीयोऽतिप्रसङ्गात्। अत्र च साहचर्यस्यानौपाधिकत्वस्य च सिद्धत्वात्। प्रकृते च विप्रतिपत्तेर्न विपरीतकल्पना। कार्यं च यावत्समवायिकारणप्रत्यासन्नासमवायिकारणनिबन्धनमिति च व्याप्तिद्वित्वादिना त्र्यणुकेन व्यभिचारान्न संभवतीति कर्मानुमाने विशेषविरोधः। किं च भवतामपि क्रियासामग्रीत एव कुतो न क्रियासंभवः? उत्पन्नायामपि तस्यां विलम्बादिति चेत्? नन्वयमस्माभिरभिधीयमानः कथं भवद्भ्यो न रोचते? अथ न पूर्वसंयोगे सत्युत्तरसंयोग[ः] संभवतीति न तत्सामग्रीजन्यत्वं तस्य। न तथापि तज्जनकसंयोगविभागविशेषस्य विभागजननद्वारा स्यादित्यस्यानिवारणादिति। किं च संस्कारः स्वाश्रये कारणजातीयं क्रमेण जनयतीति नियमः। तदिह यदि नोदनजन्यो वेगः स्यात् तदा नोदनमेव जनयेदिति। न स्वप्रत्यक्षत्वे कर्मणः कुतः……णावपि न कर्मानुमितिः, अत्रापि तल्लिङ्गसंभवात्। अन्यथा तु व्यभिचारित्वापत्तिः। श्येनस्याकाशविभागार्थमवश्याभ्युपगन्तव्यात् कर्मण एव तत्रापि संयोगविभागसंभवान्न त[36a]दर्थमात्रस्यार्थप्रतिपादकत्वम्। प्रमोत्पादकत्वं तु सत्तामात्रावस्थितस्याप्तोक्तस्य। पदे त्वाप्तोक्तत्वनिश्चयेऽपि न बाह्ये तादृरूप्यनिश्चयो व्यभिचारात्। न च तावन्मात्रमेव हेतुरनाप्तोक्तिसाधारण्यादिति। अथ संसर्गयोग्यमात्रं साध्यते तदा अर्थान्तरत्वम्। स्यान्मतम्। एतानि पदानि स्मारितार्थज्ञानसंसर्गपूर्वकाणि आकांक्षादिमत्पदकदम्बत्वादित्यादि। न चैवमर्थासिद्धिः ज्ञानावच्छेदकतया

तत्सिद्धेरिति। तदपि न। तथा ह्याकांक्षा यदि विशेषणविशेष्यभावः, तदा स पदानामसिद्धः। पदार्थधर्मत्वे तु साध्याविशेषः। नापि तद्योग्यता, पौनरुक्त्यापत्तेः। नाप्यविनाभावः, नीलं सरोजमित्यादावसिद्धत्व[ा]त्...... नापि विशेषाक्षिप्तसामान्याविनाभावः, अहो विमलं जलं नद्याः कच्छे महिषश्चरतीत्यादिना व्यभिचारात्। नापि प्रतिपत्तुर्जिज्ञासा। घटो भवतीत्यादेरितं...... शवदपर्यवसानापत्तेः। नापि पदस्मारितविशेषविषया जिज्ञासा। सा हि न ज्ञाता अर्थप्रतिपत्त्यङ्गम्। स्वरूपस्थिताया एव तस्यास्तदुपपत्तेः। तथा च हेतोरसिद्धत्वात्...... ....[36b]दिना अयमेति पुत्र इत्यश्रुत्वा राज्ञः पुरुषोऽपसार्यतामिति यदा शृणोति तदा व्यभिचारः। यावत्समभिव्याहृतत्वविशेषणाददोष इति चेत्-न, तथा सत्येकश्रावि..........त्पत्त्यापत्तेः। अलिङ्ग एव लिङ्गत्वारोपादिति चेत्-न, तथा सति न ज्ञायते किमनेनातिरिक्तमुक्तमित्यादावर्थप्रत्ययानुत्पत्त्यापत्तेः। भ्रान्तिरसाविति चे [त्..........]वदिन्द्रियजापरोक्षाकारत्वात्। नापि लिङ्गाभासजा, तत्सन्देहेऽपि जायमानत्वात्। शब्दसामर्थ्यपरिकल्पनायां कथं यथार्थज्ञानेऽपि तथा न स्यादिति ? अ.... ......त्तथाव्यवहार इति चेत्—न, अपसिद्धान्तात्। अनाप्तवाक्येन चैवं व्यभिचारः। असंसर्गाग्रहपूर्वकत्वमात्रं साधनीयमिति चेत्—न, अर्थान्तरापत्तेः। आप्तो[पदेश...... ... ...]विशेषणीयमिति चेत्—न, निराकृतत्वात्। अजिज्ञासोरपि वार्थप्रत्ययान्नेयमाकांक्षा। आकांक्षा तु स्मारिततदाक्षिप्ताविनाभावे सति श्रोतरि तदुत्पाद्यसंसर्गाव.. प्रागभावः। प्रतियोगिसंबन्धाच्च तस्य शब्दधर्मत्वम्। न चास्य ज्ञानं संभवति, प्रतियोगिज्ञानमन्तरेणाशक्यज्ञानत्वादिति। न च तद्राहितो हेतुरिति वाच्यम्। गौरश्व इत्यादिभिर्व्यभिचारात्। न[37a]षयाव्यभिचारः। तस्या अपि तल्लोकवास्तव्यरागिजनप्रत्यक्षत्वात्। संयोगश्च स्वाश्रये स्वाश्रयसमवेते च संयोगमर्जयतीति व्याप्तिः। परस्परसजातीयसंयुक्तविजातीयपरमाणुद्वयजनितद्व्यणुकद्वयपरस्परोपादानसंयोगाधारद्व्यणुकद्वयसंयोगव्यभिचारान्न संभवति। किं च संयोगोऽसमवायिकारणतया स्वाश्रय एव कार्यमर्जयतीति स्वाश्रयसमवेतकार्यार्जनार्थं गुणान्तराभ्युपगमापत्तिः। कर्मणः प्रत्यक्षत्वाभ्युपगमे च तदनन्तरमुपलम्भात् कार्यत्वविनिश्चयः। अन्यथा त्वप्रतिसङ्गात्। अस्माकमपि क्रियासामग्र्यां सत्यां विलम्बाद् विभागादेरतिरिक्तसिद्धिरिति चेत्—न, तस्या अतीन्द्रियतया तस्याप्यसिद्धेः। क्रियातस्तत्सिद्धिरिति चेत् ? अहो पाण्डित्यं यदाक्षिप्तमेवोपादाय समाधानम्। यत्तु संस्कार इत्यादिकमभिहितम्, तत्र संयोगजनितः संयोगं जनयतीति का अनुपपत्तिः। सर्वथैकजातीयत्वाभावादनुपपत्तिरिति चेत् ? नन्वेवं भावनाया अपि संस्कारत्वं न स्यादिति समवायाप्रत्यक्षतया तदुपादानमन्वेति[?] केचित्॥



आत्मगुणप्रत्यक्षतामाह,

**तत्समवायादात्मगुणेषु ॥९।१३॥**

आ[37b]त्मगुणेष्विति योग्यतया ज्ञानादिषु। तदिति व्यवहितात्मपरामर्शः। एवं च संयुक्तमवायादात्मगुणेषु ज्ञानादिष्वपरोक्षज्ञानमुत्पद्यत इति सूत्रार्थः। ननु च ज्ञानं स्वप्रकाशं प्रकाशकत्वात्, प्रदीपवत्। सहकारिसाकल्ये सति प्रकाशाव्यवहितपूर्वभावश्च प्रकाशकत्वम्। एवं च ज्ञानत्वे विवक्षितेऽसाधारण्यम्, तेजस्त्वे चाभिमतेऽपक्षधर्मत्वम्, प्रकाशाव्यवहितपूर्वभावे चाभिमते भागासिद्धिः, सामान्यभेदे चाभिमते परापरभावानुपपत्तिरित्याद्यपास्तम्। तथा हि स्वप्रकाशत्वं यदि ज्ञानत्वं त[य ?]दा सिद्धसाधनम्, अथ स्वविषयप्रकाशकारणत्वं, तथापि सिद्धसाधनम्। अथ स्वविषयप्रका[श]करणत्वं, तदा बाधः। स्वव्यवहारे ज्ञानानपेक्षत्वं यदि तदा दृष्टान्ते साध्यवैकल्यम्, अथ स्वप्रतिबद्धव्यवहारे ज्ञानानपेक्षत्वं तथापि बाधः। हानादिलक्षणे व्यवहारे कर्त्राद्यपेक्षणात्। स्वव्यवहारे सजातीयानपेक्षत्वं यदि, तदा दृष्टान्ते साध्यवैकल्यम्। अथ स्वव्यवहारेऽत्यन्तसजातीयानपेक्षत्वम्, तथाप्यनुमित्या मानसप्रत्यक्षाधिगम्यमानया सिद्धसाधनम्। नन्वत्र विवादाध्यासितं धर्मत्वेनाभिमतम्, [38a] न चैवमपि परानुमित्यानुमीयमानया बाधः। तस्यापि पक्षत्वप्रतिक्षेपे च व्यभिचार इति वाच्यम्, पुरुषभेदापेक्षया तत्रापि साध्यसम्भवात्। न च सर्वापेक्षया साध्यते किं तु संभवमात्रेणेति। तदपि न। तथाप्यनुव्यवसायत्वजातिभेदाश्रयणेन सिद्धसाधनात्। न चानुव्यवसायत्वासिद्धिः। एतावतापि तथात्वाविनिवृत्तेः। न चानुगतप्रत्ययस्य बाधकमन्तरेण ज्ञानविषयसाक्षात्कारलक्षणोपाधिव्याधिसद्भावमात्रेण निराकरणमतिप्रसङ्गात्। किं चास्मिन् साध्ये न विपक्षसंभवः। न च केवलान्वयिनः साधकत्वमभ्युपगतं परेण। न चालोकस्य विपक्षत्वम्, निराकरिष्यमाणत्वादिति। अथ स्वात्मनि संशयविपर्य[य]विरोधित्वम् ? तथापि धर्मित्वरूपमानाय, प्रकारभेदमाश्रित्य वा ? आद्ये सिद्धसाधनम्। द्वितीये तु यथार्थायथार्थव्यवहारजनकत्वमुपादाय संभवाद् बाधः। ननु च ज्ञानं स्वप्रकाशं ज्ञानत्वात्। न यदेवं न तदेवम्, यथा घटः। यदि च ज्ञानान्तरविषयतामियात् तदा ज्ञानमेव न स्यात्। तदुक्तम्,

अनुभूतेरनुभाव्यत्वादननुभूतित्वापत्तिः।

इति। बाह्यैरप्युक्तम्,

अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध[ध्य]ति।

[ Pramāṇaviniścaya* ]

---

* Cf. Jainasatyaprahhākara XVII. No. 7

इति। स्वप्रकाश [38b]त्वं च व्यवहारज्ञानानपेक्षमेव साध्यमिति न सिद्धसाधनाद्यवकाशः न चानुमीयमानज्ञानेन बाधो विरोधो वेति वाच्यम्, ज्ञानापेक्षत्वस्य निषेधात्। ज्ञानानपेक्षत्वं यत्र विधीयते, तच्च पुरुषभेदेन तत्राप्यक्षीणम्। **सौगतमत**माश्रित्य ज्ञानाग्राह्यतैव वा साध्यते। अनुमानस्य तु विकल्पग्राह्यतया अलीकग्राह्यत्वं निर्विकल्पकाविषयत्वं वा साध्यत इति। तदपि न, स्वव्यवहारे ज्ञानापेक्षणेऽपि ज्ञानत्वेन यत् स्वव्यवहारे ज्ञानापेक्षं न तज्ज्ञानानपेक्षमिति व्यतिरेकनियमस्यासिद्धौ प्रतिबन्धासिद्धेः। एवं चानुभूतेरनुभाव्यत्वे अननुभूतित्वापत्तिरित्यादिकमपि विपर्ययापर्यवसानान्निरस्तम्। किं च विपक्षबाधकाभावादपि व्याप्यत्वासिद्धिवत्, एवं चानुभूतेरनुभाव्यत्व इत्यादेः शिथिलमूलत्वम्। अन्यथा भूः शशशृङ्गविदीर्णा गन्धवत्वात्। न यदेवं न तदेवम्, यथा जलम्, यदि च शशशृङ्गविदीर्णा न स्यात् तदा गन्धवत्यपि न भवेद्, यथा जलमित्यपि स्यादिति। न केवलव्यतिरेकिणः स्वप्रकाशवादिभिरभ्युपगमः कृतः। ज्ञाने ग्राह्यत्वनिषेधे च विपक्षबाधकाभावाद् व्याप्यत्वासिद्धिः, न च केवलव्यतिरेकी **सौगतै**रनुमतः। न च विरो[39a]धात् काल्पनिकोऽप्यत्रान्वयोऽभिधातुं शक्यः। निर्विकल्पकाग्राह्यत्वे त्वंशतः सिद्धसाधनम्। अथ योग्यतामात्रं निषिध्यते तदा **सौगत**[मत]मास्थायालीकस्य सपक्षस्य संभवाद् व्यतिरेक्यभिधाने विरोधः। घटादिप्रत्युतिमादायासाधारणानैकान्तिकत्वं च विपक्षबाधकाभावाद् व्याप्यत्वासिद्धिश्च पूर्ववत्। तदेवं विवादाध्यासितो व्यवहारो व्यवहर्त्तव्यातिरिक्तज्ञानकार्यः व्यवहारत्वात्, घटव्यवहारवत्। न च स व्यवहार एवंभूतो यत्र व्यवहर्तव्यसंभवेऽपि ज्ञानमन्तरेणासंभव उपलब्ध इति सोपाधित्वमिति वाच्यम्। तथा सति सुखादिज्ञानस्याप्यसंभवापत्तेः। विशिष्टस्य साधनस्य भेदाभावेनानुपाधित्वाच्चेति। **अन्ये** तु प्राकटयान्यथानुपपत्तिगम्यज्ञानमास्थिषत। तथा हि अस्ति तावद् विज्ञानविशेषोत्पत्त्यनन्तरमर्थविशेषे प्रवृत्तिः। सा किं निर्निबन्धना सनिबन्धना वा? नाद्योऽतिप्रसङ्गात्। द्वितीयोऽपि न ज्ञानमात्रनिबन्धनाऽतिप्रसक्तेरेव। नापि जातिविशेषनिबन्धना, परापरभावाभावात्। नापि ज्ञानविशेषनिबन्धना। तत्रापि ज्ञानस्य विशेषोऽसाधारणं रूपं यदि तदा ज्ञानान्तरस्य घटप्रवर्तकत्वं न स्यात्। अथ सामग्रीविशेषोत्पन्नोऽर्थेन स्वभा[39b]वप्रत्यासत्तिरूपो विशेषः। न, स्वभावस्याप्रत्यासत्तित्वात् प्रत्यासत्त्यन्तरस्य चानभ्युपगमात्। विषयविषयिभावोऽस्तीति चेत्—न, स किं नित्योऽनित्यो वा? उत्तरस्मिन् प्रागभावावच्छिन्नसत्तापत्तौ समवायिकारणमपि तस्याभ्युपेयम्। यच्च कार्यं यद्गतत्वेनापलभ्यते, तत् तस्य तथा[।]तथा च सर्वस्य द्रव्यत्वापत्तिः। ज्ञानादीनां तदनधिकरणत्वं वा, न वा नित्यधर्मत्वं ज्ञानादीनामित्यपसिद्धान्तोऽपि। प्रथमेऽपि समवायत्वापत्तौ कथं ज्ञानार्थयोस्तत्संभवः? किं चासौ



धर्मभेदाज्ज्ञानार्थयोः संबद्धोऽसंबद्धो वा? उत्तरस्मिन्नतिप्रसङ्गः। आद्येऽप्येको वा, भिन्नो वा? द्वितीये प्रत्येकव्यभिचारान्नियामकत्वानुपपत्तिः। प्रथमेऽप्येकज्ञाननिष्ठोऽपर्यन्तज्ञाननिष्ठो वा? नाद्यः, पूर्ववत्। द्वितीये तु, सामान्यरूपत्वापत्तिः। सामग्रीविशेषोत्पन्नत्वमेव तत्त्वमिति चेत्—न, तत्रापि किं विशेषपदेन विशेषमात्रं विवक्षितम्, व्यवहारविशेषजनकज्ञानासाधारणो वा? नाद्योऽतिप्रसक्तेः। न द्वितीयः, तस्य निर्वक्तुमशक्यत्वात्। अर्थविशेषेन्द्रियसन्निकर्षोत्पन्नत्वं नियामकमिति चेत्? अत्र हि सन्निकर्ष एव नियामकत्वेनाभिमत इन्द्रियसन्निकर्षविशिष्टोऽर्थो वा? [40a]नाद्यः, तस्येन्द्रियार्थसाधारणत्वात्। नोत्तरः, विषयविषयिभावानिरुक्तावर्थत्वस्यार्यमाणत्वस्यानिरुक्तेः। कारणमात्रापेक्षया चातिव्याप्तिः। न चैतदनुमितिविषयं व्याप्नोति। एवं चानुमितावप्येतत्प्रत्याख्येयम्। तत्र हि प्रतिबन्धोऽसाधारणः। स च व्याप्यव्यापकधर्मो वा, व्याप्यमात्रनिष्ठो वा? आद्ये परस्परव्यभिचारापत्तिः। उत्तरस्मिंस्तु कथं व्यापकविषयः? तत्संबन्धितया निरूप्यत्वाद् यदि तदा निरूप्यत्वनिरुक्तौ स्यात्। तदेवं प्रवृत्तिविशेषोऽयमनुपपन्न इति ज्ञानजन्यं व्यवहारविशेषानुगुणं घटादिनिष्ठमाक्षिपति। तदेतदसङ्गतम्, सामग्रीविशेषोत्पन्नज्ञानविशेषादेवार्थविशेषप्रवृत्त्युपपत्तेः। कथमन्यथात्मनिष्ठं ज्ञानमर्थेनासंबद्धं तत्र ज्ञाततामपि जनयेदिति? ननु तथापि योऽयं घटसंबन्धिताव्यवहारो ज्ञानस्य स ज्ञाततामन्तरेणानुपपद्यमानस्तामुपकल्पयति। तथा हि नायं व्यवहारो ज्ञानस्वभावादिनिबन्धनो निराकृतत्वात्। नापि सामग्रीविशेषजन्यत्वनिबन्धनः, तस्यातीन्द्रियत्वेन प्रात्यक्षिकव्यवहारस्यापत्तेः। लिङ्गानु[प]लब्धे[म्भे?]नानुमानिकस्याप्यनुपपत्तेः। ज्ञानं लिङ्गमिति चेत्? तदपि ज्ञानमात्रम्, घटविषयं ज्ञानं वा? नाद्यो, व्यभिचारित्वात्। न द्वितीयः, साध्याविशेषापत्तेः। नापि व्यवहारविशेष एव तल्लिङ्गं, तद्विशेषस्यानिरुक्तेः। [40b] नापि सामग्रीविशेषोत्पन्नस्वभावभेदनिबन्धनः। तत्रापि स्वीयो भाव इति वा स्यात्, स्वश्चासौ भावश्चेति वा? नोत्तरोऽसाधारणत्वात्, नाद्यः, तत्रापि सामान्यं वा धर्मान्तरं वेत्युक्तयुक्तेरेव निराकरणात्। अथ ज्ञाततावादिभिरपि ज्ञातताविशेषजननार्थं विशेषोऽभ्युपेयः। सत्यम्, सामग्रीविशेषजन्यत्वमेव। तत्र च व्यवहारासंभवो दर्शितः। ननु सामग्रीविशेषजन्यत्वमपि न कार्यविशेषमन्तरेण। सत्यम्, ज्ञातताविशेषजननानुगुणशक्तिमत्त्वेऽस्याभ्युपगमात्। नापि तज्ज्ञानजनकत्वं चक्षुरादेरपि तज्ज्ञानविषयत्वापत्तेः। नापि तेन व्यपदिश्यमानत्वम्, चाक्षुषं ज्ञानमिति व्यपदिश्यमानस्य चक्षुर्विषयत्वापत्तेः। नापि तद्गोचरव्यवहारजनकत्वम्। व्यवहारो ज्ञानं वा शब्दादिर्वा? नाद्यः, तद्विषयस्यैव निरूपयितुमारब्धत्वात्। उत्तरत्र तु तद्विषयत्वम्, तद्विषयज्ञानजन्यत्वं वा? तत्र ज्ञानस्य तद्विषत्वव्यवस्थितौ स्यादिति। किं चानर्थित्वादिना तद्विषयशब्दादि-

व्यवहारमकुर्वतो ज्ञानस्यातद्विषयत्वापत्तिः। तत्रापि योग्यतास्तीति चेत्—न, सापि हि प्रतिज्ञानव्यावृत्ता, अनुवृत्ता वा? आद्ये सा[41a]धारणव्यवहाराभावापत्तिः। द्वितीये तु सामान्यमुपाधिर्वेत्यादिरुक्त एव दोषः। नापि तत्समवेतसंयोगादिजनकत्वमुपेक्षणीयाव्याप्तेः। तत्रापि योग्यतास्तीति चेत्? तस्याः पूर्ववदपास्तत्वात्। इतरकारकसंभवे सति तदुत्पादकत्वं योग्यतेति चेत्—न, सामग्र्यन्तर्विशेषोऽपि किं तस्य साधारणरूपेण साधारणेन वा? नाद्यः, तद्व्यतिरेकेणापि कार्यसंभवे कारणत्वानुपपत्तेः। नेतरः, तस्यानिरुक्तेः, किं च संयोगादेरनागतत्वेन ज्ञानविषयं सविषयवेदनं न स्यात्। न ह्यस्मदादिमनसो बाह्येऽर्थेऽनागते वा स्वातन्त्र्यमस्ति। न चास्योपनायकं किञ्चिदस्ति। न च तदनुमा पश्चात् तदीयताव्यवहार इति वाच्यम्, ज्ञानमात्रस्य तत्र व्यभिचारित्वात्, ज्ञानविशेषस्य च निर्वक्तुमशक्यत्वात्, लिङ्गान्तरस्य चानुपलब्धेः। एवं च तत्समवेतधर्मजनकत्वं तदीयत्वमित्यपि परास्तम्। किं चैवं सत्यभावादिज्ञानस्यातदीयत्वापत्तिः। घटादिज्ञानस्यात्मनि स्वसंस्कारजनकतया तदीयत्वापत्तिश्चेति।

अत्रोच्यते। तद्गतसंबन्धजनकत्वमेव तदीयत्वम्। उपेक्षणीयज्ञानमपि च तज्जनकमेव न जनयति सहकारिविरहात्। कारणत्वं चेतरकारकसंभवेऽप्यनुत्पद्य[41b]मानस्य तत्सन्निधावुत्पत्तिदर्शनादवसीयते। अनागतमपि च मनसा ज्ञायते, संबद्धविशेषणतया प्रत्यभिज्ञायां तत्त्वांशवत्। न च प्रकारान्तराभावात् तत्र तथेति वाच्यम्, अविशेषात्, न च ज्ञातता तत्र च तद्व्यवहारोत्पत्तिरिति वाच्यम्, अनुमित्यव्यापनात्, तथा ह्यनुमेयसंबन्धाज्ज्ञातता न स्वप्रकाशा अपसिद्धान्तात्, ज्ञानस्यैव स्वप्रकाशत्वापत्तेश्च। नापि प्रत्यक्षा, इन्द्रियाप्राप्तित्वात्। नाप्यनुमेया, लिङ्गासंभवात्। नापि शब्दगम्या, तदसंभवात्। नाप्यर्थापत्तिगम्या, अनुपपद्यमानार्थाभावात्। व्यवहार एव तथेति चेत्—न, सोऽपि व्यवहारमात्रं तद्विशेषो वा? नाद्यः, तस्य तद्विषयज्ञाततामन्तरेणापि संभवात्। नाप्युत्तरः, तस्य जात्यादिविशेषालिङ्गितत्वरूपस्य दूषितत्वात्, तद्विषयत्वरूपस्य च विषयत्वनिरुक्तावनुपपत्तेः। तथा हि व्यवहृतिर्व्यवहारो ज्ञानमिति वा स्यात्, व्यवह्रियतेऽनेनेति शब्दादिर्वा? आद्ये तद्विषयत्वं तदाश्रितज्ञाततामन्तरेणानिरूप्यमेव, द्वितीये तु तस्य तद्विषयत्वं, तद्विषयज्ञानजन्यत्वं वा, तद्विषयज्ञानजनकत्वं वा? तद्विषयसंबन्धजनकत्वं वा? नाद्यौ, आत्माश्रयापत्तेः। तृतीये तु सर्वं समानमिति। न च घटज्ञा[42a]नस्य घटे प्रवृत्तिं जनयतोऽन्तरालवर्त्युपेक्षणीयतृणादिसंबन्धजनकत्वेन तदीयत्वापत्तिः, तस्यातज्जन्यत्वात्, अन्यथातिप्रसङ्गात्। ईश्वरस्यैव च तत्र कर्तृत्वम्, अभावादावपि चाश्रयद्वारा संबन्ध ऊहनीय इति यत्किञ्चिदेतदिति। ननु तथापि विषयस्य किं लक्षणम्? केवलव्यतिरेक्यभिप्रायेण न किञ्चित्, विपक्षासंभवात्। स्वरूपसाधकप्रमाणाभिप्रायेण प्रमिताप्रमितविकल्पानुपपत्त्या प्रश्नानुपपत्तिः। घटज्ञानविषयस्य किं लक्षणमिति चेत्? घटत्वमिति गृहाण। तद्विशेषस्य तु तद्विशेष इति। अथ ज्ञानज्ञानमेवान्यथानुपपद्यमानं ज्ञाततां परिकल्पयति? ज्ञानस्वप्रकाशत्वं पूर्वमेव प्रतिक्षिप्तम्। मानसप्रत्यक्षत्वे तु जिज्ञासानिरपेक्षस्य मनसस्तद्ग्राहकत्वे ज्ञानज्ञानपरम्परापत्तावनवस्थाप्रसङ्गः। जिज्ञासापेक्षत्वे तु जिज्ञासायाः संशयपूर्वकत्वे संशयस्य च धर्मिज्ञानाधीनत्वे तत्रापि धर्मिज्ञाने जिज्ञासापेक्षायां चानवस्थापत्तेः। न च विषयजिज्ञासैव ज्ञानग्रहणनिबन्धनमिति वाच्यम्, तथा सत्यजिज्ञासितविषयज्ञानासंभवापत्तेरिति। तत्र निर्विकल्पकानपेक्षायां विशेषग्रहणमन्तरेण कथं विशिष्टज्ञानोत्पत्तिः? तदपेक्षायां तु सङ्के[42b]तस्मरणसमकालं विशेष्यज्ञाननाशात् तदिन्द्रियसन्निकर्षाभावात् कथं साक्षात्कारसंभव इति जिज्ञासानपेक्षस्यैव तीव्रसंवेगविषयाभीष्टविषयान्तरानुचिन्तनानिरिन्द्रियप्रदेशगमनाभावादिसहितस्य मनसो ज्ञानग्राहकतया नानवस्था। घटमहं जानामीत्यादौ तु शब्दासंभिन्नावभासतया न सङ्केतस्मरणापेक्षा। यत्र तु ज्ञानशब्दवाच्य इत्याद्युल्लेखी विकल्पः, तत्र ज्ञानानन्तरसंसर्गिज्ञानत्वविषयनिर्विकल्पकोऽस्मादिति विशेषणज्ञानसहकृतस्यैव मनसस्तथाभूतविकल्पजनकत्वात्। न च विषयान्तरसंसर्गिविशेषज्ञानस्य न विषयान्तरेण शब्दसंभिन्नविकल्पजनकत्वमिति वाच्यम्, ज्ञानत्वस्य सङ्केतस्मरणजनकस्य विकल्पविषयसाधारणत्वात्। यत्र तु विशेषणभेदः, तत्र नैव, यथा यज्ञदत्तसंबन्धिनि दण्डे गृहीते न देवदत्तविषयो दण्डीति विकल्प इति। यत्तु ज्ञानस्य क्षणिकतया मानसप्रत्यक्षतानुपपत्तिरित्यभिधानम्, तदसिद्धेन साधनम्। ननु यदि ज्ञानं न क्षणिकं किं तु क्षणान्तरेऽप्यनुवर्तते, तदा पूर्वक्षणस्योत्तरक्षणावस्थायां निवृत्तत्वात् तदेव ज्ञानं पूर्वक्षणावच्छेदेनैव प्रमाणमप्रमाणं चेति स्यात्। अनुवृत्तौ तु पूर्वक्षणतैव न स्यात्। [43a] न च तदानीं तस्यान्यो विषयः स्वरूपान्यत्वापत्तेः। तदपि न, अन्यथाभूतमर्थमालम्ब्योत्पादो हि ज्ञानस्यायथार्थता। अनारोपितमर्थमालम्ब्योत्पादश्च यथार्थता। न तु यावत् सत्त्वं ज्ञानस्य विषयीकृतानुवृत्तिः। न चोत्तरस्मिन् क्षणे पूर्वक्षणाभावोऽपि अतथाभूतमर्थमालम्ब्योत्पादो ज्ञानस्य। न चेदानीन्तनक्षणेन संबन्धमवगाहते तद्विज्ञानमिति। ज्ञातो घट इति प्रत्ययस्तु मनोजनितघटविषयत्वानुसन्धानसहायेन चक्षुषा ज्ञानविषयो घट इत्युल्लेखी जन्यते। अन्यथेष्टतादिकमपभ्युपेयम् इष्टो द्विष्टो घट इत्युल्लेखात्, संबन्धाभावस्याप्यविषयादिति। अथ घटं जानामीति कर्मत्वान्यथानुपपत्त्या क्रियाजनितफलसमवायित्वसिद्धिः। तदपि न, तथा हि, कर्मत्वं यदि क्रियाजनितफलसमवायित्वं तदा साध्याविशिष्टता। अथ करणव्यापारविषयत्वं तदा घटं विनाशयतीत्यनेन व्यभिचारः। अथ क्रियाविषयित्वं, तदपि यदि क्रियाजनितफलसमवायित्वं, तदा दूषितमेव। अथ क्रियाविषयत्वं, तदपि

यदि क्रियासमवायित्वं तदा प्रकृतेऽसिद्धिः । अथ क्रियास्वभावप्रत्यासत्तिस्तदा घटं विनाशयतीत्यनेनैव व्यभिचार इति । यत्तु घटादिज्ञानं स्व[43b]विषयसमवेतफलजनकम्, प्रमाणत्वात् । घटापेक्षाबुद्धिवदिति । तत्र ज्ञानासिद्धावाश्रयासिद्धिः, तत्सिद्धिस्तु न मानसप्रत्यक्षं विनेति । व्यवहारादेर्ज्ञानसामग्रीत एवोपपत्तेः । अथ मतम् स्मृतौ न संस्कारात् तज्जन्यव्यवहारः संभवति । तदुक्तम्,

न च तज्जन्यसंस्काराद् व्यवहारो भविष्यति ।
स स्वहेतुमकुर्वाणो न स्वहेतोः फलं लभेत् ॥

ज्ञानासिद्धौ संस्कारस्यापि भावनायामसिद्धेः । यद् वा विशिष्टात्ममनोयोगजनकत्वादेव संस्कारत्वमस्तु । न च सकलस्वजनकत्वं संस्कारत्वं तथा सति संस्कारत्वाभावापत्तेः । अथ मानसप्रत्यक्षसिद्धं ज्ञानमुपादायास्यावतारस्तदा उपक्रान्तहानिरिति । किं चात्मसंयोगादिकमादाय सिद्धसाधनम् । साक्षादिति विशेषणाददोष इति चेत्—न, तथापि स्वशब्देन यदि विषयमात्रमभिमतम्, तदात्मनिष्ठसंस्कारजननात् सिद्धसाधनं पौनरुक्त्यं च । अथ घटज्ञानादीनां योऽसाधारणो विषयः । तत्रापि सर्वः, प्रत्येकं वा ? आद्ये बाधो दृष्टान्ते साध्यवैकल्यं च । द्वितीये तु घटज्ञानेन व्यभिचारः । अथ घटज्ञानत्वादिति हेतुः, तथाप्यतीतघटज्ञानेन, अथ वर्तमानघटज्ञानत्वादिति तथापि विरोधः । वर्तमानपदेनातीतज्ञातता ऽभावाक्षेपादिति । ननु तथापि [44a] ज्ञानं प्रत्यक्षमित्यत्र किं प्रमाणम् ? ननु प्रत्यक्षशब्देन तदत्यन्तसाजात्यमपेक्षितम्, लौकिकप्रत्यक्षव्यवहारनिबन्धनधर्मालिङ्गितत्वमेव वा ? आद्ये ज्ञानं प्रत्यक्षं, आशुविनाश्यात्मविशेषगुणत्वात्, सुखवदिति । न चोत्पत्त्यन्तरोत्पन्नविशिष्टेष्टदेवताचिन्तनविनश्याधर्मेण व्यभिचारः । तज्जातीयमात्रापेक्षया हीश्वरज्ञानाभ्युपगमादसिद्धिरिति वाच्यम् । यज्जातीयं विनश्यदाश्वेव विनश्यति, तस्य तथाभिधानात् । द्वितीये तु प्रतिबन्धाभावविशेषितमेतदेव तथा च सुषुप्त्यव्यवहितपूर्वज्ञानेन व्यभिचार इति । तदेवं सम्यगपरोक्षज्ञानं प्रत्यक्षप्रमा । तत् करणं च प्रत्यक्षं प्रमाणमित्युपदर्शितमिति ॥

तदेवं प्रत्यक्षं व्याख्याय तत्पूर्वकतयानुमानं व्याख्येयम् । ननु तदसिद्धिः । तथा ह्यर्थान्तरमर्थान्तरस्य गमकं संबन्धव्यतिरेकेण, संबद्धतया वा ? नाद्योऽतिप्रसङ्गात् । तदुक्तम्,

सन्निधानात् तथैकस्य कथमन्यस्य सन्निधिः ।
गोमानित्येव मर्त्येन भाव्यमश्ववतापि किम् ॥
[ प्र० वा० ३-२४ ]

इति । द्वितीयेऽपि संबन्धमात्रं व्याप्तिर्वा ? नाद्योऽतिप्रसङ्गात् । द्वितीयेऽपि का व्याप्तिः किं कार्यत्वम्, अथ तदात्म्यम्, यद्वोभयम्, आहोऽनौपाधिकत्वम्, उतानौपाधिकसंबन्धत्वम्, आहोस्वित् कार्यसंबन्धत्वम्, उता[44b]र्थभेद एव वा, अन्यथा वेति ?



नाद्यः, शिंशपात्वस्य वृक्षत्वाव्याप्तत्वापत्तेः । व्याप्तिनिरूपणमन्तरेण कार्यत्वस्य निरूपयितुमशक्यत्वात् । समानकालभाविवह्न्यनुमाने धूमादर्थक्रियार्थिनो निश्चयेनाप्रवृत्त्यापत्तेश्च । नापि द्वितीयः, कार्याव्याप्तेः । नापि तृतीयः, उभयाव्याप्तेः । नापि चतुर्थः, तथा सति सोपाधित्वस्य सव्यभिचारत्वापत्तेः, विरुद्धस्य व्याप्यत्वापत्तेश्च साध्यसमव्याप्तिकेन साधनसंबन्धाभावेन साधनेनैकदेशवृत्तित्वाभावेनानौपाधिकत्वात् । साध्यव्यापकत्वमात्रमपेक्षितमिति चेत् न, तथा सत्यदूषणत्वापत्तेः । परव्याप्तिरत्र सन्निधानवशात् परिस्फुरतीति हि तस्य दूषणत्वम् । न चैवं सावयवत्वस्य कृतव[क ?]त्वे उपाधित्वापत्तिः । तद्व्यतिरेकेणापि तस्य साध्यसंबन्धोपलब्धेः । तेन क्रोडीकृतं साध्यं तद्व्यतिरेकेण व्यावृत्तमिति साधनदूषकत्वं तस्येति चेत् न, तथा सति सव्यभिचारे बाधिते वा अप्रयोजकान्तर्भावापत्तेः । न चैवं भूतमपि कृतकत्वे किञ्चित् संभवति । साधनाव्यापकत्वमात्राभिधानाददोष इति चेत्—न, तथाप्यदूषणापत्तेः । यस्य हि सन्निधानवशादन्यन्नावभासते स उपाधिरिति । नापि पञ्चमः, तथा सति विरुद्धस्य संबन्धाभावा[45a]द् व्याप्यत्वासिद्धेऽन्तर्भावापत्तेः । कश्चायमुपाधिः ? साध्यसमव्याप्तिकत्वे सति साधनाव्यापक इति चेत् ? नन्वेवं व्याप्त्यैव तन्निरुक्तिः । नापि षष्ठः, कात्स्नं[त्स्न्ये]? हि तद्व्यतिरेकेणासंभवो वा, तस्मिन् सत्येव संभवो वा, तद्व्यतिरेकसंभवे प्रसङ्गवत्त्वं वा, व्याप्तिरेव वा ? नाद्यः, केवलान्वयिनोऽव्यापकत्वापत्तेः । न द्वितीयः, केवलव्यतिरेकिणोऽतथात्वापत्तेः, एवकारार्थनिरुक्तौ चोक्तदोषत्वात् । नापि तृतीयः, व्याप्तिनिरूपणमन्तरेण तदनिरुक्तेः । चतुर्थे तु तेनैव तन्निरुक्तिरिति । नापि सप्तमः, तस्योभयवादिसिद्धपदार्थान्तर्भावेऽव्याप्त्यतिव्याप्तिप्रतिघातात् । पदार्थान्तरत्वे तु पदार्थनियमाभ्युपगमविरोधात् । तस्य चोभयवृत्तित्वे वह्नेरपि धूमाव्यभिचारापत्तेः । व्याप्यमात्रवृत्तित्वे च संबन्धत्वविरोधात् । तस्यैव चाव्याप्यत्वापत्तेः । अत्रापि संबन्धान्तरमस्तीति चेत् न । तथापि व्याप्तेरनिरुक्तेः, जातिभेदोपसंग्रहाददोष इति चेत् –न, तथा सत्यभेदेनाधाराधेयभावानुपपत्तेः तस्यैवाव्याप्यत्वापत्तेः । अन्यथा तु यदि जातिः, तदा परापरभावानुपपत्तेर्जात्यादेरव्याप्त्या वारणीयः । अथ स्वरूपम्, तदा धर्माभिप्रायेण निराकृतमेव । धर्म्यभिप्रायेणापि सामा [45b] न्येनातिप्रसञ्जकम् । असाधारणाभिप्रायेण त्वव्यापकम् । प्रकारान्तरं त्वसंभावितमेवेति । केन चेयं व्याप्तिर्गृह्यते ? किं प्रत्यक्षेण अथानुमानेन ? आद्येऽपि किं मनसा बहिरिन्द्रियेण वा ? प्रथमेऽपि किं तन्मात्रेण भूयोदर्शनादिसहायेन वा ? नाद्यः, मनसो बहिरस्वातन्त्र्यात् । न द्वितीयः, असाधारणनिमित्तसापेक्षतया अनुमानवत् प्रमाणान्तरत्वापत्तेः । योगिप्रत्यक्षवन्न तत्त्वमिति चेत्—न, ज्ञानापेक्षतया नियमे अदृष्टापेक्षेण व्यभिचारायोगात् । द्वितीयेऽपि सामान्ययोर्वा व्याप्तिः, व्यक्तीनां वा ? नाद्यः, यत्र तत्रेति तदा तदेति यत्तदिति वा तत्र व्याप्तेर्ग्रहीतुमशक्यत्वात् । संयुक्तसमवायेन यत्र धूमस्तत्र

धूमत्वं तत्र वह्नित्वमिति तत्प्रत्यय इति चेत्—न, तथा सति व्यक्त्यन्तर्भावे सर्वासामिन्द्रियासन्निकर्षादनाकलनात्। विशेषान्तर्भावे तु तद्व्यतिरिक्तासिद्धिप्रसङ्गात्। सामान्यव्याप्तौ कथं व्याप्तिसिद्धिः। आक्षेपादिति चेत्—न, आक्षेपो ह्यर्थापत्तिः, पक्षधर्मता वा ? नाद्यः, अनुमानाप्रामाण्यापत्तेः। कस्य चानुपपत्तिः ? सामान्यमात्रस्य देशविशेषवर्तिनो वा ? नाद्यः, तथा देशविशेषवर्तिविशेषानाक्षेपकत्वात्। न द्वितीयः, व्यक्तिमनन्तर्भाव्य तद [46a] प्रतीतेः कथं वा सामान्यस्य व्यक्तिं विनानुपपत्तिः ? तामन्तरेण तदनुपलम्भादिति चेत्—न, तत्रापि व्यक्तिमात्रतद्विशेषानुपपत्तेस्तदवस्थत्वात्, न द्वितीयः, पक्षधर्मतायाः प्रतीत्यपर्यवसानरूपायाः सामान्यव्याप्त्यापेक्षित्वात्। अन्यथा अतिप्रसङ्गात्। द्वितीयेऽपि केवलेन वेन्द्रियेण, अन्वयज्ञानसहायेन वा, व्यतिरेकावसायसहचारिणा वा, उभयप्रत्ययसहकारिणा वा, कार्योपलब्धिसध्रीचीनेन वा, तादात्म्योपलम्भोपष्टब्धेन वा, उभयसहकारिणा भूयोदर्शनसहितेन वा, अनौपाधिकत्वावधारणपुरस्कृतेन वा, विपक्षबाधकाप्यायितेन वा, व्यभिचारादर्शनविशिष्टेन वा, अन्यथा वा ? नाद्योऽतिप्रसङ्गात्। यन्नास्ति तत्र गृह्यत इति चेत्—न, तथापि तत्र सन्देहानुदयापत्तेः। तत्प्रत्ययस्य व्यभिचारदर्शनात् तथेति चेत्—न, तथा सत्यनुमानाङ्गतत्प्रत्ययनिदानानिरुक्तावर्थान्तरत्वात्। न चानौपाधिकसंबन्धं व्याप्तिमङ्गीकुर्वतस्तथा संभवत्यपि। दृश्यादृश्योपाधिव्युदासस्य प्रथममाकलयितुमशक्यत्वात्। नापि द्वितीयः, केवलव्यतिरेकिणोऽव्याप्यत्वापत्तेः। नापि तृतीयः, केवलान्वयिनोऽतथात्वापत्तेः। अतएव न चतुर्थः, [46b] किं चान्वयव्यतिरेकशब्दाभ्यां किं यथाकथञ्चित् तावपेक्षितौ नियमविशेषितौ वा ? नाद्यो व्यभिचारात्। न द्वितीयः, अन्यतरवैयर्थ्यात्। न च व्याप्त्यनवगमे तदाकलनं संभवति। नापि पञ्चमः। तस्यापि व्याप्त्यनवभासेऽप्रतीतेः। नापि षष्ठोऽतिव्याप्तेः। निराकृतश्च कार्यकारणभावात् तादात्म्याच्च व्याप्त्युपलम्भो विस्तरतः। नापि सप्तमोऽसंभवात्। नाप्यष्टमः, बाहुल्यार्थानिरुक्तेः। नापि नवमः, तदसिद्धेः। तथा हि नानुपलम्भमात्रात् तत्सिद्धिरतिप्रसङ्गात्। योग्यानुपलम्भात् तत्तत्साधनेऽसिद्धिः। न ह्युपाधेर्दृश्यतानियमः। न च व्याप्त्यनवसाये उपाधेरप्याकलनं संभवतीति। नापि दशमः, बाधकं ह्यनुमानं प्रत्यक्षं प्रसङ्गो वा, नाद्यः, व्याप्त्यसिद्धौ तस्याप्यप्रवृत्तेः। तत्राप्यनुमानान्तरापेक्षायामनवस्थाप्रसङ्गात्। तत एव तत्सिद्धौ तु व्याप्त्यनपेक्षायामतिप्रसङ्गात्। अतएव न तदपेक्षयामपि तज्ज्ञानापेक्षा। तज्ज्ञानापेक्षायां तु कथं नात्माश्रयत्वम्। न द्वितीयः, तस्य देशकालान्तरितव्यभिचारचमत्कारनिराकरणासामर्थ्यात्। सामर्थ्ये वा तद[त]एव साध्यसिद्धावनुमानवैयर्थ्यात्। नापि तृतीयः, तस्यापि व्याप्त्यनपेक्षायां शिथिलमूलत्वापत्तेः। तदपेक्षायां तु तस्यैवापेक्षायां नि [47a] राकृतत्वात्। तर्कान्तरापेक्षायां त्वनवस्थापत्तेः। तर्कमूलभूतव्याप्तौ



व्याघातान्न शङ्केति चेत्—न, व्याघातो हि निश्चयोत्पादको न वा, उत्तरस्मिन् कथं शङ्काविनिवृत्तिः, तस्याविशेषदर्शननिवर्तव्यत्वात्। प्रथमे तु व्याघातः प्रमाणमप्रमाणं वा ? उत्तरस्मिन् कथं तर्कप्रवृत्तिः, शिथिलमूलत्वात् ? आद्येऽपि तत्प्रत्यक्षमनुमानं वा ? आद्ये तत्रासामर्थ्यं प्रतिपादितमेव। द्वितीये तु कथं नानवस्था ? नाप्येकादशः, अदर्शनं हि दर्शनाभावमात्रं वा, तत्संसर्गाभावो वा ? नाद्यः, व्यभिचारिसाधारणत्वात्। द्वितीयेऽपि न प्रागभावप्रध्वंसौ व्यभिचारात्। नाप्यत्यन्ताभावः, तदसिद्धेः। न ह्युत्तरकालसंबन्धे तस्य प्रमाणमस्तीति। तदुक्तम्,

देशादिभेदा दृश्यन्ते भिन्ना भावेषु शक्तयः।
तत्रान्यदृष्ट्या नान्यस्य युक्तस्तद्भावनिश्चयः॥

[ प्र० वा० ३-२० ]

इति। प्रकारान्तरन्त्वत्रासंभावितमेवेति। किं च व्याप्तिसिद्धावपि कथं विशेषसिद्धिः तस्य व्याप्त्यनन्तर्भावेऽतिप्रसङ्गादसिद्धेः। अन्तर्भावेऽप्यप्रतीतायास्तस्याकरणत्वे पूर्वं विशेषावसायेऽनुमानवैयर्थ्यात्। अप्रतीतत्वे तु कथं तत्रानुमितिः ? पक्षधर्मतातस्तत्सिद्धिरिति चेत्—न, पक्षधर्मता हि साधनस्य पक्षसंबन्धो वा, प्रतीत[47b]साध्यानुपपत्तिर्वा, तत्प्रतीत्यपर्यवसानं वा ? नाद्यः, तस्य व्याप्त्यनपेक्षत्वेऽतिप्रसङ्गात्। तदपेक्षित्वे तूक्तदोषत्वात्। नापि द्वितीयः, अनुमितानुमानवैयर्थ्यात्। बाह्येतितिक्षायाश्चानुपपत्तेरसंभवात्। तस्याश्च पूर्वमेवापाकरणात्। नापि तृतीयः, अपर्यवसानं ह्यनुपपत्तिरनुत्पादो वा ? नाद्यो निराकृतत्वात्। न द्वितीयः, व्याप्तिमन्तरेण तद्व्यतिरेकेणानुत्पादेऽतिप्रसङ्गात्। तदपेक्षायाश्च निराकृतत्वात्। तदुक्तम्,

विशेषेऽनुगमाभावः सामान्ये सिद्धसाध्यता।
अनुमाभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः॥

इत्याशङ्क्याह,

**अस्येदं कार्यं करणं संयोगि विरोधि समवाय्येकार्थसमवायि चेति लैङ्गिकम्॥ ९।१४॥**

लैङ्गिकमिति लिङ्गकरणकं ज्ञानम्। अस्य च सिद्धवन्निर्देशान्नात्र विप्रतिपत्तिरस्तीत्युपदर्शितम्। तथा हि यदेतदुक्तम्, तेन यद्यनुमानं न प्रमाणं तन्मूलभूतव्याप्त्यभावादिति मतं यदि तदैतत्प्रमाणमप्रमाणं वा ? उत्तरस्मिन् दूषणत्वानुपपत्तिः, अतिप्रसङ्गो वा ? तथा च जयपराजयव्यवस्थानुपपत्तिः। प्रथमे तु नास्य प्रत्यक्षेऽन्तर्भाव इति कथं न विरोधः किं चैतद्वि[48a]प्रतिपन्नं प्रति पुरुषमात्रं प्रति वा ? आद्येऽपि तद्रूपमवगतमनवगतं वा। आद्येऽपि तदवगतिर्नानुमानमन्तरेणेति कथं न विरोधः। शरीरधर्मत्वाच्चैतन्यस्य नानुपपत्तिरिति चेत्—न, तथा सति शरीरदर्शने-

पूर्वविशेषज्ञानसन्देहानुदयापत्तेः । द्वितीये तु कथं नातिप्रसङ्गः ? अनुमानशब्देन चानुमितिरभिमतं तत्करणं वा ? प्रथमेऽपि ज्ञानमात्रं तदभिमतं प्रत्यक्षविलक्षणज्ञानं वा, एतदेव यथार्थत्वविशेषितं वा, इदमेवानुभूतित्वावच्छिन्नं वा, व्याप्तिपक्षधर्मताप्रमितिजन्यज्ञानत्वं वा ? अन्यथा [वा ?] नाद्यः, बाधात् सिद्धसाधनत्वाच्च । न द्वितीयतृतीयौ, सिद्धसाधनात् । न चतुर्थः, तस्याप्रमितत्वे आश्रयासिद्धतापत्तेः । प्रमितत्वे तु यदि प्रमाकरणत्वनिषेधः साध्यः, तदा सिद्धसाधनम् । अथ प्रमाणत्वनिषेधः तदा विरोध इति । एवं च पञ्चमोऽप्यपास्तः, प्रकारान्तरत्वं [अ ?]संभावितमेव । एवं च द्वितीयमप्यपास्तम् । एतदेवाह,

> प्रमाणान्तरसामान्यस्थितेरन्यधियो गतेः ।
> प्रमाणान्तरसद्भावः प्रतिषेधा[च्च] कस्यचित् ॥

इति । सुहृद्भावेन तथापि पृच्छाम इति चेत्—न, सुहृद्भावो हि विप्रतिपत्तिविरहो वा स्यात्, परसिद्धान्ताभ्युपगमो वा, विजिगीषाविरहो वा ? नाद्यौ, तथा सति क[48b]थाप्रवृत्त्यसंभवापत्तेः । न तृतीयः, तथापि विरोधाद्यनुद्धारात् । तस्माद् विशेषे विप्रतिपत्तिः । तत्र च व्याप्तिः कात्स्न्र्यसंबन्धः । कात्स्न्र्यार्थश्चायोगव्यवच्छेदः । अनौपाधिकत्वावधारणसध्रीचीनेनेन्द्रियेण च तदुपलम्भः । उपाधिश्च साध्येनानुपलब्धव्यभिचारः साधनानुपलब्धव्यभिचाराभावश्च उपाधिः । एवं च न स्वव्यावृत्त्या साध्यव्यावृत्तिमनन्तर्भाव्यास्य दूषणत्वम् । किं तु सन्निधानात् स्वधर्मस्य साधनोपलम्भद्वारेणेति । ते च योग्या, अयोग्या वा ? तत्राद्यस्य योग्यानुपलम्भादेवासंभवः । द्वितीयेऽपि किं व्यापका अव्यापका वा ? आद्ये उपाधिलक्षणविरहादेव नोपाधयः । द्वितीयेऽपि प्रमाणसिद्धास्तद्विपरीता वा ? उत्तरस्मिन्न तत्र शङ्कापीत्यकिञ्चित्करत्वमेव । प्रथमे तु साध्यसाधनसंबन्धिनोऽसंबन्धिनो वा ? प्रथमेऽपि तदव्यापका एतद्विपरीता वा ? द्वितीयेऽप्युभयव्यापका अन्यतरव्यापका वा ? द्वितीयेऽपि साधनव्यापकाः साध्यव्यापका वा ? द्वितीयेऽपि साध्यस्य व्यापका इति वा, साध्यं व्यापकं येषामिति वा ? उभयमप्येतदिति वा ? तत्रास्त्यस्य तथाभावानुपलम्भादेवासंभवः । अन्येषां तूपाधिविलक्षणाभावादेवेति । ननु तथापि व्यभिचाराशङ्का कथं प्रतिक्षेप्तव्या ? उच्यते, व्यभिचारशङ्का हि किं साध्याभाव[49a]सन्देहवति वृत्तिः । यद् वा निश्चितसाध्याभाववति वृत्तिसन्देहः । नाद्यः, तस्यादूषणत्वात् । अन्यथानुमानमात्रोच्छेदात् । तथा च दूषणस्याप्यनुपपत्तेः । नापि द्वितीयः, तस्य योग्यानुपलम्भप्रतिक्षिप्तत्वात् । किं चेयं व्यभिचारशङ्का प्रत्यक्षसिद्धे, स्मर्यमाणेऽन्यस्मिन् वा ? नाद्यः, तेनैव तन्निराकरणात् । द्वितीयेऽपि प्राक्कालापेक्षया इदानीं वा ? नाद्यः, पूर्वप्रत्यक्षप्रतिक्षिप्तत्वात् । नोत्तरः, इदानीं तद्धर्मिसत्त्वे प्रमाणाभावात् । नापि द्वितीयः, अनुमानाप्रामाण्ये तदसिद्धेः । तथा च कथं शङ्का ? शब्दात् तत्सिद्धिरिति चेत्—न, तस्यापि सङ्केतानुपपत्त्या



असिद्धेः । तत्तुल्यन्यायेन चानुमानस्याप्युपपत्तेः । व्यभिचारशङ्का च क्वचिदव्यभिचारसिद्धावसिद्धौ वा ? नोत्तरः । तथा सत्युभयकोटिस्मरणासंभवेन संशयस्याप्यनुपपत्तेः । नाद्यः, तथा सति तत्तुल्यन्यायतया प्रकृतेऽपि तथाभावादिति । पक्षधर्मता च सामान्यान्तर्भूतविशेषान्वयसंबन्धमन्तरेण साध्यसामान्यपक्षान्वयप्रतीत्यविषयत्वम् । तथा च विशेषाकारेण तस्य व्याप्तिप्रतीत्यनन्तर्भावेऽपि न दोषः । अन्यथा तु दूषणस्याप्यन्यथानापत्तिरिति । विस्तरश्चात्र न्यायवृत्ता[49b]वध्यवसेय इति । अत्र सूत्रे अस्येदं लैङ्गिकमिति संबन्धः । तथा च व्याप्तिपक्षधर्मताशालितया प्रतीयमानं लिङ्गमित्युक्तम् । तस्य निदर्शनार्थं कार्यादिग्रहणम् । न त्ववधारणार्थम् । विरुद्धधर्मेणान्योऽन्याभावानुमानाद्यव्याप्तेरिति ।

एतच्चानुमानं त्रिधा । केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि च । तत्राविद्यमानविपक्षं लिङ्गं केवलान्वयि । तद्यथा, विशेषोऽभिधेयः, ज्ञेयत्वात् सामान्यवदिति । नन्वत्र विपक्षः संभावयितुमपि शक्यते, अनभिधाने तथात्वानुपपत्तेः । अभिधाने तु सपक्षत्वम् । ननु चाविनाभावो व्याप्तिरिति पर्यायशब्दौ । अविनाभावशब्दश्च तद्व्यतिरेकेणाभावमाह । न च कात्स्न्र्यशब्दाभिधायितया तैलपायिकादिवदस्योपपत्तिः, बाधकासंभवात् । न चात्र साध्यायोगः समधिगतः इति कथं तद्व्यवच्छेदोऽपि । मैवम्, अयोगस्यान्यत्रावगतस्य साधने साध्यस्य निषेध्यत्वात् । तथा चेतरतुल्यतयात्र तत्सिद्धौ तैलपायिकादिवदविनाभावपदप्रवृत्तिरिति । केवलव्यतिरेकि त्वविद्यमानसपक्षं लिङ्गम् । यथा जीवच्छरीरं सात्मकम् प्राणवत्त्वात् यन्निरात्मकं न तत्प्राणवद् यथा घट इत्यादि । ननु चास्य साध्यं क्वचिदन्यत्र प्रमितमप्रमितं वा? आद्ये तत्र हेतोरन्वयेऽन्वयित्वापत्तिः । अ [50a] नन्वये त्वसाधारण्यम् । द्वितीये त्वपक्षधर्मत्वम् । सन्दिग्धसाध्यधर्मिणस्तथात्वात् । सन्देहस्य चानुभवाधीनस्मरणनिबन्धनत्वात् । किं चात्रात्मशब्देन यद्युभयवादिसिद्धस्य कस्यचिदभिधानम् तदा सिद्धसाधनादिप्रसङ्गः । अथातिरिक्तस्य, तदभावः किं प्रत्यक्षेण गृह्यते, अथानुमानेन ? आद्येऽपि किमनुपलम्भमात्रसहकारिणा, योग्यानुपलम्भसहकारिणा वा ? नाद्योऽतिप्रसङ्गात् । नोत्तरोऽसिद्धेः । द्वितीयेऽप्यन्वयिना केवलव्यतिरेकिणा वा ? नाद्यः, अनवस्थाप्रतिहतत्वात् । न द्वितीयः, परस्पराश्रयप्रसङ्गात्, किं चैवमत एव शशविषाणवत्त्वमपि कुतो न सिध्येत ? स्यान्मतम्, शशविषाणशब्देन शशस्य विषाणमिति वाभिमतम्, व्युत्पत्त्यनपेक्षं तत्त्वान्तरमेव वा ? आद्येऽपि यथालोकप्रसिद्धि वस्त्वभिमतं, रूपादिमत्पदार्थमात्रं वा । आद्ये बाधः, द्वितीये तु सिद्धसाधनम् । नापि द्वितीयः, निरर्थकत्वापत्तेरिति । तदपि न, सात्मकत्वेऽप्यन्यविचारस्य समानत्वात् । यदप्युक्तम् इच्छादेर्गुणत्वेन तदधिकरणं तावदधिगतम्, तच्चोक्तन्यायेन पृथिव्याद्यना-

त्मकमधिगतम्, पृथिव्याद्यतिरिक्तं च द्रव्यमात्मपदाभिलप्यम्। तदेवमात्मा सिद्धः। तथा च जीवच्छरीरगोचरेण तत्संदे[50b]हानुदयः। नापि प्रतियोग्यप्रमितावभावप्रतीत्यनुपपत्तेः। घटे च तदभावस्योभयवादिसिद्धत्वान्न तत्र प्रमाणानुसरणमनवस्थाप्रसङ्गात्। तदपि न, जीवच्छरीरे हि किमात्मैव साध्यः, तत्संबन्धो वा। नाद्यः, सप्तम्यर्थानुपपत्तेः। न चात्ममात्रे साध्ये केवलव्यतिरेकिप्रयोजनमप्यस्ति। प्रमाणसंप्लवोपगमान्न क्षतिरिति चेत्– न, केवलव्यतिरेक्युपन्यासेऽप्यप्रसिद्धविशेषणत्वपरिहारार्थं तदुपन्यासे तेषामेव पुरःस्फूर्तिकतयोपन्यासयोग्यत्वात्। अन्यथा दूषणोऽपि तथात्वनियमानुपपत्तेः। नापि द्वितीयः, तत्रापि हि संबन्धमात्रमिच्छादिजननानुगुणः संबन्धो वा। आद्ये घटादीनां विपक्षत्वेऽपसिद्धान्तः। द्वितीयेऽपि तत् किं क्वचित् प्रमितमप्रमितं वा। आद्येऽपि पक्षे, अन्यत्र वा ? नाद्यः, पक्षत्वक्षयापत्तेः, नोत्तरः, तथा सति केवलव्यतिरेकित्वानुपपत्तेः। न द्वितीयः, अप्रसिद्धविशेषणत्वापत्तेः। एवं च विपक्षस्योभयवादिसिद्धत्वमप्यपास्तम्। प्रमित्यतिरिक्तायाः सिद्धेरभावात्। प्रकृते च प्रतियोग्यप्रमितौ तदसंभवादिति। एवं च यदुक्तम्, घटे नैरात्म्यमुभयवादिसिद्धम्। यच्चैकत्र विद्यमानम्, तस्यान्यत्र सत्त्व[51a]मसत्त्वं चोपलब्धमिति जीवच्छरीरे तत्सन्देह इति। तदप्यपास्तम्। यच्चोक्तम्, यद्विपर्ययेऽनिष्टप्रसङ्गस्तत्प्रमाणप्रवृत्तियोग्यम्। प्रकृते तु सात्मकत्वविपर्यये जीवच्छरीरस्य घटस्य च प्राणवत्त्वाप्राणवत्त्वरूपं वैचित्र्यं न स्यादिति सात्मकत्वस्य प्रामाणिकत्वसिद्धेर्न सन्देहाद्यनुपपत्तिः। न चैवं व्यतिरेकिवैयर्थ्यम्। प्रमाणविशेषजिज्ञासायां तदुपन्यासादिति। तदप्यसत्, सात्मकत्वाप्रमितौ तद्विपर्यय इत्येवासिद्धेः। एवं च यदुक्तम्, इच्छादिकमष्टद्रव्यातिरिक्ताश्रितम्, अष्टद्रव्याश्रितत्वे बाधकोपपत्तौ गुणत्वादिति, तदप्यपास्तम्।

स्यान्मतम्। इच्छादीनां द्रव्याश्रितत्वं तावत् सामान्यतोदृष्टादधिगतम्। एवं च तद्विशिष्टानामिच्छादीनामष्टद्रव्यातिरिक्ताश्रितत्वं रूपत्वादावधिगतं साध्यते, तथा चाकाङ्क्षादिबलेनाष्टद्रव्यातिरिक्तद्रव्याश्रितत्वप्रतीतिरिच्छादीनाम्। प्रतिज्ञाधिगतधर्मिविशेषणस्यान्यत्रादृष्टेश्च नान्वयित्वमिति। तदपि न, एवं सति ह्ययं पर्वतो वह्निमानित्यत्रापि कालविशेषविशिष्टवह्निमत्त्वपरिस्फुरणे केवलव्यतिरेकित्वापत्तेः। तथा च धूमवत्त्वस्य विरुद्धत्वापत्तिः। न चेदानीमिति विशेषणाददोषः। तथा सत्यन्वयिनोऽप्रवर्त[51b]कत्वप्रसङ्गेनापसिद्धान्तापत्तेरिति। एवं च यदुक्तम्, सामान्यतो दृष्टेनेच्छादीनां द्रव्याश्रितत्वे सिद्धे अष्टद्रव्याश्रितत्वे च बाधकेऽष्टद्रव्यातिरिक्तद्रव्याश्रितत्वं संभावितमिति। तदपि न, संभावना हि संशयो वा स्यात्, तर्को वा ? नाद्यः, तस्याप्रमितविषयेऽनुपपत्तेः। द्वितीये तु यद्यतिरिक्तद्रव्याश्रितत्वं न स्यात् तदा द्रव्याश्रितत्वमेव न स्यादित्याकारो वा स्यात्, यद्यतिरिक्तद्रव्याश्रितत्वं न स्यात्



तदा द्रव्याश्रितत्वसिद्धेरष्टद्रव्यानाश्रितत्वमेव न स्यादित्याकारो वा, अन्यथा वा ? नाद्यौ, अतिरिक्तद्रव्याश्रितत्वाप्रतिभाने तदसंभवात्। प्रकारान्तरं त्वत्रासंभावितमेवेति। एवं च केवलव्यतिरेकि न साधनाङ्गम्, अन्वयरहितत्वात्, विरुद्धवदिति सिद्धम्।

अत्रोच्यते, सामान्यतोदृष्टेनाष्टद्रव्यात्मकत्वबाधकसहकारिणामिच्छादीनामधिकरणमष्टद्रव्यातिरिक्तं सिद्धम्। तस्य चेच्छादिकार्यत्वेन तज्जननानुगुणो निमित्तकारणसंबन्धः सामान्यतः सिद्धः। तथा च जीवच्छरीरे तत्साध्यतायां न काचिदनुपपत्तिः। यद् यद्व्यापकरहितं तत् तद्व्याप्यरहितम् यथानग्निः प्रदेशो धूमरहितः। नैरात्म्यव्यापकरहितं च जीवच्छरीरमित्यन्वयादेव तत्सिद्धेरिति चेत्—न, अत्र हि य[52a]त्तच्छब्दाभ्यां धूमदहनयोरभिधानम्, नैरात्म्यतद्व्यापकयोर्वा ? प्रथमेऽपि निरग्नित्वस्य साधनत्वमभ्युपेत्य, नैरात्म्यव्यापकरहितत्वस्य वा ? आद्ये उपनयेन विरोधः। विरुद्धश्च हेत्वाभासः। द्वितीये त्वपार्थकत्वापत्तिः साधनव्याप्तेस्तत्रापेक्षितत्वात्। न द्वितीयः, तथा सत्यन्वयित्वानुपपत्तेः। परिशेषात् तत्सिद्धिरिति चेत्—न, तस्य केवलव्यतिरेक्यतिरिक्तस्यानिरुक्तेरिति। यस्तु विपक्षे साध्याभावप्रमितौ प्रमाणाभाव उपन्यस्तः, स विप्रतिपत्त्यसंभवादेवासङ्गतः वर्तमानकालविशेषावच्छिन्नस्य धर्मत्वाच्च न प्रसिद्धानुमाने केवलव्यतिरेकिता। न केवलव्यतिरेकिवैयर्थ्यं दोषः। प्रमाणानां प्रयोजनाधीनप्रवृत्तित्वानभ्युपगमात्। अन्यथा अनपेक्षितवेदनानुपपत्तेः। न च पुरस्फूर्तिकतया तेषामेवोपन्यास इति वाच्यम्। एकसाधनाकांक्षायास्तैरनिवारणात्। साधनमात्राकांक्षायामपि तदुपन्यासे दोषाभावात्। पौनरुक्त्यमिति चेत्- न, हेतुविशेषणसिद्ध्यर्थं तदभिधानात्। न चैवं दूषणप्रतिबन्दीसम्भवः। पुरस्फूर्तिकपरित्यागे पर्यनुयोज्योपेक्षणस्यैव तत्र विद्यमानत्वात्। न चास्य स्वसङ्केतमा[52b]त्रत्वमिति वाच्यम्। एवं हि किं पर्यनुयोज्योपेक्षणं निग्रहस्थानमेव न भवतीत्यपेक्षितमत्रेति वा ? नाद्यः तस्यान्यत्र क्लृप्तशक्तिकत्वात्। नोत्तरः, इतरतुल्यतया प्रकृतेऽपि दूषणात्। अवश्योद्भाव्यसाधनानभिधानस्य तु विक्षेपरूपतया हानितया वा दूषणत्वम्। न च तथा प्रकृते, यत्तु केवलव्यरेकिणः किमभावव्याप्त्यैव गमकत्वम्, यद्वा तदवधारितस्वसाध्यप्रतिबन्धेन ? नाद्यः, अतिप्रङ्गात्। तदभावविशेषणादिति चेत्—न, तथापि लिङ्गलक्षणासंभवात्। न द्वितीयः, अन्वयित्वापत्तेरित्युक्तम्। तदुपेयभूतान्वयाभ्युपगमाद् गतार्थम्। यत्तु केवलव्यतिरेकिसाधनखण्डनम्, तत्र केवलव्यतिरेकिशब्देन पक्षमात्रवृत्तिरपेक्षितः, तदा असाधारणेन सिद्धसाधनम्। अथ सपक्षाभावे सति पक्षमात्रवृत्तिः, तदा अनुपसंहारिणा। अथोक्तमेव विपक्षव्यावृत्तिविशेषितमपेक्षितम्, तथापि तथाभूतेन बाधितविषयेण सत्प्रतिपक्षेण

वा ? अथाबाधितत्वे सत्यसत्प्रतिपक्षत्वेन विशेषणीयम् । तथाप्यस्यैव प्रमाणत्वं सिद्धमसिद्धं वा ? उत्तरस्मिन् कथं प्रकृतसिद्धिः ! प्रथमेऽप्यन्वयमात्राद् व्याप्तिपक्षधर्मताविशिष्टतया वा ? नाद्यः, अतिप्रसङ्गात् । न द्वि[53a]तीयः, तुल्यन्यायतया विरोधात् । प्रकारान्तरं त्वसंभावितमेव । तदेवं केवलव्यतिरेकी प्रमाणम्, व्याप्तिपक्षधर्मताविशिष्टतया प्रमीयमाणत्वात् । यदेवं तदेवं यथोभयवादिसिद्धमनुमानमि[त्य]लमतिविस्तरेणेति ।

अन्वयव्यतिरेकी तु विद्यमानसपक्षविपक्षो हेतुः । यथा मनो न विभु गुणत्वावान्तरजातिविजातीयगुणग्राहकेन्द्रियत्वादित्यादिः ।

ननु च शब्दस्य तत्र प्रामाण्यम्, यथा दहनेऽप्रतिबद्धस्य रासभस्य । नास्ति च शब्दस्य बहिरर्थेन संबन्ध इति । तत्रापि यदि संबन्धमात्राभिप्रायेण प्रयोगस्तदा असिद्धिः, सङ्केताभ्युपगमात् । पारमेश्वरसङ्केताभ्युपगमाच्च नातिप्रसङ्गः । अथ देशतः कालतश्च व्यभिचारादविनाभावाभावादुपेक्षितः, तदा चक्षुषा व्यभिचारः । न च रूपकार्यत्वादेव तस्यापि तत्प्रकाशकत्वम् । अविनाभावज्ञानं चानुमानाङ्गमिति न तदपेक्षा । बाह्यरसादिजन्यत्वे प्रमाणाभावाच्च न तत्प्रकाशापत्तिः । अध्यवसेयतया च वर्तमानविषयत्वमिति न प्रवृत्त्याद्यसम्भव इति वाच्यम् । संबन्धमन्तरेणाध्य]53b]वसेयत्वस्याप्यनुपपत्तेः । स्वभावसंबन्धाभ्युपगमे तु कथं तथा प्रकृतेऽपि न स्यादिति ? नाप्युक्तप्रमाणान्तर्भावादिति वाच्यम् । परोक्षार्थविषयतया प्रत्यक्षानन्तर्भावात्, पक्षधर्मत्वाद्यभावाच्च नानुमानेऽन्तर्भावः । तथा हि, यद्येते पदार्था मिथःसंसर्गवन्तो बाह्यत्वादिति प्रयोगस्तदा वैयधिकरण्यम् । पदार्थत्वात् पदैः स्मारितत्वादिति प्रयोगे चानैकान्तिकम् । एतानि पदानि स्मारितार्थसंसर्गवन्ति, तत्स्मारकत्वादित्यत्र तु मतुबर्थः संयोगः समवायो विशेषणविशेष्यभावो वा यद्यभिमतः, तदा बाधः । ज्ञाप्यज्ञापकभावस्तु यदि स्वातन्त्र्येण तदा सिद्धसाधनमपसिद्धान्तश्च । लिङ्गताविशेषणे तु दृष्टान्ते साध्यवैकल्यमनवस्था परस्पराश्रयो वा ? अथैते पदार्था मिथः संसर्गवन्तः, आकांक्षादिमद्भिः पदैः स्मारितत्वात्, गामभ्याजेति पदार्थवत् । संसृज्यमानविशेषादेव च संसर्गवैलक्षण्यान्न विशेषासिद्धिः । तदपि न, तत्र हि संसृष्टा एवेति साध्ये अनाप्तोक्तपदकदम्बस्मारितेन व्यभिचारात् । आप्तोक्तत्वेन विशेषणीयमिति चेत् ? न, आप्तत्वं हि यद्यविप्रलम्भकत्वमात्रमपेक्षितं तदा व्यभिचारात् । अथ प्रकृतबाह्यार्थज्ञानशालित्वं तदा असिद्धिः । अस्माकं तु आकांक्षादिमत्पदक[54a?]तत्कृतकं यथा घट इति । अत्रापि कृतकत्वाव्याप्तेराकांक्षिततया अनाकांक्षताभिधानादपार्थकत्वमेव । सामान्यलक्षणे दृष्टान्तस्य वैधर्म्येण विशेषणाद् वैधर्म्योदाहरणम् । यथा यन्निरात्मकं न तदिच्छावद् यथा घट इति । एतदाभासा



अपि साध्याव्यावृत्तसाधनाव्यावृत्तोभयाव्यावृत्ताश्रयहीनानुपदर्शितव्याप्तिकविपरीतोपदर्शितव्याप्तिकभेदात् षडेव । तद्यथा, साध्यवत्तया प्रमितत्वेन साध्याव्यावृत्तो यन्न नित्यं न तत् श्रावणजातीयं यथाकाशमिति । सन्दिग्धसाध्यवत्तया यथा यो महाराज्यं न करिष्यति स सोमवंशोद्भूतोऽपि न भवति, यथायं पुरुष इति । साधनवत्तया प्रमितत्वेन साधनाव्यावृत्तो यथा, यन्निरात्मकं न तन्मांसमयं यथा मृच्छरीरमिति । सन्दिग्धसाधनतया तथा सर्वज्ञो न स रागवान् यथा समस्तशास्त्राभिज्ञ इति । एवमुभयवत्तया प्रमित उभयाद्व्यावृत्तो यथा, यदनित्यं न भवति, न तत्कृतकं यथा घट इति । सन्दिग्धोभयव्यावृत्तिकस्तु यथा, यः स्वर्गं न गमिष्यति स समुपार्जितधर्मविशेषो न भवति । यथा दुःस्थ[:]·· [54b?][पु]रुष इति । आश्रयहीनस्त्वाश्रयरहिततया प्रमितो यथा, यन्निरात्मकं न तत्प्राणवद् यथा शशविषाणमिति । सन्दिग्धाश्रयस्तु यः सर्वज्ञः स देवदत्तपुत्रोऽपि न भवति यथा भविष्यद्यज्ञदत्तपुत्र इति । अनुपदर्शितव्याप्तिकं यथा, जीवच्छरीरं सात्मकं प्राणवत्त्वात् यथा घट इति । विपरीतोपदर्शितव्याप्तिकं यथा यदिच्छावन्न भवति, न तत्सात्मकम् यथा घट इति । अनयोश्चान्वयव्यतिरेकोदाहरणयोः केवलान्वयिव्यतिरेकिविषयतया परस्परमसांकर्यान्न विकल्पसमुच्च[यौ]अन्वयव्यतिरेकिणि तु सांकर्येऽपि न समुच्चयः, पौनरुक्त्यापत्तेः । नापि विकल्पः । भावप्रतिपादनमन्तरेणाभावप्रतिपादने वक्रत्वप्रसङ्गात् । तदुक्तम्,

ऋजुमार्गेण सिध्यन्तं कोऽर्थं वक्रेण साधयेत् ।

इति । न हि घटमानयेति वक्तव्ये घटमानैषीरिति वक्तारो भवन्तीति । ननु तथाप्येवमभिधाने दोषोऽभिहितः । दृश्यन्ते च वक्ररुचीनामेवं व्यवहाराः । मैवम्, भावप्रतिपादनं विना अभावाप्रतिपादनात् । तस्य चान्यत्रावगमात् । अन्यथा त[55a ?]दतिरिक्तजिज्ञासापरः स्यादिति । नन्ववयवत्वं किं सामान्यमुपाधिसामान्यं वा ? नाद्यः, तस्य वर्णेषु प्रत्येकसमुदायाभ्यामनुपपत्तेः । नापि द्वितीयः, त····नैकदेशत्वमात्रं नापि न्यायैकदेशत्वं नाप्येकवाक्यतानिबन्धनाकांक्षाविच्छेदकत्वं पर्वतोऽयमिति प्रतिज्ञैकदेशस्यावयवत्वापत्तेः । तथा च विभागभङ्गप्रसङ्गः । न्यायैकवाक्यतानिबन्धनाकांक्षाविच्छेदकमेकदेशत्वे सति न्यायैकवाक्यतानिबन्धनाकांक्षाविच्छेदकत्वं वा, न्यायेनैवाभिव्याप्तेः । न्यायैकदेशत्वे सति न्यायैकवाक्यतानिबन्धनाकांक्षाविच्छेदकत्वं तु न्यायनिरुक्तेर्गतार्थम् । तथाहि न्यायत्वं यदि व्याप्तिपक्षधर्मताविशिष्टप्रतिपादकवाक्यत्वम्, तदा व्याप्तिपक्षधर्मताविशिष्टमेतदिति वाक्यैकदेशेनातिव्याप्तिः । नापि प्रमाणसूचकत्वे सति व्याप्तिपक्षधर्मताविशिष्टाभिधायकत्वम्, असिद्धत्वापत्तेः । नापि कथकाकांक्षानुरोधेन व्याप्तिपक्षधर्मताविशिष्टप्रतिपादकत्वं कुतश्चित् प्र[55 b]सङ्गात् कथावतीर्णोक्तवाक्यैकदेशेतिव्याप्तेः । नापि पञ्चावयवत्वम्,

[55b] सङ्गात् कथावतीर्णोक्तवाक्यैकदेशेनातिव्याप्तेः । नापि पञ्चावयववत्त्वम्, अन्योन्यसंश्रयात् । प्रकारान्तरं त्वसंभावितमेवेति । मैवम्, न्यायैकवाक्यतानिबन्धनाकांक्षाविच्छेदकत्वे सति न्यायैकदेशत्वमेवावयववत्त्वम् । न्यायत्वं च वक्ष्यमाणकांक्षाविच्छेदकत्वे सति व्याप्तिपक्षधर्मताप्रतिपादकवाक्यत्वमिति । तत्रावयवत्वे सति साध्यत्वेन निर्देशः प्रतिज्ञा । निर्दिश्यते यथावत् प्रतिपाद्यतेऽनेनेति निर्देशः । आकांक्षायोग्यतासत्तिमत्पदकदम्बकरूपमपेक्षितम् । अतो न श्रमणा गर्भिणीत्यादिभिरतिव्याप्तिः । आकांक्षितधर्मविशिष्टत्वमनुमानमन्तरेण न प्रतिपादयितुं शक्यम् । तच्च न साध्यप्रतिपादनमन्तरेण प्रतिपादयितुं शक्यमिति तात्पर्यार्थत्वं तस्येति । साध्यत्वं पदार्थो वा वाक्यार्थो वा ? द्वितीयेऽपि प्रतीयमानो वा तात्पर्यार्थो वा लाक्षणिको वेत्यादेरनुपपत्तिः । ननु च प्रतिज्ञाया न साधनाङ्गत्वम् । तथा हि प्रतिज्ञायाः साधक [ka]····वगतेः । तस्माद् यद् यद् व्याप्तिपक्षधर्मताबोधकं न भवति न तन्न्यायाङ्गम् । यथा घटोऽस्तीति वाक्यम् । तादृशं च प्रतिज्ञावाक्यमिति । अत्रोच्यते, न तावदेवावभा····तिज्ञार्थकस्य कथानङ्गत्वमेवाभिमतम्, विप्रतिपत्तिवाक्यस्याप्यसंभवापत्तेः । नापि न्यायानङ्गत्वम् । तदपि सर्वथा वा स्यात्, शब्दप्रतिपाद्यतया वा ना····विप्रतिपत्तिविषयमन्तरेण न्यायाप्रवृत्तेः । द्वितीयेऽपि शब्दमात्रप्रतिपाद्यतया, न्यायैकदेशभूतशब्दप्रतिपाद्यतया वा ? नाद्यः विप्रतिपत्ति···· न्यायाप्रवृत्तेः । द्वितीयेऽपि शब्दमात्रप्रतिपत्तिवाक्यादेव लब्धत्वादवयवान्तराद् वा ? आद्येऽपि किं न्यायात्यन्तसन्निहितात्, व्यवहिताद् वा ? नाद्यः····तिज्ञाभ्युपगमापत्तेः । द्वितीयेऽपि न्यायैकवाक्यतापन्नात्, अतथाभूताद् वा ? नाद्यः, आसत्तेरभावात्, अन्यथा त्वन्तरालवर्तिवादिपरिस्थित्या····[असा]धनाङ्गवचनेन निग्रहापत्तेः । न द्वितीयः, यदुपन्यासमन्तरेण न्यायोपन्यासासंभवः, तस्य न्यायाङ्गस्य तत्प्रतिपादकन्यायैकदेशत्वमन्तरे [kb] पपत्तेः । द्वितीयेऽपि, साक्षाद् वा आक्षेपतो वा ? नाद्यः, तदाहरणादीनां तदनभिधायकत्वात् । न द्वितीयः, साध्याभिधायकस्य न्यायैकदेशव्युत्पादनात्···· पक्षेपकत्वं च तेषां प्रत्येकं मिलितानां वा ? नाद्यः, तेषा प्रत्येकं विशेषसाध्यत्वमन्तरेणाभ्युपपत्तेः । द्वितीयेऽप्याकाक्षांनुरोधेन प्रवृत्ताना····तथाभूतानां वा ? नाद्यः, प्रथमं साध्यप्रत्ययस्यैव तेनाकांक्षणात् । प्रथमतश्च साध्यप्रतीतिमात्रं तस्याभिमतमिति विशेषविकल्पानवकाशः । द्वितीये त्वन····क्षिताभिधायकत्वावसायात् तद्वचनानवधाने तदर्थप्रत्ययस्यैवाभावात् कथं ततो विशेषाक्षेपः । यत् कृतकं तदपि नित्यमित्यादिवाक्यमर्थसा····र्थ्येनापेक्षितं प्रतिपादयतीत्यवधानमत्रैति चेत्-न, तथाप्यवधानमत्रैतद्रूपावगमेऽनवगमे वा ? प्रथमेऽन्योन्याश्रयापत्तिः । द्वितीये····कथं नानवधानं प्रतिज्ञैकदेशस्य च प्रकृतानुगुणत्वमेवेति । यदि च प्रतिज्ञा नादरणीया, तदा कथं साध्यविशेषावगतिः ? तथा च कथं पक्षविशेष [57a] त्वं साक्षाद् वा स्यात्, परम्परया वा ? नाद्यः,



लिङ्गस्यैव प्रकृते तथात्वात् । तदुक्तम्,

> अर्थादर्थगतेः शक्तिः पक्षहेत्वभिधानयोः ।
> नन्वेतेन तयोर्नास्ति स्वतः साधनसंस्थितिः ॥

इति ॥ द्वितीये साधनप्रतिपाद····पक्षसपक्षविपक्षादिव्यवस्थापकत्वेन वा अवधानजनकतया वा, अन्यथा वा ? नाद्यः, तस्यालिङ्गप्रतिपादकत्वात् । तदाह,

> शब्दस्य सूच···· ऽशक्तमपि स्वयम् ।
> साध्याभिधानात् पक्षोक्तिः पारम्पर्येण नाप्यलम् ॥

इति । नापि द्वितीयः, व्याप्तिपक्षधर्म[ता]विशिष्टतया न्यायेन प्रति ····पक्षत्वात् । न चैवं पक्षस्याप्युपनयेन तथा प्रतिपादनादपक्षत्वापत्तिः । तस्योदाहरणसहकारिण एव तथा ····ायकाश्रयत्वेनोक्तस्य सपक्षत्वम् । न्याये व्यापकत्वेनोक्तस्य यत्राभावस्तस्य विपक्षत्वम् । तद्वृत्तशब्देनोदाहरणस्थितेन व्यापकत्व····भ्रान्तेर्नित्यत्वेऽपि साध्ये यत्कृतकं तदनित्यं यथा घट इति प्रयोगा [57b] न्न सपक्षत्वनिश्चयः प्रतिज्ञामन्तरेण । तथा च विरुद्धवादित्वशङ्का····फलमिति । न, प्रतिज्ञायामपि तुल्यत्वात् । प्रकरणादेर्न तत्र शङ्केति चेत् ? तुल्यम् । न तृतीयः, प्रतिवादिनः स्वत एवावहितत्वा[दनव] स्थापत्तेः । अथ यथापेक्षितं प्रतिपाद्यमिति नियमस्तदा यद्यदापेक्षितं तत् तदा प्रतिपाद्यमित्यपि । तथा च प्रथमं साध्य····पक्षिता । तदनु कुत इति साधनप्रतीतिः । तद्यदि प्रथममन्याभिधानं तदानपेक्षिताभिधायकत्वावसाये तद्वचना····विरोध्यनवधानोत्पत्त्यापत्तिः । तदपि न, तथाहि, साध्यप्रतीतिः किं तस्य लैङ्गिक्यपेक्षिता, शाब्दी वा ? नोत्तरः, हेत्वाद्यभिधानवि····ापत्तेः । द्वितीयेऽपि किं लिङ्गावगमात् पूर्वं तदनन्तरं वा ? आद्येऽशक्यत्वापत्तिः । द्वितीये तु कथं प्रथमं लिङ्गानाकाक्षा, कदा चानवधानं, न्यायैकदेशानवगतौ तदधिगतौ वा ? नाद्यः, अतिप्रसङ्गात् । न द्वितीयः, तदासा (?) [62a] त्प्रतिपादनस्याशक्यत्वात् । धर्मिविशेषनिष्ठतयैव च तदधिगतेः । व्यभिचारशङ्कायाश्च निर्मूलाया अदोषत्वात् । व्यतिरेकबाधकस्यैव बाधकत्वादिति ॥

नन्वनुसन्धानत्वं न पक्षधर्मताप्रतिपादकत्वमात्रमननुसन्धानातिव्याप्तेः । नापीदमेव सम्यक्त्वविशेषितं प्रत्यक्षातिव्याप्तेः । नाप्युक्तमेव वचनविशेषितमत्रैवातिव्याप्तेः । नापि वचनस्थानेऽन्यावयवपदप्रक्षेपान्निस्तारः, प्रत्याम्नायेनातिव्याप्तेः । न च लिङ्गस्येतिविशेषणीयमिति चेत्-धूमत्वादिनाऽतिव्याप्तेः । न च तत्र धूमसंबन्ध एव साधनमित्यभिधेयं तथा सति सत्तयोऽ(?)प्रयोगापत्तेः । न च धूमत्वमात्रसाधनत्वे यो धूम इत्यादिनिदर्शने धूमश्चायमित्यनुसन्धानापत्तावसिद्धत्वापत्तिरिति वाच्यम् । तथा सति कृतकत्वमनित्यत्वव्याप्तमित्यादिनिदर्शनापत्तेः । अथ तत्संबन्धव्याप्यत्वप्रतिपादन-

मेव तद्व्याप्यत्वप्रतिपादनम्, नन्वेवं समः समाधिः। न च धूमवत्त्वं न साधनमिति वाच्यम्। तथापि विशिष्टपूरवत्त्वादेर्लिङ्गत्वा [62b] ङ्गीकारात्। अतएव न निदर्शनापेक्षित्वेऽपि विशेषणेऽपि लक्षणनिरुक्तिः। प्रकारान्तरं त्वसम्भवमेवेति ॥

अत्रोच्यते। अवयवत्वे सति लिङ्गस्य पक्षधर्मताप्रतिपादकत्वमेवानुसन्धानत्वम्। यत्कृतकमित्यादौ तु यच्छब्देन प्रकृतं कृतकत्वमनूद्य तस्यैकार्थसमवायेनापि नित्यत्वेन व्याप्तिरभिधीयते। अन्यथा तस्या असम्भवादिति। अस्य च प्रयोजनं पक्षधर्मत्वावगमः। न च लिङ्गादेव तदाक्षेपो भविष्यतीति वाच्यम्। तद्धि प्रतीतमप्रतीतं वा? नाद्यः, अतिप्रसङ्गात्। नोत्तरः, अन्योन्याश्रयात्। व्याप्तिपक्षधर्मताविशिष्टस्य तथात्वात्। अन्यथा तु निदर्शनस्याप्यपाकरणापत्तेः। इदमपि द्वेधा। तत्रान्वयि विशेषणात् साधर्म्यानुसन्धानम्। यथा कृतकश्च शब्द इति। चकारश्चात्र व्याप्त्यानुसन्धायकः। उभयवैशिष्ट्यावसायमन्तरेणानुमित्यनुत्पत्तेः। ननु समानाधिकरणे व्याप्तिपक्षधर्मते अवयवाभ्यां प्रतिपादिते इत्यनुमितिर्भविष्यतीति किं चकारेण? मैवम्। समानाधिकरणे इति वस्तुगत्या ययोः सा [63a] मानाधिकरण्यमस्ति तयोरिति वाभिमतम्, समानाधिकरणतयैव प्रतिपादनादिति वा? नाद्यः, तथा सति कुतश्चिद् द्वेषाद् धूमत्वानाकलने द्रव्यत्वादिना समधिगतस्य धूमस्य पर्वतसम्बन्धित्वावगतौ प्रकारान्तरसञ्ज्ञातधूमवह्निव्याप्तिस्मृतावनुमित्युत्पत्त्यापत्तेः। न द्वितीयः, चकारमन्तरेण तस्यासम्भवादिति। स्यान्मतम्। यथाभूतस्य दृष्टान्ते व्याप्तिरवधारिता, तथाभूतस्य पक्षसम्बन्धज्ञानं व्याप्तिज्ञानसहकृतमित्युत्पादकम्, न, तथाभूतत्वं हि व्याप्तजातीयत्वं वा? भवान्तरजातिभेदो वा? नाद्यः, तथा सति चकारकरणापत्तेः। द्वितीये तु पक्षगतसाध्यविशेषोपनायकत्वं तज्जातीयमात्रस्य, तद्गतस्य वा? आद्येऽतिप्रसङ्गः। द्वितीये तु तत्र व्यभिचारसन्देहात् कथमनुमानम्? तज्जातीयमात्रस्य व्याप्तिनिश्चयात् कथं व्यभिचारशङ्केति चेत्? तत्किं सामान्यनिश्चय एव विशेषे शङ्कानिवारकः? अथ तज्जातीयत्वेन तत्रापि तत्राप्यव्यभिचारस्तथेति। नाद्यः, अन्यनि [63b] श्चयस्यान्यत्र शङ्काविनिवर्तकत्वाभावात्। द्वितीये तु कथं तत्प्रतिपादनार्थम्। न च कारकरणम्(?)। पृथिवीत्यादौ च पृथिव्याभाव इत्यादिव्युत्पत्तिमात्रमन्यथाऽन्योन्यसंश्रयापत्तेः। तथा च पक्षधर्मताप्रतिपादनं न तत्र व्यर्थमिति। धर्मिपदमत्रावश्यमुपादेयम्। अन्यथाऽविज्ञातार्थत्वापत्तेः। दृष्टान्तस्याप्यन्वयसंभवात्। निगमने तु आकांक्षायोग्यतासत्तिभिरनुसन्धानस्थितेनैव धर्मिपदेनान्वयान्न तदुपादानम्, न चैवं तदर्शन(?)स्थितयथाशब्दस्यापर्यवसानापत्तिः। निदर्शनार्थतया तस्य तथाशब्दानपेक्षणात्। यथा विलुप्तसकलत्रयीमूलानुसन्धाने कलावप्यधरीकृतश्रीरामचरितः पुरुषातिशयो दृश्यते यथायं सेनकुलावतंसः श्रीमान् वल्लालसेन इति ॥ ये तु तथा चायमिति कुर्वन्ति तेषां साध्यसाधनोभयप्रक्रमादविज्ञातार्थत्वापत्तिः। न च विकल्प्य तत्र वाच्यमिति वाच्यम्,



प्रकृतस्य विशेषानिश्चायकत्वात् तस्याप्रतिपत्तेः। अन्यथा प्रकरणाद्यपायापादितसन्देहाविज्ञाता [64a] पत्तिः। अतो व्याप्तिः पदार्थो बाह्यार्थो वा? आद्येऽपि यद्वृत्तप्रतिपाद्या वा, कृतकमिति प्रतिपाद्या वा, उभयप्रतिपाद्या वा? प्रतिपादनमप्यभिधावृत्त्या वा, लक्षणया वा? अभिधापि स्वसंकेतमनुरुध्य, स्वशास्त्रसंकेतेन वा, पारमेश्वरसंकेतेन वा? द्वितीयेऽपि तात्पर्यार्थरूपो वा अतथाभूतो वेत्यादेरनवकाशः। एवं च यद्यत् कृतकं तत्सर्वमनित्यमित्यप्यपास्तम्। वीप्साया वा तुल्यमात्राभिधायितया सर्वपदस्यापि कतिपये दर्शनात् तदप्रतीतेः। प्रकृतत्वापेक्षणे तु तदनुपयोगादिति। एवं च यदुक्तं कैश्चित्, प्रतिज्ञावत् प्रथममयं धर्मिनिर्देशाद् घटो यथेति वक्तव्यमिति तदप्यपास्तम्। न हि धर्ममात्रेऽयं नियमो नीलोत्पलादौ व्यभिचारात्। नापि यथापदप्रतिपाद्यो यथा गौर्गवयस्तथेत्यनेन व्यभिचारात्। प्रतिज्ञायां त्वाकांक्षाक्रमान्नियमः। प्रकृते तु निदर्शनार्थतया प्रथममप्यभिधाने न दोषः। एतदाभासाश्च साध्यविकलसाधनविकलोभयविकलाश्रयहीनविषयानुपदर्शितव्याप्तिकविपरीतोपदर्शितव्याप्तिकभेदात्। तत्र साध्यवत्ताऽप्रमितविषयत्वं साध्यविकलत्वम्। स च द्वेधा क्वचित् साध्याभाववत्तया प्रमीयमाणत्वात्। यथा कृतकत्वेन नित्यत्वसाधने यत्कृतकं तन्नित्यं यथा घट इति (?) क्व [64b] चित् साध्यसन्देहात्। यथा अयं महाराज्यं करिष्यति विशिष्टवंशजत्वात् यदेवं तदेवं यथा अन्यो दुःस्थराजपुत्र इति। एवं साधनविकलोऽपि यथा भूर्नित्या गन्धवत्त्वात्। यदेवं तदेवं यथा काल इत्यादि। अयं न सर्वज्ञः अनुपासितध्यानविशेषत्वात्। यदेवं तदेवं यथाऽपरिदृष्टपूर्वः पुरुष इत्यादि। एवमुभयविकलोऽपि यथा शब्दो नित्यः श्रावणत्वात्। यदेवं तदेवं यथा घट इत्यादि। एवमयं स्वर्गं गमिष्यति उपार्जितधर्मविशेषत्वात्। यदेवं तदेवं, यथा न सः पुरुष इत्यादि। एवमाश्रयहीनोऽपि। यथा शब्दो न नित्यः अमूर्तत्वात्। यदेवं तदेवं, यथा खरविषाणमित्यादि ! अनुपदर्शितान्वयस्तु यथा शब्दोऽनित्यः, कृत[क]त्वात्। यथा घट इत्यादि। अत्र चापदेशानन्तरं व्याप्तेराकांक्षितत्वात् तद्प्रतिपादनादनाकांक्षिततया अपार्थकत्वम्। एवं च शास्त्रे कृतिरादिवदर्थप्रत्ययः। कथायां तु परस्परप्रामाण्यानङ्गीकारान्न तथा। अन्यथा प्रतिज्ञेतरावयववैयर्थ्यापत्तिः। यत्तुल्य[ज्ञा]नत्वं कैश्चिदुक्तं तन्मीमांसकादेरेवम्भूतसिद्धान्ततया तस्य चापसिद्धान्तद्योत्यतयाऽतिमन्दम्। विपरीतोपदर्शितान्वयस्तु यथास्मिन्नेव साधने यदनित्यं [65 seems to be missing] [66a] ता वा? विभज्यमानानामन्योन्यसाकांक्षता वा? नाद्यः, आकांक्षादिमतां गामानयेत्वादीनामसत्यप्येकवाक्यत्वप्रतिपादने एकवाक्यत्वदर्शनात्। आकांक्षादिवैधुर्ये तु तद्भावेऽप्येकवाक्यत्वाभावात्, अनवस्थाप्रसङ्गाच्च। अतएव न द्वितीयः। स्यान्मतम्, कृतकत्वादित्यस्य यत्कृतकं तदनित्यमित्यादिः। कृतकश्च शब्द इत्येतस्य दशदाडिमादिवाक्यवन्निराकांक्षत्वं परिस्फुरति। अतः प्रत्याम्नायेन तस्मादिति

विशिष्टलिङ्गपरामर्शद्वारा तत्प्रतिपादकतयैकवाक्यत्वं प्रतिपाद्यते। अतएव न वाक्यान्तरापेक्षायां तदपि न, तथाहि यद्येते वस्तुतो नाकांक्षादिमन्तः, तदा वचनशतेनापि किम्? अथाकांक्षादिमन्तः, तथापि किं तद्वचनेन, तद्व्यतिरेकेणैवैकवाक्यताया दर्शनात्। अथ सत्यप्याकांक्षादिमत्त्वे वक्त्रभिप्रायनियमान्नानावाक्यत्वमुपलब्धं यथा देवदत्तो गच्छतीत्यभिधाय स एव देवदत्त एवंभूत इत्यादि तदप्यसत्। भिन्नवाक्यैरपि लिङ्गत्वावगमे एकवाक्यत्वप्रयोजनाभावात्।

संभत्येकवाक्यत्वे [66b ?] ····वाक्यभेदस्तु नेष्यते इति चेत्? तर्हि इत एव न वाक्यभेदः। अस्यैव न्यायस्य सूचनं तत्प्रयोजनमिति चेत्—न, कथायां तदनुपयोगात्। तस्मादबाधितविषयत्वासत्प्रतिपक्षत्वख्यापनमेव प्रत्याम्नायप्रयोजनम्। यदाहुर्न्यायवार्तिककाराः—

विपरीतप्रसङ्गविनिवृत्त्यर्थं निगमनमिति। विस्तरस्त्ववयवविचारो **न्यायवृत्ता**वध्यवसेय इति॥

ननूपमानं प्रमाणं भविष्यति। तथाहि यद्यपि सादृश्यमात्रविषयं नोपमानं संभवति त[थापि] सन्निहितविषयनिष्ठस्येन्द्रियेणैव परिच्छेदात्। संबन्ध्यसन्निकर्षान्न तथेति चेत्—न, स ह्यवच्छेदकोऽवच्छेद्यो वा? नोत्तरोऽसंभवात्। नाद्यः, प्रत्यभिज्ञाया अनिन्द्रियजत्वापत्तेः। असन्निहितविषयेऽपि सा गौरनेन सदृशीत्यादौ प्रत्यक्षमेव समर्थं विपरीतप्रत्यभिज्ञावदिति। ननु चात्र विशेष्येन्द्रियसन्निकर्षासंभवान्न तथा विपरीतप्रत्यभिज्ञायां तु तत्तेदन्तोपस्थितिव्यतिक्रमेऽपि विशेष्यमिन्द्रियसन्निकृष्टमेव। न चेदं स्मरणम्, पूर्वज्ञानातिरि[1a]क्तविषयत्वात्। अन्यथा स्मृतित्वविरोधादिति। तस्मात् सादृश्यज्ञानं पुरोवर्तिविषयं तत्र प्रमाणमिति। नन्वेवमेतद्विसदृशोऽसाविति ज्ञानं प्रमाणान्तरजन्यं स्यात्, न चास्य सादृश्याभावविषयतया अभावजन्यत्वमिति वाच्यम्। एतस्माद् दीर्घ इत्यादौ तदभावात्। न चैतदुपमानमेव,

> तस्माद य····र्यमेतत्स्यात् सादृश्येन विशेषितम्।
> प्रमेयमुपमानस्य सादृश्यं वा तदन्वितम्॥

इत्यादिविरोधात्। तदपि न। सादृश्यग्रहणस्य **नैयायिकानां** साधर्म्यग्रहणवदुपलक्षणार्थत्वात्। न चैवमेकलक्षणासंभवः, प्रतियोग्यनुयोगिभावावस्थितयोरन्यतरदर्शनादन्यत्र परोक्षेऽनुभव इति तद्वर्णनात्। तदप्यसमीचीनम्, प्रतियोग्यनुयोगिभावो हि यदि यस्य ज्ञानादन्यत्र ज्ञानं स प्रतियोगी, यत्र तज्ज्ञानं सोऽनुयोगीतिविवक्षितम्, तदानुमाननिराकरणापत्तिः। अथैतदेव सावधारणमपेक्षितम्, अथापि प्रमाणान्तरागम्यविषयशब्दानामुच्छेदापत्तिः। अथ विषयतयोभयनिरूप्यधर्मवतो[66b]ति विवक्षितम्। तथापि



प्राङ्नास्तितादिज्ञानकरणातिव्याप्तिः। अथ भावत्वेन विशेषणीयम्? तथापि धूमदर्शनादयं धूमो वह्निसंसर्गी धूमत्वादित्याद्युपमानत्वापत्तिः। न चावधारणादत्र निस्तारः, निराकृतत्वात्। एवं चोभयनिरूप्यधर्मवद्धर्मदर्शनादित्यप्यपास्तम्। न च तद्धर्मवतीति विशेषणीयमिति वाच्यम्। तथा सत्येतस्माद् दीर्घ इत्याद्यव्याप्तेः। न च तत्रार्थापत्तिरेवेति वाच्यम्, प्रकृतेऽपि तुल्यत्वात्। तस्मात् सा गौरनेन सदृशी स्वसादृश्येनैतदवच्छेदकत्वात्। न यदेवं न तदेवं यथा महिष इत्यादि सिद्धम्। अदृष्टसपक्षस्य चैवम्। दृष्टसपक्षस्य तु गोत्वादित्येव हेतुः। ननु स्वशब्दार्थो यदि गौस्तदा चक्षुषाऽनैकान्तिकत्वम्। अथानन्यत्वं तथापि गोत्वमेवेति तादवस्थ्यमेव। अथान्यधर्मेणावच्छेदकत्वम्, तथाप्येतावन्मात्रविवक्षया महिषादिभिर्व्यभिचारः, अथ शेषाभ्यनुज्ञया गोसादृश्यावच्छेदकत्वमभिमतम्, तदोक्तदोषतादवस्थ्यम्। अथोभयमिदमपेक्षितम्, तथापि सन्निकर्ष [67a] विशेषेण व्यभिचारः। अथैतन्निवृत्त्यर्थं करणत्वमभिमतं तदा कथं नासिद्धिरिति? न, एतत्सादृश्यावच्छेदकावयवविशेषवत्त्वस्य विवक्षितत्वादिति। तथापि कीदृग् गवय इति प्रश्नानन्तरं यथा गौर्गवयस्तथेति वनेचरवाक्यं श्रुतवतो यदा वने गोसादृश्यविज्ञानोदयेऽयमसौ गवय इति संज्ञासंज्ञिभावमतिराविरस्ति, तदा प्रमाणान्तरासामर्थ्यात् सादृश्यमेव करणतया अभ्युपगन्तव्यमिति कथं न प्रमाणान्तरत्वम्। तथा हि न तत्र प्रत्यक्षं प्रभवत्यश्रुतादिवाक्यस्यापि तथाभूतप्रतीत्यापत्तेः। नापि वाक्यमात्रम्, अनुपलब्धपिण्डस्यातत्प्रसङ्गात्। नापि समाहारः, स्वरूपतस्तस्यासंभवात्। फलद्वारा त्वनुमानप्रतिक्षेपापत्तिः। इन्द्रियव्यापारमन्तरेणापि प्रतीतिदर्शनं त्वविशिष्टम्। भवति हि विशिष्टानुसन्धानवतोऽप्यभूतपदार्थान्तरेन्द्रियसन्निकर्षात् तदा तथाभूतप्रतीत्यनुत्पादे कालान्तरे तत्स्मरणात् तथाभूतः प्रत्यय इति। नन्वागमान्तर्भावो भवत्यस्य। न च वाच्यम्, न तावद् गव [67b] यपदस्य गोसादृश्यं प्रवृत्तिनिमित्तमप्रतीतगूनां तद्व्यवहाराभावापत्तेः। नाप्युभयनिमित्तम्, तथाप्यतिदेशवाक्यस्य तत्तात्पर्यकतया तथाभूतत्वानुपपत्तेः। अन्यथा तस्यानाप्तत्वापत्तेः। सादृश्यनिमित्ततायां कल्पनागौरवाच्च॥ तस्माद् गवयत्वमत्र प्रवृत्तिनिमित्तम्। तस्य चानवगमात् कथं तत्र संकेतग्रहः? न च व [चैवं ?]गवयपदादेव तदुपस्थितिरन्योन्यसंश्रयापत्तेरिति। अध्ययनसमयगृहीतस्य वेदराशेरिव स्मर्यमाणस्यातिदेशवाक्यस्य गवयत्वावगमे संबन्धपरिच्छेदकत्वात्। न च वाक्यस्य पर्यवसन्नतया नात्र पश्चादर्थप्रतिपादकत्वमिति वाच्यम्। तथा हि पर्यवसन्नत्वं यदि यथाकथञ्चिदर्थप्रतिपादकतया, सामानाधिकरण्येनार्थप्रतिपादकतया वा? नाद्यः, अतिप्रसङ्गात्। द्वितीयेऽपि शाब्दं वा तत्स्यादार्थं वा? प्रथमेऽपि परस्पराकाङ्क्षामात्रं वा तत् स्यात् क्रियाकारकरूपतया परस्परान्वयो वा? नाद्यः, माता बन्ध्येत्यादिना व्यभिचारात्। न द्वितीयः, गङ्गायां [68a] घोषः प्रतिवसतीत्यत्रापि संभवात्। द्वितीयेऽपि तथाभूतत्वेन प्रतीति-

मात्रं वा स्यात्, इदमेव वास्तवत्वविशेषितं वा ? नाद्यः, निराकृतत्वात्, द्वितीये तु यथा तत्र पदार्थपर्यालोचनया न संभव इत्यर्थान्तराधिगतिः, तथा प्रकृतेऽति सादृश्यस्य निमित्ततोपलक्षणतयोः सन्देहे पश्चात् सादृश्यनिमित्ततायां बाधकानुसन्धाने तदेव वाक्यं तत्परं स्यात्। अवश्यं च बाधकानुसन्धानमत्राङ्गीकरणीयम्। कथमन्यथा गवयत्वनिमित्तत्वावगमोऽपि स्यादिति। एतदेवाभिप्रेत्य **मीमांसावार्तिककारै**रप्युक्तम्,

एतस्मिन्नुपमानत्वं प्रसिद्धं साधने पुनः।
तस्यागमाबहिर्भावादन्यथैवोपवर्णितम् ॥

इति। तदेतदसमीचीनम्। तथाहि किं सन्देहमात्रादपर्यवसानमथ परस्परपदार्थान्वयसन्देहात् ? नाद्यः, सकलवाक्यावपर्यवसानापत्तेः। नोत्तरः, गोसादृश्यगवयपदवाच्यतयोरेकार्थसंबन्धनिश्चयात्। गङ्गायां घोष इत्यत्र तु योग्यताविरहान्न संसर्गि [68b] निश्चयः। ननु च सादृश्यं न पदार्थान्तरम्, तत्प्रत्ययस्यान्यथोपपत्तेः। नापि जातिभेदः, परापरभावानुपपत्तेः। तस्माद् भिन्नप्रधानसामान्यान्येव भूयांसि सादृश्यम्। तथा च कथं पूर्वं संज्ञिनोऽनवगम इति ? मैवम्, दर्पणमिव मुखमरविन्दमिवारविन्दमित्याद्यव्याप्तेः। प्रचुररूपेणाभेदे केनचिद् रूपेण भेदश्च सादृश्यम्। सादृश्यान्तर्भूतस्य पृथक्करणे च प्रमाणान्तरव्यापारस्यावश्याभ्युपगन्तव्यत्वादिति। अतो न शब्दात् तदर्थनिश्चयः। नाप्यनुमानात्, तथाहि गवयशब्दोऽस्य वाचकः, असति वृत्त्यन्तरेऽभियुक्तैरत्र प्रयुक्तत्वात्, गवि गोशब्दवदिति वा तत्स्यात्। यद् वाऽयमसौ गवयपद्वाच्यः, गोसदृशत्वात्। अतिदेशवाक्यावगतगवयवदिति। नाद्यः, तथा ह्यस्येति पिण्डभेदस्य वाभिधानम्, गवयत्वं वा, गोसादृश्यं वा ? नाद्यः, सिद्धसाधनात्, न द्वितीयः, संगतिनिग्रहात् पूर्वं तद्विषयप्रयोगस्यासिद्धेः। नापि तृतीयः, बाधितत्वात्। न द्वितीयः, पिण्डधर्मित्वे दूषण [69a] स्योक्तत्वात्। गवयत्वधर्मित्वे त्वसिद्धेरिति। वैधर्म्यादपि चोपमानमेव। अकृतसमयसंज्ञासमभिव्याहृतवाक्यार्थश्च संज्ञिन्यनुसन्धीयमानमुपमानमिति सिद्धमतिरिक्तमुपमानमिति ॥

तथार्थापत्तिरपि प्रमाणान्तरम्। तथाहि यद्यपि देवदत्तस्य प्रायशो गृह एव साहचर्योपलम्भाद् गृहेऽभावदर्शनात् संजातसंशयो बहिर्भावमवगच्छति प्रमाणस्यातथाभूतपरिच्छेदकतया न विनष्टेनातिप्रसक्तिः। अतएव नानुमानम्। जीवित्वसन्देहे तदनुदयादित्यसङ्गतम्। तथाह्यर्थतथात्वं किमनुपपत्तिप्रतिसन्धानाधीनविज्ञानोत्पत्तिमात्रनिबन्धनम्, अथैतस्मिन्नेव यथार्थत्वविशेषिते ? नाद्यः, अर्थापत्त्याभासानुत्पत्त्यापत्तेः। द्वितीये त्वनुमानेऽप्यनौपाधिकत्वावधारणवैयर्थ्यम्, तासु तत्र न साहचर्यं स्वरूपतोऽवधारणाङ्गमतिप्रसङ्गात्। नापि ज्ञातत्वेनाभाससाधारण्यादिति तदभ्युपगमः, तदा कथं प्रकृतेऽप्यन्यथात्वम् ? अथ जीवित्वविशेषणा [69b] न्नातिप्रसङ्गः, तदा कथं



सन्देहः ? किं चैवं प्रथमत एव गृहाभावदर्शनान्न स्याद् बहिर्भावावगमः इति। तथापि प्रमाणद्वयविरोधपूर्विका स्यात्। तथाहि गृहेऽभावप्रमाणेनाभावः परिच्छिन्नः। जीवित्वेन चानिर्धारितदेशविशेषं सत्त्वं परिच्छिन्दता गृहस्यापि विषयीकरणात् प्रमाणद्वयविरोधाद् बहिर्भावपरिकल्पनमिति। न चात्र प्रत्यक्षबाधः, तस्यानुपजीव्यत्वात्। नापि साक्षात्कारित्वमात्रेणातिप्रसङ्गात्। प्रमाणयोश्चैकविषयत्वाभिमानमात्रं विरोधः, अतो न विरुद्धधर्माध्यासापत्तिर्न्याय्यत्वापत्त्या विभिन्नविषयत्वव्यवस्थापनाद् विरोधासंभव इति। न चैवमनुमानवैयर्थ्यम्, योग्यत्वसन्देहेऽभावस्याप्रामाण्यात्। न चानुमानानङ्गीकारे विशेषविषये प्रमाणान्तरं संभवति।

एवं चाभावप्रमाणप्रतिक्षेपोऽप्यपास्तः। न च ज्ञातानुपलब्धिस्तत्परिच्छेदिका, अनवस्थादौःस्थ्यात्। न च वाच्यमनुमानादेवास्य सिद्धेरर्थापत्तिवैयर्थ्यम्, गृहाभावमात्रस्य व्यभिचारि[Qa]सन्देहवदिदमिति चेत् न, तत्रापि विशेषोल्लेखादिति। तदपि न। तथापि विद्यात्वाव्याहतेः। विशेषव्यवहाराजनकतया तथेति चेत् ? न, निर्विकल्पकसा···त्। विकल्पद्वारा तत्त्वमिति चेत्—न, इहापि जिज्ञासाद्वारा तथादर्शनादिति। तर्को नामाविद्यान्तरमिति चेत्—तस्यापि लक्षणं यद्यपि संशयनिश्च[ययोर]न्तरालभावित्वं न सङ्गतम्। निश्चयशब्देनार्थावधारणमात्रविवक्षायां संशयपदेन च तद्विशेषापेक्षायां संशयेनातिव्याप्तेः। संशयज···मात्रापेक्षायामनुमानेन। अनुमानापेक्षायां तु संशयजातीयमात्राश्रयणे असंभवित्वापत्तिः। प्रथमोत्पन्नसंशयापेक्षां तु लिङ्ग···निश्चयेनातिव्याप्तिः। तर्कोत्पाद्यनिश्चयापेक्षायां त्वात्माश्रयप्रसङ्गः। नाप्यूहत्वम्। तद्धि यदि भवेदित्याकारत्वं तदा इष्टप्रसङ्गादिभिरतिव्याप्तिः। अथ भवितव्यतात्मकत्वं, तदा भवितव्यता यदि बलवदेककोटिज्ञानता तदा तस्य न्यायानङ्गतया प्रकृतानुपयोगिता। अथ प्रतिनियतजिज्ञासा तदा त [Qb] ···द्यप्रतीतौ तेनैव ज्ञानत्वस्यैवानैकान्तिकत्वात्। अप्रती·ौ च पौनरुक्त्यात्। अविसंवादिव्यवहारजनकत्वस्य चात्रोपाधित्वादिति। अथ विद्यमानविषयत्वं तदातीतानागतविज्ञानेन व्यभिचारः। नाप्यन्यथाख्यातिविपरीतत्वं तत्प्रतीत्यप्रतीतिभ्यामनुपपत्तेः। तस्मादबाधितव्यवहारजनकत्वं वाच्यम्। तथा च बाधः। प्रकारान्तरं त्वसंभावितमेवेति। यथा च मिथ्याज्ञानाभ्युपगमेऽप्याश्वासस्तथा वक्ष्यते। अन्यथा कथं व्यवहारविसंवादेऽप्याश्वास इति यत्किञ्चिदेतदिति। नन्वनध्यवसायोऽप्यविद्या। न च वाच्यं समुच्चिताशेषविषयत्वे विपर्ययत्वम्। अनिश्चितविशेषैकविषयत्वे, त्वविद्यात्व[व्या] कोपः। असमुच्चितनानाविषयत्वे तु संशयत्वापत्तिरिति। अबाधितनिमित्तसंज्ञाविशेषानिमित्तत्वावधारणे सत्यनिर्धारितविशेषसंज्ञानि··वत्तया ज्ञानमनध्यवसाय इति तल्लक्षणात्। अतएव नास्य संशयत्वं कोटयन्तरानुल्लेखात्। गोसहस्रपते त्वदीयैका गौः प्रसूतेति श्रवणे कतमे[ति]···[ba] नुमानभङ्गप्रसङ्गः। धूमानुसन्धानं च स्मरणोपयुक्तम्। अविनाभावानुसन्धानं च स्वकारणाधीनम्। ···पि

निराकरणात्। विपरीत…प्रमाणमन्तरेण च तर्काप्रवृत्तेः। …अविनाभूतलिङ्गदर्श[न]…ण व्यवहारविशेषोपार्जनान्न चातिप्रसङ्गः। अन्यथा तु समानः प्रसङ्ग इति। तदपि…पको यथा प्रत्यक्षाभासः। शाब्दाद्याभासात्। विलक्षणाश्चानुमानाद्याभासाः प्रत्यक्ष…नविनाव्यवहारवैलक्षण्यं न स्यात्। व्यवहारसत्यत्वेनैव च तथाभूतार्थव्यवस्थितावस…योर्वा? प्रथमेऽपि यदि भेदः स्वरूपा…स्वप्रकाशतया भेदाग्रहोऽसंभावित एव। अथ स्मृतित्वं…[bb] रेव। अथ मनोराज्ये। तथापि मनो ज्ञानग्राहकं न वा? अद्येऽपसिद्धान्तः। द्वितीये तु कथ…भ्युपगमापत्तिश्चेति। धर्मान्तरत्वे तु न तस्य भावभूतत्वमसंभवात्। नाप्यन्योन्याभाव…वित एव। धर्मरूपत्वे यथाकथञ्चिदसंभावित एव। व्यावर्तकत्वे तु व्यावृत्ता…त्वमिति। तदप्यपास्तम्। व्यवहारस्य व्यावर्त्यत्वात्। स्मृतेरनुभूतित्वे च दोषाभाववता…विषयभेदादयोऽपि च ज्ञाने भेदका धर्मा इति। एवं च **स्मृतिप्रमोषोऽपि** निरुक्तः तथा…न्यता वा? तत्ताप्यतीतकालसंबन्धो वा, अनुभूतत्वं वा स्वरूपभेदो वा स्वरूपभेदेऽपि स्मरणस्वरू[प…]

[72a] …द्व्यतिरेके…कमिति **सूत्रार्थः**। यत्तु प्रमाणयोरेकविषयत्वाभिमान एवानुपपत्तिः यद्वा एकविषतत्वाभिमानोऽनुपपन्नः। …श्चित्, विरोधार्थयोर्वा? आद्येऽतिप्रसङ्गः। द्वितीयेऽपि वध्यघातकभावो वा स्यात्, सहानवस्थानं वा? नाद्यः प्रकृते…तोऽव्यापकत्वव्याघातात्। नापि देश…तथा सत्यर्थापत्तिवैयर्थ्यात्। द्वितीयेऽप्यभिमानस्य प्रमाणत्वे विरुद्धधर्माध्यासापत्तेः। ज्ञानमात्रत्वे तु यथार्थत्वेऽप्युपपत्तौ कथं…[वि]रुद्धार्थत्वावधारणात् तथेति वाच्यम्, निराकृतत्वात्। संयोगतदभावन्यायेन भेदाभेदन्यायेन वोपपत्तेः। वस्तुस्थि…प्रकृतत्वात् अर्थापत्त्या तस्यानुदयापत्तेश्च। अथ सामान्यप्रवृत्तस्य विशेषैः…त्यसाधकाभिमान एव विरोध…मानमात्रं वा अभिमतम्, अथ यद्वस्तु गत्या…साधकं तस्य तथात्वेनाभिमान इति…योर्भिन्न[72b] …स्वपरिभाषामात्रम्। न द्वितीयः, ऊहाद्यतिरिक्तद्रव्याश्रयत्वसाधनाव्याप्तेः।…द्वयविरो[ध]…धकभावव्यवस्था न स्यात्। विशेषानभिधाने च कथमभावस्यैतत्…धाने च न प्रमाणद्वयविरो[ध]…यं तर्कस्य विरोधः। तथा हि यदि निरुपाधिकमग्नेर्धूमवत्त्वं तदा धूममन्तरेण वह्नेरसत्त्वापत्तिः। अथ…मित्यनुत्पत्तौ प्रवृत्त्याद्यसंभवापत्तिः। तदेवं विरोधे धूमस्यानौपाधिकत्वव्यवस्थितिरर्थापत्तिः। न चानुमानमत्र प्र[माणं]…नसिद्धावप्रवृत्तेः। …अनुमानान्तरापेक्षायामनवस्थितिरिति। तदपि न, यदि हि तर्कयोरेकविषयत्वं तदा निरर्थक…पूर्ववद् दोषः। यथा चानुमानेऽनौपाधिकत्वापेक्षा तथा तर्केऽपि। न च विपर्ययपर्यवसानं विना तर्कसंभव इति कुत्र[त] [73a]श्चार्थापत्तेः प्रतिनियतार्थसिद्धिः, अन्यज्ञानादन्यस्य नियामकमन्तरेण ज्ञानासंभवात्। उपपादकत्व नियामकमिति चेत्—न, उपपादकत्व…तज्ज्ञानजनकत्वं, तदपि यदि स्वरूपतस्तदानुपलब्ध्यादीनामपि तदा परिस्फुरणापत्तिः। अथ ज्ञाततया,



तदा दुरुत्तरमितरेतराश्रयणम्। नापि तत्स्वरूपजनकत्वं प्रागभावात्यन्ताभावाद्यव्यापकत्वात्। अतिप्रसक्तेश्च। नापि तत्संभवे सत्येवास्य संभवः, तद्व्यतिरेकेणास्यासंभवो वा? तथाप्येतद्रूपं ज्ञातमज्ञातं वा? नोत्तरोऽतिप्रसक्तेरर्थापत्त्याभासानवकाशाच्च। प्रथमे तु कथं व्याप्तिज्ञानापेक्षा। एतदेव प्रतिपादयितुमसूत्रयत्। प्रकारान्तरं स्वसंभावितमेवेति। एवं चानुपपद्यमानत्वमपि तस्मिन् सत्येव तज्ज्ञानमानत्वं वा, तदुत्पत्तिर्वा, स्वरूपे[प?] मात्रं वेत्यादि निरूपणीयमिति। न च व्याप्तिसंभवेऽप्यपक्षधर्मोऽर्थापत्तिरिति वाच्यम्। सामानाधिकरण्यमन्तरेण यत्तदिति यदा तदेति वा यत्र तत्रेत्येवं नियमरूपाया व्या- [73b] प्तेरसंभवात्। एवं च चैत्र इदानीं विवक्षितगेहातिरिक्तदेशसंबद्धः, जीवित्वे सत्येतज्ग[द्दे ?]हसंसर्गाभावप्रतियोगित्वात्। यथैतद्गेहद्वारस्थितं मदीयं शरीरमित्यादितो वाक्यावस्थानसिद्धिः। न चात्र विशेषणासिद्धिः। तथा सत्यर्थापत्तेरप्यनुत्थानापत्तेः। विवादाध्यासिता इदानीं मद्गेहासंसर्गवन्तः इदानीं सन्देहसंसर्गित्वेन प्रत्यक्षसिद्धदेशव्यतिभिन्नदेशत्वात्, सन्निहितयथाभूतदेशवदित्यादितश्च देशान्तरदेवदत्ताभावसिद्धिः। प्रत्यनुमाने तु सूर्यमण्डलेन व्यभिचारः। अथ समीपशब्देन देवदत्तवत्तयानुपलभ्यमानदेशत्वमभिमतं तथाप्यनुपलब्धिविषयत्वमात्रापेक्षायामसिद्धिः। योग्यानुपलब्धिविवक्षायां त्वयोग्यदेशेन शब्दावगम्यमानतदभावताव्यभिचारः। एवं च **वाराणसी** इदानीं मद्गेहसंसर्गाभाववती, इदानीं मद्गेहसंसर्गाभावप्रतियोगित्वात्। सन्देहवदित्याद्यपि सुन्दरम्। एवं च शरीरः घटायोग्यावयवासन्निकृष्टम्। घटव्यवहितदेशत्वात्। न यदेवं न[74a]…कृष्टं शरीरमित्यादि। व्यवहितदेशत्वं च संयुक्तसंयोगभूयस्त्वालिङ्गितम्। त्रसरेण्ववयवा घटसंयुक्ताः, घटसंयोगावच्छेदकत्वात्। घ…तदवच्छेदकत्वं चोभयवादिसिद्धम्। अन्यथा अव्याप्यवृत्तित्वानुपपत्तेः। यद् वा त्रसरेणुर्घटसंयुक्तावयवसमवेतः घटसंयुक्त…घटसंयुक्ते घटवदित्यादि। अतिसन्निहितदेशवर्तिघटे तु नेदानीं नापि तदव्यवहितपूर्वकाले तदवयवासंयोगसिद्धौ प्रमाणमस्ति। त…रेणुर्न तत्पूर्वतरकाले तत्संयुक्तावयवाश्रितः। तदसंयुक्तत्वेनोपलभ्यमानत्वात्, तथाभूतघटवदित्यादि। यत्तु…उदाहरणम्, तदन्यथोप[प]त्त्या प्रतिहतम्। ननु न तावत् करतलानलसंयोगमात्रेणान्यथोपपत्तिः। प्रतिपक्षमण्यसन्निधानेऽपि स्फो[74b]…नाप्यदृष्टविशेषवत् करतलानलसंयोगेन। दृष्टसंभवेऽदृष्टवैगुण्येन कार्यानुदयसंभवात्। अन्यथा कारणलिङ्गकानुमानभङ्गप्रसङ्गात्। …न तन्निवर्तकं कारणमस्ति। तस्यैतद्विनाशकत्वे तु द्वयमेव विनाशकारणम्, विरोधी धर्मः, कारणविनाशश्चेत्यादिविरोध…प्युत्तरकालं तज्जन्म। तदभावादेवेति चेत् न, तत्रापि प्रागभावादिविकल्पानुपपत्तेः तदवस्थत्वादिति। अथ प्रतिबन्धकाभाववि…योगेन। तथाहि, प्रतिबन्ध एव प्रतिबन्धक इत्यभिमानेऽपसिद्धान्तापत्तिः। किं च प्रतिबन्धत्वं कारणापचयकारित्वम्, तत्र स्वाभावरू…कारित्वेऽपसिद्धान्तापत्तिः। कारणान्तराभिधाने तु नैन्द्रियकस्य प्राग्वत् प्रत्यभिज्ञायमान-

त्वादसंभवः। अतीन्द्रियत्वे तु अदृष्टरूपत्वं नि····शितत्वे कथं शक्त्यभावः। अथ कारणविरहत्वं तदा तदभावानां यदि कारणत्वं सामग्रीविरहाभावतया तदा विशेषणस्य विशेष्याभेदा[75a][प]त्तिः। किं च सामग्री यदिकरतलानलसंयोगमात्रं तदातिप्रसङ्गः। अतएव नाभावविशिष्टकरानलसंयोगादिरपि। नापि प्रतिबन्धाभावविशिष्टकरानलसंयो[गा]देश्चक्रकापत्तेः। अथमण्यादिभावतया, तथापि किं प्रत्येकाभावतया, समुदायाभावतया वा? नाद्यः, ओषध्यादिसंभवे कार्योत्पत्त्यापत्तेः। द्वितीये····समुदायस्यैव प्रतिबन्धकत्वापत्तौ दोषतादवस्थ्यमेव। नापि प्रतिबन्धतया। प्रतिबन्धत्वं हि कार्याभावव्याप्यत्वं वा, कारणविरहत्वमेव वा? आद्येऽपि कार्याभावो व्याप्यो यस्येति वा स्यात्, कार्याभावस्य व्याप्य इति वा? नाद्यो व्यभिचारात्। द्वितीये मण्यादिरूपतया वा तद्व्याप्यत्वं स्यात्, कारणविरहरूपतया वा? नाद्यः, सामग्रीविरहस्योपाधेर्विद्यमानत्वात्। विपक्षबाधकासंभवेन न प्रसिद्धोपाधिवन्न साधनव्यापकत्वम्। मणेरेव सामग्रीवि[····]यत्वान्न तथेति चेत्—नन्वेवमन्योन्यसंश्रयापत्तिः। अत एव न द्वितीयः। न चाभावस्य कारणत्वं तुच्छत्वात्। सन्ध्याकरणाभावे च तत्कालेऽन्यकरणं [75b]····यजनकम्। अनुपलम्भश्च नोपलभ्यते शक्तिविशेषालिङ्गिताधारः। संयोगविनाशकारणञ्च फले शक्तिभेद इति। न चाभावस्य कारणत्वं संभवति। प्रागभा[व]····विकल्पानुपपत्तेः। अन्योन्याभावातिप्रसक्तेः, संसार्गाभावानिरुक्तेश्च। तथाहि संसर्गस्याभाव इति वा स्यात्, उपाधिविशेषालिङ्गितो वा? नाद्यः, दोषतादवस्थ्यात्। द्वितीये तूपाधिर्यदि प्रतियोगिद्वयनिरूपणोत्थापितसंसर्गनिषेधद्वारकनिषेधत्वम्, तदोत्थापितत्वं यदि जन्यत्वं तदा रूपादिप्रागभावाद्यव्याप्तिः। अथ निरूप्यत्वं, तदा पौनरुक्त्यम्। अथ देशान्तरवर्तिघटसंसर्गनिषेधे एतत्संभवति। समवायद्वारा स्यादिति चेत्—न, तस्य तदा द्वारीभूतत्वं····निषेधमात्रेऽन्योन्याभावासंभवात्। नापि संसर्गाभावे तदनिरुक्तेः। अथाधिकरणासामानाधिकरण्येनावभासमानाभावत्वं, तदाऽमणिर्वह्नि····इत्याद्यव्याप्तिः। अथान्योन्याभावेतरत्वं तदापीतरत्वं यदि धर्मभेदस्तदानुत्तरमेव। अथेतरेतराभावः, तदापसिद्धान्तोऽनवस्थाप्रसङ्गश्च। नापि स्वरूप [76a] भेदः, तस्यासाधारणत्वात्, नञर्थानिरुक्तेश्च। नापि सामनदेशप्रतियोगिसंसर्गव्यवहारविरोधित्वम्, विरोधार्थानिरुक्तेः। अथ प्रतिबन्धत्वाददोषः—न, तदनिरुक्तेः, चक्रकापत्तेश्च। प्रकारान्तरं त्वसंभावितमेवेति।

नन्वेवं व्यतिरेकासिद्ध्यापत्तिः। न च शक्तिविशेषमादाय निस्तारः, तस्य शक्यनिष्ठत्वात्। तदपि न, प्रागभावादिरूपतयाव्याप्यत्वाद् व्यापकत्वाच्चेति। उत्तेजकमन्त्रसन्निधाने च कथं न कार्यजन्म। न च तदभाववैशिष्ट्यविशेषणान्निस्तारः, अपसिद्धान्तात्, उत्तेजकमात्रसहकारिणो वह्नेः स्फोटजनकत्वापत्तेश्च। किं चैवमपि



तृतीयमन्त्रपाठे कथं न कार्यजन्म। तदभावोऽपि विशेषणमिति चेत्? नन्वेवमनवस्था। अथ प्रतिबाधनतीति प्रतिबन्धकः स चास्माकं पुरुषादिः। तस्य चाभावविनिवर्तकत्वमेवेति, न, तदभावानपेक्षणात्। प्रतिबन्धकत्वस्य कुड्यादौ शरगतवेगविनाशकतया भावकारणापचयकारित्वप्रतिबन्धाच्चेति।

अत्रोच्यते। प्रतिबन्धसंसर्गाभावविशिष्ट[76b]करानलसंयोगादेवान्यथोपपत्तिः। कारणीभूताभावत्वं च प्रतिबन्धत्वम्। कारणत्वं च मणिविशेषसंसर्गाभावरूपतया तथैव व्यतिरेकतोऽवधारणात्। न च कारणमात्रात् कार्यजन्म। तुच्छत्वं च यद्यलीकत्वं तदा विरोधो[ऽ]पक्षधर्मताऽपसिद्धान्तश्च। अथ भावान्यत्वं तदान्वयित्वे दृष्टान्ते साध्यवैकल्यम्। व्यतिरेकित्वेऽपसिद्धान्तो विपक्षबाधकाभावश्च। अथ प्रागभावादीनां दाहजनकत्वमन्योन्याभावदृष्टान्तेन साधनीयम्, तदा बाधः। अन्यथा भावस्यापि तथात्वापत्तेः। नियतान्वयादिसंभवस्तु समानः। शक्तिजनकतया अन्यथासिद्धिसंभावना तु समानैवेति। अपूर्वं च साधितम्। न च दर्शपौर्णमासाभ्य मिति तृतीयाभावभूतकार्यानुगुणतज्जन्यमन्तरेणात्मानमासादयति। संसर्गाभावश्चाभावव्याप्याभावमात्रमादाय विवेचनीयः। व्यतिरेकश्च न विशेषमादाय, प्रायश्चित्तादधर्मविनाशे दुष्ट्यविनाशसंभवात्। वै [77a] शिष्ट्यं च व्यवहारविशेषजननयोग्योपाधिमत्त्वम्। तच्चोभयवादिसिद्धम्। कथमन्यथा वैशिष्ट्योपपत्तावपि न दोषतादवस्थ्यम्। उत्तेज[क]संसर्गाभावविशिष्टस्यैव सन्निधानेन कार्यजन्मेति तस्यैव प्रतिबन्धकत्वम्। उत्तेजकत्वमपि यत्सन्निधाने मण्यादिविशेषसन्निधानेऽपि कार्यजन्म तस्य। तच्च विशिष्टस्यैव। न चानवस्था। कस्यचित् सर्वाभिभावकत्वात्। प्रतिबन्धकत्वं च यदि कारणापचयकारित्वं तदा साध्ये कारणमात्रं यद्यपेक्षितं तदा सिद्धसाधनम्। अथ प्रभूतकार्यकारणीभूतत्वम्, तदा दृष्टान्ते साध्यवैकल्यम्। साध्याविशेषश्च। भावावच्छेदानवच्छेदाभ्यां विशेष इति चेत्—न, विरोधात्। अथ भावभूतकारणापचयकारित्वम्, तदा साध्याविशेष इति। न चेदेवम्, शक्तावपि तुल्यो दोषः। तथा हि, प्रतिवन्धकेन शक्तिविनाशे इन्धनस्याप्यदाहापत्तिः। आगन्तुकदाहशक्तिमात्रनाशे च करान्तरेऽपि दाहो न स्यात्। करगतशक्तेरेव नाशे वह्न्यन्तरेणापि तद्दाहो न स्यात्। यदि शक्तिरेकैव तदा तन्नाशे वह्न्यन्तरेऽपि कथं कार्यजन्म? शक्ति ना [77b] नात्वे तु कथं न व्यभिचारः? तत्राप्येकशक्तिस्वीकारे त्वपसिद्धान्तः। यदि च शक्त्याश्रिता शक्तिरनित्या तदा कथमेकत्वम्? अथ नित्या तदा सामान्यरूपत्वापत्तौ तदाश्रयशक्तेर्गुणत्वे गुणादेर्द्रव्यत्वापत्तिरित्यलं पदार्थचिन्ताचातुर्यरहितेष्वतिनिर्बन्धेन। शक्तिविनाशे चोत्तेजकसन्निधानेऽपि कथं कार्यजन्म? उत्तेजकेनैकशक्तिजनने तु कथं परस्परव्यभिचारिभ्यः कार्याजनम्? तत्राप्येकशक्तिरस्तीति चेत्—न, परस्परव्यभिचारिषु शक्तिपरिकल्पनेऽति-

प्रसङ्गात्। पूर्वकालतोपलम्भान्नातिप्रसङ्ग इति चेत्—न, व्यभिचारित्वात्। नियतत्वविशेषणाद् अदोष इति चेत्—न, शक्त्यसिद्धौ तदसिद्धेः। उत्तेजकेन प्रतिबन्धशक्तिरेव विनाश्यत इत्यभ्युपगमेऽशक्तात् वह्नेः कार्यजन्मापत्तिः। अत एव शक्तिधर्मविनाशोऽप्यपास्तः। न चात्र शक्तिस्वीकारे प्रमाणमप्यस्ति। धर्मान्तरजनने तु तदभावे सत्येव कार्यमित्यभावकारणत्वापत्तिः, प्रागभावादिविकल्पानुपपत्तिश्च। नाप्यभिभवजननम्, सजातीयोत्कर्षक्रनाग्रहण [78a] स्यासंभवात्। अकिञ्चित्करत्वे तु प्रतिबन्धकत्वानुपपत्तिरेवेति, मन्त्रप्रयोक्त्रभिप्रायविषयकालस्य प्रतिबन्धकत्वाच्च न प्रहरादिनियमानुपपत्तिः। ऊद्ध्वंदेशदीपसंसर्गकार्यसंसर्गाभावस्य दमनकबीजादिमहकारितया न तत्राप्यनुपपत्तिः। गोमयवृश्चिकजन्यवृश्चिकेन तु न समवायिकारणानपपत्त्या शक्तिपरिज्ञानम्। पाकजरूपविशेषवत् परमाणपूर्वकावयवानामेव तथात्वोपपत्तेः। तत्संयोगानामेवासमवायिकारणत्वान्न तत्राप्यनुपपत्तिः। अदष्टादीनामेव च तत्र निमित्तत्वमिति। अथ गोमयवृश्चिकयोस्तत्कारणत्वानपपत्त्या शक्तिपरिकल्पनम्? न, कारणत्वं यदि शक्तिविशेषयोगित्वं तदा साध्याविशेषः! तत्पूर्वभावित्वमात्रविवक्षायां तु घटादिभिर्व्यभिचारः। नियतत्वविशेषणे तु प्रत्येकं व्यभिचारात् तदसंभवः। एकशक्तित्वाश्रयणे तु दुरुत्तरमन्योन्याश्रयणम्। स्यान्मतम्, तदितरकारकसन्निधानेऽपि योग्यानुपलब्धं सत् तत्सन्निधाने सत्यप्युपलभ्यत इति [78b] तत्कारणत्वसिद्धिः। न चैवं तद्यौगपद्यायातरासभादावप्यतिप्रसङ्गः। अन्यत्र गोमयवृश्चिकान्यतरसंभवे तथाभूतोपलम्भसंभ[वा]त् तत एव प्रकृतेऽपि तदुपपत्तेरिति। तदपि न, कार्यगतावान्तरजातिभेदेनैवोपपत्तेः। तत्र किं प्रमाणमिति चेत्? न, संदेहेनाप्यर्थापत्तिप्रतिक्षेपात्। स्वपक्षस्थापनायां तु उष्णकालस्य गोमयजन्यवृश्चिकसहकारिकारणत्वानुपपत्तिः। अथ तस्यापि शक्तिभेदालिङ्गिततया कारणत्वम्? नन्वेवं वृश्चिकजन्यवृश्चिकावधृतकारणभावकालभेदसहकारिणोऽपि गोमयात् तज्जन्मापत्तिः। एतेन तृणारणिजन्यत्वं वह्नित्वावान्तरजातिभेदालिङ्गित इति। तत्रापि फूत्कारादिभेदसहकारित्वानुपपत्तेः। यद्विषयप्रोक्षणेन धर्मो जनितः प्रोक्षयितुः, तस्य व्रीह्यादेः पुरोडाशोपयुक्ततया च न व्रीहीन् प्रोक्षतीत्यादौ प्रोक्षितव्रीहिपुरोडासजनकत्वान्यथानुपपत्तिरपि। नन्वेवं व्रीहीनामनीप्सितकर्मत्वापत्तिः। न चास्येष्टप्रसङ्गत्वमुख्यबाधकमन्तरेण तस्यामुख्यस्यानुपपत्तेः न, [79a] ईप्सितत्वं प्रधानफलाधारत्वम्, तदनुगुणफलाधारात्वं वा? नाद्य, सुखभेदाधिकरणत्वस्यापूर्वाधिकरणत्वस्य वा स्वयमप्यनभ्युपगमात्। द्वितीये तु कथमनीप्सितत्वमिति। **यदप्युक्तम्**—अस्तितावल्लाक्षारसावसिक्तबीजपूरबीजजनितबीजपूरतरुकुसुमारुणिमा। सोऽन्यथानुपपद्यमानः शक्तिमुपकल्पयति। तथा हि, न तावद् बीजपूरतरुमात्रात् त[ज्]जन्मातिप्रसङ्गात्। नापि लाक्षारसावसेकसध्रीचीनात्, तस्य चिन्तान्तरितत्वात्। स्वल्पीयसस्तस्मात् तादृशविस्तारानुपपत्तेश्च। नापि



लाक्षारसावसेकप्रध्वंससहकारिणस्तस्मिन् सत्यपि तदुदयात्। नापि लाक्षारसावसेकसध्रीचीनावयवजनितात्, तस्यापि हि न बीजपूरतरुमात्रकारणत्वं व्यभिचारात्। नापि तद्विशेषात्। विशेषो हि तस्येन्द्रियकोऽतीन्द्रियो वा? नाद्योऽनुपलम्भात्। द्वितीयेऽपि सामान्यभेदो वा, रूपभेदो वा, पदार्थान्तरमेव वा? नाद्यः, ऐन्द्रियकवृत्तेस्तस्यातीन्द्रियत्वानुपपत्तेः। द्वितीयेऽपि तस्य भेदो यदि जातिभेदः स प्रत्यक्षत्वाप्रत्यक्षत्वानुपपत्त्या निरसनीयः॥

[79b] अथ स्वभावः, तदा व्यभिचारान्निराकृतत्वाच्चासंभवः। तृतीये तु न कथं शक्तिसिद्धिः? नापि लाक्षारसावसेकसध्रीचीनवह्निसंयोगजनितपाकजरक्तरूपपरम्पराविशिष्टतरुरूपतया। यत्तु काण्डादावपि तथाविधरूपोपलम्भापत्तेः प्रकारान्तरमसंभावितमेवेति, तदपि न, पाकजरूपविशेषशालिद्व्यणुकादिपरम्परोत्पन्नावयवविशेषात् संयोगविशेषोपगृहीताददृष्टविशेषादिसध्रीचीनतया तदुपपत्तेः। न चाल्पपरिमाणे वृक्षविशेषस्तत्समवायिकारणम्। नाप्यसमवायिकारणम्, द्रव्यत्वात्। नापि निमित्तकारणम्। तस्मात् तस्यातिप्रसङ्गित्वादन्यत एवोपपत्तेश्च। विशेषनिमित्तं तु पाकजश्यामत्वावान्तरजातिभेदालिङ्गितरूपशालिन एवोपपन्नम्। स च जातिभेदः प्रत्यक्षग्रहणयोग्योऽपि सदृशसमुदायान्तर्भूतत्वान्माषराशिप्रविष्टमसीगुडकवन्न तथाध्यवसीयत इति। एवं च यवबीजभङ्गेऽपि परमाणुषु च यवत्वादिभेदस्य व्यञ्जकाभावेनानुपपत्तावपि नानुपप[80a]त्तिः। परत्वादिनाशे तु सकलकार्याजनककारणविनाशतया कारणत्वम्। विरोधिगुणप्रादुर्भावादाश्रयविनाशाच्च विनाशे साश्रयनिराश्रयभेदादुपपादनीयम्। सामान्यतस्तु प्रयोजनविशेषवत् कालादिति। एवं च समवाय्यसमवायिविनाशाद् द्रव्यविनाशेऽपि। यद्वा तत्रासमवायिविनाश एव निदानम्। उभयकालनिराश्रयस्थितिस्तु न दोषायेति। अथ प्रतिष्ठितप्रतिमादौ पूजादिना धर्मादिदर्शनात् शक्तिसिद्धिः। तथाहि न तत्र यजमानधर्ममादायान्यथोपपादनम्। तद्विनाशेऽपि तथाभावाद् ईश्वरप्रतिष्ठिताव्याप्तेश्च। अतएव न तद्विषयेण प्रतिष्ठाविधिना धर्मो जनित इत्ययमविशेषः। अदृष्टासिद्धिप्रसङ्गाच्च। नापि देवतासन्निधानं, तद्धि यदि देवतासंयोगः तदा अतिप्रसङ्गः। अथ देवताशरीरसंयोगः, तदा तद्यदि दृश्यम्, तदा योग्यानुपलम्भप्रतिक्षेपः। अथादृश्यम्, तदापि तद्यद्येकम्, तदा व्यापकत्वे दोषतादवस्थ्यम्, अव्यापकत्वे त्वेकदोषजायमातसमस्तभूमितलप्रतिमास्पर्शादिपुण्याद्यनुपपत्तिः। अथानेकम्, तथा [80b] पि तस्य शरीरत्वं साक्षात्प्रयत्नाधिष्ठितत्वं तथाभूतत्वे सत्यन्त्यावयवित्वं वा तदातिप्रसङ्गः। तदिन्द्रियाश्रयत्वं तद्भोगायतनत्वं च तज्ज्ञानस्य नित्यत्वाद् भोगाभावादसङ्गतम्। देवतायाः सर्वज्ञतया अहङ्कारश्चासंभावित एव तत्र। ममकारार्थश्च यद्युपकारकत्वं तदापसिद्धान्तः। अथ तज्जन्यत्वम्, तत्संयोगित्वं तज्ज्ञानविषयत्वं वा तदातिप्रसङ्गः। समत्वेन नास्तीति चेत्—न, तस्याविवेचनात्।

अथोपचरितशरीरपदविषयत्वं, तदाप्युपचारो यदि निर्निमित्तकस्तदातिप्रसङ्गः। सनिमित्तकत्वे तु निमित्तं प्रतिमात्वं वा प्रतिष्ठानुष्ठानसाहचर्यं वेत्याद्युदीरितमेव। प्रकारान्तरं त्वसंभावितमेवेति। तदपि न, मिथ्याज्ञानवासनाधारतात्मनि तथाभूतः प्रतिष्ठाविधिर्धर्मजनकस्तथाभूतस्य यो ध्वंसस्तत्सहकारिणः प्रतिमादेस्तथाभावात्। न चात्र करणत्वश्रुतिः। नापि कालनियमो नापि प्रकारान्तरेण तज्जनकधर्मान्तर-सिद्धिः। यत्र तु प्रतिष्ठापयितुः करणत्वश्रुतिः, तत्रापूर्वमभ्युपेयत एवेति। यदुद्देश-मन्त्रप्रयोगविधिना यद्विष[ka]याभूतजात्यसिद्धे : प्रतिबन्धासिद्धौ तस्यापादन-सामर्थ्याभावात्। यत्रेष्टमेवापादयति स इष्टप्रसङ्गः। यथा यदि कार्यत्वेन सकर्तृकत्व[°] स्यात्, तदा अदृष्टोद्भूतिपदवाच्यकादाचित्कस्य सहकारिभेदस्यापि सकर्तृकत्वप्रसङ्ग इति। अस्यानिष्टप्रसङ्गत्वाभावान्न प्रतिनियतजिज्ञासाजनकत्वमिति। यत्र प्रसङ्ग-विपर्य[य] साध्यं परोऽङ्गीकरोति, सोऽनुकूलः। यथा यदि कुशूलतन्त्रमिलितमङ्कुरानु-गुणसहकारिमत्स्यात् तदा अव्यवहिताङ्कुरं स्यादित्यस्यानिष्टप्रसङ्गत्वेऽप्य....पर्ययस्य। न चेदमव्यवहिताङ्कुरम्। तस्मान्न सहकारिमदित्यस्य सिद्धसाधनतया न प्रमाणत्व-मिति प्रमाणसहायत्वाभावः यत्र विपर्ययसाध्यस्य····भिमतत्वेऽपि न विपरीतसाधनस्य प्रमाणत्वं। स विपरीतापर्यवसायो। यथा यदि सकर्तृकत्वं स्यात् तदा शरीरजन्यं स्यात्, न च शरीरजन्यं तस्मादकर्तृकमित्य···समर्थविशेषणतया न प्रमाणत्वमिति प्रमाणसहायत्वासंभव इति। सत्यम् किं तु विपर्ययान्तर्भूततया पृथगनुपादानमिति॥

नन्वेवं विपर्ययत्वं क······[kb] धारणीयम्। बाधकादिति चेत्–न, तथाहि किं स्वरूपं बाध्यते, अथ फलम्, आहो विषयः? बाधाप्यसत्त्वमर्थक्रियाविनिवृत्तिर्वा? असत्त्वमपि सर्वदा वा, एकदा वा? [न प्रथ]मः, आद्ययोरसंभवात्। न द्वितीयः, सर्वज्ञानानां बाधितत्वापत्तेः। अतएव न द्वितीयः। तृतीयेऽपि सर्वदा, उत्तरकालं वा? नाद्यस्तस्योत्तरज्ञानाव···त्वात्। न द्वितीयः, समस्तनित्यविज्ञानबाधितत्वापत्तेः। कं च विपरीतार्थत्वाविशेषात् कथं पूर्वेणैव नोत्तरबाधा? उत्तरत्वमपि नियामक-मिति..न, रजतविषयेदं रजतमिति विज्ञानस्यानन्तरोत्पन्नतद्विषये नेदं रजतमिति विज्ञाने बाधापत्तेः। यथार्थत्वं प्रयोजकमिति चेत्—न, यथार्थत्वं हि यदि··धर्मः, तदा तस्य सामान्यरूपत्वे परापरभावासंभवः। उपाधिस्त्वशक्यविवेचनः। अर्थधर्मत्वे तु सामान्यरूपत्वं न संभवति सामान्यादिसंविद···कत्वात्। नापि स्वरूपविशेषः, तस्या-साधारणत्वे परस्परमव्याप्तेः। धर्मत्वे तु नोभयवादिसिद्धान्तभूतत्वं तत्तदव्याप्तेः। नापि पदार्थान्तरत्वात्। [82a]·········इत्यादि। अनुमानपूर्विका तु विशिष्टदेवता-विज्ञानेनैव गतार्था। उपमानपूर्विका तु ज्ञानविशेषापेक्षणेनान्यथोपपन्ना। अर्थापत्ति-पू[र्विका तु···त्वव्युत्पादने निराकृता। शब्दपूर्विकायां तु शाब्दी ह्याकाङ्क्षेत्यादि



यदुपन्यस्यम्, तत् सङ्केतमात्रम्, वेदार्थानुपपत्तिगम्यं च तन्······यते। वस्तुतस्तु प्रमाणान्तरगम्यमेव। बाह्यं च परिकल्पनीयं न नित्यम्। निराकृतत्वात्। नाप्यनित्यम्, तद्विरचितमभिप्राय·······ात्। द्वितीयेऽपि वेदकर्त्रभिप्रायस्थमुपाध्यायाभिप्रायस्थं वा? नाद्यः, तदनभ्युपगमात्। तदभिप्रायानुमानादेव प्रकृतसिद्धेश्च। नोत्तरः, पौ·····त्वादित्यलमतिविस्तरेण। संभवस्तु यदि खार्यां द्रोण इत्यादिज्ञानं तदानु-मानमेव······नाद् बुद्धिरबाधिता तदाऽसंभवः। तथा हि प्राचुर्यशब्देन व्यभिचारा-भाव एवाभिमतस्तदानुमानमेव। अथ क्वचिद् व्यभिचारः, तदा कथं ततस्तथाभूत-बुद्धिरतिप्रसङ्गा[त्······ककोटिकः संशय एव सः। बलवत्त्वमपि प्रचुरतद्धर्मसाहित्यं तस्येति। ऐतिह्यं तु सन्दिग्धाप्तोक्तत्वप्रवादपारम्पर्यम्। अत एव शब्दा [82b]······ पि न, तथापि तस्य यथार्थत्वे शब्दान्तर्भावात्। अन्यथा त्वप्रमाणत्वात्। वेदप्रामाण्यं चोपपादयिष्यते। चेष्टा त्वकृतसमयाभिप्रतिपादके········तापि किं कर्मादि प्रधानतया, प्रातिपदिकार्थप्रधानतया वा? नाद्यः, तदसंभवात्, अर्थविशेषव्यभिचाराच्च। भावेऽपि तद······लिङ्गत्वमेव। द्वितीये तु कथं ततो विशिष्टप्रत्ययः? गौरश्वः पुरुष इत्याद्यति-प्रसक्तेः। एवं च समयबलेन सम्यक्·········मागम इति शब्दान्तर्भावस्तस्याप्यपास्तः। तदेवं व्यवस्थितं विवादाध्यासितमनुमानं प्रत्यक्षान्यप्रमाणत्वात् ज्ञातप्रमाण······ अनुमानवदिति।

अनुमानस्य स्मृत्यधीनतया विद्यात्वेन च स्मृतिरिदानीं व्याख्येया। ननु स्मृतिः कथं विद्या? सा हि····शिष्टमर्थमिदानीमाकलयति। न च तस्य तादृशत्वम्। न च पूर्वमासीत् तथेत्येतावतैव तद्विज्ञानं यथार्थं पाकरक्तेऽपि घटे श्यामता [83a] प्रत्ययस्य यथार्थत्वापत्तेः। मैवम्, स्मृत्या वर्तमानकालस्यानुल्लेखात्। पाकरक्ते तु घटे श्यामता-प्रत्ययः कालविशेषानुल्लेखी तथ्य एवात आह,

**आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः॥ ९।१५॥**

विशेषः पुरीतत्यनवस्थानम्। चकारः प्रणिधानादिसमुच्चयार्थः, एतेन तत्सामग्री दर्शिता। ननु संस्कारे किं प्रमाणम्? स्मृतिरेव। अन्यथा पूर्वज्ञाननाशे तदनुपपत्तेः। ततो ध्वंसादेव स्यात्। प्रतियोगिपटुत्वादिभ्यश्च तद्विशेषो भविष्यति। प्रतिपक्षज्ञान-प्रागभावसहकारितया च न स्मृत्यनुच्छेदापत्तिः। यत्तु स्मृतिः प्रध्वंसजन्या न भवति, गुणत्वात् रूपवदिति संस्काराजन्यत्वं तु प्रमिताप्रमितविकल्पानुपपत्त्या न संभवतीति। तत्पाकजरूपेण व्यभिचारि। अथानुभवप्रध्वंसः स्मृतिहेतुर्न भवति, गुणप्रध्वंसत्वात् रूपप्रध्वंसवदिति? तददृष्टविशेषप्रध्वंसादिना व्यभिचारि। स्मृतिरनुभवकार्यगुणजन्या, नियमेनानुभवात् पूर्वं सह चानुत्पद्यमानत्वात्, सविकल्पकवदिति। तदपि जात्यादि-विक [83b] ल्पेन व्यभिचारि। अथ तदसाहित्यं विवक्षितम्, तथापि जागराद्यज्ञाना-

पेक्षया तदन्यज्ञानेन व्यभिचारः। अथानन्तर्यं विवक्षितम्, तदा असिद्धिः। अदृष्टमादाय तथेश्वरज्ञानापेक्षया च सिद्धसाधनमिति चेत्—न, सदृशदर्शनाद्यसंभवे जायमाना स्मृतिरसाधारणात्मविशेषगुणजन्या, अपरोक्ष[क्षा]त्वानालिङ्गितज्ञानत्वात्। यदेवं तदेवं यथानुमितिरित्यादिप्रतिपक्षप्रागभावश्च यथाकथञ्चित् सहकारी सर्वथा वा? आद्ये तदवस्थोऽतिप्रसङ्गः। द्वितीये क्वापि स्मृतिर्न स्यादिति। एवंभूतैव च विप्रतिपत्तिरन्यथा प्रमिताप्रमितविकल्पेन तदनुपपत्तेः। एवं चान्यत्रापि स्मृतित्वेन संस्कारजन्यत्वमनुमेयमिति। ननु किमिदं स्मृतित्वं यद्यनुभूतीतरज्ञानत्वं तदा परस्पराश्रयापत्तिः। अथ संस्कारजन्यज्ञानत्वं तदा प्रत्यभिज्ञयाऽतिव्याप्तेः। अथ संस्कारमात्रजन्यत्वं तदा मात्रपदेन कारणमात्रनिराकरणेऽसंभव एव। अथेन्द्रियकारणविरहः, तथापि मनसः संभवादसंभवः। अथ तत्र मनो नेन्द्रियं सं[84a] स्कारातिरिक्तप्रत्यासत्तिमतोऽसाधारणकारणनिरपेक्षस्य मनस इन्द्रियत्वमिति तदात्मप्रत्यभिज्ञानस्यानिन्द्रियजन्यत्वापत्तिः। स्मरणकारणजनकस्यापि तथात्वापत्तिश्च। अज्ञातकरणजन्यज्ञानतया च स्मृतौ द्रव्यकरणत्वमायातमिति। नापि तदुल्लेखित्वं प्रत्यभिज्ञातिव्याप्तेः। नापि तन्मात्रोल्लेखित्वमसंभवात्। नापीदन्तानुल्लेखित्वे तदुल्लेखित्वमपसिद्धान्तात्। नाप्यपरोक्षत्वानालिङ्गितत्वे सत्यज्ञातकरणजन्यज्ञानत्वम्, चक्रकापत्तेः। नापि संस्कारमात्रप्रत्यासन्तिमज्जन्यज्ञानत्वम्। प्रत्यासत्तिर्यदि प्राप्तिस्तदा अपसिद्धान्तः। अथ नियामकमात्रम्, तदा असंभवः। नापि चिरावस्थितासाधारणकारणजन्यज्ञानत्वम्, अभिनवोत्पन्नसंस्कारजन्यस्मृत्या अव्याप्तेः। तज्जातीयाभिधाने तु घ्राणसन्निकर्षाधीनधारावाहिकान्त्यानुभवेनातिव्याप्तिः। स्मृतित्वजात्यसिद्धेश्चासंभवोऽपि। असाधारणकारणशब्देन च करणविवक्षायां यदि धर्मिस्वरूपमभिमतं तदानुभवातिव्याप्तिः। व्यापारवद्वि [84b] वक्षायां चासंभवित्वापत्तिः। इतराजनककारणाभिप्रायेण त्वसंभवित्वापत्तिः। सकलकार्याजनककारणाभिप्रायेणातिव्याप्तिरसंभवो वेति। नापि पूर्वज्ञानापेक्षतद्विषयनियतत्वं तात्पर्यार्थज्ञानेन शब्दोत्पाद्येनातिव्याप्तेः। न चैतत् संभवत्यपि। तत्ताया अगृहीताया अवभासात्। न च प्रमाणान्तरेणातीतत्वमनुसन्धाय तदित्युल्लेख इति वाच्यम्। तथा सति तं घटं स्मरामीत्युल्लेखानुपपत्तेः। न चात्र प्रमाणमस्ति। अतिरिक्तस्फुरणे नियमकाभावोऽत्र प्रमाणमिति चेत्—न, प्रमाणप्रतिनियतसामर्थ्यवत् संस्कारसामर्थ्येनैवोपपत्तेः। नापि स्मृतित्वं जातिभेदः। स्मृतिव्यवहारस्य मन्वादिशास्त्रसाधारणतया प्रत्ययभेदे सामान्यविशेषसाधकत्वात्। प्रकारान्तरं त्वसंभावितमेवेति।

अत्रोच्यते। समानाश्रयजनकज्ञानविषयमात्रविषयज्ञानत्वं स्मृतित्वं तदित्यंशश्च न परिस्फुरति किन्तु प्रमाणान्तरेण तद्विषयस्य तथात्वमनुसन्धाय तथाव्यपदेशः।



एवं च [85a] तं घटं स्मरामी[ति अ]त्राप्युन्नेयम्। यद्वा विज्ञानान्तरोपनीतविशेषद्वारा सुरभिचन्दनप्रत्ययन्यायेनोपपादनीयम्। अतएव न संस्कारस्वभावपरिकल्पनापीति। एतद्विपर्ययेण चानुभवत्वमप्यवगन्तव्यम्। अतएव नास्याः प्रमात्वम्। यत् त्वत्रोक्तम्। स्मृतिः कुतः प्रमा न स्यात्? ज्ञानाधीनोत्पत्तिकत्वा[द्] यदि तदानुमितेरप्रमात्वापत्तिः। अथानधिकविषयतया तदा कथं धारावाहिविज्ञानप्रामाण्यम्? अथ जनकज्ञानयथार्थत्वाधीनयथार्थतया तथाप्यनुमिति तुल्यता। अथ स्वविषयविज्ञानप्रामाण्यापेक्षिततया, तथापि शब्दसाधारण्यमिति तदप्यनेनापास्तम्। यथार्थत्वमात्रापेक्षया तदभ्युपगमात्। यथार्थानुभवत्वापेक्षया त्वननुभवत्वात्। अथ प्रमाणशब्दवाच्यत्वम्, तदानीश्वरेच्छाप्रयुक्ते सिद्धसाधनं निरर्थकत्वापत्तिश्च। ईश्वरेच्छाप्रयुक्तत्वे तु तदभियुक्तैः कणभक्षाक्षचरणैरप्रयोगाद् बाधः। तदप्रयोगश्च तत्करणस्य प्रमाणान्तरत्वेनासंकीर्तनात्। अ[85b]साक्षात्कारिविज्ञानाकारणतया अज्ञातकारणत्वेन चोक्तान्तर्भावादिति ॥ ० ॥

तदेवं विद्यां व्युत्पाद्य तस्या अविद्यानिवर्तकतया समुपयोगात्, अविद्यासु स्वप्नस्यात्यन्तं मोक्षविरोधित्वात् प्रथमं तमेव व्याचष्टे—

**तथा स्वप्नः ॥ ९।१६ ॥**

तथेति आत्ममनसोः संयोगात् संस्कारविशेषाच्चेति। ननु किमिदं स्वप्नत्वं? न तावद् बाधितविज्ञानत्वम्, तद्धि यदि साधारणं तदा पीतशङ्खप्रत्ययप्रवाहेणातिव्याप्तिः। अथावस्थाविशेषोपादानाददोषः? न, तदसिद्धेः। निरवधारणत्वे तु स्वप्नाव्याप्तिः। इन्द्रियविशेषमुपादाय तत्राप्यस्तीति चेत्—न, जागरिततुल्यतयावभासनात्। नापि प्रचुरतरमिथ्याज्ञानत्वम्, उन्मत्तजागरतातिव्याप्तेः। अर्थक्रियाविसंवादिज्ञानत्वमिति चेत्—न, निराकृतत्वात्। अर्थक्रियाया अभावश्च किं तत्र तदनुपलम्भात्, अथ तदुपलम्भेऽपि तत्प्रत्ययस्यायथार्थत्वात्? नाद्यः, स्वप्नपरिदृष्टजलादावपि स्नानयानाद्यव[म]भानात्। द्वितीयेऽपि किं तदविनाभाविधर्मानुपलम्भात्, तस्य बाधितत्वाद् वा? ना [Pqa] द्गृहीतत्वानुसन्धानं तन्न ताव[ज्]जागरितम्, बाह्ये इन्द्रियव्यापारोपरमात्। नापि स्वप्नः। तस्य यथार्थतयानुप[ि]स्थतान्तःकरणसंपाद्यत्वादित्यत आ[ह]—

**स्वप्नान्तिकम् ॥ ९।१७ ॥**

तथेति संबन्धः। तेनात्ममनसोः संयोगात् संस्काराच्चेत्यभिसंबन्धः। तथाहि यदि तावद्विद्यमानज्ञानविषयता तदा मानसप्रत्यक्षमेव। अथा····· ·तया तदा संस्कारात् स्मृतिरेव। समानविषयतया तु धारावाहिकः स्वप्न इत्यर्थः॥

ननु यदि संस्कारात् स्वप्नः, तदानभ्यस्तमेव स्वशिरोभक्ष[ण·······ग्र]हणादि-स्वप्नो न स्यादित्यत आह—

**धर्माच्च ॥ ९।१८ ॥**

चकारादधर्मादिति । तेन कनकदण्डधारणादिकं धर्मापेक्षम् । मज्जनादिकं त्वधर्मात् । धातुदो[ष·······चकाराल्लभ्यते । तज्जाश्च स्वप्ना[ः] सुप्रसिद्धा एवेति ॥

इदानीं विपर्ययो व्याख्येयः । ननु तस्यासंभवः, तथाहीदं रजतमिति ज्ञा[नं·······तावल्लिङ्गाभासजन्यमपरोक्षाकारत्वादनुपलम्भाच्च । नापीन्द्रियजन्यं तत्सन्निकर्षाननुविधानात् । दोषसहकारितया जनयतीति चेत्—न, तषां·······[Pqb] बन्धत्वात् । न खलु दुष्टं कुटजबीजं न्यग्रोधधानामर्जयति । दवदहनदग्धवेत्रबीजे च न दोषात् काण्डाङ्कुरजन्म । किं तु रूपादिविशेषात् । एवं भस्म[क···न्नपाकशक्ति-प्रतिबन्धभूतरसाजनशक्तिर्विनाश्यत इत्यत आह—

**इन्द्रियदोषात् संस्कारदोषाच्चाविद्या ॥ ९।१९ ॥**

वेत्रबीजरूपोत्पत्तिरेव कथम् ? श···न्धो न तावद्विनाशो भस्मकेन रसजननशक्ति-विनाशेऽपि तथाभूतकार्यानुत्पत्त्यापत्तेः । भस्मकादेव तदुपपत्तौ कथं न दोषाणां वि···जंकत्वम् । नापि प्रतिबन्धः, तथा सति शक्त्यसिद्ध्यापत्तिः । अभिभवस्तु तस्या उपलब्धायाः कार्याजकत्वासंभवादप्रत्यक्षत्वादनुपपन्नः । यदि च···यमेव धर्मिणः, तदा वह्नेरेवासत्त्वापत्तिरभेदेनाभिभाव्यभिभावकानुपपत्तिश्च । अथ सहकारिसाकल्यं तदा तस्य भस्मककारणत्वमन्त·····न न समर्थेऽपि सत्त्वमेव । नापि रसजननशक्त्यभावस्यैव तथात्वं तस्य प्रध्वंसत्वे भस्मकनिवृत्तावपि तथात्वापत्तिः संसर्गाभावत्वे तु शक्त्य-सिद्ध्या···[Ga ?]क्तिस्त्वतिरिक्तासिद्धेवेति ॥ न च विपरीतकार्यापेक्षया तेषां दोष-त्वमिति संस्कारदोषश्च यतस्तदित्युल्लेखशून्यतास्मृतेरिति ॥

ननु····केचिदाहुः शुक्तिकाप्रवर्तके इदं रजतमिति विज्ञाने रजताकारः प्रतीयत इति । शुक्तिकागततया च तत्परिस्फुरणात् तत्र प्रवृत्तेः ।····विप]रीतख्यात्यापत्तिः । इष्टप्रसङ्गत्वात् । वणिग्वीथ्यादिगतरजतप्रतिभासने तु विप्रतिपत्तिरिति । एवं च यदुक्तं, यदि ज्ञानाकारपरिस्फुरणं·····कं न स्यादित्यप्यपास्तम् । स्यान्मतम् । यथा इदं रजतं नेदं रजतमिति । अनयोः समुच्चयाभिमानोऽपि नास्ति, तथा नेदं रजतं नाहं रजतमित्यन····दिति । तदपि न किमहमनहं प्रत्यययोः प्रमाणभूतयोरसमुच्चयः । आभासानाभासयोरपि वा ? नाद्यः, इष्टप्रसङ्गत्वात् द्वितीयेऽपि स·······साक्षात्कारा-साक्षात्कारयोर्वा ? नाद्यः । इष्टप्रसङ्गत्वादेव । न द्वितीयः शरीर एव व्यभिचारात् । तत्तावदसङ्गतम् । तथाहि शुक्तिका प्रव·····[Gb ?] मितिज्ञाने ज्ञानविषयनियमको



धर्मः परिस्फुरतीत्यत्र किं प्रमाणम् ? न तावदध्यक्षम् । तद्धि इदं रजतमित्येवं वा स्यात्, बाधकप्रत्य[··· 'दं रजतमित्युल्लेखापत्तेः । नापि द्वितीयः तथा सत्युक्तसमुच्चया-भिमानस्यानुपपत्तेः । नाप्यनुमानम्, तद्धि परिशेषो वा ग्रा····त्मकत्वसाधनं वा नाद्यः वणिग्वीथ्यादिगतरजताकारतया तदुपपत्तेः । दोषवशात् ज्ञानाकारबाह्यत्ववच्च तत्र तत्प्रतिभासे ।·······न द्वितीयः निराकृतत्वात् । यथार्थायथार्थज्ञानभेदमुररीकृत्य चास्याश्चिन्तायाः समारब्धत्वादिति । न चाकारबाह्यार्थप्रमाणमप्य····तमेवेति । अन्येत्वाहुः, यत्सदवभासि न तद् बाध्यमानम् । यथोभयवादिसिद्धसत्यज्ञानम् । न च नैतद् बाध्यमानमिति । यत् त्वत्रोक्तम् यदसत् तन्न···यथा गगननलिनं असच्चेदमिति, तदपि न, दृष्टान्ते साध्यवैकल्यात् । आश्रयासिद्धेर्विरोधाच्च । अरजतव्यावृत्तिविशिष्टं चासदवभासते । असत्त्व···[Ha ?] स्यानिष्टप्रसङ्गस्य वा ? नाद्योऽसिद्धत्वाद् बाधित-विषयत्वाच्च । द्वितीयेऽपि स्वविषयेऽन्यत्र वा ? प्रथमेऽपि प्रमात्वं प्रमाकारणत्वं वा, तद्विषयस्यासत् सन्नस···ति । द्वितीयेऽपि यद्व्याप्यत्वं तस्यास्ति तत्र वा अन्यत्र वा ? नाद्यः, अनिषेधात् । न द्वितीयः अतिप्रसङ्गात् । स्वविषयव्याप्यविपर्ययत्वमेव नियाम-[क····चेत्—न, अज्ञातस्यास्य नियामकत्वेऽतिप्रसङ्गात् । ज्ञानापेक्षायास्तु कथं नानु-मानसहकारित्वमिति । एतदाभासाश्च परस्परविरुद्धशिथिलमू[ल····पादकानुकूलविप-रीतापर्यवसायिनः । तत्र यत्रैकस्तर्कस्तर्कान्तरेण हन्यते स परस्परविरुद्धः । यथा यदि शब्दो नित्यः स्यात् तदा भारतर····धर्मको न स्यात् । अथानित्यस्तदा सङ्केतग्रहस्या-शक्यतया नार्थप्रतिपादकत्वं भवेदिति परस्परविरुद्धतया न प्रतिनियतजिज्ञासासंभवः । यत्र[च]वभूतप्रतिबन्धस्यासिद्धिः स शिथिलमूलः । यथा यदि कुशूलमिलितं बीजं कुर्वद्रूपत्वलक्षणजातियोगि स्यात् तदाऽव्य व]धानेनाङ्कुरजननं स्यादिति अत्र तु [Hb?] तस्यापि प्रबलानर्थनिदानतया तज्ज्ञानस्यापेक्षिततमत्वात् । प्रतिवादि-जिज्ञासायाश्चातिप्रसङ्गात् यत्र संशयविषये प्रमाणोपलम्भ इति चेत् —न, अनुपलब्ध्या-देरपरपक्षसाधारण्यात् । अयोग्यत्वान्न तथेति चेत्—किमयोग्यत्वेन साध्यसिद्धेस्तत्त्वं, तथा संभावनातो वा ? नाद्यः, अनुपलब्धिविरोधात् प्रमाणस्य तत्राप्रवृत्तेरिति । यदा तु तर्केणानिष्टोपनयनरूपेण प्रतिनियतकोटिजिज्ञासाप्रतिबन्धेन जिज्ञासाप्रतिनियमस्तदा कारणान्तराणां कर्त्रनधिष्ठिततया न प्रकृतप्रमाणसाम्यमिति । यद्वा, प्रत्यक्षस्य देशान्तरे कालान्तरे वा असामर्थ्यात् तर्कसहकारिणस्तस्य व्याप्तिनिश्चायकत्वमि[ति ।] न चैवमनवस्था । तर्कमूलभूतव्याप्तौ व्याघातात् शङ्काया संभवात् । विरोधस्य व्याघात-शब्देनाभिधाने च व्याघातं तर्कोऽनुमानं वेत्यादि दु··नानवकाशः । तदेव हि शङ्कनीयं यत्र शङ्काकारणं संभवतीति । न च प्रमाणमेवैतदास्तामिति वाच्यम् । प्रमाणत्वं जनकस्यारोपितहेतोः । [Xa] रणसहितपुरोवर्त्तिविज्ञानादेवेति कल्पनागौरवसनाथार्था-

पत्तेरेव भेदाग्रहनिबन्धनेति निश्चीयते । यत् त्वत्रोक्तम् एवं निवृत्ति' 'दाग्रहो, भेदग्रहोऽभेदग्रहो वा ? न द्वितीयतृतीयौ रजत एव नेदं रजतमिति निवृत्तौ विपरीतख्यात्यापत्तेः। प्रथमे त्विदं र[जतं'''प्रवृत्तौ विपरीतख्यातिर्युगपत्प्रवृत्तिनिवृत्ती वा ? ज्ञायमाने तु विशेषणेऽपि कथं नेदं रजतमिति विपरीतव्यवहारार्जनेन प्रवृत्तिनिवृत्ती''''अप्रतियोगिता प्रतीयमानेषु भेदाग्रहात् प्रवृत्तिरप्रतियोगिताप्रतीयमानानिष्टभेदाग्रहाच्च निवृत्तिरिति व्यवस्थापनात्। एवं च सतोऽ''वा भेदस्याग्रहात् प्रवत्तिरित्याद्यनुपपत्तिरिति । एवं च संशयपूर्वकप्रतिनियताविद्यमानव्यवहारोपार्जकभेदाग्रहानुपपत्तिरपि । तत्र' 'रस्यैव परिज्ञानादिति । यद्रूपं च प्र[ति]तीयमानं भेदं न वारयति तदग्रहश्च भेदाग्रह इति भेदस्वरूपमन्योन्याभावो वेत्यस्यानुपपत्तिः । नन्वेवं'''[Xb] पि सति नियमे ब्रह्मणोऽप्यनिर्वचनीयत्वापत्तिः । कालान्तरे निरुक्तिप्रसङ्गश्चेति । अनियतत्वे तु नासर्वज्ञमतिगोचरः । अतएव द्वितीयोप्यपास्तम् । य''''च विपरीतख्यातौ प्रमाणाभावो बाधकत्वान्न सङ्गच्छते तथा वक्ष्यते । तदपि न, प्रमाणाभावात् । बाध्यमानत्वं तु नवान्वयि न वा व्यतिरेकि भ[वितुम]र्हतीति विचारितमेव । न चात्र प्रवृत्तिरुपपद्यते । अतएव च न परिशेषोपीति । अपरे तु, विद्यमानमानपरिस्फुरणे तु बाधविधुरत्वापत्तेर''''से च प्रतीतिविरोधाद् रजतार्थिप्रवृत्त्यनुपपत्तेरन्यस्यान्यथा भाने च प्रतीतिविरोधादख्यातिमेवाभ्युपयन्ति । तदपि न रजते'' रजतार्थिप्रवृत्तेश्चानुपपत्तेरिति । संसर्गाख्यातिवादिनः पुनराहुः शुक्तिकासकले रजतार्थिप्रवृत्तेरुभयवादिसिद्धभेदाग्रहानुगृही[त''''[Ja] रेव । अथ मनोग्राह्ये । तथापि मनो ज्ञानग्राहकं न वा ? आद्येऽपसिद्धान्तः । द्वितीये तु कथ''''''''''''भ्युपगमापत्तिश्चेति । धर्मान्तरत्वे तु न तस्य भावभूतत्वमसंभवात् । नाप्यन्योन्याभा[व'' ''''''''वित एव । धर्मरूपत्वे यथाकथञ्चिदसंभावित एव । व्यावर्तकत्वे तु व्यावृत्ता''''''''''''''''त्वमिति । तदप्यपास्तम्, व्यवहारस्य व्यावर्तकत्वात् । स्मृतिरनुभूतित्वे च दोषाभावता''''''''''''''''विषयभेदादयोऽपि च ज्ञानभेदका धर्मा इति । एवं च स्मृतिप्रमोषोऽपि निरुक्तः । तथा''''''''न्यता वा ? तत्ताप्यतीतकालसंबन्धो वा, अनुभूतत्वं वा, स्वरूपभेदो वा ? स्वरूपभेदेऽपि स्मरणास्व''''''[J] नुमानभङ्गप्रसङ्गः । धूमानुसन्धानं च स्मरणोपयुक्तम् । भाविना भावानुस[न्धान]ञ्च स्वकारणाधीनम् ।''''''''''''''''''''पि निराकरणात् । विपरीत'''प्रमाणमन्तरेण च तर्काप्रवृत्तेः ।''''नाभूतलिङ्गदर्श'''''''''''''''''''''णव्यवहारविशेषोपार्जनान्न चातिप्रसङ्गः अन्यथा तु समान'''''इति । तदपि न''''''''''''''पको यथा प्रत्यक्षाभासः । शाब्दाद्याभासात् । विलक्षणाश्चानुमानाद्याभासाः प्रत्य''''''''''''''''''''न विना व्यवहारवैलक्षण्यं न स्यात् । व्यवहारसत्यत्वेनैव तथाभूतार्थव्यवस्थितावस''''''''''''योर्वा ? प्रथमेऽपि यदि भेदः स्वरूपः'''स्वप्रकाशतया भेदाग्रहोऽसंभावित एव । अथ



स्मृति''''''''''''''[Ma] धर्ममात्रज्ञानं चानभ्युपगतमेव । निर्विकल्पकेऽपि धर्मसमवायौ स्फुरत एव । अतीतानागतयोरपि तत्तदुपाध्यवच्छेदेन तथात्वात् । ज्ञानसमानकालत्वस्य च''''विव]क्षितत्वात् । सामर्थ्यं च व्याख्यातमेव । यच्च बाध्यबाधकभावनिराकरणार्थमभिहितम्, तद् यदि न तत्र बाधकं तदार्थान्तरम् । बाधकत्वे तु कथं न स्वोक्त''''क्रान्तत्वमिति यत्किञ्चिदेतत् । तस्माद् यस्य धर्मस्य यत्रैकदासिद्धौ कालान्तरेऽपि तद्धर्मिणि तद्धर्मसंसर्गाभावाभ्युपगमविरोधस्तद्धर्मयथार्थज्ञा''''म्बाधिते निपुणीभूय निरूपयितव्यमित्येषा दिक् । विस्तरस्तु **न्यायवृत्तौ** द्रष्टव्य इति ॥

नन्वार्षं ज्ञानमृषीणां कन्यकायाश्च श्वो मे भ्रातागन्तेत्यादावुपलब्धम् । न चैतदध्यक्षम् । तथा हि न तावद् बहिरिन्द्रियजतत्संबन्धाननुभवात् । न मनसो बहिरस्वातन्त्र्यात् । अन्यथानुमानवैयर्थ्यापत्तेः । नापि नयनस्पन्दादिलिङ्गकं तेषां व्यभिचारित्वात् । न च धूमवत्तदवान्तरविशेषमादाय व्यवस्था । तदनुपलम्भेऽपि जायमानत्वात् । न च प्रमाणान्त''''[Mb] [D] रोधापत्तेः । नापि वस्तुसत्त्वासत्त्वाभ्यां तथा सत्यनुमानभङ्गप्रसङ्गात् । विषयत्वं च निरूपितमेव । प्रतिबद्धपदोपादानेऽपि दोषतादवस्थ्यात् मणिप्रभा''''नं न मणिविषयव्यवहारोपार्जकं किन्तूत्तरमेव तद्विषयं ज्ञानमिति । एवं च न प्रतिबद्धपदोपादानप्रयोजनमपि पश्यामः । विपरीतख्या[ति]सिद्धेः सप्रयोजनमिति चेत्—न, इतरेतराश्रयापत्तेः । तथा चाबाधितैकत्वाध्यवसायात् ज्ञानैकत्वसिद्धिरन्यथातिप्रसङ्गात् । यत्राभे[दे'']तत्र ज्ञानमिति चेत्-न, व्यवहारसमानत्वात् । दोषात् तथेति चेत्—तुल्यम्, प्रत्यभिज्ञान्यायेन च विशेषणसंबन्ध उपवर्णनीय इति । यत्त्वत्रोक्तम्—रजतज्ञानं न शुक्तिकालम्बनं तेनाव्यपदिश्यमानत्वात्, घटज्ञानवदिति । तत्र यदि शुक्तिकात्वेनानालम्बनत्व साध्यते, तदा सिद्धसाधनम् । अथ यत्र वस्तुश[क्त्या ?] शुक्तित्वमस्ति तदनालम्बनत्वं तदा असिद्धिः । यथार्थत्वं च ज्ञेयसंबन्धमात्रम्, तदा सिद्धसाधनम् । अथ प्रतिभातप्रकारावच्छेदेनार्थक्रियाकारिविषयत्वं तदा कृ''[D]नियमेनेति चात्र व्यर्थम् सामान्यज्ञानस्य रजतार्थ्यप्रवर्तकत्वात् । संशयविशेषस्य रजतत्वालिङ्गितविषयत्वाभ्युपगमादिति । एवं च सिद्धं विवादाध्यासितं ''यथार्थं ज्ञानत्वात्, समीचीनज्ञानवद् इति । नेद रजतमिति विज्ञानस्य भेदग्राहितया च नास्य बाधितत्वम् । यदि चायथार्थं ज्ञानं स्यात् तदा शङ्कया कचि[दपि ?] समाश्वासो न स्यात् । न च संवादादिभ्यः तथेति वाच्यम् । तथा सति तेषामप्यसिद्धयापत्तेरित्यत आह,

**तद् दुऽटं ज्ञानम् ॥ ९।२० ॥**

तदित्यविद्यास्वरूपमिति । यद् वा सर्वनामप्रतिरूपमिदमव्ययमिति । तथा च विपरीतख्यातिरूपमविद्येति सूत्रार्थः । अयमाशयः पुरोवर्त्तिशुक्तिरजतव्यवहार-

जनकं ज्ञानं र···लिङ्गितत्वेन पुरोवर्तिविषयम्। पुरोवर्तिनि रजतार्थिप्रवर्तकज्ञानत्वात्। यदेवं तदेवं यथा तथाभूतरजतप्रवर्तकं रजतज्ञानमित्यादि। न च दृष्ट···साध्यवैकल्यम्। तथा सति संवादिविसंवादिरूपव्यवहारवैलक्षण्यानुत्पत्त्यापत्तेः। न च दोषमादाय व्यवस्था, तथा सति तत्कारणत्वाभ्युपग···[Mb] त्पदार्थाव्याप्तेः। तत्राप्यपरस्वोकारेऽवस्थानात् परस्पराव्याप्तेश्च। नाप्यर्थक्रियाकारित्वम्। कारित्वस्य स्वरूपत्वे दोषतादवस्थ्यम्। शक्तिरूपत्वे त्वपसिद्धान्तः। शक्तिविज्ञानाव्याप्तिश्च विपर्ययज्ञानसाधारण्याच्च। प्रतिभासमानरूपेणेति विशेषणीयमिति चेत्—न, रूपं स्वरूपं धर्मो वेत्युक्तदोषताद[वस्थ्या]दिति। नापि प्रतिभासमानधर्मवत्त्वं मतुबर्थस्य संयोगत्वे समवायत्वे स्वभावप्रत्यासत्तिरूपत्वे वा परस्परमव्याप्तेः। धर्मपारतन्त्र्यमात्ररूपत्वे त्वत···प्तेः। नापि परानात्मकत्वम्, अनात्मकत्वस्यान्योन्याभावत्वे तज्ज्ञानाव्याप्तिः। स्वरूपत्वे तु दोषतादवस्थ्यम्। परत्वं च प्रतिभासमानस्वरूपान्यत्वम् तच्च···त्यन्ताभावत्वं वा? आद्ये संसर्गारोपातिव्याप्तिः। द्वितीये त्वव्याप्यवृत्तिज्ञानाव्याप्तेरित्यत आह—

## अदुष्टं विद्या ॥ ९।२१ ॥

ज्ञानमित्यनुवृत्तेनान्वयः। ननु दोषा···न्यत्वं ज्ञानस्य कथं सिध्यति। अस्मदादिप्रत्यक्षस्य तत्रासामर्थ्यात्। विशिष्टप्रत्यक्षविषयत्वे प्रमाणाभावात्। ज्ञानमात्रस्य व्यभिचारित्वात्। विशिष्टज्ञानलिङ्गत्वे त्वसिद्धिरिति। तदपि न। प्रतिभातप्रकारवत्त्वेनार्थक्रियासामर्थ्यस्य यथार्थतया सर्वस्योपपत्तेः। प्रकारेऽपि प्रकारान्तर······[89a] रहितत्वमेव। न च भावाभाववत् परस्पररूपारोपानुपपत्तिः। तयोः परस्परविरोधितया परिस्फुरणात्। इह त्वनादिविकल्पायत्तस्वरूपतया अर्थक्रियाविरहिणोऽपि तद्रूपतया परिस्फुरणे कानुपपत्तिः? अतएव न विशेषग्रहादारोपानुपपत्तिः। विकल्पान्तरेणासत्त्वधर्मतया सिद्धेश्चासत्ख्यातित्वम्। एवं च यदुक्तम्। यद्यसत्त्वं प्रमाणागोचरत्वं तदा तत्र प्रमाणोपन्यासे विरोधः। अन्यथा तु तदसिद्धिः। अथ बाध्यत्वम्, तदा प्रतिभाभावस्य बाधात्वेन **सौगतनये** सत्ख्यात्यभावापत्तिः। अथार्थक्रियारहितत्वमभावो वा? तदा न प्रवृत्तिः स्यादिति तदपास्तम्। अध्यवसेयमुपादाय च बाध्यबाधकभावव्यवस्था। वस्तुनोऽविद्यमानवस्तुधर्मतया परिस्फुरणस्य चान्यथाख्यातित्वेनापाकरणम्। विकल्पस्य चाग्राह्य एव प्रवर्तकत्वाभ्युपगमान्न प्रवृत्त्याद्यनुपपत्तिरपीति। तदप्यसङ्गतम्। बाध्यमानं हि नान्वयि, उभयसिद्धान्वयासंभवात्। नापि केवलव्यतिरेकि, विरो [89b] धात्। अनारोपितप्रकारविषयत्वस्य चोपाधित्वात्। न चास्य साधनव्यापकत्वम्, सुषुप्त्यव्यापकत्वात्। वस्तुविषयत्वेऽप्यविद्यमानवस्तुविषयतया बाधकोपपत्तेर्विपक्षे बाधकाभावश्चेति। किं च इदमंशे अलीकविषयत्वं साध्यते,



रजतांशे वा, उभयत्र वा? नाद्योऽसिद्धेः, द्वितीये बाध्यमानत्वं, यदि तदलीकत्वप्रमितिस्तदाऽसिद्धिरेव। अथ तदभावप्रमितिस्तदा विरोधः। एवं च तृतीयोऽप्यपास्तः। यदि चालीकविषयत्वमस्य स्यात् तदा बाधकं न स्यादित्यावेदितमेवेति। अरजतव्यावृत्तौ चारजतार्थः क[थं] यदि वस्तुभूतरजताभावस्तदा तद्व्यावृत्तिर्वस्तुभूतं रजतमेव स्यात्। तथा च कथं तस्य विकल्पसंस्पर्शः। अथावस्तुभूतरजतव्यावृत्तिस्तदा कथं प्रवृत्तिः। अथ रजतत्वेन प्रतीयमानस्याभावः, तदा अन्योन्यसंश्रयापत्तिः। अध्यवसायश्च निराकृत इति न तदाश्रयणमपि युज्यत इति। अन्ये तु सदसदुभयानुभयविलक्षणविषयतया अनिर्वचनीय ख्यातित्वमास्थिषत। तथाहि न तावत् तस्य सत्त्वं युक्तम्।

[Ya]··· त्प्रतीतात् सकारणाभावात्। नाप्युभयस्य युगपत्प्रवृत्तिनिवृत्त्योरापत्तेः। **दिगम्बरमत**विलक्षणमताश्रयणेऽपसिद्धान्तात्।··········प]त्तेः। अतएव नानुभयस्याव्यावृत्तिचतुष्टमादाय चार्थवद्व्यवस्थेति। तत् तावदयुक्तम्। यथा लोकप्रसिद्धे सि·············अ]न्यथा तु विप्रतिपत्त्यसंभव···ति। स्यान्मतम्। द्वैतवादिस्वीकृतविभ्रमप्रकारेषु प्रमाणाभावोऽनर्थच···ि···ि·········कारत्वेऽसत्त्वे च प्रमाणनिराकृतमेव। भेदाग्रहार्थापत्तिविपरीतख्यातिसाधकानुमाननिराकरणं च············व]चनागोचरत्वमात्रमनिर्वचनीयत्वं स्ववचनविरोधात् नापि विचारतोऽशक्यनिश्चयत्वं सत्त्वैः सर्वदाऽ·············क्यत्वात् केनचित् कदाचिदशक्यनिश्चयत्वे तु निर्वचनीयताप्रसङ्गात्। कुतश्चाशक्यनिश्चयत्वम्? एकैककोटिश्च·········[Yb?]····तदा तदेककोटिसिद्ध्यापत्तिः। अप्रमाणत्वे त्वकारणाद् व्यावृत्तावकार्याव्यावृत्तेर्न तद्व्यावृत्तावपि तन्निश्चयव्यावृत्तिः। नापि······सर्वदा सन्दिग्धस्याशक्यनिश्चयत्वात्। कदाचित्कस्यचिन्नियतस्य सन्दिग्धत्वे तु न निर्वचनीयत्वमात्रविनिवृत्तिः। न··········त्वदृढत्वाभ्यामव्यवस्थितेः। बाधा च न विज्ञप्तिमात्रमन्यथाभूतत्वेनातिप्रसङ्गात्। नाप्येतदेव बलवत्त्वविशेषि [त·············नापि विचारजन्यत्वे···नुपप्लुतता। उभयोरप्यनाद्यविद्याधीनतयाऽविशेषात्। यदेव च·················तत्राद्ये भेदसिद्धिरेव। चतुर्थे तु प्रमाणनिरपेक्षत्वे कथं तथाभावः। तथाभावे वा कथं नातिप्रसङ्गः।············प्रामा]ण्यमिति तदपास्तम्। तदप्यसत्। तथाहि प्रमाणाभाव एकस्य सर्वस्य वा? आद्येऽप्येकदा सर्वदा वा नाद्यः, तस्या [90a] [अ]पसिद्धान्तात्। नापि संश[यः···प्यत्वेवेत्येयमनुभूयमानत्वात्। अन्यथातिप्रसङ्गः नापि स्वप्नः। अवस्थाविशेषजायमानत्वात्। नापि विपर्य[यः] तद्विषयस्य तथाभाव···र्शनमपोत्यत आह—

## आर्षं सिद्धदर्शनं च धर्मेभ्यः ॥ ९।२२ ॥

अयमर्थः। मनसा तत्त्वद्वयसहकारिणा आर्षं जन्यते। ·····यदि चैवं नाभ्युपेयते तदा योगप्रत्यक्षस्यापि प्रमाणः···त्वापत्तिः। आर्षान्तर्भावाभ्युपगमे च पूर्वसूत्रविरोधः।

मनसश्च बहिरस्वातन्त्र्ये कथं······कथं वा तत्रापि यथार्थप्रत्ययः। तत्तत्सहकारिवशादिति चेत्—न, अनुमानविलयाय···मपरोक्षत्वापत्तेर्न तथेति चेति। नन्वेतत्कथं प्रकृतेऽपि न स्यात् ? इदमपि परोक्षमेवेति। न परोक्षत्वजातेर्ज्ञातकरणजत्वाभावेनानुपपत्ते(?)रणाजन्यानुभवतया·····व्यवस्थितेश्च। तस्माद् धर्म[वि]शेषहकारिमनोजन्यतया योगिप्रत्यक्षवदिदं प्रत्यक्षमेव। यत्त्वपरोक्षमेवे·······करणकतया तु न प्रत्यक्षम्। ईश्वरे त्वौपचारिकः तज्ज्ञानप्रत्यक्षव्यवहारः। न चैवं प्रकृतेऽप्यतिप्रसङ्गः। उपचारे सति निमित्तानुस···प्यपास्तम्। मुख्यत्वसंभवे सति समस्तश्रुतीतिहासप्रसिद्धस्यौपचारिकत्वकल्पनावकाशादतिप्रसक्तेः। एवं सिद्धदर्शनमपि तथा य····याप्त्यभावान्नास्य प्रत्य·······साक्षात्कारो दत्तजलाञ्जलिः प्रसक्तः। तस्माद् विषयानियामकः सन्निकर्ष इति अतो न विद्यान्तरमि[ तितात् ]पर्यम्॥

॥ इति कणादसूत्रवृत्तौ नवमाऽध्यायः समाप्तः ॥

हरिः ओम्

creative commons

## Attribution-NonCommercial-ShareAlike 3.0 Unported

### You are free:

**to Share** — to copy, distribute and transmit the work

**to Remix** — to adapt the work

### Under the following conditions:

**Attribution** — You must attribute the work in the manner specified by the author or licensor (but not in any way that suggests that they endorse you or your use of the work).

**Noncommercial** — You may not use this work for commercial purposes.

**Share Alike** — If you alter, transform, or build upon this work, you may distribute the resulting work only under the same or similar license to this one.

### With the understanding that:

**Waiver** — Any of the above conditions can be **waived** if you get permission from the copyright holder.

**Public Domain** — Where the work or any of its elements is in the **public domain** under applicable law, that status is in no way affected by the license.

**Other Rights** — In no way are any of the following rights affected by the license:

- Your fair dealing or **fair use** rights, or other applicable copyright exceptions and limitations;
- The author's **moral** rights;
- Rights other persons may have either in the work itself or in how the work is used, such as **publicity** or privacy rights.

**Notice** — For any reuse or distribution, you must make clear to others the license terms of this work. The best way to do this is with a link to this web page.

This is a human-readable summary of the Legal Code (the full license). Disclaimer